पदपाठसहिता

ऋग्वेद-संहिता

सायणाचार्यकृत-भाष्यसंवलिता

॥श्रीगणेशायनमः॥

यस्य निःश्वसितं वेदा योवेदेभ्योखिलंजगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरम् ॥ १ ॥

अथ सप्तमाष्टकस्य प्रथमोध्यायआरभ्यते । प्रणइति षळृचं विंशं सूक्तं आंगिरसस्या-यास्यस्यार्षं गायत्रं पवमानसोमदेवताकं तथाचानुक्रान्तं—प्रणोयास्यइति । गतोविनियोगः ।

तत्र प्रथमा—

ॐम् प्रणइन्दोमहेतनऊर्मिंनबिभ्रदर्षसि । अभिदेवाँअयास्यः॥१॥

प्र । नः । इन्दो इति । महे । तने । ऊर्मिम् । न । बिभ्रत् ।
अर्षसि । अभि । देवान् । अयास्यः ॥ १ ॥

हे इन्दो सोम त्वं नोस्माकं महे महते तने धनाय प्रार्षसि प्रगच्छसि । न संप्रति अया-स्यः स्वयं ऋषिस्तवोर्मिं तरंगं बिभ्रत् धारयन् देवानभिगच्छति यद्वा ॥ १॥

१. सोम, हमारे महान् धन के लिए आते हो। तुम्हारी तरङ्ग को धारण करके अयास्य ऋषि देवों की ओर, पूजन के लिए, जाते हैं।

मतीजुष्टोधियाहितःसोमोहिन्वेपरावति । विप्रस्यधारयाकविः॥ २॥

मती । जुष्टः । धिया । हितः । सोमः । हिन्वे ।
पराऽवति । विप्रस्य । धारया । कविः ॥ २ ॥

कविः क्रान्तकर्मा सोमो विप्रस्य मेधाविनः स्तोतुः मती मत्या स्तुत्या जुष्टः सेवितः धि-या कर्मणा हितोभ[illegible]हितः परावति पवित्राद्दूरदेशे धारया हिन्वे प्रेर्यते ॥ २ ॥

२. मेधावी स्तोता ने क्रान्तकर्मा सोम की स्तुति की और उन्हें यज्ञ में नियुक्त किया। सोम की धारा दूर देश तक विस्तृत होती है।

अथ तृतीया—

अयंदेवेषुजागृविःसुतएतिपवित्रआ । सोमोयातिविचर्षणिः॥३॥

अयम् । देवेषु । जागृविः । सुतः । एति । पवित्रे ।
आ । सोमः । याति । विऽचर्षणिः ॥ ३ ॥

जागृविर्जागरणशीलोयं सोमोदेवेषु देवार्थं सुतोऽभिषुत आएति समन्ताद्गच्छति। अपिच विचर्षणिः विद्रष्टा सोमः पवित्रे याति पावनाय गच्छति ॥ ३ ॥

३. जागरणशील और विचक्षण सोम अभिषुत होकर देवों के लिए चारों ओर जाते हैं। ये दशापवित्र की ओर जाते हैं।

सनःपवस्ववाजयुश्चक्राणश्चारुमध्वरम्। बर्हिष्माँआविवासति॥४॥

सः। नः। पवस्व। वाजऽयुः। चक्राणः। चारुम्।
अध्वरम्। बर्हिष्मान्। आ। विवासति ॥ ४ ॥

हे सोम यं त्वां बर्हिष्मानृत्विगाविवासति परिचरति सत्वं नोस्मदर्थं वाजयुरन्नमिच्छन्नध्वरं हिंसारहितं यागं च चारुं कल्याणं चक्राणः कुर्वन् पवस्व क्षर ॥४ ॥

४. सोम, कुशवाले ऋत्विक् तुम्हारी परिचर्या करते हैं। हमारे लिए तुम अन्न की इच्छा करते हुए और हिंसा-शून्य यज्ञ को सुचारु-रूप से करते हुए क्षरित होओ।

सनोभगायवायवेविप्रवीरःसदावृधः। सोमोदेवेष्वायमत् ॥ ५ ॥

सः। नः। भगाय। वायवे। विप्रऽवीरः।
सदाऽवृधः। सोमः। देवेषु। आ। यमत् ॥ ५ ॥

सपवमानः सोमो वायवे वायुदेवार्थं भगाय भगदेवार्थं च विप्रवीरोविप्रैर्मेधाविभिः स्तुत्या प्रेरितः सदावृधोनित्यवृद्धोभवन् नोस्मभ्यं देवेषु स्थितं धनमायमदामयच्छतु ॥ ५॥

५. उन सोम को मेधावी लोग वायु और भग देवता के लिए प्रेरित करते हैं। सोम सदा बढ़नेवाले हैं। वे हमें देवों के पास स्थित धन दें।

सनोअद्यवसुत्तयेक्रतुविद्गातुवित्तमः। वाजंजेषिश्रवोबृहत् ॥६॥१॥

सः। नः। अद्य। वसुऽत्तये। क्रतुऽवित्।
गातुवित्ऽतमः। वाजम्। जेषि। श्रवः। बृहत् ॥ ६ ॥ १ ॥

हे सोम क्रतुवित् क्रतूनां कर्मणां लंभको गातुवित्पुण्यलोकानां अतिशयेन मार्गस्य ज्ञाता त्वं अद्यास्मिन्नहनि नोस्माकं वसुत्तये धनलाभाय बृहन्महत् श्रवोन्नं वाजं बलंच जेषि जय॥६॥

६. सोम, तुम कर्मों के प्रापक और पुण्य लोकों के अतीव मार्ग-ज्ञाता हो, तुम आज हमें धन-लाभ के लिए महान् अन्न और बल को जीतो।

॥ इति सप्तमस्य प्रथमे प्रथमोवर्गः ॥ १ ॥

सपवस्वेति षळृचं एकविंशं सूक्तं ऋष्याद्याः पूर्ववत् सपवस्वेत्यनुक्रान्तं। गतोर्विनियोगः।

तत्र प्रथमा—

सपवस्वमदायकंनृचक्षादेववीतये । इन्दविन्द्रायपीतये ॥ १ ॥

सः । पवस्व । मदाय । कम् । नृऽचक्षाः ।
देवऽवीतये । इन्दो इति । इन्द्राय । पीतये ॥ १ ॥

हे इन्दो सोम नृचक्षाः नृणां नेतॄणां द्रष्टः सत्वं देववीतये यज्ञायेन्द्रायेन्द्रस्य पीतये पानाय च मदाय मदार्थं च कं सुखं यथा भवति तथा पवस्व क्षर ॥१॥

१. सोम, तुम नेताओं के दर्शक हो। तुम देवों के आगमन या यज्ञ के लिए इन्द्र के पान मद और सुख के लिए क्षरित होओ।

सनोअर्षाभिदूत्यं१त्वमिन्द्रायतोशसे । देवान्त्सखिभ्यआवरम्॥२॥

सः । नः । अर्ष । अभि । दूत्यम् । त्वम् । इन्द्राय । तोशसे ।
देवान् । सखिऽभ्यः । आ । वरम् ॥ २ ॥

हे सोम त्वं नोस्माकं दूत्यं दूतस्यकर्मार्षाभिगच्छ । अपिच यस्त्वमिन्द्रायेन्द्रार्थं तोशसे पीयसे सत्वं सखिभ्यः प्रियेभ्योस्मभ्यं वरं श्रेष्ठं धनं देवानापवस्वेत्यर्थः ॥ २ ॥

२. सोम, तुम हमारा दूत-कर्म करो। इन्द्र के लिए तुम पिये जाते हो। तुम हमारे लिए श्रेष्ठ धन, देवों के यहाँ से, ले आओ।

उतत्वामरुणंवयंगोभिरञ्मोमदायकम् । विनोरायेदुरोवृधि ॥ ३ ॥

उत । त्वाम् । अरुणम् । वयम् । गोभिः । अञ्मः ।
मदाय । कम् । वि । नः । राये । दुरः । वृधि ॥ ३ ॥

उतापिच हे सोम यमरुणमरुणवर्णं त्वां मदाय मदार्थं वयमांगिरसायास्याः गोभिः गोविकारैः पयोभिः रंज्मोवासयामः संस्कुर्मः । कमिति पूरणं । सत्वं नोस्माकं राये धनाय दुरोद्वाराणि विवृधि विवृतानि कुरु ॥ ३ ॥

३. सोम, मद के लिए रक्त-वर्ण तुम्हें हम दुग्ध आदि से संस्कृत करते हैं। तुम धन के निमित्त, हमारे लिए, दरवाजा खोल दो।

अथ चतुर्थी—

अत्यूपवित्रमक्रमीद्वाजीधुरंनयामनि । इन्दुर्देवेषुपत्यते ॥ ४ ॥

अति । ऊँ इति । पवित्रम् । अक्रमीत् । वाजी ।
धुरम् । न । यामनि । इन्दुः । देवेषु । पत्यते ॥ ४ ॥

इन्दुः सोमोवाज्यश्वोयामनि गमने धुरं न रथस्य धुरं यथा तथा पवित्रमत्यक्रमीदतिगच्छति । देवेषु देवानां मध्ये पत्यते गच्छति च ॥ ४ ॥

४. जैसे अश्व गमन-समय में रथ की धुरा को लांघ जाता है, वैसे ही सोम दशापवित्र को लांघकर देवों के बीच जाता है।

समीसखायोअस्वरन्वनेक्रीळन्तमत्यविम् । इन्दुंनावाअनूषत॥५॥

सम् । ईमिति । सखायः । अस्वरन् । वने । क्रीळन्तम् ।
अतिऽअविम् । इन्दुम् । नावाः । अनूषत ॥ ५ ॥

अत्यविमतिक्रान्तं दशापवित्रं वने उदके क्रीळन्तं संक्रीडमानमीमेनमिन्दुं सोमं सखायः प्रियस्तोतारः समस्वरन् संस्तुवन्ति । नावाः वाचोप्यनूषतास्तुवन् । नौ अक्षरमिति वाङ्नामसु पाठात् ॥ ५ ॥

५. दशापवित्र को लांघकर जिस समय सोम जल के बीच क्रीड़ा करने लगे, उस समय प्रिय बन्धु स्तोता एक स्वर से उनकी स्तुति और वचनों के द्वारा उनका गुण-कीर्त्तन करने लगे।

तयापवस्वधारयाययापीतोविचक्षसे । इन्दोस्तोत्रेसुवीर्यम्॥६॥२॥

तया । पवस्व । धारया । यया । पीतः । विऽचक्षसे ।
इन्दो इति । स्तोत्रे । सुऽवीर्यम् ॥ ६ ॥ २॥

हे इन्दो त्वं यया धारया पीतः सन् विचक्षसे विचक्षणाय स्तोत्रे स्तोत्राणां कर्त्रे पुरुषाय सुवीर्यं शोभनवीर्यं प्रयच्छसीतिशेषः । तया धारया पवस्व क्षर ॥ ६ ॥

६. सोम, तुम उस धारा के साथ गिरो। जिस धारा का पान करने पर विचक्षण स्तोता को तुम शोभन वीर्य देते हो।

॥ इति सप्तमस्य प्रथमे द्वितीयोवर्गः ॥ २ ॥

असृग्रन्निति षळृचं द्वाविंशं सूक्तं कण्याद्याः पूर्ववत् । असृग्रन्नित्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

असृग्रन्देववीतयेत्यासःकल्व्याइव । क्षरन्तःपर्वतादृधः ॥ १ ॥

असृग्रन् । देवऽवीतये । अत्यासः । कल्व्याःऽइव ।
क्षरन्तः । पर्वतऽदृधः ॥ १ ॥

पर्वतावृधः पर्वतैरभिषवग्रावभिर्वृद्धाः पर्वतेषु वा जाताः क्षरन्तः सोमाः देववीतये यज्ञाय अत्यासोश्वाः कृत्व्याइव। यथा कर्मण्याः अश्वास्तद्वदसृग्रन् सृज्यन्ते ॥ १ ॥

१. अभिषव-प्रस्तरों से प्रवृद्ध सोम यज्ञ के लिए उसी प्रकार क्षरित होते हैं, जैसे कार्य-परायण अश्व क्षरित होते हैं (अथवा पर्वत पर उत्पन्न और क्षरणशील सोम, कार्य-पटु अश्वों के समान, यज्ञ के लिए, बनाये जाते हैं। अथ द्वितीया—

परिष्कृतासइन्दवोयोषेवपित्र्यावती। वायुंसोमाअसृक्षत ॥ २ ॥

परिऽकृतासः। इन्दवः। योषाऽइव। पित्र्यऽवती।
वायुम्। सोमाः। असृक्षत ॥ २ ॥

इन्दवोयागेषु क्रियमानाः सोमाः परिष्कृतासः परिष्कृताः अलंकृताः सन्तः पित्र्यावती पितृमती योषेवालंकृता कन्यका यथा वरं प्रति गच्छति तद्वद्वायुं प्रत्यसृक्षत गच्छन्ति ॥ २ ॥

२. पिता-द्वारा अलंकृता कन्या जैसे स्वामी के पास जाती हैं, वैसे ही सोम वायु के पास जाते हैं। अथ तृतीया—

एतेसोमासइन्दवःप्रयस्वन्तश्चमूसुताः। इन्द्रंवर्धन्तिकर्मभिः ॥ ३ ॥

एते। सोमासः। इन्दवः। प्रयस्वन्तः। चमू इति।
सुताः। इन्द्रम्। वर्धन्ति। कर्मऽभिः ॥ ३ ॥

इन्दवः दीप्ताः प्रयस्वन्तोन्नवन्तः एते अस्मिन्कर्मणि वर्तमाना अमी सोमासः सोमाः चमू चम्वोरभिषवणफलकयोः सुता अभिषुताःसन्तः कर्मभिर्यागैरिन्द्रं वर्धन्ति प्रवर्धयन्ति प्रीणयन्तीत्यर्थः ॥ ३ ॥

३. वे सब उज्ज्वल और अन्नवान् सोम प्रस्तर-फलक-द्वय पर अभिषुत होकर यज्ञ-द्वारा इन्द्र को प्रसन्न करते हैं।

आधावतासुहस्त्यःशुक्रागृभ्णीतमन्थिना। गोभिःश्रीणीतमत्सरम्॥४॥

आ। धावत। सुऽहस्त्यः। शुक्रा। गृभ्णीत।
मन्थिना। गोभिः। श्रीणीत। मत्सरम् ॥ ४ ॥

हे सुहस्त्यः शोभनहस्ता ऋत्विज आधावत मां संप्रत्यागच्छत। मंथिना सह शुक्रा शुक्र च गृभ्णीत गृह्णीत सोमं। मत्सरं सोमं गोभिर्गोविकारैः पयोभिः श्रीणीत संस्कुरुत च ॥४ ॥

४. शोभन हाथोंवाले ऋत्विको (पुरोहितो), शीघ्र आओ। मथानी (मथनेवाले दण्ड) के साथ शुक्ल-वर्ण सोम को ग्रहण करो। मदकर सोम को दूध आदि से संस्कृत या सुस्वादु करो।

अथ पंचमी–

सपवस्वधनंजयप्रयन्तारार्धसोमहः । अस्मभ्यंसोमगातुवित् ॥५॥

सः । पवस्व । धनम्ऽजय । प्रऽयन्ता । राधसः ।
महः । अस्मभ्यम् । सोम । गातुऽवित् ॥ ५ ॥

हे धनंजय शत्रुसंबंधिधनानां जेतः सोम गातुविदभीष्टमार्गस्यलंभकोस्मभ्यं महोमहतो-राधसोधनस्य प्रयन्ता प्रदाता च सत्वं पवस्व क्षर ॥ ५ ॥

५. शत्रु-धन को जीतनेवाले सोम, तुम अभीष्ट मार्ग के प्रापक हो। तुम हमें महान् धन देनेवाले हो। क्षरित होओ।

एतंमृजन्तिमर्ज्यंपवमानंदशक्षिपः । इन्द्रायमत्सरंमदम् ॥६॥ ३॥

एतम् । मृजन्ति । मर्ज्यम् । पवमानम् । दश ।
क्षिपः । इन्द्राय । मत्सरम् । मदम् ॥ ६ ॥ ३ ॥

मर्ज्यं मर्जनीयं शोध्यं पवमानं क्षरन्तं मत्सरं मदकरमेतमिमं मदं सोमं दशसंख्याकाः क्षिपोंगुलयः । विशः क्षिपइत्यंगुलिनामसुपाठात् । इन्द्राय इन्द्रार्थं मृजन्ति पवित्रे शोधयन्ति॥६॥

६. इन्द्र के लिए दसों अँगुलियां शोधनीय, क्षरणशील और मदकर सोम को दशापवित्र में शोधित करती हैं।

॥ इति सप्तमस्य प्रथमे तृतीयोवर्गः ॥ ३ ॥

अयासोमइति पंचर्चं त्रयोविंशंसूक्तं भृगुपुत्रस्य कवेरार्षं गायत्रं पवमानसोमदेवताकं । तथाचानुक्रान्तं–अयासोमः पंच कविर्भार्गवइति । उक्तोविनियोगः ।

अयासोमःसुकृत्ययामहश्चिदभ्यवर्धत । मन्दानउद्वृषायते ॥ १ ॥

अया । सोमः । सुऽकृत्यया । महः । चित् । अभि ।
अवर्धत । मन्दानः । उत् । वृषऽयते ॥ १ ॥

सोमः अया अनया सुकृत्यया शोभनया अभिषवादिलक्षणया क्रियया महश्चित् मह-तोदेवान् प्रत्यभ्यवर्धत् प्रवृद्धोभूत् मन्दानोमोदमानः उद्वृषायते वृषवदाचरति । यथा मोदमा-नोवृषभः शब्दं करोति तथाभिषववेलायामुपरवेषु शब्दंकरोतीत्यर्थः ॥ १॥

१. शोभन अभिषवादि क्रिया से ये सोम महान् देवों के प्रति प्रवृद्ध हुए। ये आनन्द के मारे वृषभ (सांड़) के समान शब्द करते हैं।

अथ द्वितीया—

कृतानीदस्यकर्त्वाचेतन्तेदस्युतर्हणा । ऋणाचधृष्णुश्चयते ॥ २ ॥

कृतानि । इत् । अस्य । कर्त्वा । चेतन्ते ।
दस्युऽतर्हणा । ऋणा । च । धृष्णुः । चयते ॥ २ ॥

अस्य यस्यैतस्य सोमस्य दस्युतर्हणा दस्यूनामसुराणां तर्हणानि नाशकानि कर्त्वा कर्माणि कृतानीद् अस्माभिरेव कृतानि सोयं धृष्णुर्धृष्टःसोमो यजमानानामृणाच ऋणान्यपि चयते कामप्रदानेन चातयति ॥ २ ॥

२. इन सोम के असुर-नाशक कर्मों को हमने किया है। बली सोम ऋणपरिशोध भी करते हैं।

आत्सोमइन्द्रियोरसोवज्रःसहस्रसाभुवत् । उक्थंयदस्यजायते॥३॥

आत् । सोमः । इन्द्रियः । रसः । वज्रः । सहस्रऽसाः ।
भुवत् । उक्थम् । यत् । अस्य । जायते ॥ ३ ॥

यद्यदास्येन्द्रस्योक्थं शस्त्रं जायते प्रादुर्भवति तदा आदनन्तरमेवेन्द्रियः इन्द्रस्य प्रियकरोरसोबलवान् वज्रोवज्रसदृशः केनाप्यहिंस्यः सोमः सहस्रसा अस्मभ्यं अपरिमितस्य धनस्य दाता भवति ॥ ३ ॥

३. जब इन्द्र का मन्त्र प्रादुर्भूत होता है, तभी इन्द्र के लिए प्रियरस, बली और वज्र के समान अवध्य सोम हमारे लिए असीम धन के दाता होते हैं।

अथ चतुर्थी—

स्वयंकविर्विधर्तरिविप्रायरत्नमिच्छति । यदीमर्मृज्यतेधियः ॥ ४ ॥

स्वयम् । कविः । विऽधर्तरि । विप्राय । रत्नम् ।
इच्छति । यदि । मर्मृज्यते । धियः ॥ ४ ॥

यदि कविः क्रान्तकर्मायं सोमो धियोधीभिः विभक्तिव्यत्ययः धीभिरंगुलीभिरित्यर्थः। मर्मृज्यते शोध्यते तर्हि स्वयं स्वयमेव विप्राय मेधाविने विधर्तरि कामानां विधातरीन्द्रे रत्नं रमणीयं धनमिच्छति । इन्द्रेण धनं दापयितुमिच्छतीत्यर्थः ॥ ४ ॥

४. यदि क्रान्तकर्मा सोम अँगुलियों से शोधित किये जाते हैं, तो वे स्वयं मेधावी के लिए कामधारक इन्द्र से रमणीय धन देने की इच्छा करते हैं।

अथ पञ्चमी—

सिषासतूरयीणांवाजेष्वर्वतामिव । भरेषुजिग्युषांमसि ॥ ५ ॥४॥

सिसासतुः । रयीणाम् । वाजेषु । अर्वताम्ऽइव ।
भरेषु । जिग्युषाम् । असि ॥ ५ ॥ ४ ॥

हे सोम त्वं भरेषु संग्रामेषु जिग्युषां शत्रुं जयतां रयीणां धनानां सिषासतुः संभक्तुमिच्छुरसि भवसि शत्रून् जयद्भ्योधनानि प्रयच्छसि इत्यर्थः । तत्रदृष्टान्तः—वाजेषु संग्रामेष्वर्वतामिव अश्वानामिव यथा संग्रामं प्रविशद्भ्योश्वेभ्योघासं प्रयच्छन्ति तद्वदित्यर्थः ॥ ५ ॥

५. सोम, तुम संग्रामों में शत्रुओं को जीतनेवालों को उसी प्रकार धन देते हो, जिस प्रकार समर-भूमि में जानेवाले अश्वों को घास दिया जाता है। ॥ इति सप्तमस्य प्रथमे चतुर्थोवर्गः ॥ ४ ॥

तंत्वेति पंचर्चं चतुर्विंशं सूक्तं ऋष्याद्याः पूर्ववत् । तंत्वेत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

तंत्वानृम्णानिबिभ्रतंसधस्थेषुमहोदिवः । चारुंसुकृत्ययेमहे ॥ १॥

तम् । त्वा । नृम्णानि । बिभ्रतम् । सधऽस्थेषु । महः ।
दिवः । चारुम् । सुऽकृत्यया । ईमहे ॥ १ ॥

महो दिवः महतोद्युलोकस्य सधस्थेषु सहस्थानेषु स्थितं नृम्णानि धनानि बिभ्रतमस्मदर्थं धारयन्तं चारुं कल्याणं तं पवमानं त्वा त्वां सुकृत्यया शोभनया क्रियया ईमहे धनानि याचामहे ॥ १ ॥

१. सोम, प्रकाण्ड द्युलोक के एक स्थानवासियों में स्थित, धन के धारक और कल्याण के धारक तुमसे शोभन अनुष्ठान करके हम धन की याचना करते हैं।

अथ द्वितीया—

संवृक्तधृष्णुमुक्थ्यंमहामहिव्रतंमदम् । शतंपुरोरुरुक्षणिम् ॥ २ ॥

संवृक्तऽधृष्णुम् । उक्थ्यम् । महाऽमहिव्रतम् ।
मदम् । शतम् । पुरः । रुरुक्षणिम् ॥ २ ॥

हे सोम संवृक्तधृष्णुं संवृक्ताः संछिन्ना धृष्णवो धर्षणशीलाः शत्रवो येनासौ संवृक्तधृष्णुस्तमुक्थ्यमुक्थार्हं प्रशंस्यं महामहिव्रतं मंहनीयबहुकर्माणं मदं मदकरं शतं बहूनि पुरः शत्रूणां पुराणि रुरुक्षणिं विनाशयन्तं त्वां धनानीमहइति संबन्धः ॥ २ ॥

२. सोम, पराक्रमी शत्रुओं के विनाशक, प्रशंसा के योग्य, पूजनीय-कर्मा, आनन्ददाता और अनेक शत्रु-पुरियों के घातक तुमसे हम धन माँगते हैं। अथ तृतीयः—

अतस्त्वारयिमभिराजानंसुक्रतोदिवः । सुपर्णोअव्यथिर्भरत् ॥ ३॥

अतः । त्वा । रयिम् । अभि । राजानम् । सुक्रतो
इति सुऽक्रतो । दिवः । सुऽपर्णः । अव्यथिः । भरत् ॥ ३ ॥

हे सुक्रतो शोभनकर्मन् पवमानसोम रयिमभि धनमभि राजानं त्वा त्वां अतोदिवोमुष्मात् द्युलोकात् अव्यथिर्व्यथारहितः सुपर्णः श्येनोभरदाहरत् । तथाचनिगमान्तरं—आदायश्येनोअभरत्सोममिति ॥ ३ ॥

३. शोभन कर्मवाले सोम, धन के लिए तुम राजा हो; इसी लिए श्येन (बाज) तुम्हें सरलता से स्वर्ग से ले आया था।

विश्वस्माइत्स्वर्दृशेसाधारणंरजस्तुरम् । गोपामृतस्यविर्भरत् ॥ ४ ॥

विश्वस्मै । इत् । स्वः । दृशे । साधारणम् । रजःऽतुरम् ।
गोपाम् । ऋतस्य । विः । भरत् ॥ ४ ॥

रजस्तुरमुदकस्य प्रेरकमृतस्य यज्ञस्य गोपां गोपायितारं विश्वस्मै सर्वस्मै स्वर्दृशे सर्वदृशे देवाय साधारणमित्समानमेवसन्तं सोमं विः पक्षी श्येनोभरत् स्वर्गादाहरत् ॥ ४ ॥

४. जल भेजनेवाले, यज्ञ के संरक्षक और स्वर्गस्थ सभी देवों के लिए समान सोम को स्वर्ग से श्येन ले आया था।

अथ पञ्चमी—

अर्धाहिन्वानइन्द्रियंज्यायोमहित्वमानशे । अभिष्टिकृद्विचर्षणिः॥५॥५॥

अर्धं । हिन्वानः । इन्द्रियम् । ज्यायः । महिऽत्वम् ।
आनशे । अभिष्टिऽकृत् । विऽचर्षणिः ॥ ५ ॥ ५ ॥

---

१ ऋ० सं० ३. ६. १५ ।

अथाथ विचर्षणिः कर्मणां विद्रष्टा अभिष्टिकृद्यजमानानामभीष्टस्य फलस्य कर्ता सोमः इन्द्रियं स्वकीयं बलं हिन्वानः प्रेरयन् ज्यायः प्रशस्यतरं महित्वं महत्त्वमानशे प्राप्नोति ॥५॥

५. कर्मों के सूक्ष्मदर्शक, यजमानों के मनोरथ-दाता और अपने बल का प्रयोग करनेवाले सोम अपने प्रशंसनीय महत्त्व को प्राप्त करते हैं।

॥ इति सप्तमस्य प्रथमे पञ्चमोवर्गः ॥ ५ ॥

पवस्वेति पंचर्चं पंचविंशं सूक्तं ऋष्याद्याः पूर्ववत्। पवस्वेत्यनुक्रान्तं। गतोविनियोगः।

तत्र प्रथमा—

पवस्वृष्टिमासुनोपामूर्मिंदिवस्परि। अयक्ष्माबृहतीरिषः ॥ १ ॥

पवस्व। वृष्टिम्। आ। सु। नः। अपाम्। ऊर्मिम्। दिवः।
परि। अयक्ष्माः। बृहतीः। इषः ॥ १ ॥

हे सोम त्वं दिवोद्युलोकात् वृष्टिं नोस्माकमापवस्व समन्तात्कुरु। एतदेव दर्शयति—अपामुदकानामूर्मिं तरंगं दिवः पर्यापवस्व। अपिचायक्ष्माः यक्ष्मरहितानि अनामयानि बृहतीर्महांति इषोन्नानि आपवस्व ॥ १ ॥

१. सोम, द्युलोक से हमारे लिए चारों ओर वृष्टि करो। द्युलोक से जलतरङ्ग ले आओ। अक्षय अन्न का महाभाण्डार उपस्थित करो।

तयापवस्वधारयायया गावइहागमन्। जन्यासउपनोगृहम् ॥ २ ॥

तया। पवस्व। धारया। यया। गावः। इह।
आऽगमन्। जन्यासः। उप। नः। गृहम् ॥ २ ॥

हे सोम त्वं तया तादृश्या धारया पवस्व क्षर। कीदृश्येत्यत्राह—यया यादृश्या त्वदीयया धारया जन्यासोजन्याः शत्रुजनपदभवागावः इहास्मिन्लोके नोस्माकं संबन्धिगृहमुपागमन्नुपागच्छन्ति ॥ २ ॥

२. सोम, तुम उस धारा से क्षरित होओ, जिस धारा से शत्रु देशोत्पन्न गायें इस लोक में हमारे गृह में आती हैं।

अथ तृतीया—

घृतंपवस्वधारयायज्ञेषुदेववीतमः। अस्मभ्यंवृष्टिमापव ॥ ३ ॥

घृतम्। पवस्व। धारया। यज्ञेषु। देवऽवीतमः।
अस्मभ्यम्। वृष्टिम्। आ। पव ॥ ३ ॥

हे सोम यज्ञेषु देववीतमोत्यन्तं देवकामस्त्वं अस्मभ्यं भार्गवेभ्यः कविभ्योघृतमुदकं। वनं घृतमित्युदकनामसु पाठात्। धारया संपातेन पवस्व क्षर। वृष्टिं वर्षं वा आपवापवस्व ॥३॥

३. सोम, तुम यज्ञों में अतीव देवाभिलाषी हो। हमारे लिए तुम घृत-धारा से क्षरित होओ।

सनऊर्जेव्य१व्ययंपवित्रंधावधारया। देवासःशृणवन्हिकम् ॥ ४॥

सः। नः। ऊर्जे। वि। अव्ययम्। पवित्रम्। धाव।
धारया। देवासः। शृणवन्। हि। कम् ॥ ४ ॥

हे सोम सत्वं नोस्माकमूर्जे अन्नायाव्ययमविमयं पवित्रं धारया संपातेन विधाव प्राप्नुहि। देवासोदेवाः अपि हि कं शृणवत गमनवेलायामुत्पन्नं तव शब्दं शृण्वन्तु ॥ ४ ॥

४. सोम, तुम हमारे अन्न के लिए कुशमय (अथवा अव्यय) दशापवित्र को धारा-रूप से प्राप्त करो। तुम्हारी गमन-ध्वनि को देवता लोग सुनें।

अथ पंचमी—

पवमानोअसिष्यदद्रक्षांस्यपजङ्घनत्। प्रत्नवद्रोचयन्रुचः ॥५॥६॥

पवमानः। असिस्यदत्। रक्षांसि अपऽजङ्घनत्।
प्रत्नऽवत्। रोचयन्। रुचः ॥ ५ ॥ ६ ॥

रक्षांसि राक्षसानपजंघनदपघ्नन् रुचः आत्मीयादीप्तीः प्रत्नवत् पुराणवत् रोचयन् दीपयन् पवमानः सोमोसिस्यदत् स्यन्दते ॥ ५ ॥

५. राक्षसों को मारते हुए और अपनी दीप्ति को पहले की तरह प्रदीप्त करते हुए ये क्षरणशील सोम प्रवाहित होते हैं।

॥ इति सप्तमस्य प्रथमे षष्ठोवर्गः ॥ ६ ॥

उत्तइति पंचर्चं पङ्क्तिं सूक्तं आंगिरसस्योचथ्यस्यार्षं गायत्रं पवमानसोमदेवताकं तथाचानुक्रान्तं—उत्तेशुष्मासउचथ्यइति। उक्तोविनियोगः।

तत्र प्रथमा—

उत्तेशुष्मासईरतेसिन्धोरूर्मेरिवस्वनः। वाणस्यचोदयापविम्॥१॥

उत्। ते। शुष्मासः। ईरते। सिन्धोः। ऊर्मेःऽइव।
स्वनः। वाणस्य। चोदय। पविम् ॥ १ ॥

हे सोम ते तव शुष्मासः शुष्मावेगा उदीरते उद्गच्छन्ति। तत्रदृष्टान्तः—सिन्धोः समुद्रस्योर्मेरिव यथा तरंगात्स्वनोध्वनिरुद्गच्छति तद्वदित्यर्थः। सत्वं बाणस्य विसृष्टस्य बाणस्य नालस्य वादित्रविशेषस्य पवि शब्दं। पविः भारतीति वाङ्नामसुपाठात्। चोदय प्रेरय। वेगेन स्यंदमानत्वं विसृष्टबाणशब्दसदृशं शब्दं कुर्वित्यर्थः ॥ १ ॥

१. सोम, समुद्र-तरङ्ग के वेग के समान तुम्हारा वेग हो रहा है। जैसे धनुष से छोड़ा हुआ बाण शब्द करता है, वैसे ही तुम शब्द करो।

प्रसवेनउदीरतेतिस्रोवाचोमखस्युवः। यदव्यएषिसानवि ॥ २ ॥

प्रऽसवे। ते। उत्। ईरते। तिस्रः। वाचः। मखस्युवः।
यत्। अव्ये। एषि। सानवि ॥ २ ॥

हे सोम ते तव प्रसवेसति मखस्युवो यज्ञमिच्छवो यजमानस्य तिस्रोवाचः ऋग्यजुःसामात्मकानि त्रीणि वाक्यान्युदीरते उद्गच्छन्ति। कदेत्यतआह—यद्यदा सानवि व्युच्छिन्ने अव्ये अविमये पवित्रे एषि त्वं गच्छसि ॥ २ ॥

२. जिस समय तुम उन्नत और कुशमय दशापवित्र में जाते हो, उस समय तुम्हारी उत्पत्ति होने पर यज्ञाभिलाषी यजमान के मुख से तीन प्रकार के (ऋक्, यजु, साम के) वाक्य निकलते हैं।

अव्योवारेपरिप्रियंहरिंहिन्वन्त्यद्रिभिः। पवमानंमधुश्चुतम् ॥ ३ ॥

अव्यः। वारे। परि। प्रियम्। हरिम्। हिन्वन्ति।
अद्रिऽभिः। पवमानम्। मधुऽश्चुतम् ॥ ३ ॥

प्रियं देवानां प्रीतिकरं हरिं हरितवर्णमद्रिभिः ग्रावभिरभिषुतं मधुश्चुतं मधुनोरसस्य श्चावयितारं पवमानं सोममव्योर्वीरे वाले परिहिन्वन्ति ऋत्विजः परिप्रेरयन्ति ॥ ३ ॥

३. देवों के प्रिय, हरित-वर्ण, पत्थरों से अभिषुत (निष्पीड़ित) और मधुर रस चुलानेवाले सोम को ऋत्विक् लोग मेष के लोम के ऊपर रखते हैं।

अथ चतुर्थी—

आपवस्वमदिन्तमपवित्रन्धारयाकवे। अर्कस्ययोनिमासदम् ॥४॥

आ। पवस्व। मदिन्ऽतम। पवित्रम्। धारया। कवे।
अर्कस्य। योनिम्। आऽसदम् ॥ ४ ॥

हे मदिन्तम मादयितृतम कवे क्रान्तकर्मन् सोम अर्कस्यार्चनीयस्येन्द्रस्य योनिं उदरं स्थानमासदं प्राप्तुं पवित्रमतीत्य धारया संपातेनापवस्व आभिमुख्येन क्षर। यद्यप्येषा पूर्वस्मिन्नध्याये व्याख्याता तथापि मन्दमतीनां विस्मरणशंकया पुनर्व्याख्याता ॥ ४ ॥

४. अतीव प्रमत्तकारी और क्रान्तकर्मा सोम, पूजनीय इन्द्र के उदर में पैठने के लिए दशापवित्र को लांघकर उनके सामने क्षरित होओ।

सपवस्वमदिन्तमगोभिरञ्जानोअक्तुभिः। इन्दविन्द्रायपीतये ॥५॥७॥

सः। पवस्व। मदिन्ऽतम। गोभिः। अञ्जानः। अक्तुऽभिः।
इन्दो इति। इन्द्राय। पीतये ॥ ५ ॥ ७ ॥

हे मदिन्तम मादयितृतमेन्दो सोम अक्तुभिरंजनसाधनभूतैर्गोभिः गोविकारैः पयोभिरंजानोज्यमानः संस्क्रियमाणः सत्वं इन्द्रायेन्द्रस्य पीतये पानाय पवस्व क्षर ॥ ५ ॥

५. अत्यन्त प्रमत्त करनेवाले सोम, सुस्वादु करनेवाले दूध आदि से मिश्रित होकर तुम इन्द्र के पान के लिए क्षरित होओ।

॥ इति सप्तमस्य प्रथमे सप्तमोवर्गः ॥ ७ ॥

अध्वर्योइति पंचर्चं सप्तविंशंसूक्तं आंगिरसस्य उचथ्यस्यार्षं गायत्रं पवमानसोमदेवताकं। तथाचानुक्रम्यते--अध्वर्योइति। गतःसूक्तविनियोगः।

तत्र प्रथमा—

अध्वर्योअद्रिभिःसुतंसोमंपवित्रआसृज। पुनीहीन्द्रायपातवे ॥१॥

अध्वर्यो इति। अद्रिऽभिः। सुतम्। सोमम्। पवित्रे।
आ। सृज। पुनीहि। इन्द्राय। पातवे ॥ १ ॥

हे अध्वर्यो अद्रिभिर्ग्रावभिः सुतमभिषुतं सोमं पवित्रे आसृज। एतदेव दर्शयति इन्द्रायेन्द्रस्य पातवे पानाय पुनीहि पावय ॥ १ ॥

१. पुरोहित, पत्थरों से अभिषुत (पीसे गये) सोम को दशापवित्र पर डाल दो। इन्द्र के पान के लिए इसे शोधित करो।

अथ द्वितीया—

दिवःपीयूषमुत्तमंसोममिन्द्रायवज्रिणे। सुनोतामधुमत्तमम् ॥ २ ॥

दिवः। पीयूषम्। उत्ऽतमम्। सोमम्। इन्द्राय। वज्रिणे।
सुनोत। मधुमत्ऽतमम् ॥ २ ॥

हे अध्वर्यवो यूयं मधुमत्तममतिशयेन मधुमन्तं दिवोद्युलोकस्य पीयूषममृतमुत्तमं श्रेष्ठं सोमं वज्रिणे वज्रवते इन्द्राय सुनोताभिषुणुत ॥ २ ॥

२. पुरोहितो (अध्वर्युओ), अत्यन्त मधुर, द्युलोक के अमृत और श्रेष्ठ सोम को वज्रधर इन्द्र के लिए प्रस्तुत करो।

तवत्यइन्दोअन्धसोदेवामधोर्व्यश्नते । पवमानस्यमरुतः ॥ ३ ॥

तव । त्ये । इन्दो इति । अन्धसः । देवाः । मधोः ।
वि । अश्नते । पवमानस्य । मरुतः ॥ ३ ॥

हे इन्दो सोम तव संबन्धिनं मधोर्मदकरस्य पवमानस्य पूयमानमंधसोन्नं कर्मणि षष्ठी त्ये ते इमे देवाइन्द्रादयोमरुतश्च व्यश्नते व्याप्नुवते व्याप्नुवन्तीत्यर्थः ॥ ३ ॥

३. मदकर और क्षरणशील तुम्हारे अन्न (खाद्य द्रव्य) को ये इन्द्रादि देवता और मरुद्गण व्याप्त करते हैं।

त्वंहिसोमवर्धयन्त्सुतोमदायभूर्णये । दृषन्त्स्तोतारमूतये ॥ ४ ॥

त्वम् । हि । सोम । वर्धयन् । सुतः । मदाय ।
भूर्णये । दृषन् । स्तोतारम् । ऊतये ॥ ४ ॥

हे सोम सुतोभिषुतस्त्वं वर्धयन् देवान् प्रवृद्धान् कुर्वन् वृषन् कामान् वर्षन् भूर्णये क्षिप्राय मदायोतये रक्षणायच स्तोतारमभिगच्छसीत्यर्थः ॥४॥

४. सोम, अभिषुत होकर, देवों को प्रवृद्ध कर अभिलाषाओं को बरसाकर तुम शीघ्र मद और रक्षण के लिए स्तोता के पास जाते हो।

अभ्यर्षविचक्षणपवित्रंधारयासुतः । अभिवाजमुतश्रवः ॥ ५॥८॥

अभि । अर्ष । विऽचक्षण । पवित्रम् । धारया । सुतः ।
अभि । वाजम् । उत । श्रवः ॥ ५ ॥ ८ ॥

हे विचक्षण सोम सुतोभिषुतस्त्वं पवित्रमभि प्रति धारयार्षगच्छ । उतापिचास्माकं वाजमन्नं श्रवः कीर्तिंचाभिरक्षेत्यर्थः ॥ ५ ॥

५. विचक्षण सोम, तुम अभिषुत होकर दशापवित्र की ओर जाओ और हमारे अन्न तथा कीर्ति की रक्षा करो।

॥ इति सप्तमस्य प्रथमेष्टमोवर्गः ॥ ८ ॥

परिषुक्षइति पंचर्चमष्टाविंशंसूक्तं कण्वाद्याः पूर्ववत् । परिषुक्षेत्यनुक्रान्तं । उक्तोविनियोगः ।

तत्र प्रथमा—

परिद्युक्षःसनद्रयिर्भरद्वाजंनोअन्धसा । सुवानोअर्षपवित्रआ ॥१॥

परि । द्युक्षः । सनत्ऽरयिः । भरत् । वाजम् । नः ।
अन्धसा । सुवानः । अर्ष । पवित्रे । आ ॥ १ ॥

द्युक्षोदीप्तः सनद्रयिः दीयमानधनः सोमोनोस्माकं वाजं बलमंधसान्नेनसह परिभरत् परिभरतु । अथप्रत्यक्षस्तुतिः हे सोम सुवानोभिषूयमाणस्त्वं पवित्रे आर्ष क्षर ॥ १ ॥

१. दीप्त और धन देनेवाले सोम अन्न के साथ हमारे बल को बढ़ाओ। सोम, अभिषुत होकर दशापवित्र में गिरो।

तवप्रत्नेभिरध्वभिरव्योवारेपरिप्रियः । सहस्रधारोयात्तना ॥ २ ॥

तव । प्रत्नेभिः । अध्वऽभिः । अव्यः । वारे । परि ।
प्रियः । सहस्रऽधारः । यात् । तना ॥ २ ॥

हे सोम तव संबंधी प्रियोदेवानां प्रीतिकरः सहस्रधारोबहुधारः तना विस्तृतसारोरसः प्रत्नेभिः पुराणैः अध्वभिर्मार्गैः अव्योवारे वाले दशापवित्रे परियात् परिगच्छति ॥ २ ॥

२. सोम, देवों को प्रसन्न करनेवाली तुम्हारी धारायें विस्तृत होकर पुराने मार्गों से मेषलोम से दशापवित्र में जाती है।

चरुर्नयस्तमीङ्खयेन्दोनदानमीङ्खय । वधैर्वधस्नवीङ्खय ॥ ३ ॥

चरुः । न । यः । तम् । ईङ्खय । इन्दो इति । न । दानम् ।
ईङ्खय । वधैः । वधस्नो इति वधऽस्नो । ईङ्खय ॥ ३ ॥

हे सोम चरुर्न चरुरिव यः पूर्णोदनो भवति तमीङ्खयास्मान्प्रापय । अपिच हे इन्दो न इदानीं दानं देयमीङ्खय हे वधस्नो प्रहारेण प्रस्रवणशील सोम वधैर्मारणैः प्रहारैरीङ्खय ॥३॥

३. सोम, जो चरु के समान खाद्य है, उसे हमें दो। जो देने की वस्तु है, उसे हमें दो। प्रहार करने पर तुम बहते हो; इसलिए हे सोम, पत्थरों के प्रहार से निकलो ।

अथ चतुर्थी—

निशुष्ममिन्दवेषांपुरुहूतजनानाम् । योअस्माँआदिदेशति ॥४॥

नि । शुष्मम् । इन्दो इति । एषाम् । पुरुऽहूत ।
जनानाम् । यः । अस्मान् । आऽदिदेशति ॥ ४ ॥

हे पुरुहूत बहुभिराहूतेन्दो सोम त्वं यः शुष्मोयेषां शत्रुजनानां बलमस्मानादिदेशति बाधार्थमाह्वयति एषां शत्रुजनानां तं शुष्मं बलं नि न्यक्कुर्विति शेषः ॥ ४ ॥

४. बहुतों के द्वारा बुलाये गये सोम, जिन शत्रुओं का बल युद्ध के लिए हमें बुलाता है, उन शत्रुओं के बल को दूर करो।

शतंनइन्दऊतिभिःसहस्रंवाशुचीनाम् । पवस्वमंहयद्रयिः ॥५॥९॥

शतम् । नः । इन्दो इति । ऊतिऽभिः । सहस्रम् । वा ।
शुचीनाम् । पवस्व । मंहयत्ऽरयिः ॥ ५ ॥ ९ ॥

हे इन्दो सोम मंहयद्रयिः प्रदीयमानधनस्त्वं नोस्माकमूतिभिरूतिभ्योविभक्तिव्यत्ययः रक्षार्थं शुचीनां शुद्धानां तवांशभूतानां सोमानां शतं सहस्रं वा पवस्व क्षर ॥ ५ ॥

५. सोम, तुम धन देनेवाले हो। हमारी रक्षा करने के लिए तुम अपनी निर्मल धाराओं से प्रवाहित होओ।

॥ इति सप्तमस्य प्रथमे नवमोवर्गः ॥ ९ ॥

उत्तइति चतुर्ऋचमेकोनत्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं गायत्रं पवमानसोमदेवताकं तथाचानुक्रान्तं—उत्तेचतुष्कमवत्सारइति उक्तोविनियोगः ।

तत्र प्रथमा—

उत्तेशुष्मासोअस्थूरक्षोभिन्दन्तोअद्रिवः । नुदस्वयाःपरिस्पृधः ॥१॥

उत् । ते । शुष्मासः । अस्थुः । रक्षः । भिन्दन्तः ।
अद्रिऽवः । नुदस्व । याः । परिऽस्पृधः ॥ १ ॥

हे अद्रिवोग्रावन् सोम ते तव शुष्मासः शुष्मावेगाः रक्षोराक्षसान्भिन्दन्तो विदारयन्तः उदस्थुरुत्तिष्ठन्ति याः परिस्पृधः स्पर्धमानाः शत्रुसेनाः अस्मान् प्रतिबाधन्ते तास्त्वं नुदस्व प्रेरय बाधस्वेत्यर्थः ॥ १ ॥

१. प्रस्तर से उत्पन्न सोम, राक्षसों को मारनेवाले तुम्हारे वेग या तेज उन्नत हुए हैं। स्पर्द्धा करनेवाली जो शत्रुसेनायें हमें बाधा देती हैं, उन्हें रोको। अथ द्वितीया—

अयानिजघ्निरोजसारथसङ्गेधनेहिते । स्तवाअत्रिभ्युषाहृदा ॥२॥

अया । निऽजघ्निः । ओजसा । रथऽसङ्गे । धने ।
हिते । स्तवै । अत्रिभ्युषा । हृदा ॥ २ ॥

हे सोम त्वं अयानेन कृतेनौजसा बलेन निजघ्निः शत्रून् हन्तुं शीलवान् तं त्वामबिभ्युषा अभीतेन हृदा मनसा युक्तोहं रथसंगेस्माकं रथानां संगे हिते शत्रुषु निहिते धने च निमित्ते स्तवै स्तौमि ॥ २ ॥

२. तुम अपने बल से शत्रुओं का विनाश करने में समर्थ हो। मैं निर्भय हृदय से रथ पर शत्रुओं के द्वारा निहित धन के लिए तुम्हारी स्तुति करता हूँ। अथ तृतीया—

अस्यव्रतानिनाधृषेपवमानस्यदूढ्या । रुजयस्त्वापृतन्यति ॥ ३ ॥

अस्य । व्रतानि । न । आऽधृषे । पवमानस्य । दुःऽध्या । रुज । यः । त्वा । पृतन्यति ॥ ३ ॥

हे सोम पवमानस्य क्षरतोयस्यास्य तव व्रतानि कर्माणि दूढ्या दुर्बुद्धिना राक्षसेन नाधृषे आधर्षयितुमशक्यानि। सत्यं त्वां योदुर्बुद्धिः शत्रुः पृतन्यति योद्धुं इच्छति तं रुज बाधस्व ॥३॥ ३. सोम, क्षरणशील तुम्हारे तेज को दुर्बुद्धि राक्षस नहीं सह सकता। जो तुम्हारे साथ युद्ध करना चाहता है, उसे विनष्ट करो।

तंहिन्वन्तिमदच्युतंहरिंनदीषुवाजिनम् । इन्दुमिन्द्रायमत्सरम् ॥४॥१०॥

तम् । हिन्वन्ति । मदऽच्युतम् । हरिम् । नदीषु । वाजिनम् । इन्दुम् । इन्द्राय । मत्सरम् ॥ ४ ॥ १० ॥

मदच्युतं मदस्य च्यावयितारं हरिं हरितवर्णं वाजिनं बलिनं मत्सरं मदकरं तमिन्दुं सोमं नदीषु वसतीवरीष्विन्द्रायेन्द्रार्थं हिन्वन्ति ऋत्विजः प्रेरयन्ति ॥ ४ ॥

४. मद चुआनेवाले, हरितवर्ण, बली और मदकर सोम को ऋत्विक् लोग इन्द्र के लिए वसतीवरी नामक जल में डालते हैं।

॥ इति सप्तमस्य प्रथमे दशमोवर्गः ॥ १० ॥

अस्यपत्नामिति चतुर्ऋचं त्रिंशं सूक्तं ऋष्याद्याःपूर्ववत्। अस्यपत्नामित्यनुक्रान्तं। उक्तोविनियोगः।

तत्र प्रथमा—

अस्यपत्नामनुद्युतंशुक्रंदुदुह्रेअह्रयः । पयःसहस्रसामृषिम् ॥ १ ॥

अस्य । पत्नाम् । अनु । द्युतम् । शुक्रम् । दुदुह्रे । अह्रयः । पयः । सहस्रऽसाम् । ऋषिम् ॥ १ ॥

अस्य सोमस्य प्रत्नां पुराणां द्युतं द्योतमानं तनुमनु शुक्रं दीप्तं सहस्रसां अभिलषितस्यापरिमितस्य कर्मफलस्य दातारं ऋषिं सरणशीलं पयः पातव्यं रसमह्रयः कवयोदुदुह्रे दुहन्ति ॥ १ ॥

१. कवि लोग इन सोम के प्राचीन, प्रकाशमान, दीप्त, असीम, कर्मफलदाता और श्रवणशील रस को दूहते हैं।

अयंसूर्यइवोपदृगयंसरांसिधावति । सप्तप्रवतआदिवम् ॥ २ ॥

अयम् । सूर्यःऽइव । उपऽदृक् । अयम् । सरांसि ।
धावति । सप्त । प्रऽवतः । आ । दिवम् ॥ २ ॥

अयं सोमः सूर्यइव यथासूर्यः सर्वस्यलोकस्योपद्रष्टा तद्वत् कर्मणामुपदृगुपद्रष्टा अपि चायं सोमः सरांसि त्रिंशदुक्थपात्राणीति केचिद्वर्णयन्ति अपरेतु त्रिंशदहोरात्राणि सरांसीति तानि धावति गच्छति । तथाचयास्कः—तत्रैतद्याज्ञिकावेदयन्ते त्रिंशदुक्थपात्राणि माध्यन्दिने सवनएकदेवतानि तान्येतस्मिन्कालएकेनप्रतिधानेन पिबन्ति तान्यत्र सरांस्युच्यन्ते त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येतिनैरुक्ताइति । अपिचायं सोमोदिवमधिकृत्य सप्तप्रवतः सप्तनदीरातिष्ठति ॥ २ ॥

२. ये सोम, सूर्य के समान, सारे संसार को देखते हैं। ये तीस दिन रात की ओर जाते हैं। ये स्वर्ग से लेकर सातो नदियों को घेरे हुए हैं।

अयंविश्वानितिष्ठतिपुनानोभुवनोपरि । सोमोदेवोनसूर्यः ॥ ३ ॥

अयम् । विश्वानि । तिष्ठति । पुनानः । भुवना ।
उपरि । सोमः । देवः । न । सूर्यः ॥ ३ ॥

पुनानाः पूयमानोयं सोमो विश्वानि सर्वाणि भुवना भुवनानि सर्वेषां भुवनानामुपरि तिष्ठति । तत्रदृष्टान्तमाह—देवोन सूर्यः यथा सूर्योदेवः सर्वेषां भुवनानामुपरि तिष्ठति तद्वदयं सोमोपीत्यर्थः ॥ ३ ॥

३. शोधित किये जाते हुए ये सोम, सूर्यदेव के समान, सारे भुवनों के ऊपर रहते हैं।

परिणोदेववीतयेवाजाँअर्षसिगोमतः । पुनानइन्दविन्द्रयुः ॥४॥११॥

---

१ नि० ५. ११.।

परि । नः । देवऽवीतये । वाजान् । अर्षसि । गोऽमतः ।
पुनानः । इन्दो इति । इन्द्रऽयुः ॥ ४ ॥ ११ ॥

हे इन्दो सोम इन्द्रयुरिन्द्रकामः पुनानः पूयमानस्त्वं नोस्माकं देववीतये यज्ञाय गोमतोगोयुक्तानि वाजानन्नानि पर्यर्षसि परितः क्षरेत्यर्थः ॥ ४ ॥

४. सोम, इन्द्राभिलाषी और शोधित तुम हमारे यज्ञ के लिए गोयुक्त अन्न चारों ओर गिराओ।

॥ इति सप्तमस्य प्रथमे एकादशोवर्गः ॥ ११ ॥

यवंयवंनइति चतुर्ऋचमेकत्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं गायत्रं पवमानसोमदेवताकं । यवंयवमित्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

यवंयवंनोअन्धसापुष्टंपुष्टंपरिस्रव । सोमविश्वाचसौभगा ॥ १ ॥

यवंऽयवम् । नः । अन्धसा । पुष्टम्ऽपुष्टम् । परि ।
स्रव । सोम । विश्वा । च । सौभगा ॥ १ ॥

हे सोम त्वं नोस्माकं पुष्टंपुष्टं बहुलं यवंयवं पुनःपुनर्युतं रसमन्धसान्नात्मना परिस्रव धारया क्षर । अन्नमार्थपिदुस्तृष्णयात्यन्तं पीडितत्वादाबाधेचेति द्विर्भावः । पीडाप्रयोक्तृधर्मो नाभिधेयधर्मइत्युक्तं । अपिच विश्वा विश्वानि सौभगा सौभगानि धनानि परिस्रव ॥ १ ॥

१. सोम, तुम हमारे लिए प्रचुर यव (जौ), अन्न के साथ, दो और सारे सौभाग्यशाली धन भी दो।

इन्दोयथातवस्तवोयथातेजातमन्धसः । निबर्हिषिप्रियेसदः ॥ २ ॥

इन्दो इति । यथा । तव । स्तवः । यथा । ते । जातम् ।
अन्धसः । नि । बर्हिषि । प्रिये । सदः ॥ २ ॥

हे इन्दो सोमान्धसोऽन्नरूपस्य तव संबन्धी स्तवः स्तवनं स्तोत्रं तथा ते तव जातं जन्म यथा प्रादुर्भूतमस्ति तथात्वं प्रिये प्रीणयितरि बर्हिषि अस्मद्यागे निषदः निषण्णोभव ॥ २ ॥

२. सोम, अन्नरूप तुम्हारे स्तोत्र और प्रादुर्भाव को हमने कहा। अब तुम हमारे प्रसन्नतादायक कुश पर बैठो।

अथ तृतीया—

उतनोगोविदश्ववित्पवस्वसोमान्धसा । मक्षूतमेभिरहभिः ॥ ३ ॥

उत । नः । गोऽवित् । अश्वऽवित् । पवस्व । सोम ।
अन्धसा । मक्षुऽतमेभिः । अहऽभिः ॥ ३ ॥

उतापिच हे सोम नोस्माकं गोविद्गोप्रदोश्वविदश्वप्रदश्च त्वं मक्षूतमेभिर्मक्षूतमैरतिशयेन शीघ्रैरहभिरहोभिर्हेतुभिरंधसान्नेन पवस्व धारया क्षर ॥ ३ ॥

३. सोम, तुम हमारे गौ और अश्व के दाता हो। तुम अल्प दिनों में ही अन्न के साथ क्षरित होओ।

योजिनातिनजीर्यतेहन्तिशत्रुमभीत्य । सपवस्वसहस्रजित् ॥४॥१२॥

यः । जिनाति । न । जीर्यते । हन्ति । शत्रुम् । अभिऽइत्य ।
सः । पवस्व । सहस्रऽजित् ॥ ४ ॥ १२ ॥

हे सहस्रजित् सहस्रसंख्यानां शत्रूणां जेतः सोम योभवान् जिनाति शत्रून् हन्ति नजीयते स्वयंशत्रुभिर्नजीयते नहन्यतइत्यर्थः । शत्रुमभीत्य शत्रुं स्वयमभ्येत्य हन्ति नच स्वयं शत्रुभिरभिभूयते सत्वं पवस्व क्षर ॥ ४ ॥

४. सोम, तुम अपरिमित शत्रुओं के जेता हो। तुम्हें कोई जीत नहीं सकता। तुम स्वय शत्रुओं को निहत करते हो। क्षरित होओ।

॥ इति सप्तमस्य प्रथमे द्वादशोवर्गः ॥ १२ ॥

परिसोमइति चतुर्ऋचं द्वात्रिंशं सूक्तं कृष्याद्याः पूर्ववत् । परिसोमइत्यनुक्रान्तं । उक्तोविनियोगः ।

तत्र प्रथमा—

परिसोमऋतंबृहदाशुःपवित्रेअर्षति । विघ्नन्रक्षांसिदेवयुः ॥ १ ॥

परि । सोमः । ऋतम् । बृहत् । आशुः । पवित्रे । अर्षति ।
विऽघ्नन् । रक्षांसि । देवऽयुः ॥ १ ॥

आशुः क्षिप्रकारी देवयुर्देवकामः सोमः पवित्रे स्थित्वा रक्षांसि राक्षसान् विघ्नन् निघ्नन् । बृहन्महत्तमन्नं पर्यर्षति परिगमयति अस्मभ्यं प्रयच्छतीत्यर्थः ॥ १ ॥

१. क्षिप्रकारी और देवकामी सोम दशापवित्र में जाकर और राक्षसों को नष्ट कर हमें प्रचुर अन्न देते हैं।

अथ द्वितीया—

यत्सोमोवाजमर्षतिशतंधारांअपस्युवः । इन्द्रस्यसख्यमाविशन् ॥ २ ॥

यत् । सोमः । वाजम् । अर्षति । शतम् । धाराः । अपस्युवः ।
इन्द्रस्य । सख्यम् । आऽविशन् ॥ २ ॥

यद्यदा अपस्युवः कर्मकामाः शतं शतसंख्याकाः धाराः सोमस्यधाराः इन्द्रस्य सख्यं सखित्वं आविशन् प्राप्नुवन्ति । तदा सोमोवाजमन्नमर्षति गमयति अस्मभ्यं प्रयच्छतीत्यर्थः॥२॥

२. जब सोम की कर्माभिलाषी सौ धारायें इन्द्र का बन्धुत्व प्राप्त करती हैं, तब सोम हमें अन्न प्रदान करते हैं।

अभित्वायोषणोदशजारंनकन्यानूषत । मृज्यसेसोमसातये ॥३॥

अभि । त्वा । योषणः । दश । जारम् । न । कन्या ।
अनूषत । मृज्यसे । सोम । सातये ॥ ३ ॥

हे सोम त्वा त्वां याः दशसंख्याका योषणोंगुलयः कन्या पितृमतीकन्यका जारंन यथा प्रियमभिशब्दायते तद्वदभ्यनूषताभिशब्दायन्ते । ताभिः सातयेस्माकं धनस्य लाभाय मृज्यसे इन्द्रार्थं शोध्यसे ॥ ३ ॥

३. सोम, जैसे कन्या प्रिय (जार) को बुलाती है, वैसे ही दसो अंगुलियां शब्द करते हुए हमारे धन-लाभ और इन्द्र के लिए सोम को शोधित करती हैं।

अथ चतुर्थी—

त्वमिन्द्रायविष्णवेस्वादुरिन्दोपरिस्रव । नृन्त्स्तोतॄन्पाह्यंहसः॥४॥१३॥

त्वम् । इन्द्राय । विष्णवे । स्वादुः । इन्दो इति । परि ।
स्रव । नॄन् । स्तोतॄन् । पाहि । अंहसः ॥ ४ ॥ १३ ॥

हे इन्दो सोम स्वादुः प्रियरसस्त्वमिन्द्राय इन्द्रार्थं विष्णवे विष्ण्वर्थंच परिस्रव परिक्षर । नॄन् कर्मणां नेतॄन् स्तोतॄन् त्वद्विषयाणां स्तुतीनां कर्तॄन् अंहसोदुरितात्पाहि रक्ष च ॥ ४॥

४. सोम, प्रिय-रस तुम इन्द्र और विष्णु के लिए क्षरित होओ। कर्मों के नेताओं और स्तुतिकर्त्ताओं को पाप से छुड़ाओ।

॥ इति सप्तमस्य प्रथमे त्रयोदशोवर्गः ॥१३॥

प्रतेधाराइति चतुर्ऋचं त्रयस्त्रिंशंसूक्तं कण्याधाःपूर्ववत् । प्रतेधाराइत्यनुक्रान्तं । उक्तोविनियोगः ।

तत्रप्रथमा—

प्रतेधाराअसश्चतोदिवोनयन्तिवृष्टयः । अच्छावाजंसहस्रिणम् ॥१॥

प्र । ते । धाराः । असश्चतः । दिवः । न । यन्ति ।
वृष्टयः । अच्छ । वाजम् । सहस्रिणम् ॥ १ ॥

हे सोम ते तव असश्चतः संगरहिताधाराः सहस्रिणमपरिमितसंख्याकं वाजमन्नमच्छास्मदर्थं प्रयन्ति प्रगच्छन्ति । तत्रदृष्टान्तः—दिवोन वृष्टयः यथा द्युलोकात् वर्षधारा निःसंगाः प्रजानामपरिमितमन्नं प्रयन्ति तद्वदित्यर्थः ॥ १॥

१. जैसे द्युलोक की वर्षा-धारा प्रजा को असीम अन्न देती है, वैसे ही सोम, तुम्हारी निःसङ्ग धारा हमें अपरिमित अन्न प्रदान करती है।

अभिप्रियाणिकाव्याविश्वाचक्षाणोअर्षति । हरिस्तुञ्जानआयुधा ॥२॥

अभि । प्रियाणि । काव्या । विश्वा । चक्षाणः ।
अर्षति । हरिः । तुञ्जानः । आयुधा ॥ २ ॥

हरिर्हरितवर्णः सोमो विश्वा विश्वानि प्रियाणि देवानां प्रीतिकराणि काव्या काव्यानि कर्माणि चक्षाणः पश्यन् आयुधा स्वकीयान्यायुधानि तुंजानो राक्षसान्प्रति प्रेरयंश्चाभ्यर्षति यागं प्रति गच्छति ॥ २ ॥

२. हरित-वर्ण सोम देवों के सारे प्रिय कार्यों की ओर देखते हुए अपने आयुधों को राक्षसों की ओर फेंकते हुए यज्ञ में आते हैं।

सम्मृजानआयुभिरिभोराजेवसुव्रतः । श्येनोनवंसुषीदति ॥ ३॥

सः । मृजानः । आयुऽभिः । इभः । राजाऽइव ।
सुऽव्रतः । श्येनः । न । वंसु । सीदति ॥ ३ ॥

सुव्रतः सुकर्मा ससोमः आयुभिर्मनुष्यैः ऋत्विग्भिर्मृजानः शोध्यमानः इभोगतभयो राजेव यथा राजा । श्येनोन यथा च श्येनः तथा वंसूदकेषु वसतीवरीषु सीदति ॥ ३ ॥

३. सुकृती सोम मनुष्यों (ऋत्विकों) के द्वारा शोधित होकर और राजा तथा श्येन पक्षी के समान निर्भय होकर वसतीवरी-जल में बैठते हैं। अथ चतुर्थी—

सनोविश्वादिवोवसूतोपृथिव्याअधि । पुनानइन्दवाभर ॥ ४॥१४॥

सः । नः । विश्वा । दिवः । वसु । उतो इति । पृथिव्याः ।
अधि । पुनानः । इन्दो इति । आ । भर ॥ ४ ॥ १४ ॥

हे इन्दो सोम पुनानः पवमानस्त्वं दिवोधि दिविस्थितानि उतो अपिच पृथिव्याअधि पृथिव्यां स्थितानि। अधीति सप्तम्यर्थानुवादः। विश्वा विश्वानि वसु वसूनि नोस्मभ्यमाभराहर

॥४॥ ४. सोम, तुम क्षरित होते-होते स्वर्ग और पृथिवी के सारे धनों को हमारे लिए ले आओ।

॥ इति सप्तमस्य प्रथमे चतुर्दशोवर्गः ॥ १४ ॥

तरत्सइतिचतुर्ऋचं चतुस्त्रिंशंसूक्तं ऋष्याद्याःपूर्ववत्। तरत्सइत्यनुक्रान्तं। उक्तोविनियोगः।

तत्र प्रथमा—

तर॒त्सम॒न्दीधा॑वति॒धारा॑सु॒तस्यान्ध॑सः। तर॒त्सम॒न्दीधा॑वति ॥१॥

तर॑त्। सः। म॒न्दी। धा॒व॒ति॒। धारा॑। सु॒तस्य॑। अन्ध॑सः।
तर॑त्। सः। म॒न्दी। धा॒व॒ति॒ ॥ १ ॥

मंदी देवानां हर्षकरः ससोमः तरत् स्तोतॄन् पाप्मनः सकाशात्तारयन् धावति पवते। तदेव दर्शयति सुतस्याभिषुतस्यांधसो देवानामन्नात्मकस्य सोमस्य धारा धावतीति। पुनरपि तदेवाहात्यन्तादरार्थं तरत्समन्दी धावति। यद्वास्याऋचोयास्केनोक्तोर्थोद्रष्टव्यस्तद्यथा—तरतिसपापंसर्वं मंदी यः स्तौति धावति गच्छत्यूर्ध्वांगतिं धारासुतस्यांधसो धारयाभिषुतस्य सोमस्य मंत्रपूतस्य वाचास्तुतस्येति[1] ॥ १ ॥

१. देवों के हर्षदाता सोम स्तोताओं का उद्धार करते हुए क्षरित होते हैं। अभिषुत और देव अन्नरूप सोम की धारा गिरती है। हर्षदाता सोम क्षरित होते हैं। अथ द्वितीया—

उ॒स्रावे॑द॒वसू॑नां॒मर्त॑स्यदे॒व्यव॑सः। तर॒त्सम॒न्दीधा॑वति ॥ २ ॥

उ॒स्रा। वे॒द॒। वसू॑नाम्। मर्त॑स्य। दे॒वी। अव॑सः। तर॑त्।
सः। म॒न्दी। धा॒व॒ति॒ ॥ २ ॥

वसूनां धनानां उस्रोत्सरणशीला प्रदात्री देवी द्योतमाना स्तूयमानावा यस्य सोमस्य धारा मर्तस्य मनुष्यं यजमानं अवसोरक्षितुं वेद जानाति। सिद्धमन्यत् ॥ २॥

२. सोम की धन-प्रस्रवण करनेवाली और प्रकाशमाना धारा मनुष्य की रक्षा करना जानती है। हर्षदाता सोम स्तोताओं को तारते हुए गिरते हैं। अथ तृतीया—

ध्व॒स्रयोः॑पुरु॒षन्त्योरा॒सह॒स्राणिदद्महे। तर॒त्सम॒न्दीधा॑वति ॥ ३ ॥

---

१ नि० १३. ६.।

ध्वस्रयोः । पुरुऽसन्त्योः । आ । सहस्राणि । दद्महे ।
तरत् । सः । मन्दी । धावति ॥ ३ ॥

ध्वस्रयोः पुरुषंत्योर्ध्वस्रः कश्चिद्राजा पुरुषन्तिश्च कश्चित् तयोरुभयोरन्योन्यरेतरयोगविवक्षया द्विवचनं द्रष्टव्यं । सहस्राणि धनानां सहस्राण्यादद्महे वयं प्रतिगृह्णीमः । तदस्माभिः प्रतिगृहीतं धनमुत्तममस्त्विति ऋषिः सोमं प्रार्थयतइति सोमस्यस्तुतिः । सिद्धमन्यत् । यथा वत्सारएतयोर्धनानि प्रतिजग्राहैवं तरंतपुरुमीह्लौ प्रतिजगृहतुः । तथाच शाट्यायनकं—अथहवैतरंतपुरुमीह्लौ वैददश्वीध्वस्रयोः पुरुषंत्योर्बहुप्रतिगृह्य गरगिराविवमेनाते तौहस्मांगुल्यासावं प्रतिगृशावे तावकामयेतामसावंनाविवेदं सावंस्यादात्तमिवैव नप्रतिगृहीतमितिभावे तच्चतुर्ऋचमपश्यतां तेनप्रत्यैतां तवोवितयोरसावं सावमभवदात्तमिवैव नप्रतिगृहीतं सयःप्रतिप्रतिगृह्य कामयेतेत्यादि॥३॥

३. ध्वस्र और पुरुषन्ति नामक राजाओं से हमने सहस्र-सहस्र धन ग्रहण किये हैं। आनन्दकर सोम स्तोताओं को तारते हुए बहते हैं।

आययोस्त्रिंशतंतनासहस्राणिचदद्महे । तरत्समन्दीधावति ॥४॥१५॥

आ । ययोः । त्रिंशतम् । तना । सहस्राणि । च । दद्महे ।
तरत् । सः । मन्दी । धावति ॥ ४ ॥ १५ ॥

ययोर्ध्वस्रपुरुषंत्योस्त्रिंशतं त्रीणिशतानि सहस्राणि तना वस्त्राण्यादद्महे वयंप्रतिगृह्णीमः । तयोरस्माभिः प्रतिगृहीतं तत्सर्वमप्रतिगृहीतमस्त्विति सोमं ऋषिः प्रार्थयते इति सोमस्यैवस्तुतिः । सिद्धमन्यत् ॥ ४ ॥

४. ध्वस्र और पुरुषन्ति राजाओं से हमने तीस हजार वस्त्रों को पाया है। स्तोताओं को तारते हुए हर्षकर सोम गिरते हैं।

॥ इति सप्तमस्य प्रथमे पञ्चदशोवर्गः ॥ १५ ॥

पवस्वेति चतुर्ऋचं पंचविंशं सूक्तं कण्याद्याःपूर्ववत् । पवस्वेत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

पवस्वगोजिदश्वजिद्विश्वजित्सोमरण्यजित् । प्रजावद्रत्नमाभर ॥१॥

पवस्व । गोऽजित् । अश्वऽजित् । विश्वऽजित् । सोम ।
रण्यऽजित् । प्रजाऽवत् । रत्नम् । आ । भर ॥ १ ॥

हे सोम गोजित् शत्रूणां गवां जेता अश्वजित् अश्वानामपि जेता विश्वजित् विश्वस्य जगतोजेता रण्यजित् रमणीयस्य धनस्यापि जेता त्वं पवस्व धारया क्षर। अपिचास्मभ्यं प्रजावत् पुत्राद्युपेतं रत्नं रमणीयं धनमाभराहर ॥ १ ॥

१. सोम, तुम गौ, अश्व, संसार और रमणीय धन के जेता हो क्षरित होओ। पुत्रादि से युक्त रमणीय धन, हमारे लिए, ले आओ।

पवस्वाद्भ्योअदाभ्यःपवस्वौषधीभ्यः। पवस्वधिषणाभ्यः ॥२ ॥

पवस्व। अत्ऽभ्यः। अदाभ्यः। पवस्व।
ओषधीभ्यः। पवस्व। धिषणाभ्यः ॥ २ ॥

हे सोम त्वमद्भ्योवसतीवरीभ्योदाभ्योंशुभ्यश्च पवस्व क्षर। अपिचौषधीभ्यः पवस्व क्षर। किंच धिषणाभ्योग्रावभ्यः पवस्व क्षर ॥ २ ॥

२. सोम, तुम वसतीवरी-जल से बहो, किरणों से बहो, ओषधियों से बहो और पत्थरों से बहो। अथ तृतीया—

त्वंसोमपवमानोविश्वानिदुरितातर। कविःसीदनिबर्हिषि ॥ ३ ॥

त्वम्। सोम। पवमानः। विश्वानि। दुःऽइता। तर।
कविः। सीद। नि। बर्हिषि ॥ ३ ॥

हे सोम पवमानः पूयमानः कविः क्रान्तकर्मा त्वं विश्वानि सर्वाणि दुरिता दुरितानि राक्षसैः कृतान्युपद्रवाणि तर निराकुरु अस्मिन् बर्हिषि निषीदच ॥ ३ ॥

३. क्षरणशील और क्रान्तकर्मा सोम, राक्षसों के किये सारे उपद्रवों को दूर करो। इस कुश पर बैठो।

अथ चतुर्थी—

पवमानस्वर्विदोजायमानोभवोमहान्। इन्दोविश्वाँअभीदसि ॥४॥१६॥

पवमान। स्वः। विदः। जायमानः। अभवः। महान्।
इन्दो इति। विश्वान्। अभि। इत्। असि ॥ ४ ॥ १६ ॥

हे पवमान सोम त्वं स्वः सर्वं विदो यजमानाय प्रयच्छ। अपिच जायमानः प्रादुर्भवन्नेव महान् पूजनीयो भवोसि। किंच हे इन्दो सोम त्वं विश्वान् सर्वानेव शत्रून् अभ्यसि तेजसाभिभवसि ॥ ४ ॥

४. बढ़मान सोम, तुम यजमान को सब कुछ प्रदान करो। उत्पन्न होते ही तुम पूजनीय होते हो। तुम सारे शत्रुओं को तेज से दबाते हो।

॥ इति सप्तमस्य प्रथमे षोडशोवर्गः ॥ १६॥

प्रगायत्रेणेति चतुर्ऋचं षट्त्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं तृतीयापुरउष्णिक् आद्यद्वादशकोऽष्टकौ। शिष्टागायत्रः पवमानः सोमोदेवता। तथाचानुक्रान्तं—प्रगायत्रेणोपान्त्यापुरउष्णिगिति। उक्तोविनियोगः।

तत्र प्रथमा—

प्रगायत्रेणगायतपवमानंविचर्षणिम्। इन्दुंसहस्रचक्षसम् ॥ १ ॥

प्र। गायत्रेण। गायत। पवमानम्। विऽचर्षणिम्।
इन्दुम्। सहस्रऽचक्षसम् ॥ १ ॥

विचर्षणिं विद्रष्टारं सहस्रचक्षसं बहुदर्शनं पवमानं पूयमानमिन्दुं सोमं गायत्रेण गायत्रनामधेयेन साम्ना प्रगायत। हे स्तोतारो गानं कुरुत स्तुतेत्यर्थः ॥ १ ॥

१. सूक्ष्मदर्शक, सहस्र-चक्षु और संस्क्रियमाण सोम की, गायत्री-साम-मन्त्र से, स्तोताओ, स्तुति करो।

तंत्वासहस्रचक्षसमथोसहस्रभर्णसम्। अतिवारमपाविषुः ॥ २ ॥

तम्। त्वा। सहस्रऽचक्षसम्। अथो इति। सहस्रऽभर्णसम्।
अति। वारम्। अपाविषुः ॥ २ ॥

हे सोम सहस्रचक्षसं बहुदर्शनं अथो अपिच सहस्रभर्णसं बहुभरणं तमभिषुतं त्वा त्वां वारं वालं दशापवित्रं अत्यपाविषुर्ऋत्विजः पावयन्ति ॥ २ ॥

२. सोम, बहुदर्शन, बहुभरण और अभिषुत तुमको ऋत्विक् लोग मेषलोम से छानते हैं।

अथ तृतीया—

अतिवारान्पवमानोअसिष्यदत्कलशाँअभिधावति।
इन्द्रस्यहार्द्याविशन् ॥ ३ ॥

आतिं । वारान् । पवमानः । असिष्यदत् । कलशान् ।
अभि । धावति । इन्द्रस्य । हार्दि । आऽविशन् ॥ ३ ॥

पवमानः पूयमानः सोमो वारान् अवेः बालानत्यतिकम्पासिष्यदत्स्यंदते । अपिचेन्द्रस्य हार्दि हृदयमाविशन् द्रोणानभिधावत्यभिगच्छति ॥ ३ ॥

३. क्षरणशील सोम मेषलोम से होकर गिरते और द्रोण-कलश की ओर जाते हुए इन्द्र के हृदय में बैठते हैं।

इन्द्रस्यसोमराधसेशंपवस्वविचर्षणे । प्रजावद्रेतआभर ॥४॥ १७॥

इन्द्रस्य । सोम । राधसे । शम् । पवस्व । विऽचर्षणे ।
प्रजाऽवत् । रेतः । आ । भर ॥ ४ ॥ १७ ॥

हे विचर्षणे विद्रष्टः सोम त्वमिन्द्रस्य राधसे राधनाय संसिध्यै शं सुखकरं रसं पवस्व क्षर। अपिचास्मभ्यं प्रजावत्पुत्राद्युपेतं रेतउदकमन्नं वा आभराहर प्रयच्छेत्यर्थः ॥ ४ ॥

४. बहुदर्शी सोम, इन्द्र के आराधन के लिए तुम भली भाँति क्षरित होओ। हमारे लिए पुत्रादि से युक्त धन दो।

॥ इति सप्तमस्य प्रथमे सप्तदशोवर्गः ॥ १७ ॥

॥ इति नवमे मंडले द्वितीयोनुवाकः ॥ २ ॥

तृतीयेनुवाके सप्त सूक्तानि तत्रायावीतीति विंशदृचं प्रथमं सूक्तमसहीयुर्नामांगिरसऋषिः गायत्रीछन्दः पवमानःसोमो देवता । तथाचानुक्रान्तं—अयावीतीविंशदसहीयुरिति । उक्तो-विनियोगः ।

तत्र प्रथमा—

अयावीतीपरिस्रवयस्तइन्दोमदेष्वा । अवाहन्नवतीर्नव ॥ १ ॥

अया । वीती । परि । स्रव । यः । ते । इन्दो इति ।
मदेषु । आ । अवऽअहन् । नवतीः । नव ॥ १ ॥

हे इन्दो सोम अयानेन रसेन वीती वीत्यै इन्द्रस्य भक्षणाय परिस्रव परिक्षर। कीदृशो-नरसेनेत्यतआह ते तव योरसोमदेषु संग्रामेषु नवतीर्नवेति नवनवतिसंख्याकाश्च शत्रुपुरीरवा-हन् जघान अमुं सोमरसं पीत्वा मत्तःसन्निन्द्र उक्तलक्षणाः शत्रुपुरीर्जघानेतिकृत्वा रसोजघा-नेत्युपचारः ॥ १ ॥

१. इन्द्र के पान के लिए उस रस से बहो, जिसने संग्राम में निन्यानवे शत्रु-पुरियों को नष्ट किया है।

अथ द्वितीया—

पुरः॑स॒द्यइ॒त्थाधि॑ये॒दिवो॑दासाय॒शम्ब॑रम् । अध॒त्यंतु॒र्वशं॒यदुं॑ ॥ २ ॥

पुरः॑ । स॒द्यः । इ॒त्थाऽधि॑ये । दिवः॑ऽदासाय । शम्ब॑रम् ।
अध॑ । त्यम् । तु॒र्वश॑म् । यदु॑म् ॥ २ ॥

सद्य एकस्मिन्नेवाह्नि पुरः शत्रूणां पुराणि सोमरसोवाहन् इत्थाधिये सत्यकर्मणे दिवोदासाय राज्ञे शंबरं शत्रुपुराणां स्वामिनमधाथ त्यं तं तुर्वशं तुर्वशनामकंराजानं दिवोदासशत्रुं यदुं यदुनामकंराजानं च वशमानयच्च । अत्रापि सोमरसं पीत्वा मत्तःसन् इंद्रः सर्वमेतदकार्षीदिति सोमरसेकर्तृत्वमुपचर्यते ॥ २ ॥

२. उस सोमरस ने एक ही दिन में शम्बर नामक शत्रुपुरियों के स्वामी को सत्यकर्मा दिवोदास राजा के वश में कर दिया था। अनन्तर सोमरस ने दिवोदास के शत्रु तुर्वश और यदु राजाओं को भी वश में कर दिया था।

अथ तृतीया—

परि॑णो॒अश्व॑मश्व॒विद्गोम॑दिन्दो॒हिर॑ण्यवत् । क्षरा॑सह॒स्रिणी॒रिषः॑ ॥३॥

परि॑ । नः॒ । अश्व॑म् । अ॒श्व॒ऽवित् । गोऽम॑त् । इ॒न्दो॒ इति॑ ।
हिर॑ण्यऽवत् । क्षर॑ । स॒ह॒स्रिणीः॑ । इषः॑ ॥ ३ ॥

हे इन्दो सोम अश्ववित् अश्वस्य लंभकस्त्वं नोस्माकमश्वं गोमद्गोयुक्तं हिरण्यवद्धिरण्योपेतं धनंच परिक्षर । अपिच सहस्रिणीर्बहूनि इषोन्नानि क्षर ॥ ३ ॥

३. सोम, तुम अश्व देनेवाले हो। तुम अश्व, गौ और हिरण्य से युक्त धन को वितरित करो।

पव॑मानस्यतेव॒यंप॒वित्र॑मभ्युन्द॒तः । स॒खि॒त्वमावृ॑णीमहे ॥ ४ ॥

पव॑मानस्य । ते॒ । व॒यम् । प॒वित्र॑म् । अ॒भि॒ऽउ॒न्द॒तः ।
स॒खि॒ऽत्वम् । आ । वृ॒णी॒म॒हे॒ ॥ ४ ॥

हे सोम पवित्रमभ्युंदतः पवित्रमभिक्लेदयतः पवमानस्य क्षरतश्च ते तव सखित्वं सख्यं वयममहीयव आंगिरसा आवृणीमहे प्रार्थयामहे ॥ ४ ॥

४. सोम, क्षरणशील और दशापवित्र को आर्द्र करनेवाले तुमसे हम, मित्रता के लिए, प्रार्थना करते हैं।

अथ पञ्चमी—

येते॑प॒वित्र॑मू॒र्मयो॑भि॒क्षर॑न्ति॒धार॑या । तेभि॑र्नःसोममृळय ॥ ५॥ १८॥

ये । ते । पवित्रम् । ऊर्मयः । अभिऽक्षरन्ति । धारया ।
तेभिः । नः । सोम । मृळय ॥ ५ ॥ १८ ॥

हे सोम ये प्रसिद्धाः ते तव ऊर्मयस्तरंगाः पवित्रं धारयाभिक्षरन्ति तेभिस्तैरूर्मिभिर्नोस्मान्मृळय सुखय ॥ ५ ॥

५. सोम, तुम्हारी जो तरंगें दशापवित्र के चारों ओर गिरती हैं, उनसे हमें सुख दो। ॥ इति सप्तमस्य प्रथमेष्टादशोवर्गः ॥ १८ ॥

सनःपुनानआभरररयिंवीरवतीमिषम् । ईशानःसोमविश्वतः ॥ ६ ॥

सः । नः । पुनानः । आ । भर । रयिम् । वीरऽवतीम् ।
इषम् । ईशानः । सोम । विश्वतः ॥ ६ ॥

हे सोम विश्वतः सर्वस्य जगतईशानः ईश्वरः सोभिषुतः पुनानः पूयमानस्त्वं नोस्मभ्यं रयिं धनं वीरवतीं पुत्राद्युपेतमिषमन्नं चाभराहर ॥ ६ ॥

६. सोम, तुम समस्त विश्व के प्रभु हो। अभिषुत और शोधित तुम हमारे लिए धन और पुत्रादि-युक्त अन्न ले आओ।

एतमुत्यंदशक्षिपोमृजन्तिसिन्धुमातरम् । समादित्येभिरख्यत ॥७॥

एतम् । ऊँ इति । त्यम् । दश । क्षिपः । मृजन्ति ।
सिन्धुऽमातरम् । सम् । आदित्येभिः । अख्यत ॥ ७ ॥

सिंधुमातरं यस्य सोमस्य सिन्धवोमातरोनद्योभवन्ति त्यं तमेतमिमं सोमं दशक्षिपो दशसंख्याकाअंगुलयो मृजंति शोधयंति । अपिच सोयं सोमः आदित्येभिरादित्यैः समख्यत संगच्छते ॥ ७ ॥

७. सोम की मातायें नदियां हैं। उन सोम की दस अँगुलियां मलती हैं। वे सोम अदिति-पुत्रों के साथ मिलते हैं।

अथाष्टमी—

समिन्द्रेणोतवायुनासुतएतिपवित्रआ । संसूर्यस्यरश्मिभिः ॥ ८ ॥

सम् । इन्द्रेण । उत । वायुना । सुतः । एति ।
पवित्रे । आ । सम् । सूर्यस्य । रश्मिऽभिः ॥ ८ ॥

सुतोभिषुतः सोमः पवित्रे इन्द्रेण समेति संगच्छति । उतापिच वायुना समेति सूर्यस्य रश्मिभिर्मयूखैरपि समेति ॥ ८ ॥

८. अभिषुत सोम दशापवित्र में इन्द्र के साथ और वायु तथा सूर्य-किरणों के साथ मिलते हैं।

सनोभगायवायवेपूष्णेपवस्वमधुमान् । चारुर्मित्रेवरुणेच ॥ ९ ॥

सः । नः । भगाय । वायवे । पूष्णे । पवस्व । मधुऽमान् । चारुः । मित्रे । वरुणे । च ॥ ९ ॥

हे सोम मधुमान् मधुररसश्चारुः कल्याणस्वरूपश्च सोभिषुतस्त्वं नोस्माकं यज्ञे भगाय भगाख्यायदेवाय वायवेच पूष्णे रवये मित्रे मित्राय देवाय वरुणे वरुणायच पवस्व क्षर ॥९॥

९. सोम, तुम मधुर-रस, कल्याणरूप और अभिषुत हो। तुम भग, वायु, पूषा, मित्र और वरुण के लिए क्षरित होओ।

उच्चातेजातमन्धसोदिविषद्भूम्याददे । उग्रंशर्ममहिश्रवः ॥१०॥१९॥

उच्चा । ते । जातम् । अन्धसः । दिवि । सत् । भूमिः । आ । ददे । उग्रम् । शर्म । महि । श्रवः ॥ १० ॥ १९ ॥

हे सोम ते तव संबन्धिनोंधसो रसस्योच्चा उपरि जातं जन्म अपिच दिवि द्युलोके सत् विद्यमानं स्वतस्तवसंबन्धि उग्रमुद्गूर्णं शर्मसुखं महिमहत् श्रवोन्नंच भूमिराददे । भूम्याददइति पदत्रयमामनन्ति विसर्जनीयलोपः सांहितिकः । भूमिः भौमाजनामादृशाः भूमिष्ठैरादीयत इत्यर्थः ॥ १० ॥

१०. तुम्हारे अन्न का जन्म द्युलोक में है और तुम्हारा प्रवृद्ध सुख तथा प्रचुर अन्न भूमि पर है।

॥ इति सप्तमस्य प्रथमे एकोनविंशोवर्गः ॥ १९ ॥

एनाविश्वान्यर्यआद्युम्नानिमानुषाणाम् । सिषासन्तोवनामहे ॥११॥

एना । विश्वानि । अर्यः । आ । द्युम्नानि । मानुषाणाम् । सिसासन्तः । वनामहे ॥ ११ ॥

एना एनेनानेन सोमेन मानुषाणां मनुष्याणां विश्वा विश्वानि द्युम्नान्यन्नानि अर्योभिगच्छन्तः सिषासन्तः संभक्तुमिच्छन्तश्च वयं वनामहे संभजामहे ॥ ११ ॥

११. इन सोम की सहायता से हम मनुष्यों के सारे अन्नों को उपार्जित करते हैं और भाग करने की इच्छा होने पर भाग कर लेंगे।

अथ द्वादशी—

सनइन्द्राययज्यवेवरुणायमरुद्भ्यः । वरिवोवित्परिस्रव ॥ १२ ॥

सः । नः । इन्द्राय । यज्यवे । वरुणाय । मरुत्ऽभ्यः ।
वरिवःऽवित् । परि । स्रव ॥ १२ ॥

हेसोम वरिवोविदन्नस्य लंभकः पवमानस्त्वं नोस्माकं यज्यवे यष्टव्यायेन्द्राय वरुणायच मरुद्भ्यश्च परिस्रव धारया क्षर ॥ १२ ॥

१२. सोम, तुम अन्न-दाता हो। अभिषुत तुम हमारे यजनीय इन्द्र, वरुण और मरुतों के लिए क्षरित होओ।

उपोषुजातमप्तुरंगोभिर्भङ्गंपरिष्कृतम् । इन्दुंदेवाअयासिषुः ॥१३॥

उपो इति । सु । जातम् । अप्ऽतुरम् । गोभिः । भंगम् ।
परिऽकृतम् । इन्दुम् । देवाः । अयासिषुः ॥ १३ ॥

सुजातं सम्यक् प्रादुर्भूतं अप्तुरं वसतीवरीभिः प्रेरितं भगं शत्रूणां भंजकं गोभिर्गोविकारैः पयोभिः परिष्कृतमलंकृतं संस्कृतमिंदुं सोमं देवाइन्द्रादयः उपायासिषुरुपागच्छन्ति ॥ १३ ॥

१३. भली भांति उत्पन्न, वसतीवरी-द्वारा प्रेरित, शत्रु-भञ्जक और दूध आदि से परिष्कृत सोम के पास इन्द्र आदि देवता जाते हैं।

तमिद्वर्धन्तुनोगिरोवत्संसंशिश्वरीरिव । यइन्द्रस्यहृदंसनिः ॥ १४ ॥

तम् । इत् । वर्धन्तु । नः । गिरः । वत्सम् । संशिश्वरीःऽइव ।
यः । इन्द्रस्य । हृदम्ऽसनिः ॥ १४ ॥

यः सोम इन्द्रस्य हृदंसनिर्हृदयस्य संभक्ता भवति तमित्त्वमेव सोमं नोस्माकं गिरः स्तुतिरूपावाचः संवर्धन्तु सम्यक्वर्धयन्तु । तत्रदृष्टान्तः—वत्सं बालं शिश्वरीरिव यथा शिश्वर्योबह्वपयस्कामातरो वत्सं वर्धयन्ति तद्वदित्यर्थः ॥ १४ ॥

१४. जो सोम इन्द्र के लिए हृदयग्राही है, उन्हें ही हमारी स्तुतियाँ संवर्द्धित करें। ये स्तुतियाँ सोम को उसी प्रकार चाहती हैं, जैसे दूधवाली मातायें बच्चों को चाहती हैं।

अथ पञ्चदशी—

अर्षाणःसोमशंगवेधुक्षस्वपिप्युषीमिषम् । वर्धासमुद्रमुक्थ्यम्॥१५॥२०॥

अर्ष । नः । सोम । शम् । गवे । धुक्षस्व । पिप्युषीम् । इषम् ।
वर्ध । समुद्रम् । उक्थ्यम् ॥ १५ ॥ २० ॥

हे सोम त्वं नोस्माकं गवे शं सुखमर्ष क्षर । अपिच पिप्युषीं प्रवृद्धामिषमन्नं धुक्षस्व पूरय । किंचोक्थ्यं प्रशंस्यं समुद्रमुदकं वर्ध वर्धय ॥ १५ ॥

१५. सोम, हमारी गौ के लिए सुख दो। प्रभूत अन्न दो। स्वच्छ जल बढ़ाओ। ॥ इति सप्तमस्य प्रथमे विंशोवर्गः ॥ २० ॥

पवमानोअजीजनद्दिवश्चित्रंनतन्यतुम् । ज्योतिर्वैश्वानरंबृहत् ॥१६॥

पवमानः । अजीजनत् । दिवः । चित्रम् । न । तन्यतुम् ।
ज्योतिः । वैश्वानरम् । बृहत् ॥ १६ ॥

पवमानः सोमः बृहन्महत् वैश्वानरं वैश्वानराख्यं ज्योतिस्तेजोदिवोद्युलोकस्य चित्रं तन्यतुं न अशनिमिवाजीजनदजनयत् ॥ १६ ॥

१६. क्षरित होते-होते सोम ने वैश्वानर नामक ज्योति को, द्युलोक के चित्र का विस्तार करने के लिए, वज्र के समान उत्पन्न किया।

पवमानस्यतेरसोमदोराजन्नदुच्छुनः । विवारमव्यमर्षति ॥ १७ ॥

पवमानस्य । ते । रसः । मदः । राजन् । अदुच्छुनः । वि ।
वारम् । अव्यम् । अर्षति ॥ १७ ॥

हे राजन् दीप्यमानसोम पवमानस्य क्षरतः ते तवादुच्छुनोरक्षोवर्जितो मदोमदकरो रसः अव्यमविमयं वारं वालं दशापवित्रं व्यर्षत्यभिगच्छति ॥ १७ ॥

१७. दीप्यमान सोम, क्षरणशील तुम्हारा राक्षस-शून्य और मदकर सोम-रस मेषलोम की ओर जाता है।

अथाष्टादशी—

पवमानरसस्तवदक्षोविराजतिद्युमान् । ज्योतिर्विश्वंस्वर्दृशे ॥१८॥

पवमान । रसः । तव । दक्षः । वि । राजति । द्युऽमान् ।
ज्योतिः । विश्वम् । स्वः । दृशे ॥ १८ ॥

हे पवमान सोम तव त्वदीयोदक्षो वृद्धोद्युमान् दीप्तिमान् रसो विराजति प्रकाशते । न केवलं स्वयमेव प्रकाशते किंतु विश्वं व्याप्तं स्वः सर्वं ज्योतिस्तेजश्च दृशे द्रष्टुं करोतीति शेषः॥१८॥

१८. पवमान सोम, तुम्हारा प्रवृद्ध और दीप्तिशाली रस क्षरित होकर और सारे ब्रह्मांड (ज्योतिःपुञ्ज) को, व्याप्त करके, दृष्टिगोचर करता है।

अथैकोनविंशी—

यस्तेमदोवरेण्यस्तेनापवस्वान्धसा । देवावीरघशंसहा ॥ १९ ॥

यः । ते । मदः । वरेण्यः । तेन । पवस्व । अन्धसा ।
देवऽअवीः । अघशंसऽहा ॥ १९ ॥

हे सोम ते तव देवावीर्देवकामोऽघशंसहा राक्षसानां हन्ता वरेण्यः सर्वैर्वरणीयो मदोमदकरो योरसोविद्यते तेन रसेनांधसादनीयेन पवस्व क्षर ॥ १९ ॥

१९. सोम, तुम्हारा जो रस देवकामी, राक्षस-हन्ता, प्रार्थनीय और मदकर है, उस रस से, अन्न के साथ, क्षरित होओ।

जघ्निर्वृत्रममित्रियंसस्निर्वाजंदिवेदिवे । गोषाउअश्वसाअसि ॥२०॥२१॥

जघ्निः । वृत्रम् । अमित्रियम् । सस्निः । वाजम् । दिवेऽदिवे ।
गोऽसाः । ऊँ इति । अश्वऽसाः । असि ॥ २० ॥ २१ ॥

हे सोम त्वममित्रियममित्रभवं वृत्रं शत्रुं जघ्निर्हंतासि भवसि । किंच दिवेदिवे प्रतिदिनं वाजं संग्रामं सस्निः संभक्तासि । किंच गोषाः गवां दातासि अश्वसाः अश्वानां दातासि ॥ २० ॥

हे सोम, तुमने शत्रु वृत्र का वध किया है। तुम प्रतिदिन संग्राम का आश्रय करते हो। तुम गौ और अश्व देनेवाले हो।

॥ इति सप्तमस्य प्रथमे एकविंशोवर्गः ॥ २१ ॥

अथैकविंशी—

संमिश्लोअरुषोभवसूपस्थाभिर्नधेनुभिः । सीदञ्छ्येनोनयोनिमा॥२१॥

सम्ऽमिश्लः । अरुषः । भव । सुऽउपस्थाभिः । न ।
धेनुऽभिः । सीदन् । श्येनः । न । योनिम् । आ ॥ २१ ॥

हे सोम त्वं सूपस्थाभिः शोभनोपस्थानाभिः धेनुभिर्गोभिः गोविकारैः पयोभिरित्यर्थः। संमिश्लः संमिश्रितः श्येनोन यथा श्येनः शीघ्रमागत्य स्थानमासीदति तद्वद्योनिं स्वकीयं स्थानं आसीदन्। न संप्रत्यर्थे। इदानीमरुष आरोचमानोभव ॥ २१ ॥

२१. सोम, तुम सुस्वादु दूध आदि के साथ मिलकर, श्येन पक्षी के समान, शीघ्र जाकर अपने स्थान को ग्रहण करो और सुशोभित होओ।

सपवस्वयआविथेन्द्रंवृत्रायहन्तवे। वज्रिवांसंमहीरपः ॥ २२ ॥

सः। पवस्व। यः। आविथ। इन्द्रम्। वृत्राय। हन्तवे। वज्रिऽवांसम्। महीः। अपः ॥ २२ ॥

हे सोम यस्त्वं महीर्महतीरपो महांत्युदकानि वज्रिवांसं निरुंधानं वृत्राय वृत्रं हन्तवे हन्तुं इन्द्रमाविथ रक्षः। सत्वं पवस्व धारया क्षर। सोमं पीत्वा मत्तः सन्निन्द्रो महांत्युदकानि निरुंधानं वृत्रं जघानेत्यर्थः ॥ २२ ॥

२२. जिस समय वृत्रासुर ने जलभाण्डार को रोक रक्खा था, उस समय, वृत्र-वध में तुमने इन्द्र की रक्षा की थी। वही तुम इस समय क्षरित होओ।

सुवीरासोवयंधनाजयेमसोममीढ्वः। पुनानोवर्धनोगिरः ॥ २३ ॥

सुऽवीरासः। वयम्। धना। जयेम। सोम। मीढ्वः। पुनानः। वर्ध। नः। गिरः ॥ २३ ॥

हे मीढ्वः सेक्तः सोम पुनानः पूयमानस्त्वं सुवीरासः सुवीराः कल्याणपुत्राः वयममहीयव आंगिरसाः धना शत्रूणां धनानि जयेम शत्रून् जित्वा तदीयानि धनानि स्वीकुर्यामेत्यर्थः। नोस्माकं गिरः स्तुतिरूपावाचश्च वर्ध वर्धय ॥ २३ ॥

२३. सेचक और क्षरणशील सोम, कल्याण-पुत्र हम आङ्गिरस अमहीयु आदि शत्रुओं के धन को जीतें। हमारी स्तुतियों को वर्द्धित करो।

अथ चतुर्विंशी—

त्वोतासस्तवावसास्यामवन्वन्तआगुरः। सोमव्रतेषुजागृहि॥२४॥

त्वाऽऊतासः। तव। अवसा। स्याम। वन्वन्तः। आऽगुरः। सोम। व्रतेषु। जागृहि ॥ २४ ॥

हे सोम तव त्वदीयेनावसा रक्षणेन त्वोतासः त्वया रक्षिताः सन्तो वन्वन्तः शत्रून् भजमाना आमुरस्तेषामभिमारकाः स्याम भवेम । व्रतेष्वस्माकं कर्मसु जागृहि प्रबुद्धोभव ॥ २४ ॥

२४. तुमसे क्षरित होकर हम शत्रुओं का विनाश कर डालें। हमारे कर्मों में तुम सतर्क रहना।

अपघ्नन्पवतेमृधोपसोमोअराव्णः । गच्छन्निन्द्रस्यनिष्कृतम्॥२५॥२२॥

अपऽघ्नन् । पवते । मृधः । अप । सोमः । अराव्णः ।
गच्छन् । इन्द्रस्य । निःऽकृतम् ॥ २५ ॥ २२ ॥

सोमोमृधोहिंसकान् शत्रूनपघ्नन् मारयन् अराव्णः शक्तौ सत्यां धनानामदातॄंश्चापघ्नन् इन्द्रस्य निष्कृतं स्थानं गच्छन् प्राप्नुवन् पवते धारया क्षरति ॥ २५ ॥

२५. हिंसक शत्रुओं और अदाताओं को मारते हुए तथा इन्द्र के स्थान को प्राप्त करते हुए क्षरित होते हो।

॥ इति सप्तमस्य प्रथमे द्वाविंशोवर्गः ॥ २२ ॥

महोनोरायआभरपवमानजहीमृधः । रास्वेन्दोवीरवद्यशः ॥ २६ ॥

महः । नः । रायः । आ । भर । पवमान । जहि । मृधः ।
रास्व । इन्दो इति । वीरऽवत् । यशः ॥ २६ ॥

हे पवमानेन्दो सोम नोस्माकं महोमहान्ति रायोधनान्याभराहर । मृधोहिंसकान् शत्रून् च जहि मारय । वीरवत् पुत्राद्युपेतां यशः कीर्तिंच रास्वास्मभ्यं देहि ॥२६॥

२६. पवमान सोम, हमारे लिए महान् धन ले आओ और शत्रुओं को मारो। पुत्रादि-युक्त कीर्त्ति भी हमें दो।

नत्वांशतंचनह्रुतोराधोदित्सन्तमामिनन् । यत्पुनानोमखस्यसे ॥२७॥

न । त्वा । शतम् । चन । ह्रुतः । राधः । दित्सन्तम् । आ । मिनन् ।
यत् । पुनानः । मखस्यसे ॥ २७ ॥

हे सोम राधोधनमादित्सन्तमादातुमिच्छन्तं त्वा त्वां शतं चन बहवोपि ह्रुतोहिंसकाः शत्रवोनमिनन्नहिंसन्ति । कदेत्यत्राह यद्यदा पुनानः पूयमानस्त्वं मखस्यसेस्मभ्यं धनंदातुमिच्छसि ॥ २७ ॥

२७. सोम, जिस समय तुम शोधित होते-होते हमें धन देने की इच्छा करते हो और जिस समय तुम खाद्य देने की इच्छा करते हो, उस समय सैकड़ों शत्रु भी तुम्हें नहीं मार सकते।

अथाष्टाविंशी—

पवस्वेन्दोवृषासुतःकृधीनोयशसोजने । विश्वाअपद्विषोजहि ॥२८॥

पवस्व । इन्दो इति । वृषा । सुतः । कृधि । नः । यशसः ।
जने । विश्वाः । अप । द्विषः । जहि ॥ २८ ॥

हे इन्दो सोम सुतोभिषुतो वृषा सेक्ता त्वं पवस्व धारया क्षर । जने जनपदेषु नोस्मान् यशसोयशस्विनः कृधि कुरु । विश्वाः सर्वान् द्विषोद्वेष्टॄन् शत्रून् अपजहि मारय च ॥२८॥

२८. सोम, अभिषुत और सेचक तुम देशों में हमें यशस्वी करो और सारे शत्रुओं को मारो।

अस्यतेसख्येवयंतवेन्दोद्युम्नउत्तमे । सासह्यामपृतन्यतः ॥ २९ ॥

अस्य । ते । सख्ये । वयम् । तव । इन्दो इति ।
द्युम्ने । उत्ऽतमे । ससह्याम । पृतन्यतः ॥ २९ ॥

हे इन्दो सोम अस्यास्मिन् यागे वर्तमानस्य ते तव सख्ये सखित्वे सति वयममहीयव आंगिरसास्तव त्वदीये उत्तमे श्रेष्ठे द्युम्नेन्ने वृष्टिं प्राप्ताः । तथाचयास्कः—द्युम्नंद्योतयेर्यशोवान्नंवेति[1]। पृतन्यतोयुद्धमिच्छतः शत्रून्ससह्यामाभिभवेम ॥ २९ ॥

२९. सोम, इस यज्ञ में हमें तुम्हारा बन्धुत्व प्राप्त करने पर और तुम्हारे श्रेष्ठ अन्न से पुष्टि पा जाने पर हम युद्धेच्छु शत्रुओं को मारेंगे।

यातेभीमान्यायुधातिग्मानिसन्तिधूर्वणे । रक्षासमस्यनोनिदः॥३०॥२३॥

या । ते । भीमानि । आयुधा । तिग्मानि । सन्ति ।
धूर्वणे । रक्ष । समस्य । नः । निदः ॥ ३० ॥ २३ ॥

हे सोम ते तव या यानि भीमानि शत्रूणां भयंकराणि तिग्मानि तीक्ष्णानि आयुधा आयुधानि धूर्वणे शत्रुवधार्थं सन्ति तैरायुधैः समस्य सर्वस्य शत्रोर्निदोनिन्दाया नोस्मान् रक्ष पालय ॥ ३० ॥

३०. सोम, तुम्हारे जो शत्रुओं के लिए भयंकर, तीखे और शत्रु-वधकारी हथियार हैं, उनको रखनेवाले शत्रु की निन्दा से (पराजय रूप अयश) से हमारी रक्षा करो।

॥ इति सप्तमस्य प्रथमे त्रयोविंशोवर्गः ॥ २३ ॥

---

१ नि० ५. ५. ।

एतेअसृग्रमिति त्रिंशदृचं द्वितीयं सूक्तं भार्गवस्य जमदग्नेरार्षं गायत्रं पवमानसोमदेवताकं। तथाचानुक्रान्तं—एतेअसृग्रंजमदग्निरिति। गतोविनियोगः।

तत्र प्रथमा—

एतेअसृग्रमिन्दवस्तिरःपवित्रमाशवः। विश्वान्यभिसौभगा॥ १॥

एते। असृग्रम्। इन्दवः। तिरः। पवित्रम्। आशवः।
विश्वानि। अभि। सौभगा॥ १॥

आशवः शीघ्रा एते पवमानाइन्दवः सोमा विश्वानि सर्वाणि सौभगा सौभगानि धनान्यभिलक्ष्य पवित्रं तिरः असृग्रं ऋत्विग्भिः सृज्यन्ते॥ १॥

१. सोम सारे सौभाग्य हमें देंगे; इसी लिए वह दशापवित्र के पास शीघ्र-शीघ्र उत्पन्न किये जाते हैं।

विघ्नन्तोदुरितापुरुसुगातोकायवाजिनः। तनाकृण्वन्तोअर्वते॥२॥

विऽघ्नन्तः। दुःऽइता। पुरु। सुऽगा। तोकाय। वाजिनः।
तना। कृण्वन्तः। अर्वते॥ २॥

वाजिनो बलवन्तः सोमाः पुरु बहूनि दुरिता दुरितानि विघ्नन्तो विशेषेण नाशयन्तः तोकायास्माकं पुत्रायार्वतेश्वाय च सुगा सुखानि तना धनानि च कृण्वन्तः कुर्वन्तः तिरः पवित्रं सृज्यन्त इति संबन्धः॥ २॥

२. बली सोम अनेक पापों को भली भाँति नष्ट करते हुए तथा हमारे पुत्र और अश्वों को सुखी करते हुए दशापवित्र के पास उत्पन्न किये जाते हैं। अथ तृतीया—

कृण्वन्तोवरिवोगवेभ्यर्षन्तिसुष्टुतिम्। इळामस्मभ्यंसंयतम्॥३॥

कृण्वन्तः। वरिवः। गवे। अभि। अर्षन्ति। सुऽस्तुतिम्।
इळाम्। अस्मभ्यम्। सम्ऽयतम्॥ ३॥

अस्माकं गवेस्मभ्यंच संयतं यदास्मान् संयच्छति तद्वरिवोधनमिळामन्नं च कृण्वन्तः कुर्वन्तः सोमाः सुष्टुतिमस्मदीयां शोभनां स्तुतिमभ्यर्षन्त्याभिमुख्येन गच्छन्ति॥ ३॥

३. हमारी गौ और हमारे लिए धन और अन्न देते हुए सोम हमारी स्तुति की ओर आते हैं। अथ चतुर्थी—

असाव्यंशुर्मदायाप्सुदक्षोगिरिष्ठाः। श्येनोनयोनिमासदत्॥ ४॥

असावि । अंशुः । मदाय । अप्ऽसु । दक्षः । गिरिऽस्थाः ।
श्येनः । न । योनिम् । आ । असदत् ॥ ४ ॥

गिरिष्ठाः पर्वतेजातोंशुः सोमोमदाय मदार्थमसाव्यभिषुतः अप्सु वसतीवरीषु दक्षः प्रवृद्धश्च भवति । किंच श्येनोन यथा श्येनोवेगेन आगत्य स्थानमासीदति तद्वदयं सोमो योनिं स्वकीयं स्थानमसदद्दासीदति ॥ ४ ॥

४. सोम, पर्वत से उत्पन्न, मद के लिए अभिषुत और जल (वसतीवरी) में प्रवृद्ध हैं। जैसे श्येन पक्षी वेग से आकर अपने स्थान को प्राप्त करता है, वैसे ही ये सोम भी अपने स्थान पर बैठते हैं।

शुभ्रमन्धोदेववातमप्सुधूतोनृभिःसुतः । स्वदन्तिगावःपयोभिः॥५॥२४॥

शुभ्रम् । अन्धः । देवऽवातम् । अप्ऽसु । धूतः । नृऽभिः ।
सुतः । स्वदन्ति । गावः । पयःऽभिः ॥ ५ ॥ २४ ॥

यद्देववातं देवैःप्रार्थितं शुभ्रं शोभनमन्धोन्नं गावः पशवः पयोभिराशिरैः स्वदन्ति स्वादयन्ति सोयं सोमो नृभिर्नेतृभिर्ऋत्विग्भिः सुतोभिषुतःसन्नप्सु वसतीवरीषु धूतः शोधितोभवति॥५॥

५. देवों के द्वारा प्रार्थित और शोभन अन्न को गायें दूध आदि से स्वादिष्ट बनाते हैं। यह सोम ऋत्विकों के द्वारा अभिषुत और वसतीवरी में शोधित हुए हैं। ॥ इति सप्तमस्य प्रथमे चतुर्विंशोवर्गः ॥ २४ ॥

आदीमश्वंनहेतारोशूंशुभन्नमृताय । मध्वोरसंसधमादे ॥ ६ ॥

आत् । ईम् । अश्वम् । न । हेतारः । अशूंशुभन् । अमृताय ।
मध्वः । रसम् । सधऽमादे ॥ ६ ॥

आदनन्तरं हेतारः प्रेरकाऋत्विजः सधमादे यज्ञे ईमेनं मध्वोमदकरस्य सोमस्य रसं अमृतायामरणायाश्वं नाश्वमिवाशूंशुभन् शोभयन्ति ॥ ६ ॥

६. अनन्तर अनुष्ठाता ऋत्विक्, यज्ञस्थल में इस मदकर सोम के रस को, अमरत्व पाने के लिए, अश्व के समान सुशोभित करते हैं।

अथ सप्तमी—

यास्तेधारामधुश्चुतोसंग्रभिन्दऊतये । ताभिःपवित्रमासदः ॥ ७ ॥

याः । ते । धाराः । मधुऽश्चुतः । असंग्रभम् । इन्दो इति ।
ऊतये । ताभिः । पवित्रम् । आ । असदः ॥ ७ ॥

हे इन्दो सोम ते तव मधुश्चुतो मधुररसस्य श्रोतयित्र्योयाधारा ऊतये रक्षणाय असृग्रमसृज्यन्त वाभिर्धाराभिस्त्वं पवित्रमासदआसीद ॥ ७ ॥

७. सोम, तुम्हारी मधुर रस और चुलानेवाली धारायें, रक्षण के लिए, बनाई गई हैं; उनके साथ तुम दशापवित्र में बैठो।

सोअर्षेन्द्रायपीतयेतिरोरोमाण्यव्यया । सीदन्योनावनेष्वा ॥ ८ ॥

सः । अर्ष । इन्द्राय । पीतये । तिरः । रोमाणि । अव्यया ।
सीदन् । योना । वनेषु । आ ॥ ८ ॥

हे सोम सोभिषुतस्त्वं अव्यया अव्ययानि अविमयानि रोमाणि वालानि तिरस्तिरस्कुर्वन् वनेषु पात्रेषु योना योनौ स्थाने आसीदन्निन्द्रायेन्द्रस्य पीतये पानायार्ष क्षर ॥ ८ ॥

८. सोम, अभिषुत तुम मेषलोम से निकलकर और इन्द्र के पान के लिए पात्रों में से अपने स्थान पर जाकर क्षरित होओ।

त्वमिन्दोपरिस्रवस्वादिष्ठोअङ्गिरोभ्यः । वरिवोविदूतंपयः ॥ ९ ॥

त्वम् । इन्दो इति । परि । स्रव । स्वादिष्ठः ।
अङ्गिरःऽभ्यः । वरिवःऽवित् । घृतम् । पयः ॥ ९ ॥

हे इन्दो सोम स्वादिष्ठः स्वादुतमो वरिवोविदस्मदभिलषितस्य धनस्य लंभकश्च त्वमंगिरोभ्योंगिरसामर्थाय घृतमाज्यं पयश्च परिस्रव परिक्षर ॥ ९ ॥

९. सोम, तुम स्वादिष्ठ और हमारे अभिलषित धन के प्रापक हो। तुम अङ्गिरा की सन्तानों के लिए घृत और दुग्ध बरसो।

अथ दशमी—

अयंविचर्षणिर्हितःपवमानःसचेतति । हिन्वानआप्यंबृहत् ॥ १० ॥ २५ ॥

अयम् । विऽचर्षणिः । हितः । पवमानः । सः । चेतति ।
हिन्वानः । आप्यम् । बृहत् ॥ १० ॥ २५ ॥

विचर्षणिर्विद्रष्टा हितः पात्रेषु निहितः पवमानः अयं सोम आप्यमप्सुभवं बृहन्महदन्नं हिन्वानः प्रेरयन् सचेतति सर्वैः सज्ञायते ॥ १० ॥

१०. सूक्ष्म-दर्शक, पात्रों में स्थित और क्षरणशील सोम, जल में उत्पन्न महान् अन्न को प्रेरित करके सबके द्वारा जाने जाते हैं।

॥ इति सप्तमस्य प्रथमे पञ्चविंशोवर्गः ॥ २५ ॥

अथैकादशी—

एषवृषावृषव्रतःपवमानोअशस्तिहा । करद्वसूनिदाशुषे ॥ ११ ॥

एषः । वृषा । वृषऽव्रतः । पवमानः । अशस्तिऽहा ।
करत् । वसूनि । दाशुषे ॥ ११ ॥

वृषा कामानां सेक्ता वृषव्रतो वृषकर्मा अशस्तिहा राक्षसानां हन्ता पवमान एषसोमो दाशुषे हविषां दात्रे यजमानाय वसूनि धनानि करत् करोति प्रयच्छतीत्यर्थः ॥ ११॥

११. यह जो सोम हैं, ये धन-वर्षक, वृष-कर्मा, राक्षसों के हन्ता और क्षरणशील हैं। ये हविर्दाता यजमान को धन देते हैं।

आपवस्वसहस्रिणंरयिंगोमन्तमश्विनम् । पुरुश्चन्द्रंपुरुस्पृहम्॥१२॥

आ । पवस्व । सहस्रिणम् । रयिम् । गोऽमन्तम् ।
अश्विनम् । पुरुऽचन्द्रम् । पुरुऽस्पृहम् ॥ १२ ॥

हे सोम त्वं सहस्रिणं बहुसंख्याकं गोमन्तं गोभिरुपेतमश्विनमश्ववन्तं पुरुश्चन्द्रं बहूनां हर्षकं पुरुस्पृहं बहुस्पृहणीयं रयिं धनमापवस्व परिक्षर ॥१२ ॥

१२. सोम, तुम प्रचुर, गौओं और अश्वों से युक्त, सबके हर्षदाता और बहुतों के द्वारा अभिलषणीय धन को बरसो।

एषस्यपरिषिच्यतेमर्मृज्यमानआयुभिः । उरुगायःकविक्रतुः ॥१३॥

एषः । स्यः । परि । सिच्यते । मर्मृज्यमानः । आयुऽभिः ।
उरुऽगायः । कविऽक्रतुः ॥ १३ ॥

उरुगायो बहुस्तुतिः कविक्रतुः क्रांतप्रज्ञः क्रान्तकर्मा वा स्यः सएषोयं सोम आयुभिर्मनुष्यैर्मर्मृज्यमानः शोध्यमानः परिषिच्यते ॥ १३ ॥

१३. अनेक स्तुतियोंवाले और कार्यक्षम सोम मनुष्यों के द्वारा शोधित होकर सिञ्चित होते हैं।

अथ चतुर्दशी—

सहस्रोतिःशतामघोविमानोरजसःकविः । इन्द्रायपवतेमदः॥१४॥

सहस्रऽऊतिः । शतऽमघः । विऽमानः । रजसः । कविः ।
इन्द्राय । पवते । मदः ॥ १४ ॥

सहस्रोतिरपरिमितरक्षणः शतमघो बहुधनो रजसो लोकस्य विमानो निर्माता कविः क्रान्तकर्मा मदो मदकरः सोमइन्द्रायेन्द्रार्थं पवते धारया क्षरति ॥१४॥

१४. सोम असीम रक्षण, बहुधन, संसार के निर्माता, क्रान्तकर्मा और मदकर हैं। ये इन्द्र के लिए क्षरित होते हैं।

गिराजातइहस्तुतइन्दुरिन्द्रायधीयते। वियोनावसतावि॑व॥१५॥२६॥

गिरा। जातः। इह। स्तुतः। इन्दुः। इन्द्राय। धीयते।
विः। योना। वसतौऽइव॥ १५॥ २६॥

जातः प्रादुर्भूतः गिरा स्तुत्या स्तुतश्चेन्दुः सोम इहास्मिन्यज्ञे योना योनौ स्वस्थाने इन्द्रायेन्द्रार्थं वसताविव विःपक्षी यथा स्ववासे तथा धीयते निधीयते ॥१५॥

१५. जैसे पक्षी अपने घोसले में जाता है, वैसे ही प्रादुर्भूत और स्तोम से स्तुत सोम इस यज्ञ में अपने स्थान में, इन्द्र के लिए, स्थित होते हैं।

॥ इति सप्तमस्य प्रथमे षड्विंशोवर्गः ॥२६॥

पवमानःसुतोनृभिःसोमोवाजमिवासरत्। चमूषुशक्मनासदम्॥१६॥

पवमानः। सुतः। नृऽभिः। सोमः। वाजम्ऽइव। असरत्।
चमूषु। शक्मना। आऽसदम्॥ १६॥

नृभिर्नेतृभिर्ऋत्विग्भिः सुतोभिषुतः पवमानः सोमश्च चमूषु चमसेषु शक्मना बलेनासदमुपवेष्टुं वाजमिव युद्धमिव स्थानमसरत्सरति ॥ १६॥

१६. ऋत्विकों के द्वारा अभिषुत (निष्पीड़ित) और क्षरणशील सोम चमसों में, अपने स्थान में, युद्ध के समान बैठने के लिए जाते हैं।

तंत्रिपृष्ठेत्रिवन्धुरेरथेयुञ्जन्तियातवे। ऋषीणांसप्तधीतिभिः॥१७॥

तम्। त्रिऽपृष्ठे। त्रिऽवन्धुरे। रथे। युञ्जन्ति। यातवे।
ऋषीणाम्। सप्त। धीतिऽभिः॥ १७॥

त्रिपृष्ठे त्रिषवणपृष्ठे त्रिबंधुरे त्रिवेदबंधुरे ऋषीणांरथे यज्ञरथे तं सोमं सप्त सप्तभिः धीतिभिश्छंदोभिः यातवे देवान्प्रतिगन्तुं युंजन्ति ऋत्विजोयोजयन्ति ॥ १७॥

१७. तीन पृष्ठों (अभिषवणों), तीन स्थानों (वेदों) और छन्दःस्वरूप सात रस्सियों से युक्त ऋषियों के यज्ञ-रूपी रथ में सोम को ऋत्विक् लोग, देवों के प्रति जाने के लिए, जोतते हैं।

अथाष्टादशी–

तंसोतारोधनस्पृतंमाशुंवाजाययातवे । हरिंहिनोतवाजिनम्॥१८॥

तम् । सोतारः । धनऽस्पृतम् । आशुम् । वाजाय ।
यातवे । हरिम् । हिनोत । वाजिनम् ॥ १८ ॥

हे सोतारोभिषवकर्तार ऋत्विजः धनस्पृतं धनानां स्रष्टारं वाजिनं बलिनं आशुं वेगवंतं सोमात्मकं हरिमश्वं वाजाय यज्ञाख्यं संग्रामं यातवे गंतुं हिनोत प्रेरयत । यथा योद्धारोयुद्धं गंतुं बलिनं वेगवंतमश्वं प्रेरयन्ति तद्वत् यज्ञमभिगन्तुं बलवन्तं सोमं प्रेरयतेति भावः ॥ १८ ॥

१८. सोम का निष्पीड़न (अभिषवण) करनेवाले, धन-स्रष्टा, बली और वेगशाली सोमरूप अश्व को यज्ञ-रूपी संग्राम में जाने के लिए सज्जित करो।

अथैकोन विंशी–

आविशन्कलशंसुतोविश्वाअर्षन्नभिश्रियः । शूरोनगोषुतिष्ठति॥१९॥

आऽविशन् । कलशम् । सुतः । विश्वाः । अर्षन् ।
अभि । श्रियः । शूरः । न । गोषु । तिष्ठति ॥ १९ ॥

सुतोभिषुतः सोमः कलशं द्रोणमाविशन् विश्वाः सर्वाः श्रियः संपदोऽर्षन् अस्मानभिगमयन् गोषु शत्रूणां पशुषु शूरोन यथाशूरो निःशंकस्तिष्ठति तद्वद्यज्ञेषु निःशंकस्तिष्ठति ॥ १९ ॥

१९. अभिषुत सोम कलश की ओर जाते हुए और सारी सम्पदाओं को हमें देते हुए गौओं में शूर के समान, निःशङ्क होकर, रहते हैं।

आतइन्दोमदायकंपयोदुहन्त्यायवः । देवादेवेभ्योमधु॥२०॥२७॥

आ । ते । इन्दो इति । मदाय । कम् । पयः । दुहन्ति ।
आयवः । देवाः । देवेभ्यः । मधु ॥ २० ॥ २७ ॥

हे इन्दो सोम ते तव मधु मधुभूतं पयः पेयरसं देवाः स्तोतारः आयवोमनुष्या मदाय कं मदार्थं देवेभ्य इन्द्रादिभ्यः आदुहन्ति ॥ २० ॥

२०. सोम, तुम्हारे मधुर रस को, स्तोता लोग, इन्द्रादि के मद के लिए, दूहते हैं।

॥ इति सप्तमस्य प्रथमे सप्तविंशोवर्गः ॥ २७ ॥

अथैकविंशी—

आनःसोमंपवित्रआसृजतामधुमत्तमम् । देवेभ्योदेवश्रुत्तमम्॥२१॥

आ । नः । सोमम् । पवित्रे । आ । सृजत । मधुमत्ऽतमम् ।
देवेभ्यः । देवश्रुत्ऽतमम् ॥ २१ ॥

हे ऋत्विजो नोस्माकं देवश्रुत्तममत्यन्तं देवैः श्रूयमाणं मधुमत्तमं अतिशयेन मधुमन्तं सोमंदेवेभ्य इन्द्राद्यर्थं पवित्रे दशापवित्रे आसृजत साधयत ॥ २१ ॥

२१. ऋत्विको, देवताओं के लिए जिनका नाम प्रिय है और जो अतीव मधुर हैं, उन सोम को इन्द्र आदि के लिए दशापवित्र में रक्खो।

एतेसोमाअसृक्षतगृणानाःश्रवसेमहे । मदिन्तमस्यधारया ॥२२॥

एते । सोमाः । असृक्षत । गृणानाः । श्रवसे । महे ।
मदिन्ऽतमस्य । धारया ॥ २२ ॥

गृणानाः स्तूयमाना एते इमे सोमा महे महते श्रवसे अन्नाय मदिन्तमस्य मादयितृतमस्य रसस्य धारया असृक्षत ऋत्विग्भिः सृज्यन्ते ॥ २२ ॥

२२. ऋत्विक् लोग स्तुतिवाले सोम को, महान् अन्न के लिए, अतीव मदकर रस की धारा से बनाते हैं।

अभिगव्यानिवीतयेनृम्णापुनानोअर्षसि । सनद्वाजःपरिस्रव ॥२३॥

अभि । गव्यानि । वीतये । नृम्णा । पुनानः ।
अर्षसि । सनत्ऽवाजः । परि । स्रव ॥ २३ ॥

हे सोम पुनानः पूयमानोयस्त्वं वीतये भक्षणाय गव्यानि गोसंबन्धीनि नृम्णा नृम्णानि धनानि क्षीरादीन्यभ्यर्षस्यभिगच्छसि । सत्वं सनद्वाजोदीयमानान्नःसन् परिस्रव परिक्षर ॥२३॥

२३. सोम, शोधित तुम भक्षण के लिए गो-सम्बन्धी धनों (दूध आदिकों) को प्राप्त करते हो। अन्नदान करते हुए क्षरित होओ।

अथ चतुर्विंशी—

उतनोगोमतीरिषोविश्वाअर्षपरिष्टुभः । गृणानोजमदग्निना॥२४॥

उत । नः । गोऽमतीः । इषः । विश्वाः । अर्ष ।
परिऽस्तुभः । गृणानः । जमत्ऽअग्निना ॥ २४ ॥

उतापि च हे सोम जमदग्निनाम्ना ऋषिणा मया गृणानः स्तूयमानस्त्वं नोस्माकं गोमतीर्गोभिर्युक्तानि परिस्रुवः परितः श्रोतव्यानि विश्वाः सर्वाणि इषोन्नान्यर्ष गच्छ अस्मभ्यमेवंविधान्यन्नानि देहीत्यर्थः ॥ २४ ॥

२४. सोम, मैं जमदग्नि तुम्हारी स्तुति करता हूँ। तुम हमें गोयुक्त और सर्वत्र प्रशंसित अन्न दो।

पवस्ववाचोअग्रियःसोमचित्राभिरूतिभिः।
अभिविश्वानिकाव्या ॥ २५ ॥ २८ ॥

पवस्व । वाचः । अग्रियः । सोम । चित्राभिः ।
ऊतिऽभिः । अभि । विश्वानि । काव्या ॥ २५ ॥ २८ ॥

हे सोमाग्रियोमुख्यस्त्वं चित्राभिः पूजनीयैरूतिभीरक्षणैः सह वाचोस्मदीयाःस्तुतीः अभिपवस्व। एवदेव दर्शयति—विश्वानि सर्वाणि काव्या काव्यानि स्तुत्यात्मकानि वाक्यान्यभि पवस्वेति ॥ २५ ॥

२५. सोम, तुम मुख्य हो। पूजनीय रक्षणों के साथ हमारी स्तुतियों पर बरसो। सारे स्तुति-रूप वाक्यों पर भी बरसो।

॥ इति सप्तमस्य प्रथमेष्टाविंशोवर्गः ॥ २८ ॥

अथ षड्विंशी—

त्वंसमुद्रियांअपोग्रियोवाचईरयन्। पवस्वविश्वमेजय ॥ २६ ॥

त्वम् । समुद्रियाः । अपः । अग्रियः । वाचः ।
ईरयन् । पवस्व । विश्वमऽएजय ॥ २६ ॥

हे विश्वमेजय विश्वकंपक सोमाग्रियोमुख्यस्त्वं वाचईरयन् प्रेरयन् समुद्रियाआन्तरिक्षाण्यपउदकानि पवस्व धारया क्षर ॥ २६ ॥

२६. सोम, तुम विश्व-कम्पक हो। हमारे वचनों को ग्रहण करते हुए तुम आकाश से वारिवर्षण करो।

अथ सप्तविंशी—

तुभ्येमाभुवनाकवेमहिम्नेसोमतस्थिरे। तुभ्यंमर्षन्तिसिन्धवः ॥२७॥

तुभ्यं । इमा । भुवना । कवे । महिम्ने । सोम ।
तस्थिरे । तुभ्यम् । अर्षन्ति । सिन्धवः ॥ २७ ॥

हे कवे क्रान्तकर्मन् सोम तुभ्य तुभ्यं तव महिम्ने इमा इमानि भुवना भुवनानि तस्थिरे तिष्ठन्ति त्वामेव पुरस्कुर्वन्तीत्यर्थः। अपिच सिंधवोनद्यस्तुभ्यमेवार्षंति गच्छन्ति त्वदाज्ञामेवानुपालयन्तीत्यर्थः ॥ २७ ॥

२७. कवि सोम, तुम्हारी महिमा से ये भुवन स्थित हैं। सारी नदियाँ तुम्हारा ही आज्ञापालन करती हैं।

प्रतेदिवोनवृष्टयोधारायन्त्यसश्चतः। अभिशुक्रामुपस्तिरम्॥२८॥

प्र। ते। दिवः। न। वृष्टयः। धाराः। यन्ति। असश्चतः।
अभि। शुक्राम्। उपऽस्तिरम् ॥ २८ ॥

हे सोम ते तव असश्चतोसंगाधारा दिवोन्तरिक्षाद्वृष्टयोन वर्षाणीव शुक्रां शुक्लवर्णां शुक्लवर्णैरविलोमनिर्मितमुपस्तिर मुपस्तीर्यमाणं पवित्रमभि प्रति प्रयन्ति ॥ २८ ॥

२८. सोम, आकाश की वारि-धारा के समान तुम्हारी धारा शुक्लवर्ण और बिछाये हुए दशापवित्र की ओर जाती है।

इन्द्रायेन्दुंपुनीतनोग्रंदक्षायसाधनम्। ईशानंवीतिराधसम् ॥२९॥

इन्द्राय। इन्दुम्। पुनीतन। उग्रम्। दक्षाय।
साधनम्। ईशानम्। वीतिऽराधसम् ॥ २९ ॥

हे ऋत्विजः उग्रमुद्गूर्णं दक्षाय बलस्य साधनं करणं ईशानं धनानामीश्वरं वीतिराधसं वीतधनं इन्दुं सोमं इन्द्रायेन्द्रार्थं पुनीतन पुनीत ॥ २९ ॥

२९. ऋत्विको, उग्र, बल-करण, धनपति और धन देनेवाले सोम को इन्द्र के लिए प्रस्तुत करो।

पवमानऋतःकविःसोमःपवित्रमासदत्। दधत्स्तोत्रेसुवीर्यम्॥३०॥२९॥

पवमानः। ऋतः। कविः। सोमः। पवित्रम्। आ।
असदत्। दधत्। स्तोत्रे। सुऽवीर्यम् ॥ ३० ॥ २९ ॥

ऋतः सत्यभूतः कविः क्रान्तकर्मा पवमानः सोमोस्मदीये स्तोत्रे सुवीर्यं शोभनवीर्यं दधत् प्रयच्छन् पवित्रमासददासीदति ॥ ३० ॥

३०. सत्य, क्रान्तकर्मा और क्षरणशील सोम हमारे स्तोत्र में शोभन वीर्य देते हुए दशापवित्र पर बैठते हैं।

॥ इति सप्तमस्य प्रथमे एकोनत्रिंशोवर्गः ॥ २९ ॥

आपवस्वेति त्रिंशदृचं तृतीयं सूक्तं काश्यपस्य निध्रुवेरार्षं गायत्रं पवमानसोमदेवताकं। तथाचानुक्रान्तं—आपवस्वनिध्रुविः काश्यपइति। गतोविनियोगः।

तत्र प्रथमा—

आपवस्वसहस्रिणंरयिंसोमसुवीर्यम्। अस्मेश्रवांसिधारय ॥ १ ॥

आ। पवस्व। सहस्रिणम्। रयिम्। सोम।
सुऽवीर्यम्। अस्मे इति। श्रवांसि। धारय ॥ १ ॥

हे सोम त्वं सहस्रिणं बहुसंख्याकं सुवीर्यं शोभनवीर्यं रयिं धनमापवस्वाभिमुख्येन क्षर। अपिचास्मे अस्मासु श्रवांस्यन्नानि धारय स्थापय ॥ १ ॥

१. सोम, तुम बहु-संख्यक और शोभन-वीर्य धन क्षरित करो और हमें अन्न दो। अथ द्वितीया—

इषमूर्जंचपिन्वसइन्द्रायमत्सरिन्तमः। चमूष्वानिषीदसि ॥ २ ॥

इषम्। ऊर्जम्। च। पिन्वसे। इन्द्राय।
मत्सरिन्ऽतमः। चमूषु। आ। नि। सीदसि ॥ २ ॥

हे सोम मत्सरिन्तमः अतिशयेन मदयितृतमः त्वमिन्द्रायेन्द्रार्थमिषमन्नमूर्जं रसंच पिन्वसे क्षरसि। अपिच चमूषु चमसेष्वानिषीदसि तिष्ठसि ॥ २॥

२. सोम, तुम अतीव मादक हो। तुम इन्द्र के लिए अन्न, बल और रस देते हो। तुम चमसों में बैठते हो।

सुतइन्द्रायविष्णवेसोमःकलशेअक्षरत्। मधुमाँअस्तुवायवे ॥ ३ ॥

सुतः। इन्द्राय। विष्णवे। सोमः। कलशे।
अक्षरत्। मधुऽमान्। अस्तु। वायवे ॥ ३ ॥

इन्द्रायेन्द्रार्थं विष्णवे विष्णवर्थंच वायवे वाय्वर्थंच सुतोभिषुतोयः सोमः कलशे द्रोणकलशे अक्षरत् क्षरति सोयं सोमो मधुमान् मधुररसवानस्तु भवतु ॥ ३ ॥

३. जो सोम इन्द्र, विष्णु और वायु के लिए अभिषुत होकर द्रोण-कलस में जाते हैं, वे मधुर रसवाले हैं।

अथ चतुर्थी—

एतेअंसग्रमाशवोतिह्वरांसिबभ्रवः। सोमाऋतस्यधारया ॥ ४ ॥

एते । असृग्रम् । आशवः । अति । ह्वरांसि ।
बभ्रवः । सोमाः । ऋतस्य । धारया ॥ ४ ॥

बभ्रवोबभ्रुवर्णा आशवः शीघ्रा एते इमे सोमा ऋतस्योदकस्य धारया असृग्रन् सृज्यन्ते ह्वरांसि रक्षांस्यति गच्छन्तिच ॥ ४ ॥

४. पिङ्गलवर्ण और क्षिप्रकारी सोम जल की धारा से बनाये जाते हैं। सोम राक्षसों की ओर जाते हैं।

इन्द्रंवर्धन्तोअप्तुरःकृण्वन्तोविश्वमार्यम् । अपघ्नन्तोअराव्णः॥५॥३०॥

इन्द्रम् । वर्धन्तः । अप्ऽतुरः । कृण्वन्तः ।
विश्वम् । आर्यम् । अपऽघ्नन्तः । अराव्णः ॥ ५ ॥ ३० ॥

इन्द्रंवर्धन्तो वर्धयन्तोप्तुर उदकस्य प्रेरका विश्वं सोमं अस्मदीयकर्मार्थं आर्यं भद्रं कृण्वतः कुर्वन्तोराव्णो दातॄनपघ्नन्तोविनाशयन्तः अभ्यर्षन्तीति उत्तरया संबन्धः ॥ ५ ॥

५. इन्द्र को बढ़ाते हुए, जल लाते हुए सब प्रकार से अथवा सोमरस को हमारे लिए मंगलजनक करते हुए और कृपणों का विनाश करते हुए सोम जाते हैं। ॥ इति सप्तमस्य प्रथमे त्रिंशोवर्गः ॥ ३० ॥

अथ षष्ठी—

सुताअनुस्वमारजोभ्यर्षन्तिबभ्रवः । इन्द्रंगच्छन्तइन्दवः ॥ ६ ॥

सुताः । अनु । स्वम् । आ । रजः । अभि । अर्षन्ति ।
बभ्रवः । इन्द्रम् । गच्छन्तः । इन्दवः ॥ ६ ॥

बभ्रवो बभ्रुवर्णाः सुताअभिषुता इन्दवः सोमाः इन्द्रमागच्छन्तः आभिमुख्येन प्राप्नुवन्तः स्वं स्वकीयं रजः स्थानमनु प्रति अभ्यर्षन्ति अभिगच्छन्ति ॥ ६ ॥

६. पिङ्गल-वर्ण और अभिषुत सोम इन्द्र की ओर से अपने स्थान को जाते हैं।

अथ सप्तमी—

अयापवस्वधारयाययासूर्यमरोचयः । हिन्वानोमानुषीरपः ॥ ७ ॥

अया । पवस्व । धारया । यया । सूर्यम् । अरोचयः ।
हिन्वानः । मानुषीः । अपः ॥ ७ ॥

हे सोम मानुषीर्मनुष्याणां हितान्यप उदकानि हिन्वानः प्रेरयन् त्वं यया धारया सूर्यमरोचयः प्रकाशयस्तया अया अनया धारया पवस्व क्षर ॥ ७ ॥

७. सोम, मनुष्यों के उपयोगी जल को बरसाते हुए तुमने अपनी धारा (तेज) से सूर्य को प्रकाशित किया था। उसी धारा से बहो।

अयुक्तसूरएतशंपवमानोमनावधि । अन्तरिक्षेणयातवे ॥ ८ ॥

अयुक्त । सूरः । एतशम् पवमानः । मनौ ।
अधि । अन्तरिक्षेण । यातवे ॥ ८ ॥

पवमानः पूयमानः सोमो मनावधि मनुर्मनुष्यः तस्मिन्मनुष्ये इत्यर्थः अन्तरिक्षेण यातवे गन्तुं सूरः प्रेरकस्य सूर्यस्यैतशमश्वं । एतग्वा एतश इत्यश्वनामसुपाठात् । अयुक्त युंक्ते ॥८॥

८. क्षरणशील सोम मनुष्य के लिए और अन्तरिक्ष में गति के लिए सूर्य के अश्व को जोतते हैं। अथ नवमी—

उतत्याहरितोदशसूरोअयुक्तयातवे । इन्दुरिन्द्रइतिब्रुवन् ॥ ९ ॥

उत । त्याः । हरितः । दश । सूरः । अयुक्त ।
यातवे । इन्दुः । इन्द्रः । इति । ब्रुवन् ॥ ९॥

उतापिचेन्दुः सोमः इन्द्रइति ब्रुवन् त्या ता दश दशसंख्याका हरितो दिशः प्रति यातवे गन्तुं सूरः सूर्यस्यैतशमयुक्त युनक्ति ॥ ९ ॥

९. सोम इन्द्र का नाम कहते हुए दसों दिशाओं में जाने के लिए सूर्य के अश्व को जोतते हैं।

अथ दशमी—

परीतोवायवेसुतंगिरइन्द्रायमत्सरम् । अव्योवारेषुसिञ्चत ॥१०॥३१॥

परि । इतः । वायवे । सुतम् । गिरः । इन्द्राय ।
मत्सरम् । अव्यः । वारेषु । सिञ्चत ॥ १० ॥ ३१ ॥

हे गिरः स्तोतारोयूयं वायवे वाय्वर्थं इन्द्रायेन्द्रार्थंच सुतमभिषुतं मत्सरं मदकरं सोममितोभिषवदेशादुद्धृत्य अव्यः अवेर्वारेषु वालेषु परिषिंचत ॥१०॥

१०. स्तोताओ, तुम लोग वायु और इन्द्र के लिए अभिषुत और मदकर सोम को अभिषव देश से लेकर मेषलोम पर सिंचित करो।

॥ इति सप्तमस्य प्रथमे एकत्रिंशोवर्गः ॥३१॥

अथैकादशी—

पवमानविदारयिमस्मभ्यंसोमदुष्टरम् । योदूणाशोवनुष्यता॥११॥

पवमान । विदाः । रयिम् । अस्मभ्यम् । सोम ।
दुस्तरम् । यः । दुःऽनशः । वनुष्यता ॥ ११ ॥

हे पवमानसोम योरयिर्वनुष्यता हिंसकेन शत्रुणा दूणाशोनाशयितुमशक्यः तं शत्रुभिर्दुष्टरं रयिं धनं अस्मभ्यं विदा देहि ॥ ११ ॥

११. क्षरणशील सोम, जिस धन का विनाश हिंसक शत्रु नहीं कर सकता, ऐसे शत्रुओं के लिए दुर्लभ धन हमें दो।

अभ्यर्षसहस्रिणंरयिंगोमन्तमश्विनम् । अभिवाजमुतश्रवः॥१२॥

अभि । अर्ष । सहस्रिणम् । रयिम् । गोऽमन्तत् ।
अश्विनम् । अभि । वाजम् । उत । श्रवः ॥ १२ ॥

हे सोम त्वं सहस्रिणं बहुसंख्याकं गोमन्तं गोभिर्युक्तमश्विनं अश्ववंतं रयिं धनमभ्यर्षास्मानभिगमय। उतापिच वाजं बलं श्रवोन्नं चास्मानभिगमय ॥ १२ ॥

१२. तुम हमें बहु-संख्यक और गौ तथा अश्व से युक्त धन दो और बल तथा अन्न हमें दो। अथ त्रयोदशी—

सोमोदेवोनसूर्योऽद्रिभिःपवतेसुतः । दधानःकलशेरसम् ॥ १३ ॥

सोमः । देवः । न । सूर्यः । अद्रिऽभिः । पवते ।
सुतः । दधानः । कलशे । रसम् ॥ १३॥

देवोन देवइव सूर्यो रोचमानः सोमोद्रिभिर्ग्रावभिः सुतोभिषुतः सन् कलशे द्रोणकलशे रसं दधानो धारयन् पवते धारया क्षरति ॥ १३ ॥

१३. सूर्यदेव के समान दीप्तिशाली और पत्थरों से अभिषुत सोम द्रोण-कलश में रस धारण करके क्षरित होते हैं।

अथ चतुर्दशी—

एतेधामान्यार्याशुक्राऋतस्यधारया । वाजंगोमन्तमक्षरन् ॥१४॥

एते । धामानि । आर्या । शुक्राः । ऋतस्य । धारया ।
वाजम् । गोऽमन्तम् । अक्षरन् ॥ १४ ॥

एते अभिषुता इमे शुक्रादीप्ताः सोमा आर्या आर्याणां श्रेष्ठानां यजमानानां धामानि गृहान् प्रति गोमन्तं गोभिर्युक्तं वाजमन्नं ऋतस्योदकस्य धारया अक्षरन् क्षरन्ति ॥१४॥

१४. अभिषुत और दीप्त सोम श्रेष्ठ यजमानों के गृहों में गोयुक्त अन्न, जल-धारा-रूप से, बरसते हैं।

सुताइन्द्रायवज्रिणेसोमासोदध्याशिरः । पवित्रमत्यक्षरन् ॥१५॥३२॥

सुताः । इन्द्राय । वज्रिणे । सोमासः । दधिऽआशिरः ।
पवित्रम् । अति । अक्षरन् ॥ १५ ॥ ३२ ॥

वज्रिणे वज्रवते इन्द्रायेन्द्रार्थं सुताअभिषुता दध्याशिरः दधिसंस्कृताः सोमासः सोमाः पवित्रमत्यतिक्रम्याक्षरन् धारया क्षरन्ति ॥ १५ ॥

१५. वज्रधर इन्द्र के लिए निष्पीड़ित सोम दधि-संस्कृत होकर और दशापवित्र में जाकर क्षरित होते हैं ।

॥ इति सप्तमस्य प्रथमे द्वात्रिंशोवर्गः ॥ ३२ ॥

अथ षोडशी—

प्रसोममधुमत्तमोरायेअर्षपवित्रआ । मदोयोदेववीतमः ॥ १६ ॥

प्र । सोम । मधुमत्ऽतमः । राये । अर्ष । पवित्रे । आ ।
मदः । यः । देवऽवीतमः ॥ १६ ॥

हे सोम तव योमदोरसो मधुमत्तमोत्यन्तं मधुमान् देववीतमोतिशयेन देवकामश्च तं रसं रायेस्माकं धनार्थं पवित्रे मार्ष धारया क्षर ॥ १६ ॥

१६. सोम, तुम्हारा जो रस अतीव मधुर है, उस देव-काम रस को हमारे धन के लिए दशापवित्र में बहाओ।

अथ सप्तदशी—

तमीमृजन्त्यायवोहरिंनदीषुवाजिनम् । इन्दुमिन्द्रायमत्सरम्॥१७॥

तम् । ईमिति । मृजन्ति । आयवः । हरिम् । नदीषु । वाजिनम् ।
इन्दुम् । इन्द्राय । मत्सरम् ॥ १७ ॥

हरिं हरितवर्णं वाजिनं बलिनं मत्सरं मदकरं तं पवमानमीमेनमिन्दुं मत्सरं सोममाय-वोमनुष्याऋत्विजः इन्द्रायेन्द्रार्थं नदीषु वसतीवरीषु मृजन्ति मार्जयन्ति ॥ १७ ॥

१७. हरित-वर्ण, बली, मदकर और क्षरणशील सोम को ऋत्विक् लोग इन्द्र के लिए वसतीवरी-जल में शोधित करते हैं।

आपवस्वहिरण्यवदश्वावत्सोमवीरवत्। वाजंगोमन्तमाभर॥१८॥

आ। पवस्व। हिरण्यऽवत्। अश्वऽवत्। सोम। वीरऽवत्।
वाजम्। गोऽमन्तम्। आ। भर ॥ १८ ॥

हे सोम त्वं हिरण्यवत् सुवर्णोपेतमश्ववदश्वयुक्तंच वीरवत् पुत्रायुपेतंच धनमापवस्वास्मान् प्रति क्षर। अपिच गोमन्तं पशुभिरुपेतं वाजमन्नमाभरास्मभ्यमाहर ॥ १८॥

१८. सोम, तुम सुवर्ण, अश्व और पुत्रादि से युक्त धन को हमें वितरित करो। पशुओं से युक्त अन्न ले आओ।

परिवाजेनवाजयुमव्योवारेषुसिञ्चत। इन्द्रायमधुमत्तमम्॥ १९॥

परि। वाजे। न। वाजऽयुम्। अव्यः। वारेषु। सिञ्चत।
इन्द्राय। मधुमत्ऽतमम्॥ १९ ॥

वाजयुं युद्धकामं मधुमत्तममतिशयेनमधुमन्तं सोममिन्द्रायेन्द्रार्थं अव्यः अवेर्वारेषु वालेषु दशापवित्रे वाजे न युद्धेइव हे ऋत्विजः परिषिंचत ॥ १९ ॥

१९. युद्ध-समय के समान इस समय युद्ध-काम, अतीव मधुर सोम को, दशापवित्र में, मेषलोम के ऊपर, ऋत्विको, तुम सींचो।

कविंमृजन्तिमर्ज्यंधीभिर्विप्राअवस्यवः। वृषाकनिक्रदर्षति॥२०॥३३॥

कविम्। मृजन्ति। मर्ज्यम्। धीभिः। विप्राः। अवस्यवः।
वृषा। कनिक्रत्। अर्षति ॥ २० ॥ ३३ ॥

अवस्यवो रक्षणकामा विप्रामेधाविनऋत्विजः धीभिरंगुलीभिर्मर्ज्यं मर्जनीयं कविं क्रान्तकर्माणं यं सोमं मृजन्ति मर्जयन्ति सोयं वृषा सेचकः सोमः कनिक्रदत् शब्दंकुर्वन् अर्षति धारया क्षरति ॥ २० ॥

२०. रक्षाभिलाषी और मेधावी ऋत्विक् अंगुलियों के द्वारा मार्जनीय और क्रान्त-कर्मा जिन सोम को शोधित करते हैं, वह सेचक सोम शब्द करते हुए गिरते हैं।

॥ इति सप्तमस्य प्रथमे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

अथैकविंशी–

वृषणंधीभिरसुरंसोममृतस्यधारया । मतीविप्राःसमस्वरन् ॥ २१॥

वृषणम् । धीभिः । अप्ऽतुरम् । सोमम् । ऋतस्य । धारया ।
मती । विप्राः । सम् ।अस्वरन् ॥ २१ ॥

विप्रा मेधाविनऋत्विजः वृषणं कामानां वर्षकं असुरमपांप्रेरकं सोमं धीभिरंगुलीभिर्मती मत्या च ऋतस्योदकस्य धारया समस्वरन्प्रेरयन्ति ॥ २१ ॥

२१. सोमदेव, मेधावी ऋत्विक् काम-वर्षक और प्रेरक सोम को अंगुलियों और बुद्धि से जल-धारा के द्वारा भेजते हैं।

पवस्वदेवायुषगिन्द्रंगच्छतुतेमदः । वायुमारोहधर्मणा ॥ २२ ॥

पवस्व । देव । आयुषक् । इन्द्रम् । गच्छतु । ते । मदः ।
वायुम् । आ । रोह । धर्मणा ॥ २२ ॥

हे देव द्योतमान सोम पवस्व धारया क्षर । अपिच ते तव मदो मदकरोरस आयुषगनुषक्तमिन्द्रं प्रतिगच्छतु । अपिच त्वं वायुं धर्मणा धारकेन रसेनारोह प्राप्नुहि ॥ २२ ॥

२२. दीप्तिमान् सोम, क्षरित होओ। तुम्हारा मदकर रस आसक्त इन्द्र के पास जाय। धारक रस के साथ तुम वायु को प्राप्त करो।

पवमाननितोशसेरयिंसोमश्रवाय्यम् । प्रियःसमुद्रमाविश ॥ २३ ॥

पवमान । नि । तोशसे । रयिम् । सोम । श्रवाय्यम् ।
प्रियः । समुद्रम् । आ । विश ॥ २३ ॥

हे पवमान सोम यस्त्वं श्रवाय्यं श्रवणीयं रयिं शत्रूणां धनं नितोशसे नितरां पीडयसि सत्वं प्रियःसन् समुद्रं द्रोणकलशमाविश ॥ २३ ॥

२३. क्षरणशील सोम, तुम शत्रुओं के धन को, सर्वांशतः नष्ट करते हो। प्रिय होकर तुम कलश में प्रवेश करो।

अथ चतुर्विंशी–

अपघ्नन्पवसेमृधःक्रतुवित्सोममत्सरः । नुदस्वादेवयुंजनम् ॥ २४॥

अपऽघ्नन् । पवसे । मृधः । क्रतुऽवित् । सोम । मत्सरः ।
नुदस्व । अदेवऽयुम् । जनम् ॥ २४ ॥

हे सोम मत्सरो मदकरो यस्त्वं मृधोहिंसकान् शत्रून् अपघ्नन् मारयन् क्रतुविदस्मभ्यं प्रज्ञां प्रयच्छन् पवसे क्षरसि। सत्यमदेवयुमदेवकामं जनं राक्षसवर्गं नुदस्व प्रेरय ॥ २४ ॥

२४. सोम, मदकर और शत्रुओं को मारनेवाले तुम हमें बुद्धि देते हुए गिरते हो। तुम देव-द्वेषी राक्षस-वर्ग को अपवस्त करो।

पवमानाअसृक्षतसोमाःशुक्रासइन्दवः। अभिविश्वानिकाव्या॥२५॥३४॥

पवमानाः। असृक्षत। सोमाः। शुक्रासः। इन्दवः। अभि। विश्वानि। काव्या॥ २५ ॥ ३४ ॥

शुक्रास उज्ज्वला इन्दवोदीप्ताः पवमानाः क्षरन्तः सोमाः विश्वानि काव्या काव्यानि स्तोत्राण्यभ्यसृक्षत सृज्यन्ते ऋत्विग्भिः ॥ २५ ॥

२५. उज्ज्वल, दीप्त और क्षरणशील सोम सारे स्तुति-वचनों को सुनते हुए ऋत्विकों के द्वारा उत्पादित होते हैं।

॥ इति सप्तमस्य प्रथमे चतुस्त्रिंशोवर्गः ॥ ३४ ॥

अथ षट्त्रिंशी—

पवमानासआशवःशुभ्राअसृग्रमिन्दवः। घ्नन्तोविश्वाअपद्विषः॥२६॥

पवमानासः। आशवः। शुभ्राः। असृग्रम्। इन्दवः। घ्नन्तः। विश्वाः। अप। द्विषः॥ २६ ॥

आशवः शीघ्राः शुभ्राः शोभनाः पवमानासः क्षरन्त इन्दवो दीप्ताः सोमा विश्वाः सर्वान्द्विषोद्वेष्टॄन् शत्रूनपघ्नन्तो मारयन्तः असृग्रमसृज्यन्ते ॥ २६ ॥

२६. क्षिप्रगामी, शोभन, पवमान, दीप्त और सारे शत्रुओं को मारनेवाले सोम उत्पादित होते हैं। अथ सप्तत्रिंशी—

पवमानादिवस्पर्यन्तरिक्षादसृक्षत। पृथिव्याअधिसानवि ॥ २७॥

पवमानाः। दिवः। परि। अन्तरिक्षात्। असृक्षत। पृथिव्याः। अधि। सानवि॥ २७ ॥

पवमानाः सोमाः दिवो द्युलोकादन्तरिक्षाच्च पृथिव्या भूम्याअधि सानवि समुच्छ्रिते देशे देवयजने पर्यसृक्षत सृज्यन्ते ॥ २७ ॥

२७. क्षरणशील सोम द्युलोक और पृथिवी के उन्नत देश में, यज्ञ-स्थान में, उत्पन्न किये जाते हैं।

अथाष्टाविंशी–

पुनानःसोमधारयेन्दोविश्वाअपस्त्रिधः । जहिरक्षांसिसुक्रतो ॥ २८॥

पुनानः । सोम । धारया । इन्दो इति । विश्वाः । अप । स्त्रिधः ।
जहि । रक्षांसि सुक्रतो इति सुऽक्रतो ॥ २८ ॥

हे इन्दो दीप्त सुक्रतो सुकर्मन् सोम धारया पुनानः पूयमानस्त्वं विश्वाः सर्वान् स्त्रिधो द्वेष्टून् शत्रून् रक्षांसि राक्षसांश्चापजहि मारय ॥ २८ ॥

२८. सुकर्मा सोम, धारा-रूप से बहकर तुम सारे शत्रुओं और राक्षसों को मारो।

अथैकोनत्रिंशी–

अपघ्नन्सोमरक्षसोभ्यर्षकनिक्रदत् । द्युमन्तंशुष्ममुत्तमम्॥२९॥

अपऽघ्नन् । सोम । रक्षसः । अभि । अर्ष । कनिक्रदत् ।
द्युऽमन्तम् । शुष्मम् । उत्ऽतमम् ॥ २९ ॥

हे सोम त्वं रक्षसो रक्षांस्यपघ्नन् विनाशयन् कनिक्रदच्छब्दंकुर्वन् द्युमन्तं दीप्तिमन्तमुत्तमं श्रेष्ठं शुष्मं बलमभ्यर्षास्मान् प्रति पवस्व ॥ २९॥

२९. सोम, राक्षसों को मारते हुए और शब्द करते हुए हमें दीप्तिमान् और श्रेष्ठ बल दो।

अथ त्रिंशी–

अस्मेवसूनिधारयसोमदिव्यानिपार्थिवा । इन्दोविश्वानिवार्या॥३०॥३५॥

अस्मे इति । वसूनि । धारय । सोम । दिव्यानि ।
पार्थिवा । इन्दो इति । विश्वानि । वार्या ॥ ३० ॥ ३५ ॥

हे इन्दो दीप्त सोम दिव्यानि दिविभवानि पार्थिवा पार्थिवानि पृथिव्यां जातानि च विश्वा सर्वाणि वार्या वार्याणि वरणीयानि वसून्यस्मेस्मासु धारय प्रक्षिप ॥३०॥

३०. दीप्त सोम, आकाश और पृथिवी में उत्पन्न सारे स्वीकरणीय धन हमें दो।

॥ इति सप्तमस्य प्रथमे पंचत्रिंशोवर्गः ॥ ३५ ॥

वृषासोमेति त्रिंशदृचं चतुर्थंसूक्तं मारीचस्य कश्यपस्यार्षं गायत्रं पवमानसौम्यं । तथाचानुक्रान्तं– वृषासोमकश्यपइति । उक्तोविनियोगः ।

तत्र प्रथमा—

वृषासोमद्युमाँअसिवृषादेववृषव्रतः । वृषाधर्माणिदधिषे ॥ १ ॥

वृषा । सोम । द्युऽमान् । असि । वृषा । देव ।
वृषऽव्रतः । वृषा । धर्माणि । दधिषे ॥ १ ॥

हे सोम वृषा वर्षकस्त्वं द्युमान् दीप्तिमानसि । अपिच हे देव द्योतमान सोम वृषा त्वं वृषव्रतो वर्षणशीलकर्मासि । किंच हे सोम वृषा त्वं धर्माणि देवानां मनुष्याणां च हितानि कर्माणि दधिषे धारयसि ॥ १ ॥

१. सोम, तुम वर्षक और दीप्तिमान् हो। सोमदेव, तुम्हारा कार्य वर्षण करना है। सोम, तुम मनुष्यों और देवों के उपयोगी कर्मों को धारण करते हो। अथ द्वितीया—

वृष्णस्तेवृष्ण्यंशवोवृषावनंवृषामदः । सत्यंवृषन्वृषेदसि ॥ २ ॥

वृष्णः । ते । वृष्ण्यम् । शवः । वृषा । वनम् । वृषा ।
मदः । सत्यम् । वृषन् । वृषा । इत् । असि ॥ २ ॥

हे वृषन् कामानां वर्षक सोम वृष्णो वर्षितुस्ते तव शवोबलं वृष्ण्यं वर्षणशीलं भवति । वनं तवभजनमपि वृषा वर्षणशीलं । मदस्तवरसोपि वृषा वर्षणशीलः । सत्यं सत्यमेव त्वं वृषेव वर्षणशीलएवासि भवसि ॥२॥

२. काम-वर्षक सोम, तुम्हारा बल वर्षणशील है, तुम्हारा विभाग भी वर्षणशील है और तुम्हारा रस भी वर्षणशील है। सचमुच तुम सब तरह से वर्षा करनेवाले हो। अथ तृतीया—

अश्वोनचक्रदोवृषासंगाइन्दोसमर्वतः । विनोरायेदुरोवृधि ॥ ३ ॥

अश्वः । न । चक्रदः । वृषा । सम् । गाः । इन्दो इति ।
सम् । अर्वतः । वि । नः । राये । दुरः । वृधि ॥ ३ ॥

हे इन्दो सोम वृषा त्वं अश्वोनाश्वइव संचक्रदः संक्रंदसे । अपिच गाः पशूनर्वतोश्वांश्चास्मभ्यं संयच्छसीतिशेषः । किंच नोस्माकं राये धनाय दुरोद्वाराणि विवृधि विवृतानि कुरु ॥ ३ ॥

३. सोम, तुम अश्व के समान शब्द करते हो। तुम हमें पशु और अश्व दो। धन-प्राप्ति के लिए दरवाजा खोलो।

अथ चतुर्थी—

असृक्षतप्रवाजिनोगव्यासोमासोअश्वया । शुक्रासोवीरयाशवः॥४॥

असृक्षत । प्र । वाजिनः । गव्या । सोमासः । अश्वऽया ।
शुक्रासः । वीरऽया । आशवः ॥ ४ ॥

वाजिनो बलवन्तः शुक्रासः शुक्राउज्ज्वलाः आशवो वेगवन्तश्च सोमासः सोमाः गव्या गवेच्छया अश्वयाश्वेच्छया च वीरया पुत्रेच्छयाच प्रासृक्षत ऋत्विग्भिः सृज्यन्ते ॥ ४ ॥

४. बली, उज्ज्वल और वेगवान् सोम की सृष्टि, गौओं, अश्वों और पुत्रों की प्राप्ति की इच्छा से, की गई है।

शुम्भमानाऋतायुभिर्मृज्यमानागभस्त्योः । पवन्तेवारेअव्यये॥५॥३६॥

शुम्भमानाः । ऋतयुऽभिः । मृज्यमानाः ।
गभस्त्योः । पवन्ते । वारे । अव्यये ॥ ५ ॥ ३६ ॥

ऋतायुभिर्यज्ञकामैः शुंभमानाः अलंक्रियमाणा गभस्त्योः गभस्तिभ्यां बाहुभ्यां । गभस्ती बाहू इति बाहुनामसुपाठात् । मृज्यमानाः शोध्यमानाः सोमाः अव्यये अविमये वारे वाले पवित्रे पवन्ते क्षरन्ति ॥ ५ ॥

५. याज्ञिक लोग सोम को सुशोभित और दोनों हाथों से परिमार्जित करते हैं। सोम मेषलोम पर बहते हैं।

॥ इति सप्तमस्य प्रथमे षट्त्रिंशोवर्गः ॥ ३६ ॥

अथ षष्ठी—

तेविश्वादाशुषेवसुसोमादिव्यानिपार्थिवा । पवन्तामान्तरिक्ष्या॥६॥

ते । विश्वा । दाशुषे । वसु । सोमाः । दिव्यानि ।
पार्थिवा । पवन्ताम् । आ । अन्तरिक्ष्या ॥ ६ ॥

ते सोमा दिव्यानि दिविभवानि पार्थिवा पार्थिवानि पृथिव्यां संभूतानि चान्तरिक्ष्या अन्तरिक्षाण्यन्तरिक्षेजातानिच विश्वा विश्वानि वसु वसूनि धनानि दाशुषे हविषां प्रदात्रे यजमानाय पवन्तां क्षरन्तु ॥ ६ ॥

६. सोम हवि देनेवाले के लिए द्युलोक, पृथिवी और अन्तरिक्ष में उत्पन्न सारे धन बरसें।

अथ सप्तमी—

पवमानस्यविश्ववित्प्रतेसर्गाअसृक्षत । सूर्यस्येवनरश्मयः ॥ ७ ॥

पवमानस्य । विश्वऽवित् । प्र । ते । सर्गाः । असृक्षत ।
सूर्यस्यऽइव । न । रश्मयः ॥ ७ ॥

हे विश्वविद्विश्वस्य द्रष्टः सोम पवमानस्य क्षरतः ते तव सर्गाः प्रसृज्यमाना धाराः सूर्यस्येव रश्मयः सूर्यस्य किरणाइव प्रकाशमानाः । नेति संप्रत्यर्थे । इदानीं प्रासृक्षत प्रासृज्यन्त॥७॥

७. विश्वदर्शक और क्षरणशील, तुम्हारी धारायें सूर्य की किरणों के समान प्रकाशमाना और इस समय निर्मित हो रही हैं।

केतुंकृण्वन्दिवस्परिविश्वारूपाभ्यर्षसि । समुद्रःसोमपिन्वसे ॥८ ॥

केतुम् । कृण्वन् । दिवः । परि । विश्वा । रूपा । अभि ।
अर्षसि । समुद्रः । सोम । पिन्वसे ॥ ८ ॥

हे सोम समुद्रः समुद्रवन्ति यस्माद्रसाः ससमुद्रः सत्वं केतुं प्रज्ञानं कृण्वन् कुर्वन् अस्माकं विश्वा विश्वानि रूपा रूपाणि दिवोन्तरिक्षादभ्यर्षस्यभिपवसे परिपिन्वसे नानाविधानि धनानि चास्मभ्यं प्रयच्छसि ॥ ८ ॥

८. सोम, रसशाली तुम संकेत या ध्यान करके अन्तरिक्ष से हमें सारे रूप वितरित करो और नाना धन भी हमें दो।

हिन्वानोवाचमिष्यसिपवमानविधर्मणि । अक्रान्देवोनसूर्यः ॥ ९॥

हिन्वानः । वाचम् । इष्यसि । पवमान । विऽधर्मणि ।
अक्रान् । देवः । न । सूर्यः ॥ ९ ॥

हे पवमान सोम हिन्वानः प्रेर्यमाणस्त्वं वाचं शब्दमिष्यसि प्रेरयसि । कदेत्यत्राह—यदा तव रसः सूर्योदेवोन देवइव विधर्मणि विधारके पवित्रे अक्रानक्रमीत् तदेत्यर्थः ॥ ९ ॥

९. सोम, जब तुम्हारा रस, सूर्यदेव के समान, दशापवित्र पर चढ़ता है, तब तुम उसी मार्ग में प्रेरित होकर शब्द करते हो।

अथ दशमी—

इन्दुःपविष्टचेतनःप्रियःकवीनांमती । सृजदश्वंरथीरिव॥ १०॥३७॥

इन्दुः । पविष्ट । चेतनः । प्रियः । कवीनाम् ।
मती । सृजत् । अश्वम् । रथीःऽइव ॥ १० ॥ ३७ ॥

चेतनः प्रज्ञापकः प्रियोदेवानां प्रीतिकरः इन्दुः सोमः कवीनां क्रान्तकर्मणां स्तोतॄणां मती मत्या स्तुत्या पविष्ट पवते । अश्वं हयं रथीरिव रथीवोर्मिं सृजत् सृजति च ॥ १० ॥

१०. प्रज्ञापक और देवों के प्रिय सोम क्रान्तकर्मा स्तोताओं की स्तुति से क्षरित होते हैं। सोम उसी प्रकार तरङ्ग चलाते हैं, जिस प्रकार रथी अश्व को चलाता है।

॥ इति सप्तमस्य प्रथमे सप्तत्रिंशोवर्गः ॥ ३७ ॥

अथैकादशी—

ऊर्मिर्यस्तेपवित्रआदेवावीःपर्यक्षरत् । सीदन्नृतस्ययोनिमा ॥११॥

ऊर्मिः । यः । ते । पवित्रे । आ । देवऽअवीः ।
परिऽअक्षरत् । सीदन् । ऋतस्य । योनिम् । आ ॥ ११ ॥

हे सोम ते तव योदेवावीर्देवकामः ऊर्मिस्तरंगः ऋतस्य यज्ञस्य योनिं स्थानं आसीदन् पवित्रे पर्यक्षरत् परिक्षरति तमूर्मिं सृजतीति पूर्वत्र संबन्धः ॥ ११ ॥

११. सोम, तुम्हारी जो तरङ्ग देवाभिलाषी है, वह दशापवित्र पर क्षरित होती है।

अथ द्वादशी—

सनोअर्षपवित्रआमदोयोदेववीतमः । इन्दविन्द्रायपीतये ॥१२॥

सः । नः । अर्ष । पवित्रे । आ । मदः । यः ।
देवऽवीतमः । इन्दो इति । इन्द्राय । पीतये ॥ १२ ॥

हे इन्दो यस्त्वं देववीतमः अतिशयेन देवकामो मदोमदकरश्च भवसि । सत्वं नोस्माकं पवित्रे इन्द्रायेन्द्रस्य पीतये पानायार्षापवस्व ॥ १२ ॥

१२. सोम, तुम अतीव देवाभिलाषी और मदकर हो। इन्द्र के पान के लिए हमारे दशापवित्र पर क्षरित होओ।

इषेपवस्वधारयामृज्यमानोमनीषिभिः । इन्दोरुचाभिगाइहि॥१३॥

इषे । पवस्व । धारया । मृज्यमानः । मनीषिऽभिः ।
इन्दो इति । रुचा । अभि । गाः । इहि ॥ १३ ॥

हे इन्दो सोम मनीषिभिर्ऋत्विग्भिः मृज्यमानः शोध्यमानस्त्वमिषेस्माकमन्नाय धारया पवस्व क्षर। रुचा रोचमानेनान्धसा गाः पशूनभीह्यभिगच्छ ॥ १३ ॥

१३. सोम, ऋत्विकों के द्वारा संशोधित होकर तुम हमारे अन्न के लिए क्षरित होओ। तुम रुचिकर अन्न के साथ गौओं की ओर जाओ।

पुनानोवरिवस्कृध्यूर्जेजनायगिर्वणः। हरेसृजानआशिरम् ॥१४॥

पुनानः। वरिवः। कृधि। ऊर्जम्। जनाय। गिर्वणः।
हरे। सृजानः। आऽशिरम् ॥ १४ ॥

हे गिर्वणो गीर्भिर्वननीय हरे हरितवर्ण सोम आशिरं क्षीरं प्रतिसृजानो विसृज्यमानः पुनानः पूयमानस्त्वं जनाय यजमानार्थं वरिवोधनमूर्जमन्नंच कृधि कुरु ॥ १४ ॥

१४. स्तुत्य और हरित-वर्ण सोम, तुम दूध के साथ बनाये जाते हो। शोधित होकर तुम यजमान को धन और अन्न दो।

पुनानोदेववीतयइन्द्रस्ययाहिनिष्कृतम्।द्युतानोवाजिभिर्यतः॥१५॥३८॥

पुनानः। देवऽवीतये। इन्द्रस्य। याहि। निःऽकृतम्।
द्युतानः। वाजिऽभिः। यतः ॥ १५ ॥ ३८ ॥

हे सोम द्युतानो दीप्यमानो वाजिभिः बलिभिर्यजमानैर्यतः संगृहीतो देववीतये यज्ञार्थं पुनानः पूयमानस्त्वं इन्द्रस्य निष्कृतं स्थानं याहि गच्छ ॥ १५ ॥

१५. सोम, दीप्तिमान्, यजमानों के द्वारा लाये गये और यज्ञ के लिए संशोधित किये गये तुम इन्द्र के पास जाओ।

॥ इति सप्तमस्य प्रथमेष्टत्रिंशोवर्गः ॥ ३८ ॥

अथ षोडशी—

प्रहिन्वानासइन्दवोच्छासमुद्रमाशवः। धियाजूताअसृक्षत॥१६॥

प्र। हिन्वानासः। इन्दवः। अच्छ। समुद्रम्।
आशवः। धिया। जूताः। असृक्षत ॥ १६ ॥

आशवो वेगवन्त इन्दवः सोमाः समुद्रमन्तरिक्षमच्छ प्रति हिन्वानासोहिन्वानाः प्रेर्यमाणाः धिया अंगुल्या जूताः कृष्टाश्च प्रासृक्षत सृज्यन्ते ॥ १६ ॥

१६. वेगशाली सोम अन्तरिक्ष के प्रति प्रेरित होकर और अंगुलि के द्वारा सीले जाकर उत्पादित किये जाते हैं।

अथ सप्तदशी–

मर्मृजानासआयवोवृथासमुद्रमिन्दवः । अग्मन्नृतस्ययोनिमा ॥१७॥

मर्मृजानासः । आयवः । वृथा । समुद्रम् । इन्दवः ।
अग्मन् । ऋतस्य । योनिम् । आ ॥ १७ ॥

मर्मृजानासो मर्मृज्यमानाः आयवोगन्तार इन्दवः सोमाः वृथायासं विनैव समुद्रमन्तरिक्षं गच्छन्ति । एतदेव दर्शयति ऋतस्योदकस्य योनिं स्थानं आग्मन् गच्छन्तीति ॥ १७ ॥

१७. शोधित और गतिपरायण सोम सरलता से आकाश की ओर जाते हैं। वे जलपात्र की ओर जाते हैं।

परिणोयाह्यस्मयुर्विश्वावसून्योजसा । पाहिनःशर्मवीरवत् ॥ १८ ॥

परि । नः । याहि । अस्मऽयुः । विश्वा । वसूनि ।
ओजसा । पाहि । नः । शर्म । वीरऽवत् ॥ १८ ॥

हे सोमास्मयुरस्मत्कामस्त्वं नोस्माकं विश्वा विश्वानि वसूनि धनानि ओजसा बलेन सह परियाहि रक्षार्थं परिगच्छ । अपिच नोस्माकं वीरवत् पुत्रवत् शर्म गृहं पाहि रक्ष ॥ १८ ॥

१८. सोम, तुम हमारी अभिलाषा करनेवाले हो। बल के द्वारा हमारे सारे धनों की रक्षा करो। हमारे पुत्र के समान गृह की रक्षा करो।

अथैकोनविंशी–

मिमातिवह्निरेतशःपदंयुजानऋक्वभिः । प्रयत्समुद्रआहितः ॥१९॥

मिमाति । वह्निः । एतशः । पदम् । युजानः ।
ऋक्वऽभिः । प्र । यत् । समुद्रे । आऽहितः ॥ १९ ॥

हे सोम यथदा योवह्निर्वहनशील एतशोश्वः मिमाति शब्दंकरोति ऋक्वभिर्ऋत्विग्भिः स्तोतृभिः पदं युजानो यज्ञे युंजानो निदधत् स्तोत्रश्रवणार्थमागच्छति च । सतदा यज्ञवाहकाश्वात्मा त्वं समुद्रे उदके वसतीवरीषु प्राहितोभवसि ॥ १९ ॥

१९. सोम, जब वहनशील अश्व शब्द करता है और स्तोताओं के द्वारा यज्ञ में स्थान (स्तोत्र-श्रवण) के लिए आता है, तब यह अश्वरूप सोम जल में (वसतीवरी में) स्थित होता है।

आयद्योनिंहिरण्ययमाशुऋतस्यसीदति । जहात्यप्रचेतसः॥२०॥३९॥

आ । यत् । योनिम् । हिरण्ययम् । आशुः । ऋतस्य ।
सीदति । जहाति । अप्रऽचेतसः ॥ २० ॥ ३९ ॥

यद्यदाशुर्वेगवान् सोम ऋतस्य यज्ञस्य हिरण्ययं हिरण्मयं योनिं स्थानं हिरण्यपाणिरभिषुणोतीत्युक्तमासीदति । तदानीमप्रचेतसो जहाति विसृजति अस्तोतॄणां यज्ञं नाभिगच्छति । किंतु स्तोतॄणामेव यज्ञमभिगच्छतीत्यर्थः ॥ २०॥

२०. जब वेगशाली सोम यज्ञ के हिरण्मय स्थान पर बैठते हैं, तब स्तोत्र-शून्यों के यज्ञ में नहीं जाते।

॥ इति सप्तमस्य प्रथमे एकोनचत्वारिंशोवर्गः ॥ ३९ ॥

अथैकविंशी—

अभिवेनाअनूषतेयक्षन्तिप्रचेतसः । मज्जन्त्यविचेतसः ॥ २१ ॥

अभि । वेनाः । अनूषत । इयक्षन्ति । प्रऽचेतसः ।
मज्जन्ति । अविऽचेतसः ॥ २१ ॥

वेनाः कान्ताः स्तोतारोऽभ्यनूषत सोममभिष्टुवन्ति प्रचेतसः सुमतयः इयक्षन्ति यष्टुमिच्छन्ति च । अविचेतसो विशिष्टमतयो विचेतसः अविचेतसोविपरीतमतयइत्यर्थः मज्जन्ति निमज्जन्ति । येसोमं नाभिष्टुवन्ति न यजंति च ते नरके पतन्तीत्यर्थः ॥ २१ ॥

२१. कमनीय स्तोता सोम की स्तुति करते हैं और सुबुद्धि मनुष्य सोम का यजन करते हैं दुर्बुद्धि मनुष्य नरक में निमज्जित होते हैं।

इन्द्रायेन्दोमरुत्वतेपवस्वमधुमत्तमः । ऋतस्ययोनिमासदम् ॥२२॥

इन्द्राय । इन्दो इति । मरुत्वते । पवस्व ।
मधुमत्ऽतमः । ऋतस्य । योनिम् । आऽसदम् ॥ २२ ॥

हे इन्दो सोम मधुमत्तमोतिशयेन मधुमान् त्वं ऋतस्य यज्ञस्य योनिं स्थानमासदमुपवेष्टुं मरुत्वते इन्द्रायेन्द्रार्थं पवस्व क्षर ॥ २२ ॥

२२. सोम, तुम बहुत ही मधुर हो। यज्ञ-स्थान में बैठने के लिए इन्द्र और मरुतों के लिए क्षरित होओ।

अथ त्रयोविंशी—

तंत्वाविप्रावचोविदःपरिष्कृण्वन्तिवेधसः । सन्त्वामृजन्त्यायवः ॥२३॥

तम् । त्वा । विप्राः । वचःऽविदः । परि । कृण्वन्ति ।
वेधसः । सम् । त्वा । मृजन्ति । आयवः ॥ २३ ॥

हे सोम तं पवमानं त्वा त्वां विप्राः प्राज्ञा वेधसः कर्मणांकर्तारो वचोविदः स्तोतारः परिष्कृण्वन्ति अलंकुर्वन्ति । अपिच त्वा त्वामायवोमनुष्याः संमृजन्ति सम्यक् शोधयन्ति॥२३॥

२३. सोम, क्षरणशील तुम्हें प्राज्ञ और कर्म-कर्ता स्तोता लोग अलंकृत करते हैं । तुम्हें मनुष्य भली भाँति शोधित करते हैं ।

रसंतेमित्रोअर्यमापिबन्तिवरुणःकवे । पवमानस्यमरुतः ॥ २४॥

रसम् । ते । मित्रः । अर्यमा । पिबन्ति । वरुणः ।
कवे । पवमानस्य । मरुतः ॥ २४ ॥

हे कवे क्रान्तकर्मन् सोम पवमानस्य क्षरतस्ते तव रसं मित्रःअर्यमा च वरुणश्च मरुतश्चैवे सर्वेदेवाः पिबन्ति ॥ २४ ॥

२४. क्रान्तकर्मा सोम, क्षरणशील तुम्हारे रस को मित्र, अर्यमा, वरुण और मित्र सभी पीते हैं । अथ पंचविंशी—

त्वंसोमविपश्चितंपुनानोवाचमिष्यसि । इन्दोसहस्रभर्णसम्॥२५॥४०॥

त्वम् । सोम । विपःऽचितम् । पुनानः । वाचम् ।
इष्यसि । इन्दो इति । सहस्रऽभर्णसम् ॥ २५ ॥ ४० ॥

हे इन्दो दीप्तसोम पुनानः पूयमानस्त्वं विपश्चितं प्रज्ञया पवित्रां सहस्रभर्णसं बहुभरणां वाचमिष्यसि प्रेरयसि ॥ २५ ॥

२५. प्रदीप्त सोम, क्षरणशील तुम ज्ञान-पूत और बहुतों का भरण करनेवाला वचन प्रेरित करते हो ।

॥ इति सप्तमस्य प्रथमे चत्वारिंशोवर्गः ॥ ४० ॥

अथ षड्विंशी—

उतोसहस्रभर्णसंवाचंसोममखस्युवम् । पुनानइन्दवाभर ॥ २६ ॥

उतो इति । सहस्रऽभर्णसम् । वाचम् । सोम ।
मखस्युवम् । पुनानः । इन्दो इति । आ । भर ॥ २६ ॥

उतो अपि च हे इन्दो दीप्तसोम पुनानः पूयमानस्त्वं सहस्रभर्णसं सहस्रभरणं मखस्युवं धनकामां यज्ञकामां वाचमस्मभ्यमाभराहर ॥ २६ ॥

२६. दीप्त सोम क्षरणशील तुम हजारों का भरण करनेवाला और यज्ञाभिलाषी वचन, हमारे लिए, ले आओ।

पुनानइन्दवेषांपुरुहूतजनानाम् । प्रियःसमुद्रमाविश ॥ २७ ॥

पुनानः । इन्दो इति । एषाम् । पुरुऽहूत । जनानाम् ।
प्रियः । समुद्रम् । आ । विश ॥ २७ ॥

हे पुरुहूत बहुभिराहूत इन्दो सोम पुनानः पूयमानस्त्वं एषामस्मिन् यागे स्तोत्रं कुर्वतां जनानां प्रियः सन् समुद्रं द्रोणकलशमाविश प्रविश ॥ २७ ॥

२७. बहुतों के द्वारा बुलाये गये सोम, क्षरणशील तुम इस यज्ञ में स्तोताओं के प्रिय होकर द्रोण-कलश में पैठो।

दविद्युतत्यारुचापरिष्टोभन्त्याकृपा । सोमाःशुक्रागवाशिरः ॥२८॥

दविद्युतत्या । रुचा । परिऽस्तोभन्त्या । कृपा ।
सोमाः । शुक्राः । गोऽआशिरः ॥ २८ ॥

शुक्रा उज्ज्वलाः दविद्युतत्या द्योतमानया रुचा दीप्त्या परिष्टोभन्त्या परितः शब्दायमानया कृपा धारयाच युक्ताः सोमाः गवाशिरो भवन्ति गव्येन पयसा मिश्रिता भवन्तीत्यर्थः ॥ २८ ॥

२८. उज्ज्वल और प्रकाशमान दीप्ति तथा चारों ओर शब्द करनेवाली धारा से युक्त होकर सोम दूध में मिलाये जाते हैं।

अथैकोनत्रिंशी—

हिन्वानोहेतृभिर्यतआवाजंवाज्यक्रमीत् । सीदन्तोवनुषोयथा ॥२९॥

हिन्वानः । हेतृऽभिः । । यतः । आ । वाजम् । वाजी ।
अक्रमीत् । सीदन्तः । वनुषः । यथा ॥ २९ ॥

वाजी बलवान् सोमो हेतृभिः प्रेरकैः स्तोतृभिः हिन्वानः स्तोत्रैः प्रेर्यमाणो यतः संयतः सन् वाजं यागाख्यं युद्धमाक्रमीदाक्रमति । तत्रदृष्टान्तः—यथावनुषोहन्तारोभटाः सीदन्तोयुद्धं प्रविशन्तः आक्रमन्ति तद्वदित्यर्थः ॥ २९ ॥

२९. जैसे योद्धा लोग रण-भूमि में पैठते ही आक्रमण करते हैं, वैसे ही बली, स्तोताओं के द्वारा, प्रेरित और संयत सोम यज्ञ-रूप युद्ध में आक्रमण करते हैं।

अथ त्रिंशी—

ऋधक्सोमस्वस्तयेसंजग्मानोदिवःकविः । पवस्वसूर्योदृशे ॥३०॥४१॥

ऋधक् । सोम । स्वस्तये । सम्ऽजग्मानः । दिवः ।
कविः । पवस्व । सूर्यः । दृशे ॥ ३० ॥ ४१ ॥

हे सोम कविः क्रान्तः सूर्यः सुवीर्यस्त्वं ऋधक् ऋध्नुवन् । तथाचयास्कः—ऋधगितिपृथग्भावस्यानुप्रवचनं भवत्यथाप्यृध्नोत्यर्थेदृश्यतइति । संजग्मानः संगच्छमानः स्वस्तये दृशे दर्शनायच दिवः द्युलोकात् पवस्व क्षर ॥ ३० ॥

३०. सोम, क्रान्त और सुन्दर वीर्यवाले तुम संगत होते हुए दर्शन के लिए द्युलोक से प्रवाहित होओ।

॥ इति सप्तमस्य प्रथमे एकचत्वारिंशोवर्गः ॥ ४१ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टकेप्रथमोध्यायः ॥ १ ॥

---

१ नि० ४. २५. ।

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत्। निर्ममे तमहंवन्दे विद्यातीर्थमहेश्वरम् ॥१॥

हिन्वन्तीति त्रिंशदृचं पञ्चमं सूक्तं वरुणपुत्रस्य भृगोरार्षं भार्गवस्य जमदग्नेर्वा। गायत्रं पवमानसोमदेवताकं। तथाचानुक्रम्यते—हिन्वन्तिभृगुर्वारुणिर्जमदग्निर्वेति। गतोविनियोगः।

तत्र प्रथमा—

ॐम् हिन्वन्तिसूरमुस्रयःस्वसारोजामयस्पतिम्। महामिन्दुंमहीयुवः॥१॥

हिन्वन्ति। सूरम्। उस्रयः। स्वसारः। जामयः।
पतिम्। महाम्। इन्दुम्। महीयुवः॥ १ ॥

अत्र सर्वत्र पवमानः सोमः स्तूयते। तत्रादावृषिः सोमं प्रत्याह मदीया अंगुलयः त्वामभिषोतुं प्रेरयन्तीति। तदुच्यते—स्वसारः अंगुलिनामैतत् सुष्ठु कर्मसु प्रेर्यन्ते ऋत्विग्भिरिति स्वसारः जामय एकस्मात्पाणेरुत्पन्नत्वात्परस्परं बन्धुभूताः उस्रयः कर्मार्थं निवसंत्यः सर्वत्र गन्त्र्यइत्यर्थः। तादृश्योंगुलयः महीयुवः त्वदभिषवं कामयमानाः सत्यः सूरं सुवीर्यं सोमे पीते वीर्यं भवतीति शोभनवीर्यकारणं वा सर्वेषां कर्मणिप्रेरकं वा तादृशं पतिं सर्वस्य स्थावरजंगमजातस्य स्वामिनं यस्माद्देवार्थमिज्यते अतएव महां देवेभ्योदीयमानत्वेन महान्तं मंहनीयं वा इदुं ग्रहेषु स्पन्दमानं सोमं हिन्वन्ति प्रेरयन्ति। हिवर्धनगत्योः स्वादिः॥ १ ॥

१. अंगुलि रूप, परस्पर बन्धु-भूत और कार्य-कुशल स्त्रियाँ तुम्हारे अभिषव की इच्छा करके सुन्दर वीर्यवाले, सारे संसार के स्वामी, महान् और अपने जाते सोम के क्षरणशील होने की इच्छा करती हैं।

अथ द्वितीया—

पवमानरुचारुचादेवोदेवेभ्यस्परि। विश्वावसून्याविश॥ २ ॥

पवमान। रुचाऽरुचा। देवः। देवेभ्यः।
परि। विश्वा। वसूनि। आ। विश॥ २ ॥

हे पवमान दशापवित्रेण पूयमान यद्वा पुनान शुद्ध सोम रुचारुचा रुचदीप्तौ सर्वेण तेजसा देवोदीप्यमानस्त्वं देवेभ्यः परि देवेभ्यः सकाशाद् विश्वा व्याप्तानि सर्वाणि बहूनि वसू-

नि धनानि अस्माकमाविश प्रापय। यद्वा देवेभ्यस्त्वदर्थं सर्वाणि वसूनि निवासस्थानानि ग्रहादीनि आविश समन्तात्प्रविश ॥ २ ॥

२. दशापवित्र से शोधित, तेज के द्वारा दीप्त सोम, देवों के पास से निखिल धन हमें दो।

आपवमानसुष्टुतिंवृष्टिंदेवेभ्योदुवः। इषेपवस्वसंयतम् ॥ ३ ॥

आ। पवमान। सुऽस्तुतिम्। वृष्टिम्। देवेभ्यः।
दुवः। इषे। पवस्व। सम्ऽयतम् ॥ ३ ॥

हे पवमान पूयमान पुनान वा सोम सुष्टुतिं शोभनस्तुतियुक्तां वृष्टिं देवेभ्यः देवानां दुवः सुपांसुलुगिति चतुर्थ्याल्लुक् दुवसे परिचरणाय आपवस्व आगमय त्वं यथा मदीयया स्तुत्या वृष्टिर्भविष्यति तथाकुर्वित्यर्थः। किंच अस्माकमिषे अन्नार्थंच संयतं सम्यगस्मान् संगच्छन्तीं वृष्टिं कुरु। यद्वा दुवः परिचर्यामभिलक्ष्य क्रियमाणां सुष्टुतिं शोभनस्तुतिरूपां वृष्टिं बहुस्तुतिमित्यर्थः एतां देवेभ्यः प्रापय ॥ ३ ॥

३. पवमान सोम, देवों की परिचर्या के लिए शोभन स्तुतिवाली वर्षा करो। हमारे अन्न के लिए वर्षा करो।

वृषाह्यसिभानुनाद्युमन्तंत्वाहवामहे। पवमानस्वाध्यः ॥ ४ ॥

वृषा। हि। असि। भानुना। द्युऽमन्तम्।
त्वा। हवामहे। पवमान। सुऽआध्यः ॥ ४ ॥

पवमान पूयमान वृषा अभिमतफलानां वर्षितासि हि भवसि खलु। तस्मात् हे पवमान पुनान वा सोम स्वाध्यः शोभनकर्माणः सुदुध्यानवन्तोवा वयं भानुना रश्मिना द्युमन्तं दीप्तिमन्तं अतिशयेन तेजस्विनं इत्यर्थः स्तुतिमन्तंवा त्वा त्वां हवामहे यज्ञेषु आह्वयामहे[1] ॥ ४ ॥

४. सोम, तुम अभीष्ट-फल-वर्षक हो। पवमान सोम, शोभन कर्मवाले हम किरणों के द्वारा तेजस्वी तुम्हें हम यज्ञ में बुलाते हैं।

अथ पञ्चमी—

आपवस्वसुवीर्यमन्दमानःस्वायुध। इहोष्विन्द्रवागहि ॥ ५ ॥ १ ॥

---

१ हे पवमान पूयमान सोम स्वाध्यः सुकर्माणोवयं भानुना रश्मिना द्युमन्तं द्युतिमन्तं त्वा त्वां हवामहे आह्वयामः। हि यस्मात् त्वं वृषा कामानां वर्षयितासि ॥ इतिपुस्तकान्तरे।

आ । पवस्व । सुऽवीर्यम् । मन्दमानः । सुऽआयुध ।
इहो इति । सु । इन्दो इति । आ । गहि ॥ ५ ॥ १ ॥

हे स्वायुध यज्ञे स्फ्यकपालादीनि दशआयुधानीत्यभिधीयन्ते शोभनानि तानि यस्य सतथोक्तः । यद्वा धनुरादीन्यायुधानि यस्य सः तादृश हे सोम त्वं मन्दमानः मोदमानः सन् यद्वा अन्तर्णीतण्यर्थः देवान् स्वयं मादयन् सुवीर्यं शोभनवीर्योपेतं पुत्रादिकमस्माकं आपवस्व पवतिर्गत्यर्थः आप्नुपय । किंच हे इन्दो ग्रहेषु चमसेषुच क्षरणशील सोम इहो इह उ पदद्वयं उइत्यवधारणे इहैवास्मदीये यज्ञे एव सुष्ठु आगहि आगच्छ ॥ ५ ॥

५. तुम्हारे धनुष आदि आयुध शोभन हैं। देवों को प्रमत्त करते हुए तुम हमें शोभन वीर्यवाले पुत्र दो। चमसों में बहनेवाले सोम, हमारे यज्ञ में आओ।

॥ इति सप्तमस्य द्वितीये प्रथमोवर्गः ॥ १ ॥

अथ षष्ठी—

यदद्भिःपरिषिच्यसेमृज्यमानोगभस्त्योः । द्रुणासधस्थमश्नुषे॥६॥

यत् । अत्ऽभिः । परिऽसिच्यसे । मृज्यमानः ।
गभस्त्योः । द्रुणा । सधऽस्थम् । अश्नुषे ॥ ६ ॥

हे सोम गभस्त्योर्बाहुनामैतत् गभसन्ति दीपयन्ति निर्मथ्नन्त्याभ्यां अग्निमिति गभस्ती बाहू तयोर्मृज्यमानस्ताभ्यां शोध्यमानः सन् अद्भिः सोमसेचनार्थं चतुर्विधाआपस्ताभिर्वसतीवरीभिरेकधनाभिश्च यद्यदा परिषिच्यसे परितः सिच्यमानोभवसि। तदानीं द्रुणा द्रुमयेन परिप्लवेन पात्रेण गृह्यमाणः सन् सधस्थं सहतिष्ठन्त्यत्रेति सधस्थं स्थानं ग्रहचमसादिकं अश्नुषे प्राप्नोषि ॥ ६ ॥

६. सोम, तुम बाहुओं के द्वारा संशोधित किये और वसतीवरी-जल से सींचे जाते हो। उस समय तुम काष्ठ-पात्र में निहित होकर अपने स्थान में गमन करते हो।

अथ सप्तमी—

प्रसोमायव्यश्ववत्पवमानायगायत । महेसहस्रचक्षसे ॥ ७ ॥

प्र । सोमाय । व्यश्वऽवत् । पवमानाय ।
गायत । महे । सहस्रऽचक्षसे ॥ ७ ॥

हे स्तोतारः पवमानाय दशापवित्रेण पूयमानाय पुनानाय वा सोमाय प्रगायत प्रकर्षेण सामगानं कुरुत अभिष्टुत वा। कथमिव व्यश्ववत् यथापूर्वं व्यश्वोनामऋषिः सोममगासीत्

तद्वत् यूयमपि। कीदृशाय महे महते देवेभ्यः स्वीयंक्रियमाणत्वेन गुणादिभिर्वा महत्त्वयुक्ताय सहस्रचक्षसे प्रयोगबाहुल्यापेक्षमेतद्वचनं सहस्रसंख्याकस्तोत्रयुक्ताय यद्वा नानाविधैर्देवैरनेकधादृष्टव्याय सोमायेति ॥ ७ ॥

७. स्तोताओ, व्यश्व ऋषि के समान दशापवित्र में संस्कृत, महिमान्वित और अनेक स्तोत्रों से युक्त सोम के लिए गाओ।

यस्यवर्णंमधुश्चुतंहरिंहिन्वन्त्यद्रिभिः। इन्दुमिन्द्रायपीतये ॥ ८ ॥

यस्य। वर्णम्। मधुऽश्चुतम्। हरिम्। हिन्वन्ति।
अद्रिऽभिः। इन्दुम्। इन्द्राय। पीतये ॥ ८ ॥

हे अध्वर्य्वादयः वर्णं शत्रूणां वारकं येन असौ पीयते तेन मनेन शत्रवः संप्रहार्यन्तइति शत्रुनिवारणसमर्थं मधुश्चुतं मधुररसस्य च्यावयितारं हरिं हरितवर्णं इन्दुं इन्धेरेतद्रूपमन्वेष्यते सर्वतोदीप्यमानं। उन्दीक्लेदनइत्यस्माद्वा। अभिषवानंतरं पात्रेषु क्षरणशीलं यस्य सोमस्य तव कारणमंशुं अद्रिभिर्हिन्वन्ति प्रेरयन्ति अभिषुण्वन्तीत्यर्थः। इन्द्राय पीतये इन्द्रस्य पानाय तदर्थमित्यर्थः ॥ ८ ॥

८. अध्वर्युओ, शत्रु-निवारण-समर्थ, मधुर रस देनेवाले, हरित-वर्ण और दीप्तिमान् सोम को पत्थरों से, इन्द्र के पान के लिए, अभिषुत करो।

तस्यतेवाजिनोवयंविश्वाधनानिजिग्युषः। सखित्वमावृणीमहे ॥ ९ ॥

तस्य। ते। वाजिनः। वयम्। विश्वा। धनानि।
जिग्युषः। सखिऽत्वम्। आ। वृणीमहे ॥ ९ ॥

हे सोम वाजिनः संभृतहविष्कावयं विश्वा विश्वानि सर्वाणि व्याप्तानि वा शत्रुधनानि जिग्युषः जितवतस्तस्य पूर्वोक्तलक्षणस्य प्रसिद्धस्य वा ते तव सखित्वं स्तुत्यस्तोतृलक्षणं सख्यं आवृणीमहे संभजामहे अस्मभ्यं धनं देहीति संभजनं कुर्मइत्यर्थः। जिग्युषः जिजये लिटि क्वसौ वस्वेकाजादिति नियमादिडभावः सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कवर्गादेशः जसिपरतोवसोःसंप्रसारणं क्वसुप्रत्ययस्वरः ॥ ९ ॥

९. सोम, बलशाली, सारे शत्रु-धनों के नेता तुम्हारे सख्य का हम संभजन करते हैं।

अथ दशर्ची—

वृषापवस्वधारयामरुत्वंतेचमत्सरः। विश्वादधानओजसा ॥१०॥२॥

वृषा । पवस्व । धारया । मरुत्वते । च । मत्सरः ।
विश्वा । दधानः । ओजसा ॥ १० ॥ २ ॥

हे सोम त्वं वृषा स्तोतॄणामभिमतफलस्य वर्षकः सन् धारया त्वदीयया पवस्व द्रोणकलशमागच्छ । पवतिर्गतिकर्मा आगतस्त्वं यदा अस्माभिरिन्द्राय दीयसे तदा मरुत्वते सहायामरुतोयस्यसन्ति तस्मै इन्द्राय मत्सरोमदकरश्च भव । कीदृशः विश्वा विश्वानि सर्वाणि व्याप्तानि वा धनानि ओजसा आत्मीयेन बलेन युक्तःसन् स्तोतृभ्यस्तानि दधानः प्रयच्छन् त्वं मादयिता भवेति समन्वयः ॥ १० ॥

१०. अभीष्ट-फल-वर्षक सोम, धारा-रूप से द्रोण-कलश में आओ। आकर इन्द्र और मरुतों के लिए मदकर होओ। सोम, तुम आत्म-बल से युक्त होकर स्तोताओं को धन देते हुए मादयिता होओ।

॥ इति सप्तमस्य द्वितीये द्वितीयोवर्गः ॥ २ ॥

अथैकादशी—

तंत्वाधर्तारमोण्योर्दिवःपवमानस्वर्दृशम् । हिन्वेवाजेषुवाजिनम् ॥ ११ ॥

तम् । त्वा । धर्तारम् । ओण्योः । पवमान ।
स्वःऽदृशम् । हिन्वे । वाजेषु । वाजिनम् ॥ ११ ॥

हे पवमान पूयमान पुनान वा हे सोम ओण्योः । द्यावापृथिवीनामैतत् । तयोर्धर्तारं धारकं अतएव स्वर्दृशं स्वर्गस्य सूर्यस्य वा द्रष्टारं सर्वैर्देवैर्दृष्टव्यं वाजिनं बलवन्तं पूर्वोक्तगुणसिद्धं त्वा त्वां वाजेषु संग्रामेषु हिन्वे प्रेरयामि । यद्वा वाजेषु अन्नेषु विषयेषु हिनोमि अन्नादिकं प्रयच्छेत्यर्थः ॥ ११ ॥

११. पवमान सोम, द्यावापृथिवी के धारक, स्वर्ग के द्रष्टा, देवों के दर्शनीय और बली तुम्हें मैं युद्ध-भूमि में भेज रहा हूँ।

अयाचित्तोविपानयाहरिःपवस्वधारया । युजंवाजेषुचोदय ॥ १२ ॥

अया । चित्तः । विपा । अनया । हरिः । पवस्व ।
धारया । युजम् । वाजेषु । चोदय ॥ १२ ॥

हे पवमान अया अयपयगतौ कर्मार्थमितस्ततोगच्छन्तीभिरनया विपा विपप्रेरणे । इवीपि अग्नौ प्रेरयन्तीति विपोंगुलयः एकवचनं छान्दसं प्रत्येकविवक्षया वा । एताभिर्मदीयाभिरंगुलिभिश्चित्तो ज्ञातः निर्गतोभिषुतोहरिर्हरितवर्णस्त्वं धारया सन्ततया पवस्व द्रोणकलशं ग्रहां-

श्वागच्छ त्वं । किंच युजं सखायमिन्द्रं वाजेषु संग्रामेषु चोदय प्रेरय । यदा अस्माभिरिन्द्रार्थं सोमोदीयते तदा तत्पानेन हृष्टःसन् शत्रून् हन्तीत्यर्थः ॥१२ ॥

१२. सोम, तुम हमारी अंगुलियों के द्वारा उत्पन्न (निर्गत), अभिषुत और हरित-वर्ण हो द्रोण-कलश में आओ। अपने मित्र इन्द्र को संग्राम में भेजो।

अथ त्रयोदशी–

आनइन्दोमहीमिषंपवस्वविश्वदर्शतः । अस्मभ्यंसोमगातुवित् ॥ १३॥

आ । नः । इन्दो इति । महीम् । इषम् । पवस्व ।
विश्वऽदर्शतः । अस्मभ्यम् । सोम । गातुऽवित् ॥ १३ ॥

हे इन्दो क्षरणशील दीपनशील हे सोम विश्वदर्शतः विश्वैः सर्वैः दर्शनीयः यद्वा विश्वं सर्वं वस्तुजातं दृश्यते ज्ञाप्यतेनेनेति सविश्वस्य प्रकाशकइत्यर्थः । तादृशस्त्वं महीमिषं महत्भूतमन्नं नोस्मभ्यमापवस्व आगमय प्रयच्छेत्यर्थः । किंच हे सोमाभिषूयमाण पवमान अस्मभ्यं गातुवित् स्वर्गमार्गस्य लंभयिता ज्ञापयिता भव ॥ १३ ॥

१३. सोम, दीपनशील तुम विश्व-प्रकाशक हो। हमें प्रचुर अन्न दो। पवमान सोम हमारे लिए स्वर्ग-मार्ग के सूचक होओ।

आकलशाअनूषतेन्दोधाराभिरोजसा । एन्द्रस्यपीतयेविश ॥१४॥

आ । कलशाः । अनूषत । इन्दो इति । धाराभिः ।
ओजसा । आ । इन्द्रस्य । पीतये । विश ॥ १४ ॥

हे इन्दो क्षरणशील सोम ओजसा बलेन युक्तस्य तव धाराभिर्निरन्तराभिः सहिताः कलशाः प्रयोगबाहुल्यापेक्षमेतद्बहुवचनं । द्रोणकलशाः अनूषत स्तोतृभिराभिमुख्येन स्तूयन्ते । सोमाभिषवकालेहि ऋत्विजः स्तुवन्तिखलु । ततस्त्वमिन्द्रस्य पीतये पानाय आविश ग्रहांश्चमसांश्च प्रविश ॥ १४ ॥

१४. क्षरणशील सोम, अभिषव-काल में बल से युक्त तुम्हारी, धाराओं-वाले द्रोण-कलश में, स्तोताओं के द्वारा, स्तुति होती है। अनन्तर तुम इन्द्र के पान के लिए आओ और चमसों में पैठो।

अथ पञ्चदशी–

यस्यतेमद्यंरसंतीव्रंदुहन्त्यद्रिभिः । सपवस्वाभिमातिहा ॥१५॥ ३॥

यस्य । ते । मद्यम् । रसम् । तीव्रम् । दुहन्ति । अद्रिऽभिः ।
सः । पवस्व । अभिमातिऽहा ॥ १५ ॥ ३ ॥

हे सोम यस्य ते तव मद्यं मदकरं तीव्रं क्षिप्रं मदकारिणं रसं अद्रिभिर्ग्रावभिरध्वर्वादयो-दुहन्ति अभिषुण्वन्ति । सतादृशस्त्वं अभिमातिहा अभितोमातिरभिमानं येषां ते शत्रवः पापरूपा-णां हन्ता सन् पवस्व सर्वतोगच्छ । येऽभिषुण्वन्ति ते पापरहिताः सुकृतिनोभवन्तीत्यर्थः ॥ १५॥

१५. सोम, तुम्हारे मदकर और क्षिप्र मद-दाता रस को पत्थरों से अध्वर्यु आदि कूटते हैं। पापियों के घातक होकर तुम क्षरित होओ।

॥ इति सप्तमस्य द्वितीये तृतीयोवर्गः ॥ ३ ॥

अथ षोडशी—

राजा॑मे॒धाभि॑रीयते॒पव॑मानोम॒नावधि॑ । अ॒न्तरि॑क्षेण॒यात॑वे ॥ १६॥

राजा॑ । मे॒धाभिः॑ । ई॒य॒ते॒ । पव॑मानः । म॒नौ ।
अधि॑ । अ॒न्तरि॑क्षेण । यात॑वे ॥ १६ ॥

मनौ मनुष्ये यागं कुर्वाणे सति । यद्वा मनावधि मनुर्मन्तव्योयज्ञः तस्मिन् पवमानः पूय-मानः पुनानोवा राजा राजशब्देन सोमोऽभिधीयते । सोमंराजानमक्रीणन्नित्यादिषु दृष्टत्वात् । सराजा मेधाभिः स्तुतिभिः सह ईयते गच्छति । किमर्थं अन्तरिक्षेण आकाशमार्गेण द्रोणक-लशं प्रति यातवे यातुं द्रोणाभिगमनकालेहि स्तोतृभिः स्तूयते खलु ॥ १६ ॥

१६. मनुष्यों के यज्ञ करने पर राजा सोम आकाश-मार्ग से द्रोण-कलश के प्रति जाने के लिए स्तुत हो रहे हैं।

आन॑इन्दोशत॒ग्विनं॒गवां॒पोषं॒स्वश्व्य॑म् । वहा॒भग॑त्तिमू॒तये॑ ॥१७॥

आ । नः॒ । इ॒न्दो॒ इति॑ । श॒त॒ऽग्विन॑म् । गवा॑म् । पोष॑म् ।
सु॒ऽअश्व्य॑म् । वह॑ । भग॑त्तिम् । ऊ॒तये॑ ॥ १७ ॥

हे इन्दो पात्रेषु क्षरणशील दीपनशीलया हे सोम शतग्विनं शतसहस्रसंख्याभिर्गोभिर्युक्तं गवां पोषं गवादीनां पुष्टिवर्धनं स्वश्व्यं शोभनाश्वसंगसहितं भगत्तिं भगदत्तिं भजनीयधनदानं च ऊतये रक्षणाय नोस्माकं आवह प्रापय गवादींश्च । तेषांच वृद्धिं प्रयच्छेत्यर्थः ॥ १७ ॥

१७. क्षरणशील सोम, हमारी रक्षा के लिए हमें सैकड़ों और सहस्रों गौओं से युक्त, गौ आदि के लिए पुष्टिकर, शोभन अश्वों से सम्पन्न और स्तुत्य धनवान करो। अथाष्टादशी—

आन॑ःसोम॒सहो॒जुवो॑रू॒पंनवर्च॑सेभर । सु॒ष्वा॒णोदे॒ववी॑तये ॥ १८ ॥

आ । नः॒ । सो॒म॒ । सहः॑ । जुवः॑ । रू॒पम् । न ।
वर्च॑से । भ॒र॒ । सु॒स्वा॒नः । दे॒वऽवी॑तये ॥ १८ ॥

---

१ ऐ० ब्रा० १. २७. ।

हे सोम देववीतये देवपानाय देवानां कामाय वा सुष्वाणः अभिषूयमाणः अभिषुतो वा भव। त्वं सहः शत्रुभिभवनसमर्थं बलं जुवः जुरितिगत्यर्थः शत्रून्प्रति शीघ्रगमनंच यद्वा सर्वतोगमनशीलं। किंच नेतिचार्थे। वर्चसे वर्चदीप्तौ दीप्त्यै सर्वत्र प्रकाशनाय रूपंच नोस्मभ्यं आभराहर प्रयच्छ ॥ १८ ॥

१८. सोम, तुम देवों के पान के लिए अभिषुत हो। शत्रु-हनन-समर्थ बल और सर्वत्र प्रकाश के लिए रूप भी हमें दो।

अर्षासोमद्युमत्तमोभिद्रोणानिरोरुवत्। सीदञ्छ्येनोनयोनिमा॥१९॥

अर्ष। सोम। द्युमत्ऽतमः। अभि। द्रोणानि।
रोरुवत्। सीदन्। श्येनः। न। योनिम्। आ ॥ १९ ॥

हे सोम अभिषूयमाण पवमान द्युमत्तमः अतिशयेन दीप्तिमांस्त्वं द्रोणानि प्रयोगबाहुल्यापेक्षमेवद्बहुवचनं द्रोणानभिलक्षीकृत्य रोरुवत् पुनःपुनर्भृशं वा शब्दंकुर्वन् अर्ष तानागच्छ दशापवित्रमध्यान्निर्गतः सोमः अविच्छिन्नधारया द्रोणकलशे पतन् शब्दंकरोति खलु। तत्रदृष्टान्तः—श्येनोन यथाआसीदन् सर्वतोगच्छन् श्येनः शंसनीयगतिः पक्षी योनिं स्वस्थानं कुलायंप्रति भृशंशब्दायमानःसन् आगच्छति तद्वत् ॥ १९ ॥

१९. सोम, जैसे श्येन पक्षी शब्द करते हुए अपने घोंसले में आता है, वैसे ही क्षरणशील और दीप्तिमान् सोम शब्द करते हुए दशापवित्र से द्रोण-कलश में जाते हैं। अथ विंशी—

अप्साइन्द्रायवायवेवरुणायमरुद्भ्यः। सोमोअर्षतिविष्णवे॥२०॥४॥

अप्साः। इन्द्राय। वायवे। वरुणाय।
मरुत्ऽभ्यः। सोमः। अर्षति। विष्णवे ॥ २० ॥ ४ ॥

अप्साः वसतीवरीनामधेयानामपां संभक्ता। वनपणसंभक्तौ जनसनेतिविट् विड्वनोरित्यात्वं। तादृशः सोमः अर्षति द्रोणकलशमागच्छति। किमर्थं इन्द्राय सर्वदेवानां प्रथमएव इन्द्रः सोमं पिबति तस्मात्पूर्वमेवाभिहितः तस्मै वायवे तत्सहायायच ऐन्द्रवायवे हि इन्द्रस्यानन्तरं वायुः सोमं पिबति तस्मात्तदनु वायुरुक्तः तस्मैच वरुणाय मरुद्भ्योमितं शब्दं कुर्वद्भ्यः एतन्नामकेभ्योदेवेभ्यः विष्णवे सर्वजगद्व्यापिने विष्णवेच एतेषां पातुं सोमः स्रवतीत्यर्थः॥ २० ॥

२०. वसतीवरी नामक जल के संभक्ता सोम इन्द्र, वायु, वरुण, विष्णु और अन्यान्य देवों के लिए बहते हैं।

॥ इति सप्तमस्य द्वितीये चतुर्थोवर्गः ॥ ४ ॥

अथैकविंशी—

इषंतोकायनोदधदस्मभ्यंसोमविश्वतः । आपवस्वसहस्रिणम् ॥२१॥

इषम् । तोकाय । नः । दधत् । अस्मभ्यम् । सोम ।
विश्वतः । आ । पवस्व । सहस्रिणम् ॥ २१ ॥

हे सोम त्वं नोस्माकं तोकाय पुत्राय इषमन्नं दधद्विदधत् प्रयच्छन् सहस्रिणं सहस्रसंख्याकं धनं विश्वतः सर्वतोदिक्षु अस्मभ्यं वा पवस्व आप्रयच्छ अस्मभ्यं पुत्रायच अन्नधनादिकं प्रयच्छेत्यर्थः ॥ २१ ॥

२१. सोम, तुम हमारे पुत्र को अन्न देते हुए सर्वत्र सहस्र-संख्यक धन हमें दो।

अथ द्वाविंशी—

येसोमासःपरावतियेअर्वावतिसुन्विरे । येवादःशर्यणावति ॥ २२॥

ये । सोमासः । पराऽवति । ये । अर्वाऽवति ।
सुन्विरे । ये । वा । अदः । शर्यणाऽवति ॥ २२ ॥

एतदादिभ्यामृग्भ्यामिद्रार्थं सर्वत्र सोमाभिषवोस्तीत्याह.। ये सोमासः सोमाः परावति विप्रकृष्टेतिदूरे देशे ये वा अर्वावति अन्तिके देशे इद्रार्थं सुन्विरे अभिषूयन्ते अभ्यषूयन्त ।ये वा शर्यणावति कुरुक्षेत्रस्य जघनार्धे शर्यणावत्संज्ञकं मधुरसयुक्तं सोमवत्सरोस्ति अदः अस्मिन्सरसि सुरसाः येसोमा इन्द्रायाभिषूयन्ते तेस्माकमभिमतफलं प्रयच्छन्तु । इतिवक्ष्यमाणेन संबन्धः ॥ २२ ॥

२२. जो सोम दूर अथवा समीप के देश में इन्द्र के लिए अभिषुत हुए हैं और जो कुरुक्षेत्र के निकट शर्यणावत् नामक सरोवर में अभिषुत हुए हैं, वे हमें अभिमत फल दें।

अथ त्रयोविंशी—

यआर्जीकेषुक्रत्वसुयेमध्येपस्त्यानाम् । येवाजनेषुपञ्चसु ॥ २३ ॥

ये । आर्जीकेषु । क्रत्वऽसु । ये । मध्ये । पस्त्यानाम् ।
ये । वा । जनेषु । पञ्चऽसु ॥ २३ ॥

येवा सोमा आर्जीकेषु ऋजीकानामदूरभवाः आर्जीकादेशाः तेषु तथा क्रत्वसु क्रत्वानइति देशाभिधानं तेषु कर्मवत्सु देशेषु किंच पस्त्यानां सरस्वत्यादीनां नदीनां मध्ये समीपेच

ये सोमाः अभिषूयन्ते । कृपयोर्वैसरस्वत्यांसप्तमासतेत्यादिषु नदीतरे यज्ञकरणस्य श्रवणात् । किंच जनेषु पंचसु निषादपंचमाश्चत्वारोवर्णाः पंचजनाः तेषुच येषा सोमा अभिषुतास्तेसोमाः अस्माकमभिमतं प्रयच्छन्त्वित्युत्तरेणान्वयः ॥ २३ ॥

२३. जो सोम आर्जीक (देश या व्यास नदी ?) में अभिषुत हुए हैं, जो कृत्व (कर्मनिष्ठ) देश, सरस्वती नदी के तट पर और पंजचन (पंजाब व चार वर्ण और निषाद) में प्रस्तुत हुए हैं, ये हमें अभीष्ट प्रदान करें।

तेनोवृष्टिंदिवस्परिपर्वन्तामासुवीर्यम् । सुवानादेवासइन्दवः ॥२४॥

ते । नः । वृष्टिम् । दिवः । परि । पर्वन्ताम् । आ ।
सुऽवीर्यम् । सुवानाः । देवासः । इन्दवः ॥ २४ ॥

सुवानास्तत्र चाभिषूयमाणा देवासः देवाः दीपनशीलाः स्तुत्यावा इन्दवः ग्रहेषु चमसेषुच क्षरन्तः तेसोमाः नोस्माकं दिवस्परि । परिशब्दः पंचमीद्योतकः । अन्तरिक्षादादित्याद्वा वृष्टिं । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिरिति वृष्टिकारणत्वात् । किंच सुवीर्यं शोभनवीर्योपेतं पुत्रंच धनादिकंया आपवन्तां प्रापयन्तु । यजमानः सोमेनाभिमतफलानि प्राप्नोति खलु ॥ २४ ॥

२४. ये सारे अभिषुत, दीप्त चमसों में क्षरणशील सोम, आकाश से वृष्टि और शोभनवीर्यवाले पुत्र तथा धन आदि हमें दें।

पवतेहर्यतोहरिर्गृणानोजमदग्निना । हिन्वानोगोरधित्वचि ॥ २५॥५॥

पवते । हर्यतः । हरिः । गृणानः । जमत्ऽअग्निना ।
हिन्वानः । गोः । अधि । त्वचि ॥ २५ ॥ ५ ॥

हर्यतः देवान् कामयमानोहरिर्हरितवर्णः किंच गोस्त्वच्यधि आनडुहे चर्मणि हिन्वानः प्रेर्यमाणः ससोमः जमदग्निना मंत्रद्रष्ट्रा ऋषिणा गृणानः स्तूयमानःसन् पवते दशापवित्रेण पूतोभवति यद्वा पात्राण्यभिगच्छति ॥ २५ ॥

२५. देवाभिलाषी, हरितवर्ण, गोचर्म के ऊपर प्रेरित और जमदग्नि ऋषि के द्वारा स्तुत सोम पात्र में जाते हैं।

॥ इति सप्तमस्य द्वितीये पंचमोवर्गः ॥ ५ ॥

अथ षड्विंशी—

प्रशुक्रासोवयोजुवोहिन्वानासोनसप्तयः । श्रीणानाअप्सुमृंजत ॥२६॥

---

१ ऐ० ब्रा० २. १९. ।

प्र । शुक्रासः । वयःऽजुवः । हिन्वानासः । न ।
सप्तयः । श्रीणानाः । अप्ऽसु । मृञ्जत ॥ २६ ॥

शुक्रासः शुक्रा दीप्यमाना वयोजुवः अन्नंप्रेरयन्तः यद्यदपेक्ष्य देवेभ्यः सोमं प्रयच्छन्ति तत्तदपेक्षितं सोमोददाति । ते सोमाः श्रीणानाः दधिक्षीरादिभिः श्रीयमाणाःसन्तः अप्सु वसतीवरीष्वेकधनासुच । मृंजत ऋत्विग्भिः प्रमृज्यन्ते शोध्यन्ते । तत्रदृष्टान्तः—हिन्वानासोन सप्तयः अश्वनामैतत् । यथाश्वाः हिन्वानासो हिन्वानाः सादिभिः प्रेर्यमाणाः सन्तः अप्सु तैरेव प्रशोधिताभवन्ति तद्वत् ॥ २६ ॥

२६. जैसे जल में ले जाकर अश्वों को मार्जित किया जाता है, वैसे ही दीप्त, अन्नप्रेरक और क्षीर आदि में मिलाये जाकर सोम वसतीवरी में पुरोहितों के द्वारा मार्जित किये जाते हैं।

तंत्वासुतेष्वाभुवोहिन्विरेदेवतातये । सपवस्वानयारुचा ॥२७॥

तम् । त्वा । सुतेषु । आऽभुवः । हिन्विरे ।
देवऽतातये । सः । पवस्व । अनया । रुचा ॥ २७ ॥

अथ प्रत्यक्षस्तुतिः हे सोम आभुवः कर्मकरणार्थं समन्ताद्भवन्तीति आभुव ऋत्विजः ते सुतेषु सुतः अभिषुतः सोमः तद्वत्सु यज्ञेषु देवतातये । सर्वदेवात्तातिलितिस्वार्थिकस्तातिल् । इन्द्रादिदेवेभ्यः तं तादृशं प्रसिद्धं त्वा त्वां हिन्विरे ग्रावभिः प्रेरयन्ति अभिषुण्वन्तीत्यर्थः । ततः सः अभिषुतः सत्वं अनया रुचा दीप्यमानधारया द्रोणकलशं प्रति पवस्व आगच्छ । पवतिर्गतिकर्मा । यद्वा अनया मदीयया रुचा स्तुत्या सह कलशमागच्छ । कलशाभिगमनकाले हि सोमं स्तुवन्ति ॥ २७ ॥

२७. सोमाभिषव हो जाने पर ऋत्विक् लोग इन्द्रादि देवों के लिए तुम्हें पत्थरों से प्रेरित करते हैं। तुम अभिषुत होकर, प्रदीप्त धारा से, द्रोण-कलश में आओ। अथाष्टाविंशी—

आतेदक्षंमयोभुवंवह्निमद्यावृणीमहे । पान्तमापुरुस्पृहम् ॥ २८ ॥

आ । ते । दक्षम् । मयःऽभुवम् । वह्निम् । अद्य ।
वृणीमहे । पान्तम् । आ । पुरुऽस्पृहम् ॥ २८ ॥

हे सोम यष्टारोवयं ते तव स्वभूतं दक्षं बलमद्यास्मिन्यागदिने आभिमुख्येन आवृणीमहे संभजामहे । कीदृशं मयोभुवं सुखस्य भावुकं वह्निं वनादीनां प्रापकं पान्तं शत्रुभ्योरक्षकं पुरुस्पृहं बहुभिः स्पृहणीयं काम्यमानं बलमिति ॥ २८ ॥

२८. सोम, तुम्हारे सुखकर, वनादि-प्रापक, शत्रुओं से रक्षक और बहुतों के द्वारा अभिलषणीय बल को हम याज्ञिक, आज के यज्ञ में, भजते हैं।

अथैकोनविंशी—

आमन्द्रमावरेण्यमाविप्रमामनीषिणम् । पान्तमापुरुस्पृहम्॥२९॥

आ । मन्द्रम् । आ । वरेण्यम् । आ । विप्रम् । आ ।
मनीषिणम् । पान्तम् । आ । पुरुऽस्पृहम् ॥ २९ ॥

हे सोम मन्द्रं मदकरं स्तुत्यंवा त्वामावृणीमहे वरेण्यं सर्वैर्वरणीयं संभजनीयंच । किंच विप्रं मेधाविनं त्वां तथा मनीषिणं मनसईषा मनीषा तद्वन्तं स्तुतिमन्तंवा त्वामावृणीमहे । प्रत्येकं विशेषणापेक्षया आइत्युपसर्गः कृतः । किंच पान्तं सर्वेषां रक्षकं पुरुस्पृहं बहुभिः स्पृहणीयं च त्वां संभजामहे ॥ २९ ॥

२९. सोम, मदकर, स्वीकरणीय, मेधावी, बुद्धिशाली, स्तुति-युक्त सर्व-रक्षक और अनेकों के द्वारा स्पृहणीय तुम्हारा भजन हम करते हैं।

आरयिमासुचेतुनमासुक्रतोतनूष्वा । पान्तमापुरुस्पृहम्॥३०॥६॥

आ । रयिम् । आ । सुऽचेतुनम् । आ । सुक्रतो इति
सुऽक्रतो । तनूषु । आ । पान्तम् । आ । पुरुऽस्पृहम् ॥ ३० ॥ ६ ॥

हे सुक्रतो शोभनयज्ञ सोम त्वदीयं रयिं धनं वयमावृणीमहे । किंच सुचेतुनं चितीसंज्ञाने । भावे औणादिकउननप्रत्ययः । सुज्ञानंच तनूषु अस्मत्पुत्रेषुच धनं सुज्ञानंच त्वमाविधेहि । यद्वा पुत्रार्थं वयमावृणीमहे । तथा पान्तं सर्वस्य रक्षकं पुरुस्पृहं बहुभिर्यष्टृभिः काम्यमानं त्वां संभजामहे ॥ ३० ॥

३०. शोभन-यज्ञ सोम, हम तुम्हारे धन का आश्रय करते हैं। हमारे पुत्रों में तुम धन और सुन्दर ज्ञान दो। हम सर्व-रक्षक और बहुतों के द्वारा अभिलषित तुम्हारा आश्रय करते हैं।

॥ इति सप्तमस्य द्वितीये षष्ठोवर्गः ॥ ६ ॥

पवस्वेति त्रिंशदृचं षष्ठं सूक्तं । अत्रानुक्रम्यते—पवस्व शतवैखानसाः अष्टादश्यनुष्टुप् परास्तिस्रआग्नेय्यइति । शतसंख्याका वैखानसाख्याः संहताऋषयः त्वंसोमसूरइत्येषानुष्टुप् शिष्टागायत्र्यः अग्नआयूंष्याद्याः तिस्रः पवमानविशिष्टाग्निदेवताकाः अन्यासां पवमानःसोमोदेवता गतःसूक्तविनियोगः ।

तत्र प्रथमा—

पवस्वविश्वचर्षणेभिविश्वानिकाव्या । सखासखिभ्यईड्यः॥१॥

पवस्व । विश्वऽचर्षणे । अभि । विश्वानि ।
काव्या । सखा । सखिऽभ्यः । ईड्यः ॥ १ ॥

हे विश्वचर्षणे सर्वव्यापित्वेन सर्वस्यद्रष्टः हे सोम सखा स्तुत्यः स्तोतृयष्टृत्वलक्षणेन संबन्धेन सखिभूतस्त्वं ईड्यः स्तोतव्यःसन् सखिभ्यः हविःप्रदानेनोपकारकत्वान्मित्रभूतेभ्योस्मभ्यं विश्वानि सर्वाणि काव्या कवेःकर्माणि काव्यानि । ब्राह्मणादित्वात् ष्यञ् । सर्वाणि स्तोत्राण्यभिलक्षीकृत्यपवस्वागच्छ ॥ १ ॥

१. सूक्ष्मदर्शक सोम, तुम सखा और स्तोतव्य हो। हम तुम्हारे सखा हैं। हमारे लिए सारे कर्मों और स्तोत्रों को लक्ष्य कर क्षरित होओ।

ताभ्यांविश्वस्यराजसियेपवमानधामनी । प्रतीचीसोमतस्थतुः॥२॥

ताभ्याम् । विश्वस्य । राजसि । ये इति । पवमान ।
धामनी इति । प्रतीची इति । सोम । तस्थतुः ॥ २ ॥

हे पवमान दशापवित्रेण पूयमानपुनान वा हे सोम ये धामनी पूर्वपक्षापरपक्षयोर्ऽतारूपस्य सोमस्य तव एकैकपर्णवृद्धिह्रासाभ्यां तव स्वभूतौ पूर्वापक्षौ । यद्वा ये धामनी नामनी अंशुसोमात्मके अपि प्रतीची त्वदभिमुखंगच्छन्तौ गच्छतीवा पक्षौ नामनी तस्थतुः उपजग्मतुः । ताभ्यां त्वं विश्वस्य सर्वस्य लोकस्य राजसि स्वामीभवसि । पूर्वापक्षाभ्यां सर्वलोकस्योपनायकत्वात्तस्य स्वामीभवसि । पृथिव्यां अंशुनाम्नां मनुष्याणां सर्वेषां अभीप्सितदानेन तस्यलोकस्य द्युलोके देवेभ्यः स्वसुधामयकलादानेन तेषां प्रीणयिता भवति । देवाःखलु सोमस्य एकैकवृद्धिह्रासाभ्यां कलाः पिबन्ति ॥ २ ॥

२. पवमान सोम, तुम्हारे जो दो टेढ़े पत्ते (व किरण और सोमरस) हैं, उनसे तुम सारे संसार के स्वामी होते हो।

अथ तृतीया—

परिधामानियानितेत्वंसोमासिविश्वतः । पवमानक्रतुभिःकवे॥३॥

परि । धामानि । यानि । ते । त्वम् । सोम । असि ।
विश्वतः । पवमान । क्रतुऽभिः । कवे ॥ ३ ॥

हे सोम यस्मात्ते त्वदीयानि धामानि तेजांसि परितोवर्तंते । अतएव हे पवमान पूयमान हे कवे क्रान्तकर्मन् हे सोम त्वमृतुभिः वसन्तादिकालविशेषैः सह विश्वतः सर्वतोसि भवसि ।

अहोरात्रौ यत्रयत्र व्याप्तौ तत्रतत्र वसन्तादिकालोपाधिकः सोमस्तिष्ठति तयोस्तदधीनत्वादित्यर्थः ॥ ३ ॥

३. शोधित और क्रान्तकर्मा सोम, तुम्हारा तेज (वा पत्र) चारों ओर है। उससे तुम वसन्त आदि ऋतुओं में सर्वत्र सुशोभित होते हो।

पवस्वजनयन्निषोभिविश्वानिवार्या। सखासखिभ्यऊतये ॥४॥

पवस्व। जनयन्। इषः। अभि। विश्वानि।
वार्या। सखा। सखिऽभ्यः। ऊतये ॥ ४ ॥

हे सोम सखा सखिभूतस्त्वं विश्वानि सर्वाणि वार्या वरणीयानि अस्मद्गतानि स्तोत्राण्यभिलक्षीकृत्य सखिभ्योस्मभ्यं ऊतये रक्षणाय जीवनाय इषोन्नानि जनयन् प्रयच्छन् पवस्वागच्छ। पवतिर्गतिकर्मा ॥ ४ ॥

४. सोम, तुम हमारे सखा हो। हमारे सारे स्तोत्रों की ओर ध्यान देकर, हम मित्रों के रक्षण के लिए, अन्न देने को आओ।

तवशुक्रासोअर्चयोदिवस्पृष्ठेवितन्वते। पवित्रंसोमधामभिः॥५॥७॥

तव। शुक्रासः। अर्चयः। दिवः। पृष्ठे। वि।
तन्वते। पवित्रम्। सोम। धामऽभिः ॥ ५ ॥ ७ ॥

हे सोम शुक्रासः सर्वत्रज्वलनशीलाः धामभिस्तेजोभिः सहितस्य तव स्वभूता अर्चयः अर्चनीया रश्मयः दिवः द्योतमानस्यादित्यस्य द्युलोकस्यवा पृष्ठे अधरभागे पृथिव्यामित्यर्थः। पवित्रं पवमानसाधनमुदकं वितन्वते विशेषेण तन्वन्ति विस्तारयन्ति सर्वत्रकुर्वन्तीत्यर्थः ॥ ५ ॥

५. तेजस्वी तुम्हारी सर्वत्र ज्वलनशील और पूजनीय किरणें पृथिवी पर जल का विस्तार करती हैं।

॥ इति सप्तमस्य द्वितीये सप्तमोवर्गः ॥ ७ ॥

अथ षष्ठी—

तवेमेसप्तसिन्धवःप्रशिषंसोमसिस्रते। तुभ्यंधावन्तिधेनवः ॥ ६ ॥

तव। इमे। सप्त। सिन्धवः। प्रऽशिषम्। सोम।
सिस्रते। तुभ्यम्। धावन्ति। धेनवः ॥ ६ ॥

वृष्टिकर्तृत्वप्रसंगादाह हे सोम इमे इमास्त्वयासृष्टाः सप्त सप्तसंख्याकाः सिन्धवः स्यन्दमाना गंगाद्यानद्यः यद्वा सप्त सर्पणशीलानद्यः तव प्रशिषं प्रशासनमाज्ञामभिसिस्रते अनुसरन्ति त्वदाज्ञामनुसृत्य समुद्रं गच्छन्तीत्यर्थः। किंच धेनवः नवप्रसूतिकाः देवानां हविःप्रदानेन प्रीणयित्र्योगावः तुभ्यं त्वदर्थमेव आशिरं प्रयच्छामइति धावंति आगच्छन्ति ॥ ६ ॥

६. ये गंगा आदि सात नदियाँ तुम्हारी आज्ञा का अनुगमन करती हैं। तुम्हारे लिए ही गायें, दुग्ध आदि देने को, दौड़ती हैं।

प्रसोमयाहिधारयासुतइन्द्रायमत्सरः। दधानोअक्षितिश्रवः ॥ ७॥

प्र। सोम। याहि। धारया। सुतः। इन्द्राय।
मत्सरः। दधानः। अक्षिति। श्रवः ॥ ७ ॥

हे सोम अभिषूयमाण देव मत्सरः इन्द्रस्यमदकरस्त्वं सुतोस्माभिरभिषुतःसन् इन्द्राय इन्द्रार्थं दशापवित्रान्निर्गतया सन्ततया त्वदीयया धारया द्रोणकलशं प्रयाहि प्रकर्षेण प्राप्नुहि। यद्वा हे सोम सुतोभिषुतस्त्वं इन्द्राय मत्सरः मादयितृतमःसन् धारया अग्नौ स्वाहाकारेण पात्रात्पतन्त्या धारया सह त्वमिन्द्रमुपयाहि। कीदृशः अक्षिति अक्षीणं श्रवः। श्रवइत्यन्ननाम। दधानोस्मभ्यं प्रयच्छन् प्रयाहीति ॥ ७ ॥

७. सोम, तुम इन्द्र के लिए मदकर और हमारे द्वारा अभिषुत हो। दशापवित्र से निकलकर द्रोण-कलश में जाओ। हमें प्रचुर धन दो।

समुत्वाधीभिरस्वरन्हिन्वतीःसप्तजामयः। विप्रमाजाविवस्वतः॥८॥

सम्। ऊम् इति। त्वा। धीभिः। अस्वरन्। हिन्वतीः।
सप्त। जामयः। विप्रम्। आजा। विवस्वतः ॥ ८ ॥

हे सोम हिन्वतीः लिंगव्यत्ययः हिन्वन्तः स्तुतीः प्रेरयन्तः सप्त सप्तसंख्याका जामयः एकस्मिन्यज्ञे कर्मकरणेन परस्परं बन्धुभूता होतृप्रभृतयः सप्तहोत्रकाः विवस्वतः देवानां हविःप्रदानेन परिचरणवतोयजमानस्य आजा आजौ अजन्ति गच्छन्ति ऋत्विजोत्रेति आजिर्यज्ञः तस्मिन् विप्रं मेधाविनं पवमानं त्वा त्वामेव धीभिः स्तुतिभिः समस्वरन् अशब्दयन् अस्तुवन्। यद्वा हिन्वतीः गच्छन्त्यः सप्तजामयोगंगाद्याः सप्तनद्यः धीभिर्वर्णलोपश्छान्दसः धीतिभिरंगुलिभिर्विप्रं त्वां समस्वरन् प्रेरयन्ति वसतीवरीभिरेकधनाभिश्च परिशोधनार्थं प्रेरयन्तीति ॥८॥

८. सोम, स्तुति करते हुए सात होत्रक लोगों ने देवों के सेवक यजमान के यज्ञ में मेधावी और क्षरणशील तुम्हारी स्तुति की।

अथ नवमी–

मृजन्तित्वासमग्रुवोव्येजीरावधिष्वणि । रेभोयदज्यसेवने ॥ ९॥

मृजन्ति । त्वा । सम् । अग्रुवः । अव्ये । जीरौ ।
अधि । स्वनि । रेभः । यत् । अज्यसे । वने ॥ ९ ॥

हे सोम अग्रुवः अंगुलिनामैतत् अजन्ति प्रक्षिपन्ति हवींष्यग्राविति । यद्वा अगेर्गत्यर्थस्य कर्मकरणार्थं इतस्ततोगच्छन्तीति । अग्रुवोंगुलयोस्मदीया जीरौ पापानामभिभावुके क्षिप्रं कृते वा स्वनि अधि अधिकं शब्दायमाने अव्ये अविवालेन कृते पवित्रे त्वा त्वां सदा संमृजन्ति सम्यक् शोधयन्ति । यद्यदा रेभो रेभशब्दे उदकमध्ये प्रक्षेपेण शब्दायमानस्त्वं वने वननीये वसतीवर्याख्ये उदके अज्यसे अक्तः सिक्तोभवसि तदा मृजन्तीत्यन्वयः ॥ ९ ॥

९. सोम, अँगुलियाँ शीघ्र बनें, शब्दवाले और मेषलोम से बनाये दशापवित्र पर तुम्हें तब मारती (शोधित करती) हैं, जब तुम शब्द करते हुए वसतीवरी नामक जल से सिंचित होते हो।

पवमानस्यतेकवेवाजिन्त्सर्गाअसृक्षत । अर्वन्तोनश्रवस्यवः॥१०॥८॥

पवमानस्य । ते । कवे । वाजिन् । सर्गाः ।
असृक्षत । अर्वन्तः । न । श्रवस्यवः ॥ १० ॥ ८ ॥

मार्जनप्रसंगमाह हे कवे क्रान्तप्रज्ञ हे वाजिन्नन्नवन् सोम पवमानस्य दशापवित्रेण पूयमानस्य ते तव सर्गाः सृज्यन्तइतिसर्गाः धाराः । कीदृशाः श्रवस्यवः छन्दसिपरेच्छायांक्यच् । यष्टॄणामन्नं कामयमानास्त्वदीयाधाराः असृक्षत सृजन्ति निर्गच्छन्तीत्यर्थः । तत्रदृष्टान्तः–अर्वन्तोन यथा अश्वाः मन्दुरातोनिर्गच्छन्ति तद्वत् पवित्रान्निसरन्तीत्यर्थः। प्रयोगापेक्षं चात्र धाराबाहुल्यम् ॥ १० ॥

१०. क्रान्तप्रज्ञ और अन्नवान् सोम, जैसे, अश्व अन्न लाने के लिए दौड़ते हैं, वैसे ही यजमानों के अन्न की कामना करनेवाली तुम्हारी धाराएँ दौड़ती हैं।

॥ इति सप्तमस्य द्वितीये अष्टमोवर्गः ॥ ८ ॥

अथैकादशी–

अच्छाकोशंमधुश्चुतमसृग्रंवारेअव्यये । अवावशन्तधीतयः॥११॥

अच्छ । कोशम् । मधुऽश्चुतम् । असृग्रम् ।
वारे । अव्यये । अवावशन्त । धीतयः ॥ ११ ॥

धारानिर्गमनप्रसंगादभिधीयते मधुश्चुतं मधुररसस्य च्यावयितारं क्षारयितारं कोशं द्रोणकलशं अच्छ अभिलक्ष्य अव्यये अविनये अविस्वभूते या वारे वाले दशापवित्रे असृग्रं सोमा ऋत्विग्भिः सृज्यन्ते। सृजेः कर्मणि तिङांतिङोभवन्तीति झेरमादेशः। किंच धीतयः अंगुलिनामैतत् धयन्ति पिबन्ति आभिरिति अस्मदीयाअंगुलयः अवावशन्त तान् सोमान् पुनःपुनः मार्जनार्थं कामयन्ते ॥ ११ ॥

११. मधुर रस बरसानेवाले द्रोण-कलश को लक्ष्य करके मेषलोममय दशापवित्र पर पुरोहितों के द्वारा सोम बनाये जाते हैं। हमारी अँगुलियाँ सोमों के शोधन की इच्छा करती हैं।

अच्छा॑समु॒द्रमिन्द॒वोस्त॑ंगावो॒नधे॒नवः॑ । अग्म॑न्नृ॒तस्य॒योनि॒मा ॥१२॥

अच्छ॑ । स॒मु॒द्रम् । इन्द॑वः । अस्त॑म् । गावः॑ । न ।
धे॒नवः॑ । अग्म॑न् । ऋ॒तस्य॑ । योनि॑म् । आ ॥ १२ ॥

इन्दवः क्षरन्तः सोमाः समुद्रं सोमानामेकत्रैव संगमनस्थानं द्रोणकलशमभिगच्छन्ति। तत्रदृष्टान्तः—धेनवः पयःप्रदानेन जनानां प्रीणयित्र्योनवप्रसूतिकागावः अस्तं गृहं यथाभिगच्छन्ति तद्वत्। किंच ते सोमाः ऋतस्य सत्यभूतस्य यज्ञस्य योनिं स्थानमाग्मन् आभिमुख्येनगच्छन्ति। गमेर्लुङि सिचोलुकि उपधालोपः ॥ १२ ॥

१२. जैसे दुग्ध देकर मनुष्यों को आनन्द देनेवाली धेनुएँ और नवप्रसूता गायें अपने गोष्ठ को जाती हैं, वैसे ही क्षरणशील सोम अपने संगमनस्थान द्रोण-कलश की ओर जाते हैं। सोम यज्ञ-स्थान की ओर जाते हैं।

प्रण॑इन्दोम॒हेरण॒आपोअर्ष॑न्ति॒सिन्ध॑वः । यद्गोभि॑र्वासयि॒ष्यसे॑ ॥ १३ ॥

प्र नः॑ । इन्दो॒ इति॑ । म॒हे । रणे॑ । आपः॑ । अर्ष॑न्ति ।
सिन्ध॑वः । यत् । गोभिः॑ । वा॒स॒यि॒ष्यसे॑ ॥ १३ ॥

हे इन्दो क्षरन् सोम नोस्माकं स्वभूताय रणे रणाय रणन्ति स्तुवन्ति देवानत्रेति रणोयज्ञः। अधिकरणे अप् ङेर्यइति नभवति सर्वविधीनां छन्दसि विकल्पितत्वात्। महे महते रणाय यज्ञाय तदर्थं सिंधवः स्यन्दमाना आपः वसतीवर्याख्याः सोमसेकार्थं अर्षन्ति प्रगच्छन्ति। यद्यदा त्वं गोभिः गव्यैः दधिक्षीरादिभिः वासयिष्यसे आच्छाद्यसे मिश्रितोभवसि तदा आपोगच्छन्तीति ॥ १३ ॥

१३. सोम, जब तुम दुग्ध आदि में मिलाये जाते हो, तब हमारे यज्ञ के लिए क्षरणशील जल (वसतीवरी) जाता है।

अथ चतुर्दशी—

अस्यंतेसख्येवयमिषंक्षन्तस्त्वोतयः। इन्दोसखित्वमुश्मसि॥१४॥

अस्य। ते। सख्ये। वयम्। इषंक्षन्तः। त्वाऽऊतयः।
इन्दो इति। सखिऽत्वम्। उश्मसि॥ १४॥

हे इन्दो पवमान इषंक्षन्तो यष्टुमिच्छन्तो पूजयितुमिच्छन्तोवा अस्य प्रसिद्धस्य ते तव सख्ये सखिकर्मणि स्थितावयं त्वोतयः त्वदायत्तरक्षणाःसन्तः सखित्वं सखिभावमेव उश्मसि उश्मः कामयामहे॥ १४॥

१४. पूजाभिलाषी और तुम्हारे बन्धु-कर्म में स्थित हम तुम्हारे रक्षण में हैं और तुम्हारे बन्धुत्व की कामना करते हैं।

आपवस्वगविष्टयेमहेसोमनृचक्षसे। एन्द्रस्यजठरेविश॥१५॥९॥

आ। पवस्व। गोऽईष्टये। महे। सोम। नृऽचक्षसे।
आ। इन्द्रस्य। जठरे। विश॥ १५॥ ९॥

हे सोम पवमान गविष्टये अंगिरसां गवामन्वेष्ट्रे महे महते नृचक्षसे नृणां मनुष्याणां द्रष्ट्रे कर्मनेतॄणां फलं पश्यतेवा इन्द्राय आपवस्व पात्रेषु दशापवित्रेण पूतो भव। किंच इन्द्रस्य जठरे उदरे उदरभूते द्रोणकलशे वा आविश प्रविश॥ १५॥

१५. सोम, अङ्गिरा लोगों की गायें खोजनेवाले, महान् और मनुष्य-दर्शक इन्द्र के लिए बहो तथा इन्द्र के उदर में पैठो।

॥ इति सप्तमस्य द्वितीये नवमोवर्गः॥ ९॥

महाँअसिसोमज्येष्ठउग्राणामिन्दओजिष्ठः। युध्वासन्छश्वज्जिगेथ॥१६॥

महान्। असि। सोम। ज्येष्ठः। उग्राणाम्। इन्दो इति।
ओजिष्ठः। युध्वा। सन्। शश्वत्। जिगेथ॥ १६॥

हे सोम त्वं महानसि यतस्त्वं देवानां प्रीणयितासि खलु त्वं ज्येष्ठः प्रशस्यतमोभवसि। किंच हे इंदो पवमान त्वमुग्राणामुद्गूर्णबलानामपि ओजस्वितमोभवसि त्वं युध्वासन् शत्रूभिः सह युद्धं कुर्वन् एव शश्वत् सर्वदा जिगेथ तान् तेषां धनानिच जितवानसि। जिजये थलि सन्लिटोर्जेरिति अभ्यासादुत्तरस्य कवर्गादेशः॥ १६॥

१६. सोम, तुम महान् हो। तुम देवों के आनन्ददाता और प्रशंसनीय हो। सोम, उग्र बलवालों में भी तेजस्वी हो। शत्रुओं के साथ युद्ध करते हुए उनके धन को तुमने जीता।

अथ सप्तदशी—

यउग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः ।
भूरिदाभ्यश्चिन्मंहीयान् ॥ १७ ॥

यः । उग्रेभ्यः । चित् । ओजीयान् । शूरेभ्यः । चित् ।
शूरऽतरः । भूरिऽदाभ्यः । चित् । मंहीयान् ॥ १७ ॥

यः सोमः उग्रेभ्यश्चित् उद्गूर्णेभ्योबलवद्भ्योपि ओजीयान् ओजस्वितमः । किंच यः शूरेभ्यश्चित् वीरेभ्योपि शूरतरः अत्यन्तसमर्थोभवति । तथा यः सोमः भूरिदाभ्यः दुदाञ् दाने आतोमनिन्निति विच् । बहुधनानां दातृभ्योपि मंहीयान् दातृतमोभवति । तं त्वां वृणीमहे इति उत्तरेणसंबन्धः ॥ १७ ॥

१७. सोम बलियों में बली, शूर में शूर और दाताओं में महान् दाता हैं।

अथाष्टादशी—

त्वंसोमसूरएर्पस्तोकस्यसातानूनाम् ।
वृणीमहेसख्यायवृणीमहेयुज्याय ॥ १८ ॥

त्वम् । सोम । सूरः । आ । इषः । तोकस्य । साता । तनूनाम् ।
वृणीमहे । सख्याय । वृणीमहे । युज्याय ॥ १८ ॥

हे सोम सूरः सुवीर्यः यद्वा सर्वस्य यागादिकर्मणि प्रेरकस्त्वं इषोन्नानि अस्माकमाधेहि । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । किंच त्वं तोकस्य पुत्रस्य तनूनां तन्वन्ति विस्तारयन्ति कुलानि तन्वः पौत्राः । तेषांच साता दाता भव । षणुदाने जनसनेतिविट् जनसनेत्यात्वं । वयं तं त्वां सख्याय सखिभावाय कर्मणेवा वृणीमहे संभजामहे । तथा युज्याय युज् सहायः तस्य भावे कर्मणि वा ष्यञ् संज्ञापूर्वकस्य विधेरनित्यत्वादवृद्धिः । शत्रुबाधादिलक्षणसहायायच वयं वृणीमहे ॥ १८ ॥

१८. सोम, तुम सुन्दर वीर्यवाले हो। तुम यज्ञों के प्रेरक हो। हमें अन्न दो। पुत्र दो। तुम्हारी मैत्री के लिए हम तुम्हारा आश्रय करते हैं। शत्रु-बाधा को दूर करने के लिए हम तुम्हारा आश्रय करते हैं।

अग्निहोत्रे पूर्वस्यामाहुतौ हुतायामुपोषितेन यजमानेन प्रतिदिवसं प्रतिसंवत्सरंवा अनेन तृचेनाग्निरुपस्थेयः। सूत्रितंच—आग्नेयीभिश्चाग्नआयूंषिपवसइति तिसृभिः संवत्सरे संवत्सरइति। चौलादिकर्मसु चतस्रआज्याहुतयोहोतव्यास्तत्रैवतिस्रः । सूत्रितंच—तेषांपुरस्ताच्चतस्रआज्या-

हुतीर्जुहुयादग्नआयूंषिपवसइति तिसृभिरिति । आधाने पवमानेष्टौ अग्नेःपवमानस्याग्नआयूंषीत्येषानुवाक्या अग्नेपवस्वेत्येषा याज्या। सूत्रितंच—प्रथमायांअग्निरग्निःपवमानोग्नआयूंषिपवसेग्नेपवस्वस्वपाइति। पुनराधेये द्वितीयाज्यभागस्याग्नआयूंषीत्येषा वैकल्पिकानुवाक्या सूत्रितंच--नित्यंपूर्वमनुब्राह्मणिनोग्नआयूंषिपवसइत्युत्तरमिति ।

सैषा सूक्ते एकोनविंशी—

अग्न॒आयूं॑षिपवस॒आसु॒वोर्ज॒मिषं॑चनः । आ॒रेबा॑धस्वदु॒च्छुना॑म् ॥१९॥

अग्ने । आयूंषि । प॒व॒से॒ । आ । सु॒व॒ । ऊर्जम् । इषम् ।
च॒ । नः॒ । आ॒रे । बा॒ध॒स्व॒ । दु॒च्छुना॑म् ॥ १९ ॥

हे अग्ने पवमानरूप त्वमस्माकं आयूंषि जीवनानि पवसे रक्षसि । नोस्माकमूर्जमन्नरसं इषमन्नंवा सुव आभिमुख्येन प्रेरय । किंच दुच्छुनां रक्षोनामैतद रक्षांसि आरे अस्मत्तोदूरे एव बाधस्व संपीडय ॥ १९ ॥

१९. पवमान सोम, तुम हमारे जीवन की रक्षा करते हो। हमें अन्नरस और अन्न दो। राक्षसों को हमसे दूर ही नष्ट करो।

अथ विंशी—

अ॒ग्निर्ऋषि॒ःपव॑मान॒ःपाञ्च॑जन्यःपु॒रोहि॑तः ।
तमी॑महेमहाग॒यम् ॥ २० ॥ १० ॥

अ॒ग्निः । ऋषिः । पव॑मानः । पाञ्च॑ऽजन्यः । पु॒रःऽहि॑तः ।
तम् । ई॒म॒हे॒ । म॒हा॒ऽग॒यम् ॥ २० ॥ १० ॥

पांचजन्यः निषादपंचमाश्चत्वारोवर्णाः पंचजनाः । यद्वा गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येते पंचजनाः । अथवा देवमनुष्यागंधर्वाप्सरसः सर्पाः पितरइति ब्राह्मणेभिहिताः पंचजनाः । गभीराञ्ज्यइत्यत्र बहिर्देवपंचजनेभ्यइति वक्तव्यमिति वचनाद भवार्थेञ्यः प्रत्ययः तेषां तत्तदभीष्टदानेन स्वभूतऋषिः सर्वद्रष्टा पवमानस्तद्रूपोग्निः पुरोहितः कर्मार्थमृत्विभिः पुरोनिहीतः तंपूर्वोक्तलक्षणं महागयं महद्भिर्देवादिभिरपि गीर्भिर्गातव्यं महान्तिप्रभूतानि यज्ञगृहाणि वा यस्य सतथोक्तः तं पवमानगुणविशिष्टमग्निमीमहे धनादीनि याचामहे ॥ २० ॥

२०. चारों वर्ण और निषाद के हितैषी, ऋषि, पवित्र, पुरोहित और महायशस्वी अग्नि से हम धनादि की याचना करते हैं।

॥ इति सप्तमस्य द्वितीये दशमोवर्गः ॥ १० ॥

अथैकविंशी—

अग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यम् । दधद्रयिंमयिपोषम् ॥२१॥

अग्ने । पवस्व । सुऽअपाः । अस्मे इति । वर्चः । सुऽवीर्यम् ।
दधत् । रयिम् । मयि । पोषम् ॥ २१ ॥

हे अग्ने स्वपाः । सोमनसीत्युत्तरपदाद्युदात्तत्वं । शोभनकर्मा त्वं अस्मे अस्मासु सुवीर्यं शोभनवीर्योपेतं वर्चः वर्चदीप्तौ तेजः पवस्व आगमय । तथा भवान् रयिं धनं पुत्रं वा पोषं । भावेकर्मणि वा घञ् । गवां पुष्टिं यद्वा गवादिकं मयि भवान् दधत् दधातु करोत्वित्यर्थः । दधातेर्लेटि अडागमोवोर्लोपोलेटिवेत्याकारलोप. ॥ २१ ॥

२१. अग्नि, शोभनकर्मा तुम हमें सुन्दर बलवाला तेज दो। पुत्र और गौ आदि भी दो। अथ द्वाविंशी—

पवमानोअतिस्रिधोभ्यर्षतिसुष्टुतिम् । सूरोनविश्वदर्शतः ॥२२॥

पवमानः । अति । स्रिधः । अभि । अर्षति । सुऽस्तुतिम् ।
सूरः । न । विश्वऽदर्शतः ॥ २२ ॥

पवमानः सोमः अतिस्रिधः हिंसकान् शत्रून् अतिक्रम्य गच्छति । तथा सुष्टुतिं स्तोतॄणां शोभनां स्तुतिं अभ्यर्षति आभिमुख्येन गच्छति । ऋषीगतौ तौदादिकः बहुलंछन्दसीतिशप् गुणः । किंच सूरोन सूर्यइव विश्वदर्शतः सर्वस्य द्रष्टा सर्वैर्वा दर्शनीयोभवति ॥ २२ ॥

२२. पवमान सोम शत्रुओं का अतिक्रम करते हैं। ये स्तोताओं की शोभन स्तुति को प्राप्त करते हैं। ये सूर्य के समान सबके दर्शनीय भी हैं। अथ त्रयोविंशी—

सममृजानआयुभिःप्रयस्वान्प्रयसेहितः । इन्दुरत्योविचक्षणः॥२३॥

सः । मर्मृजानः । आयुऽभिः । प्रयस्वान् । प्रयसे । हितः ।
इन्दुः । अत्यः । विऽचक्षणः ॥ २३ ॥

आयुभिः कर्मनेतृभिर्मनुष्यैः मर्मृजानः पुनःपुनर्मृज्यमानः शोध्यमानः सइन्दुः ससोमः अत्योदेवान् सततं गन्ता भवति । कीदृशः प्रयस्वान् प्रीणनशीलान्नवान् । यद्वा स्तोतृभ्योदेयत्वेनान्नयुक्तः अतएव प्रयसे हवोरूपायान्नाय हितः विचक्षणः सर्वस्यप्रदर्शनकारी सर्वस्यविद्रष्टा वा सोमः देवानभिगन्ता भवति। चक्षिङ्व्यक्तायांवाचि अनुदात्तेतश्चहलादेरिवियुच्॥२३॥

२३. मनुष्यों के द्वारा बार-बार शोध्यमान सोम देवों के पास निरन्तर जाते हैं। ये आनन्दप्रद अन्नवाले हैं। वे हवि के लिए हितैषी हैं। वे सबके द्रष्टा हैं।

अथ चतुर्विंशी—

पवमानऋतंबृहच्छुक्रंज्योतिरजीजनत्। कृष्णातमांसिजंघनत्॥२४॥

पवमानः। ऋतम्। बृहत्। शुक्रम्। ज्योतिः। अजीजनत्।
कृष्णा। तमांसि। जंघनत्॥ २४॥

पवमानः ऋतं सत्यं यथार्थभूतं बृहत् प्रभूतं सर्वदेशेषुव्यापकं शुक्रं दीप्यमानं श्वेतवर्णं ज्योतिस्तेजः अजीजनत् द्युलोके उदपादयत्। किंकुर्वन् कृष्णा कृष्णवर्णानि तमांसि जंघनत् भृशं विनाशयन्। हन्तेर्यङ्लुकि शतरि रूपं अभ्यस्तानामादिरित्याद्युदात्तत्वं॥ २४॥

२४. क्षरणशील सोम ने काले अन्धकार को नष्ट करते हुए, प्रचुर, सर्वत्र व्यापक, दीप्तिमान् और श्वेतवर्ण तेज उत्पन्न किया।

पवमानस्यजंघ्नतोहरेश्चन्द्राअसृक्षत। जीराअजिरशोचिषः॥२५॥११॥

पवमानस्य। जंघ्नतः। हरेः। चन्द्राः। असृक्षत।
जीराः। अजिरऽशोचिषः॥ २५॥ ११॥

जङ्घ्नतः पुनःपुनस्तमांसि विनाशयतो हरेर्हरितवर्णस्य अजिरशोचिषः सर्वत्रगमनशील-तेजसः पवमानस्य सोमस्य चन्द्राः चदिआह्लादने देवानामाह्लादयित्र्यः जीराःक्षिप्रं क्षरणशीलाधाराः असृक्षत सृजन्ति पवित्रान्निर्गच्छन्तीत्यर्थः॥ २५॥

२५. बार-बार अन्धकार का विनाश करनेवाले, हरित-वर्ण, व्यापक तेजवाले और क्षरणशील सोम की आनन्ददायिनी, शीघ्रकारिणी और बहनशील धारायें दशापवित्र से निकल रही हैं।

॥ इति सप्तमस्य द्वितीये एकादशोवर्गः॥ ११॥

अथ पड्विंशी—

पवमानोरथीतमःशुभ्रेभिःशुभ्रशस्तमः। हरिश्चन्द्रोमरुद्गणः॥२६॥

पवमानः। रथिऽतमः। शुभ्रेभिः। शुभ्रशःऽतमः।
हरिऽचन्द्रः। मरुत्ऽगणः॥ २६॥

पवमानोदेवः रथीतमः अतिशयेन रथवान्। ईद्रथिनइतीकारः। तथा शुभ्रेभिः शोभायुक्तेभ्यस्तेजोभ्योपि शुभ्रशस्तमः अत्यन्तदीप्यमानश्च यद्वा निर्मलेभ्योपि निर्मलतमयशोयुक्तः हरिश्चन्द्रः ह्रस्वाच्चन्द्रोत्तरपदइति सांहितिकःसुट् हरितवर्णदीप्तिः हरितधारावान् वा मरुद्गणः

मरुतोयस्य गणः सहायभूताः सतथोक्तः तादृशः सर्वान् लोकान् स्वरश्मिभिः स्वदीप्तिभिः व्यश्नवत् व्याप्नोत्वित्युत्तरेण संबन्धः ॥ २६ ॥

२६. पवमान सोम, अतीव रथवाले, निर्मलतम यशवाले, हरितधारावान् और मरुतों की सहायता से युक्त हैं। अपनी किरणों से सारे विश्व को व्याप्त करते हैं।

पवमानाव्यश्नवद्रश्मिभिर्वाजसातमः । दधत्स्तोत्रेसुवीर्यम् ॥२७॥

पवमानः । वि । अश्नवत् । रश्मिऽभिः । वाजऽसातमः ।
दधत् । स्तोत्रे । सुऽवीर्यम् ॥ २७ ॥

पवमानः सोमः रश्मिभिः स्वदीप्तिभिः व्यश्नवत् सर्वंजगद्व्याप्नोतु। कीदृशः वाजसातमः अतिशयेन अन्नस्यदाता बलस्य संभक्ता वा तथा स्तोत्रे पवमानः स्तोत्रंकुर्वते मनवे सुवीर्यं सुवीर्योपेतं पुत्रं धनंवा दधत् विदधत् प्रयच्छन् व्याप्नोतु अश्नोतेर्लेटयडागमः ॥ २७ ॥

२७. पवमान, अन्नदाता और स्तोता को सुन्दर वीर्य से युक्त पुत्र देते हुए सोम अपनी किरणों से सारे संसार को व्याप्त करते हैं।

प्रसुवानइन्दुरक्षाःपवित्रमत्यव्ययम् । पुनानइन्दुरिन्द्रमा ॥ २८ ॥

प्र । सुवानः । इन्दुः । अक्षारिति । पवित्रम् । अति ।
अव्ययम् । पुनानः । इन्दुः । इन्द्रम् । आ ॥ २८ ॥

सुवानः अभिषूयमाणः इन्दुः सोमः अव्ययमविमयं ऊर्णास्तुकेननिर्मितं दशापवित्रमतीत्य प्राक्षाः कलशं प्रकर्षेण क्षरति । क्षरतेर्लुङि तिपि सिचि छान्दसइडागमाभावः अतोलूरान्तस्येतिवृद्धिः रात्सस्येतिसिचोलोपः रेफान्तंस्पष्टयितुमितिकारः बहुलंछन्दसीतीडभावः हल्ङ्यादिना तिलोपः अनित्यमागमशासनमितिसिचइआ ततः पुनानः पवित्रेण शुद्धः इन्दुः सोमः इन्द्रमाविशति । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ २८ ॥

२८. क्षरणशील सोम मेषलोममय पवित्र को लांघ कर क्षरित हुए। पवित्र से शुद्ध होकर सोम इन्द्र के पेट में पैठें।

अथैकोनत्रिंशी—

एषसोमोअधित्वचिगवांक्रीळत्यद्रिभिः । इन्द्रंमदायजोहुवत् ॥ २९ ॥

एषः । सोमः । अधि । त्वचि । गवाम् । क्रीळति ।
अद्रिऽभिः । इन्द्रम् । मदाय । जोहुवत् ॥ २९ ॥

एषः अंशुरूपः सोमः गवां त्वचि आनडुहे चर्मणि अधिशब्दउपर्यर्थद्योतकः चर्मण्युपरि अद्रिभिर्ग्रावभिःसह क्रीळति अभिषवाय संक्रीडते । इन्द्रं परमेश्वरं मदाय मदार्थं जोहुवत् आह्वानं कृतवान् । एतेन तत्काले इन्द्रविषयां स्तुतिं करोतीत्यवगम्यते ॥ २९ ॥

२९. किरण-रूप सोम गोचर्म के ऊपर पत्थरों के साथ क्रीड़ा करते हैं। मद के लिए सोम ने इन्द्र को बुलाया।

यस्यतेद्युम्नवत्पयःपवमानाभृतंदिवः । तेनंनोमृळजीवसे ॥३०॥१२॥

यस्य । ते । द्युम्नऽवत् । पयः । पवमान । आऽभृतम् ।
दिवः । तेन । नः । मृळ । जीवसे ॥ ३० ॥ १२ ॥

हे पवमान पूयमान हे सोम दिवो द्युलोकात् आभृतं श्येनरूपया गायत्र्या आहृतं द्युम्नवदन्नवद्यशोयुक्तं वा पयः सोमलक्षणमन्नं यस्य ते तव स्वभूतं विद्यते तस्मात् त्वं तेनान्नेन नोस्मान् जीवसे चिरजीवनाय मृळ मृळय सुखय ॥ ३० ॥

३०. क्षरणशील सोम, द्युलोक से श्येन-रूपिणी गायत्री से लाये गये और यशोयुक्त सोम, रस-रूप अन्न तुम्हारे पास है। उससे हमें, चिर जीवन के लिए, आनन्दित करो।

॥ इति सप्तमस्य द्वितीये द्वादशोवर्गः ॥ १२ ॥

त्वंसोमासीति द्वात्रिंशदृचं सप्तमं सूक्तं आयतृचस्य बार्हस्पत्योभरद्वाजऋषिः । द्वितीयस्य मारीचः कश्यपः। तृतीयस्य राहूगणोगोतमः। चतुर्थस्य भौमोत्रिः। पंचमस्य गाथिनोविश्वामित्रः। षष्ठस्य भार्गवोजमदग्निः। सप्तमस्यमैत्रावरुणिर्वसिष्ठः।सूक्तशेषस्यांगिरसः पवित्रः वसिष्ठोवा उभौ वा समुदितावृषी । पवस्वसोममन्दयन्नित्याद्यास्तिस्रोनित्यद्विपदागायत्र्यः । अवितानोअजाश्वइत्याद्यास्तिस्रः पवमानपूषदेवत्याः पवमानसोमदेवताका वा । यत्तेपवित्रमर्चिषीत्याद्याःपंचर्चः पवमानाग्निदेवत्याः आसां पंचानांमध्ये उभाभ्यांदेवसवितरिति तृतीयापवमानसवितृदेवताका-वा । चतुर्थी त्रिभिष्टुंदेवसवितरित्येषा विकल्पेनपवमानाग्निसवितृदेवताका।पुनन्तुमामित्येषा विकल्पेनवैश्वदेवी यःपावमानीरध्येतीत्यादिके द्वे पवमानमण्डलाध्येतृस्तुतिपतिपादिके अतः सैव देवता शिष्टाःसर्वाःपवमानसोमदेवताकाः । तथाचानुक्रम्यते—त्वंसोमासिद्वात्रिंशद्भरद्वाजः कश्यपोगोतमोत्रिर्विश्वामित्रोजमदग्निर्वसिष्ठइतितृचाः सप्तऋषयः शेषे पवित्रोवसिष्ठोवोभौवा पवस्व सोमतिस्रोनित्यद्विपदागायत्र्यो वितानस्तिस्रःपौष्ण्योवा यत्तेपवित्रंपंचाग्नेय्यः सावित्र्यग्निसावित्रीवैश्वदेवीवासामंत्याः त्रिंशीपुरउष्णिक् सप्तविंश्यनुष्टुप् अन्त्ये च ते पावमान्यध्येतृस्तुतीति । गतःसूक्तविनियोगः।

तत्र प्रथमा—

त्वंसोमासिधारयुर्मन्द्रओजिष्ठोअध्वरे । पवस्वमंहयद्रयिः ॥ १ ॥

त्वम् । सोम । असि । धारयुः । मन्द्रः । ओजिष्ठः ।
अध्वरे । पवस्व । मंहयत्ऽरयिः ॥ १ ॥

हे सोमाभिषूयमाण पवमान मन्द्रः मोदयितृतमः ओजिष्ठः ओजस्वितमस्त्वं अध्वरे हिंसारहितेस्मदीयेयज्ञे धारयुः अभिषवणधाराकामोसि भवसि । अतस्त्वं मंहयद्रयिः स्तोतृभ्यः प्रदीयमानधनः सन् पवस्व द्रोणकलशे ग्रहादिषु दशापवित्रेण पूतोभव । यद्वा धारयुः तद्वदर्थेभाष्यतइति मत्वर्थीयोयुः सः हे सोम त्वं धारावानिव । ततः पवस्वेति संबन्धः ॥ १ ॥

१. क्षरणशील सोम, तुम अतीव मदकर, अत्यन्त ओजस्वी, हिंसा-शून्य यज्ञ में अभिषव-धारा की इच्छा करनेवाले और स्तोताओं को धन देनेवाले हो। द्रोण-कलश में धारा-रूप से गिरो।

त्वंसुतोनृमादनोदधन्वान्मत्सरिन्तमः । इन्द्रायसूरिरन्धसा ॥ २ ॥

त्वम् । सुतः । नृऽमादनः । दधन्वान् । मत्सरिन्ऽतमः ।
इन्द्राय । सूरिः । अन्धसा २ ॥

हे सोम नृमादनः नृणां कर्मणांनेतॄणामृत्विजां मादयिता अतएव दधन्वान् तेभ्योधनानि धारयन् प्रयच्छन् । यद्वा यज्ञस्य धारकः सूरिः प्राज्ञः सुतोस्माभिरभिषुतस्त्वं अन्धसा हवीरूपेणान्नेन सहेन्द्राय मत्सरिन्तमः तस्यातिशयेन मदकारी भव । नाद्धस्येति नकारः ॥ २ ॥

२. कर्म-निष्ठ पुरोहितों को तुम प्रमत्त करनेवाले हो। उन्हें धन देते हुए यज्ञ के धारक, प्राज्ञ और अभिषुत तुम अन्न के साथ इन्द्र के लिए अतीव प्रमत्तकर बनो। अथ तृतीया—

त्वंसुष्वाणोअद्रिभिरभ्यर्षकनिक्रदत् । द्युमन्तंशुष्ममुत्तमम् ॥३॥

त्वम् । सुस्वानः । अद्रिऽभिः । अभि । अर्ष । कनिक्रदत् ।
द्युऽमन्तम् । शुष्मम् । उत्ऽतमम् ॥ ३ ॥

हे पवमानसोम अद्रिभिर्ग्रावभिः सुष्वाणः सुन्वानः अभिषूयमाणस्त्वं कनिक्रदत् भृशं शब्दंकुर्वन् अभ्यर्ष कलशं पात्राणिचाभिगच्छ । तथा द्युमन्तं दीप्तियुक्तं उत्तमं शुष्मं शत्रूणां शोषकं बलंच प्राप्नुहि । यद्वा एकवाक्यतया योजनीयः । स्तूयमानस्त्वं बलमभिगच्छेति । क-

दिक्रदिआह्वाने। क्रदेर्यङ्लुकि तलोपः। अभ्यासस्यनिगागमश्च दाधर्तिदर्धर्तीतिसूत्रेण सर्वं निपात्यते। तस्माच्छतृप्रत्ययः। अभ्यस्तानामादिरितिस्वरः॥ ३॥

३. पवमान सोम, पत्थरों से कूटे जाकर तुम शब्द करते हुए कलश की ओर जाओ और दीप्तियुक्त तथा शत्रुशोषक बल भी प्राप्त करो।

इन्दुर्हिन्वानोअर्षतितिरोवाराण्यव्यया। हरिर्वाजमचिक्रदत्॥४॥

इन्दुः। हिन्वानः। अर्षति। तिरः। वाराणि। अव्यया।
हरिः। वाजम्। अचिक्रदत्॥ ४॥

हिन्वानः ग्रावभिः प्रेर्यमाणोभिषूयमाणइन्दुः सोमः अव्यया अविमयानि अवीनां स्वभूतानि वाराणि वालानि पवित्राणीत्यर्थः। तानि तिरः तिरस्कृत्य व्यवधाय अर्षति गच्छति प्रभूतं निर्गच्छतीत्यर्थः। सोमं हरिर्हरितवर्णः सोमः वाजमन्नं अचिक्रदत् शब्दयति। त्वया सह इन्द्रमहमाह्वयामीत्यर्थः॥ ४॥

४. पत्थरों से कूटे जाकर सोम मेषलोममय पवित्र से निकलकर जाते हैं और हरित-वर्ण, सोम अन्न से कहते हैं कि, "मैं तुम्हारे साथ इन्द्र को बुलाता हूँ।" अथ पञ्चमी—

इन्दोव्यव्यमर्षसिविश्रवांसिविसौभगा। विवाजान्त्सोमगोमतः॥५॥१३॥

इन्दो इति। वि। अव्यम्। अर्षसि। वि। श्रवांसि। वि।
सौभगा। वि। वाजान्। सोम। गोऽमतः॥ ५॥ १३॥

हे इन्दो सोम अव्यं अविवालेभवं पवित्रं व्यर्षसि विविधं धाराभिर्गच्छसि। किंच श्रवांसि हवीरूपाण्यन्नानिच विगच्छसि। तथा सौभगा सुभगस्य भावः सौभगं सुभगशब्दः उद्गात्रादिषु पठ्यते। तस्य उत्तरपदवृद्धिर्नेष्यते। सौभगानि धनानि विविधं प्राप्नोषि। तथा हे सोम गोमतः पशुमन्ति वाजान् बलानिच विविधंप्राप्नुहि तानि सर्वाण्यस्माकं प्रापयेत्यभिप्रायः॥ ५॥

५. सोम, जब तुम मेष लोममय पवित्र (दशापवित्र) से निकलते हो, तब हविरूप अन्न, सौभाग्य (धन) और गोयुक्त बल प्राप्त करते हो।

॥ इति सप्तमस्य द्वितीये त्रयोदशोवर्गः॥ १३॥

अथ षष्ठी—

आनइन्दोशतग्विनंरयिगोमन्तमश्विनम्। भरासोमसहस्रिणम्॥ ६॥

आ । नः । इन्दो इति । शतऽग्विनम् । रयिम् । गोऽमन्तम् ।
अश्विनम् । भर । सोम । सहस्रिणम् ॥ ६ ॥

हे इन्दो पात्रेषु क्षरन् हे सोम नोस्मभ्यमाभर संपादय देहि । किमिति उच्यते शतग्विनं शतंगावोयस्य सशतगुः तद्वन्तं गोमन्तं प्रशस्तपशुमन्तं अश्विनं अश्वयुक्तं सहस्रिणं सहस्रसंख्याकं रयिं धनं पुत्रं वा आभर ॥ ६ ॥

६. पात्रों में गिरनेवाले सोम, हमारे लिए सौ गायें, सहस्र अश्व और धन दो।

पवमानासइन्दवस्तिरःपवित्रमाशवः । इन्द्रंयामेभिराशत ॥ ७ ॥

पवमानासः । इन्दवः । तिरः । पवित्रम् । आशवः ।
इन्द्रम् । यामेभिः । आशत ॥ ७ ॥

पवित्रमूर्णास्तुकेननिर्मितं दशापवित्रं तिरस्कृत्य व्यवधायकं कृत्वा पवमानासः कलशं प्रति बहुधाराः क्षरन्तः आशवः क्षिप्रं मदकारिणश्चमसादीन् व्याप्नुवन्तोवा इन्दवः सोमाः यामेभिः स्वीयैर्गमनैः इन्द्रमाशत व्याप्नुवन्ति ॥ ७ ॥

७. मेषलोममय पवित्र से निकलकर कलश की ओर अनेक धाराओं से गिरते हुए और शीघ्र मदकारी सोम चमस आदि को व्याप्त करते हुए अपनी गति से इन्द्र को परिव्याप्त करते हैं।

ककुहःसोम्योरसइन्दुरिन्द्रायपूर्व्यः । आयुःपवतआयवे ॥ ८ ॥

ककुहः । सोम्यः । रसः । इन्दुः । इन्द्राय । पूर्व्यः ।
आयुः । पवते । आयवे ॥ ८ ॥

ककुहः सोमः सर्वकर्मकारयितृत्वेन सर्वेषां समुच्छ्रितः अतिशयितोभवति । सोयं पूर्व्यः पूर्वैः कृतोभिषुतः पूर्वं प्रातःकाले कृतोवा आयुः इन्द्रं प्रति गंता इन्दुः पात्रेषु क्षरन् सोम्यः मयेचेति यः प्रत्ययः सोममयोरसः आयवे सर्वत्रगन्त्रे इन्द्राय पवते कलशेषु पवित्रेण पूतोभवति । यद्वा इन्द्रार्थमभिगच्छति । पवतिर्गतिकर्मा ॥ ८ ॥

८. सोम सबसे उन्नत हैं। वे पूर्वजों के द्वारा अभिषुत सोम सर्वग इन्द्र के लिए कलश में जाते हैं और इन्द्र के लिए क्षरित होते हैं।

अथ नवमी—

हिन्वन्तिसूरमुस्रयःपवमानंमधुश्चुतम् । अभिगिरासमस्वरन् ॥ ९ ॥

हिन्वन्ति । सूरम् । उस्रयः । पवमानम् । मधुऽश्चुतम् ।
अभि । गिरा । सम् । अस्वरन् ॥ ९ ॥

उस्रयः कर्मकरणार्थं इतस्ततोगच्छन्त्योंगुलयः मधुश्चुतं मदकरस्य रसस्य च्यावयितारं सूरं सुवीर्यं सर्वस्य यागादिकर्मणिप्रेरकं पवमानं सोमं हिन्वन्ति अभिषवार्थं संप्रेरयन्ति । ततः स्तोतारोगिरा स्तुत्या तमेनमभिसमस्वरन् सम्यगभिष्टुवन्ति ॥ ९ ॥

९. कार्य करने के लिए इधर-उधर जानेवाली अँगुलियाँ मदकर रस को गिरानेवाले, यागादि कर्म के प्रेरक और क्षरणशील सोम को प्रेरित करती हैं। स्तोता लोग स्तोत्र के द्वारा इनकी भली भाँति स्तुति करते हैं।

अविता नोअजाश्वःपूषायामनियामनि। आभक्षत्कन्यासुनः॥ १०॥१४॥

अविता । नः । अजऽअश्वः । पूषा । यामनिऽयामनि ।
आ । भक्षत् । कन्यासु । नः ॥ १० ॥ १४ ॥

अजाश्वः अजाःपूष्ण इत्युक्तत्वादजाएवअश्वा वाहनानि यस्य सतथोक्तः सपूषा एतन्नामकोदेवः यामनियामनि सर्वस्मिन् गमने भौमदिव्यलक्षणे नोस्माकं अविता पालयिता भवतु । किंच कन्यासु कमनीयासु अभिमतासु स्त्रीषु नोस्मानाभक्षत् आभजतां अस्माकं कन्याः प्रयच्छत्वित्यर्थः । भजेःसेवार्थाल्लेटि सिपि अडागमे रूपं । यद्वा अजाश्वःअजवाहनः पूषा सर्वस्य पोषयिता सोमः यामनियामनि याते प्राप्यते देवैरत्रेति यामोयज्ञः तत्र यज्ञे नोस्माकं अविता रक्षिता भवतु । तथा कन्यासु स्त्रीष्विष्टासु अस्मानाप्रापयतु ॥ १० ॥

१०. पूषा देवता का वाहन अज (बकरा) अथवा अश्व है। पूषा देवता हमारी सारी यात्राओं में रक्षक रहें। वे हमें कमनीय स्त्री (कन्या) दें। ॥ इति सप्तमस्य द्वितीये चतुर्दशोवर्गः ॥ १४ ॥

अथैकादशी—

अयंसोमःकपर्दिनेघृतंनपवतेमधु । आभक्षत्कन्यासुनः ॥ ११ ॥

अयम् । सोमः । कपर्दिने । घृतम् । न । पवते । मधु ।
आ । भक्षत् । कन्यासु । नः ॥ ११ ॥

कपर्दिने कल्याणमुकुटवते सोमाय पूष्णेवा तदर्थमयं मादयिताभिषुतोस्मदीयः सोमः पवते च गच्छति तं प्राप्नोति । तत्रदृष्टान्तः—घृतंन मधु मादकं हवीरूपं घृतं यथा सोमं पूषणं वा गच्छति तद्वत् । ततः सकन्यास्वस्मानागमयत ॥ ११ ॥

११. कपर्दी (कल्याण मुकुटवाले) पूषा के लिए हमारे सोम, मादक घृत के समान, क्षरित होते हैं। वे हमें कमनीय स्त्री (कन्या) दें।

अथ द्वादशी—

अयंतआघृणेसुतोघृतंनपवतेशुचि । आभक्षत्कन्यासुनः ॥ १२॥

अयम् । ते । आघृणे । सुतः । घृतम् । न । पवते । शुचि ।
आ । भक्षत् । कन्यासु । नः ॥ १२ ॥

हे आघृणे घृक्षरणदीप्त्योः सर्वतोदीप्यमान पवमान पूषन् वा ते त्वदर्थं सुतोभिषुतोयं सोमः पवते त्वदभिमुखमागच्छति । यद्वा त्वदर्थं पात्रेषु पवित्रेण पूतो भवति क्षरतिवा । तत्रदृष्टान्तः— घृतंन शुचि शुद्धं घृतं यथा त्वां प्राप्नोति तद्वत् ततस्त्वमभिलषितानि अस्माकं देहीति ॥ १२ ॥

१२. सर्वत्र दीप्तिमान् पूषन्, तुम्हारे लिए अभिषुत सोम, शुद्ध घृत के समान क्षरित होते हैं। अथ त्रयोदशी—

वाचोजन्तुःकवीनांपवस्वसोमधारया । देवेषुरत्नधाअसि ॥ १३॥

वाचः । जन्तुः । कवीनाम् । पवस्व । सोम । धारया ।
देवेषु । रत्नऽधाः । असि ॥ १३ ॥

हे सोम कवीनां क्रान्तप्रज्ञानां स्तोतॄणां वाचोजन्तुः स्तुतेर्जनयिता । यद्वा मेधाविनां मध्ये वाचं जनयसि । अत्यन्तं वाग्मी त्वं धारया पवस्व द्रोणकलशं ग्रहांश्च प्राप्नुहि । ततः इन्द्रादिदेवेषु रत्नधाः रमणशीलस्य सोमस्य निधातासि भवसि । अथवा देवेषु स्तोत्रकारिषु कर्मकुर्वाणेषु वास्मासु रत्नस्य कनकादेर्दाता भवसि ॥ १३ ॥

१३. सोम, तुम स्तोताओं के स्तोत्र के जनक हो। तुम द्रोण-कलश को प्राप्त करो। देवों के लिए तुम रत्न आदि के दाता हो।

प्रावस्तोत्रेगाणगारिमतेनाभिरूपकरणे कलशेषु सोमे आसिच्यमाने वक्तव्यस्य तृचस्य आकलशेष्वित्यादिके द्वितीयातृतीये । सूत्रितंच—आकलशेषुधावतिश्येनोवर्मविगाहतेइति ।

तयोः प्रथमा सूक्ते चतुर्दशी—

आकलशेषुधावतिश्येनोवर्मविगाहते । अभिद्रोणाकनिक्रदत् ॥ १४॥

आ । कलशेषु । धावति । श्येनः । वर्म । वि । गाहते ।
अभि । द्रोणा । कनिक्रदत् ॥ १४ ॥

ऋत्विग्भिरभिषिच्यमानः कश्चित्सोमः कलशेषु सोमाधारेषु द्रोणकलशेषु आधावति सर्वतोगच्छति श्येनः लुप्तोपमेतत् । यथा श्येनोवर्म वरणीयं कुलायं विगाहते प्रविशति तद्वत् ।

कनिक्रदत् अत्यन्तं शब्दं कुर्वन् द्रोणा द्रोणकलशानभिगच्छतिच। यद्वा द्रोणाधवनीयपूतभृत् संज्ञकाभिषायं एकः सिच्यमानः सोमोद्रोणं प्रति शब्दायमानः पश्चात् प्रथमंगच्छति । ततः पात्रद्वयमिति ॥ १४ ॥

१४. अभिषुत सोम उसी प्रकार शब्द करते हुए द्रोण-कलश की ओर जाते हैं, जैसे श्येन पक्षी (बाज) अपने घोंसले को जाता है।

परिप्रसोमतेरसोऽसर्जिकलशेसुतः । श्येनोनतक्तोअर्षति ॥१५॥१५॥

परि । प्र । सोम । ते । रसः । असर्जि । कलशे । सुतः ।
श्येनः । न । तक्तः । अर्षति ॥ १५ ॥ १५ ॥

हे सोम कलशे द्रोणाभिधाने सुतोभिषुतस्ते तव रसः परिप्रासर्जि परिप्रसृज्यते परितोग्रहेषु चमसेषु च प्रसृष्टोविभक्तोभवति। कथमिव श्येनोनतक्तः तक्तिर्गतिकर्मा गमनशीलः श्येनः पक्षीयथा सर्वत्रार्षति गच्छति तद्वत् यद्वा यथा श्येनः सर्वतोगन्ता तद्वत्तक्तः पात्रेषु गतः सोमः अर्षति इन्द्रादिदेवानागच्छत्। अर्तेर्लेटि सिपि रूपं । पूर्वसृपीगत्वावित्यस्माद् लटि शपि रूपम् ॥ १५ ॥

१५. सोम तुम्हारा अभिषुत रस, सर्वत्रगन्ता, श्येन पक्षी के समान चमसों में फैलता है।

॥ इति सप्तमस्य द्वितीये पंचदशोवर्गः ॥ १५ ॥

पवस्वसोममन्दयन्निन्द्रायमधुमत्तमः ॥ १६ ॥

पवस्व । सोम । मन्दयन् । इन्द्राय । मधुमत्ऽतमः ॥ १६ ॥

हे सोम मधुमत्तमः अतिशयेनमधुररसवांस्त्वं मन्दयन् मादयिता भवन्। यद्वा इन्द्राय क्रियाग्रहणंकर्तव्यमिति संप्रदानं इन्द्रं मोदमानः सन् पवस्व इन्द्रार्थमागच्छ ॥ १६ ॥

१६. सोम, तुम अतीव मधुर रसवाले और मादक हो। इन्द्र को प्रसन्न करने के लिए आओ। अथ सप्तदशी—

असृग्रन्देववीतयेवाजयन्तोरथाइव ॥ १७ ॥

असृग्रन् । देवऽवीतये । वाजऽयन्तः । रथाःऽइव ॥ १७ ॥

एतेभिषुताः सोमाः वाजयन्तः सन्तः देववीतये देवानांपानाय असृग्रन् विसृज्यंते ऋत्विग्भिः प्रदीयन्ते । तत्रदृष्टान्तः—रथाइव वाजयन्तः शत्रुधनानि बलानिवा स्वामिनइच्छन्तो रथा देववीतये देवानांगमनाय यथा विसृज्यन्ते तद्वत् ॥ १७ ॥

१७. अन्नवान् और अभिषुत सोम को देवों के लिए ऋत्विक् लोग देते हैं। ये सोम रथ के समान शत्रुओं की सम्पत्ति का हरण करनेवाले हैं।

अथाष्टादशी—

तेसुतासोमदिन्तमाःशुक्रावायुमसृक्षत ॥ १८ ॥

ते । सुतासः । मदिन्ऽतमाः । शुक्राः । वायुम् ।
असृक्षत ॥ १८ ॥

मदिन्तमः अतिशयेन मादयितारः शुक्राः दीप्यमानाः सुतासः अभिषुतास्तेसोमाः वायुं शब्दमसृक्षतासृजन्नकार्षुः। यद्वा वायुमेवसोमपानार्थमसृजन् सोमेषु सत्सु वायुस्तत्पानार्थमागच्छति ॥ १८ ॥

१८. अतीव मदकर, दीप्त और अभिषुत सोम ने सोमरस के पान के लिए वायु को बनाया। अथैकोनविंशी—

ग्राव्णातुन्नोअभिष्टुतःपवित्रंसोमगच्छसि । दधत्स्तोत्रेसुवीर्यम्॥१९॥

ग्राव्णा । तुन्नः । अभिऽस्तुतः । पवित्रम् । सोम । गच्छसि ।
दधत् । स्तोत्रे । सुऽवीर्यम् ॥ १९ ॥

हे सोम त्वं ग्राव्णातुन्नः अभिपीडितोभिषुतस्त्वं स्तोतृभिरभिष्टुतः सन् पवित्रं गच्छसि प्राप्नोषि। किंकुर्वन् स्तोत्रे स्तोत्रकारिणे जनाय सुवीर्यं शोभनवीर्योपेतं धनादिकं दधत् विधद्दत् प्रयच्छन्॥ १९ ॥

१९. सोम, तुम पत्थरों से अभिषुत होकर स्तोता को शोभन शक्तिवाले धन आदि देते हुए दशापवित्र की ओर जाते हो।

एषतुन्नोअभिष्टुतःपवित्रमतिगाहते । रक्षोहावारमव्ययम्॥२०॥१६॥

एषः । तुन्नः । अभिऽस्तुतः । पवित्रम् । अति । गाहते ।
रक्षःऽहा । वारम् । अव्ययम् ॥ २० ॥ १६ ॥

तुन्नः तुदव्यथने ग्रावभिरभिव्यथितः सुतः अतएव सर्वैरभिष्टुतः एषोस्मदीयः सोमोरक्षोहा कर्मविघ्नकारिणां रक्षसां पापानांच हन्ता भवत्।अव्ययमविमयं अव्यवयवभूतं वारं वालं तेनकृतं पवित्रं दशापवित्रमति अतिक्रम्य गाहते द्रोणकलशं प्रविशति ॥ २० ॥

२०. पत्थरों से अभिषुत और सबके द्वारा स्तुत सोम राक्षसों के बधिक हों। मेषलोममय दशापवित्र को लाँघकर वे द्रोणकलश में जाते हैं।

॥ इति सप्तमस्य द्वितीये षोडशोवर्गः ॥ १६ ॥

अथैकविंशी—

यदन्तियच्चदूरकेभयंविन्दतिमामिह । पवमानवितज्जहि ॥२१॥

यत् । अन्ति । यत् । च । दूरके । भयम् । विन्दति । माम् ।
इह । पवमान । वि । तत् । जहि ॥ २१ ॥

हे पवमान पूयमान पुनान वा सोम यद्भयमन्ति अन्तिके तथा यच्च भयं दुरके अतिदूरे देशे अथवा इहास्मिन् प्रदेशेपि भयं मां विन्दति लभते प्राप्नोति । तद्भयं त्वं विजहि विशेषेण नाशय । यद्वा इहेति यज्ञोयंलोकोवा अस्मिन् क्रियमाणेयज्ञे अस्मिन् लोकेवा यद्भयं व्याप्नोति तन्नाशयेत्यर्थः ॥ २१ ॥

२१. क्षरणशील सोम, जो भय दूर में है, जो पास में है और जो यहाँ है, उसे भली भाँति विनष्ट करो।

पवमानःसोअद्यनःपवित्रेणविचर्षणिः । यःपोतासपुनातुनः ॥ २२ ॥

पवमानः । सः । अद्य । नः । पवित्रेण । विऽचर्षणिः ।
यः । पोता । सः । पुनातु । नः ॥ २२ ॥

सतादृशः प्रसिद्धोविचर्षणिः सर्वस्यद्रष्टा पवमानः अद्येदानीमेव पवित्रेण पापशोधकेन तेजसा यःपोता स्वयं पवित्रःसन् सनोस्मान् पुनातु पापरहितान् करोतु ॥ २२ ॥

२२. सबके द्रष्टा, क्षरणशील और [illegible] पवित्र के द्वारा शोधित सोम हमें पवित्र करें।

पवित्रेष्टचां प्रथमाज्यभागस्य याज्या यत्तेपवित्रमित्येषा । सूत्रितंच—यत्तेपवित्रमर्चिष्याकलशेपुधावतीति पवित्रइत्येकइति ।

सैषा सूक्ते त्रयोविंशी—

यत्तेपवित्रमर्चिष्यग्नेवितततमन्तरा । ब्रह्मतेनपुनीहिनः ॥ २३ ॥

यत् । ते । पवित्रम् । अर्चिषि । अग्ने । विऽततम् ।
अन्तः । आ । ब्रह्म । तेन । पुनीहि । नः ॥ २३ ॥

हे पवमानगुणविशिष्टाग्ने ते त्वदीयं पवित्रं शोधकं यत्स्वतेजः अर्चिषि सौरवैद्युतादितेजसि अन्तर्मध्ये आविततं आविस्तृतं विद्यते । यद्वा हे अग्ने ते तव स्वभूतेर्चिषि तेजसि

अन्तर्मध्ये यत्पवित्रं शुद्ध्युत्पादकं सामर्थ्यमस्ति तेन तादृशेन तेजसा नोस्माकं ब्रह्म पुत्रादिवर्धनकारि शरीरं पुनीहि पापरहितं पूतं कुरु ॥ २३ ॥

२३. क्षरणशील अग्नि, तुम्हारी जो तेज के बीच में शुद्धिकर सामर्थ्य है, उससे हमारे पुत्रादि वर्द्धक शरीर को पवित्र करो।

यत्तेपवित्रमर्चिषदग्नेतेनपुनीहिनः । ब्रह्मसवैःपुनीहिनः ॥ २४ ॥

यत् । ते । पवित्रम् । अर्चिऽवत् । अग्ने । तेन । पुनीहि ।
नः । ब्रह्मऽसवैः । पुनीहि । नः ॥ २४ ॥

हे अग्ने पवित्रं शोधकमर्चिषदार्चिमत् छन्दसीरइतिमतुपोवत्वं सौरादितेजोयुक्तं ते त्वदीयं यत्तेजः विद्यते तेन स्वीयेनैव तेजसा नोस्मान् पुनीहि पूतान् कुरु । किंच ब्रह्मसवैः ब्राह्मणकर्तृकसोमाभिषवैः यद्वा ब्रह्म सोमः तस्याभिषवैः नोस्मान् पुनीहि ॥ २४ ॥

२४. अग्नि, तुम्हारा जो शोधक और सूर्य आदि के तेज से युक्त तेज है, उससे हमें पवित्र करो। सोमाभिषव से हमें पवित्र करो।

उभाभ्यांदेवसवितःपवित्रेणसवेनच । मांपुनीहिविश्वतः ॥२५॥१७॥

उभाभ्याम् । देव । सवितरिति । पवित्रेण । सवेन ।
च । माम् । पुनीहि । विश्वतः ॥ २५ ॥ १७ ॥

हे सवितः सर्वस्य प्रेरक हे देव द्योतमान सोम त्वं पवित्रेण पापशोधकेन त्वदीयेन तेजसा सवेन सोमाभिषवेनच एताभ्यामुभाभ्यां विश्वतः सर्वतोमां पुनीहि पूतं कुरु॥ २५ ॥

२५. सबके प्रेरक और प्रकाशमान सोम, तुम अपने पाप-शोधक तेज और अभिषव से चारों ओर से मुझे पवित्र करो।

॥ इति सप्तमस्य द्वितीये सप्तदशोवर्गः ॥ १७ ॥

अथ षड्विंशी—

त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैःसोमधामभिः । अग्नेदक्षैःपुनीहिनः ॥२६॥

त्रिऽभिः । त्वम् । देव । सवितः । वर्षिष्ठैः । सोम । धामऽभिः ।
अग्ने । दक्षैः । पुनीहि । नः ॥ २६ ॥

हे देव स्तुत्य दीप्यमान वा हे सवितः सर्वस्य स्वस्वकर्मणि चोदयितः हे सोम पवमानगुणविशिष्ट हे अग्ने त्वं वर्षिष्ठैः वृद्धतमैः अतएव दक्षैः सामर्थ्यवद्भिस्त्रिभिर्धामभिः शरीरैरग्निवायुसूर्यात्मकैस्त्रिभिः शरीरैः नोस्मान्पुनीहि परिशुद्धान् कुरु ॥ २६ ॥

२६. देव, सबके प्रेरक और क्षरणशील अग्नि, तुम वृद्धतम और सामर्थ्यवाले तीन (अग्नि, वायु और सूर्य के) शरीरों से शुद्ध करो।

पुनन्तुमांदेवजनाःपुनन्तुवसवोधिया ।
विश्वेदेवाःपुनीतमाजातवेदःपुनीहिमा ॥ २७ ॥

पुनन्तु । माम् । देवऽजनाः । पुनन्तु । वसवः । धिया । विश्वे । देवाः । पुनीत । मा । जातऽवेदः । पुनीहि । मा ॥ २७ ॥

देवजनाः देवानां जनःप्रादुर्भावोयेषां यज्ञेष्विति देवजनायजमानाः । यद्वा इन्द्रादिदेवगणाः मां पुनन्तु परिपूतं कुर्वन्तु । तथा वसवः वासकादेवाः धिया आत्मीयेनकर्मणा मां पुनन्तु । अथवा प्रत्यक्षः हे विश्वदेवाः सर्वेदेवाः मा मां पुनीत पूतं कुरुत । हे जातवेदः जातानि वेत्तीति यद्वा जातप्रज्ञ अग्ने मा मां पुनीहि ॥ २७ ॥

२७. इन्द्रादि देव मुझे पवित्र करें। वसु देवता हमें अपने कर्मों से पवित्र करें। सब देवता मुझे पवित्र करें। जात-बुद्धि अग्नि, मुझे पवित्र करो।

अथाष्टाविंशी—

प्रप्यायस्वप्रस्यन्दस्वसोमविश्वेभिरंशुभिः । देवेभ्यउत्तमंहविः ॥२८॥

प्र । प्यायस्व । प्र । स्यन्दस्व । सोम । विश्वेभिः । अंशुऽभिः । देवेभ्यः । उत्ऽतमम् । हविः ॥ २८ ॥

हे सोम प्रप्यायस्व अस्मान् प्रकर्षेण वर्धय । यद्वा देवान् सोमेन वर्धय । किंच विश्वेभिरंशुभिः सर्वैस्त्वदीयैरंशुभिः देवेभ्योदेवार्थमुत्तमं प्रशस्ततमंहविः सोमरूपं प्रस्यंदस्व कलशादीन् प्रति प्रस्रव प्रयच्छेति यावत् ॥ २८ ॥

२८. सोम हमें भली भाँति बढ़ाओ। अपनी सारी किरणों से देवों को उत्तम हविरूप सोमरस दो।

अग्नीषोमप्रणयने उपप्रियमित्येषा । सूत्रितंच—उपप्रियंपनिमतमित्यर्धर्चआरभेदिति ।

सैषा सूक्ते एकोनत्रिंशी—

उपप्रियंपनिमतंयुवानमाहुतीवृधम् । अगन्मबिभ्रतोनमः ॥२९॥

उप । प्रियम् । पनिमतम् । युवानम् । आहुतिऽवर्धम् ।
अगन्म । बिभ्रतः । नमः ॥ २९ ॥

प्रियं सर्वस्य प्रीणयितारं पनिमतमत्यन्तं शब्दायमानं युवानं तरुणमाहुतीवृधं आहुतिभिर्वर्धनीयं पवमानं वयं नमोहविर्नमस्कारंवा बिभ्रतोधारयन्तःसन्तः उपागन्म उपगच्छेम । गमेर्लुङि मंत्रेघसेतिच्लेर्लुकि सति म्वोश्चेतिनकारः । पनिमतं पनेःस्तुत्यर्थस्य यङ्लुकिरूपं दाधर्तिदर्धर्तिइतिसूत्रे इतिकरणस्य प्रदर्शनार्थत्वादत्राभ्यासस्य निगागमउपधालोपश्च निपात्यते ॥ २९ ॥

२९. सोम, सबको प्रसन्न करनेवाले, शब्द करनेवाले, तरुण, आहुतियों के द्वारा वर्द्धनीय और क्षरणशील हैं। नमस्कार करते हुए उनके पास हम जाते हैं।

अथ त्रिंशी—

अलाय्यस्यपरशुर्ननाशतमापवस्वदेवसोम । आखुंचिदेवदेवसोम ॥ ३० ॥

अलाय्यस्य । परशुः । ननाश । तम् । आ । पवस्व । देव ।
सोम । आखुम् । चित् । एव । देव । सोम ॥ ३० ॥

अलाय्यस्य अर्तेरौणादिकआय्यप्रत्ययः कपिलकादित्वाल्लत्वं अभिगमनशीलस्य शत्रोः परशुः छेदकः पवमानस्तमेवशत्रुं ननाश नाशयतु । अस्मानपापान् ततोहे देव दीप्यमान सोम आपवस्व अस्मदाभिमुख्येन गच्छ । किंच हे देव द्योतमान स्तुत्य वा हे सोम आखुंचित् खनु अवदारणे सर्वस्याहन्तारमपि तं शत्रुमेव बाधस्व नास्मानपापानिति ॥ ३० ॥

३०. सबके आक्रमणकारी शत्रु का परशु नष्ट हो। दीप्यमान सोम, हमारे लिए क्षरित होओ। सबके हन्ता उस शत्रु को मारो।

अथैकत्रिंशी—

यःपावमानीरध्येत्यृषिभिःसंभृतंरसम् ।
सर्वंसपूतमश्नातिस्वदितंमातरिश्वना ॥ ३१ ॥

यः । पावमानीः । अधिऽएति । ऋषिऽभिः । सम्ऽभृतम् । रसम् ।
सर्वम् । सः । पूतम् । अश्नाति । स्वदितम् । मातरिश्वना ॥ ३१ ॥

योजनः पावमानीः पवमानदेवताकाः सर्वाऋचः सद्रूपं ऋषिभिः सूक्तद्रष्टृभिर्मधुच्छन्दःप्रभृतिभिः संभृतं संपादितं रसं वेदरसभूतं सारं सूक्तसंघं अध्येति अधीते । सजनः सर्वभोज्यजातं पूतं परिशुद्धमेवाश्नाति परिपूतं पापरहितं अन्नं भक्षयति । कथमस्यपूतत्वं तत्राह—स्वस्या-

शनात्प्रागेव मातरिश्वना मातरि अन्तरिक्षे श्वसितीति मातरिश्वा वायुः सचवायुःपवित्रमेव। पवित्रेण वायुना स्वदितं स्वादूकृतं। परिपूतमेवान्नं पश्चात् सनरोश्नाति ॥ ३१ ॥

३१. जो मनुष्य पवमान सोम देवता के ऋषियों के द्वारा सम्पादित वेदरसरूप सार (सूक्त-समूह) को पढ़ता है, वह ऐसे पाप-शून्य अन्न का भक्षण करता है, जिससे वायुदेव पवित्र कर चुके हैं।

पावमानीर्योऽअध्येत्यृषिभिःसंभृतंरसम्।
तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधूदकम् ॥ ३२ ॥ १८ ॥

पावमानीः। यः। अधिऽएति। ऋषिऽभिः। सम्ऽभृतम्। रसम्। तस्मै। सरस्वती। दुहे। क्षीरम्। सर्पिः। मधु। उदकम् ॥३२॥१८॥

योब्राह्मणः पावमानीः पवमानदेवताकाऋचः तदात्मकं ऋषिभिर्मधुच्छन्दआदिभिः संभृतंरसं वेदसारं सूक्तसंघं अध्येति अधीते। तस्मै पवमानाध्ययनं कुर्वते जनाय सरस्वतीसर्वत्रसरणवती वाग्देवता क्षीरं यज्ञसाधनभूतं पयः सर्पिस्तादृशं घृतं मधु मदकरमुदकं सोमं दुहे स्वयमेव दोग्धि एनं नरं यागादिपरं वेदशास्त्रविदं करोतीत्यर्थः। दुहप्रपूरणे कर्मकर्तरि नदुहस्नुनमांयक्चिणावितियकः प्रतिषेधः। लोपस्तआत्मनेपदेष्विति तलोपः ॥ ३२ ॥

३२. जो ब्राह्मण पवमान सोम देवता के ऋषियों के द्वारा सम्पादित वेदरसरूप सार (सूक्त-समूह) को पढ़ता है, उसके लिए सरस्वती (वाग्देवता) स्वयं क्षीर, घृत और मदकर सोम का दोहन करती है।

॥ इति सप्तमस्य द्वितीयेष्टादशोवर्गः ॥ १८ ॥

॥ इति नवमे मण्डले तृतीयोनुवाकः ॥ ३ ॥

चतुर्थेनुवाके अष्टादशसूक्तानि तत्र प्रदेवमितिदशर्चं प्रथमं सूक्तं भलंदनपुत्रस्य वत्सप्रेरार्षं पवमानसोमदेवताकं दशमी त्रिष्टुप् शिष्टाजगत्यः। तथाचानुक्रम्यते—प्रदेवंदशवत्सप्रिर्भालंदनः त्रिष्टुबन्तंहेति। गतोविनियोगः।

तत्र प्रथमा—

प्रदेवमच्छामधुमन्तइन्दवोसिष्यदन्तगावआनधेनवः।
बर्हिषदोवचनावन्तऊर्धभिःपरिस्रुतमुस्रियानिर्णिजंधिरे ॥ १ ॥

प्र। देवम्। अच्छ। मधुऽमन्तः। इन्दवः। असिस्यदन्त। गावः। आ। न। धेनवः। बर्हिऽसदः। वचनाऽवन्तः। ऊर्धऽभिः। परिऽस्रुतम्। उस्रियाः। निःऽनिजम्। धिरे ॥ १ ॥

मधुमन्तो मादकरससंयुक्ता इन्दवः सोमाः देवं द्योतमानं सोमात्मकमिंद्रं अच्छ प्रति प्रासिष्यदन्त प्रस्यन्दन्ते ग्रहादिषु क्षरन्ति। स्यन्देर्लुङि चङि रूपं। तत्रदृष्टान्तः—गावआनधेनवः पयस्विन्यः प्रीणयित्र्योगावोयथावत्संप्रतियांतिप्रस्रवन्ति तद्वत्। किंच बर्हिषदः बर्हिषि सीदन्तः वचनावन्तः हंभारवादिशब्दवन्तः उस्रियाः गोनामैतत् तादृश्योगावः ऊधभिः पयोधारकैः स्वैः स्वैरूधभिः ताभ्यः परिस्रुतं परितःस्रवणशीलं निर्णिजं शुद्धं पयोभूतं सोमरसं धिरे दधिरे इंद्रार्थं धारयन्ति ॥ १ ॥

१. आनन्ददायिनी गौओं के समान मादक सोम इन्द्र के लिए क्षरित होते हैं। "हम्बा" शब्द करती हुई और कुशों पर बैठी हुई दुग्धदात्री गायें चारों ओर बहनेवाले और शुद्ध सोमरस को, इन्द्र के लिए, धारण करती हैं।

सरोरुवदभिपूर्वीरचिक्रददुपारुहः श्रथयन्त्स्वादते हरिः।
तिरःपवित्रंपरियन्नुरुज्रयोनिशर्याणिदधतेदेवआवरम्॥२॥

सः। रोरुवत्। अभि। पूर्वीः। अचिक्रदत्। उपऽआरुहः। श्रथयन्। स्वादते। हरिः। तिरः। पवित्रम्। परिऽयन्। उरु। ज्रयः। नि। शर्याणि। दधते। देवः। आ। वरम्॥ २॥

रोरुवत् कलशादिकंप्रति अत्यन्तं शब्दंकुर्वन् ससोमः पूर्वामुख्याः स्तोतॄणां स्तुतीः अभ्यचिक्रदत् अभिमुखं अध्वनयत् स्तुतयः साधीयस्यइति प्रतिध्वनिमंगीकारमकार्षीदित्यर्थः। किंच हरिः हरितवर्णः उपारुहः रोहतेस्ताच्छीलिकःक्विप्। उपारोहणशीलाःऊर्ध्वमादुर्भवनशीला ओषधीः श्रथयन् अग्रे विश्लेषयन् स्वादते स्वादूकरोति ताः फलिनीःकुर्वन् स्वादुयुक्ता विदधातीत्यर्थः। तथा पवित्रं अविवालात्मकं दशापवित्रं तिरस्तिरस्कृत्य पात्राणि प्रति आत्मनः क्षरणकाले पवित्रं व्यवधायकं कृत्वा परियन् परितोगच्छन् सोमः उरु महान्तं ज्रयोवेगं करोति। ततः सशर्याणि शृहिंसायां हिंसितव्यानि यद्वा शरेण हंतव्यानि रक्षांसि निदधते निक्षिपति न्यक्करोति हिनस्तीतियावत्। पश्चाद्देवोदीप्यमानःसोमः वरं वरणीयं धनं सोमं दातृभ्योयजमानेभ्यः आदधते आधारयति प्रयच्छतीत्यर्थः। दधातेर्लेटचडागमे घोर्लोपोलेटिवेत्याकारलोपः॥२॥

२. शब्द करते और स्तोताओं की मुख्य स्तुतियों को सुनते हुए हरितवर्ण सोम ऊपर चढ़नेवाली ओषधियों (लताओं) को फलसंयुक्ता करके स्वादिष्ठ करते और मेषलोममय दशापवित्र से होकर बड़े वेग से बहते हैं। वे राक्षसों को मारते हैं। अनन्तर सोमदेव यजमानों को श्रेष्ठ धन देते हैं।

वियोमभेयम्यासंयतीमदःसाकंवृधापर्यसापिन्वदक्षिता।
महीअपारेरजसीविवेविददभिव्रजन्नक्षितंपाजआददे॥ ३॥

वि । यः । ममे । यम्या । संयती इति सम्ऽयती । मदः । साकम्ऽवृधा ।
पयसा । पिन्वत् । अक्षिता । मही इति । अपारे इति । रजसी इति ।
विऽवेविदत् । अभिऽव्रजन् । अक्षितम् । पाजः । आ । ददे ॥ ३ ॥

योमदः माद्यत्यनेनेति मदः सोमरसः यम्या युगलभूते संयती परस्परंसंगच्छमाने द्यावापृथिव्यौ विममे विशेषेणनिर्मितवान् ततः ते साकंवृधा सहैववर्धनशीले तथा अक्षिता अक्षीणे सामर्थ्यवत्यौ यथा भविष्यतः तथा ससोमः पयसा पयोरूपेण स्वीयरसेन पिन्वदसिंचत् अवर्धयदितियावत् । किंच मही महत्यौ अतएव अपारे पर्यंतरहिते रजसी द्यावापृथिवीनामैतद् ते द्यावापृथिव्यौ विवेविदत् विदज्ञाने यङ्लुकि शतरि रूपं । अभ्यासस्वरः । इयंपृथिवी इयंद्यौरिति सर्वेषां विविध्य तेजसापज्ञापयन् अभिव्रजन् अभितः सर्वतोगच्छन् सोमः अक्षितं अक्षीणं अविनश्वरं पाजोबलं आददे स्वीकृतवान् अत्यन्तंबलवानभवदित्यर्थः ॥ ३ ॥

३. सोम ने साथ रहनेवाली द्यावापृथिवी को बनाया। उन्हें वर्द्धनशील और सामर्थ्यवाली करने के लिए सोम ने अपने रस से सींचा। महती और असीम द्यावापृथिवी को ज्ञात कराकर और चारों ओर जाते हुए सोम ने अविनाशी बल प्राप्त किया। अथ चतुर्थी—

समातरा विचरन्वाजयन्नपः प्रमेधिरः स्वधया पिन्वते पदम् ।
अंशुर्यवेन पिपिशे यतो नृभिः संजामिभिर्नसते रक्षते शिरः ॥ ४ ॥

सः । मातरा । विऽचरन् । वाजयन् । अपः । प्र । मेधिरः । स्वधया । पिन्वते । पदम् । अंशुः । यवेन । पिपिशे । यतः । नृऽभिः । सम् । जामिऽभिः । नसते । रक्षते । शिरः ॥ ४ ॥

मेधिरः मेधारथाभ्यामिरन्निरचावितीरन्प्रत्ययोमत्वर्थीयः । मेधावान् प्राज्ञः ससोमः मातरा मातरौ जगतोनिर्मात्र्यौ द्यावापृथिव्यौ विचरन् अन्तरेणात्यन्तं चरन् । तथा अपः अन्तरिक्षस्थितान्युदकानि वाजयन् प्रेरयन् । वजेर्ण्यन्तस्य शतरि रूपं । तादृशः स्वधया सक्तुलक्षणेनान्नेन सह पदं स्वस्थानं उत्तरवेदिरूपं प्रपिन्वते प्रकर्षेणाप्याययति । ततः नृभिः कर्मनेतृभिः ऋत्विग्भिर्यतः संयतः अंशुः सोमः यवेन पिपिशे पिश अवयवे अवयवत्वेन छतः मिश्रितइत्यर्थः । सोमस्तु यवसक्तुभिः श्रियतेखलु । सोयं जामिभिः एकस्मात्पाणेरुत्पन्नाभिरंगुलीभिः सन्नसतेसंगच्छतेच । शिरः शीर्णं भूतजातं रक्षतेच स्वीयरसेन रक्षति पोषयति । नसतिर्गतिकर्मा चादिलोपेविभाषेति न निघातः ॥ ४ ॥

४. प्राज्ञ सोम द्यावापृथिवी में विचरण करते हुए और अन्तरिक्ष के जल को भेजते हुए अन्न के साथ, अपने स्थान (उत्तर वेदी) को आप्यायित करते हैं। अनन्तर ऋत्विकों के द्वारा सोम जौ में (जौ के सत्तू में) मिलाये जाते हैं। वे अंगुलियों का समागम पाते और प्राणियों की रक्षा करते हैं।

अथ पञ्चमी—

संदक्षेणमनसाजायतेकविर्ऋतस्यगर्भोनिहितोयमापरः ।
यूनांहसन्तांप्रथमंविजज्ञतुर्गुहाहितंजनिमनेमुद्यतम् ॥५॥१९॥

सम् । दक्षेण । मनसा । जायते । कविः । ऋतस्य । गर्भः । निऽहितः । यमा । परः । यूनां । ह । सन्तां । प्रथमम् । वि । जज्ञतुः । गुहा । हितम् । जनिम । नेमम् । उत्ऽयतम् ॥ ५ ॥ १९ ॥

प्रसंगात्सोमसूर्ययोराविर्भावमाह । कविः दक्षेण प्रवृद्धेन मनसा सह संजायते पृथिव्याः सम्यक् जायते । तथा ऋतस्योदकस्येव गर्भो गर्भस्थानीयः । यद्वा सत्यस्य यज्ञस्य मध्ये गर्भः शब्दनीयः स्तुत्यः सएवसोमः परः परस्तादन्तरिक्षे यमोयमेन नियमेन देवैर्निहितः सः सूर्याद्धि वृष्टिर्भवति तस्मात्सोमः सूर्यात्मकतयावस्थितइत्यर्थः । एवं यूना । हेत्यवधारणे । युवानावेव सन्तौ तौ प्रथमं जननकाले विजज्ञतुः अयंसोमोयंसूर्यइति विशेषेण ज्ञायते । तयोश्चार्धं जनिम जन्म गुहा गुहायां हितं निहितं भवति । तयोर्नेममर्धंचोद्यतं प्रकाशितं भवति । दिवा सूर्यःप्रादुर्भवति रात्रौ चन्द्रमाइति ॥ ५ ॥

५. प्रवृद्ध मन से कार्य-कुशल सोम पृथिवी पर जन्म ग्रहण करते हैं। सोम यज्ञ में स्तुत्य हैं। ये देवों के द्वारा नियम से रक्खे गये हैं—सूर्य-रूप से अवस्थित हैं। युवा सोम और सूर्य उत्पत्तिकाल में विशेष रूप से जन्म ग्रहण करते हैं। उनमें एक गुहा में संस्थापित हैं; दूसरे प्रकाशित होते हैं।

॥ इति सप्तमस्य द्वितीये एकोनविंशोवर्गः ॥ १९ ॥

अथ षष्ठी—

मन्द्रस्यरूपंविविदुर्मनीषिणःश्येनोयदन्धोअभरत्परावतः।
तंमर्जयन्तसुहृधंनदीष्वाँउशन्तंमंशुंपरियन्तमृग्मियम्॥६॥

मन्द्रस्य । रूपम् । विविदुः । मनीषिणः । श्येनः । यत् । अन्धः । अभरत् । पराऽवतः । तम् । मर्जयन्त । सुऽहृधम् । नदीषु । आ । उशन्तम् । अंशुम् । परिऽयन्तम् । ऋग्मियम् ॥ ६ ॥

मनीषिणः प्राज्ञा यष्टारः मंद्रस्य मदकरस्य रसस्य सोमस्य रूपं विविदुः जानन्ति यदन्धः यत्सोमलक्षणमन्नं श्येनो गायत्रीरूपः पक्षी परावतो दूराद् द्युलोकाद् आभरत्प्रजहार । हग्रहोर्भश्छन्दसीति भकारः । तं तादृशं सुवृधं सुष्ठुवर्धमानं सुवर्धयितारंवा अंशुं सोमं नदीषु

नदमानासु वसतीवर्याख्यास्वप्सु आमर्जयन्त ऋत्विजः आशोधयन्ति अलंकुर्वन्तिवा । कीदृशं उशन्तं देवान् कामयमानं परियन्तं परितोगच्छन्तं ऋग्मियं ऋगर्हं स्तुत्यं सोममामर्जयन्तीति ॥ ६ ॥

६. विद्वान् लोग मदकर सोमरस का स्वरूप जानते हैं। सोम-रूप अन्न को (प्राण-दायिनी शक्ति को) गायत्री-रूप पक्षी दूर—द्युलोक से लाया था। वैसे भली भांति वर्द्धमान, किरण-रूप, देवकामी, चारों ओर जानेवाले और स्तुत्य सोम को ऋत्विक् लोग वसतीवरी-जल में परिमार्जित करते हैं।

त्वांमृंजन्तिदशयोर्षणःसुतंसोमंऋषिभिर्मतिभिर्धीतिभिर्हितम् ।
अव्योवारेभिरुतदेवहूतिभिर्नृभिर्यतोवाजमादर्षिसातये ॥७॥

त्वाम् । मृजन्ति । दश । योषणः । सुतम् । सोमं । ऋषिऽभिः । मतिऽभिः । धीतिऽभिः । हितम् । अव्यः । वारेभिः । उत । देवहूतिऽभिः । नृऽभिः । यतः । वाजम् । आ । दर्षि । सातये ॥ ७ ॥

हे सोम योषणः द्वाभ्यांपाणिभ्यां विभज्योत्पन्ना दश दशसंख्याकाअंगुलयः । ऋषिभिर्मंधुच्छन्दःप्रभृतिभिः सुतमभिषुतं हितं पात्रेषु निहितं त्वा त्वां मतिभिः स्तुतिभिः धीतिभिः कर्मभिश्च अव्योवारेभिः अविवालैः पवित्रैः मृजन्ति शोधयन्ति । उतापिच देवहूतिभिः । देवाह्वानयुक्तैः नृभिः कर्मनेतृभिः ऋत्विग्भिः यतः गृहेषु संयमितः संगृहीतस्त्वं सातये दानाय वाजमन्नमादर्षि आविदारयसि विवृतंकरोषि स्तोतृभ्यः अन्नादिकं प्रयच्छसीतियावत् ॥ ७ ॥

७. सोम, दोनों हाथों से उत्पन्न, ऋषियों के द्वारा पात्र में निहित और अभिषुत तुम्हें दस अंगुलियां स्तुतियों और कर्मों के द्वारा मेषलोममय पवित्र (छलनी) पर परिमार्जित करती हैं। देवों को बुलानेवाले कर्म-निष्ठ ऋत्विकों के द्वारा गृह में संगृहीत तुम स्तोताओं को अन्न देते हो।

परिप्रयन्तंवय्यंसुषंसदंसोमंमनीषाअभ्यनूषतस्तुभः ।
योधारयामधुमाँऊर्मिणादिवइयर्तिवाचंरयिषाळमर्त्यः॥८॥

परिऽप्रयन्तम् । वय्यम् । सुऽसंसदम् । सोमम् । मनीषाः । अभि । अनूषत । स्तुभः । यः । धारया । मधुऽमान् । ऊर्मिणा । दिवः । इयर्ति । वाचम् । रयिषाट् । अमर्त्यः ॥ ८ ॥

परिप्रयन्तं पात्राणिपरितः प्रगच्छन्तं वय्यं देवैः काम्यमानं सुषंसदं शोभनं संसदनं सोमं मनीषा मनसईशिन्यः स्तुभः स्तुतयः अभ्यनूषत अभिष्टुवन्ति । वय्यं वीगत्यादिषु इत्यस्माद् वयंति भय्यमवय्येचछन्दसीति निपातितः अत्रानुपसर्गस्यापिनिपातनंभवति

मधुमान् मदकररसवान् यः सोमः धारया स्वीयया ऊर्मिणा वसतीवर्याख्येनोदकेन सह दिवआकाशात् द्रोणकलशे आपतति रयिषाट् शत्रुधनानामभिभविता अमर्त्यः मनुष्यधर्मरहितः ससोमः वाचमियर्ति प्रेरयति तदाहि स्तोतारः स्तुवन्तीति उच्यन्ते ॥ ८ ॥

८. पात्रों में चारों ओर जाते हुए, देवों के द्वारा अभिलषित और शोभन स्थानवाले सोम की मनोगत स्तुतियाँ स्तोत्र करती हैं। मदकर रसवाले सोम, वसतीवरी-जल के साथ, आकाश से द्रोण-कलश में गिरते हैं। शत्रु-धन को जीतनेवाले और अमर सोम वचन को प्रेरित करते हैं।

अयंदिवइयर्तिविश्वमारजःसोमःपुनानःकलशेषुसीदति ।
अद्भिर्गोभिर्मृज्यतेअद्रिभिःसुतःपुनानइन्दुर्वरिवोविदत्प्रियम्॥९॥

अयम् । दिवः । इयर्ति । विश्वम् । आ । रजः । सोमः ।
पुनानः । कलशेषु । सीदति । अत्ऽभिः । गोभिः । मृज्यते ।
अद्रिऽभिः । सुतः । पुनानः । इन्दुः । वरिवः । विदत् । प्रियम् ॥ ९ ॥

अयंसोमो दिवोद्युलोकाद्विश्वं रजउदकनामैतत् सर्वमुदकमियर्ति अभिप्रापयति । किंच पुनानः दशापवित्रेण पूयमानः सोमः कलशेषु द्रोणनामसु सीदति । तथा अद्रिभिर्ग्रावभिः अद्भिर्वसतीवर्याख्याभिर्गोभिर्गोविकारैः क्षीरदध्यादिभिश्च मृज्यते शोध्यते अलंक्रियते । ततः सुतोभिषुतः पुनानः पूतइन्दुः सोमः प्रियं प्रियतरं प्रीणनकारिवा वरिवोवरणीयं धनं विदत् स्तोतृभ्योलंभयति प्रयच्छतीतियावत् ॥ ९ ॥

९. सोम द्युलोक से समस्त जल दिलाते हैं। फिर वे दशापवित्र में शोधित होकर कलश में जाते हैं। वे पत्थरों, वसतीवरी जल और दुग्ध आदि से अलंकृत होते हैं। अनन्तर अभिषुत और शोधित सोम प्रिय और श्रेष्ठ धन स्तोताओं को देते हैं।

एवानःसोमपरिषिच्यमानोवयोदधच्चित्रतमंपवस्व ।
अद्वेषेद्यावापृथिवीहुवेमदेवाधत्तरयिमस्मेसुवीरम् ॥ १० ॥२०॥

एव । नः । सोम । परिऽसिच्यमानः । वयः । दधत् । चित्रऽतमम् ।
पवस्व । अद्वेषे इति । द्यावापृथिवी इति । हुवेम । देवाः ।
धत्त । रयिम् । अस्मे इति । सुऽवीरम् ॥ १० ॥ २० ॥

अयं प्रत्यक्षकृतः हे सोम दधत् प्रयच्छंस्त्वं परिषिच्यमानः परितोद्भिर्गोभिर्वासिच्यमानः एव एवं चित्रतमं नानाविधं चायनीयतमं वा वयोन्नं नोस्मभ्यं पवस्व मापय प्रयच्छेति

यावत्। किंच अद्वेषे द्वेषरहिते द्यावापृथिवी द्यावापृथिव्यौ हुवेम हविःप्रदानार्थं वयमाह्वयेम। हेदेवाः यूयंच सुवीरं। वीरः कर्मणि समर्थः पुत्रः। तादृशपुत्रोपेतं रयिं धनमस्मे अस्मासु धत्त निधत्त ॥ १० ॥

१०. सोम, दाता तुम परिषिक्त होकर नानाविध अन्न हमें दो। द्वेष-शून्य द्यावापृथिवी को हम पुकारते हैं। देवो, हमें वीर पुत्र से युक्त धन दो।

॥ इति सप्तमस्य द्वितीये विंशोवर्गः ॥ २० ॥

इषुर्नेतिदशर्चं द्वितीयं सूक्तं आंगिरसस्य हिरण्यस्तूपस्यार्षं पवमानसोमदेवताकं। नवमी दशम्यौ त्रिष्टुभौ। शिष्टाजगत्यः। तथाचानुक्रान्तं—इषुर्नहिरण्यस्तूर्पोत्येत्रिष्टुभाविति। गतोविनियोगः। तत्र प्रथमा—

इषुर्नधन्वन्प्रतिधीयतेमतिर्वत्सोनमातुरुपसर्ज्यूधनि।
उरुधारेवदुहेअग्रेआयत्यस्यव्रतेष्वपिसोमइष्यते ॥ १ ॥

इषुः। न। धन्वन्। प्रति। धीयते। मतिः। वत्सः। न। मातुः।
उप। सर्जि। ऊधनि। उरुधाराइव। दुहे। अग्रे।
आइयती। अस्य। व्रतेषु। अपि। सोमः। इष्यते ॥ १ ॥

अस्मिन्पवमानरूपे इन्द्रे मतिर्मननीयास्मदीयास्तुतिः प्रतिधीयते अस्माभिर्निधीयते वा। दधातेरूपं। तत्रदृष्टान्तः—इषुर्न यथा इषुः शरः धन्वन् धनुषि प्रतिधीयते तद्वत्। किंच ऊधनि सर्वस्य पोषयितृत्वेन ऊधःस्थानीये इन्द्रे सोमो मदार्थं अस्माभिरुपसर्जि उपसृज्यते। कथमिव मातुर्गोरूधनि पयोधारके वत्सोन वत्सोयथा पयःपानार्थं सृज्यते तद्वत्। उरुधारेव बहुविधपयोधारागौरिव। अग्रे वत्सस्य पुरतः आयती गच्छती सती पयोदुहे दुग्धे। तथा सोयमिन्द्रः वत्सभूतेभ्यः स्तोतृभ्यः पुरतोगच्छन् बहुविधान् कामान् दुग्धे। किंच अस्यैतादृशस्यव्रतेष्वपिच सोमइष्यते यष्टृभिः प्रेर्यते खलु ॥ १ ॥

१. जैसे धनुष पर बाण रक्खा जाता है, वैसे ही हम पवमान-रूप इन्द्र में मननीय स्तुति को रखते हैं। जैसे बछड़ा गोरूप माता के पयोधर स्तन के साथ सृष्ट हुआ है, वैसे ही इन्द्र के मद के लिए हम सोम को बनाते हैं। जैसे दुग्धदायिनी धेनु बछड़े के आगे दूध देने को जाती है, वैसे ही स्तोताओं के आगे इन्द्र आते हैं। इन्द्र के कर्मों में सोम दिया जाता है।

अथ द्वितीया—

उपोमतिःपृच्यतेसिच्यतेमधुमन्द्राजनीचोदतेअन्तरासनि।
पवमानःसन्तनिःप्रघ्नतामिवमधुमान्द्रप्सःपरिवारमर्षति ॥ २ ॥

उपो इति । मतिः । पृच्यते । सिच्यते । मधु । मन्द्रऽअजनी ।
चोदते । अन्तः । आसनि । पवमानः । सम्ऽतनिः । प्रघ्नताम्ऽइव ।
मधुऽमान् । द्रप्सः । परि । वारम् । अर्षति ॥ २ ॥

अस्मिन् पवमानरूपे स्तोत्रे इन्द्रे मतिः स्तुतिरुपोपृच्यते उपपृच्यते स्तोतृभिः संयोज्यते पृचीसंपर्के । तथा मधु मदकरः सोमः इन्द्रार्थं सिच्यते । अद्भिर्यवसक्तुभिश्च सिक्तोभवति । ततश्च मन्द्राजनी अजगतिक्षेपणयोरित्यस्य ल्युटि ङीपि रूपं । मदकरस्य रसस्य प्रेरयित्री सोमधारा तस्येन्द्रस्य आसनि आस्येन्तर्मध्ये चोदते यष्टृभिः प्रेर्यते । आस्यशब्दस्य पद्दन्नोमासित्यादिनाआसन्नित्यादेशः । किंच संतनिः गृहादिषु सम्यक्विस्तृतः मधुमान् । मदकररसवान् पवमानः पूयमानः सोमः द्रप्सः द्रुतगमनशीलः । यद्वा क्षिप्रं हननशीलःसन् वारं अविवालमयं पवित्रं परितः अर्षति आगच्छति । तत्रदृष्टान्तः—प्रघ्नतामिव[1] प्रकर्षेणहंतॄणां योद्धॄणां संतनिः सम्यग्विसृष्टः शरो यथा शीघ्रंप्राप्यमभितोगच्छति तद्वत् ॥ २ ॥

२. इन्द्र के लिए स्तोता लोग स्तुति करते हैं। इन्द्र के लिए मदकर सोम का सिंचन किया जाता है (सोम में जौ का सत्तू मिलाया जाता है)। मदकर रसवाली सोम धारा इन्द्र के मुख में डाली जाती है। गृहादि में भली भाँति विस्तृत, मदकर रसवाले, क्षरणशील और गति-परायण सोम वैसे ही मेषलोममय पवित्र में जाते हैं, जैसे सुचतुर योद्धाओं का बाण फेंका जाकर शीघ्र ही नियत स्थान को पहुंच जाता है।

अथ तृतीया—

अव्येवधूयुःपवतेपरित्वचिश्रंथीतेनप्तीरदितेर्ऋतंयते ।
हरिरक्रान्यजतःसंयतोमदोनृम्णाशिशानोमहिषोनशोभते ॥ ३ ॥

अव्ये । वधूऽयुः । पवते । परि । त्वचि । श्रथीते । नप्तीः ।
अदितेः । ऋतम् । यते । हरिः । अक्रान् । यजतः । सम्ऽयतः ।
मदः । नृम्णा । शिशानः । महिषः । न । शोभते ॥ ३ ॥

वधूयुः वधूभूता वसतीवर्यएकधनासहिताआपः तद्वान् सोमः अव्ये अवेः स्वभूते त्वचि चर्मणि परिपवते परितोवर्तते पूतोभवतिवा किंच नप्तीः नप्त्रीः नप्तृशब्दश्चतुर्थापत्यवाची सोमस्य नप्त्रीः सोमोह्योषधीनामग्रेरेतोनिषिंचति । प्रजापतेरेतोदेवादेवानांरेतोवर्षंवर्षस्यरेतओषधयः इतिश्रुतेः । यद्वा नप्तृशब्दोपत्यवाची तस्यापत्यानि सोमः सुधामयैः स्वकिरणैरोषधीर्वर्धयति तस्मादपत्यभूताअदितेः पृथिवीनामैतत् अदीनायाः पृथिव्याउत्पन्नाओषधीः ऋतं सत्यरूपं यज्ञं

---

१ ऐ० आरण्यके. ।

यते गच्छति यजमानाय श्रथीते अग्रभागे फलिनीः कर्तुं विश्लेषयति । किंच हरिर्हरितवर्णः यजतः सर्वैर्यष्टव्यः अतएव संयतः ग्रहादिषु संगृहीतोमदः माद्यत्यनेनेतिमदः सोमः तादृशः अक्रानक्रामति पात्रेष्ववतिष्ठते यद्वा शत्रूनतिक्रामति क्रमेर्लुङि तिपि बहुलंछन्दसीति इडागमाभावात् वृद्धौकृतायां सिज्लोपेसति हल्ङ्यादिना तिपोलोपे मोनोधातोरिति नत्वेकृतेरूपं । अतएव सोमः नृम्णा स्वबलानि शिशानः तीक्ष्णीकुर्वन् अथवा शत्रुबलानि तनूकुर्वन् महिषोन महन्नामैतत् महानिव सर्वत्रव्याप्तइव शोभते स्वतेजसा सर्वत्र दीप्यते । यद्वा नः संप्रत्यर्थे इदानीमेवंगुणयुक्तः महान् सोमः शोभतइति ॥ ३ ॥

३. जिस वसतीवरी-जल में सोम शोधित व मिश्रित किये जाते हैं, वह उनकी स्त्री के तुल्य है। उसी वधू से मिलने के लिए सोम मेषचर्म पर क्षरित होते हैं। सत्यरूप यज्ञ में जाकर सोम अवीन पृथिवी पर उत्पन्न (अपत्य-रूप) ओषधियों को अग्रभाग में यजमान के लिए फलयुक्त करते हैं। हरित-वर्ण, सबके यजनीय और गृहों में संगृहीत सोम शत्रुओं को लाँघ जाते हैं। सर्वत्र व्यापक के समान सोम शत्रु-बल को न्यून करके अपने तेज से शोभित होते हैं। अथ चतुर्थी—

उक्षाभिमातिप्रतियन्तिधेनवोदेवस्यदेवीरुपयन्तिनिष्कृतम् ।
अत्यक्रमीदर्जुनंवारमव्ययमत्कंननिक्तंपरिसोमोअव्यत ॥ ४ ॥

उक्षा । मिमाति । प्रति । यन्ति । धेनवः । देवस्य । देवीः ।
उप । यन्ति । निःऽकृतम् । अति । अक्रमीत् । अर्जुनम् । वारम् ।
अव्ययम् । अत्कम् । न । निक्तम् । परि । सोमः । अव्यत ॥ ४ ॥

उक्षा रेतसःसेक्ता वृषभः पुरतोमिमाति शब्दायते माङ्माने शब्देच तं वृषभं धेनवोगावः प्रतियन्ति अनुगच्छन्ति तथा देवस्य द्योतमानस्य निःकृतं संस्कृतं स्थानं देवीः देव्यउपयन्ति उपगच्छन्ति । अनेनार्धेन सोमस्तुतिश्चाभिधीयते सोमःसन् द्रोणकलशाभिगमनकाले शब्दंकरोति तमनुधेनवः प्रीणयित्र्यः स्तुतयःपरियन्ति देवस्थानं स्तुतयोभिगच्छन्ति । तथा सोयंसोमः अर्जुनं श्वेतवर्णं अव्ययमविमयमविस्वभूतं वारं वालं पवित्रमत्यक्रमीत् अतिक्रामति अतिक्रम्य पात्राणिगच्छतीत्यर्थः । किंच सोमः अत्कंन आत्मीयं कवचमिव । निक्तमुज्ज्वलं श्रयणद्रव्यं पर्यव्यत परितः संवृणोति ॥ ४ ॥

४. वर्षक सोम शब्द करते हैं। जैसे देवता के संस्कृत स्थान पर देवी जाती हैं, वैसे ही सोम के पीछे गायें जाती हैं। सोम श्वेतवर्ण और मेषलोममय पवित्र को लाँघते हैं। सोम उज्ज्वल कवच के समान दुग्ध आदि के द्वारा अपने शरीर को ढकते हैं।

अमृक्तेनरुशतावासंसाहरिरमर्त्योनिर्णिजानःपरिव्यत ।
दिवस्पृष्ठंबर्हणानिर्णिजेकृतोपस्तरणंचम्वोर्नभस्मयम् ॥ ५॥२१॥

अमृक्तेन । रुशता । वासंसा । हरिः । अमर्त्यः । निःऽनिजानः ।
परि । व्यत । दिवः । पृष्ठम् । बर्हणा । निःऽनिजे । कृत ।
उपऽस्तरणम् । चम्वोः । नभस्मयम् ॥ ५ ॥ २१ ॥

अमर्त्यो मनुष्यधर्मरहितो हरिर्हरितवर्णः सोमः निर्णिजानः उदकेन शोध्यमानःसन् अमृक्तेन । मृजीशौचालंकारयोः । अनिर्णिक्तेनापि रुशता स्वतः शुक्लवर्णेन पयोरूपेण वासंसा परिव्यत परित आच्छादयति । सोमेपरिपूते गव्येन पयसा मिश्रीकुर्वन्ति खलु । तदुच्यते ततः सोयंसोमः दिवोद्युलोकस्य पृष्ठं पृष्ठभागेतिष्ठन्तमादित्यं बर्हणा बर्हणाय पापानामुद्यमनकारिणे पापनाशिने निर्निजे निर्निजनाय परिपवनाय कृत द्युलोके अकार्षीत् । सहि स्वदीप्त्या सर्वंनिर्णेक्ति । कृत कृणोतेर्लुङि ह्रस्वादिति सिचोलोपः । तदेवाह चम्वोः द्यावापृथिवीनामैतत् चमन्ति भक्षयन्ति अत्रदेवामनुष्याइति तयोरुपस्तरणं आच्छादनशीलं नभस्मयमादित्यमयं आदित्यस्य स्वभूतं तेजश्च सर्वेषां निर्णेजनायाकार्षीत् ॥ ५ ॥

५. अमर और हरित-वर्ण सोम जल से शोधित होते समय स्वयं शुभ्र पयो-वस्त्र से चारों ओर आच्छादित होते हैं। सोम ने द्युलोक की पीठ पर रहनेवाले सूर्य को, पाप-नाशक शोधन के लिए, द्युलोक में स्थापित किया। सबके शोधन के लिए द्यावापृथिवी के ऊपर आदित्य तेज को स्थापित किया।

॥ इति सप्तमस्य द्वितीये एकविंशोवर्गः ॥ २१ ॥

सूर्यस्येवरश्मयोद्रावयित्नवोमत्सरासःप्रसुपःसाकमीरते ।
तन्तुंततंपरिसर्गासआशवोनेन्द्रादृतेपवतेधामकिंचन ॥ ६ ॥

सूर्यस्यऽइव । रश्मयः । द्रवयित्नवः । मत्सरासः । प्रऽसुपः ।
साकम् । ईरते । तन्तुम् । ततम् । परि । सर्गासः । आशवः ।
न । इन्द्रात् । ऋते । पवते । धाम । किम् । चन ॥ ६ ॥

सूर्यस्यरश्मयः सर्वस्यप्रेरकस्य सुवीर्यस्य वादित्यस्य रश्मयः सर्वतोव्यापकाः किरणाइव द्रावयित्नवः सर्वत्रद्रवणशीलाः मत्सरासोमदकराः प्रसुपः शत्रूणां प्रस्वापकाः हन्तार आशवोग्रहेषुचमसेषुच व्याप्ताः सर्गासः सृज्यमानाः सोमाः ततं विस्तृतं तन्तुं तन्तुभिः कृतं वस्त्रं साकंसह युगपत् परिईरते परितोगच्छन्ति तेसोमा इन्द्रादृते इन्द्रंवर्जयित्वान्यत्किंचन धाम देवशरीरं लक्षीकृत्य नपवते नगच्छति । एकवचनं छान्दसं नगच्छन्ति किंतु इन्द्रस्यैव धाम प्रति गच्छन्ति । इन्द्रस्य धाम्नोपष्टव्यत्वंच—अयाळिन्द्रस्यप्रियाधामानीति । मंत्रवर्णादवगम्यते ॥ ६ ॥

६. सुवीर्य आदित्य की सर्व-व्यापक किरणों के समान सर्वत्र बहनेवाले, मदकर, शत्रु-घातक चमसों में व्याप्त और बनाये जानेवाले सोम सूतों से बने विस्तृत वस्त्रों के साथ चारों ओर जाते हैं। ये इन्द्र को छोड़कर अन्य देव के लिए नहीं क्षरित होते।

सिन्धोरिवप्रवणेनिम्नआशवोवृषच्युतामदासोगातुमाशत ।
शंनोनिवेशेद्विपदेचतुष्पदेस्मेवाजाःसोमतिष्ठन्तुकृष्टयः ॥ ७ ॥

सिन्धोःइव । प्रवणे । निम्ने । आशवः । वृषऽच्युताः । मदासः ।
गातुम् । आशत । शम् । नः । निऽवेशे । द्विऽपदे । चतुःऽपदे ।
अस्मे इति । वाजाः । सोम । तिष्ठन्तु । कृष्टयः ॥ ७ ॥

वृषच्युताः । वृषहिंसासंक्लेशनदानेष्वपि । वृषभिः सोमस्यदातृभिः ऋत्विग्भिश्च्युताः परिस्रुता मदासोमादकाः सोमाः स्तुतिभिः प्राप्तव्ये इन्द्रेगातुं गमनमाशत व्याप्नुवन्ति । तत्रदृष्टान्तः—सिन्धोरिव प्रवणे गच्छन्त्युदकानि यत्रेति तत्प्रवणं तस्मिन्निम्नेस्थले सिन्धोर्नद्याआशवोव्याप्ता आपोयथा गच्छन्ति तद्वत् । अथप्रत्यक्षः । हेसोम नोस्माकं निवेशे स्वगृहंप्रति प्रवेशने निर्गमने वा द्विपदे पुत्रादिकाय चतुष्पदे गवादिकाय पशवे शं सुखं कुरु । किंच हे सोम अस्मे अस्मासु वाजाअन्नानि कृष्टयः पुत्रादिकाः प्रजाश्च तिष्ठन्तु अन्नादिकं देहीत्यर्थः ॥७॥

७. ऋत्विकों के द्वारा अभिषुत और मदकर सोम स्तुत्य इन्द्र को उसी तरह प्राप्त करते हैं, जिस तरह नदियां समुद्र को जाती हैं। सोम हमारे गृह में पुत्रादि और गवादि को सुख दो। सोम, हमें अन्न और पुत्रादि दो।

अथाष्टमी—

आनःपवस्ववसुमद्धिरण्यवदश्वावद्गोमद्यवमत्सुवीर्यम् ।
यूयंहिसोमपितरोममस्थनदिवोमूर्धानःप्रस्थितावयस्कृतः ॥ ८ ॥

आ । नः । पवस्व । वसुऽमत् । हिरण्यऽवत् । अश्वऽवत् । गोऽमत् ।
यवऽमत् । सुऽवीर्यम् । यूयम् । हि । सोम । पितरः । मम । स्थन ।
दिवः । मूर्धानः । प्रऽस्थिताः । वयःऽकृतः ॥ ८ ॥

हे सोम वसुमत् वसुयुक्तं हिरण्यवत् कनकादिसहितं अश्ववत् गोमत् गवाश्वसहितं यवमत् यवोनामधान्यविशेषः धान्यविशिष्टं सुवीर्यं शोभनवीर्योपेतं धनं नोस्मभ्यमापवस्व आ-

१ तै० ब्रा० ३. ५. ७. ।

प्रापय प्रयच्छेतियावत्। किंच हेसोम यतस्त्वं ममपितॄणामंगिरसामपि पितासि ततोयूयमेव मम पितरःस्थन भवथ पितृबहुत्वमस्यसोमस्याभिधीयते। कीदृशाः दिवोद्युलोकस्यमूर्धानः मूर्धवदुच्छ्रिताः कर्मभिः स्वर्गादिकं अलभन्तेत्यर्थः। प्रस्थिताः सर्वदाकर्मकरणार्थंस्थिता वयस्कृतः हवीरूपस्यान्नस्य कर्तारः तादृशाममपितरः त्वं भवसि ॥ ८ ॥

८. सोम, हमें वसु, हिरण्य, अश्व, गौ, जौ और शोभन वीर्य से युक्त धन दो। सोम, तुम मेरे पितरों के भी पिता हो; इसलिए तुम मेरे द्युलोक के उन्नत प्रदेश (स्वर्गादि) पर स्थित कर्म-निष्ठ और हविरूप अन्न के कर्त्ता पितर हो। अथ नवमी—

एतेसोमाःपवमानासइन्द्रंरथाइवप्रययुःसातिमच्छ।
सुताःपवित्रमतियन्त्यव्यंहित्वीवव्रिंहरितोवृष्टिमच्छ ॥ ९ ॥

एते। सोमाः। पवमानासः। इन्द्रम्। रथाःइव। प्र। ययुः।
सातिम्। अच्छ। सुताः। पवित्रम्। अति। यन्ति।
अव्यम्। हित्वी। वव्रिम्। हरितः। वृष्टिम्। अच्छ ॥ ९ ॥

पवमानासः पवित्रेणपूयमाना एतेस्मदीयाःसोमाः सातिं पणसंभक्तौ कर्मणिक्तिन् सर्वैः संभजनीयमिन्द्रं अच्छ प्रययुः प्रकर्षेणगच्छन्ति। तत्रदृष्टान्तः—रथाइव इन्द्रस्यरथाः यथासातिं। पोन्तकर्मणि ऊतियूतीत्यादिनानिपातितः। सीयते म्रियते अस्मिन्निति सातिः संग्रामः तमच्छ तं प्रतिप्रगच्छन्ति तद्वत्। किंच सुताः ग्रावभिरभिषुताः सोमाः अव्यमविवालभवं पवित्रमतियन्ति अतीत्यगच्छन्ति। तेमी हरितः हरितवर्णाश्वाः। यद्वा हरितः ते आदित्यवाहनरूपाअश्वाः भूत्वा वव्रिं वृणोति शरीरमिति वव्रिर्जरा आदृगमहनेति किप्रत्ययः सर्वांगव्यापिनीं जरां हित्वी हित्वा तरुणाः सन्तः वृष्टिमच्छ वृष्टिंगमयितुं गच्छन्ति। हित्वी जहातेश्चक्त्वीति क्त्वादेशः स्नात्व्यादयश्चेतिछन्दसि निपातितं ॥ ९ ॥

९. जैसे इन्द्र के रथ संग्राम में जाते हैं, वैसे ही हमारे शोधित सोम आश्रय-स्थल इन्द्र की ओर जाते हैं। पत्थरों से अभिषुत सोम मेषलोममय पवित्र को लाँघते हैं और हरित-वर्ण सोम बुढ़ापे को मारकर (तरुण होकर) वृष्टि को भेजने को (बरसने को) जाते हैं।

इन्दविन्द्रायबृहतेपवस्वसुमृळीकोअनवद्योरिशादाः।
भराचन्द्राणिगृणतेवसूनिदेवैर्द्यावापृथिवीप्रावतंनः ॥ १० ॥२२॥

इन्दो इति। इन्द्राय। बृहते। पवस्व। सुऽमृळीकः। अनवद्यः।
रिशादाः। भर। चन्द्राणि। गृणते। वसूनि। देवैः।
द्यावापृथिवी इति। प्र। अवतम्। नः ॥ १० ॥ २२ ॥

हे इन्दो सोम त्वं बृहते महते इन्द्राय तदर्थं पवस्व पात्रेषुक्षर इन्द्रंप्रत्यागच्छ वा । कीदृशः सुमृळीकः इन्द्रस्य सुष्ठुसुखयिता अतएव अनवद्यः गर्हारहितः रिशादा रिशतां बाधकानां असिता एतादृशस्त्वं इन्द्राय पवस्व । किंच गृणते स्तुवते मह्यं चंद्राणि आह्लादकानि वसूनि धनानि भर प्रयच्छ । किंच हे द्यावापृथिवी युवांच पवमानेन परिस्रुते सत्यौ देवैः सुभगैर्धनैः सह नोस्मान्प्रावतं प्ररक्षतम् ॥ १० ॥

१०. सोम, तुम महान् इन्द्र के लिए क्षरित होओ। तुम इन्द्र को सुख देनेवाले, अनिन्द्य और शत्रुओं को हरानेवाले हो। मुझ स्तोता को आह्लादक धन दो। द्यावापृथिवी, उत्तम धनों से हमारी रक्षा करो।

॥ इति सप्तमस्य द्वितीये द्वाविंशोवर्गः ॥ २२ ॥

त्रिरस्माइति दशर्चं तृतीयं सूक्तं वैश्वामित्रस्यरेणोरार्षं दशमीत्रिष्टुप् शिष्टाजगत्यः पवमानःसोमोदेवता । त्रिरस्मैरेणुरित्यनुक्रान्तं । गतोविनियोगः ।

त्रिरस्मैसप्तधेनवोदुदुह्रेसत्यामाशिरंपूर्व्येव्योमनि ।
चत्वार्यन्याभुवनानिनिर्णिजेचारूणिचक्रेयदृतैरवर्धत ॥ १ ॥

त्रिः । अस्मै । सप्त । धेनवः । दुदुह्रे । सत्याम् । आऽशिरम् । पूर्व्ये ।
विऽओमनि । चत्वारि । अन्या । भुवनानि । निःऽनिजे ।
चारूणि । चक्रे । यत् । ऋतैः । अवर्धत ॥ १ ॥

अस्मै पवमानाय पूर्व्ये पूर्वैःकृते व्योमनि विविधंओम अवनं गमनं देवानामत्रेति व्योम यज्ञः तस्मिन्स्थिताय यद्वा प्रत्ने व्योमन्यन्तरिक्षे वर्तमानाय त्रिःसप्त एकविंशतिसंख्याकाधेनवःप्रीणयित्र्योगावःसत्यां यथार्थभूतामाशिरमाश्रयणसाधनं क्षीरादि दुदुह्रे दुहन्ति। यद्वा-त्रिःसप्त—द्वादशमासाः पंचर्तवस्त्रयइमेलोकाअसावादित्यएकविंशइति । एतैः सर्वैःसह गोषु पयउत्पाद्यते तत् गावोदुहन्तइति । किंच अयं सोमः अन्या अन्यानि चत्वारिभुवनानि उदकानि वसतीवरीस्तिस्रश्चैकधनाइति तानि चतुःसंख्याकानि चारूणि कल्याणानि उदकानि निर्णिजे निर्णेजनाय परिशोधनाय परिपोषणाय वा चक्रे कदा करोति यद्यदा अयमृतैर्यज्ञैरवर्धत वर्धितवान् तदाकरोति ॥ १ ॥

१. प्राचीन यज्ञ में स्थित सोम के लिए इक्कीस गायें क्षीर दूहती हैं (उत्पन्न करती हैं)। जब यज्ञों के द्वारा सोम वर्द्धित किये गये, तब उन्होंने चार सुन्दर जलों (वसतीवरी आदि) को परिशोधन के लिए बनाया।

---

१ ऐ० ब्रा० १. ३०.

अथ द्वितीया—

सभिक्षमाणोअमृतस्यचारुणउभेद्यावाकाव्येनाविशश्रथे ।
तेजिष्ठाअपोमंहनापरिव्यतयदींदेवस्यश्रवसासदोविदुः ॥ २ ॥

सः । भिक्षमाणः । अमृतस्य । चारुणः । उभे इति । द्यावा । काव्येन । वि । शश्रथे । तेजिष्ठाः । अपः । मंहना । परि । व्यत । यदि । देवस्य । श्रवसा । सदः । विदुः ॥ २ ॥

सपवमानः चारुणः कल्याणस्यामृतस्य उदकस्य क्रियाग्रहणंकर्तव्यमिति कर्मणः संप्रदानसंज्ञा चतुर्थ्यर्थेबहुलमितिषष्ठी । चारूदकं भिक्षमाणः यष्टृभिर्याच्यमानःसन् उभे । द्यावादेशस्य द्वंद्वेविहितत्वादत्र उत्तरपदाभावे द्वंद्वः प्रतीयते । उभे द्यावापृथिव्यौ काव्येन कविकर्मणा विशश्रथे विवृतेकरोति । यज्ञेन निमित्तेन उदकेन संपूरयतीत्यर्थः । किंच तेजिष्ठाः अतिशयेनदीप्तानि अपउदकानि मंहना महत्त्वेन परिव्यत वर्णार्थं परितआच्छादयति । यदि यदा ऋत्विजः देवस्य द्योतमानस्य सोमस्य सदः स्थानं श्रवसा हविषा युक्ताःसन्तः विदुः यागार्थं जानन्ति लभन्ति तदा परित आवृणोतीति । विदज्ञाने लिजभ्यस्तेति झेर्जुसादेशः ॥ २ ॥

२. यज्ञकर्त्ता यजमानों के द्वारा सुन्दर जल माँगने पर सोम ने द्यावापृथिवी को जल से पूर्ण किया। सोम अपनी महिमा से अतीव दीप्त जल को ढकते हैं। हविर्युक्त होकर ऋत्विक् लोग प्रकाशमान सोम के स्थान को जानते हैं।

अथ तृतीया—

तेअस्यसन्तुकेतवोमृत्यवोदाभ्यासोजनुषीउभेअनु ।
येभिर्नृम्णाचदेव्याचपुनतआदिद्राजानंमननाअगृभ्णत ॥ ३ ॥

ते । अस्य । सन्तु । केतवः । अमृत्यवः । अदाभ्यासः । जनुषी इति । उभे इति । अनु । येभिः । नृम्णा । च । देव्या । च । पुनते । आत् । इत् । राजानम् । मननाः । अगृभ्णत ॥ ३ ॥

अस्यैतादृशस्य सोमस्य केतवः प्रज्ञापकाः सर्वैश्चायनीयाः अमृत्यवो मरणधर्मरहिताः अतएव अदाभ्यासः । दभेश्चेतिवक्तव्यमितिण्यत् । परैरहिंस्यास्ते तादृशा अस्यरश्मयः उभे जनुषी जन्मनी स्थावरजंगमात्मके द्वेअनुलक्षीकृत्य संतु रक्षन्तु । ओषधीनामयं सोमोरेतोनिषिंचति यज्ञे मनुष्याणां च धाराः स्रवन्ति खलु । सोमं येभिर्यैः केतुभिर्नृम्णा नृम्णानि व-

लानि देव्या देवार्हाणि चान्नानि पुनते प्रेरयति । आदिदभिषवानन्तरमेव राजानं सोमं मननाः मननीयाः स्तुतयः अगृभ्णत परिगृह्णन्ति प्राप्नुवन्तीत्यर्थः। हम्रहोरिति भकारः ॥ ३ ॥

३. सोम की प्रज्ञापक, अमर और अहिंसनीय किरणें स्थावर-जङ्गम की रक्षा करें। उन्हीं किरणों के द्वारा सोम बल और देव-योग्य अन्न देते हैं। अभिषव के अनन्तर ही राजा सोम को मननीय स्तुतियाँ प्राप्त करती हैं।

समृज्यमानोदशभिःसुकर्मभिःप्रमध्यमासुमातृषुप्रमेसचा ।
व्रतानिपानोअमृतस्यचारुणउभेनृचक्षाअनुपश्यतेविशौ ॥ ४ ॥

सः । मृज्यमानः । दशऽभिः । सुकर्मऽभिः । प्र । मध्यमासु । मातृषु । प्रऽमे । सचा । व्रतानि । पानः । अमृतस्य । चारुणः । उभे इति । नृऽचक्षाः । अनु । पश्यते । विशौ ॥ ४ ॥

सपवमानः सुकर्मभिः शोभनकर्मयुक्ताभिर्दशभिर्दशसंख्याकाभिरंगुलिभिर्मृज्यमानः सः सचा अग्नौपास्ताहुतिरित्यादिक्रमेणापांसहायः प्रमे लोकान् प्रमातुं मध्यमासु अन्तरिक्षस्थितास्ववतिष्ठते । प्रमे प्रपूर्वान्मातेः क्विपि ङयि आतइति योगविभागादाकारलोपः । किंच नृचक्षाः नृणांद्रष्टा पवमानः चारुणः कल्याणस्यामृतस्योदकस्य वृष्ट्यर्थं व्रतानि यागादिकर्माणि पानोरक्षन् उभे विशौ मनुष्यान् देवांश्चांतरिक्षेण गच्छन् अनुपश्यते अनुपश्यति मनुष्यानभिमतदानेन देवान् हविःप्रदानेनेति ॥ ४ ॥

४. शोभन कर्मवाली दस अँगुलियों से शोधित होकर सोम लोकों के निरीक्षण के लिए अन्तरिक्षस्थ मध्यमा वाग् में रहते हैं। मनुष्यदर्शक और क्षरणशील सोम सुन्दर जल के बरसने के लिए, यज्ञादि की रक्षा करते हुए, अन्तरिक्ष से मनुष्यों और देवों को देखते हैं।

सममृजानइन्द्रियायधायसओभेअन्तारोदसीहर्षतेहितः ।
वृषाशुष्मेणबाधतेविदुर्मतीरादेदिशानःशर्यहेवशुरुधः ॥ ५॥२३॥

सः । मर्मृजानः । इन्द्रियाय । धायसे । आ । उभे इति । अन्तरिति । रोदसी इति । हर्षते । हितः । वृषा । शुष्मेण । बाधते । वि । दुःऽमतीः । आऽदेदिशानः । शर्यहाऽइव । शुरुधः ॥ ५ ॥ २३ ॥

मर्मृजानः पवित्रेणमृज्यमानः सपवमानः धायसे जगतोधारकाय इन्द्रियाय इन्द्रस्यपर्याप्ताय बलाय तदर्थं उभे रोदसी कालाध्वनोरिति द्वितीया उभयोर्द्यावापृथिव्योरन्तर्हितः मध्येवर्तमानःसन् आहर्षत । सर्वतोगच्छति । इन्द्रस्यहिसोमेन बलं भवति । वृषा कामानामुदकानां वा वर्षकः सोयं शुष्मेण शोषकेण बलेन दुर्मतीः दुष्टबुद्धीनसुरान् विबाधते विशेषेण पीड-

यति। किंकुर्वन् शुरुधः शुचा रुंधन्ति परानिति पृषोदरादिः दुःखकारिणोसुरानादेदिशानः पुनः पुनराह्वयन् हन्ति। तत्रदृष्टान्तः—शर्यहेव हननसाधनैरिषुभिः हन्ता वीरः प्रतिभटान् यथा हिनस्ति तद्वत् ॥ ५ ॥

५. इन्द्र के बल के लिए पवित्र-द्वारा शोधित और द्यावापृथिवी के बीच में वर्तमान सोम चारों ओर जाते हैं। जैसे वीर शत्रुओं को बाणों से मारता है, वैसे ही सोम दुःखद असुरों को बार-बार ललकारते हुए शोषक बल से दुर्बुद्धि असुरों को मारते हैं।

॥ इति सप्तमस्य द्वितीये त्रयोविंशोवर्गः ॥ २३ ॥

समातरानदद्दशानउस्रियोनानददेतिमरुतामिवस्वनः।
जानन्नृतंप्रथमंयत्स्वर्णरंप्रशस्तयेकमवृणीतसुक्रतुः ॥ ६ ॥

सः। मातरा। न। ददृशानः। उस्रियः। नानदत्। एति।
मरुताम्ऽइव। स्वनः। जानन्। ऋतम्। प्रथमम्। यत्।
स्वःऽनरम्। प्रऽशस्तये। कम्। अवृणीत। सुऽक्रतुः ॥ ६ ॥

सपवमानः मातरा मातरौ द्यावापृथिव्यौ ददृशानः पुनः पुनः पश्यन् ततोनानदन् भृशंशब्दं कुर्वन् एति सर्वत्रगच्छति। तत्रदृष्टान्तः—उस्रियोन उस्रियेति गोनाम तस्य स्वरूपवोवत्सः यथा मातरं गां पश्यन् शब्दंकरोति तद्वत्। किंच मरुतामिव यथा मरुतांगणः स्वनः पचाद्यजन्तः स्वनंकुर्वन् सर्वतोगच्छति तद्वत्। यदुदकं स्वर्णरं स्वरितिसर्वपर्यायः सर्वमनुष्यहितंभवति सर्वे हि मनुष्या उदकेसंगच्छन्ते तत्कार्यत्वात् तादृशं प्रथमं मुख्यं ऋतमुदकं जानन् विद्वान् सुक्रतुः शोभनकर्मा सुप्रज्ञोवा सपवमानः प्रशस्तये प्रशंसनाय आत्मस्तोत्रकरणाय कं मनुष्यमवृणीत समभजत नान्यमस्मद्व्यतिरिक्तमित्यर्थः ॥ ६ ॥

६. मातृ-भूत द्यावापृथिवी को बार-बार देखते हुए और शब्द करते हुए सोम उसी प्रकार सर्वत्र जाते हैं, जिस प्रकार बछड़ा गाय को देखकर शब्द करते हुए जाता है और मरुद्गण शब्द करते हुए जाते हैं। जो जल मनुष्यों का कल्याणकारक है, उस मुख्य जल को जानते हुए शोभनकर्मा और क्षरणशील सोम, अपने स्तोत्र के लिए, मुझे छोड़कर, किस मनुष्य का वरण करेंगे? अथ सप्तमी—

रुवतिभीमोवृषभस्तविष्ययाशृङ्गेशिशानोहरिणीविचक्षणः।
आयोनिंसोमःसुकृतंनिषीदतिगव्ययीत्वग्भवतिनिर्णिगव्ययी॥७॥

रुवति। भीमः। वृषभः। तविष्ययां। शृङ्गे इति। शिशानः।
हरिणी इति। विऽचक्षणः। आ। योनिम्। सोमः। सुऽकृतम्।
नि। सीदति। गव्ययी। त्वक्। भवति। निःऽनिक्। अव्ययी॥७॥

भीमः शत्रूणांभयंकरः वृषभः कामानांउदकानां वा वर्षणः विचक्षणः सर्वस्यविदर्शनशीलः सपवमानः तविष्यया तुइतिवृध्यर्थः अस्मादचइरितीमत्ययः तस्मादिच्छायामर्थेक्यच् सर्वभातिपदिकेभ्यइति सुगागमः आत्मनोवलेच्छया हरिणी हरितवर्णे द्वे शृंगे शिशानः तीक्ष्णीकुर्वन् प्रतिद्रोणकलशंप्रति द्वाभ्यांधाराभ्यां स्थाल्याग्रयणं गृह्णाति। तदुच्यते ते धारारूपशृंगे तीक्ष्णीकुर्वन् रुवति शब्दायते। रुशब्दे बहुलंछन्दसीतिशः। ततः ससोमः सुरुवं सुष्ठु रुतं योनिं स्वस्थानं द्रोणकलशमानिषीदति समन्तात्तिष्ठति। सोमस्य निर्णिक् निर्नेक्री परिशोधयित्री गव्ययी गोमयी त्वक्भवति। आनडुहे हि चर्मणि सोमाभिषवः। एवमव्ययी अविमयी त्वक्च निर्नेक्रीभवति तद्धि दशापवित्रापेक्षमभिहितं ॥ ७ ॥

७. शत्रुओं के लिए भयंकर, जल-वर्षक, सबके दर्शक और क्षरणशील, सोम अपने बल की इच्छा से दो हरितवर्ण की सींगों (धाराओं) को तेज करते हुए शब्द करते हैं। अनन्तर सोम अपने स्थान द्रोण-कलश में बैठते हैं। सोम के शोधक मेषचर्म और गोचर्म हैं।

शुचिःपुनानस्तन्वमरेपसमव्येहरिर्न्यधाविष्टसानवि।
जुष्टोमित्रायवरुणायवायवेत्रिधातुमधुक्रियतेसुकर्मभिः ॥ ८ ॥

शुचिः। पुनानः। तन्वम्। अरेपसम्। अव्ये। हरिः। नि। अधाविष्ट। सानवि। जुष्टः। मित्राय। वरुणाय। वायवे। त्रिऽधातु। मधु। क्रियते। सुकर्मऽभिः ॥ ८ ॥

अरेपसं पापरहितं। यद्वा रिपिगतौ गतिरहितं पात्रेस्थितं इत्यर्थः तादृशं तन्वंआत्मीयं शरीरं पुनानः शोधयन् अतएव शुचिः पूतः दीप्यमानोवा हरिः हरितवर्णःसोमः सानवि सानुनि समुच्छ्रितः अव्ये अविवालकृते दशापवित्रे न्यधाविष्ट ऋत्विग्भिर्निधीयते। धूञ्कंपने स्यसिच्सीयुट्तासिष्विति कर्मणिलुङि चिण्वदिटिपण् णित्वाद्वृद्धिः। ततः मित्राय वरुणाय वायवे एतेभ्योजुष्टः पर्याप्तः त्रिधातु त्रिसंधानः। वसतीवरीभिः दध्ना पयसा संसृष्टः सोमः त्रिधातु तादृशं मधु मदकरः सोमः सुकर्मभिः शोभनकर्मयुक्तैर्ऋत्विग्भिः क्रियते मित्रादिदेवार्थं प्रदीयते ॥ ८ ॥

८. पात्र में स्थित, अपने शरीर का शोधन करते हुए, पवित्र और हरितवर्ण सोम उन्नत होकर मेषलोममय दशापवित्र में रक्खे जाते हैं। अनन्तर मित्र, वरुण और वायु के लिए पर्याप्त जल, दधि तथा दुग्ध से मिश्रित और मदकर सोम शोभनकर्मा ऋत्विकों के द्वारा प्रदत्त होते हैं।

पवस्वसोमदेववीतयेऽपेन्द्रस्यहार्दिसोमधानमाविश।
पुरानोबाधाद्दुरितातिपारयक्षेत्रविद्धिदिशआहाविपृच्छते ॥ ९ ॥

पवस्व । सोम । देवऽवीतये । वृषा । इन्द्रस्य । हार्दि ।
सोमऽधानम् । आ । विश । पुरा । नः । बाधात् । दुःऽइता । अति ।
पारय । क्षेत्रऽवित् । हि । दिशः । आह । विऽपृच्छते ॥ ९ ॥

हे सोम वृषा कामानामुदकानांवा सेचकस्त्वं देववीतये देवानांपानाय पवस्व कलशादिषु क्षर । अथ हे सोम त्वमिन्द्रस्य हार्दि हृदयंगमं प्रियं सोमधानं सोमोनिधीयतेस्मिन्निति सोमधानं पात्रं तदाविश प्राविश । किंच नोस्माकं बाधात् बाधनात् पीडनात् पुरा पूर्वमेव दुरिता दुरितानि दुर्गमनानि रक्षांसि अतिपारय अतीत्य पारंगमय । अपिच क्षेत्रवित् मार्गज्ञः पुरुषः विपृच्छते विविधं पंथानं पृच्छते जनाय दिशोमार्गानाह हि ब्रूते खलु । उक्तान्तं यथा रक्षति तथा यज्ञमार्गवेत्ता त्वं अस्मभ्यं यज्ञपथं उक्त्वास्मान् पालयेति ॥ ९ ॥

९. सोम, तुम जल-वर्षक हो। देवों के पान के लिए क्षरित होओ। सोम, तुम इन्द्र के प्रियकर पात्र में पैठो। हमें पीड़ा देने के पहले ही दुर्गम राक्षसों के हाथों से हमें बचाओ। मार्गज्ञाता पुरुष मार्ग-जिज्ञासु को जैसे मार्ग बता देता है, वैसे ही यज्ञमार्गज्ञाता तुम हमें यज्ञ-पथ बताकर रक्षा करो।

अथ दशमी—

हितोनसप्तिरभिवाजमर्षेन्द्रस्येन्दोजठरमापवस्व ।
नावानसिन्धुमतिपर्षिविद्वाञ्छूरोनयुध्यन्नवनोनिदस्पः ॥१०॥२४॥

हितः । न । सप्तिः । अभि । वाजम् । अर्ष । इन्द्रस्य । इन्दो इति ।
जठरम् । आ । पवस्व । नावा । न । सिन्धुम् । अति । पर्षि ।
विद्वान् । शूरः । न । युध्यन् । अव । नः । निदः । स्परिति स्पः ॥१०॥२४॥

हेसोम ऋत्विग्भिः प्रेर्यमाणःसन् वाजं सोमनिधानं द्रोणकलशमभ्यर्ष अभिगच्छ । तत्रदृष्टान्तः—हितोन सप्तिः अश्वः हितः प्रेर्यमाणःसन् वाजं संग्राममभिलक्ष्य यथा याति तद्वत् । ततः हे इन्दो इन्द्रस्य जठरं जठरभूतं द्रोणकलशं वा आपवस्व आभिमुख्येन प्रविश । किंच विद्वान् सर्वज्ञानंस्त्वं अस्मानतिपर्षि दुरितानतीत्य पारय । तत्रदृष्टान्तः—नावान यथा नाविकाः सिंधुं नदीं नावा मनुष्यान् पारयन्ति तद्वत् । किंच हेसोम त्वं शूरोन शूरोवीरइव युध्यन् शत्रून् संप्रहरन् निदोनिन्दकाच्छत्रोः नोस्मानवस्पः अवपारय बाधां विनाश्य पालय । यद्वा नोस्माकं निदोनिन्दकान् शत्रून् अवस्पः अवाङ्मुखं जहि । स्पृहिंसायां बहुलंछन्दसीति आप्रत्यस्य लुक् तिपि गुणे हल्ङ्यादिना तिलोपः ॥ १० ॥

१०. जैसे भेजा गया घोड़ा युद्ध-भूमि को जाता है, वैसे ही ऋत्विकों के द्वारा प्रेरित होकर तुम द्रोण-कलश में जाओ। अनन्तर, हे सोम, इन्द्र

के जठर को सींचो। जैसे नाविक नौकाओं से मनुष्यों को नदी पार कराते हैं, वैसे ही सब जाननेवाले तुम हमें पापों के पार ले जाओ। शूर के समान शत्रुओं को मारते हुए निन्दक शत्रु से हमें बचाओ।

॥ इति सप्तमस्य द्वितीये चतुर्विंशोवर्गः ॥ २४ ॥

आदक्षिणेतिनवर्चं चतुर्थसूक्तं वैश्वामित्रस्य वृषभस्यार्षं पवमानसोमदेवताकं नवमीत्रिष्टुप् शिष्टाजगत्यः। तथाचानुक्रान्तं—आदक्षिणानव ऋषभस्तौ वैश्वामित्राविति। तावित्यनेन प्रकृतोरेणुः ऋषभश्चोभे परामृश्येते। श्रूयतेहि—अथहविश्वामित्रः पुत्रानामंत्रयामासमधुच्छन्दाः शृणोतनऋषभोरेणुरष्टकर्इति। गतःसूक्तविनियोगः।

आदक्षिणासृज्यतेशुष्म्या३ऽसदंवेतिद्रुहोरक्षसःपातिजागृविः।
हरिरोपशंकृणुतेनभस्पयउपस्तिरेचम्वो३र्ब्रह्मनिर्णिजे ॥ १ ॥

आ। दक्षिणा। सृज्यते। शुष्मी। आऽसदम्। वेति। द्रुहः।
रक्षसः। पाति। जागृविः। हरिः। ओपशम्। कृणुते। नभः।
पयः। उपऽस्तिरे। चम्वोः। ब्रह्म। निःऽनिजे ॥ १ ॥

सोमस्य स्वभूतेयज्ञे ऋत्विग्भ्योदक्षिणा आसृज्यते अस्माभिः प्रदीयते शुष्मी बलवान् सोमः आसदमास्थानं द्रोणाख्यं वेति प्रविशति। किंच जागृविः जागरणशीलः सोमः द्रुहः द्रोहकारिणोरक्षसो राक्षसात्पाति स्तोतॄन् रक्षति। अपिच हरिर्हरितवर्णः सोमः ओपशं आसमन्तादुपशेतेइत्योपशः सर्वस्य धारकं नभो नभसआदित्यस्य स्वभूतं पयः उदकं कृणुते सर्वत्रकरोति। अग्नौमास्ताहुतिरित्यादिक्रमेण करोतीत्यर्थः। यद्वा नभोन्तरिक्षं पयः पयसोधारकं करोति। किंच अयंसोमश्चम्वोर्द्यावापृथिवीनामैतद् चमन्ति भक्षयन्ति मनुष्यदेवाअत्रेति तयोरुपस्तिरे उपस्तरणाय आच्छादनाय बलवृहदुद्यत्तमांसि विनाशयन्तं। यद्वा परिवृढं सूर्यं द्युलोके करोति तथा तमेवसूर्यं निर्निजे पदार्थानां निर्नेजनाय परिशोधनायच करोति आदित्योहि द्यावापृथिव्यौ स्वतेजसोपस्पृणाति सहि स्वभासा सर्वंनिर्नेकिच ॥ १ ॥

१. यज्ञ में ऋत्विकों को दक्षिणा दी जाती है। बलवान् सोम द्रोणकलश में पैठ रहे हैं। जागरणशील सोम द्रोही राक्षसों से स्तोताओं को बचाते हैं। सोम आकाश को जल-धारक बनाते हैं। द्यावापृथिवी के अन्धकार-विनाश के लिए सोम सूर्य को द्युलोक में सुदृढ़ किये हुए हैं।

अथ द्वितीया—

प्रकृष्टिहेवशूषएतिरोरुवदसुर्यं१वर्णंनिरिणीतेअस्यतम्।
जहातिवव्रिंपितुरेतिनिष्कृतमुपप्रुतंकृणुतेनिर्णिजंतना ॥ २ ॥

---

१ ऐ० ब्रा० ७. १७.।

प्र । कृ॒ष्टि॒हाऽइ॑व । शू॒षः । ए॒ति॒ । रोरु॑वत् । अ॒सु॒र्य॑म् । वर्ण॑म् ।
नि । रि॒णी॒ते॒ । अ॒स्य॒ । तम् । जहा॑ति । व॒व्रिम् । पि॒तुः । ए॒ति॒ ।
निः॒ऽकृ॒तम् । उ॒प॒ऽप्रुत॑म् । कृ॒णु॒ते॒ । निः॒ऽनिज॑म् । तना॑ ॥ २ ॥

शूषः शत्रूणांशोषकः बलवान् सोमः रोरुवत् अत्यन्तं शब्दंकुर्वन् कृष्टिहेव मनुष्याणांहन्ता योद्धेव एति प्रगच्छति । किंच असुर्यं असुराणां बाधकं अस्यात्मनोवर्णं हरितं आवारकं बलंवा निरिणीत निर्गमयति । ततः ससोमः वव्रिं वृणोति शरीरमिति वव्रिर्जरा तां जहाति त्यजति । कथमिति चेत् तदुच्यते पितुरन्नं सोमः निष्कृतं संस्कृतं द्रोणकलशं दिवं वा इदानीमेति गच्छति । किंच सोमः तनाविवालेन तते विस्तृते दशापवित्रे निर्निजं निर्निगितिरूपनाम आत्मीयं रूपं उपप्रुतं उपगमनशीलं कृणुते करोति तस्माज्जरां त्यजतीत्यर्थः ॥ २ ॥

२. शत्रुहन्ता योद्धा के समान बलवान् सोम शब्द करते हुए जाते हैं। सोम अपने असुर-बाधक बल को प्रकट करते हैं। सोम बुढ़ापा छोड़ रहे हैं। पीने का द्रव्य होकर सोम संस्कृत द्रोण-कलश में जा रहे हैं। मेषलोममय पवित्र में अपने गतिपरायण रूप को स्थापित कर रहे हैं।

अद्रि॑भिः॒सुत॒ःप॑वते॒गभ॑स्त्योर्वृ॒षाय॑ते॒नभ॑सा॒वेप॑ते॒मती॑ ।
समो॑दते॒नस॑ते॒साध॑ते॒गिरा॑ने॒नि॒क्तेअ॒प्सुय॑जते॒परी॑मणि ॥ ३ ॥

अद्रि॑ऽभिः । सु॒तः । प॒व॒ते॒ । गभ॑स्त्योः । वृ॒ष॒ऽयते॑ । नभ॑सा ।
वेप॑ते । म॒ती । सः । मो॒द॒ते॒ । नस॑ते । साध॑ते । गि॒रा । ने॒नि॒क्ते ।
अ॒प्ऽसु । यज॑ते । परी॑मणि ॥ ३ ॥

अद्रिभिर्ग्रावभिः गभस्त्योर्बाह्वोः बाहुभ्यांच सुतोभिषुतः ससोमः पवते पात्राणि प्रतिगच्छति । यःसोमः वृषायते वृषवदाचरति । किंच योमती मत्या स्तुत्याभिष्टुतःसन् नभसान्तरिक्षेण वेपते सर्वत्र गच्छति ससोमः मोदते हृष्टोभवति । तथा नसते ग्रहादिषु संश्लिष्टोभवति । किंच गिरा स्तुत्या स्तुतः सन् । साधते स्तोतॄणां धनादिकं साधयति । अपिच अप्सु वसतीवर्याख्यासु नेनिक्ते शुद्धोभवति तथा परीमणि देवैरक्ष्यमाणे यज्ञे देवानां हविःप्रदानेन पोषके वा यज्ञे यजते पूजितोभवति ॥ ३ ॥

३. पत्थरों और बाहुओं से अभिषुत सोम पात्रों में जाते हैं। सोम वृष के समान आचरण करते हैं। स्तोत्र से स्तुत होकर अन्तरिक्ष में सर्वत्र जाते हुए सोम प्रसन्न होते हैं। वे पात्रों में जाते हैं। स्तुत होकर वे स्तोताओं को धन देते हैं। जल से शोधित होते हैं। देवों को जिस यज्ञ में हवि दिया जाता है, उसमें पूजित होते हैं।

परि॑द्युक्षंसह॑सःपर्व॑ता॒वृधं॒मध्वः॑सिञ्चन्तिह॒र्म्यस्य॑स॒क्षणि॑म् ।
आय॑स्मि॒न्गावः॑सुहु॒तादू॒ऽधनि॑मू॒र्धञ्छ्री॒णन्त्य॑पि॒यंवरी॑मभिः ॥ ४ ॥

परि । द्युक्षम् । सहसः । पर्वतऽवृधम् । मध्वः । सिंचन्ति ।
हर्म्यस्य । सक्षणिम् । आ । यस्मिन् । गावः । सुहुतऽअदः ।
ऊधनि । मूर्धन् । श्रीणन्ति । अपियम् । वरीमऽभिः ॥ ४ ॥

सहसः सहस्विनोमध्वोमदकराः सोमाः द्युक्षं दीप्यमाने द्युलोके क्षियन्तं निवसन्तं पर्वतावृधं मेघानां पर्वतानां वा वर्धयितारं हर्म्यस्य शत्रुपुरस्य सक्षणिमभिभवितारमिन्द्रं परिषिंचति । तथा सुहुतादः सुहुतानां हविषां भक्षयितारोगावो मूर्धन् मूर्धनि समुच्छ्रिते ऊधनि पयोधारकेस्थाने स्थितमग्रियं मुख्यं पयः वरीमभिरुरुत्वैः महत्वैर्यस्मिन्पवमानगुणविशिष्टइन्द्रे आश्रीणंति आमिश्रयन्ति दधा पयसाच सोमंश्रीणन्ति खलु तदुच्यते ॥ ४ ॥

४. मदकर सोम दीप्त द्युलोक में रहनेवाले, मेघों के वर्द्धक और शत्रु-पुर के नाशक इन्द्र को सींचते हैं। हवि को भक्षण करनेवाली गायें अपने उन्नत स्तन में स्थित दुग्ध को, अपनी महिमा के द्वारा, इन्द्र को देती हैं।

समीरथंनभुरिजोरहेषतदशस्वसारोअदितेरुपस्थआ ।
जिगादुपज्रयतिगोरपीच्यंपदंयदस्यमतुथाअजीजनन् ॥५॥२५॥

सम् । ईमिति । रथम् । न । भुरिजोः । अहेषत । दश । स्वसारः ।
अदितिः । उपऽस्थे । आ । जिगात् । उप । ज्रयति । गोः ।
अपीच्यम् । पदम् । यत् । अस्य । मतुथाः । अजीजनन् ॥ ५ ॥ २५ ॥

भुरिजोर्बाहुनामैतत् । बिभ्रति पदार्थानाभ्यामिति । तयोर्बाह्वोः दश दशसंख्याकाः स्वसारः सर्वत्र सरणशीलाः अंगुलयः अदितेर्भूमेरुपस्थे समीपे देवयजनदेशे ईमेनं सोममाभिमुख्येन समहेषत संप्रेरयन्ति । हिवर्धनगत्योः लुङिरूपं । कथमिव रथंन रथं यथांगुलयः प्रेरयंति तद्वत् ससोमः जिगात् पात्राणि गच्छति । किंच गोर्धेनोरपीच्यमन्तर्हितं पय उपज्रयति तदानीं उपगच्छति यद्यदा मतुथा मननीयगाथावन्तः स्तोतारः अस्य सोमस्य पदं स्थानं अजीजनन् जनयन्ति तदानीमित्यर्थः ॥ ५ ॥

५. बाहुओं की दस अंगुलियाँ यज्ञ-देश में सोम को वैसे ही भेज रही हैं, जैसे रथ को भेजा जाता है। गाय का दूध भी उसी समय जाता है, जिस समय मननीय स्तोत्रवाले इन सोम के स्थान को बनाते हैं।

॥ इति सप्तमस्य द्वितीये पंचविंशोवर्गः ॥ २५ ॥

अभिष्टवे श्येनोनयोनिमित्येषा । सूत्रितंच—संप्रेषितःश्येनोनयोनिंसदनंधियाकृतमिति । अग्नीषोमप्रणयनेप्येषा। सूत्रितंच—अन्तश्चमागाअदितिर्भवासि श्येनोनयोनिंसदनंधियाकृतमिति

सैषा षष्ठी—

श्येनोनयोनिंसदनंधियाकृतंहिरण्ययंमासदंदेवएषति ।
एरिणन्तिबर्हिषिप्रियंगिराश्वोनदेवाँअप्येतियज्ञियः ॥ ६ ॥

श्येनः । न । योनिम् । सदनम् । धिया । कृतम् । हिरण्ययम् ।
आऽसदम् । देवः । आ । ईषति । आ । ईमिति । रिणन्ति ।
बर्हिषि । प्रियम् । गिरा । अश्वः । न । देवान् । अपि ।
एति । यज्ञियः ॥ ६ ॥

देवोद्योतमानः पवमानः धिया स्वकर्मणा कृतं संपादितं हिरण्ययं हिरण्मयमासदमासंद्यभिधानं सदनं गृहमेषति अभिमुखं गच्छति । ईषतेर्गत्यर्थस्य व्यत्ययेन परस्मैपदं । तत्रदृष्टान्तः—श्येनोन योनिं कुलायं यथा श्येनः पक्षी प्रविशति तद्वत् । तत्र ईमेनं प्रियं प्रीणयितारं सोमं गिरा स्तुत्या बर्हिषि यज्ञे आरिणन्ति स्तोतारोभिमुखं प्रेरयन्ति स्तुवन्तीत्यर्थः । अनन्तरं यज्ञियो यज्ञार्हो यष्टव्योयं सोमः अश्वोन अश्वइव त्वरया देवानप्येति अभिगच्छति ॥ ६ ॥

६. जैसे श्येन पक्षी अपने घोंसले को जाता है, वैसे ही प्रकाशमान और पवमान सोम अपने कर्म-द्वारा निर्मित और सुवर्णमय गृह को जाते हैं । स्तोता लोग यज्ञ में प्रिय सोम की स्तुति करते हैं। यजनीय सोम, अश्व के समान, देवों के पास जाते हैं।

अथ सप्तमी—

पराव्यक्तोअरुषोदिवःकविर्वृषात्रिपृष्ठोअनविष्टगाअभि ।
सहस्रणीतिर्यतिःपरायतीरेभोनपूर्वीरुषसोविराजति ॥ ७ ॥

परा । विऽअक्तः । अरुषः । दिवः । कविः । वृषा । त्रिऽपृष्ठः ।
अनविष्ट । गाः । अभि । सहस्रऽनीतिः । यतिः । पराऽयतिः ।
रेभः । न । पूर्वीः । उषसः । वि । राजति ॥ ७ ॥

अरुष आरोचमानः कविः क्रान्तप्रज्ञः सोमः व्यक्तः विस्पष्टधारायुक्तः यद्वा वसतीवरीभिर्विशेषेणसिक्तःसन् दिवोन्तरिक्षात् परा पराङ्मुखमागच्छति पवित्रात् द्रोणकलशं परागच्छतीत्यर्थः । वृषा वृषभस्त्रिपृष्ठः त्रीणि सवनानि पृष्ठानि अस्येति त्रिपृष्ठः सोमस्य सर्वेषु विद्यमानत्वात् तस्मात् त्रिपृष्ठः सोमः गाः स्तोतृभिः क्रियमाणाः स्तुतीरभिलक्ष्य अनविष्ट शब्दायते । नुशब्दे । किंच सहस्रनीतिः सहस्रनयनः प्रयोगबाहुल्यापेक्षं ग्रहेषु चमसेषुच सहस्रवि-

धनयनत्वं अतएव यतिः पात्रादीनि प्रत्यागंता परायति कलशान् प्रति परागंता भवति सोयं पूर्वीर्बह्वीरुषसः कालाध्वनोरितिद्वितीया बहुपूषःकालेषु रेभोन रेभशब्दे शब्दायमानः स्तोतेव विराजति विशेषेण दीप्यते । तेषु सोमस्याभिषूयमाणत्वात् स्तोता खलु देवानां स्तुतिकरणेन राजति ॥ ७ ॥

७. शोभन, क्रान्तप्रज्ञ और जल से विशेष रूप से सिक्त सोम पवित्रता से कलश में जाते हैं। सोम वृषभ (मनोरथपूरक) हैं। वे तीनों सवनों में रहनेवाले (त्रिपृष्ठ) हैं। वे स्तुति को लक्ष्य करके शब्द करते हैं। वे नाना पात्रों में आते-जाते हैं। वे अनेक उषाओं में शब्द करते हुए सुशोभित होते हैं। अथाष्टमी—

त्वेषंरूपंकृणुतेवर्णोअस्यसयत्राशयत्समृतासेधतिस्त्रिधः ।
अप्सायातिस्वधयादैव्यंजनंसंसुष्टुतीनसतेसंगोअग्रया ॥ ८ ॥

त्वेषम् । रूपम् । कृणुते । वर्णः । अस्य । सः । यत्र । अशयत् । सम्ऽऋता । सेधति । स्त्रिधः । अप्साः । याति । स्वधया । दैव्यम् । जनम् । सम् । सुऽस्तुती । नसते । सम् । गोऽअग्रया ॥ ८ ॥

अस्यान्यादेशे शादेशः । अस्य सोमस्य स्वभूतोवर्णः शत्रूणांनिवारकोरश्मिः त्वेषं दीप्यमानं रूपं कृणुते करोति । सरश्मिः यत्र समृता अर्तेःक्तिनिरूपं सम्यक् प्राप्यते योद्धृभिरत्रेति संग्रामः अस्मिन् समृतौ युद्धे अशयत् शेते तिष्ठति । शीङोलङि बहुलंछन्दसीति शपोलुगभावः । तत्रयुद्धे सरश्मिः स्त्रिधः शोषकान् शत्रून् सेधति निषेधति हिनस्तीतियावत् । वाक्यभेदादनिघातः । किंच अप्साः सनोतेर्विट् आत्वे च रूपं । अपामुदकानां दाता । यद्वा वसतीवर्याख्यानामपां संभक्ता सोयं स्वधया हवीरूपेणान्नेन सह दैव्यं देवानांसंबन्धिनं जनं प्रतियाति गच्छति । अपिच सोयं सुष्टुती स्तुत्या संगच्छते उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । किंच ससोमः गोअग्रया गवादिमुख्यया यया वाचा स्तोतारः पशून् याचन्ते तया वाचा संनसते संगतोभवति । नसतिर्गत्यर्थः भिन्नवाक्यत्वादनिघातः ॥ ८ ॥

८. शत्रु-निवारक सोम-किरण अपने रूप को प्रदीप्त करती है। वह युद्ध-भूमि में रहती है। वह युद्ध में शत्रुओं को मारती है। वह जलदाता है। वह हवीरूप अन्न के साथ देव-भक्त के पास जाती है। वह स्तुति से मिलती है। जिन वाक्यों से स्तोता पशुओं से प्रार्थना करते हैं, उनसे सोम मिलित होता है। अथ नवमी—

उक्षेवयूथापरियन्नरावीदधित्विषींरधितसूर्यस्य ।
दिव्यःसुपर्णोवचक्षतक्षांसोमःपरिक्रतुनापश्यतेजाः ॥ ९ ॥ २६ ॥

उक्षाइव । यूथा । परिऽयन् । अरावीत् । अधि । त्विषीः ।
अधित । सूर्यस्य । दिव्यः । सुऽपर्णः । अव । चक्षत । क्षाम् ।
सोमः । परि । क्रतुना । पश्यते । जाः ॥ ९ ॥ २६ ॥

उक्षेव वृषभइव यूथा गोयूथानि प्रत्यागच्छन् शब्दंकरोति तद्वदयं सोमः स्तुतीः परियन् परिगच्छन् । अरावीत् शब्दायते ततः सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य त्विषीर्दीप्तीरध्यधित अधिदधाति सूर्यात्मनाद्युलोकेवतिष्ठतइत्यर्थः । दधातेर्लुङि स्थाध्वोरिच्चेतीत्वकित्वे । किंच दिव्यः दिविभवः सुपर्णः सुपतनः श्येनरूपया गायत्र्या हृतत्वात् शोभनगमनः सोमः क्षां पृथिवीनामैतत् क्षियन्ति निवसन्त्यत्रेति क्षां पृथिवीमवचक्षत अवपश्यति चष्टेर्लुङि बहुलंछन्दसीति शपोलुगभावः ततः सोमः जाः जाताः प्रजाः क्रतुना प्रज्ञानेन परिपश्यते परितः पश्यति व्यत्ययेनात्मनेपदं ॥ ९ ॥

९. जैसे साँड़ गायों को देखकर बोलता है, वैसे ही स्तुतियाँ सुनकर सोम शब्द करते हैं। वे सूर्य-रूप से द्युलोक में रहते हैं। सोम द्युलोकोत्पन्न और शोभनगमन हैं। वे पृथिवी को देखते हैं। सोम परिज्ञान से प्रजागण को देखते हैं। ॥ इति सप्तमस्य द्वितीये षड्विंशोवर्गः ॥ २६ ॥

हरिंमृजंतीतिनवर्चं पंचमं सूक्तं आंगिरसस्य हरिमन्तस्यार्षं पवमानसोमदेवताकं जागतमूर्ध्वंप्रागुशनसइति परिभाषया जागतं । तथाचानुक्रान्तं—हरिंहरिमन्तइति । गतोविनियोगः ।

हरिंमृजन्त्यरुषोनयुज्यतेसंधेनुभिःकलशेसोमोअज्यते ।
उद्वाचमीरयतिहिन्वतेमतीपुरुष्टुतस्यकतिचित्परिप्रियः ॥ १ ॥

हरिम् । मृजन्ति । अरुषः । न । युज्यते । सम् । धेनुऽभिः ।
कलशे । सोमः । अज्यते । उत् । वाचम् । ईरयति । हिन्वते ।
मती । पुरुऽस्तुतस्य । कति । चित् । परिऽप्रियः ॥ १ ॥

हरिं हरितवर्णं सोमं ऋत्विजोमृजन्ति मार्जयन्ति । मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यतइति तत्रवृद्धेरभावः । सोयमरुषोन अर्तेरुषत् प्रत्ययः गमनशीलोश्वइव युज्यते इन्द्रादिभिः संयुज्यते । किंच कलशे कलशोद्रोणाभिधानः स्थितःसोमः धेनुभिः गोविकारैः दध्यादिभिः समज्यते समक्तः सिक्तोभवति । अपिच सोमोयदा वाचंशब्दमुदीरयति उद्गमयति शब्दं करोतीत्यर्थः तदा स्तोतारश्च मती सुपां सुलुगिति द्वितीयायाःपूर्वसवर्णदीर्घः स्तुतिं हिन्वते प्रेरयन्ति हिगतौ वृद्धौचेति स्वादिःआत्मनेपदी ततः स्तोत्राभिष्टुतः सपुरुष्टुतस्य बहुस्तोत्रयुक्तस्य स्तोतुःपरिप्रियः प्रीङ्तर्पणे क्विप् शसि इयङादेशःकदुत्तरपदप्रकृतिस्वरत्वं परितः प्रीणयितृणि कतिचित् कियन्ति धनानि प्रयच्छन्ति ॥ १ ॥

१. ऋत्विक् लोग हरितवर्ण सोम का शोधन करते हैं। घोड़े के समान सोम की योजना की जाती है। कलश में अवस्थित सोम दूध में मिलाये जाते हैं। जब सोम शब्द करते हैं, तब स्तोता लोग स्तुति करते हैं। अनन्तर बहु-स्तोत्रयुक्त स्तोता के प्रिय सोम धन देते हैं।

साकंवदन्तिबहवोमनीषिणइन्द्रस्यसोमंजठरेयदादुहुः।
यदीमृजन्तिसुगभस्तयोनरःसमीळाभिर्दशभिःकाम्यंमधु ॥ २ ॥

साकम्। वदन्ति। बहवः। मनीषिणः। इन्द्रस्य। सोमम्।
जठरे। यत्। आऽदुहुः। यदि। मृजन्ति। सुऽगभस्तयः।
नरः। सऽनीळाभिः। दशऽभिः। काम्यम्। मधु ॥ २ ॥

मनीषिणः मनसईशितारः प्राज्ञा बहवःस्तोतारः साकं सहैव युगपत् मंत्रान् वदन्ति तदा स्तुवन्ति यदा इन्द्रस्य जठरे द्रोणकलशे सोममादुहुः ऋत्विजोदुदुहुः तदाभिष्टुवन्तीति। दुहेर्लिटि उसि रूपं। द्विर्वचनस्यछन्दसि विकल्पितत्वादत्रद्विर्वचनाभावः। किंच यदि यदा सुगभस्तयः शोभनबाहुकानरः कर्मनेतारोमनुष्याः काम्यं काम्यमानं मधु मदकरं सोमं सनीळाभिर्दशभिः दशसंख्याकाभिरंगुलीभिर्मृजन्ति सोममभिषुण्वन्ति तदा वदन्तीत्यन्वयः ॥ २ ॥

२. विद्वान् स्तोता लोग उस समय एक साथ ही मंत्र पढ़ते हैं, जिस समय इन्द्र के जठर में ऋत्विक् लोग सोम का दोहन करते हैं और जिस समय शोभन बाहुओंवाले कर्मनेता अभिलषणीय और मदकर सोम का, दस अँगुलियों से, अभिषव करते हैं।

अरममाणोअत्येतिगाअभिसूर्यस्यप्रियंदुहितुस्तिरोरवम्।
अन्वस्मैजोषमभरद्विनंगृसःसंद्वयीभिःस्वसृभिःक्षेतिजामिभिः ॥३॥

अरममाणः। अति। एति। गाः। अभि। सूर्यस्य। प्रियम्।
दुहितुः। तिरः। रवम्। अनु। अस्मै। जोषम्। अभरत्। विनम्ऽगृसः।
सम्। द्वयीभिः। स्वसृऽभिः। क्षेति। जामिऽभिः ॥ ३ ॥

ससोमः अरममाणः अनुपरतःसन् पुनःपुनः देवानांप्रीणनाय ग्रहादीनि प्रविशन्नित्यर्थः। गा गोविकारानाश्रयणानभिलक्ष्य अत्येति अतिक्रम्य गच्छति। ततः शब्दायमानःसोमः सूर्यस्यादित्यस्य दुहितुरुषसः प्रियं रवं शब्दं तिरः तिरस्करोति। तस्मिन्काले सोमाभिषवध्वनिर्महान् भवतीत्यर्थः। विनंगृसः विनं कमनीयं स्तोत्रं गृह्णातीतिविनंगृसः स्तोता जोषं जुषेर्धञिरूपं। पर्याप्तं स्तोत्रं तस्मै सोमाय अन्वभरत् अनुभरति। करोतीतियावत्। सोयंसोमः द्वयीभिः द्वाभ्यांपाणिभ्यामुत्पन्नाभिः जामिभिः परस्परंबन्धुभिः स्वसृभिः कर्मकरणार्थमितस्ततोगच्छन्तीभिरंगुलिभिः संक्षेति संगच्छते क्षिनिवासगत्योः छान्दसोविकरणस्य लुक् ॥ ३ ॥

३. देवों को प्रसन्न करने के लिए कलश आदि में जानेवाले सोम दूध आदि को लक्ष्य कर जाते हैं। उस समय सोम सूर्य-पुत्री उषा के श्रेष्ठ शब्द का तिरस्कार करते हैं। स्तोता सोम के लिए पर्याप्त स्तोत्र करता है। सोम दोनों बाहुओं से उत्पन्न, परस्पर मिलित और इधर-उधर जानेवाली अँगुलियों से मिलते हैं।

नृधूतोअद्रिषुतोबर्हिषिप्रियःपतिर्गवांप्रदिवइन्दुर्ऋत्वियः ।
पुरन्धिवान्मनुषोयज्ञसाधनःशुचिर्धियापवतेसोमइन्द्रते ॥ ४ ॥

नृऽधूतः । अद्रिऽसुतः । बर्हिषि । प्रियः । पतिः । गवाम् ।
प्रऽदिवः । इन्दुः । ऋत्वियः । पुरन्धिऽवान् । मनुषः । यज्ञऽसाधनः ।
शुचिः । धिया । पवते । सोमः । इन्द्र । ते ॥ ४ ॥

हे इन्द्र पवमानगुणविशिष्टेन्द्र ते त्वदर्थं बर्हिषि यज्ञे अयं सोमः धिया स्वेनकर्मणा धारया वा पवते पात्रेषु स्यन्दते। कीदृशः नृधूतः कर्मनेतृभिर्मनुष्यैः शोधितः अद्रिषुतः तथा ग्रावभिरभिषुतः प्रियः देवानां प्रीणयिता गवांपतिः स्वामी इन्दोगा अलभत। तस्माद्गवांस्वामी। पदिवः पुराणनामैतत् पुराणः इन्दुः पात्रेषु क्षरन् ऋत्वियः ऋतौजातः ऋतोरण् छन्दसिघसितिघसः सित्वेन पदसंज्ञायां भसंज्ञानिमित्तओर्गुणोनभवति। पुरंधिवान् पुरंधिर्बहुधीरितियास्कः। बहुकर्मवान् मनुषोमनुष्यस्य यज्ञसाधनः शुचिर्दीप्यमानः यद्वा दशापवित्रेण शुद्धः एवंगुणः सोमः इन्द्रार्थं पवते इतिसंबन्धः ॥ ४ ॥

४. पवमान गुणवाले इन्द्र, कर्मनेताओं के द्वारा शोधित, पत्थरों से अभिषुत, देवों के प्रसन्नकर्त्ता, गोपति, प्राचीन, पात्रों में बहनेवाले, बहुकर्मवान्, मनुष्यों के यज्ञ-साधक और दशापवित्र से शुद्ध सोम अपनी धारा से, यज्ञ में, पात्रों में, तुम्हारे लिए, गिरते हैं।

नृबाहुभ्यांचोदितोधारयासुतोनृष्वधंपवतेसोमइन्द्रते ।
आप्राःक्रतून्त्समजैरध्वरेमतीर्वेर्नद्रुषच्चम्वोरासदद्धरिः ॥५॥२७॥

नृबाहुऽभ्याम् । चोदितः । धारया । सुतः । अनुऽस्वधम् । पवते ।
सोमः । इन्द्र । ते । आ । अप्राः । क्रतून् । सम् । अजैः । अध्वरे ।
मतीः । वेः । न । द्रुऽसत् । चम्वोः । आ । असदत् । हरिः॥५॥२७॥

हे इन्द्र पवमानगुणविशिष्ट नृबाहुभ्यां कर्मनेतृणामृत्विजां बाहुभ्यां चोदितः प्रेरितः धारया सुतोभिषुतः यथा धाराभवति तथाभिषुतइत्यर्थः। तादृशः सोमः ते तवानुष्वधं बलमनु बलार्थं यद्वा स्वधेत्यन्ननाम अन्नार्थं पवते आगच्छति। ततः सत्वं सोमपानेन क्रतून् कर्माणि

---

१ नि० ६. १३.

आप्राः आपूरयसि। किंच अध्वरे यज्ञे मतीः अभिमानान् शत्रून् समजै सम्यक्जितवानसि। जिजये। लुङि सिपि सिचोबहुलं छन्दसीतीडभावः। सिचिवृद्धिरिति वृद्धिः। सोयं हरिर्हरितवर्णः सोमः चम्वोरधिषवणफलकयोः आसददासीदति। तत्रदृष्टान्तः—वेर्न वीगत्यादिषु अन्येभ्योपि दृश्यतइति विच् सार्वधातुकार्धधातुकयोरितिगुणः। यथा वेः पक्षी द्रुषत् द्रुमेसीदतीति तद्वत् द्रुषदिति पूर्वपदादिति षत्वम् ॥ ५ ॥

५. इन्द्र, कर्मकर्त्ताओं की भुजाओं से प्रेरित और अभिषुत सोम तुम्हारे बल के लिए आते हैं। अनन्तर, तुम सोमपान करके, कर्मों को पूर्ण करते हो। तुम यज्ञ में शत्रुओं को भली भाँति विजित करते हो। जैसे पक्षी वृक्ष पर बैठता है, वैसे ही हरितवर्ण सोम अभिषवण-फलक पर बैठते हैं। ॥ इति सप्तमस्य द्वितीये सप्तविंशोवर्गः ॥ २७ ॥

अंशुंदुहन्तिस्तनयन्तमक्षितंकविंकवयोपसोमनीषिणः।
समीगावोमतयोयन्तिसंयतंऋतस्ययोनासदनेपुनर्भुवः ॥ ६ ॥

अंशुम्। दुहन्ति। स्तनयन्तम्। अक्षितम्। कविम्। कवयः।
अपसः। मनीषिणः। सम्। ईमिति। गावः। मतयः। यन्ति।
सम्ऽयतः। ऋतस्य। योना। सदने। पुनःऽभुवः ॥ ६ ॥

कवयः क्रान्तप्रज्ञाः अपसः कर्मवन्तः मनीषिणः मनसईशा मनीषा बुद्धिः तद्वन्तः ऋत्विजः स्तनयन्तं शब्दायमानं अक्षितमक्षीणं कविं क्रान्तदर्शिनं अंशुं सोमं दुहन्ति अभिषुण्वन्ति। ततः पुनर्भुवः पुनर्भवनशीलाः गावः पशवः मतयोमननीयाः स्तुतयश्च संयतः परस्परं संगताः सत्यः ऋतस्य सत्यभूतस्य यज्ञस्य योना योनौ योनिस्थानीये उत्पत्तिभूते सदने उत्तरवेद्याख्ये ईमेनं सोमं संयन्ति संगच्छन्ति ॥ ६ ॥

६. क्रान्तकर्मा और मनीषी ऋत्विक् शब्द करनेवाले और क्रान्तदर्शी सोम का अभिषव करते हैं। अनन्तर पुनः उत्पत्तिशील गायें और मननीय स्तुतियाँ, एक साथ होकर, सत्यरूप यज्ञ के सदन उत्तर वेदी पर इन सोम से मिलती हैं।

नाभापृथिव्याधरुणोमहोदिवोऽपामूर्मौसिन्धुष्वन्तरुक्षितः।
इन्द्रस्यवज्रोवृषभोविभूर्वसुःसोमोहृदेपवतेचारुमत्सरः ॥ ७ ॥

नाभा। पृथिव्याः। धरुणः। महः। दिवः। अपाम्। ऊर्मौ।
सिन्धुषु। अन्तः। उक्षितः। इन्द्रस्य। वज्रः। वृषभः।
विभुऽवसुः। सोमः। हृदे। पवते। चारु। मत्सरः ॥ ७ ॥

महोमहतो दिवोद्युलोकस्य धरुणोधारकोयं सोमः पृथिव्याः विस्तीर्णायाभूमेः नाभाना-भौ नाभिस्थानीये उच्छ्रितेप्रदेशे—यदुत्तरवेदीनाभिरित्याम्नानात्। उत्तरवेदिस्थाने ऋत्विग्भिःनि-हितः सिंधुषु स्यन्दमानासु नदीषु अपामुदकानां उर्मौ संघे अन्तर्मध्ये उक्षितः सिक्तः अन्त-रिक्षस्थानमध्येवर्तमानइत्यर्थः। तादृशइन्द्रस्य वज्रोवज्रस्थानीयोवृषभः कामानांवर्षिता अत-एव विभूवसुः व्याप्तधनः सोमः चारु कल्याणं यथाभवति तथा इन्द्रस्य मत्सरः मादयिता स-न् हृदे मनसे सुखाय पवते आगच्छति ॥ ७ ॥

७. महान् द्युलोक के धारक, पृथिवी की नाभि—उन्नत स्थान—उत्तर वेदी पर—ऋत्विकों के द्वारा निहित, बहनेवाले जलसंघ के बीच सिक्त, इन्द्र के वज्रस्वरूप, कामवर्षक और व्यापक धनवाले सोम, मङ्गल के साथ, इन्द्र के मादयिता होकर मन से, सुख के लिए, क्षरित होते हैं।

सतूपवस्वपरिपार्थिवंरजःस्तोत्रेशिक्षन्नाधून्वतेचसुक्रतो।
मानोनिर्भाग्वसुनःसादनस्पृशोरयिंपिशङ्गंबहुलंवसीमहि ॥ ८ ॥

सः। तु। पवस्व। परि। पार्थिवम्। रजः। स्तोत्रे। शिक्षन्।
आऽधून्वते। च। सुक्रतो इति सुऽक्रतो। मा। नः। निः।
भाक्। वसुनः। सदनऽस्पृशः। रयिम्। पिशङ्गम्।
बहुलम्। वसीमहि ॥ ८ ॥

हे सुक्रतो शोभनकर्मन् सुप्रज्ञवा सोम तादृशस्त्वं पार्थिवं रजः लोकं लक्षीकृत्य तु क्षिपं परिपवस्व परितः सर्वतः क्षर। किंकुर्वन् आधून्वते अदाभ्यग्रहात्रिभिरंशुभिराधावनंकुर्वते। तथा भगवतापस्तंबेन सूत्रितं—तैरेनंचतुराधुनोति पंचकृत्वः सप्तकृत्वोवेति। तस्मै स्तोत्रे धनादि-कंशिक्षन् प्रयच्छन् परिपवस्वेति समन्वयः। ततस्त्वंनोस्मान् वसुनोधनान् मानिर्भाक् मानि-र्भाक्षीः। कीदृशान् सदनस्पृशः येनभूतेन वसुना सदना सदनानि गृहान् पुत्रादीन् स्पृशन्ति तादृशान् ग्रहादिकस्य प्रदातुः धनान्माविषुजः। भाक् भजसेवायां लुङि सिपि सिचि बहुलंछ-न्दसीतीडागमाभावः। एकाचइतीट्प्रतिषेधः हलन्तलक्षणावृद्धिः सिपोलोपः। यस्मादेवं तस्मा-द्वयं पिशंगं नानारूपं कनकादिना अतएव बहुलं प्रभूतं रयिं धनं वसीमहि आच्छादयेम बहु-धनवन्तोभवेमेत्यर्थः वसआच्छादने आदादिकः लिङिरूपं ॥ ८ ॥

८. सुन्दर कर्मवाले सोम, पार्थिव शरीरधारी मनुष्यों के लिए, शीघ्र गिरो। तुम्हारे तीनों सवन करनेवाले स्तोता को धन आदि दो। हमारे गृह के पुत्रों और धनों को हमसे अलग नहीं करो। हम नानाविध सुवर्ण आदि सम्पदा को प्राप्त करें।

आतूनइन्दोशतदात्वश्व्यंसहस्रंदातुपशुमद्धिरण्यवत्।
उपमास्वबृहतीरेवतीरिषोधिस्तोत्रस्यपवमाननोगहि ॥ ९॥२८॥

---

१ ऐ० ब्रा० १. २८.।

आ । तु । नः । इन्दो इति । शतऽदातु । अश्व्यम् । सहस्रऽदातु ।
पशुऽमत् । हिरण्यऽवत् । उप । मास्व । बृहतीः । रेवतीः । इषः ।
अधि । स्तोत्रस्य । पवमान । नः । गहि ॥ ९ ॥ २८ ॥

हे इन्दो पवमान नोस्मभ्यं तु क्षिप्रं धनमायच्छ । कीदृशं शतदातु दातुदानं बहुदानं अश्व्यं अश्वसहितं सहस्रदातु सहस्रदानोपेतं पशुमत् पश्वादियुक्तं हिरण्यवत् हिरण्ययुक्तं च धनं देहि । तथा हे सोम बृहतीः प्रभूतानि रेवतीर्धनवन्ति यद्वा पयसोदातारः पशवः तद्वन्ति इषोन्नानिचास्मभ्यमुपमास्व उपमिमीष्व कुर्वितियावत् । किंच हे पवमान नोस्माकं एवंभूतस्य स्तोत्रस्य श्रवणाय अधिगहि आगच्छ । क्रियार्थोपपदस्येति चतुर्थी चतुर्थ्यर्थे बहुलंछन्दसीति षष्ठी ॥ ९ ॥

९. क्षरणशील सोम, हमें अनेकानेक, अश्व-सहित, हजार दानों से युक्त, पशु आदि से समन्वित और सुवर्ण से संवलित धन दो। सोम हमें बहुत दूध देनेवाली गायों से युक्त धन दो। क्षरणशील सोम, हमारे स्तोत्र को सुनने के लिए, आओ।

॥ इति सप्तमस्य द्वितीयेष्टाविंशोवर्गः ॥२८॥

स्रक्इति नवर्चं षष्ठंसूक्तं आंगिरसस्य पवित्रस्यार्षं जागतं पवमानसोमदेवताकं तथाचानुक्रम्यते—स्रक्केपवित्रइति । प्रवर्ग्येभिष्टवे एतत्सूक्तं । सूत्रितंच—स्रक्केद्रप्सस्यायंवेनश्चोदयत्पृश्निगर्भाइति ।

तत्र प्रथमा—

स्रक्केद्रप्सस्यधर्मतःसमस्वरन्ऋतस्ययोनासमरन्तनाभयः ।
त्रीन्त्समूर्ध्नोअसुरश्चक्रआरभेसत्यस्यनावःसुकृतमपीपरन् ॥ १ ॥

स्रक्के । द्रप्सस्य । धर्मतः । सम् । अस्वरन् । ऋतस्य । योना । सम् । अरन्त । नाभयः । त्रीन् । सः । मूर्ध्नः । असुरः । चक्रे । आऽरभे । सत्यस्य । नावः । सुऽकृतम् । अपीपरन् ॥ १ ॥

स्रक्के यज्ञस्य हनुस्थानीये स्रक्के ओष्ठप्रान्तौ हनुरुच्यते । अधिषवणफलके धमतोभिषूयमाणस्य द्रप्सस्य सोमस्यांशवःसमस्वरन् संगच्छन्ते । तदास्यशब्दयन्वा ऋतस्य सत्यभूतस्य यज्ञस्य योना योनौ उत्पत्तिस्थाने नाभयः सोमरसाः समरन्त संगच्छन्ते । अर्तेःसमोगमीत्यादिनात्मनेपदं सर्तिशास्त्यर्तिभ्यश्चेतिचेरङ् । अथ असुरोबलवान् सर्वेषांप्रीणनाद् प्राणदाता वा ससोमः मूर्ध्नः समुच्छ्रितान् त्रीनलोकान् आरभे आरंभणाय मनुष्यदेवादीनां संचरणाय

चक्रे करोति । किंच सत्यस्य सत्यभूतस्य सोमस्य नावः नौकाइव स्थिताः चतस्रः स्थाल्यः आदित्याग्रयणोक्थ्यध्रुवस्थाल्यइति ताः स्थाल्यः सुकृतं सुष्ठु कर्माणि कुर्वन्तं यजमानमपीपरन् अभिमतदानेन पूजयन्ति वा । पारयतेर्लुङि चङि सन्वद्भावाभ्यासेत्वदीर्घाः ॥ १ ॥

१. यज्ञ के ओष्ठप्रान्त अभिषववाले सोम की किरणें ऊपर उठती हैं। यज्ञ के उत्पत्ति-स्थान में सोमरस ऊपर उठते हैं। बलवान् सोम तीनों लोकों को मनुष्य आदि के संचरण के योग्य बनाते हैं। सत्यभूत सोम की, नौका के समान, चार स्थालियाँ (आदित्य, आग्रयण, उक्थ्य और ध्रुव आदि चार याज्ञिक हाँड़ियाँ वा थालियाँ) सुकृती यजमान को, अभिमत-फलदान-द्वारा, पूजा करती हैं।

सम्यक्सम्यञ्चोमहिषाअहेषतसिन्धोरूर्मावधिवेनाअवीविपन् ।
मधोर्धाराभिर्जनयन्तोअर्कमित्प्रियामिन्द्रस्यतन्वंमवीवृधन् ॥२॥

सम्यक् । सम्यञ्चः । महिषाः । अहेषत । सिन्धोः । उर्मौ । अधि । वेनाः । अवीविपन् । मधोः । धाराभिः । जनयन्तः । अर्कम् । इत् । प्रियाम् । इन्द्रस्य । तन्वम् । अवीवृधन् ॥ २ ॥

महिषाः पूज्याः महान्तोवा ऋत्विजः सम्यंचः परस्परंसंगताः सन्तः सम्यगहेषत सोमं सम्यक्प्रेरयन्ति अभिषुण्वन्तीतियावत् । हिगतौ वृद्धौच लुङि सिचि रूपं ततः वेनाः वेनतेःकान्तिकर्मणइतियास्कः । स्वर्गादिफलंकामयमानाऋत्विजः सिंधोः स्यन्दमानस्योदकस्य ऊर्मावधि संधे वसतीवर्यादिषु जलेषु सोममवीविपन् कंपयंति तत्र प्रेरयन्तीत्यर्थः । वपतेर्ण्यन्तस्य लुङि चङि णौचङ्युपधायाह्रस्वइतिह्रस्वः । किंच अर्कमर्चनीयंस्तोत्रं जनयन्तः कुर्वन्तः ते प्रियां प्रियतमां इन्द्रस्य तन्वं धाम च मधोर्मदकरस्य सोमस्य धाराभिः अवीवृधन् वर्धितवन्तः । वर्धतेर्लुङि चाङि रूपं ॥ २ ॥

२. प्रधान ऋत्विक् आपस में मिलकर, सोम को भली भाँति अभिषुत कहते हैं। स्वर्गादि फल की कामना करनेवाले ऋत्विक् लोग बहनेवाले जल में सोम को भेजते हैं। पूजनीय स्तोत्र करते हुए स्तोताओं ने इन्द्र के प्रिय धाम को, मदकर सोम की धाराओं से, वर्द्धित किया।

पवित्रंवन्तःपरिवाचमासतेपितैषांप्रत्नोअभिरक्षतिव्रतम् ।
महःसमुद्रंवरुणस्तिरोदधेधीराइच्छेकुधरुणेष्वारभम् ॥ ३ ॥

पवित्रंऽवन्तः । परि । वाचम् । आसते । पिता । एषाम् । प्रत्नः । अभि । रक्षति । व्रतम् । महः । समुद्रम् । वरुणः । तिरः । दधे । धीराः । इत् । शेकुः । धरुणेषु । आऽरभम् ॥ ३ ॥

पवित्रवन्तः पवित्रेण शोधकेन सामर्थ्येनयुक्ताः सोमस्य रश्मयः वाचं सोमस्थितां माध्यमिकां वाचं पर्यासते पर्युपविशन्ति। सोमः अन्तरिक्षेतिष्ठतिखलु। सोमोवैराजागंधर्वेष्वासीदित्याम्नानात्। ततः मत्रः पुराणः एषां रश्मीनां पितायंसोमश्च व्रतं प्रकाशनात्मकं कर्माभिरक्षति अवितं करोति। किंच वरुणः सर्वस्य स्वतेजसाच्छादकः सोयं सोमः महोमहत् समुद्रमन्तरिक्षनामैतत् महदन्तरिक्षं तैरश्मिभिः तिरोदधे अन्तर्हितमकरोत् सर्वव्यामोदितियावत्। तमिमं सोमं धीराः इत् इदवधारणे कर्मणि कुशलाः प्राज्ञाएव ऋत्विजः धरुणेषु सर्वस्य धारकेषु वसतीवर्याख्येषूदकेषु आरभं आरब्धुं शेकुः शक्नुवन्ति च रभेस्तुमर्थे शकिणमुल्कमुलौइति कमुल् लित्स्वरेण मध्योदात्तः॥ ३॥

३. शोधक शक्ति से युक्त सोम की किरणें माध्यमिकी वाक् के पास बैठती हैं अर्थात् अन्तरिक्ष में रहती हैं। उनके पिता सोम प्रकाशन-कर्म की रक्षा करते हैं। अपने तेज से आच्छादक सोम अपनी रश्मियों से महान् अन्तरिक्ष को व्याप्त करते हैं। ऋत्विक् लोग सबके धारक जल में सोम का प्रारम्भ कर सकते हैं।

सहस्रधारेवितेसमस्वरन्दिवोनाकेमधुजिह्वाअसश्चतः।
अस्यस्पशोनिमिषन्तिभूर्णयःपदेपदेपाशिनःसन्तिसेतवः॥ ४॥

सहस्रऽधारे। अव। ते। सम्। अस्वरन्। दिवः। नाके।
मधुऽजिह्वाः। असश्चतः। अस्य। स्पशः। न। नि। मिषन्ति।
भूर्णयः। पदेऽपदे। पाशिनः। सन्ति। सेतवः॥ ४॥

सहस्रधारे बहूदकधारा यस्मात् द्रवन्ति तत्तथोक्तमन्तरिक्षं तस्मिन् वर्तमानास्ते सोमरश्मयः अव अवस्तात् स्थितां पृथिवीं समस्वरन् वृष्ट्यासंयोजयन्तीत्यर्थः। किंच दिवोद्युलोकस्य नाके समुच्छ्रितेदेशे वर्तमानाः मधुजिह्वाः मध्वग्राः सोमतेजसा अग्रेभ्योहि मधूत्पन्नंभवति। अतोमधुजिह्वाः असश्चतः संगतवर्जिताः पृथक्पृथक् दिवि अवस्थिताः। अस्यसोमस्य स्वभूताःस्पशः चारभूताः रश्मयः भूर्णयः क्षिप्रगामिनः सन्तोन निमिषन्ति निमेषं न कुर्वन्ति। किंतु पाशिनः सुकृतिनश्च ज्ञातुं सर्वदा जाग्रतीत्यर्थः। अथवा राजानोदुष्टान् विवारयितुं सर्वदा जागरणं कुर्वन्ति तद्वत्। एवं ते रश्मयः पदेपदे स्थानेस्थाने सेतवः संबद्धाःसन्तः पाशिनः पापकृतां बाधकाः सन्ति भवन्ति॥ ४॥

४. सहस्र धाराओंवाले अन्तरिक्ष में वर्तमान सोम किरणें नीचे स्थित पृथिवी को वृष्टि से युक्त करती हैं। द्युलोक के उन्नत देश में वर्तमान, मधु जीभवाली, परस्पर सङ्गरहित कल्याणकर किरणें शीघ्रगामी रहती हैं—कभी पलक भी नहीं गिरातीं (दुष्ट-नाश के लिए सदा जागी रहती हैं)। इस प्रकार स्थान-स्थान पर रहकर किरणें पापियों को बाधा देती हैं।

---

१ ऐ० ब्रा० १. २७.।

अथ पंचमी–

पितुर्मातुरध्यायेसमस्वरन्ऋचाशोचन्तःसन्दहन्तोअव्रतान् ।
इन्द्रद्विष्टामपधमन्तिमायया त्वचमसिक्नीं भूमनोदिवस्परि॥५॥२९॥

पितुः । मातुः । अधि । आ । ये । समऽअस्वरन् । ऋचा । शोचन्तः ।
सम्ऽदहन्तः । अव्रतान् । इन्द्रऽद्विष्टाम् । अप । धमन्ति । मायया ।
त्वचम् । असिक्नीम् । भूमनः । दिवः । परि ॥ ५ ॥ २९ ॥

पितुर्मातुः द्यावापृथिव्योः । द्यौर्मे पिताजनितानाभिरत्रबन्धुर्मे माता पृथिवी महीयमित्यादिषु । द्यावापृथिव्योः मातापितृत्वाम्नानात् । द्यावापृथिवीभ्यां ये सोमस्य रश्मयः अध्या समस्वरन् अधिकं प्रादुर्भूता अभवन् । ते ऋचा ऋत्विग्भिः क्रियमाणया स्तुत्या शोचन्तो दीप्यमानाः अव्रतान् कर्मरहितान् यजमानान् संदहन्तः सम्यक् विनाशयन्तः ते रश्मयः इन्द्रद्विष्टां इन्द्राय द्वेषकारिणीं । केचेति पूर्वपदप्रकृतिस्वरः । इन्द्रेण द्विष्टां वा असिक्नीं । रात्रिनामैतत् । रात्रिवत् कृष्णरूपां त्वचं राक्षसमित्यर्थः । मायया कर्मणा प्रज्ञया वा भूमनो विस्तृताः भूलोकात् दिवस्परि द्युलोकाच्च अपधमन्ति अपगतं कुर्वन्ति अपघ्नन्तीत्यर्थः ॥ ५ ॥

५. सोम की जो किरणें द्यावापृथिवी से अधिक प्रादुर्भूत हुई हैं, वे ऋत्विकों के द्वारा की जाती स्तुति से प्रदीप्त होकर और कर्म-शून्यों को भली भाँति नष्ट कर इन्द्र के लिए काले चमड़ेवाले राक्षस को, ज्ञान-द्वारा, विस्तृत भूलोक और द्युलोक से दूर हटाती हैं।

॥ इति सप्तमस्य द्वितीये एकोनविंशोवर्गः ॥ २९ ॥

अथ षष्ठी–

प्रत्नान्मानादध्यायेसमस्वरञ्छ्लोकयत्रासोरभसस्यमन्तवः ।
अपानक्षासोवधिराअहासतऋतस्यपन्थांनतरन्तिदुष्कृतः ॥ ६ ॥

प्रत्नात् । मानात् । अधि । आ । ये । समऽअस्वरन् ।
श्लोकऽयत्रासः । रभसस्य । मन्तवः । अप । अनक्षासः । वधिराः ।
अहासत । ऋतस्य । पन्थाम् । न । तरन्ति । दुःऽकृतः ॥ ६ ॥

श्लोकयत्रासः श्लोकाः स्तुतयः स्तुतिनियमना रभसस्य मन्तवः वेगमतिमन्यमानाः एवंविधाये सोमरश्मयः प्रत्नात् पुराणात् मानात् अन्तरिक्षादध्यासमस्वरन् सहप्रादुर्भूता अभवन्

---

१ ऋ० सं० २. ३. २०. ।

तान् रश्मीन् अनक्षासः चक्षुर्वर्जिताः साधुपदार्थानामद्रष्टारोनराः बधिराः देवतास्तुतिश्रवणवर्जिताः पापकृतोनरश्च अपहासत तान्परित्यजन्ति। दर्शिनः श्रवणवन्तोमेधाविनस्तु नपरिजहति किंतु स्तुवन्ति। तदेवाह—ऋतस्य सत्यस्य पंथां मार्गभूतमेषां गणं दुष्कृतः पापकृतोनरानतरन्ति नोत्तारयन्ति सुकृतिनस्तु तरन्तीत्यभिप्रायः ॥ ६ ॥

६. स्तुति-नियत और क्षिप्रकारी सोमरश्मियाँ प्राचीन अन्तरिक्ष से एक साथ प्रादुर्भूत हुईं। नेत्रशून्य, असाधुदर्शी, देवस्तुति-विवर्जित और पापी नर उन रश्मियों (किरणों) का त्याग कर देते हैं। पापी मनुष्य सत्य मार्ग से नहीं तरते। अथ सप्तमी—

सहस्रधारेवितते पवित्रे आ वाचं पुनन्ति कवयो मनीषिणः।
रुद्रासएषामिषिरासोअद्रुहःस्पशस्त्वञ्चःसुदृशोनृचक्षसः ॥ ७ ॥

सहस्रऽधारे। विऽतते। पवित्रे। आ। वाचम्। पुनन्ति।
कवयः। मनीषिणः। रुद्रासः। एषाम्। इषिरासः। अद्रुहः।
स्पशः। सुऽअञ्चः। सुऽदृशः। नृऽचक्षसः ॥ ७ ॥

कवयः क्रान्तकर्माणः अतएव मनीषिणः प्राज्ञाऋत्विजः सहस्रधारे अनेकधारोपेते विततेकर्मणि विस्तृते पवित्रे शुध्युत्पादकेसोमे वर्तमानां वाचं माध्यमिकां सोमःखलु विश्वावसुप्रभृतिगंधर्वाश्चान्तरिक्षेतिष्ठन्। सोमोवैराजागंधर्वेष्वासीदिति श्रवणात्। तत्रवर्तमानं सोमं देवागोपया वाचा क्रीतवन्तः तदासोमोवाक्तिष्ठतीति शक्यते वक्तुं। तस्मात् सोमेस्थितां माध्यमिकांवाचमापुनंति संस्कुर्वन्ति स्तुवन्तीतियावत्। यउक्तगुणां मरुतांमातरं माध्यमिकां वाचं स्तुवन्ति तेषां रुद्रासोरुद्रपुत्रा मध्यमवाचापुत्रामरुतः स्पशः वाचावशिनोभवन्ति। कीदृशा इषिरासः इषिरागमनशीलाः अद्रुहः स्तोतॄणामद्रोग्धारः। कर्मणिक्विबीणादिकः। परैरहिंस्याः स्वंचः शोभनाञ्चनाः अतएव सुदृशः सुदर्शनाः नृचक्षसोनृणांकर्मनेतॄणां द्रष्टारः ॥ ७ ॥

७. क्रान्तकर्मा और मनीषी ऋत्विक् लोग अनेक धाराओंवाले तथा विस्तृत पवित्र में वर्त्तमान सोम की माध्यमिकी वाक् की स्तुति करते हैं, जो मरुतों की माता (वाक्) की स्तुति करते हैं, उनके वचन का आश्रयण रुद्रपुत्र मरुत् करते हैं। वे आगमनशील, द्रोह-शून्य दूसरों के द्वारा अहिंसनीय, शोभन-गति सुदर्शन और कर्मनेता हैं।

ऋतस्य गोपा न दभाय सुक्रतुस्त्री षः पवित्रा हृदि अन्तरा दधे।
विद्वान्त्सविश्वा भुवना भि पश्यत्यवाजुष्टान्विध्यति कर्ते अव्रतान् ॥८॥

ऋतस्य। गोपाः। न। दभाय। सुऽक्रतुः। त्री। सः। पवित्रा।
हृदि। अन्तः। आ। दधे। विद्वान्। सः। विश्वा। भुवना। अभि।
पश्यति। अव। अजुष्टान्। विध्यति। कर्ते। अव्रतान् ॥ ८ ॥

१ ऐ० ब्रा० १. २७.।

ऋतस्य सत्यभूतस्य यज्ञस्य गोपा गोपायिता अतएव सुक्रतुः शोभनकर्मा सोमः नद्भाय दंभाय स्तंभनाय नभवति परैर्दंभयितुं नशक्यतइत्यर्थः। किंच ससोमः त्री शेश्छन्दसि बहुलमितिलुक् त्रीणि पवित्रा अग्निवायुसूर्यात्मकानि त्रीणि पवित्राणि हृद्यन्तः हृदयस्यान्तः आददे आदधाति स्वस्मिन् संगमयतीत्यर्थः। अपिच विद्वान् सर्वंजानानः ससोमः विश्वा भुवना सर्वाणि भुवनानि अभिपश्यति ततः कर्तं करोतेरौणादिकस्तप्रत्ययः कर्मण्यजुष्टानप्रियान् अतएवाव्रतानयजमानान् अवविध्यति अवाङ्मुखान् कृत्वा ताडयति हिनस्तीतियावत् ॥ ८ ॥

८. सत्यरूप यज्ञ के रक्षक और शोभनकर्मा सोम से कोई दम्भ नहीं कर सकता। सोम अग्नि, वायु और सूर्य आदि के रूप तीन पवित्रों को अपने में धारण करते हैं। विद्वान् सोम सारे भुवनों को देखते हुए कर्मभ्रष्टों को नीचे मुंह करके मारते हैं।

ऋतस्यतन्तुर्वितंतःपवित्रआजिह्वायाअग्रेवरुणस्यमायया।
धीराश्चित्तत्समिनंक्षन्तआशतात्रांकर्तमवपदात्यप्रभुः ॥ ९ ॥ ३० ॥

ऋतस्य। तन्तुः। विऽतंतः। पवित्रे। आ। जिह्वायाः। अग्रे। वरुणस्य। मायया। धीराः। चित्। तत्। सम्ऽइनंक्षन्तः। आशत। अत्र। कर्तम्। अव। पदाति। अप्रऽभुः ॥ ९ ॥ ३० ॥

ऋतस्य सत्यभूतस्य यज्ञस्य तन्तुस्तनिता पवित्रे अविवालमये दशापवित्रे विततोविस्तृतः। यद्वा पवित्रे अन्तरिक्षे विस्तृतः सोमः वरुणस्य जिह्वायाअग्रे मायया कर्मणा आस्थित वरुणजिह्वाग्रे आपस्तिष्ठन्ति तासु सोमोवसतीति वसतीवर्याद्युदकेस्थितइत्यर्थः। ततः धीराश्चित् कर्मणिप्राज्ञाएव तत् वरुणजिह्वाग्रस्थानं समिनक्षन्तः इनक्षतिर्गतिकर्मा। संव्याप्नुवन्तः सन्तआशत। स्तुतिभिर्हविर्भिर्वा प्राप्नुवन् यः पुनः कर्तं कालाध्वनोरितिद्वितीया। कर्मणिअप्रभुः समर्थोन भवति सोयमत्रास्मिन्नेवलोके अवपदाति अवस्तान्नरकेपतति नोपरिगच्छति। पदगतौ लेट्यडागमः तस्मात्। सर्वैः अग्निष्टोमादिकर्म कर्तव्यमित्येषोर्थोभिहितोभवति ॥ ९ ॥

९. सत्यभूत यज्ञ के विस्तारक और मेषलोममय पवित्र में विस्तृत सोम वरुण की जीभ के आगे (वसतीवरी में) रहते हैं। कर्म-निष्ठ लोग ही उन सोम को प्राप्त करते हैं। कर्मशून्य के लिए यह बात असम्भव है। कर्मशून्य नरक में जाता है। ॥ इति सप्तमस्य द्वितीये त्रिंशोवर्गः ॥ ३० ॥

शिशुर्नेतिनवर्चं सप्तमंसूक्तं दैर्घतमस्यस्य कक्षीवतआर्षंपवमानसोमदेवताकं अष्टमीत्रिष्टुप् शिष्टाजगत्यः। तथाचानुक्रम्यते—शिशुर्नकक्षीवांस्त्रिष्टुबष्टमीति। गतः सूक्तविनियोगः।

तत्र प्रथमा—

शिशुर्नजातोवंचक्रदद्वनेस्वर्यद्वाज्यरुषःसिषासति।
दिवोरेतसासचतेपयोवृधातमींमहेसुमतीशर्मसप्रथः ॥ १ ॥

शिशुः । न । जातः । अव । चक्रदत् । वने । स्वः । यत् । वाजी ।
अरुषः । सिसासति । दिवः । रेतसा । सचते । पयःऽवृधा ।
तम । ईमहे । सुऽमती । शर्म । सऽप्रथः ॥ १ ॥

सपवमानसोमोवने वननीये वसतीवर्याख्येउदके जातउत्पन्नः शिशुर्न शिशुरिव अवचक्रदत् अवाङ्मुखंक्रन्दति उदकमध्ये शब्दंकरोतिखलु। यद्यदा वाजी बलवानन्नवान्वा अरुषआरोचमानः यद्वा वाजी अश्वइव अरुषः अर्तेरुषच् । गमनशीलः सोमः स्वः स्वर्गलोकं सिषासति संभक्तुमिच्छति । सनोतेः सनीडभावे आत्वं सनोतेरिति सांहितिकं षत्वं । सोयं पयोवृधा गवामोषधीनां च क्षीरस्यवर्धकेन रेतसोदकेन सह दिवोद्युलोकाव् सचतेपार्थिवलोकं समवैति । तं तादृशं प्रसिद्धं सोमं सप्रथः सर्वतः पृथुतरं धनादिना युक्तं शर्मगृहं तद्वयं सुमती । सुपांसुलुगिति तृतीयायाः पूर्वसवर्णदीर्घः । सुमत्या शोभनया स्तुत्या ईमहे याचामहे । ईमहइतियाञ्चाकर्मा। ईङ्गतौ दैवादिकश्छान्दसः श्यनोलुक् ॥ १ ॥

१. वसतीवरी-जल में उत्पन्न होकर सोम, शिशु के समान, नीचे मुंह करके रोते हैं। बली अश्व के समान गमनशील सोम स्वर्गलोक का आश्रय लेना चाहते हैं। गौओं और ओषधियों के रस के साथ सोम द्युलोक से पृथिवीलोक पर आना चाहते हैं। वैसे सोम से हम धनादियुक्त गृह, शोभन स्तुति के साथ, मांगते हैं।

अथ द्वितीया—

दिवोयःस्कम्भोधरुणःस्वांततआपूर्णोअंशुःपर्येतिविश्वतः ।
सेमेमहीरोदसीयक्षदावृतासमीचीनेदाधारसमिषःकविः ॥ २ ॥

दिवः । यः । स्कम्भः । धरुणः । सुऽआततः । आऽपूर्णः । अंशुः ।
परिऽएति । विश्वतः । सः । इमे इति । मही इति । रोदसी इति ।
यक्षत् । आऽवृता । समीचीने इति सम्ऽईचीने । दाधार ।
सम् । इषः । कविः ॥ २ ॥

दिवोद्युलोकस्य स्कंभः विष्कंभयिता संरोद्धा धरुणः सर्वस्यधारकः यद्वा पृथिव्याधारकः । विष्टंभोदिवोधरुणःपृथिव्याइत्यात्मानौ । तादृशः स्वाततः सुष्ठुसर्वत्र विततो विस्तृतः अतएवापूर्णः पात्रेषु संपूर्णोयोंशुः सोमात्मकः विश्वतः सर्वतः पर्येति । तिङिचोदात्तवतीति गतेर्निघातः ससोम इमे मही महत्यौ रोदसी द्यावापृथिव्यौ आवृता आसंभजनीयेन कर्मणा यक्षत् यजतु स्वबलेन संयोजयत्वित्यर्थः ततः सोयं समीचीने परस्परं संगते द्यावापृथिव्यौ

१ ऋ० सं० ७. ३. २५ ।

दाधार धारयांचकार। तुजादीनामित्यभ्यासस्यदीर्घः। अनन्तरं कविः क्रान्तकर्मा इषोन्नानि स्तोतृभ्यः संप्रयच्छतु। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥ २॥

२. द्युलोक के स्तम्भ, धारक, सर्वत्र विस्तृत और पात्रों में पूर्ण सोम की किरणें चारों ओर जाती हैं। सोम महती द्यावापृथिवी को अपनी क्षमता के द्वारा योजित करें। सोम ने परस्पर मिलित द्यावापृथिवी को धारण किया। क्रान्तदर्शी सोम स्तोताओं को अन्न दें।

महिष्प्सरःसुकृतंसोम्यंमधूर्वीगव्यूतिरदितेर्ऋतंयते।
ईशेयोवृष्टेरितउस्रियोवृषापांनेतायइतऊतिर्ऋग्मियः॥ ३॥

महि। प्सरः। सुऽकृतम्। सोम्यम्। मधु। उर्वी। गव्यूतिः।
अदितेः। ऋतम्। यते। ईशे। यः। वृष्टेः। इतः। उस्रियः।
वृषा। अपाम्। नेता। यः। इतःऽऊतिः। ऋग्मियः॥ ३॥

ऋतं सत्यभूतं यज्ञं यते गच्छते तस्माइन्द्राय सुकृतं सुष्ठुसंस्कृतंसोम्यं सोममयं महिमहत् प्रभूतं मधु मधुररसं प्सरः भक्षणं पानीयं भवति। प्साभक्षणे। किंच तस्माद्यज्ञं प्रत्यागच्छतां इन्द्रादीनां अदितेरदीनायाः पृथिव्याः गव्यूतिर्मार्गश्च उर्वी विस्तीर्णोभवति इन्द्रः शतसहस्रसंख्याकैर्हरिभिः सह गन्तुं मार्गेविस्तीर्णोभवदित्यर्थः। यइन्द्रः इतः इमं लोकं प्रत्यापतन्त्या वृष्टेः ईशे ईश्वरोभवति। तथा उस्रियः उस्रियोगोनाम गोभ्योहितः अपामुदकानां वृषा वर्षको यज्ञस्य नेता नायकः इतऊतिः इममस्मदीयं यज्ञं प्रति ऊतिर्गमनं यस्यसतथोक्तः इतोगच्छन् यइन्द्रः ऋग्मियः ऋगर्हःस्तोतव्योभवति। तस्माअयंसोमः पातव्योभवतीति॥ ३॥

३. यज्ञ में आनेवाले इन्द्र के लिए संस्कृत सोमरस यथेष्ट मधुर रसवाला खाद्य होता है। इन्द्रादि का पृथिवी-मार्ग भी विस्तीर्ण है। इन्द्र इस पृथिवी पर बरसनेवाली वर्षा के ईश्वर हैं। गौओं के हितैषी जलवर्षक और यज्ञ-नेता इन्द्र इस यज्ञ में जाते हुए स्तुत्य होते हैं।

प्रवर्ग्येभिष्टवे आत्मन्वन्नभइत्येषा। सूत्रितंच—तदुप्रयक्षतममस्यकर्मात्मन्वन्नभोदुह्यतेघृतंपयइति।

आत्मन्वन्नभोदुह्यतेघृतंपयऋतस्यनाभिरमृतंविजायते।
समीचीनाःसुदानवःप्रीणन्तितन्नरोहितमवमेहन्तिपेरवः॥ ४॥

आत्मन्ऽवत्। नभः। दुह्यते। घृतम्। पयः। ऋतस्य। नाभिः।
अमृतम्। वि। जायते। सम्ऽईचीनाः। सुऽदानवः। प्रीणन्ति।
तम्। नरः। हितम्। अव। मेहन्ति। पेरवः॥ ४॥

आत्मन्वत् अनोनुडितिनुडागमः । आत्मन्वत् सारवत् घृतं पयश्च नभोनभस आदित्यरूपात् सोमोदुह्यते । किंच क्रतस्य यज्ञस्य नाभिः णहबन्धने स्वमोर्नपुंसकादिति सोलुङ्न भवति सर्वविधीनां छन्दसि विकल्पितत्वात् । नाभिर्यज्ञस्यबन्धकं अमृतमुदकंच विजायते तस्मादेवमादुर्भवति । ततः सुदानवः शोभनस्तुतिहविर्दानवन्तोयजमानाः समीचीनाः परस्परंसंगताःसन्तः तमिमंसोमं प्रीणंति प्रीणयन्ति स्तुतिभिस्तर्पयंति । अथ नरोनेतारः पेरवः। पारक्षणे मापोरित्वेरुन्नितिरुनप्रत्ययः सर्वस्यरक्षकाः सोमरश्मयः हितं निहितं अवावस्तात् वर्तमानं पार्थिकमुदकं मेहन्ति वर्षन्ति । मिहसेचने भौवादिकः। यद्वा हितमुदकं पृथिवीं प्रति मेहन्ति॥४॥

४. सोम आकाशरूप आदित्य से घृत और दुग्ध को दूहते हैं। सोम यज्ञ की नाभि हैं। उनसे ही अमृत और जल उत्पन्न होते हैं। सुन्दर दाता यजमान सोम परस्पर मिलकर इन सोम को प्रसन्न करते हैं। सर्व-रक्षक सोम-किरणें पृथिवी पर उपयोगी वर्षण करती हैं।

अरावीदंशुःसचमानऊर्मिणादेवाव्यं१मनुषेपिन्वतित्वचम् ।
दधातिगर्भमदितेरुपस्थआयेनतोकंचतनयंचधामहे ॥ ५ ॥ ३१॥

अरावीत् । अंशुः । सचमानः । ऊर्मिणा । देवऽअव्यम् । मनुषे । पिन्वति । त्वचम् । दधाति । गर्भम् । अदितेः । उपऽस्थे । आ । येन । तोकम् । च । तनयम् । च । धामहे ॥ ५ ॥ ३१ ॥

ऊर्मिणा वसतीवर्यादीनामुदकानां संघेन सचमानः ऋत्विग्भिः सेचमानः अंशुः सोमः अरावीत् शब्दं करोति । किंच ससोमः देवाव्यं अवरक्षणे अवितृस्तृतंत्रिभ्यईरितिईप्रत्ययः । देवानां पालयित्रीं त्वचं आत्मनः शरीरं मनुषे मनुष्याय यजमानाय पिन्वति सिंचति पात्रेषु क्षरतीतियावत् । अपिच अदितेरदीनायाः पृथिव्याउपस्थे समीपे ओषधीषु तं गर्भमादधाति सुधामयैः किरणैर्विदधाति । येन गर्भेण वयं तोकं दुःखनाशकं पुत्रं च तनयं तनोतिकुलमिति तनयः पौत्रः तं च धामहे दध्महे धारयामः । दधातेर्लटिबहुलंछन्दसीति शपोलुक् ॥ ५ ॥

५ .जल में ऋत्विकों के द्वारा मिलाये जाने पर सोम शब्द करते हैं। सोम अपने देव-पालक शरीर को पात्रों में प्रवाहित करते हैं। पृथिवी की ओषधियों में सोम, अपनी किरणों से, गर्भ धारण करते हैं। उस गर्भ से हम दुःख-विदारक पुत्र और पौत्र का धारण करते हैं।

॥ इति सप्तमस्य द्वितीये एकत्रिंशोवर्गः ॥ ३१ ॥

सहस्रधारेवताअंसश्चतंस्तुतीयेसन्नुरजंसिप्रजावतीः ।
चतस्रोनाभोनिहिताअवोदिवोहविर्भरन्त्यमृतंघृतश्चुतः ॥ ६ ॥

सहस्रऽधारे । अव । ताः । असश्चतः । तृतीये । सन्तु । रजसि ।
प्रजाऽवतीः । चतस्रः । नाभः । निऽहिताः । अवः । दिवः । हविः ।
भरन्ति । अमृतम् । घृतऽश्चुतः ॥ ६ ॥

सहस्रधारे बहूदकधारे तृतीये रजसि लोके स्वर्गे वर्तमाना असश्चतः परस्परमशक्ताः प्रजावतीः उत्पादित प्रजावत्यः सोमस्यस्वभूतास्ताः अवसन्तु अवस्तात् पृथिव्यां पतन्तु । कास्ताइत्याह चतस्रोनाभो नभसोबाधिकाः सोमस्य संबन्धिन्यश्चतस्रोदीप्तयः कलाः दिवो द्युलोकादवः अवस्तात् निहिताः सोमेन स्थापितास्ताः घृतश्चुतः घृतस्य उदकस्य च्यावयित्र्यः सत्यः हविः सोमादिलक्षणंभरन्ति देवानां प्रयच्छन्ति । तथा अमृतं गोष्वोषधीषुच पयोरूपं सुधारूपंच भरन्ति प्रक्षिपन्ति ॥ ६ ॥

६. अनेक धाराओंवाले, स्वर्ग में वर्त्तमान, परस्पर मिलित और प्रजावाली सोमकिरणें पृथिवी पर गिरती हैं। वे चार सोम-किरणें द्युलोक के नीचे सोम के द्वारा स्थापित हैं। वे जल-वर्षक होकर देवों को हवि देती हैं और ओषधियों में अमृत देती हैं।

श्वेतंरूपंकृणुतेयत्सिषासतिसोमोमीढ्वाँअसुरोवेदभूर्मनः ।
धियाशमीसचतेसेमभिप्रवद्दिवस्कवंन्धमवदर्षदुद्रिणम् ॥ ७ ॥

श्वेतम् । रूपम् । कृणुते । यत् । सिसासति । सोमः । मीढ्वान् ।
असुरः । वेद । भूर्मनः । धिया । शमी । सचते । सः । ईम् ।
अभि । प्रऽवत् । दिवः । कवन्धम् । अव । दर्षत् । उद्रिणम् ॥ ७ ॥

श्वेतं दीप्यमानं शुक्लं रूपं कृणुते तदाकरोति । यद्यदा सिषासति स्वर्गं संभक्तुमिच्छति सोमेपात्राण्यागते सति तत्तेजसानुरंजितानां तेषां श्वेतं रूपं भवति । तत्रोमीढ्वान् मिहसेचने अस्मात् क्वसौ दाश्वान साह्वान् मीढ्वांश्चेति निपातनादभिमतरूपसिद्धिः । कामानां सेक्ता असुरः प्राज्ञः बलवान्वा सोमः भूमनः बहुधनानि वेद स्तोतृभ्योदातुं जानाति प्रयच्छतीतियावत् । सईं सोचिलोपेचेदितिसुलोपः सोयं धिया प्रज्ञानेन प्रवत् प्रकृष्टानि शमी द्वितीयायाः पूर्वसवर्णदीर्घः कर्माणि अभिसचते अभितः समवैति । किंच दिवोन्तरिक्षात् उद्रिणं उदकवन्तं कवन्धं मेघं कवंधशब्देन मेघोभिधीयते । तात्स्थ्यात्ताच्छब्द्यमिति । मेघं अवदर्षत् अवदारयति विवृतद्वारंकरोति । मेघं विदार्यान्तरिक्षाद्वृष्टिं करोतीत्यर्थः ॥ ७ ॥

७. सोम पात्रों का रूप शुभ्र कर देते हैं। काम-सेचक और बली (असुर) सोम स्तोताओं को बहुत धन देते हैं। सोम अपनी प्रज्ञा के द्वारा प्रकृष्ट कर्म को प्राप्त करते हैं। अन्तरिक्ष के जलवान् मेघ को वे जल-वर्षण के लिए फाड़ते हैं।

अथाष्टमी—

अधश्वेतंकलशंगोभिरक्तंकार्ष्मन्नावाज्यक्रमीत्ससवान् ।
आहिन्विरेमनसादेवयन्तःकक्षीवतेशतहिमायगोनाम् ॥ ८ ॥

अध । श्वेतम् । कलशम् । गोभिः । अक्तम् । कार्ष्मन् । आ ।
वाजी । अक्रमीत् । ससऽवान् । आ । हिन्विरे । मनसा ।
देवऽयन्तः । कक्षीवते । शतऽहिमाय । गोनाम् ॥ ८ ॥

अध अथानन्तरं श्वेतं संप्रतिसोमसंसर्गात् श्वेतवर्णं गोभिरुदकैः अक्तं संपृक्तं द्रोणकलशं ससवान् संभजन् सोम आक्रमीत् आक्रमते कार्ष्मन् कार्ष्मशब्दः काष्ठावचनः आजिंधावन्तोयोद्धारोयांगन्तुमिच्छन्ति तस्यां काष्ठायां वाजी कश्चिदश्वो युद्धंभजमानः आक्रमीत् आक्रमते सोमः काष्ठायां द्रोणकलशेपततीत्यर्थः । ततस्तस्मैसोमाय देवयन्तः देवानिच्छन्तः ऋत्विजः मनसा आहिन्विरे स्तुतीराभिमुख्येनप्रेरयन्ति । तत्र शतहिमाय बहुगमनाय कक्षीवते स्तोत्रकारिणे एतन्नामकाय ऋषये सोमः गोनां गाः पशून् प्रेरयति गोःपादान्तइतिनुडागमः क्रियाग्रहणंकर्तव्यमिति संप्रदानसंज्ञा चतुर्थ्यर्थेषष्ठी ॥ ८ ॥

८. सोम श्वेत और गोरस से युक्त द्रोणकलश को, अश्व के समान, लाँघते हैं। देवाभिलाषी ऋत्विक् लोग सोम के लिए स्तुति प्रेरित करते हैं। सोम बहुत चलनेवाले कक्षीवान् ऋषि के लिए पशु देते हैं।

अथ नवमी—

अद्भिःसोमपपृचानस्यतेरसोव्योवारंविपवमानधावति ।
समृज्यमानःकविभिर्मदिन्तमःस्वदस्वेन्द्रायपवमानपीतये॥९॥३२॥

अत्ऽभिः । सोम । पपृचानस्य । ते । रसः । अव्यः । वारम् ।
वि । पवमान । धावति । सः । मृज्यमानः । कविऽभिः ।
मदिन्ऽतम । स्वदस्व । इन्द्राय । पवमान । पीतये ॥ ९ ॥ ३२ ॥

हे पवमान पवित्रेण पूयमान हे सोम अद्भिर्वसतीवर्यादिभिरुदकैः पपृचानस्य संपृच्यमानस्य ते तव रसोव्ययः अवेर्वारं वालं दशापवित्रं विधावति विविधं प्राप्नोति । ततः हे मदिन्तम

मादयितृतम हे पवमानसोम त्वं कविभिः क्रान्तकर्मभिः ऋत्विग्भिर्मृज्यमानः पूयमानः सन् इन्द्राय पीतये इन्द्रस्य पानार्थं स्वदस्व मियरसोभव ॥ ९ ॥

९. शोधित सोम, जल में मिश्रित होकर तुम्हारा रस मेषलोममय दशापवित्र की ओर जाता है। मादक-श्रेष्ठ सोम, क्रान्तकर्मा ऋत्विकों के द्वारा शोधित होकर इन्द्र के पान के लिए प्रिय रसवाले बनो।

॥ इति सप्तमस्य द्वितीये द्वात्रिंशोवर्गः ॥ ३२ ॥

अभिप्रियाणीतिपंचर्चं अष्टमं सूक्तं भार्गवस्यकवेरार्षं जागतं पवमानसोमदेवताकं । तथानुक्रम्यते—अभिप्रियाणिपंचकविरिति । गतोविनियोगः ।

तत्र प्रथमा—

अभिप्रियाणिपवतेचनोहितोनामानियह्वोअधियेषुवर्धते ।
आसूर्यस्यबृहतोबृहन्नधिरथंविष्वंचमरुहद्विचक्षणः ॥ १ ॥

अभि । प्रियाणि । पवते । चनःऽहितः । नामानि । यह्वः । अधि । येषु । वर्धते । आ । सूर्यस्य । बृहतः । बृहन् । अधि । रथम् । विष्वंचम् । अरुहत् । विऽचक्षणः ॥ १ ॥

चनोहितः चनइत्यन्ननाम चायतेरसुनि चनइत्यौणादिकसूत्रेण निपातितः चनसेन्नाय हितः । यद्वा हितान्नः सोमः प्रियाणि जगतः प्रीणयितृणि नामानि नमनशीलानि तान्युदकान्यभिपवते अभितःकरोति येष्वन्तरिक्षस्थितेषूदकेषु यह्वोमहानयंसोमोधिवर्धते अधिकंप्रवृद्धोभवति अपांमध्येसोमोवसति ततोबृहन् महान् सोमः बृहतोमहतः परिवृढस्यसूर्यस्य विष्वंचं विष्वग्गमनं अधि उपरिरथं विचक्षणः सर्वस्यविद्रष्टा सन् आरुहत् आरोहति अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठतेइति ॥ १ ॥

१. अन्न के लिए सोम उपयोगी हैं। संसार के प्रिय और गमनशील जल के चारों ओर सोम क्षरित होते हैं। जल में महान् सोम बढ़ते हैं। महान् सोम महान् सूर्य के रथ के ऊपर चढ़ गये। सोम सबके द्रष्टा हैं।

ऋतस्यजिह्वापवतेमधुप्रियंवक्तापतिर्धियोअस्याअदाभ्यः ।
दधातिपुत्रःपित्रोरपीच्यंनामतृतीयमधिरोचनेदिवः ॥ २ ॥

ऋतस्य । जिह्वा । पवते । मधु । प्रियम् । वक्ता । पतिः । धियः । अस्याः । अदाभ्यः । दधाति । पुत्रः । पित्रोः । अपीच्यम् । नाम । तृतीयम् । अधि । रोचने । दिवः ॥ २ ॥

ऋतस्य सत्यभूतस्य यज्ञस्य जिह्वा मुख्यत्वेन जिह्वास्थानीयः सोमः प्रियं प्रियकरं मधु मदकरं रसं पवते क्षरति । कीदृशः वक्ता शब्दकृत् यद्वा स्तोतृभिः क्रियमाणाः स्तुतयः साधीयस्यइति प्रतिश्रवणस्य कर्ता अस्याः धियः एतस्यकर्मणः पतिः पालयिता अदाभ्योरक्षोभिर्हिंसितुमशक्यः पुत्रोयजमानः पित्रोर्मातापित्रोरपीच्यं अन्तर्हितं यन्नाम तौ नजानीतः नामकरणवेलायां । तस्मात्तयोरपरिज्ञायमानं तत्तृतीयं नाम दिवोद्युलोकस्य रोचने दीप्यमाने सोमेभिषूयमाणेसति अधि दधाति अत्यन्तं धारयति । नक्षत्रव्यावहारिकनाम्नी प्रभाष्य सोमयाजीति तृतीयमस्यनामेति भगवताबौधायनेनोक्तं ॥ २ ॥

२. सत्यरूप यज्ञ के प्रधान सोम प्रियकर और मदकर रस गिराते हैं। सोम शब्द करनेवाले, कर्मपालक और अवध्य हैं। द्युलोक के दीपक सोम का अभिषव होने पर पुत्र (यजमान) एक ऐसा नाम धारण करता है, जिसे उसके माता-पिता नहीं जानते।

अवद्युतानःकलशाँअचिक्रदन्नृभिर्येमानःकोशआहिरण्यये ।
अभीमृतस्यदोहनाअनूषतादधित्रिपृष्ठउषसोविराजति ॥ ३ ॥

अव । द्युतानः । कलशान् । अचिक्रदत् । नृऽभिः । येमानः ।
कोशे । आ । हिरण्यये । अभि । ईम् । ऋतस्य । दोहनाः ।
अनूषत । अधि । त्रिऽपृष्ठः । उषसः । वि । राजति ॥ ३ ॥

द्युतानः द्युतदीप्तौ दीप्यमानः नृभिः कर्मनेतृभिर्ऋत्विग्भिः हिरण्यये हिरण्मये कोशे अधिषवणचर्मणि तस्यहिरण्मयत्वं हिरण्यपाणिरभिषुणोतीति हिरण्यसंबन्धात् तादृशेकोशे येमानः छान्दसे कर्मणि लिटि कानचि रूपं नियम्यमानः सोमःततः ऋतस्य सत्यभूतस्य यज्ञस्यदोहनादोग्धारः ऋत्विजईमेनं सोममभ्यनूषत अभिष्टुवन्ति । ग्रावाणोवत्साऋत्विजोदुहन्तीति । तैत्तिरीयब्राह्मणे एषांदोग्धृत्वमभिहितं सोमः कलशान् द्रोणाभिधानान् प्रतिअवाचिक्रदत् अवक्रन्दति शब्दायते । ततः त्रिपृष्ठः त्रीणिसवनान्येव पृष्ठानि यस्य सतथोक्तः त्रिषु सवनेषु सोमस्य विद्यमानत्वात् त्रिचक्रादित्वात् उत्तरपदान्तोदात्तत्वं । तादृशः सोमः उषसोधि यागाहनि विराजति अधिशीङ्स्थासामितिद्वितीया । तेषु अहःसु विशेषेणदीप्यते । यद्वा राजतिरन्तर्णीतण्यर्थः अहानि प्रकाशयति ॥ ३ ॥

३. दीप्तिमान् और ऋत्विकों के द्वारा सुवर्णमय अभिषवण-चर्म पर रखे गये सोम का, यज्ञ का दोहन करनेवाले ऋत्विक् लोग, अभिषव करते हैं। सोम कलश में शब्द करते हैं। तीन सवनोंवाले सोम यज्ञ-दिन में प्रातःकाल शोभा पाते हैं।

---

१ तै० सं० ६. २. ११.

अथ चतुर्थी—

अद्रिभिःसुतोमतिभिश्चनोहितःप्ररोचयन्रोदसीमातराशुचिः।
रोमाण्यव्यासमयाविधावतिमधोर्धारापिन्वमानादिवेदिवे ॥ ४ ॥

अद्रिऽभिः । सुतः । मतिऽभिः । चनःऽहितः । प्रऽरोचयन् ।
रोदसी इति । मातरा । शुचिः । रोमाणि । अव्या । समया ।
वि । धावति । मधोः । धारा । पिन्वमाना । दिवेऽदिवे ॥ ४ ॥

मतिभिः । मनज्ञाने मंत्रेवृषेषपचमनेतिकिन्नुदात्तः । स्तुतिभिरद्रिभिर्ग्रावभिश्च सुतोभिषुतोचनोहितः चनसेन्नायहितः हितान्नोवा मातरा जगतोनिर्मात्र्यौ रोदसी द्यावापृथिव्यौ प्ररोचयन् स्वतेजसा प्रकाशयन् अतएव शुचिर्दीप्यमानः एवंविधः सोमः अव्यानि अविभवानि रोमाणि तैःकृतानिपवित्राणि समया अभितः समीपे विधावति विशेषेण रक्षति किंच पिन्वमाना अद्भिः सिच्यमाना मधोर्मदकरस्य सोमस्य धारा दिवेदिवे अन्वहं दीर्घसत्रेषु पवित्राण्युभयतः पवते ॥ ४ ॥

४. पत्थरों से अभिषुत, अन्न के हितैषी और शुद्ध सोम द्यावापृथिवी को प्रकाशित करके मेषलोममय पवित्र की ओर जाते हैं। जलमिश्रित और मदकर सोम की धारा अनुदिन पवित्र पर प्रवाहित होती है।

अथ पंचमी—

परिसोमप्रधन्वास्वस्तयेनृभिःपुनानोअभिवासयाशिरम् ।
येतेमदाआहनसोविहायसस्तेभिरिन्द्रंचोदयदातवेमघम्॥५॥३३॥

परि । सोम । प्र । धन्व । स्वस्तये । नृऽभिः । पुनानः । अभि ।
वासय । आऽशिरम् । ये । ते । मदाः । आऽहनसः । विऽहायसः ।
तेभिः । इन्द्रम् । चोदय । दातवे । मघम् ॥ ५ ॥ ३३ ॥

हे सोम स्वस्तये अविनाशाय परिप्रधन्व पात्राणि परितः प्रगच्छ धविर्गत्यर्थः । किंच नृभिः कर्मनेतृभिर्ऋत्विग्भिः पुनानः पूयमानस्त्वं आशिरमाश्रयणं क्षीरादिकमभिवासय आच्छादय संयोजयेतियावत् । आहनसः आहनवन्तोवचनवन्तइतियास्कः । शत्रूणामाभिमुख्येन हन्तारः

१ नि० ४. १५.

अभिहन्यमाना अभिपूयमाणाः स्तुतिमन्तः शब्दवन्तोवा विहायसःमहन्नामैतत् महान्तस्तेत्वदीया येमदा मदहेतवोरसाः सन्ति तेभिस्तैः सोमैरस्माभिर्दीयमानैर्मघं मंहनीयं धनमस्मभ्यं दातवे दातुमिन्द्रं चोदय प्रेरय ॥ ५ ॥

५. सोम, कल्याण के लिए तुम चारों ओर जाओ। कर्म-निष्ठा के द्वारा शोधित होकर तुम क्षीर आदि में मिलो। वचनवाले, शत्रु-हन्ता, अभिपुत और महान् सोम प्रशस्य धन देनेवाले इन्द्र को हमारे पास भेजें।

॥ इति सप्तमस्य द्वितीये त्रयस्त्रिंशोवर्गः ॥ ३३॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येण विरचिते माधवीयेवेदार्थप्रकाशे ऋक्ससंहिताभाष्ये सप्तमाष्टके द्वितीयोध्यायः ॥ २ ॥

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत् । निर्ममे तमहंवन्दे विद्यातीर्थमहेश्वरं ॥ १ ॥

व्याख्यायाव्यहतप्रज्ञः सप्तमस्यद्वितीयकं । अध्यायंसायणामात्यस्तृतीयं व्याकरोत्यथ ॥ २ ॥

तत्र धर्तेतिपंचर्चं नवमंसूक्तं भार्गवस्यकवेरार्षं जागतं पवमानसोमदेवताकं । धर्तेत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

ॐम् धर्तादिवःपवतेकृत्व्योरसोदक्षोदेवानामनुमाद्योनृभिः ।
हरिःसृजानोअत्योनसत्वभिर्वृथापाजांसिकृणुतेनदीष्वा ॥ १ ॥

धर्ता । दिवः । पवते । कृत्व्यः । रसः । दक्षः । देवानाम् ।
अनुऽमाद्यः । नृऽभिः । हरिः । सृजानः । अत्यः । न । सत्वऽभिः ।
वृथा । पाजांसि । कृणुते । नदीषु । आ ॥ १ ॥

धर्ता सर्वस्यधारकः सोमोदिवोन्तरिक्षादन्तरिक्षस्थिताद्दशापवित्रात् पवते पूयते । कीदृशः सोमः कृत्व्यः कर्तव्यः शोध्यइत्यर्थः रसोरसात्मकः देवानांदक्षः बलप्रदः यद्वा दक्षः प्रवर्धनीयोदेवानामर्थाय तथा नृभिर्नेतृभिर्ऋत्विग्भिः अनुमाद्यः अनुमदनीयः स्तुत्योवा हरिर्हरितवर्णः सत्वभिः प्राणिभिः सृजानः सृज्यमानः अत्योन अश्वइव सयथा शिक्षितो वृथाअनायासेन गच्छति तद्वत् वृथा अप्रयत्नेन पाजांसि बलानि स्वीयान्वेगान् कृणुते कुरुते नदीषु वसतीवरीषु ताभिरित्यर्थः । आसिक्तइतिशेषः अयमभिषवसमयाभिप्रायः ॥ १ ॥

१. सोम सबके धारक हैं । ये अन्तरिक्ष (अन्तरिक्षस्थ दशापवित्र) से क्षरित होते हैं । सोम शोधनीय, रस-रूप देवों के बल, वर्द्धक-ऋत्विकों के द्वारा स्तुत्य, हरितवर्ण और प्राणियों के द्वारा बनाये जानेवाले हैं । वसतीवरी में घोड़े के समान वे अपने वेग को करते हैं ।

अथ द्वितीया—

शूरोनधत्तआयुधागभस्त्योःस्वःसिषासन्त्रथिरोगविष्टिषु ।
इन्द्रस्यशुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानोअज्यतेमनीषिभिः॥२॥

शूरः । न । धत्ते । आयुधा । गभस्त्योः । स्वः१रिति स्वः ।
सिसासन् । रथिरः । गोऽइष्टिषु । इन्द्रस्य । शुष्मम् । ईरयन् ।
अपस्युऽभिः । इन्दुः । हिन्वानः । अज्यते । मनीषिऽभिः ॥ २ ॥

अयं सोमोगभस्त्योर्हस्तयोः आयुधा आयुधानि शूरोन शूरइव धत्ते धारयति स्वः स्वर्गं सुखसाधनं यज्ञंवा सिषासन् संभक्तुमिच्छन् रथिरोरथवान् । रथादिरच्प्रत्ययः । गविष्टिषु यजमानस्यगवामेषणेषु सत्सु यजमानार्थं गोसंभजनाय रथवानित्यर्थः । इन्द्रस्य शुष्मं बलं ईरयन् प्रेरयन्निन्दुः सोमोदेवः अपस्युभिः कर्मेच्छुभिः मनीषिभिः मेधाविभिर्ऋत्विग्भिः हिन्वानः प्रेर्यमाणः अज्यते गोभिः ॥ २ ॥

२. वीर पुरुष के समान सोम दोनों हाथों में अस्त्र धारण करते हैं। गायों के खोजने के समय स्वर्ग की इच्छा करनेवाले सोम, यजमानों के लिए, रथवाले हुए थे। इन्द्र के बल का प्रेरण करनेवाले सोम कर्मेच्छु मेधावियों के द्वारा भेजे जाकर दूध आदि में मिलाये जाते हैं।

इन्द्रस्यसोमपवमानऊर्मिणातविष्यमाणोजठरेष्वाविश ।
प्रणःपिन्वविद्युदभ्रेवरोदसीधियानवाजाँउपमासिशश्वतः ॥ ३ ॥

इन्द्रस्य । सोम । पवमानः । ऊर्मिणा । तविष्यमाणः । जठरेषु ।
आ । विश । प्र । नः । पिन्व । विऽद्युत् । अभ्राऽइव । रोदसी
इति । धिया । न । वाजान् । उप । मासि । शश्वतः ॥ ३ ॥

हे सोम पवमानः पूयमानस्त्वं तविष्यमाणो वर्धयिष्यमाणःसन् इन्द्रस्य जठरेषु ऊर्मिणा प्रभूतधाराया विश जठरप्रदेशस्य बाहुल्यात् बहुवचनं । नोस्मदर्थं विद्युदभ्रेव अभ्राणीव सा यथा दोग्धि अभ्राणि तद्वत् प्रपिन्व धुक्ष रोदसी द्यावापृथिव्यौ । किंच धिया कर्मणा न इदानीं नेतिसंप्रत्यर्थे शश्वतः बहुनामेव बहून् वाजान् अन्नानि उपसमीपे मासि निर्मासि ॥ ३ ॥

३. क्षरणशील सोम, वर्द्धिष्णु होकर इन्द्र के पेट में प्रचुर धारा से पैठो। जैसे बिजली मेघ का दोहन करती है, वैसे ही तुम अपने कर्मों के द्वारा द्यावापृथिवी का दोहन करके हमें बहुत अन्न देते हो।

विश्वस्यराजापवतेस्वर्दृशंऋतस्यधीतिमृषिषाळवीवशत् ।
यःसूर्यस्यासिरेणमृज्यतेपितामतीनामसमष्टकाव्यः ॥ ४ ॥

विश्वस्य । राजा । पवते । स्वःऽदृशः । ऋतस्य । धीतिम् ।
ऋषिषाट् । अवीवशत् । यः । सूर्यस्य । असिरेण । मृज्यते ।
पिता । मतीनाम् । असमष्टऽकाव्यः ॥ ४ ॥

विश्वस्य जगतोराजा स्वामी सोमः पवते पूयते। स्वदृशः स्वर्गद्रष्टुः सर्वद्रष्टुर्वा क्रतस्य सत्यभूतस्येन्द्रस्य मनुष्यवाच्यनृतशब्दप्रतियोगिकस्य क्रतशब्दस्य देवार्थः तत्राप्यौचित्येनेन्द्रः प्रतिगृह्यते। तस्य धीतिं मतिं कर्मवा ऋषिषाट् ऋषीणामतीन्द्रियद्रष्टॄणां अभिभविता समहत्त्वेन स्वयमप्यृषिश्रेष्ठत्वादितिभावः। तथाचमंत्रान्तरं—ब्रह्मादेवानांपदवीःकवीनामिति। ईदृशःसोमः अवीवशत् अकामयतेन्द्रस्यकर्म। यःसोमः सूर्यस्य देवस्यासिरेण क्षेपकेण रश्मिना मृज्यते असमष्टकाव्यः अन्यैःकविभिरव्याप्तकर्मा सोमोमतीनां अस्मदीयानां स्तुतीनां पिता पालकः स्वामी भवतीतिशेषः। यद्वा योमतीनां पिता असमष्टकाव्यश्चसन् मृज्यते सपवतइतिसंबन्धः ॥४॥

४. विश्व के राजा सोम क्षरित होते हैं। सर्वदर्शक और सत्यभूत सोम वा इन्द्र का कर्म ऋषियों से भी श्रेष्ठ है। सोम ने इन्द्र के कर्म की इच्छा की। सोम सूर्य की क्षेपक किरणों से शोधित होते हैं। सोम के कर्म को कवि लोग नहीं व्याप्त कर सकते। सोम हमारी स्तुतियों के पालक हैं।

वृषेवयूथापरिकोशमर्षस्यपामुपस्थेवृषभःकनिक्रदत्।
सइन्द्रायपवसेमत्सरिन्तमोयथाजेषामसमिथेत्वोतयः ॥ ५ ॥ १ ॥

वृषाऽइव। यूथा। परि। कोशम्। अर्षसि। अपाम्। उपऽस्थे।
वृषभः। कनिक्रदत्। सः। इन्द्राय। पवसे। मत्सरिन्ऽतमः।
यथा। जेषाम। सम्ऽइथे। त्वाऽऊतयः ॥ ५ ॥ १ ॥

हे सोम त्वं वृषेव यूथा यूथानि वृषभइव सयथा तानि प्रविशति तद्वत् कोशं कोशवद्रसधारकं कलशं पर्यर्षसि परिगच्छसि। कुत्र स्थः सन् अपामुपस्थे अन्तरिक्षे कीदृशः सन् वृषभोवर्षिता कनिक्रदच्छब्दंकुर्वन्। सत्वं हे सोम इन्द्रायेन्द्रार्थं पवसे पूयसे मत्सरिन्तमोमादयितृतमस्त्वं यथा वयं जेषाम जयेम समिथे संग्रामे त्वोतयस्त्वयारक्षिताः सन्तः ॥ ५ ॥

५. सोम, जैसे गोसमूह में साँड़ जाता है, वैसे ही तुम वर्षक शब्दकर्त्ता होकर और अन्तरिक्ष में अवस्थित रहकर द्रोण-कलश में जाते हो। मादकतम होकर तुम इन्द्र के लिए क्षरित होते हो। तुमसे रक्षित होकर हम युद्ध में विजयी होंगे। ॥ इति सप्तमस्य तृतीये प्रथमोवर्गः ॥ १ ॥

एषप्रकोशइति पंचचैदशमंसूक्तं ऋष्याद्याः पूर्ववत्। एषइत्यनुक्रान्तं। गतोविनियोगः।

तत्र प्रथमा—

एषप्रकोशेमधुमाँअचिक्रददिन्द्रस्यवज्रोवपुषोवपुष्टरः।
अभीमृतस्यसुदुघाघृतश्चुतोवाश्राअर्षन्तिपयसेवधेनवः ॥ १ ॥

---

१ ऋ० सं० ७. ४. ७.।

एषः । प्र । कोशे । मधुऽमान् । अचिक्रदत् । इन्द्रस्य । वज्रः ।
वपुषः । वपुःऽतरः । अभि । ईम् । ऋतस्य । सुऽदुघाः ।
घृतऽश्चुतः । वाश्राः । अर्षन्ति । पयसाऽइव । धेनवः ॥ १ ॥

एषोयं सोमोमधुमान् मधुररसः कोशे द्रोणकलशे प्राचिक्रदत् प्रकर्षेणशब्दायते कीदृशः-एषः इन्द्रस्यवज्रो वज्रस्थानीयः बलकरत्वेन वज्रवत् प्रहरणसाधनत्वात् वज्रत्वोपचारः एष-एवहिसोमः वज्रे इन्द्रस्यसाधने तथा वपुषो बीजानांवपुरन्यस्माद्वपुष्टरः अतिशयेन यथा बीजावापस्य सोमकर्तृकत्वात् । सोमोवैरेतोधाइतिश्रुतेः । ईमस्य ऋतस्य सत्यफलस्य सोमस्य धाराइतिशेषः । अभ्यर्षन्ति अभिगच्छन्ति । कीदृश्यस्ताः सुदुघाः सुष्ठुदोग्ध्यः फलानां । घृतश्चुतः उदकस्य रसस्य वा क्षरयित्र्यः वाश्राः शब्दयन्त्यः किमिव पयसेव पयसायुक्ता वाश्राः धेनवइवेति ॥ १ ॥ इन्द्र के वज्र, बीजों के बोनेवाले और मधुर रसवाले सोम द्रोण-कलश में शब्द करते हैं। उनकी धारायें फलों को दूहनेवाली, जल या रस को बरसानेवाली, और शब्द करनेवाली हैं। दूधवाली गायों के समान वे जा रही हैं। १. अथ द्वितीया—

सपूर्व्यःपवतेयंदिवस्परिश्येनोमथायादिषितस्तिरोरजः ।
समध्वआयुवतेवेविजानइत्कृशानोरस्तुर्मनसाहबिभ्युषा ॥ २ ॥

सः । पूर्व्यः । पवते । यम् । दिवः । परि । श्येनः । मथायत् ।
इषितः । तिरः । रजः । सः । मध्वः । आ । युवते । वेविजानः ।
इत् । कृशानोः । अस्तुः । मनसा । अह । बिभ्युषा ॥ २ ॥

सः सोमः पूर्व्यः प्रत्नः पवते पूयतेभिषूयतइत्यर्थः । यंसोमंदिवोद्युलोकात् श्येनइषितः स्वमात्राप्रेषितःसन् परिमथायत् पर्यमथ्नात् तिरस्तीर्णं तिरस्कुर्वन् । किंच रजः तृतीयंलोकं सएव सोमो मध्वो मधुररसं सोमं आयुवते यौति पृथक्करोति द्युलोकात् स्वयं वेविजानइत् चलन्नधोगच्छन् कृशानोः सोमपालस्य अस्तुः शरक्षेप्तुः सकाशाद्बिभ्युषा भीतेनमनसा अह सह मध्वआयुवतइतिसंबंधः । कृशानोः सोमपालत्वं ब्राह्मणेस्पष्टमुक्तं—कृशानुःसोमपालःसव्यस्थपदः ॥ २ ॥ प्राचीन सोम क्षरित होते हैं। अपनी माता के द्वारा भेजा जाकर श्येन पक्षी द्युलोक से उन सोम को ले आया था। ये ही मधुर रसवाले सोम तीसरे लोक को अलग करते हैं। कृशानु नामक धनुर्धारी के बाण-पात से डरकर सोम, उद्विग्न, भाव से, मधुर रस के साथ मिश्रित होते हैं। २.

---

१ तै० ब्रा० १. ८. १. । १ ऐ० ब्रा० ३. २६.

अथ तृतीया—

तेनःपूर्वासउपरासइन्दवोमहेवाजायधन्वन्तुगोमते ।
ईक्षेण्यासोअह्योनचार्वोब्रह्मब्रह्मयेजुजुष्टुर्हविर्हविः ॥ ३ ॥

ते । नः । पूर्वासः । उपरासः । इन्दवः । महे । वाजाय । धन्वन्तु ।
गोऽमते । ईक्षेण्यासः । अह्यः । न । चार्वः । ब्रह्मऽब्रह्म ।
ये । जुजुष्टुः । हविःऽहविः ॥ ३ ॥

ते वक्ष्यमाणाः पूर्वासः पूर्वे उपरासः उपरता अवेत्युपराः तादृशाइन्दवः सोमाः महे महते गोमते गोमन्तं वाजायान्नायान्नलाभार्थं धन्वन्तु गच्छन्तु प्राप्नुवन्तु । कीदृशाइन्दवः ईक्षेण्यासः ईक्षणीयाः संदर्शनीयाः अह्योन अह्यः स्त्रियः आहननात् ताइव सुवेषाःस्त्रियइव चारवोरमणीयाः । तेइत्युक्तं केइत्याह येइन्दवोब्रह्मब्रह्म सर्वमपिस्तावकंमंत्रजातं हविर्हविः सर्वमपिहविर्जातंच जुजुष्टुः सेवन्ते ॥ ३ ॥

३. दर्शनीय स्त्रियों के समान रमणीय, हवि का सेवन करनेवाले, प्राचीन तथा आधुनिक सोम महान् गौवाले मुझे, अन्न-लाभ के लिए, प्राप्त करें।

अथ चतुर्थी—

अयंनोविद्वान्वनवद्वनुष्यतइन्दुःसत्राचामनसापुरुष्टुतः ।
इनस्ययःसदनेगर्भमादधेगवांमुरुब्जमभ्यर्षतिव्रजम् ॥ ४ ॥

अयम् । नः । विद्वान् । वनवत् । वनुष्यतः । इन्दुः । सत्राचा ।
मनसा । पुरुऽस्तुतः । इनस्य । यः । सदने । गर्भम् । आऽदधे ।
गवाम् । उरुब्जम् । अभि । अर्षति । व्रजम् ॥ ४ ॥

अयमिन्दुः सोमोनोस्मान् वनुष्यतोहन्तुमिच्छतः शत्रून् विद्वान् जानन् हन्तुं वनवत् हन्तु तान् । केनसाधनेन सत्राचा सहांचता मनसा कीदृशः पुरुष्टुतः बहुभिःस्तुतः यः सोमोऽनस्येश्वरस्याग्नेः सदनेस्थाने भूमौ वेद्यां वर्तमानोगर्भमादधे धारयत्योषधीषु यश्चगवामस्मदीयानां शत्रुभिरपहृतानामुरुब्जं प्रभूतानामपांपयसां जनकं व्रजमभ्यर्षति गच्छति सवनवदिति॥४॥

४. बहुतों के द्वारा स्तुत, उत्तर वेदी में वर्त्तमान और क्षरणशील सोम मनोयोगपूर्वक हमारे मारनेवाले शत्रुओं को समझकर मारें। वे ओषधियों में गर्भ धारण करते हैं। वे बहुत दूध देनेवाली गायों की ओर आते हैं।

अथ पञ्चमी—

चक्रिर्दिवःपवतेकृत्व्योरसोमहाँअदब्धोवरुणोहुरुग्यते ।
असाविमित्रोवृजनेषुयज्ञियोत्योनयूथेवृषयुःकनिक्रदत् ॥ ५॥२॥

चक्रिः । दिवः । पवते । कृत्व्यः । रसः । महान् । अदब्धः । वरुणः ।
हुरुक् । यते । असावि । मित्रः । वृजनेषु । यज्ञियः । अत्यः ।
न । यूथे । वृषऽयुः । कनिक्रदत् ॥ ५ ॥ २ ॥

चक्रिः सर्वस्यकर्ता कृत्व्यः कर्मण्योरसोरसात्मकोमहान् गुणैरधिकः अदब्धः अहिंस्यः वरुणः हुरुक् कुटिलं यते गच्छते इतस्ततः परिचरतइत्यर्थः । तदर्थं दिवःसकाशात् पवते पूयते अन्तरिक्षस्थाद्दशापवित्रादित्यर्थः । किंच सोमः असावि सूयते कदा वृजनेषु अरिष्टेषुसत्सु तत्परिहारार्थं। कीदृशः समित्रः सर्वेषांमित्रभूतः यज्ञियोयष्टव्यः अत्योन अश्वइव यूथे वडवायूथे सयथावृषयुःसन् शब्दंकरोति तद्वदसौ वृषभोरसस्यवर्षिता कनिक्रदच्छब्दंकुर्वन् असावि इति ॥ ५ ॥ सबके कर्त्ता, कर्मठ, रसात्मक, अहिंसनीय और वरुण के समान महान् सोम इधर-उधर विचरण करते हैं। विपत्ति आने पर सबके मित्र और भजनीय सोम क्षरित किये जाते हैं। जैसे अश्व घोड़ियों के झुंड में जाता है, वैसे ही वर्षक सोम शब्द करते हुए क्षरित होते हैं। ५.

॥ इति सप्तमस्य तृतीये द्वितीयोवर्गः ॥ २ ॥

प्रराजावाचमिति पंचर्चमेकादशंसूक्तं कृष्णायाः पूर्ववत् । प्रराजेत्यनुक्रान्तं । गतोविनियोगः ।

प्रराजावाचंजनयन्नसिष्यददपोवसानोअभिगाइयक्षति ।
गृभ्णातिरिप्रमविरस्यतान्वाशुद्धोदेवानामुपयातिनिष्कृतम् ॥१॥

प्र । राजा । वाचम् । जनयन् । असिस्यदत् । अपः । वसानः ।
अभि । गाः । इयक्षति । गृभ्णाति । रिप्रम् । अविः । अस्य ।
तान्वा । शुद्धः । देवानाम् । उप । याति । निःऽकृतम् ॥ १ ॥

राजा राजमानोयं सोमोभिषूयमाणः सन् वाचं शब्दं जनयन् उत्पादयन् असिष्यदत्यस्यन्दते । तथा अपोवसतीवरीर्वसानः आच्छादयन् गाः स्तुतीः अभि इयक्षति अभिगच्छति इयक्षतिर्गतिकर्मसुपठितः अस्यसोमस्य रिप्रं अनुपादेयत्वेन पापरूपं अभिषुतवल्लीशकलादिरूपं अविरविरोमनिर्मितं दशापवित्रं तान्वा स्वीयेन वस्त्रेण गृभ्णाति गृह्णाति शोधनसमये पश्चात् शुद्धोदेवानां निष्कृतं संस्कृतंस्थानं उपयाति उपगच्छति ॥ १ ॥

१. शोभायमान सोम शब्द करते हुए और जल को आच्छादित करते हुए स्तुति की ओर जाते हैं। सोम का जो असार भाग है, उसे मेषलोममय दशापवित्र रख लेता है। शुद्ध होकर सोम देवों के संस्कृत स्थान को जाते हैं।

अथ द्वितीया—

इन्द्रायसोमपरिषिच्यसेनृभिर्नृचक्षाऊर्मिःकविरंज्यसेवने ।
पूर्वीर्हितेस्रुतयःसन्तियातवेसहस्रमश्वाहरयश्चमूषदः ॥ २ ॥

इन्द्राय । सोम । परि । सिच्यसे । नृऽभिः । नृऽचक्षाः ।
ऊर्मिः । कविः । अज्यसे । वने । पूर्वीः । हि । ते । स्रुतयः ।
सन्ति । यातवे । सहस्रम् । अश्वाः । हरयः । चमूऽसदः ॥ २ ॥

हे सोम त्वमिन्द्रायेन्द्रार्थं नृभिर्नेतृभिर्ऋत्विग्भिः परिषिच्यसे अभिषूयसे । तथा हेसोम नृचक्षाः नृणां यष्टॄणामनुग्रहेण द्रष्टा ऊर्मिः प्रेर्यमाणः प्रवृद्धोवा कविर्मेधावी च त्वं वनेउदके अज्यसे प्रेर्यसे पूर्वीर्बह्वीर्हि तेस्रुतयोमार्गाः छिद्राणिसन्ति यातवे यातुं । अल्पस्यसोमस्यापरिमितस्तुतिगमनासंभवात्तस्यबाहुल्यमाह चमूषदः अभिषवणफलकयोः सीदतः सहस्रं अपरिमिता अश्वा व्याप्ता हरयोहरितवर्णाः अंशवःसन्ति अथचेन्द्राय परिषिच्यसइत्युक्तत्वादिन्द्रप्राप्तौमार्गसाधनयोः सद्भाव उत्तरार्धेनप्रतिपादितः । तेपुरातन्यः सरण्यः सन्तीन्द्रंप्रतियातुं । तथा सहस्रसंख्याकाहरितवर्णाः अश्वाश्च सन्ति अथचेन्द्राय चमूषदस्तवेति ॥ २ ॥

२. सोम, तुम्हें, इन्द्र के लिए, ऋत्विक् लोग ढालते हैं। यजमानों के द्वारा वर्द्धित होकर मेधावी तुम जल में मिलाये जाते हो। तुम्हें गिरने के लिए अनेक मार्ग (छिद्र) हैं। प्रस्तर-फलकों पर अवस्थित तुम्हारी असंख्य और हरित-वर्ण किरणें हैं। अथ तृतीया—

समुद्रियाअप्सरसोमनीषिणमासीनाअन्तरभिसोममक्षरन् ।
ताईंहिन्वन्तिहर्म्यस्यसक्षणिंयाचन्तेसुम्नंपवमानमक्षितम् ॥ ३ ॥

समुद्रियाः । अप्सरसः । मनीषिणम् । आसीनाः । अन्तः ।
अभि । सोमम् । अक्षरन् । ताः । ईम् । हिन्वन्ति । हर्म्यस्य ।
सक्षणिम् । याचन्ते । सुम्नम् । पवमानम् । अक्षितम् ॥ ३ ॥

समुद्रियाः समुद्रसाधनत्वात्समुद्रमन्तरिक्षं तत्संबन्धिन्यः अप्सरसः काश्चनअंतर्यज्ञमध्ये आसीनाः पात्रेषुवर्तमानाः वसतीवर्योमनीषिणं मेधाविनं सोममभ्यक्षरन् अभिषूयमाणं सोममभिक्षरन्ति ताईं एनं पवमानं हर्म्यस्य हर्म्यवत्सुखकरस्य यागगृहस्य सक्षणिं चेतनशीलं हिन्वन्ति वर्धयन्ति पोषयन्ति तएते स्तोतारोवा पवमानं सोमं अक्षितमक्षीणं सुम्नं सुखं याचन्ते

पार्थयन्ते तत्रायंभावः काश्चनाप्सरसः सोमंराजानं मनीषिणंकामयमाना देवानपिपरित्यज्य स्वर्गादागत्य राज्ञःसमीपस्थित्वा तस्यरसानाददते स्वरसेनवर्धयन्ति तंसुखं याचन्तइति ॥ ३ ॥

३. अन्तरिक्ष-स्थित अप्सरायें यज्ञ के बीच में बैठकर पात्रों में स्थित मेधावी सोम को क्षरित करती हैं। इन क्षरणशील और कोठे के समान सुखकर यज्ञ-गृह को चेतनशील करनेवाले सोम को अप्सरायें बढ़ाती हैं। स्तोता लोग सोम से ह्रासहीन सुख मांगते हैं।

गोजिन्नःसोमोरथजिद्धिरण्यजित्स्वर्जिदब्जित्पवतेसहस्रजित ।
यंदेवासश्चक्रिरेपीतयेमदंस्वादिष्ठंद्रप्समरुणंमयोभुवम् ॥ ४ ॥

गोऽजित् । नः । सोमः । रथऽजित् । हिरण्यऽजित् । स्वःऽजित् ।
अप्ऽजित् । पवते । सहस्रऽजित् । यम् । देवासः । चक्रिरे ।
पीतये । मदम् । स्वादिष्ठम् । द्रप्सम् । अरुणम् । मयःऽभुवम् ॥ ४ ॥

नोस्माकं गोजित् गवांजेता तथा रथजित् रथस्यजेता हिरण्यजित् हिरण्यजेता तथा स्वर्जित् स्वर्गस्य सुखस्यजेता अब्जित् अपांजेता सहस्रजित् सहस्रसंख्याकस्य धनस्यजेता सोमः पवते पूयते यंदेवासोदेवाश्चक्रिरेकृतवन्तः। किमर्थं पीतये पानाय कीदृशं सोमं मदं मदकरं स्वादिष्ठं स्वादुतमं द्रप्सं रसात्मकं अरुणं अरुणवर्णं मयोभुवं सुखस्यभावयितारं ॥ ४ ॥

४. क्षरणशील सोम गायों, रथ, सुवर्ण, सुख, जल और अपरिमित धन के जेता हैं। मदकर, स्वादुतम, रसात्मक, अरुणवर्ण और सुखकर्त्ता सोम को, पान के लिए, देवों ने बनाया है।

एतानिसोमपवमानोअस्मयुःसत्यानिकृण्वन्द्रविणान्यर्षसि ।
जहिशत्रुमन्तिकेदूरकेचयउर्वींगव्यूतिमभयंचनस्कृधि ॥ ५ ॥३॥

एतानि । सोम । पवमानः । अस्मऽयुः । सत्यानि । कृण्वन् ।
द्रविणानि । अर्षसि । जहि । शत्रुम् । अन्तिके । दूरके । च । यः ।
उर्वीम् । गव्यूतिम् । अभयम् । च । नः । कृधि ॥ ५ ॥ ३ ॥

हे सोम एतानि पूर्वमंत्रोक्तानि गवादीनि द्रविणानि सत्यानि कृण्वन् कुर्वन् पवमानः पूयमानः अर्षसि प्रवसे जहि च शत्रुं योस्मच्छत्रुरंतिके समीपे दूरके अत्यंतदूरे देशेच वर्तते तं जहि । तथा उर्वीं गव्यूतिं विस्तीर्णं मार्गं अभयं नोस्माकं कृधि कुरु ॥ ५ ॥

५. सोम, तुम पूर्वोक्त समस्त वस्तुओं को हमारे लिए यथार्थ करते हो। शोधित होकर क्षरित होते हो, जो शत्रु दूर वा समीप है, उसे मारो और विस्तीर्ण मार्ग को हमारे लिए अभय करो।

॥ इति सप्तमस्य तृतीये तृतीयोवर्गः ॥ ३ ॥

अचोदसइति पंचर्चद्वादशंसूक्तं कृष्णायाः पूर्ववत्। अचोदसइत्यनुक्रान्तं। गतोविनियोगः।

अचोदसोनोधन्वन्त्विन्दवःप्रसुवानासोबृहद्दिवेषुहरयः।
विचनशंन्नइषोअरातयोर्योनशन्तसनिषन्तनोधियः॥ १॥

अचोदसः। नः। धन्वन्तु। इन्दवः। प्र। सुवानासः।
बृहत्ऽदिवेषु। हरयः। वि। च। नशन्। नः। इषः।
अरातयः। अर्यः। नशन्त। सनिषन्त। नः। धियः॥१॥

अचोदसः अचोदनाः अनन्यप्रेरिताइन्दवः सोमाः नोस्माकं प्रधन्वंतु प्रगच्छन्तु धन्वतिर्गतिकर्मा कुत्र बृहद्दिवेषु प्रभूतदीप्तिषु यागेषु निमित्तेषु अथवा बृहद्दिवकुलजेषु मध्ये। नइतिसंबन्धः। कीदृशाइन्दवः सुवानासः सूयमाना हरयोहरितवर्णाः। किंच नोस्माकं येच इषोन्नस्यअरातयः अदातारःसन्ति तेच विनशन विनश्यन्तु। तथा अर्यः अरयोपि नशन्त विनश्यन्तु सनिषंत संभजन्तुच नोधियोस्मदीयानि कर्माणि देवा अस्मत्प्रियभूताया॥ १॥

१. प्रभूतदीप्ति यज्ञ में सोम स्वयं हमारे पास आयें। सोम क्षरणशील और हरित-वर्ण हैं। हमारे अन्न के नाशक नष्ट हो जायें। शत्रु भी नष्ट हो जायें। हमारे कर्मों को देवता लोग ग्रहण करें।

प्रणोधन्वन्त्विन्दवोमदच्युतोधनावायेभिरर्वतोजुनीमसि।
तिरोमर्तस्यकस्यचित्परिह्वृतिंवयंधनानिविश्वधाभरेमहि॥ २॥

प्र। नः। धन्वन्तु। इन्दवः। मदऽच्युतः। धना। वा। येभिः।
अर्वतः। जुनीमसि। तिरः। मर्तस्य। कस्य। चित्।
परिऽह्वृतिम्। वयम्। धनानि। विश्वधा। भरेमहि॥ २॥

धन्वन्तु प्रगच्छन्तु नोस्माकमिन्दवः सोमाः मदच्युतो मदस्राविणोवा अथवा किंचिदित्यर्थः धना धनान्यपि प्रधन्वन्तु येभिर्यैःसोमैः अर्वतोबलवतः शत्रोःसमीपं जुनीमसि जुनीमः प्राप्नुमः कस्यचित् कस्यापिमर्तस्य मनुष्यस्य प्रबलस्य परिह्वृतिं परितोबाधांतिरस्तिरस्कुर्वन्तोवयंधनानि गवादिरूपाणि विश्वधा सर्वदा भरेमहि बिभृयाम॥ २॥

२. मद-स्रावी सोम हमारे पास आयें। धन भी आवे। सोम की कृपा से हम बलवान् शत्रुओं का भी सामना कर सकें। किसी भी प्रबल मनुष्य की बाधा को तिरस्कार करके हम सदा धन प्राप्त करें।

उतस्वस्याअरात्याअरिर्हिषउतान्यस्याअरात्याइकोहिषः।
धन्वन्नतृष्णासमरीतनाँअभिसोमजहिपवमानदुराध्यः॥ ३॥

उत । स्वस्याः । अरात्याः । अरिः । हि । सः । उत । अन्यस्याः । अरात्याः । वृकः । हि । सः । धन्वन् । न । तृष्णा । सम् । अरीन् । तान् । अभि । सोम । जहि । पवमान । दुःऽआध्यः ॥ ३ ॥

उतापिच ससोमः स्वस्या अरात्याः स्वीयस्यशत्रोः समीपं अरिः अभिगन्ताहननाय । उतापिच ससोमोन्यस्या अस्मदीयायाअरात्या अस्मच्छत्रोर्वृकोहि हिंसकः खलु । अरातिशब्दः स्त्रीलिंगोप्यस्ति । अथप्रत्यक्षकृतः धन्वन्नतृष्णा धन्व निरुदकोदेशः तस्मिंस्थितस्य तृष्णेव सायया तंसमरीत प्राप्नोति तद्वत् तानुभयविधानशत्रून् जहि । किंच हे सोम पवमान दुराध्यः शत्रुभिः दुःसाध्यस्त्वं जहि ॥ ३ ॥

३. सोम अपने और हमारे शत्रुओं के हिंसक हैं। जैसे मरुभूमि में पिपासा लगी रहती है, वैसे ही तुम भी उक्त दोनों प्रकार के शत्रुओं के पीछे लगे रहते हो। क्षरणशील सोम, उन्हें नष्ट करो।

दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः ।
अद्रयस्त्वा बप्सति गोरधि त्वचि[1] अप्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ॥४॥

दिवि । ते । नाभा । परमः । यः । आऽददे । पृथिव्याः । ते । रुरुहुः । सानवि । क्षिपः । अद्रयः । त्वा । बप्सति । गोः । अधि । त्वचि । अप्ऽसु । त्वा । हस्तैः । दुदुहुः । मनीषिणः ॥ ४ ॥

हेसोम ते तव सपरमः उत्तरोंशो दिवि दिवः नाभा नाभौ द्युलोकस्य नाभिस्थानीयेदेशे अथवा नाभौ वृष्ट्यादेर्बंधके दिवि द्युलोकेवर्तते यआददे आदत्ते हविर्देवतारूपःसन् ते तव द्युलोकस्थांशस्यावयवाः पृथिव्याः सानवि समुच्छ्रितेदेशे पर्वतादिप्रदेशे क्षिपः क्षिप्ताः संतोरुरुहुः रोहन्ति त्वा त्वां द्युलोकस्थसोमांशभूतं अद्रयोग्रावाणोबप्सति भक्षयन्ति बप्सतिरत्तिकर्मा। कुत्र गोरधित्वचि । अधीतिसप्तम्यर्थानुवादी । आनडुहे अधिषवणचर्मणीत्यर्थः । यद्यपीदानींतनाः कृष्णाजिनेभिषुण्वन्ति नगोचर्मणि तथापि तस्मिन् सोमोमीयते क्रयार्थं । तथाचसति यस्मिन्मिमीते तस्याधिषवणचर्मेति सूत्रात् मानसाधनस्यैव गोचर्मणोधिषवणचर्मत्वाभिधानादविरोधः । त्वा त्वां तथा अप्सु वसतीवरीषु दुदुहुर्दुहन्ति अद्भिराप्लाव्यदुहन्तीत्यर्थः । यद्वा अप्सूदकेषु रसेषुनिमित्तेषु दुदुहुः कैः साधनैः हस्तैर्हस्तोहन्तेरितिनिरुक्तं । केमनीषिणोमेधाविनोध्वर्य्वादयः॥४॥

४. सोम, तुम्हारा परम अंश द्युलोक में है। वहाँ से तुम्हारे अंश पृथिवी के उन्नत प्रदेश (पर्वत) पर गिरे और वहाँ वृक्ष हो गये। पत्थरों से कूटे जाकर तुम्हें मेधावी लोग हाथों से गोचर्म पर, जल में, दूहते हैं।

---

१ नि० १. ७.।

अथ पञ्चमी—

एवातइन्दोसुभ्वंसुपेशंसंरसंतुञ्जन्तिप्रथमाअभिश्रियः ।
निदंनिदंपवमाननितारिषआविस्तेशुष्मोभवतुप्रियोमदः ॥५॥४॥

एव । ते । इन्दो इति । सुऽभ्वम् । सुऽपेशसम् । रसम् । तुञ्जन्ति ।
प्रथमाः । अभिऽश्रियः । निदम्ऽनिदम् । पवमान । नि । तारिषः ।
आविः । ते । शुष्मः । भवतु । प्रियः । मदः ॥ ५ ॥ ४ ॥

पूर्वत्राद्रयस्त्वांवप्सतीत्युक्तं तदेवोच्यते हे इन्दो सोम एव एवं इदानीं क्रियमाणप्रकारेण ते तव सुभ्वं शोभनभवनं सुपेशसं पेशइतिरूपनाम सुरूपं रसं प्रथमाः प्रथममेव यद्वा प्रथम-इतिमुख्यनाम प्रथमामुख्याः ग्रावाणः अध्वर्यवोवा अभिश्रियः अभिश्रयन्तःसन्तः तुंजन्ति प्रेरयन्ति। हे पवमान निदंनिदं अस्मन्निन्दकं सर्वमपिशत्रुं नितारिषः विनाशय। ते तव शुष्मो-बलकरः प्रियः प्रियभूतोमदः मदकरोरसः आविर्भवतु ॥५॥

५. सोम, प्रधान-प्रधान पुरोहित लोग तुम्हारे सुन्दर और सुरूप रस को चुलाते हैं। सोम, हमारे निन्दक शत्रु को नष्ट करो। अपना बलकर, प्रियकर और मदकर रस प्रकट करो।

॥ इति सप्तमस्य तृतीये चतुर्थोवर्गः ॥ ४ ॥

सोमस्यधारेति पंचर्चैत्रयोदशंसूक्तं भरद्वाजस्य वसुनाम्नआर्षं जागतं पवमानसोमदेवताकं तथाचानुक्रान्तं—सोमस्यवसुर्भारद्वाजइति । गतोविनियोगः ।

तत्र प्रथमा—

सोमस्यधारापवतेनृचक्षसऋतेनदेवान्हवतेदिवस्परि ।
बृहस्पतेरवथेनाविदिद्युतेसमुद्रासोनसवनानिविव्यचुः ॥ १ ॥

सोमस्य । धारा । पवते । नृऽचक्षसः । ऋतेन । देवान् । हवते ।
दिवः । परि । बृहस्पतेः । रवथेन । वि । दिद्युते । समुद्रासः । न ।
सवनानि । विव्यचुः ॥ १ ॥

सोमस्याभिषूयमाणस्य सा धारा पवते श्रोतते। कीदृशस्यसोमस्य नृचक्षसः नृणां यज-मानानांद्रष्टुः सच ऋतेन यज्ञेन देवान् सोमभाजइन्द्रादीन् हवते कुत्रदिवस्परि द्युलोकस्योपरि वर्तमानान् बृहस्पतेः मंत्रपालकस्य स्तोतुः रवथेन शब्देन स्तोत्रेण विदिद्युते विद्योतते समुद्रा-सोन समुद्राइव पृथिवीं सवनानि यज्ञसंबन्धीनि विव्यचुः व्याप्नुवन्ति ॥ १ ॥

१. यजमानों के दर्शक और अभिषुत सोम की धारा क्षरित होती है। सोम यज्ञ के द्वारा देवों का पूजन करते हैं। आकाशवासी बृहस्पति अथवा स्तोता के शब्द या मन्त्र से वे चमकते हैं। समुद्र के समान पृथिवी को सबन व्याप्त करते हैं। अथ द्वितीया—

यंत्वांवाजिन्नद्भ्याअभ्यनूषतायोहतंयोनिमारोहसिद्युमान्।
मघोनामायुःप्रतिरन्महिश्रवइन्द्रायसोमपवसेवृषामदः॥ २॥

यम्। त्वा। वाजिन्। अद्भ्याः। अभि। अनूषत। अयःऽहतम्।
योनिम्। आ। रोहसि। द्युऽमान्। मघोनाम्। आयुः। प्रऽतिरन्।
महि। श्रवः। इन्द्राय। सोम। पवसे। वृषा। मदः॥ २॥

हे वाजिन् अन्नवत् सोम यं त्वा त्वां अद्भ्या अहननीयागावो अभ्यनूषत अभिष्टुवन्ति आशिरार्थस्थिताः शब्दायन्तइत्यर्थः। सत्वं अयोहतं अयइतिहिरण्यनाम तेन तद्वान् पाणिर्लक्ष्यते हिरण्मयेनपाणिनाहतं संस्कृतं योनिं स्थानमारोहसि। द्युमान् दीप्तःसन्। अभियोनिमयोहतंमिति श्रुतं। किंच हे सोम मघोनां हविष्मतां यजमानानां आयुरायुष्यं महिमहत् श्रवोऽन्नं यशोवा प्रतिरन् वर्धयन्निन्द्रायेन्द्रार्थं पवसे पूयसे। वृषा वर्षको मदोमदकरश्च त्वम्॥ २॥

२. अन्नवाले सोम, न मारने योग्य स्तुति-वाक्य तुम्हारी स्तुति करते हैं। सोने की भुजा से संस्कृत स्थान को दीप्त होकर तुम जाते हो। सोम, हविवाले यजमानों की आयु और महती कीर्त्ति को तुम बढ़ाते हुए, इन्द्र के लिए, क्षरित होते हो। तुम वर्षक और मदकर हो।

अथ तृतीया—

एन्द्रस्यकुक्षापवतेमदिन्तमऊर्जंवसानःश्रवसेसुमङ्गलः।
प्रत्यङ्सविश्वाभुवनाभिपप्रथेक्रीळन्हरिरत्यःस्यन्दतेवृषा॥ ३॥

आ। इन्द्रस्य। कुक्षा। पवते। मदिन्ऽतमः। ऊर्जम्। वसानः।
श्रवसे। सुऽमङ्गलः। प्रत्यङ्। सः। विश्वा। भुवना। अभि।
पप्रथे। क्रीळन्। हरिः। अत्यः। स्यन्दते। वृषा॥ ३॥

अयं सोमः इन्द्रस्यकुक्षा कुक्षौ आपवते आसिच्यते किमर्थं श्रवसे तस्यान्नाय यद्वर्धनसिध्यर्थं सोमोविशेष्यते—मदिन्तमः मादयितृतमः ऊर्जंवसानः बलकरं रसमाच्छादयन्। अपोवसानइतिश्रुतं। सुमंगलः शोभनमंगलप्रदः ससोमः प्रत्यङ्विश्वाभुवना सर्वाणिभूतजातानि

---

१ ऋ० सं० ६. ५. १६.। १ ऋ० सं० ६. ८. ६.।

अभिपप्रथे अभिपथयति दिव्युदितःसन क्रीडन वेद्यां संक्रीडमानोहरिर्हरितवर्णः अत्यः अत-नकुशलः वृषावर्षकः स्यन्दते रसरूपेण ॥ ३ ॥

३. यजमान की अन्न-प्राप्ति के लिए सोम इन्द्र के पेट में गिरते हैं। अत्यन्त नवकर, बलकर रसवाले और सुमंगल सोम सारे भूतों को विस्तरित करते हैं। यज्ञवेदी पर क्रीड़ा करनेवाले, हरितवर्ण, गतिशील और वर्षक सोम गिर रहे हैं। अथ चतुर्थी—

तंत्वादेवेभ्योमधुमत्तमंनरःसहस्रधारंदुहन्तेदशक्षिपः ।
नृभिःसोमप्रच्युतोग्रावभिःसुतोविश्वान्देवाँआपवस्वामहस्राजित्॥४॥

तम् । त्वा । देवेभ्यः । मधुमत्ऽतमम् । नरः । सहस्रऽधारम् ।
दुहन्ते । दश । क्षिपः । नृऽभिः । सोम । प्रऽच्युतः । ग्रावऽभिः ।
सुतः । विश्वान् । देवान् । आ । पवस्व । सहस्रऽजित् ॥ ४ ॥

हे सोम तं तादृशं त्वा त्वां देवेभ्यः इन्द्रायर्थं मधुमत्तमं अतिशयेन मधुमन्तं सहस्रधारं बहुधारायुक्तं दुहते दुहन्ति । के नरोनेतारः ऋत्विजोदशक्षिपः तेषां दशसंख्याका अंगुलयश्च हे सोम नृभिर्मनुष्यैः प्रच्युतोग्रावभिः सुतोभिषुतस्त्वं सहस्रजित् सहस्रसंख्याकस्यधनस्य जेता सन् विश्वान् देवान् आपवस्व ॥ ४ ॥

४. मनुष्य और उनकी दसों अँगुलियाँ इन्द्रादि के लिए अतिशय मधुर और बहुधाराओंवाले सोम को दूहती हैं। सोम, मनुष्यों के द्वारा निचोड़े गये और पत्थरों से अभिषुत तुम अपरिमित धन के जेता होकर देवों के लिए प्रवाहित होओ। अथ पंचमी—

तंत्वाहस्तिनोमधुमन्तमद्रिभिर्दुहन्त्यप्सुवृषभंदशक्षिपः ।
इन्द्रंसोममादयन्दैव्यंजनंसिन्धोरिवोर्मिःपवमानोअर्षसि ॥ ५॥५॥

तम् । त्वा । हस्तिनः । मधुऽमन्तम् । अद्रिऽभिः । दुहन्ति ।
अप्ऽसु । वृषभम् । दश । क्षिपः । इन्द्रम् । सोम । मादयन् ।
दैव्यम् । जनम् । सिन्धोःऽइव । ऊर्मिः । पवमानः । अर्षसि ॥ ५॥५॥

तं तादृशं मधुमन्तं मधुररसं वृषभं कामानांवर्षकं त्वा त्वां हस्तिनः सुहस्तस्य दशक्षिपोंगुलयः अद्रिभिर्ग्रावभिरप्सु दुहंति । तादृश हेसोम इन्द्रं अन्यं दैव्यं जनं देवसंबन्धिनं सर्वं मादयन् सिंधोरूर्मिरिव पवमानः पूयमानः सन्नर्षसि गच्छसि ॥ ५ ॥

५. सुन्दर हाथोंवाले व्यक्ति की दसों अँगुलियां पत्थरों से जल में मधुर रसवाले और कामनाओं के वर्षक सोम को बूहती हैं। सोम, इन्द्र को मत्त करके समुद्र-तरङ्ग के समान क्षरित होकर अन्य देव-संघ को जाते हो। ॥ इति सप्तमस्य तृतीये पंचमोवर्गः ॥ ५ ॥

प्रसोमस्येति पंचर्चंचतुर्दशंसूक्तं ऋषिर्देवतेपूर्ववत् अंत्यात्रिष्टुप् शिष्टाजगत्यः। प्रसोमस्येत्यनुक्रान्तं। गतोविनियोगः।

प्रसोमस्यपवमानस्योर्मयइन्द्रस्ययन्तिजठरंसुपेशसः।
दध्नायदीमुन्नीतायशसागवांदानायशूरमुदमन्दिषुःसुताः॥ १॥

प्र। सोमस्य। पवमानस्य। ऊर्मयः। इन्द्रस्य। यन्ति।
जठरम्। सुऽपेशसः। दध्ना। यत्। ईम्। उत्ऽनीताः। यशसा।
गवाम्। दानाय। शूरम्। उत्ऽअमन्दिषुः। सुताः॥ १॥

सोमस्य पवमानस्य पूयमानस्य ऊर्मयोरसप्रवाहः इन्द्रस्य जठरं प्रयन्ति प्रगच्छन्ति सुपेशसः सुरूपाऊर्मयइतिसंबंधः यद्यदा ईमेतेसुताअभिषुताः सोमाः गवां यशसा बलभूतेन दध्नासदोन्नीताः सन्तोदानाय यजमानविषयाभिमतदानाय शूरं विक्रान्तमिन्द्रं उदमन्दिषुः उन्मादयन्ति तदा जठरंयन्ति॥ १॥

१. शोधित सोम की सुरूप तरंगें उस समय इन्द्र के पेट में जाती हैं, जिस समय अभिषुत सोम गाय के दधि में मिलाये जाकर यजमान का मनोरथ पूर्ण करने के लिए शूर इन्द्र को प्रमत्त करते हैं।

अच्छाहिसोमःकलशाँअसिष्यददत्योनवोह्वारघुवर्तनिर्वृषा।
अथादेवानामुभयस्यजन्मनोविद्वाँअश्नोत्यमुतइतश्चयत्॥ २॥

अच्छ। हि। सोमः। कलशान्। असिस्यदत्। अत्यः। न।
वोह्वा। रघुऽवर्तनिः। वृषा। अथ। देवानाम्। उभयस्य।
जन्मनः। विद्वान्। अश्नोति। अमुतः। इतः। च। यत्॥ २॥

असौसोमः कलशानच्छाभिमुखं असिस्यदत् स्यन्दते कइव अत्योनवोह्वा रथस्यवाहकःअश्वइव सयथा स्वगंतव्यमभिगच्छतितद्वत्। यद्वायमुत्तरत्रदृष्टान्तः—वोह्वाश्वइव रघुवर्तनिः लघुगमनः वृषावर्षकश्च। अथापिच देवानां सोमसजोषामुभयस्योभयविधं जन्मनोजातं विद्वान् जानन् असिष्यदत् कलशान्। किं तदुभयं जन्मेति उच्यते यद्देवजातं अमुतोद्युलोकात् इतश्चास्माद्भूलोकाद्वाश्नोतिव्याप्नोति यच्च तस्योभयस्यजातं विद्वानितिसंबन्धः॥ २॥

२. जैसे रथवाहक अश्व वेग से जाता है, वैसे ही सोम कलश में जाते हैं। काम-वर्षक और द्युलोक तथा पृथिवी में उत्पन्न लोगों को जाननेवाले सोम देवों के प्रसन्नता-कारक हैं।

आनःसोमपवमानःकिरावस्विन्दोभवमघवाराधसोमहः ।
शिक्षावयोधोवसवेसुचेतुनामानोगयमारेअस्मत्परासिचः ॥ ३ ॥

आ । नः । सोम । पवमानः । किर । वसु । इन्दो इति । भव ।
मघऽवा । राधसः । महः । शिक्ष । वयःऽधाः । वसवे । सु । चेतुना ।
मा । नः । गयम् । आरे । अस्मत् । परा । सिचः ॥ ३ ॥

आकिर सर्वतोविक्षिप नोस्मभ्यं । हे सोम पवमानः पूयमानस्त्वं । किंच वसुवासकंधनं गवादिरूपं । किंच हे इन्दो दीप्तसोम मघवा धनवांस्त्वं महोमहतो राधसोधनस्यभव । दातृविशेषः । तथा हे वयोधाः अन्नस्यधातः सोम वसवे वासकाय परिचरतेमह्यं चेतुना कष्टेन प्रज्ञानेन सु सुखं कल्याणं शिक्ष देहि । नोस्मभ्यं प्रदेयं गयं धनं अस्मदारे अस्मत्तोदूरं माप-रासिचः मापेरय ॥ ३ ॥

३. सोम, शोधित सोम, तुम हमें गवादिरूप धन दो। दीप्त सोम, तुम धनी हो। महान् धन के दाता होओ। अन्न-धारक सोम, मैं तुम्हारा सेवक हूँ। कष्ट करके मेरे लिए कल्याण दो। हमें दिये जानेवाले धन को हमसे दूर मत करो। अथ चतुर्थी—

आनःपूषापवमानःसुरातयोमित्रोगच्छन्त्वरुणःसजोषसः ।
बृहस्पतिर्मरुतोवायुरश्विनात्वष्टासवितासुयमासरस्वती ॥ ४ ॥

आ । नः । पूषा । पवमानः । सुऽरातयः । मित्रः । गच्छन्तु ।
वरुणः । सऽजोषसः । बृहस्पतिः । मरुतः । वायुः । अश्विना ।
त्वष्टा । सविता । सुऽयमा । सरस्वती ॥ ४ ॥

सुरातयः सुदानाः सजोषसः संगताः पूषादयोदेवा आगच्छन्तु नोस्मानस्माकंयज्ञंवा । तथा सुयमा यम्यते नियम्यतइति यमोविग्रहः सुविग्रहा सरस्वती चागच्छतु ॥ ४ ॥

४. सुन्दर दाता पूषा, पवमान सोम, मित्र, वरुण, बृहस्पति, मरुत् वायु, अश्विद्वय, त्वष्टा, सविता और सुरूपिणी सरस्वती आदि देवता, एक साथ, हमारे यज्ञ में पधारें।

उभेद्यावापृथिवीविश्वमिन्वेअर्यमादेवोआदितिर्विधाता ।
भगोनृशंसउर्वीन्तरिक्षंविश्वेदेवाःपवमानंजुषन्त ॥ ५ ॥ ६ ॥

उभे इति । द्यावापृथिवी इति । विश्वमिन्वे इति विश्वमऽइन्वे ।
अर्यमा । देवः । अदितिः । विऽधाता । भगः । नृऽशंसः । उरु ।
अन्तरिक्षम् । विश्वे । देवाः । पवमानम् । जुषन्त ॥ ५ ॥ ६ ॥

विश्वमिन्वे । इन्वतिर्व्याप्तिकर्मा । सर्वव्यापिन्यावुभेद्यावापृथिवी द्यावापृथिव्यौ अर्यमादयस्त्रयश्च भगश्च नृशंसोनृभिः शंसनीयः उर्वन्तरिक्षंच विश्वेदेवाश्च पवमानं पूयमानं सोमं जुषन्त सेवन्ते ॥ ५ ॥

५. सर्व-व्यापिनी द्यावापृथिवी, अर्यमा, अदिति, विधाता, मनुष्यों के प्रशस्य भग, विशाल अन्तरिक्ष और विश्वदेव आदि क्षरणशील सोम का आश्रय करें। ॥ इति सप्तमस्य तृतीये षष्ठोवर्गः ॥ ६ ॥

असावीतिपंचर्चं पंचदशंसूक्तं ऋष्याद्याः पूर्ववत् । अस्यानुक्रमणिका—असावीतित्रिष्टुब्न्तइति । अनेनद्विवचनेन प्रकृतयोः प्रसोमस्येत्यादिकयोर्द्वयोरपि त्रिष्टुब्न्तता प्रतिपादिता । गतोविनियोगः ।

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम् ॥ १ ॥

असावि । सोमः । अरुषः । वृषा । हरिः । राजाऽइव । दस्मः ।
अभि । गाः । अचिक्रदत् । पुनानः । वारम् । परि । एति ।
अव्ययम् । श्येनः । न । योनिम् । घृतऽवन्तम् । आऽसदम् ॥ १ ॥

सोम । असावि अभिषुतोभूत् कीदृशः सोमः अरुष आरोचमानः वृषावर्षको हरिर्हरितवर्णः । सच राजेव दस्मोदर्शनीयः सन् गाउदकानि अभिलक्ष्य अचिक्रदच्छब्दंकरोति स्वरसनिर्मोकसमये । पश्चात्पुनानः पूयमानः अव्ययंवारं वालं दशापवित्रं पर्येति श्येनोन श्येनइव योनिं स्वकीयंस्थानं घृतवन्तमुदकवन्तं आसदं आसदनाय पवतइतिशेषः ॥ १ ॥

१. शोभन, वर्षक और हरित-वर्ण सोम का अभिषव किया गया। वे राजा के समान दर्शनीय होकर और जल को लक्ष्य कर, रस निचोड़ने के समय, शब्द करते हैं। अनन्तर शोधित होकर सोम उसी प्रकार (मेषलोममय) दशापवित्र की ओर जाते हैं, जिस प्रकार अपने स्थान को बाज पक्षी जाता है। सोम जलीय स्थान के लिए क्षरित होते हैं।

कविर्वेधस्यापयेषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन्दुरितासोममृळय घृतं वसानः परि यासि निर्णिजम् ॥ २ ॥

कविः । वेधस्या । परि । एषि । माहिनम् । अत्यः । न । मृष्टः ।
अभि । वाजम् । अर्षसि । अपऽसेधन् । दुःऽइता । सोम ।
मृळय । घृतम् । वसानः । परि । यासि । निःऽनिजम् ॥ २ ॥

हे सोम कविः क्रान्तदर्शी सन् वेधस्या यागविधानेच्छया माहिनं महनीयं पवित्रं पर्येषि परिगच्छसि पश्चान्मृष्टः प्रक्षालितः अत्योन अश्वइव वाजं संग्राममभ्यर्षसि । हे सोम दुरिता अस्माकं दुरितानि अपसेधन् परिहरन् मृळय सुखय । घृतमुदकं वसानआच्छादयन् परियासि अभिगच्छसि । किं निर्णिजं निर्णेजकं पवित्रं ॥ २ ॥

२. सोम, तुम क्रान्तकर्मा हो । यज्ञ करने की इच्छा से तुम पूजनीय पवित्र को प्राप्त होते हो । प्रक्षालित होकर, अश्व के समान, तुम युद्ध की ओर जाते हो । सोम, हमारे पापों का विनाश करके हमें सुखी करो । जल में मिश्रित होकर तुम पवित्र की ओर जाते हो ।

पर्जन्यःपिता महिषस्यपर्णिनोनाभापृथिव्यागिरिषुक्षयंदधे ।
स्वसारआपोअभिगाउतासरन्त्संग्रावभिर्नसतेवीतेअध्वरे ॥ ३ ॥

पर्जन्यः । पिता । महिषस्य । पर्णिनः । नाभा । पृथिव्याः ।
गिरिषु । क्षयम् । दधे । स्वसारः । आपः । अभि । गाः । उत ।
असरन् । सम् । यावऽभिः । नसते । वीते । अध्वरे ॥ ३ ॥

यस्य महिषस्य महतः पर्णिनःपर्णवतः पतनवतोवा सोमस्य पर्जन्यः पिता जनकः ससोमः पृथिव्या नाभा नाभौ नाभिस्थानीये हविर्धानीये गिरिषु गिरिसंबन्धिग्रावसु क्षयं निवासं दधे धारयत्यभिषवसमये । उतापि स्वसारोंगुलय आपोवसतीवर्योगाः आशिरार्थाः स्रुतयोवाअभ्यसरन् अभिसरन्ति संनसते संगच्छतेच ग्रावभिः साकं । कुत्र वीते कान्ते अध्वरे यज्ञे ॥ ३ ॥

३. विशाल पत्तोंवाले जिन सोम के पिता मेघ हैं, वे सोम पृथिवी की नाभि (यज्ञ) में, पत्थर पर, निवास करते हैं । अँगुलियाँ, जल के पास, दुग्ध आदि ले जाती हैं । रमणीय यज्ञ में सोम पत्थर से मिलते हैं ।

जायेवपत्यावधिशेवमंहसेपञ्चायागर्भंशृणुहिब्रवीमिते ।
अन्तर्वाणीषुप्रचरासुजीवसेनिन्द्योवृजनेसोमजागृहि ॥ ४ ॥

जायाऽइव । पत्यौ । अधि । शेवं । मंहसे । पञ्चायाः । गर्भं ।
शृणुहि । ब्रवीमि । ते । अन्तः । वाणीषु । प्र । चर ।
सु । जीवसे । अनिन्द्यः । वृजने । सोम । जागृहि ॥ ४ ॥

जायेवपत्यौ जाया यथा स्वभार्यां भर्तरि सुखंप्रयच्छति तद्वत्। शेव शेवं द्वितीयाया-आम् भावाभावश्छान्दसः सुखं मंहसे प्रयच्छसि यजमाने। हे पज्रायाः गर्भ सोम शृणुहि शृणु स्तुतीः यास्तेतुभ्यं ब्रवीमि। पजिर्गतिकर्मा। पज्रापृथिवीत्याहुः अपिवा माध्यमिकावाक् पज्रा भूमावोषधिरूपेण जातत्वाद्गर्भत्वं माध्यमिकायावाचोपि वृष्टिसाधनत्वात्तत्पुत्रत्वं। सत्वं वाणीषु वाक्षु स्तुतिष्वन्तर्मध्ये सुसुष्टु प्रचर जीवसेस्माकं जीवनाय हे सोम अनिन्द्यः स्तुत्यस्त्वं वृजनेस्माकं शत्रुबले जागृहि बुद्धोभव ॥ ४ ॥

४. पृथिवी के पुत्र सोम, तुम्हारी जो स्तुति में करता हूँ, उसे सुनो। जैसे स्त्री पुरुष को सुख प्रदान करती है, वैसे ही तुम भी यजमान को सुख देते हो। हमारी स्तुति में विचरण करो। हमारे जीवन के लिए तुम जी रहे हो। सोम, तुम स्तुत्य हो। हमारे शत्रु-बल के लिए बराबर सावधान रहना। अथ पञ्चमी—

यथापूर्वेभ्यःशतसाअमृध्रःसहस्रसाःपर्यया वाजमिन्दो ।
एवापवस्वसुवितायनव्यसेतवव्रतमन्वापःसचन्ते ॥ ५ ॥ ७ ॥

यथा । पूर्वेभ्यः । शतऽसाः । अमृध्रः । सहस्रऽसाः । परिऽअयाः । वाजम् । इन्दो इति । एव । पवस्व । सुवितायं । नव्यसे । तव । व्रतम् । अनु । आपः । सचन्ते ॥ ५ ॥ ७ ॥

हे इन्दोसोम यथापूर्वेभ्योमहर्षिभ्यः स्तोतृभ्यः शतसाः शतसंख्याकस्यधनस्यदाता अमृध्रः अभवः तथा सहस्रसाश्च वाजमन्नं तस्यदाताचसन् पर्ययाः परिगच्छेः एवमेवमिदानीमपि नव्यसे नवतराय सुवितायाभ्युदयाय पवस्व क्षर। तव व्रतंकर्म अन्वापोवसतीवर्यः सचन्ते अतः पवस्व ॥ ५ ॥

५. सोम, जैसे तुम प्राचीन स्तोताओं के लिए शत-सहस्र-संख्यक धन के दाता हुए थे, वैसे ही इस समय भी अभिनव अभ्युदय के लिए क्षरित होओ। तुम्हारे कर्म को करने के लिए तुमसे जल मिलता है।

॥ इति सप्तमस्य तृतीये सप्तमोवर्गः ॥ ७ ॥

पवित्रंतइति पंचर्चषोडशंसूक्तं आंगिरसस्य पवित्रस्यार्षं जागतं पवमानसोमदेवताकं तथाचानुक्रान्तं—पवित्रंतेपवित्रइति। अभिष्टवे आद्येऋचौवक्तव्ये। सूत्रितंच—पवित्रंतेविततंब्रह्मणस्पतइतिद्वे वियत्पवित्रंधिषणाअतन्वतेति।

पवित्रंतेविततंब्रह्मणस्पतेप्रभुर्गात्राणिपर्येषिविश्वतः ।
अतप्ततनूर्नतदामोअश्नुतेशृतासइद्वहन्तस्तत्समाशत ॥ १ ॥

पवित्रम् । ते[1] विऽततम् । ब्रह्मणः । पते । प्रऽभुः । गात्राणि ।
परि । एषि । विश्वतः । अतप्तऽतनूः । न । तत् । आमः ।
अश्नुते । शृतासः । इत् । वहन्तः । तत् । सम् । आशत ॥ १ ॥

हे ब्रह्मणस्पते मंत्रस्यस्वामिन् सोम ते पवित्रं शोधकं अंगं वितत सर्वत्र विस्तृतं सप्रभुः प्रभविता त्वं गात्राणि पातुरंगानि पर्येषि परिगच्छसि । विश्वतः सर्वतः तव तत्पवित्रं अतप्ततनूः पयोव्रतादिना असंतप्तगात्रः आमः अपरिपक्वोनाश्नुते नव्याप्नोति । शृतासइव शृताएव परिपक्वाएव वहन्तोयागं निर्वहन्तः तत्पवित्रं समाशत व्याप्नुवन्ति ॥ १ ॥

१. मन्त्रों के स्वामी सोम, तुम्हारा शोधक अंग (वा तेज) सर्वत्र विस्तृत हुआ है । तुम्हारा जो पान करता है, उसके सारे अंगों में, प्रभु होकर, तुम विस्तृत हो जाते हो । व्रत आदि से जिसका शरीर तपाया हुआ और परिपक्व नहीं है, वह तुम्हारे सर्वत्र विस्तृत शोधक अंग को नहीं ग्रहण वा धारण कर सकता । जिनका शरीर परिपक्व है और जो यज्ञ-कर्त्ता हैं, वे ही तुम्हारे शोधक अंग को धारण कर सकते हैं ।

तपोष्पवित्रंविततंदिवस्पदेशोचन्तोअस्यतन्तवोव्यस्थिरन् ।
अवन्त्यस्यपवीतारमाशवोदिवस्पृष्ठमधितिष्ठन्तिचेतसा ॥ २ ॥

तपोः । पवित्रम् । विऽततम् । दिवः । पदे । शोचन्तः । अस्य ।
तन्तवः । वि । अस्थिरन् । अवन्ति । अस्य । पवितारम् ।
आशवः । दिवः । पृष्ठम् । अधि । तिष्ठन्ति । चेतसा ॥ २ ॥

तपोः शत्रूणांतापकस्य सोमस्य पवित्रं शोधकमंगं तेजोवादिवस्पदे द्युलोकस्योच्छ्रिते स्थाने वितत विस्तृतं । तृतीयस्यामितोदिविसोमआसीदितिब्राह्मणं । अस्यतन्तवोंशवः शोचन्तोदीप्यमाना व्यस्थिरन्विविधं तिष्ठन्ति पृथिव्यां हविर्धानेवा अस्यसोमस्यआशवः शीघ्रगामिनोरसा अवन्ति रक्षन्ति । कं पवितारं पावयितारं यजमानमवन्ति रक्षन्ति होमद्वारा । पश्चाद् हुताः दिवोद्युलोकस्यपृष्ठं पृष्ठभागमुन्नतदेशं चेतसाबुध्यादेवगमनेच्छावत्या अधितिष्ठन्ति आश्रयन्ते ॥ २ ॥

२. शत्रु-तापक सोम का शोधक अंग (वा तेज) द्युलोक के उन्नत स्थान में विस्तृत है । सोम की प्रदीप्त किरणें नाना प्रकार से रहती हैं । पृथिवी पर सोम का शीघ्रगामी रस पवित्र यजमान की रक्षा करता है । अनन्तर वह स्वर्ग के उन्नत प्रदेश में, देव-गमनेच्छावाली बुद्धि से, आश्रित होता है ।

---

१ तै० ब्रा० ३. २. १. ।

अभिष्टवे अरूरुचदित्येषा आवपनीया। सूत्रितंच—ईळेद्यावापृथिवीइति प्रागुत्तमाया-अरूरुचदुषसःपृश्निरग्रियइत्यावपेतेति।

अरूरुचदुषसःपृश्निरग्रियउक्षाबिभर्तिभुवनानिवाजयुः।
मायाविनोममिरेअस्यमाययानृचक्षसःपितरोगर्भमादधुः॥ ३॥

अरूरुचत्। उषसः। पृश्निः। अग्रियः। उक्षा। बिभर्ति।
भुवनानि। वाजऽयुः। मायाऽविनः। ममिरे। अस्य।
मायया। नृऽचक्षसः। पितरः। गर्भम्। आ। दधुः॥ ३॥

उषसःसंबन्धी पृश्निरादित्यः। पृश्निरादित्योभवतिमाश्नुतएनंवर्णइतिनिरुक्तं। अग्रियो मुख्यः सोयंसोमः अरूरुचत् रोचयति सउक्षा जलस्यसेक्ता बिभर्ति पुष्णात्युदकेन भुवनानि भूतजातानि वाजयुः तेषामन्नमिच्छन् मायाविनः मायाप्रज्ञा प्रज्ञावन्तः अस्यसोमस्य मायया प्रज्ञया ममिरे निर्मांति सोमस्यैकैकांशपानेनजातबलाअग्न्यादयः स्वस्वव्यापारेणजगत्सृजंतीत्यर्थः। तथास्यमायया नृचक्षसोनृणांद्रष्टारः पालकादेवाः अंगिरसः पितरोवागर्भमादधुः धारयंति ओषधीषु वा अत्रसूर्यात्मासोमःस्तूयते सूर्यरश्म्यनुगमाधीनवर्धनाच्चन्द्रस्य। अयमुषसः पृश्निःसविता अरूरुचत् रोचयति सर्वंरोचतेवा शिष्टंसमानं। तत्संबंधिनः नृचक्षसः नृणांद्रष्टारः पितरोजगद्रक्षकारश्मयोगर्भमादधुः वृष्ट्यर्थम्॥ ३॥

३. मुख्य और सूर्यात्मक सोम दीप्ति पाते हैं। सोम अभिशेष करनेवाले हैं। सोम जल के द्वारा प्राणियों को अन्न देते हैं। ज्ञानी सोम की प्रज्ञा से अग्नि आदि संसार को बनाते हैं। सोम की प्रज्ञा से मनुष्य-दर्शक देवों ने ओषधियों में गर्भ धारण किया।

अभिष्टवे स्वरमवेक्ष्यमाणो गंधर्वइत्थेत्येतांपठेत्। सूत्रितंच—गधर्वइत्थापदमस्यरक्षतीति स्वरमवेक्ष्येति।

सैषा चतुर्थी—

गन्धर्वइत्थापदमस्यरक्षतिपातिदेवानांजनिमान्यद्भुतः।
गृभ्णातिरिपुंनिधयानिधापतिःसुकृत्तमामधुनोभक्षमाशत॥ ४॥

गन्धर्वः। इत्था। पदम्। अस्य। रक्षति। पाति। देवानाम्।
जनिमानि। अद्भुतः। गृभ्णाति। रिपुम्। निऽधया। निधाऽपतिः।
सुकृत्ऽतमाः। मधुनः। भक्षम्। आशत॥ ४॥

---

१ नि० २. १४.।

गंधर्वः उदकानांस्तुतीनांवाधारक आदित्यः अस्य सोमस्यपदं स्थानं युसंबन्धिनं इत्थासत्यं रक्षति । सोयंसोमोदेवानां जनिमानि जन्मानि देवानित्यर्थः पातिरक्षति । अद्भुतोमहान् । किंचायंरिपुं अस्मद्वैरिणं निधया निधा पाश्या पाशसमूहेन गृभ्णाति गृह्णाति निधापतिः पशुसमूहस्वामी तस्यास्यमधुनः मधुररसस्यभक्षं सुकृत्तमाः अतिशयेनसुकृतकर्तारः एवआशत प्राप्नुवन्ति ॥ ४ ॥

४. जलधारक आदित्य सोम के स्थान की रक्षा करते हैं। सोम देवों के जन्मों की रक्षा करते हैं। महान् सोम हमारे शत्रु को पाश में बांधते हैं। सोम पशुओं के स्वामी हैं। पुण्यकर्त्ता ही इनके मधुर रस को ग्रहण कर सकते हैं।

अन्तिमेप्रवर्ग्ये परिधानीयायाःपूर्वं हविर्हविष्मइत्येषावपनीया। सूत्रितंच—उत्तमेप्रागुत्तमायाहविर्हविष्मोमहिसद्मदैव्यमित्यावपेतेति ।

हविर्हविष्मोमहिसद्मदैव्यंनभोवसानःपरियास्यध्वरम् ।
राजापवित्ररथोवाजमारुहःसहस्रभृष्टिर्जयसिश्रवोबृहत् ॥५॥८॥

हविः । हविष्मः । महि । सद्म । दैव्यम् । नभः । वसानः ।
परि । यासि । अध्वरम् । राजा । पवित्रऽरथः । वाजम् । आ ।
अरुहः । सहस्रऽभृष्टिः । जयसि । श्रवः । बृहत् ॥ ५ ॥ ८ ॥

हे हविष्मः हविरित्युदकनाम उदकवन् सोम हविर्भूतं नभ उदकनामैतत् उदकरसमित्यर्थः वसानः आच्छादयन् महि महत् दैव्यंसद्म यागगृहं परियासि परिगच्छस्यध्वरंनिर्वोढुं । किंच हे सोम राजा पवित्ररथश्च वाजं संग्रामं आरुहः आरोहसि यद्वा तत्रतत्र संग्रामवाचकेनशब्देन यज्ञव्यवहारदर्शनादत्र वाजोयज्ञाख्यसंग्रामः तमारुहः यथाकश्चिद्राजा रथमारुह्य स्वस्थानंप्र[illegible]ति तद्वदितिभावः । किंच सहस्रभृष्टिः बहुभ्रंशः अपरिमितगमनइत्यर्थः । अथवा भृष्टिरायुधं असंख्यातायुधःसन् बृहत्श्रवः महदन्नं जयसि अस्माकं ॥ ५ ॥

५. जलवान् सोम, जल में मिलकर महान् और दिव्य यज्ञगृह की रक्षा करते हो। सोम, तुम राजा हो। पवित्र रथवाले होकर तुम युद्ध में जाते हो। असीम-गमन तुम, महान् अन्न को जीतते हो।

॥ इति सप्तमस्य तृतीयेष्टमोवर्गः ॥ ८ ॥

पवस्वदेवमादनइति पंचर्चंसप्तदशंसूक्तं वाचाप्रुवस्य प्रजापतेरार्षं जागतं पवमानसोमदेवताकं । तथाचानुक्रान्तं—पवस्ववाच्यः प्रजापतिरिति । गतोविनियोगः ।

पवस्वदेवमादनोविचर्षणिरप्साइन्द्रायवरुणायवायवे ।
कृधीनोअद्यवरिवःस्वस्तिमदुरुक्षितौगृणीहिदैव्यंजनम् ॥ १ ॥

पवस्व । देवऽमादनः । विऽचर्षणिः । अप्साः । इन्द्राय । वरुणाय । वायवे । कृधि । नः । अद्य । वरिवः । स्वस्तिऽमत् । उरुऽक्षितौ । गृणीहि । दैव्यम् । जनम् ॥ १ ॥

हे सोम देवमादनो देवानांमादयिता विचर्षणिः विद्रष्टा अप्साः अपांदातात्वं पवस्व क्षर । कस्मै इन्द्राय वरुणाय वायवे नोस्माकं वरिवोधनं स्वस्तिमत् । स्वस्तीत्यविनाशनाम । तद्धनं अद्य इदानीं कृधि कुरु । उरुक्षितौ विस्तीर्णायांभूमौ यज्ञसंबन्धिन्यां दैव्यंजनं देवसंबन्धिनंसंघं जनशब्दःसंघवाची तंगृणीहि गृणातिःशब्दकर्मा शब्दय यथा त्वदीयाभिषवशब्दंश्रुत्वा देवाआगच्छन्ति तथागृणीहीत्यर्थः । अथवा दैव्यंजनमित्यृषिः स्वात्मानमाह देवसंबंधिनंजनं मांगृणीहि साधुसंभक्तेति शब्दय ॥ १ ॥

१. सोम, तुम देवों के मदकर, सूक्ष्मदर्शक और जलदाता हो । इन्द्र, वरुण और वायु के लिए क्षरित होओ । हमें अविनाशी धन दो । विस्तृत पृथिवी पर मुझे देवों का भक्त कहो ।

आयस्तस्थौभुवनान्यमर्त्योविश्वानिसोमःपरितान्यर्षति ।
कृण्वन्संचृतंविचृतमभिष्टयइन्दुःसिषक्त्युषसंनसूर्यः ॥ २ ॥

आ । यः । तस्थौ । भुवनानि । अमर्त्यः । विश्वानि । सोमः । परि । तानि । अर्षति । कृण्वन् । सम्ऽचृतम् । विऽचृतम् । अभिष्टये । इन्दुः । सिसक्ति । उषसम् । न । सूर्यः ॥ २ ॥

यः अमर्त्योदेवः सोमोभुवनानि लोकानातस्थौ आस्थितवान् तानि विश्वानि सर्वाणि भुवनानि पर्यर्षति परितोगच्छति परितोरक्षतीत्यर्थः । सोयमिंदुः यज्ञं यजमानंवा संचृतं देवैःफलैर्वा संबद्धं कृण्वन् कुर्वन् विचृतं असुरादिभिः दुःखैर्वाविमुक्तं कृण्वन् अभिवोयागाय सिषक्ति सेवते यज्ञं । उषसंनसूर्यः सूर्यउषसमिव । यथा । अभिष्टये अभिवोगमनाय प्राणिनां संचृतं प्रकाशैःसंयुक्तं विचृतं तमोभिर्विमुक्तंच लोकंकुर्वन्नुषसं सेवते तद्वत् ॥ २ ॥

२. जो सोम सारे भुवनों में व्याप्त हैं, वे उन लोगों की चारों ओर से रक्षा करते हैं । सोम यज्ञ को फल-समन्वित और असुरों से मुक्त करके यज्ञ का वैसे ही आश्रय करते हैं, जैसे सूर्य संसार को प्रकाशवान् और तमोमुक्त करके उसी का सेवन करते हैं ।

आयोगोभिःसृज्यतओषधीष्वादेवानांसुम्नइषयन्नुपावसुः ।
आविद्युतापवतेधारयासुतइन्द्रंसोमोमादयन्दैव्यंजनम् ॥ ३ ॥

आ । यः । गोभिः । सृज्यते । ओषधीषु । आ । देवानाम् ।
सुम्ने । इषयन् । उपऽवसुः । आ । विऽद्युता । पवते । धारया ।
सुतः । इन्द्रम् । सोमः । मादयन् । दैव्यम् । जनम् । ॥ ३ ॥

यः सोमोगोभिः रश्मिभिः आसृज्यते ओषधीषु यंसोमं स्थापयन्तीत्यर्थः । किमर्थं देवानां सुम्ने सुखे निमित्तेसति कीदृशोयः इषयन् देवान् प्राप्तुमिच्छन् इषगतौ । धनमिच्छन्वा तथा उपावसुः शत्रुभ्यः सकाशात्प्राप्तधनः ससोमो विद्युता विद्योतमानया धारया आपवते सुतःसन् । किंकुर्वन् दैव्यं देवस्वामिनं इन्द्रं जनं देवसंबंधिसंघं मादयन् ॥ ३ ॥

३. देवों के सुख के लिए रश्मियों से ओषधियों में सोम को स्थापित किया जाता है । सोम देवाभिलाषी, शत्रु-धन-जेता और देव-संघ तथा इन्द्र को प्रमत्त करनेवाले हैं । अभिषुत होकर सोम प्रदीप्त धारा से बहते हैं ।

एषस्यसोमःपवतेसहस्रजिद्धिन्वानोवाचमिषिरामुषर्बुधम् ।
इन्दुःसमुद्रमुदियर्तिवायुभिरिन्द्रस्यहार्दिकलशेषुसीदति ॥ ४ ॥

एषः । स्यः । सोमः । पवते । सहस्रऽजित् । हिन्वानः । वाचम् ।
इषिराम् । उषःऽबुधम् । इन्दुः । समुद्रम् । उत् । इयर्ति ।
वायुऽभिः । आ । इन्द्रस्य । हार्दि । कलशेषु । सीदति ॥ ४ ॥

एषः स्यः सः सोमः पवते पूयते । कीदृशएषः सहस्रजित् सहस्रजेता किंकुर्वन् वाचं ऋत्विजां स्तुतिरूपांवाचं हिन्वानः प्रेरयन् कीदृशींवाचं इषिरां गमनशीलां स्तुत्यंप्रतिगंत्रीं उषर्बुधं उषसिप्रबुद्धं सोयमिन्दुः सोमः समुद्रं समुद्रियंरसं उदियर्ति उद्गमयति । वायुभिर्गृभिरध्वर्यादिभिः वायुरेववामेर्यमाणः सन् तथेन्द्रस्यहार्दि हार्दं प्रियं तद्धार्दीन्द्रस्य प्रियवद्यथाभवति तथा कलशेषु द्रोणकलशप्रभृतिष्वासीदति ॥ ४ ॥

४. गमनशील, प्रतिगामी और प्रातःकाल-कृत स्तोत्र को प्रेरित करते हुए सहस्र जिह्वाओं से क्षरित होते हैं । वायु-प्रेरित सोम क्षरणशील रस को ऊपर उठाते हैं ।

अभित्यंगावःपयसापयोवृधंसोमंश्रीणंतिमतिभिःस्वर्विदम् ।
धनंजयःपवतेकृत्व्योरसोविप्रःकविःकाव्येनास्वर्चनाः ॥ ५ ॥ ९ ॥

अभि । त्यम् । गावः । पयसा । पयःऽवृधम् । सोमम् । श्रीणन्ति ।
मतिऽभिः । स्वःऽविदम् । धनम्ऽजयः । पवते । कृत्व्यः । रसः ।
विप्रः । कविः । काव्येन । स्वःऽचनाः ॥ ५ ॥ ९ ॥

त्यं तं पयोवृधं पयसोवर्धकं सोमं गावः पयसा स्वकीयेन क्षीरेण अभिश्रीणन्ति श्रपणं कुर्वन्ति। योमतिभिः स्तुतिभिः सर्वंप्रयच्छति तं स्वर्विदं सोमं श्रीणन्ति सधनंजयः शत्रुधनानां जेतासोमः काव्येन कर्मणापवते पूयते। कीदृशः सकृत्व्यः कर्मण्यः रसोरसरूपः विप्रोमेधावी कविःक्रांतप्रज्ञः स्वर्चनाः सर्वान्नः चनइत्यन्ननाम ॥ ५ ॥

५. दुग्ध-वर्द्धक सोम को गायें अपने दूध से सिक्त करने को खड़ी हैं। सोम, स्तुतियों के द्वारा सब कुछ देते हैं। कर्मठ, रसरूप, मेधावी, क्रान्तप्रज्ञ, अन्नवाले और शत्रु-धन जेता सोम कर्म के द्वारा क्षरित होते हैं।

॥ इति सप्तमस्य तृतीये नवमोवर्गः ॥ ९ ॥

इन्द्रायइति द्वादशर्चंअष्टादशंसूक्तं भृगुगोत्रस्य वेनस्यार्षं पवमानसोमदेवताकं एकादशी-द्वादश्यौत्रिष्टुभौ शिष्टाजगत्यः। तथाचानुक्रान्तं--इन्द्रायद्वादश वेनोभार्गवोद्वित्रिष्टुबन्तमिति। गतोविनियोगः। तत्र प्रथमा--

इन्द्रायसोमसुषुतःपरिस्रवापामीवाभवतुरक्षसासह।
मातेरसस्यमत्सतद्वयाविनोद्रविणस्वन्तइहसन्त्विन्दवः ॥ १ ॥

इन्द्राय। सोम। सुऽसुतः। परि। स्रव। अप। अमीवा। भवतु।
रक्षसा। सह। मा। ते। रसस्य। मत्सत। द्वयाविनः।
द्रविणस्वन्तः। इह। सन्तु। इन्दवः ॥ १ ॥

हे सोम त्वं सुषुतः सुष्ठु अभिषुतःसन् इन्द्राय इन्द्रार्थं परिस्रव परितःस्रव गच्छ रसंमुंच। अमीवारोगः रक्षसासह अपभवतु अपगतोवियुक्तोभवतु ते तव रसस्य स्वांशंरसंपीत्वा माम-त्सत मामाद्यन्तु के द्वयाविनः द्वयं सत्यानृतं तेनयुक्ताः पापिनइत्यर्थः किंच इन्दवस्तेरसाः इ-हास्मिन्यज्ञे द्रविणस्वन्तः धनवंतः सन्तु भवन्तु ॥ १ ॥

१. सोम, भली भांति अभिषुत होकर तुम इन्द्र के लिए चारों ओर जाओ और रस गिराओ। राक्षस के साथ रोग दूर हो। तुम्हारे रस को पीकर पापी लोग प्रमत्त या आनन्दित न होने पावें। इस यज्ञ में तुम्हारा रस धन से युक्त हो।

अस्मान्त्समर्येपवमानचोदयदक्षोदेवानामसिहिप्रियोमदः।
जहिशत्रूँरभ्याभन्दनायतःपिबेन्द्रसोममवनोमृधोजहि ॥ २ ॥

अस्मान्। सऽमर्ये। पवमान। चोदय। दक्षः। देवानाम्। असि।
हि। प्रियः। मदः। जहि। शत्रून्। अभि। आ। भन्दनाऽयतः।
पिब। इन्द्र। सोमम्। अव। नः। मृधः। जहि ॥ २ ॥

हे पवमानसोम अस्मानसमर्थे संग्रामे चोदय प्रेरय दक्षोह्यसि समर्थः खलु भवसि देवानांमध्ये। यद्वा देवानां प्रीणनाय दक्षोसि यद्वा दक्षस्त्वं देवानांप्रियः प्रियकरोमदोमादयितासि हि। जहिचशत्रूनस्माकं अभ्यागच्छचास्मान्प्रति। भंदनायतः भंदनाःस्तुतयः भंदतेःस्तुतिकर्मणः ताइच्छतः पिब हे इन्द्र सोमं अवजहि नोस्माकं संग्रामकारिणो जहि मृधः संग्रामाद् ॥ २ ॥

२. क्षरणशील सोम, हमें समरभूमि में भेजो। तुम निपुण हो। तुम देवों के प्रियकर मादक हो। हम तुम्हारी स्तुति करते हैं। शत्रुओं को मारो। हमारे लिए आओ। इन्द्र, हमारे शत्रुओं को विनष्ट करो।

अदब्धइन्दोपवसेमदिन्तमआत्मेन्द्रस्यभवसिधासिरुत्तमः।
अभिस्वरन्तिबहवोमनीषिणोराजानमस्यभुवनस्यनिंसते ॥ ३ ॥

अदब्धः। इन्दो इति। पवसे। मदिन्ऽतमः। आत्मा। इन्द्रस्य। भवसि। धासिः। उत्ऽतमः। अभि। स्वरन्ति। बहवः। मनीषिणः। राजानम्। अस्य। भुवनस्य। निंसते ॥ ३ ॥

हे इन्दो क्लिद्यमानसोम अदब्धः अहिंसितोमदिन्तमोमादयितृतमस्त्वं पवसे पूयसे आत्मास्वयमेव उत्तमस्त्वं इन्द्रस्यधासिः अन्नंभवसि अस्यभुवनस्यराजानंसोमं बहवोमनीषिणः स्तोतारोभिस्वरंति अभिष्टुवन्ति निंसते गच्छन्तिवा ॥ ३ ॥

३. क्षरणशील सोम, अहिंसित और मादकतम होकर तुम क्षरित होते हो। तुम स्वयं सोम होकर इन्द्र के अन्न हो। इस विश्व के राजा सोम का स्तोता लोग स्तोत्र करते और यश गाते हैं।

सहस्रणीथःशतधारोअद्भुतइन्द्रायेन्दुःपवतेकाम्यंमधु।
जयन्क्षेत्रमभ्यर्षाजयन्नपउरुंनोगातुंकृणुसोममीढ्वः ॥ ४ ॥

सहस्रऽनीथः। शतऽधारः। अद्भुतः। इन्द्राय। इन्दुः। पवते। काम्यम्। मधु। जयन्। क्षेत्रम्। अभि। अर्ष। जयन्। अपः। उरुम्। नः। गातुम्। कृणु। सोम। मीढ्वः ॥ ४ ॥

सहस्रनीथो बहुप्रकारनयनः शतधारः अपरिमितधारोपेतः अद्भुतः आश्चर्यकरोमहानिन्दुः इन्द्राय काम्यं मधुपवते। किंच क्षेत्रमस्मभ्यं जयन् अपश्चजयन् अभ्यर्ष अभिगच्छपवित्रं। हेसोम मीढ्वः सेक्तः गातुं मार्गं नोस्माकं उरुंविस्तीर्णं कृणु कुरु ॥ ४ ॥

४. सहस्र-विध-नेत्र, असीम धाराओं से युक्त, आश्चर्यकर और महान् सोम इन्द्र के लिए अभिलषित मधु को क्षरित करते हैं। सोम, तुम हमारे लिए क्षेत्र और जल को जीतकर पवित्र की ओर जाओ। सोम, तुम सेचक हो। हमारा मार्ग विस्तृत करो।

अथ पञ्चमी–

कनिक्रदत्कलशेगोभिरज्यसेव्य१व्ययँसमयावारमर्षसि ।
मर्मृज्यमानोअत्योनसानसिरिन्द्रस्यसोमजठरेसमक्षरः ॥ ५ ॥

कनिक्रदत् । कलशे । गोभिः । अज्यसे । वि । अव्ययम् ।
समया । वारम् । अर्षसि । मर्मृज्यमानः । अत्यः । न ।
सानसिः । इन्द्रस्य । सोम । जठरे । सम् । अक्षरः ॥ ५ ॥

हेसोम कनिक्रदच्छब्दंकुर्वन् कलशेवर्तमानो गोभिः पयोभिः अज्यसे सिक्तोभवसि । अव्ययं अविमयं वारं वालं दशापवित्रं समया तत्समीपे व्यर्षसि विविधंगच्छसि मर्मृज्यमानः शोध्यमानः अत्योन अश्वइव सानसिः संभजनशीलस्त्वं हेसोम इन्द्रस्यजठरे समक्षरः सम्यक्क्षरसि ॥ ५ ॥

५. सोम, शब्द करते हुए और कलश में वर्त्तमान तुम गोदुग्ध में मिश्रित किये जाते हो । मेष लोममय दशापवित्र के पास जाते हो । सोम, तुम शोधित और अश्व के समान भजनीय होकर इन्द्र के उदर में भली भांति क्षरित होते हो ।

स्वादुःपवस्वदिव्यायजन्मनेस्वादुरिन्द्रायसुहवीतुनाम्ने ।
स्वादुर्मित्रायवरुणायवायवेबृहस्पतयेमधुमाँअदाभ्यः ॥ ६ ॥१०॥

स्वादुः । पवस्व । दिव्याय । जन्मने । स्वादुः । इन्द्राय ।
सुहवीतुऽनाम्ने । स्वादुः । मित्राय । वरुणाय । वायवे । बृहस्पतये ।
मधुऽमान् । अदाभ्यः ॥ ६ ॥ १० ॥

हेसोम स्वादुस्त्वं दिव्याय जन्मने देवगणाय पवस्व तथा सुहवीतुनाम्ने शोभनाह्वाननामधेयायेन्द्रायत्वंपवस्व मित्राय वरुणाय वायवे बृहस्पतयेच पवस्व मधुमान् मधुररसः अदाभ्यः अन्यैरहिंस्यस्त्वं ॥ ६ ॥

६. सोम, तुम स्वादु हो । दिव्यजन्मा देवों के लिए और शोभननामा इन्द्र के लिए क्षरित होओ । मधुमान और अन्यों के द्वारा अहिंसनीय होकर तुम मित्र, वरुण, वायु और बृहस्पति के लिए क्षरित होओ ।

॥ इति सप्तमस्य तृतीये दशमोवर्गः ॥ १० ॥

अत्यँमृजन्तिकलशेदशक्षिपःप्रविप्राणांमतयोवाचईरते ।
पवमानाअभ्यर्षन्तिसुष्टुतिमेन्द्रंविशन्तिमदिरासइन्दवः ॥ ७ ॥

अत्यम् । मृजन्ति । कलशे । दश । क्षिपः । प्र । विप्राणाम् ।
मतयः । वाचः । ईरते । पवमानाः । अभि । अर्षन्ति ।
सुऽस्तुतिम् । आ । इन्द्रम् । विशन्ति । मदिरासः । इन्दवः ॥ ७ ॥

अत्यमतनवन्तमश्वस्थानीयंवा सोमं कलशे दशक्षिपोदशांगुलयः अध्वर्युसंबन्धिन्यो-मृजन्ति शोधयन्ति । तथा विप्राणांमध्ये मतयः स्तोतारोवाचः स्तुतीरीरते प्रेरयन्ति । पवमानाः सोमाः अभ्यर्षन्ति । अभिगच्छन्ति । सुष्टुतिं शोभनस्तुतिं इन्द्रं मदिरासोमदकराइन्दवः सोमाः आविशंति प्रविशन्ति ॥ ७ ॥

७. अध्वर्युओं की दस अँगुलियाँ अश्व के समान गतिशील सोम को कलश में शोधित करती हैं। विप्रों के बीच स्तोता लोग स्तुतियाँ भेजते हैं। क्षरणशील सोम जाते हैं। शोभन स्तुतियाले इन्द्र में मदकर सोम प्रविष्ट होते हैं। अथाष्टमी—

पवमानोअभ्यर्षासुवीर्यमुर्वीगव्यूतिमहिशर्मसप्रथः ।
माकिर्नोअस्यपरिषूतिरीशतेन्दोजयेमत्वयाधनंधनम् ॥ ८ ॥

पवमानः । अभि । अर्ष । सुऽवीर्यम् । उर्वीम् । गव्यूतिम् । महि ।
शर्म । सऽप्रथः । माकिः । नः । अस्य । परिऽसूतिः । ईशत ।
इन्दो इति । जयेम । त्वया । धनम्ऽधनम् ॥ ८ ॥

हे सोम पवमानः पूयमानस्त्वं सुवीर्यं उर्वीं महतीं गव्यूतिं गोमार्गंच महि महत् सप्रथः सर्वतः पृथु शर्म गृहं सुखंवा अभ्यर्ष अभिगमय नोस्माकमस्यकर्मणः परिषूतिः हिंसायाः परिप्रेरकोद्वेषी माकिरीशत मैश्वरोभवतु हेइन्दो सोम त्वया साधनेन धनंधनं सर्वमपिधनं जयेम ॥ ८ ॥

८. सोम, क्षरणशील तुम सुन्दर वीर्य, दो कोश, भूमिखण्ड और विशाल गृह हमें दो। हमारे कर्मों के द्वेषियों को स्वामी मत बनाओ। तुम्हारी कृपा से हम महान् धन को जीतें।

अथ नवमी—

अधिद्यामस्थाद्वृषभोविचक्षणोरुरुचद्विदिवोरोचनाकविः ।
राजापवित्रमत्येतिरोरुवद्दिवःपीयूषंदुहतेनृचक्षसः ॥ ९ ॥

अधि । द्याम् । अस्थात् । वृषभः । विऽचक्षणः । अरूरुचत् ।
वि । दिवः । रोचना । कविः । राजा । पवित्रम् । अति । एति ।
रोरुवत् । दिवः । पीयूषम् । दुहते । नृऽचक्षसः ॥ ९ ॥

अधि उपरि अस्थात् अवस्थात् द्यां द्युलोकं वृषभोवर्षिता विचक्षणो विद्रष्टायं सोमः तथाकृत्वा दिवोद्युलोकसंबंधीनि रोचना रोचमानानि नक्षत्रादीनि व्यरूरुचत् विविधं रोचयति । कविः क्रान्तप्रज्ञः सन् राजासोमः पवित्रं दशापवित्रं अत्येति अतिक्रम्यगच्छति । रोरुवत् शब्दंकुर्वन् दिवोद्युलोकस्य पीयूषं सारं रसं नृचक्षसः नृणांद्रष्टारः सोमा दुहते स्रवन्ति स्वकीयंरसमान्तरिक्षमुदकंवा दुहन्तीत्यर्थः ॥ ९ ॥

९. दूरदर्शी और वर्षक सोम द्युलोक में ये । उन्होंने द्युलोक के नक्षत्र आदि को सुशोभित किया । क्रान्तप्रज्ञ और राजा सोम दशापवित्र को लाँघकर जाते हैं । शब्द करते हुए नर-दर्शक सोम द्युलोक के अमृत को गिराते हैं ।

अथ दशमी—

दिवोनाकेमधुजिह्वाअसश्चतोवेनादुहन्त्युक्षणंगिरिष्ठाम् ।
अप्सुद्रप्संवावृधानंसमुद्रआसिन्धोरूर्मामधुमन्तंपवित्रआ ॥ १० ॥

दिवः । नाके । मधुऽजिह्वाः । असश्चतः । वेनाः । दुहन्ति ।
उक्षणम् । गिरिऽस्थाम् । अप्ऽसु । द्रप्सम् । ववृधानम् । समुद्रे ।
आ । सिन्धोः । ऊर्मा । मधुऽमन्तम् । पवित्रे । आ ॥ १० ॥

दिवोद्योतमानस्ययज्ञस्य संबंधिनि नाके दुःखरहिते हविर्धानाख्येस्थाने मधुजिह्वाः मधुरवाचः असश्चतः असंसक्ताः पृथक्पृथगित्यर्थः । यद्वा चिरमकृत्वा शीघ्रमभिषुण्वन्तोवेना एतन्नामकामहर्षयो दुहन्ति अभिषुण्वन्ति । यद्वा द्युलोकएव वेनाः कांताः देवादुहन्ति तंसोमं उक्षणं सेक्तारं गिरिष्ठां गिरौउन्नतेदेशे वर्तमानं अप्सूदकेषु वसतीवरीषु अन्तर्वृधानं वर्धमानं द्रप्सं रसरूपं समुद्रे समुद्रवत् प्रवृद्धेद्रोणकलशे सिन्धोरुदकस्य ऊर्मा ऊर्मौ पूरेआसिंचंतीतिशेषः तदर्थं मधुमन्तं माधुर्योपेतंरसं पवित्रे दशापवित्रे आसिंचन्तीतिशेषः ॥ १० ॥

१०. मधुर वचनवाले वेन लोग, अलग-अलग, यज्ञ के दुःखहीन स्थान में सोमाभिषव करते हैं । वे लोग सेक्ता, उन्नत स्थान में वर्त्तमान, जल में वर्द्धमान और रस-रूप सोम को समुद्र के समान प्रवृद्ध द्रोण-कलश में, जल, तरंग से सींचते हैं । वे मधुरस सोम को दशापवित्र में सींचते हैं ।

नाकेसुपर्णमुपपप्तिवांसंगिरोवेनानामकृपन्तपूर्वीः ।
शिशुंरिहन्तिमतयःपनिप्नतंहिरण्ययंशकुनंक्षामणिस्थाम् ॥ ११ ॥

नाके । सुऽपर्णम् । उपपप्तिऽवांसम् । गिरः । वेनानाम् । अकृपन्त ।
पूर्वीः । शिशुम् । रिहन्ति । मतयः । पनिप्नतम् । हिरण्ययम् ।
शकुनम् । क्षामणि । स्थाम् ॥ ११ ॥

नाके द्युलोके वर्तमानं सुपर्णं शोभनपर्णोपेतं पश्चात् उपपप्तिवांसं उपपतयन्तंसोमं वेनानां स्तोतॄणामस्माकं संबन्धिन्यः पूर्वीर्बह्व्योगिरः स्तुतयः उपाक्षरन्त उपकल्पन्ते अभिष्टुवन्तीत्यर्थः। तं शिशुं शिशुवत्संस्कर्तव्यंसोमं मतयः स्तुतयः रिहन्ति लिहन्ति। संस्पृशन्ति प्राप्नुवन्तीत्यर्थः। कीदृशं शिशुं पनिमतं शब्दायन्तं पनतेर्यङ्लुगन्तात्शतरि अभ्यासस्यनिगागमउपधालोपश्च। हिरण्ययं हिरण्मयं शकुनं पक्षिणं क्षामणि क्षमायां स्थां हविर्धानिस्थां वर्तमानं॥ ११॥

११. द्युलोक में स्थित, शोभन पत्तोंवाले और गिरनेवाले सोम का, हमारी स्तुतियां, स्तोत्र करती हैं। शिशु के समान संस्कार के योग्य, शब्द-कर्त्ता, सुवर्णमय, पक्षिवत् और हविर्द्धान में स्थित सोम को स्तुतियां प्राप्त करती हैं। अथ द्वादशी—

ऊर्ध्वोगन्धर्वोअधिनाकेअस्थाद्विश्वारूपाप्रतिचक्षाणोअस्य।
भानुःशुक्रेणशोचिषाव्यद्यौत्प्रारूरुचद्रोदसीमातराशुचिः॥१२॥११॥

ऊर्ध्वः। गन्धर्वः। अधि। नाके। अस्थात्। विश्वा। रूपा। प्रतिऽचक्षाणः। अस्य। भानुः। शुक्रेण। शोचिषा। वि। अद्यौत्। प्र। अरूरुचत्। रोदसी इति। मातरा। शुचिः॥ १२॥ ११॥

ऊर्ध्वउन्नतोगंधर्वोरश्मीनांधारकः सोमोनाके आदित्ये अध्यस्थात् अधितिष्ठति किंकुर्वन् अस्यादित्यस्य विश्वा विश्वानि रूपा रूपाणि प्रतिचक्षाणः प्रतिपश्यन् भानुरादित्यः सोमाधिष्ठितः सन् शुक्रेण दीप्तेन शोचिषा तेजसा व्यद्यौत् विद्योतते नकेवलंस्वयमेव अपितु मातरा-निर्माव्यौ रोदसी द्यावापृथिव्यौ प्रारूरुचत् प्ररोचयति शुचिर्दीप्तः सूर्यः॥ १२॥

१२. किरण-धारक (गन्धर्व-सूर्य) सोम सूर्य के सारे रूपों को देखते हुए द्युलोक में रहते हैं। सोम-स्थित सूर्य शुभ्र तेज के द्वारा चमकते हैं। प्रदीप्त सूर्य द्यावापृथिवी को शोभित करते हैं।

॥ इति सप्तमस्य तृतीये एकादशोवर्गः॥ ११ ॥

॥ इति नवमे मंडले चतुर्थोनुवाकः॥ ४ ॥

इत्थंदाशतयीमध्ये नवमेमंडलेस्फुटम्। अनुवाकश्चतुर्थोयं संगमेनप्रदर्शितः॥ १॥

अथपंचमेचानुवाके एकादशसूक्तानि तत्र प्रतइत्यष्टाचत्वारिंशदृचं प्रथमंसूक्तं। प्रथम-दशर्चस्य आरुष्टाइतिमाषाइतिच द्विनामानऋषिगणाद्रष्टारः। द्वितीयस्यदशर्चस्य सिकताइति निवावरीइति द्विनामानऋषिगणाः। तृतीयस्यदशर्चस्य पृश्नयइतिअजाइतिचनामद्वयोपेताऋ-षिगणाः। अदृष्टार्थमेषांद्विनामत्वमवगंतव्यं। चतुर्थस्यदशर्चस्य आरुष्टामाषाइत्यादिद्विनामा-नस्त्रयोगणाः द्रष्टारः। आत्रेयइतिनामानमुनयोगणद्रष्टारः। एवंचत्वारिंशद्वताः अथपंचानांभौमो-

त्रिर्ऋषिः ततस्तिसृणांगृत्समदः । जगतीछन्दः पवमानसोमोदेवता । तथाचानुक्रान्तं—मतेष्टाचत्वारिंशदृषिगणादशर्चा आकृष्टामाषाःप्रथमे सिकतानिवावरीद्वितीये पृश्नयोऽजास्तृतीये त्रयश्चतुर्थेत्रिःपंचान्त्यास्तिस्रोगृत्समदइति । गतोविनियोगः ।

प्रतेआशवःपवमानधीजवोमदाअर्षन्तिरघुजाइवत्मना ।
दिव्याःसुपर्णामधुमन्तइन्दवोमदिन्तमासःपरिकोशमासते ॥ १ ॥

प्र । ते । आशवः । पवमान । धीऽजवः । मदाः । अर्षन्ति ।
रघुजाःऽइव । त्मना । दिव्याः । सुऽपर्णाः । मधुऽमन्तः । इन्दवः ।
मदिन्ऽतमासः । परि । कोशम् । आसते ॥ १ ॥

हे पवमान पूयमान सोम ते तव आशवोव्याप्ताः धीजवोमनोवेगामदाः मदकररसाः अर्षन्ति गच्छन्ति त्मना आत्मनैव अनायासेनइत्यर्थः । कइव रघुजाइव रघुःशीघ्रगावहवा तत्रजाता रघुजास्तेइव निर्गतास्तेदिव्याः दिविभवाः अन्तरिक्षे दशापवित्रे धार्यमाणाइत्यर्थः । सुपर्णाः सुपतनाः मधुमन्तोमाधुर्योपेताः मदिन्तमासः अतिशयेनमादयितृतमाः इन्दवोदीप्तारसाः कोशंद्रोणकलशं पर्यासते पर्युपविशंति ॥१॥

१. क्षरणशील सोम, मनोवेग के समान तुम्हारा व्यापक और मदकर रस घोड़ियों के बछड़ों की तरह दौड़ रहा है । रस द्युलोकोत्पन्न है । सुन्दर पत्तोंवाला, मधुरता-युक्त, अतीव मदकर और दीप्त रस द्रोण-कलश में जा रहा है । अथ द्वितीया—

प्रतेमदासोमदिरासआशवोसृक्षतरथ्यासोयथापृथक् ।
धेनुर्नवत्संपयसाभिवज्रिणमिन्द्रमिन्दवोमधुमन्तऊर्मयः ॥ २ ॥

प्र । ते । मदासः । मदिरासः । आशवः । असृक्षत । रथ्यासः ।
यथा । पृथक् । धेनुः । न । वत्सम् । पयसा । अभि । वज्रिणम् ।
इन्द्रम् । इन्दवः । मधुऽमन्तः । ऊर्मयः ॥ २ ॥

प्रासृक्षत प्रसृज्यन्ते ते तव मदिरासोमदकरा आशवोव्याप्ता मदासः सोमरसाः । कइव रथ्यासोरथ्याअश्वास्तेयथा तथापृथक् प्रसृज्यन्ते तेमधुमन्तोमाधुर्योपेताऊर्मयः प्रवृद्धरसाः इन्दवः सोमाः धेनुः पयसा वत्समिव स्वरसेन वज्रिणमिन्द्रमभिगच्छन्ति ॥ २ ॥

२. सोम, तुम्हारा मदकर और व्याप्त रस अश्व के समान बनाया जाता है । मधुर, प्रवृद्ध और क्षरणशील सोम वज्री इन्द्र की ओर उसी प्रकार जा रहे हैं, जिस प्रकार दूधवाली गाय बछड़े के पास जाती है ।

अथ तृतीया—

अत्योनहियानोअभिवाजमर्षस्वर्वित्कोशंदिवोअद्रिमातरम् ।
वृषापवित्रेअधिसानोअव्ययेसोमःपुनानइन्द्रियायधायसे ॥ ३ ॥

अत्यः । न । हियानः । अभि । वाजम् । अर्ष । स्वः१वित् ।
कोशम् । दिवः । अद्रि१मातरम् । वृषा । पवित्रे । अधि ।
सानौ । अव्यये । सोमः । पुनानः । इन्द्रिय । धायसे ॥ ३ ॥

अत्योन अश्वइव हियानःप्रेर्यमाणोवाजं संग्रामं अर्षर्ष अभिगच्छ । तथा स्वर्वित् सर्ववित् कोशं द्रोणकलशं दिवोद्युलोकात् अद्रिमातरं अद्रिर्मेघः तेनतज्जन्यमुदकंलक्ष्यते तस्य निर्मातारमर्षर्ष । अथप्रत्यक्षकृतः वृषा वर्षकः सोमः अव्यये अविमये पवित्रे दशापवित्रे अधिसानौ अधीतिसप्तम्यर्थानुवादी समुच्छ्रिते तस्मिन् पुनानः पूयमानोभवति । किमर्थं धायसे धारकाय इन्द्रियाय तदर्थम् ॥ ३ ॥

३. सोम, तुम अश्व के समान भेजे गये संग्राम में जाओ । सर्ववेत्ता सोम, द्युलोक से मेघ-निर्माता के पास जाओ । वर्षक सोम धारक इन्द्र के लिए मेषलोमनय दशा पवित्र में शोधित होते हैं ।

प्रतआश्विनीःपवमानधीजुवोदिव्याअसृग्रन्पयसाधरीमणि ।
प्रान्तर्ऋषयस्थाविरीरसृक्षतयेत्वामृजन्ऋषिषाणवेधसः ॥ ४ ॥

प्र । ते आश्विनीः । पवमान । धीऽजुवः । दिव्याः । असृग्रन् ।
पयसा । धरीमणि । प्र । अन्तः । ऋषयः । स्थाविरीः ।
असृक्षत । ये । त्वा । मृजन्ति । ऋषिऽसान । वेधसः ॥ ४ ॥

हे पवमानसोम ते तव आश्विनीः व्याप्ताः अश्व्याप्तावित्यस्मादौणादिकोविनिः । ततः अण् व्यत्ययेनाद्युदात्तः धीजुवोमनोवेगाः दैव्याःदिविभवाः दिवःपतंत्योधाराः पयसायुक्ताः धरीमणि धारके द्रोणकलशे प्रासृग्रन् गच्छन्ति येवेधसः विधातारः ऋषयः हेसोम ऋषिषाण ऋषिभिःसंभक्त त्वा त्वां मृजन्ति अभिषुण्वन्ति ते ऋषयः । स्थाविरीः स्थविराधाराः अन्तर्मध्ये पात्रस्यान्तः प्रासृक्षत प्रसृजन्ति ॥ ४ ॥

४. सोम, व्याप्त, मनोवेगवान्, दिव्य, शून्य पथ से गिरनेवाली और दुग्ध से युक्त तुम्हारी धारायें धारक द्रोण-कलश में जाती हैं । तुम्हें बनानेवाले ऋषि लोग तुम्हें अभिषुत करते हैं । तुम्हारी धारा को कलश के बीच, ऋषि लोग, कर देते हैं ।

अथ पञ्चमी–

विश्वाधामानिविश्वचक्षऋभ्वसःप्रभोस्तेसतःपरियन्तिकेतवः ।
व्यानशिःपवसेसोमधर्मभिःपतिर्विश्वस्यभुवनस्यराजसि ॥५॥१२॥

विश्वा । धामानि । विश्वऽचक्षः । ऋभ्वसः । प्रऽभोः । ते । सतः । परि । यन्ति । केतवः । विऽआनशिः । पवसे । सोम । धर्मऽभिः । पतिः । विश्वस्य । भुवनस्य । राजसि ॥ ५ ॥ १२ ॥

हे विश्वचक्षः सर्वस्यद्रष्टः सोम प्रभोः परिवृढस्य सतस्ते तव ऋभ्वसः ऋभ्वाइति महन्नाम महान्तः केतवोरश्मयोविश्वा सर्वाणि धामानि तेजःस्थानानि देवशरीराणि परियन्ति परिगच्छन्ति प्रकाशयन्तीत्यर्थः । हे सोम व्यानशिः व्यापनशीलश्चत्वं धर्मभिर्धारकैः रसनिष्पादैः पवसे पूयसे । विश्वस्य भुवनस्यचपतिः स्वामी त्वं राजसि ईश्वरोभवसि ॥ ५ ॥

५. सर्वद्रष्टा सोम, तुम प्रभु हो । तुम्हारी महान् किरणें सारे देवशरीरों को प्रकाशित करती हैं । सोम, तुम व्यापक हो । तुम धारक रस का प्रस्रवण करते हो । तुम विश्व के स्वामी होकर शोभित होते हो ।

॥ इति सप्तमस्य तृतीये द्वादशोवर्गः ॥ १२ ॥

उभयतःपवमानस्यरश्मयोध्रुवस्यसतःपरियन्तिकेतवः ।
यदीपवित्रेअधिमृज्यतेहरिःसत्तानियोनाकलशेषुसीदति॥६॥

उभयतः । पवमानस्य । रश्मयः । ध्रुवस्य । सतः । परि । यन्ति । केतवः । यदि । पवित्रे । अधि । मृज्यते । हरिः । सत्ता । नि । योना । कलशेषु । सीदति ॥ ६ ॥

पवमानस्य पूयमानस्य ध्रुवस्य स्वयमविचलितस्य सतः विद्यमानस्य सोमस्य केतवः प्रज्ञापका रश्मयः उभयत इतश्चामुतश्च परियन्ति परिगच्छन्ति अभिषवसमयएवंभवति । यदि यदा पवित्रे दशापवित्रे हरिर्हरितवर्णोयं अधिमृज्यते तदानीं सत्ता सदनशीलोयं योना योनौ स्वीयेस्थाने कलशेषु द्रोणकलशादिषु निषीदति ॥ ६ ॥

६. क्षरणशील, अविचलित और विद्यमान सोम की प्रज्ञापक किरणें इधर-उधर जाती हैं । जब दशापवित्र में हरितवर्ण सोम शोधित होते हैं, तब निवासशील सोम अपने स्थान (द्रोण-कलश) में बैठते हैं ।

यज्ञस्यकेतुःपवतेस्वध्वरःसोमोदेवानामुपयातिनिष्कृतम् ।
सहस्रधारःपरिकोशमर्षतिवृषापवित्रमत्येतिरोरुवत् ॥ ७ ॥

यज्ञस्य । केतुः । पवते । सुऽअध्वरः । सोमः । देवानाम् । उप ।
याति । निःऽकृतम् । सहस्रऽधारः । परि । कोशम् ।
अर्षति । वृषा । पवित्रम् । अति । एति । रोरुवत् ॥ ७ ॥

यज्ञस्यकेतुः प्रज्ञापकः स्वध्वरः शोभनयागः सोमः पवते पूयतेऽभिषूयते। तादृशः सोमोदेवानांनिष्कृतं संस्कृतं स्थानमुपयाति उपगच्छति। तदर्थं सहस्रधारः कोशं द्रोणकलशं पर्यर्षति ततः तदर्थं वृषा सेक्तायं रोरुवत् शब्दयन् पवित्रमत्येति अतिक्रम्य गच्छत्यधोदेशम्॥७॥

७. यज्ञ के प्रज्ञापक और शोभन-यज्ञ सोम क्षरित होते हैं। सोम देवों के संस्कृत स्थान के पास जाते हैं। अमितधार होकर वे द्रोण-कलस में जाते हैं। सेक्ता सोम शब्द करते हुए पवित्र को लाँघकर नीचे जाते हैं।

राजासमुद्रंनद्योऽविगाहतेपामूर्मिंसचतेसिन्धुषुश्रितः ।
अध्यस्थात्सानुपवमानोअव्ययंनाभापृथिव्याधरुणोमहोदिवः॥८॥

राजा । समुद्रम् । नद्यः । वि । गाहते । अपाम् । ऊर्मिम् । सचते ।
सिन्धुषु । श्रितः । अधि । अस्थात् । सानु । पवमानः । अव्ययम् ।
नाभा । पृथिव्याः । धरुणः । महः । दिवः ॥ ८ ॥

अयं सोमोराजा समुद्रमन्तरिक्षं नद्यस्तत्रत्याअपश्च विगाहते विगाहयत्यपामूर्मिं सचते उदकपूरंस्रवति सिंधुषु उदकेषु ग्रहेषुचाश्रितःसन् हूयमानःसन् रश्मिद्वारा सूर्यमाप्यान्तरिक्षे मेघेषुवर्ततइत्यर्थः। अस्यैव वृष्टिसाधनत्वात्। यद्वा लुप्तोपममेतत् समुद्रंनद्यइव सिंधुषुवसतीवरीषु श्रितआश्रितःसन् समुद्रमभिषुतसोमरसाधारपात्रं विगाहते अभिषवात्पूर्वं। पश्चात्पवमानः पूयमानोव्ययं सानु समुच्छ्रितं दशापवित्रं अध्यस्थात् अधितिष्ठति कुत्रदेशे नाभापृथिव्या नाभिस्थानीयेयज्ञे तत्संबन्धिनि हविर्धानइत्यर्थः। यज्ञमाहुर्भुवनस्यनाभिमितिश्रुतेः। कीदृशः महोदिवो द्युलोकस्य धरुणोधर्ता ॥ ८ ॥

८. जैसे नदियाँ समुद्र में जाती हैं। वैसे ही राजा सोम जल में मिलते हैं। जल में आश्रित होकर पवित्र में जाते और उन्नत दशापवित्र में रहते हैं। वे पृथिवी की नाभि (यज्ञ) में रहते हैं। वे महान् द्युलोक के धारक हैं।

---

१ तै० सं० ७. ४. १७. ।

अथ नवमी—

दिवोनसानुंस्तनयन्नचिक्रदद्द्यौश्चयस्यपृथिवीचधर्मभिः ।
इन्द्रस्यसख्यंपवतेविवेविदत्सोमःपुनानःकलशेषुसीदति ॥ ९ ॥

दिवः । न । सानु । स्तनयन् । अचिक्रदत् । द्यौः । च । यस्य ।
पृथिवी । च । धर्मऽभिः । इन्द्रस्य । सख्यम् । पवते । विऽवेविदत् ।
सोमः । पुनानः । कलशेषु । सीदति ॥ ९ ॥

दिवोन सानु स्तनयन् द्युलोकस्य समुच्छ्रितंस्थानं शब्दयन्निवाचिक्रदत् क्रन्दते यस्य सोमस्य धर्मभिः धारणैर्द्यौःपृथिवीच धृते स्यातां वृष्टिप्रदानद्वारौषध्याद्युत्पादनेन देवानांहविर्भागेन चोभयधारकत्वंप्रसिद्धं।तादृशः सोमोमहानुभावः पुनानः पूयमानः इन्द्रस्य सख्यं विवेविदत् पवते पूयते पवित्रे । सपुनानः सोमः कलशेषु सीदति निवसति ॥ ९ ॥

९. सोम द्युलोक के उन्नत स्थान को शब्दायमान कर रहे हैं। सोम अपनी धारक-शक्ति से द्यौ और पृथिवी को धारण करते हैं। सोम इन्द्र की मैत्री के लिए दशापवित्र में शोधित होते और कलश में बैठते हैं।

ज्योतिर्यज्ञस्यपवतेमधुप्रियंपितादेवानांजनिताविभूवसुः ।
दधातिरत्नंस्वधयोरपीच्यंमदिन्तमोमत्सरइन्द्रियोरसः ॥१०॥१३॥

ज्योतिः । यज्ञस्य । पवते । मधु । प्रियम् । पिता । देवानाम् ।
जनिता । विभुऽवसुः । दधाति । रत्नम् । स्वधयोः । अपीच्यम् ।
मदिन्ऽतमः । मत्सरः । इन्द्रियः । रसः । १० ॥ १३ ॥

यज्ञस्यज्योतिः प्रकाशकःसोमः प्रियंदेवानां मधु मधुरं रसंपवते क्षरति । यद्वा ज्योतिर्यज्ञस्येत्येतदपि मधुविशेषणं । तथा सत्युक्तलक्षणंमधु पवते पूयतइत्यर्थः ।सोमरसोविशेष्यते पिता रक्षिता देवानां । उत्पादयिता सर्वस्य । विभुवसुः प्रभूतधनः ईदृशः सस्वधयोर्द्यावापृथिव्योः ।स्वधे पुरंधी इति द्यावापृथिवीनामसुपठितः।तयोरपीच्यमन्तर्हितं रत्नंरमणीयंधनं दधाति स्थापयति स्तोतृषु । पुनः सएवविशेष्यते मदिन्तमःमादयितृतमः मत्सरः सोमःइन्द्रियः इन्द्रेण जुष्ट इन्द्रस्यवर्धकोवा रसोरसरूपः ॥ १० ॥

१०. यज्ञ-प्रकाशक सोम देवों के प्रिय और मधुर रस को प्रवाहित करते हैं। देवों के रक्षक, सबके उत्पादक और प्रचुर धनी सोम द्यावापृथिवी के बीच में रक्खे रमणीय धन को स्तोताओं को देते हैं। मादकतम सोम इन्द्र के वर्द्धक और रस-रूप हैं।

॥ इति सप्तमस्य तृतीये त्रयोदशोवर्गः ॥ १३ ॥

अभिक्रन्दन्कलशंवाज्यर्षतिपतिर्दिवःशतधारोविचक्षणः ।
हरिर्मित्रस्यसदनेषुसीदतिमर्मृजानोविभिःसिन्धुभिर्वृषा ॥ ११ ॥

अभिऽक्रन्दन् । कलशम् । वाजी । अर्षति । पतिः । दिवः ।
शतऽधारः । विऽचक्षणः । हरिः । मित्रस्य । सदनेषु । सीदति ।
मर्मृजानः । अविऽभिः । सिन्धुऽभिः । वृषा ॥ ११ ॥

वाजी वेजनवान् गमनवान् अश्वसदृशोवा सोमः अभिक्रन्दन् शब्दंकुर्वन् कलशमभ्य"त गच्छति। कीदृशोवाजी दिवःपतिः द्युलोकस्यस्वामी शतधारः शतसंख्याकधारः विचक्षणोविश्वद्रष्टा हरिर्हरितवर्णोरसात्मकः सोमोमित्रस्य देवानां मित्रभूतस्य यज्ञस्य वा सदनेषुस्थानेषु सीदति पात्रेषु धृतःसन्। कीदृशोहरिः सिन्धुभिः स्यन्दनसाधनैः अविभिर्दशापवित्रछिद्रै" ?-जानः शोध्यमानोवृषा वर्षकः ॥ ११ ॥

११. गतिशील, द्युलोक के स्वामी, शतधार, दूरदर्शी, हरितवर्ण और रस रूप सोम देवों के मित्र यज्ञ में, शब्द करते हुए, कलश में जाते हैं। सोम स्रवणशील दशापवित्र के छिद्रों में शोधित और वर्षक हैं।

अग्रेसिन्धूनांपवमानोअर्षत्यग्रेवाचोअग्रियोगोषुगच्छति ।
अग्रेवाजस्यभजतेमहाधनंस्वायुधःसोतृभिःपूयतेवृषा ॥ १२ ॥

अग्रे । सिन्धूनाम् । पवमानः । अर्षति । अग्रे । वाचः । अग्रियः ।
गोषु । गच्छति । अग्रे । वाजस्य । भजते । महाऽधनम् ।
सुऽआयुधः । सोतृऽभिः । पूयते । वृषा ॥ १२ ॥

यः सोमः पवमानः सिन्धूनां स्यन्दमानानामुदकानां अग्रे अर्षति गच्छति तथाअग्रियः अग्राहःश्रेष्ठोग्रेवाचोमाध्यमिकायाअग्रेअर्षति । तथा गोषु रश्मिषु गच्छति तथा वाजस्यान्नस्य बलस्यवालाभाय महाधनं संग्रामं भजते सस्यायुधः वृषा वर्षकःसोमः सोतृभिः अभिषवकर्तृभिः पूयते ॥ १२ ॥

१२. सोम स्यन्दनशील जल के आगे जाते हैं। श्रेष्ठ सोम माध्यमिकी वाक् के आगे जाते हैं। वे किरणों में जाते हैं। वे बल-लाभ के लिए युद्ध का सेवन करते हैं। सुन्दर आयुधवाले और वर्षक सोम अभिषवकर्त्ताओं के द्वारा शोधित होते हैं।

अथ त्रयोदशी—

अयंमतवाञ्छकुनोयथाहितोव्येंससारपवमानऊर्मिणा ।
तवक्रत्वारोदसीअन्तराकवेशुचिर्धियापवतेसोमइन्द्रते ॥ १३ ॥

अयम् । मतऽवान् । शकुनः । यथा । हितः । अव्ये । ससार । पवमानः । ऊर्मिणा । तव । क्रत्वा । रोदसी इति । अन्तरा । कवे । शुचिः । धिया । पवते । सोमः । इन्द्र । ते ॥ १३ ॥

अयं सोमोमतवान् मतं संमतं प्रियं स्तोत्रं तद्वान् पवमानः पूयमानः शोध्यमानश्चसन् हितः प्रेरितः शकुनःपक्षी यथा शीघ्रंगच्छति तथा अव्येपवित्रे ऊर्मिणारसेन ससार गच्छति । हेकवे क्रान्तप्रज्ञ अनूचानवा । येवाअनूचानास्तेकवयइतिश्रुतेः । तादृशेन्द्रयजमान यद्वा उक्तलक्षणेन्द्र ते तव क्रत्वा कर्मणा धियाप्रज्ञयाच यद्वा विशेषणविशेष्यभावः धियाधारकेणक्रत्वाकर्मणा रोदसी अंतरा रोदस्योर्द्यावापृथिव्योर्मध्ये शुचिः सोमः पवते पूयते ॥ १३ ॥

१३. स्तोत्रवान्, शोध्यमान् और प्रेरित सोम, पक्षी के समान, रस के साथ दशापवित्र में शीघ्र ही जाते हैं। क्रान्त प्रज्ञ इन्द्र, तुम्हारे कर्म और बुद्धि से द्यावापृथिवी के बीच में पूत सोम प्रवाहित होते हैं।

द्रापिंवसानोयजतोदिविस्पृशमन्तरिक्षप्राभुवनेष्वर्पितः ।
स्वर्जज्ञानोनभसाभ्यक्रमीत्प्रत्नमस्यपितरमाविवासति ॥ १४ ॥

द्रापिम् । वसानः । यजतः । दिविऽस्पृशम् । अन्तरिक्षऽप्राः । भुवनेषु । अर्पितः । स्वः । जज्ञानः । नभसा । अभि । अक्रमीत् । प्रत्नम् । अस्य । पितरम् । आ । विवासति ॥ १४ ॥

दिविस्पृशं दिवःस्पष्टारं द्रापिं कवचं तेजोरूपं वसानः आच्छादयन् यजतोयष्टव्योन्तरिक्षप्राः अंतरिक्षस्यपूरकः उदकेन तादृशः सोमोभुवनेषूदकेष्वर्पितः स्वः सर्वस्वनयामिनव्यं देवसंघं स्वर्गंवा जज्ञानः जनयन् अथवा स्वरुदकं तज्जनयन् नभसा उदकेन अभ्यक्रमीत् अभिक्रामति अस्योदकस्य पितरं पालकं प्रत्नं पुराणं इन्द्रं आविवासति परिचरति ॥ १४ ॥

१४. स्वर्गस्पर्शी और तेजोरूप कवच को पहननेवाले सोम यजनीय और अन्तरिक्ष के पूरक हैं। सोम जल मिश्रित होकर और नये स्वर्ग को उत्पन्न करके जल के द्वारा बहते हैं। वे जल के पिता और प्राचीन इन्द्र की परिचर्या करते हैं।

---

१ ऐ० ब्रा० २. ३८.।

अथ पञ्चदशी—

सोअस्यविशेमहिशर्मयच्छतियोअस्यधामप्रथमंव्यानशे ।
पदंयदस्यपरमेव्योमन्यतोविश्वाअभिसंयातिसंयतः ॥१५॥१४॥

सः । अस्य । विशे । महि । शर्म । यच्छति । यः । अस्य ।
धाम । प्रथमम् । विऽआनशे । पदम् । यत् । अस्य । परमे ।
विऽओमनि । अतः । विश्वाः । अभि । सम् ।
याति । सम्ऽयतः ॥ १५ ॥ १४ ॥

ससोमः अस्येन्द्रस्यविशे प्रवेशनाय महिमहत् शर्म सुखं यच्छति यःसोमोस्येन्द्रस्य धाम तेजोयुक्तंशरीरं प्रथमं इतरदेवप्राप्तेः पूर्वं व्यानशे प्राप्तवान् यत् यस्यास्यसोमस्य परमेऽत्युत्कृष्टे व्योमन् व्योमनि द्युलोके वेद्यांवा पदंस्थानं भवति यतोयस्मात् सोमात् तृप्तइन्द्रः सोमःस्वयं वा विश्वाः संयतः सर्वान् संग्रामान् अभिसंयाति सम्यगभिगच्छति ससोमोमहिशर्मयच्छतीतिसंबन्धः ॥ १५ ॥

१५. सोम इन्द्र के प्रवेश के लिए महान् सुख देते हैं। सोम ने इन्द्र के तेजस्वी शरीर को पहले ही प्राप्त किया था। सोम का स्थान उत्तम वेदी पर है। सोम से तृप्त होकर इन्द्र सारे संग्रामों में जाते हैं।

॥ इति सप्तमस्य तृतीये चतुर्दशोवर्गः ॥ १४ ॥

प्रोअयासीदिन्दुरिन्द्रस्यनिष्कृतंसखासख्युर्नप्रमिनातिसंगिरम् ।
मर्यइवयुवतिभिःसमर्षतिसोमःकलशेशतयाम्नापथा ॥ १६ ॥

प्रो इति । अयासीत् । इन्दुः । इन्द्रस्य । निःऽकृतम् । सखा ।
सख्युः । न । प्र । मिनाति । सम्ऽगिरम् । मर्यःऽइव । युवतिऽभिः ।
सम् । अर्षति । सोमः । कलशे । शतऽयाम्ना । पथा ॥ १६ ॥

इन्दुः सोमः इन्द्रस्यनिष्कृतं स्थानमुदरं प्रोअयासीत् प्रैवगच्छति गत्वाच सखा सखिभूतः सोमः सख्युरिन्द्रस्य संगिरं सम्यग्गिरणाधारभूतं उदरं नप्रमिनाति नहिनस्ति। किंच मर्यइवयुवतिभिः मर्त्योयथा युवतिभिः सहसंगतोभवति तद्वदयमपि सोमोयुवतिभिर्मिश्रणशीलाभिर्वसतीवरीभिरद्भिः सह समर्षति संगच्छते अभिषवकाले पश्चात्सोमः शतयाम्ना अनेकयामनसाधनच्छिद्रोपेतेन पथामार्गेण दशापवित्रसंबन्धिनि कलशे द्रोणकलशे गच्छतीतिशेषः।

यद्वैकमेवेवाक्यं । यथा मर्योयुवतिभिः सहसंगच्छते एवं कलशे शतयाम्नापथा संगच्छतेन्द्रिः ॥ १६ ॥

१६. सोम इन्द्र के पेट में जाते हैं। इन्द्र-मित्र सोम इन्द्र के आधारभूत हृदय को नहीं कष्ट देते। जैसे युवतियां पुरुषों से मिलती हैं, वैसे ही सोम जल में मिलते हैं। सोम सौ छिद्रोंवाले मार्ग से कलश में जाते हैं। अथ सप्तदशी—

प्रवोधियोमन्द्रयुवोविपन्युवःपनस्युवःसंवसनेष्वक्रमुः।
सोमंमनीषाअभ्यनूषतस्तुभोभिधेनवःपयसेमशिश्रयुः ॥ १७ ॥

प्र। वः। धियः। मन्द्रऽयुवः। विपन्युवः। पनस्युवः।
सम्ऽवसनेषु। अक्रमुः। सोमम्। मनीषाः। अभि। अनूषत।
स्तुभः। अभि। धेनवः। पयसा। ईम्। अशिश्रयुः ॥ १७ ॥

हे सोम वोयुष्माकं धियोध्यानारः मन्द्रयुवः मदकरं शब्दं कामयमानाः पनस्युवः स्तुतिं कामयमानाः विपन्युवः स्तोतृनामैतत् स्तोतारः संवसनेषु संवासयोग्येषु यागगृहेषु प्राक्रमुः प्रक्रमन्ते। तदेवाह सोमं मनीषाः मनसईशाः ईश्वराः स्तोतारः अभ्यनूषत अभिष्टुवन्ति धेनवोपि पयसा स्वीयेन ईमेनंसोममभ्यशिश्रयुः अभिश्रीणन्ति ॥ १७ ॥

१७. सोम, तुम्हारा ध्यान धरनेवाले, मदकर सोम और स्तुति की इच्छा करनेवाले स्तोता लोग निवास-योग्य यज्ञ-गृहों में घूमते हैं। वशीकृतमना स्तोता लोग सोम की स्तुति करते और गायें सोम को दूध से सींचती हैं। अथाष्टादशी—

आनःसोमसंयतंपिप्युषीमिषमिन्दोपवस्वपवमानोअस्त्रिधम्।
यानोदोहतेत्रिरहन्नसश्चुषीक्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥ १८ ॥

आ। नः। सोम। सम्ऽयतम्। पिप्युषीम्। इषम्। इन्दो इति।
पवस्व। पवमानः। अस्त्रिधम्। या। नः। दोहते। त्रिः।
अहन्। असश्चुषी। क्षुऽमत्। वाजऽवत्। मधुऽमत्।
सुऽवीर्यम् ॥ १८ ॥

हेइन्दो दीप्तसोम पवमानस्त्वं नोस्माकं संयतं संगृहीतं पिप्युषीं प्रवृद्धमिषमन्नं अस्त्रिधं अक्षीणं आपवस्व प्रयच्छेत्यर्थः। या यादृशी नोस्माकं अहन् अहनि अह्नः त्रिः त्रिषुसवनेषु असश्चुषी अपतियंधादोहते क्षरति। किं क्षुमत् शब्दोपेतं सर्वत्रश्रूयमाणं वाजवत् मधुमत् माधुर्योपेतं सुवीर्यं शोभनसामर्थ्यं पुत्रं दोहते तां इषं पवस्वेति समन्वयः ॥ १८ ॥

१८. दीप्त सोम, हमें संगृहीत, प्रवृद्ध और ह्रास-शून्य अन्न दो। वह अन्न बेरोक-टोक तीन पवनों में शब्दवान्, आश्रयमाण, मधुरता-युक्त और शोभन सामर्थ्यवाला पुत्र देता है।

वृषामतीनांपवतेविचक्षणःसोमोअह्नःप्रतरीतोपसोदिवः।
क्राणासिन्धूनांकलशाँअवीवशदिन्द्रस्यहार्दाविशन्मनीषिभिः॥१९॥

वृषा। मतीनाम्। पवते। विऽचक्षणः। सोमः। अह्नः। प्रऽतरीता। उषसः। दिवः। क्राणा। सिन्धूनाम्। कलशान्। अवीवशत्। इन्द्रस्य। हार्दि। आऽविशन्। मनीषिऽभिः॥ १९॥

अयंसोमः पवते अभिषूयते। कीदृशःसोमः मतीनां मतयः स्तोतारः तेषां वृषा वर्षकः कामानां विचक्षणोविद्रष्टा अह्नः उषसोदिवोद्युलोकस्यादित्यस्यवा प्रतरीता वर्धयिता। किंच सिंधूनां स्यंदमानानां उदकानां क्राणा कर्ता करोतेः शानचि बहुलंछन्दसीति विकरणस्यलुक्। सुपांसुलुगित्याकारः कलशानवीवशत् कामयते प्रवेष्टुं। किंकुर्वन् इन्द्रस्यहार्दि हृदयमाविशन् प्रविशन् मनीषिभिः स्तुतइतिशेषः। यद्वा व्यवहितमपि मनीषिभिरित्येतत्पवतइत्यनेन संबध्यते॥ १९॥

१९. स्तोताओं के काम-वर्षक, दूरदर्शी, सूर्य के वर्द्धक और जल-कर्ता सोम कलश में घुसने की इच्छा करते हैं। सोम इन्द्र के हृदय में पठित हैं।

मनीषिभिःपवतेपूर्व्यःकविर्नृभिर्यतःपरिकोशाँअचिक्रदत्।
त्रितस्यनामजनयन्मधुक्षरदिन्द्रस्यवायोःसख्यायकर्तवे॥२०॥१५॥

मनीषिऽभिः। पवते। पूर्व्यः। कविः। नृऽभिः। यतः। परि। कोशान्। अचिक्रदत्। त्रितस्य। नाम। जनयन्। मधु। क्षरत्। इन्द्रस्य। वायोः। सख्याय। कर्तवे॥ २०॥ १५॥

अयंसोमोमनीषिभिर्मेधाविभिरध्वर्य्वादिभिः पवतेपूयते यद्वायं मनीषिभिः मनीषिणीभिः धाराभिःपवते क्षरति। कीदृशोयं पूर्व्यः पुराणः कविर्मेधावी नृभिर्नेतृभिरध्वर्य्वादिभिः यतः नियमितः सन् कोशान् कलशानप्सु पर्यचिक्रदत् परिक्रन्दते शब्दंकरोति त्रितस्य त्रिषुस्थानेषु विस्तृतस्येन्द्रस्य यजमानस्यसंबन्धि नाम नामकमुदकं जनयन् उत्पादयन् मधु मधुरंरसं क्षरत् क्षरति किमर्थं इन्द्रस्य वायोश्च सख्याय कर्तवे सख्यं कर्तुं॥ २०॥

२०. प्राचीन, मेधावी और पुरोहितों के द्वारा नियमित सोम, अध्वर्युओं के द्वारा शोधित होकर कलश में जाने के लिए शब्द करते हैं। इन्द्र और वायु की मित्रता के लिए और तीनों स्थानों में विस्तृत यजमान के लिए जल उत्पन्न करनेवाले सोम मधुर रस चुला रहे हैं।

॥ इति सप्तमस्य तृतीये पंचदशोवर्गः॥ १५॥

अयंपुनानउषसोविरोचयदयंसिन्धुभ्योअभवदुलोककृत्।
अयंत्रिःसप्तदुदुहानआशिरंसोमोहृदेपवतेचारुमत्सरः ॥२१॥

अयम्। पुनानः। उषसः। वि। रोचयत्। अयम्। सिन्धुऽभ्यः।
अभवत्। ऊँ इति। लोकऽकृत्। अयम्। त्रिः। सप्त। दुदुहानः।
आऽशिरम्। सोमः। हृदे। पवते। चारु। मत्सरः॥ २१॥

अयं सोमः पुनानः पूयमानः उषसो विरोचयत् विविधं रोचयति। अयं सिंधुभ्यः स्यन्दमानेभ्योऽद्भ्यो वसतीवरीभ्यः अभवत् समृद्धोभवति उइतिपूरणः कीदृशोयं लोककृत् लोकानांकर्ता वर्षकत्वाद्देवोधारकत्वाद्वास्यलोककृत्त्वं। अयं सोमः त्रिःसप्त एकविंशतिर्वा ऋत्विग्भिस्तेन आशिरं दुदुहानः दुहानः दोहस्यमयोजकत्वात्कर्तुरुपचारः मत्सरोमदकरः चारु रमणीयं पवते क्षरति। किमर्थं हृदे हृदयाय हृदयगमनाय॥ २१॥

२१. सोम प्रातःकाल को नानाः प्रकार से शोभित करते हैं। वे वसतीवरी-जल में समृद्ध होते हैं। सोम लोक-कर्त्ता हैं। ये इक्कीस (गायों या ऋत्विकों-द्वारा) दुहे जाते हैं। मदकर सोम, हृदय में जाने के लिए भली भाँति क्षरित होते हैं।

पवस्वसोमदिव्येषुधामसुसृजानइन्दोकलशेपवित्रआ।
सीदन्निन्द्रस्यजठरेकनिक्रदन्नृभिर्यतःसूर्यमारोहयोदिवि॥२२॥

पवस्व। सोम। दिव्येषु। धामऽसु। सृजानः। इन्दो इति।
कलशे। पवित्रे। आ। सीदन्। इन्द्रस्य। जठरे। कनिक्रदत्।
नृऽभिः। यतः। सूर्यम्। आ। अरोहयः। दिवि॥ २२॥

हे सोम दिव्येषु धामसु स्थानेषु देवानांसंबन्धिषूदरेष्वित्यर्थः तेषु पवस्व क्षर। कीदृशान् हे इन्दो दीप्त सोम कलशे पवित्रे आ दशापवित्रे च। आइतिचार्थे। सृजानः सृज्यमानः। अत्राग्निहोत्रं जुहोति यवागूं पचतीतिवदार्थिकः क्रमोवगंतव्यः। किंचेन्द्रस्य जठरे सीदन् जठरं गच्छन् कनिक्रदत् शब्दंकुर्वन् नृभिर्नेतृभिर्ऋत्विग्भिः यतः परिगृहीतःहुतइत्यर्थः। तथाभूतः सन् दिविसूर्यमारोहयः प्रादुर्भूतमकरोः॥ २२॥

२२. सोम, देवों के उदर में गिरो। दीप्त सोम, तुम कलश में बनाये जाते हो। सोम इन्द्र के पेट में आकर शब्द करते हैं। ये ऋत्विकों के द्वारा हुत हैं। सोम ने सूर्य को प्रादुर्भूत किया।

अथ त्रयोविंशी—

अद्रिभिःसुतःपवसेपवित्रआँइन्दविन्द्रस्यजठरेष्वाविशन् ।
त्वंनृचक्षाअभवोविचक्षणसोमगोत्रमङ्गिरोभ्योवृणोरपः ॥२३॥

अद्रिऽभिः । सुतः । पवसे । पवित्रे । आ । इन्दो इति । इन्द्रस्य । जठरेषु । आऽविशन् । त्वम् । नृऽचक्षाः । अभवः । विऽचक्षण । सोम । गोत्रम् । अङ्गिरःऽभ्यः । अवृणोः । अपः ॥ २३ ॥

हे इन्दो सोम अद्रिभिः ग्रावभिः सुतोभिषुतस्त्वं पवसे क्षरसि पूयसेवा पवित्रे आ दशापवित्रे।आइतिपूरणः।यद्वा अभिषुतोभवसि पवसेचेति चार्थआकारः। किंकुर्वन् इन्द्रस्य जठरेषु जठरप्रदेशेषु आविशन् जठरप्रदेशायेत्यर्थः।किंच हे विचक्षण विद्रष्टः सोम त्वं नृचक्षाः अभवः नृणां मनुष्याणामनुग्रहेण द्रष्टाभवसि। किंच हे सोम त्वं अंगिरोभ्योगोत्रं मेघमुदकं क्षारयितुं पणिभिरपहृतानां गवामावरकं पर्वतंवा अपावृणोः ॥ २३ ॥

२३. इन्द्र के उदर में पैठने के लिए पत्थरों से अभिषुत होकर तुम दशापवित्र में क्षरित होते हो। दूरदर्शी सोम, तुम मनुष्यों के अनुग्रह से दर्शक होते हो। सोम, अंगिरा लोगों के लिए तुमने गौओं के [illegible] वाले पर्वत को अलग किया था।

त्वांसोमपवमानंस्वाध्योनुविप्रासोअमदन्नवस्यवः ।
त्वांसुपर्णआभरद्दिवस्परीन्दोविश्वाभिर्मतिभिःपरिष्कृतम् ॥ २४॥

त्वाम् । सोम । पवमानम् । सुऽआध्यः । अनु । विप्रासः । अमदन् । अवस्यवः । त्वाम् । सुऽपर्णः । आ । अभरत् । दिवः । परि । इन्दो इति । विश्वाभिः । मतिऽभिः । परिऽकृतम् ॥ २४ ॥

हे सोम पवमानं त्वां स्वाध्यः सुमतयः सुकर्माणोवा विप्रासोविपा मेधाविनः स्तोतारः अवस्यवोरक्षाकामा अन्वमदन् अनुहृष्यन्ति। हे इन्दो त्वां सुपर्णः श्येन आभरत् आहरत् दिवस्परि द्युलोकस्योपरि द्युलोकादित्यर्थः। कीदृशं त्वां विश्वाभिर्मतिभिः सर्वाभिः स्तुतिभिः परिष्कृतमलंकृतं ॥ २४ ॥

२४. सोम, क्षरणशील तुम्हारा, सुकर्मा और मेधावी स्तोता लोग, रक्षाभिलाषी होकर, स्तोत्र करते हैं। सभी स्तुतियों से अलंकृत तुम्हें [illegible] सुन्दर पंखोंवाला श्येन पक्षी ले आया।

अव्येपुनानंपरिवारंऊर्मिणाहरिंनवन्तेअभिसप्तधेनवः ।
अपामुपस्थेअध्यायवःकविमृतस्ययोनामहिषाअहेषत ॥२५॥१६॥

अव्ये । पुनानम् । परि । वारे । ऊर्मिणा । हरिम् । नवन्ते । अभि ।
सप्त । धेनवः । अपाम् । उपऽस्थे । अधि । आयवः । कविम् ।
ऋतस्य । योना । महिषाः । अहेषत ॥ २५ ॥ १६ ॥

अव्ये अविमये वारे वाले दशापवित्रे ऊर्मिणा रसेन परि परितः पुनानं पवमानं हरिं हरितवर्णं सोमं अभिनवन्ते अभिगच्छन्ति सप्तधेनवः प्रीणयित्र्यः सप्त गायत्र्याद्याः सप्त गंगाद्या नद्योवा नवते क्षोदते इतिगतिकर्मसुपठितः ।किंच कविं त्वां अपामुपस्थे अन्तरिक्षस्योत्संगे ऽ प्य योना योनौ उदकनामैतत् ऋतंयोनिः ऋतस्ययोनिरिति तन्नामसुपाठात् उदके ऽहेषाः महान्तआयवोमनुष्याः अध्यहेषत अधिकं प्रेरयन्ति ॥ २५ ॥

२५. प्रीतिकर सप्त गायत्री आदि छन्द मेषलोममय दशापवित्र पर तुम हरितवर्ण को क्षरित कर प्राप्त करते हैं। क्रान्तकर्मा, तुम्हें अन्तरिक्ष के जल में महान् आयुवाले लोग प्रेरित करते हैं।

॥ इति सप्तमस्य तृतीये षोडशोवर्गः ॥ १६ ॥

इन्दुःपुनानोअतिगाहतेमृधोविश्वानिकृण्वन्त्सुपथानियज्यवे ।
गाःकृण्वानोनिर्णिजंहर्यतःकविरत्योनक्रीळन्परिवारमर्षति ॥२६॥

इन्दुः । पुनानः । अति । गाहते । मृधः । विश्वानि । कृण्वन् ।
सुऽपथानि । यज्यवे । गाः । कृण्वानः । निःऽनिजम् । हर्यतः ।
कविः । अत्यः । न । क्रीळन् । परि । वारम् । अर्षति ॥ २६ ॥

अयमिन्दुः दीप्तः सोमः पुनानः पूयमानःअतिगाहते अतिक्रम्य गच्छति । मृधः शत्रून् । किंकुर्वन् विश्वानि गंतव्यानि सुवर्त्मानि वैदिकानि लौकिकानिच सुपथानि कृण्वन् कुर्वन् कस्मै यज्यवे यागकर्त्रे यजमानाय शत्रून् परिहरन् मार्गान् सुपथान् कुर्वन् कलशं प्रविशतीत्यर्थः । किंच निर्णिजं आत्मीयं रूपं गाः कृण्वानोरसमयान् कुर्वाणइत्यर्थः हर्यतः कान्तः हर्यगतिकांत्योः औणादिकःअतच् कविः क्रान्तप्रज्ञः एवंभूतः सोमः अत्योन अश्वइव क्रीळन् वारं दशापवित्रं पर्यर्षति परिगच्छति ॥ २६ ॥

२६. दीप्त सोम याज्ञिक यजमान के लिए शत्रुओं को दूर कर और सुन्दर मार्ग बनाकर कलश में जाते हैं। सुन्दर और क्रान्तकर्मा सोम, अश्व के समान क्रीड़ा करते हुए और अपने रूप को रसमय करते हुए मेषलोममय दशा पवित्र में जाते हैं।

अथ सप्तविंशी—

असश्चतःशतधाराअभिश्रियोहरिंनवन्तेवनाउदन्युवः ।
क्षिपोमृजन्तिपरिगोभिरावृतंतृतीयेपृष्ठेअधिरोचनेदिवः ॥ २७ ॥

असश्चतः । शतऽधाराः । अभिऽश्रियः । हरिम् । नवन्ते । अव । ताः । उदन्युवः । क्षिपः । मृजन्ति । परि । गोभिः । आऽवृतम् । तृतीये । पृष्ठे । अधि । रोचने । दिवः ॥ २७ ॥

असश्चतः परस्परसंगताः शतधाराः अभिश्रियः अभितः सोमंश्रयन्त्यः ताः प्रसिद्धाः सूर्यस्य रश्मयो हरिं अवनवन्ते गच्छन्ति । उदन्युवः उदकेच्छावत्यः यद्वा धाराशब्देनात्र सोमधारा अभिप्रेताः असश्चतोसंबद्धाः अभिश्रियःअभितोगाः श्रयंत्यः गोभिः श्रिताः ताः प्रसिद्धा उदन्युव इन्द्रसंबन्धि वृष्टिकामा हरिमिन्द्रं अवनवन्ते संगच्छन्ते क्षिपोंगुलयोपि गोभिः दीप्तिपक्षे गोभीरश्मिभिरावृतं सोमधारापक्षे गोभिः पर्यावृतं व्याप्तं सोमं मृजन्ति अवशोधयन्ति। दिव आदित्याद्रोचने रोचमाने यमादित्योरोचयति तस्मिन् तृतीयेपृष्ठे क्षित्यपेक्षायां तृतीयभूते द्युलोके अधिवसन्तं सोमंमृजन्ति ॥ २७ ॥

२७. परस्पर संगत, शतधार और सोम का आश्रय करनेवाली सूर्य की किरणें हरि (इन्द्र वा सोम) के पास जाती हैं। अँगुलियाँ किरणों में ढके और द्युलोक में स्थित सोम का शोधन करती हैं।

तवेमाःप्रजादिव्यस्यरेतसस्त्वंविश्वस्यभुवनस्यराजसि ।
अथेदंविश्वंपवमानतेवशेत्वमिन्दोप्रथमोधामधाअसि ॥ २८ ॥

तव । इमाः । प्रऽजाः । दिव्यस्य । रेतसः । त्वम् । विश्वस्य । भुवनस्य । राजसि । अथ । इदम् । विश्वम् । पवमान । ते । वशे । त्वम् । इन्दो इति । प्रथमः । धामऽधाः । असि ॥ २८ ॥

तव दिव्यस्य रेतसःसकाशादिमाःप्रजा उत्पद्यमानाः प्राणिनउत्पन्नाः । सोमोविरेतोधाइति श्रुतेः । त्वं विश्वस्य भुवनस्य राजसि ईश्वरोभवसि । अथापिचेदंविश्वं हे पवमान ते वशे त्वदधीनं वर्तते । हे इन्दो प्रथमोमुख्यस्त्वं धामधाः धाम्नोधर्ता असि भवसि ॥ २८ ॥

२८. सोम, तुम्हारे दिव्य तेज से सब प्राणी उत्पन्न हुए हैं। तुम सारे संसार के स्वामी हो। यह संसार तुम्हारे अधीन है। तुम मुख्य हो। तुम सबके धारक हो।

अथैकोनत्रिंशी—

त्वंसमुद्रोअसिविश्ववित्कविरवेमाःपञ्चप्रदिशोविधर्मणि ।
त्वंदांचपृथिवींचातिजभ्रिषेतवज्योतींषिपवमानसूर्यः ॥ २९ ॥

---

१ तै० ब्रा० १. ८. १ ।

त्वम् । समुद्रः । असि । विश्वऽवित् । कवे । तव । इमाः । पञ्च । प्रऽदिशः । विऽधर्मणि । त्वम् । द्याम् । च । पृथिवीम् । च । अति । जभ्रिषे । तव । ज्योतींषि । पवमान । सूर्यः ॥ २९ ॥

हे कवे क्रान्तप्रज्ञ त्वं यस्मात्समुद्रः वर्षसाधनोपां अतोविश्वविदसि । यद्वा समुद्रोद्रवात्मकोसि विश्वविद्यासि । किंच तव विधर्मणि विधारणे इमाः पंचप्रदिशः प्रकृष्टादिशोभवन्तीतिशेषः । त्वं द्यांच दिवं च पृथिवींच अतिजभ्रिषे बिभर्षि । हे पवमान सूर्येदिवस्तवज्योतींषि आप्याययति ॥ २९ ॥

२९. सोम, तुम द्रवात्मक और संसार के ज्ञाता हो । तुम्हीं इन पाँचों दिशाओं (आकाश और चार दिशाओं) के धारक हो । तुम द्युलोक और पृथिवी को धारण किये हुए हो । तुम्हारी किरणों को सूर्य प्रफुल्ल करते हैं । अथ त्रिंशी–

त्वंपवित्रेरजसोविधर्मणिदेवेभ्यःसोमपवमानपूयसे ।
त्वामुशिजःप्रथमाअगृभ्णततुभ्येमाविश्वाभुवनानियेमिरे ॥३०॥१७॥

त्वम् । पवित्रे । रजसः । विऽधर्मणि । देवेभ्यः । सोम । पवमान । पूयसे । त्वाम् । उशिजः । प्रथमाः । अगृभ्णत । तुभ्यं । इमा । विश्वा । भुवनानि । येमिरे ॥ ३० ॥ १७ ॥

हे सोम पवमान त्वं रजसोलोकस्य रसस्यवा विधर्मणि विधारके दशापवित्रे देवेभ्यः देवार्थं पूयसे । त्वामुशिजः कामयमाना ऋत्विजः प्रथमाः प्रथमामुख्याः अगृभ्णत गृह्णंति । तुभ्यं तुभ्यं इमा इमानि विश्वा सर्वाणि भुवनानि भूतजातानि येमिरे यच्छन्त्यात्मानं ॥३०॥

३०. सोम, तुम देवों के लिए संसार व रस के धारक दशापवित्र में शोधित किये जाते हो । अभिलाषी और मुख्य पुरोहित तुम्हारा ग्रहण करते हैं । तुम्हारे लिए सारे प्राणी अपने को अर्पित करते हैं ।

॥ इति सप्तमस्य तृतीये सप्तदशोवर्गः ॥ १७ ॥

अथैकत्रिंशी–

प्रेभएत्यतिवारमव्ययंवृषावनेष्ववचक्रदद्धरिः ।
संधीतयोवावशानाअनूषतशिशुंरिहन्तिमतयःपनिमतम् ॥ ३१ ॥

प्र । रेभः । एति । अति । वारम् । अव्ययम् । वृषा । वनेषु । अव । चक्रदत् । हरिः । सम् । धीतयः । वावशानाः । अनूषत । शिशुम् । रिहन्ति । मतयः । पनिमतम् ॥ ३१ ॥

रेभः शब्दयिता । रेभृशब्दे । सोमः अव्ययं अविमयं वारं वालं प्रत्येति प्रकर्षेणातिगच्छति । वृषा सेक्ता सोमोवनेषूदकेषु अवचक्रदत् अवक्रंदत् । हरिर्हरितवर्णः सोमः । समनूषत संस्तुवन्ति । के धीतयोध्यातारो वावशाना यागं सोमंवाकामयमानाः शिशुं शिशुवत्संस्कर्तव्यं सोमं मतयः स्तुतयोरिहन्ति लिहन्ति स्पृशंति स्वविषयीकुर्वन्तीत्यर्थः । कीदृशं पनिमतं शब्दयंतं ॥ ३१ ॥

३१. सोम मेषलोममय दशापवित्र में जाते हैं। हरितवर्ण और सेचक सोम जल में बोलते हैं। ध्यान करनेवाले और सोम की अभिलाषा करनेवाली स्तुतियाँ शिशु के समान और शब्दवान् सोम का गुण-गान करती हैं।

ससूर्यस्यरश्मिभिःपरिव्यततन्तुंतन्वानस्त्रिवृतंयथाविदे ।
नयन्ऋतस्यप्रशिषोनवीयसीःपतिर्जनीनामुपयातिनिष्कृतम्॥३२॥

सः । सूर्यस्य । रश्मिऽभिः । परि । व्यत । तन्तुम् । तन्वानः ।
त्रिऽवृतम् । यथा । विदे । नयन् । ऋतस्य । प्रऽशिषः । नवीयसीः ।
पतिः । जनीनाम् । उप । याति । निःऽकृतम् ॥ ३२ ॥

ससोमः सूर्यस्यरश्मिभिः परिव्यत परिवेष्टयत्यात्मानं । किंकुर्वन् त्रिवृतं सवनैर्देवैर्वा त्रिवृतं तंतुं यज्ञं तन्वानः विस्तारयन् । यथा विदे जानाति येनप्रकारेण संपूर्णमवगच्छति तस्मात्एवं जनीनांपतिः पालकः स्वामी निष्कृतं संस्कृतं पात्रं उपयाति गच्छति ॥ ३२ ॥

३२. सूर्य-किरणों से सोम, तीनों सवनों से यज्ञ-विस्तार करते हुए, अपने को परिवेष्टित करते हैं। सबके ज्ञाता और प्राणियों के पति सोम संस्कृत पात्र में जाते हैं।

राजासिन्धूनांपवतेपतिर्दिवऋतस्यपथिभिःकनिक्रदत् ।
सहस्रधारःपरिषिच्यतेहरिःपुनानोवाचंजनयन्नुपावसुः ॥ ३३ ॥

राजा । सिन्धूनाम् । पवते । पतिः । दिवः । ऋतस्य । याति ।
पथिऽभिः । कनिक्रदत् । सहस्रऽधारः । परि । सिच्यते । हरिः ।
पुनानः । वाचम् । जनयन् । उपऽवसुः ॥ ३३ ॥

सिन्धूनां नदीनामुदकानां राजा ईश्वरः दिवः पतिः द्युलोकस्यस्वामीसोमः पवते पूयते । ऋतस्य यज्ञस्य पथिभिः मार्गैः कनिक्रद्च्छब्दंकुर्वन् याति सहस्रधारोबहुधारायुक्तः सोमोनृभिर्नेतृभिः परिषिच्यते पात्रेषु । पुनानः पूयमानोवाचं शब्दं जनयन् उत्पादयन् उपावसुः उपगच्छद्धनः परिषिच्यतइति समन्वयः ॥ ३३ ॥

३३. जल-पति और स्वर्ग-स्वामी सोम संस्कृत किये जाते हैं। वे यज्ञ-पथ से शब्द करते हुए जाते हैं। असीम धाराओंवाले सोम नेताओं

के द्वारा पात्रों में सिञ्चित होते हैं। सोम शोधित, शब्दकर्त्ता और पास लानेवाले हैं।

पवमानमह्यर्णोविधावसिसूरोनचित्रोअव्ययानिपव्यया।
गभस्तिपूतोनृभिरद्रिभिःसुतोमहेवाजायधन्यायधन्वसि ॥ ३४ ॥

पवमान। महि। अर्णः। वि। धावसि। सूरः। न। चित्रः। अव्ययानि। पव्यया। गभस्तिऽपूतः। नृऽभिः। अद्रिऽभिः। सुतः। महे। वाजाय। धन्याय। धन्वसि ॥ ३४ ॥

हे पवमानसोम महयर्णोबहूदकं अर्णइत्युदकनाम रसंवा विधावसि गमयसि। धावुगतिशुध्योः। किंच सूरोन चित्रः सूर्यइव चित्रः चायनीयः पूज्यःसन् अव्ययानि अविमयानि पव्यया पात्राणि गच्छसि। किंच गभस्तिपूतोबहुभिरभिशोधितः नृभिर्ऋत्विग्भिः ग्रावभिश्च सुतोभिषुतो महेमहते वाजाय संग्रामायधन्याय धनेभ्योहिताय धन्वसि गच्छसि। धन्वतिर्गतिकर्मा ॥ ३४ ॥

३४. सोम, तुम बहुत रस भेजते हो। सूर्य के समान ही तुम पूज्य हो। मेषलोममय पात्र में जाते हो। अनेकों के द्वारा शोधित और ऋत्विकों तथा पत्थरों के द्वारा अभिषुत होकर तुम विराट् संग्राम और धन के हित के लिए जाते हो।

इषमूर्जंपवमानाभ्यर्षसिश्येनोनवंसुकलशेषुसीदसि।
इन्द्रायमद्वामद्योमदःसुतोदिवोविष्टम्भउपमोविचक्षणः॥३५॥१८॥

इषम्। ऊर्जम्। पवमान। अभि। अर्षसि। श्येनः। न। वंसु। कलशेषु। सीदसि। इन्द्राय। मद्वा। मद्यः। मदः। सुतः। दिवः। विष्टम्भः। उपऽमः। विऽचक्षणः ॥ ३५ ॥ १८ ॥

हे पवमान पूयमानसोम इषमन्नं ऊर्जं बलंचाभ्यर्षसि। श्येनोन श्येनइव वंसु वननीयेषु कुलायेषु कलशेषु सीदसि निषण्णोभवसि। अथपरोक्षकृतः। इन्द्राय मद्वा मदकरोमद्योमदहेतुः मदोरसः सुतोभिषुतः। कीदृशः दिवोद्युलोकस्योपमः उपमीयमानोविष्टंभोविशेषेणस्तंभयिता स्थूणा यथागृहं तथा तद्वद् विचक्षणोविद्रष्टा। स्थूणेवजनाँउपमिदित्युक्तं ॥ ३५ ॥

३५. क्षरणशील सोम, तुम अन्न और बलवाले हो। जैसे श्येन (बाज) पक्षी घोसले में जाता है, वैसे ही तुम कलश में जाते हो। इन्द्र के लिए मदकर और मद-कारक रस अभिषुत हुआ है। तुम, द्युलोक के स्तम्भ और दूरदर्शी हो।

॥ इति सप्तमस्य तृतीयेष्टादशोवर्गः ॥ १८ ॥

---

१ ऋ० सं० १. ४. २५.।

अथ षट्त्रिंशी—

सप्तस्वसारोअभिमातरःशिशुंनवंजज्ञानंजेन्यंविपश्चितम् ।
अपांगन्धर्वंदिव्यंनृचक्षसंसोमंविश्वस्यभुवनस्यराजसे ॥ ३६ ॥

सप्त । स्वसारः । अभि । मातरः । शिशुम् । नवम् । जज्ञानम् ।
जेन्यम् । विपःऽचितम् । अपाम् । गन्धर्वम् । दिव्यम् ।
नृऽचक्षसम् । सोमम् । विश्वस्य । भुवनस्य । राजसे ॥ ३६॥

सप्त सर्पणस्वभावाः सप्तसंख्याकावा स्वसारः मातरो मातृस्थानीया गंगायमुनाद्याः शिशुं शिशुस्थानीयं अभिगच्छन्तीतिशेषः । स्वकीयैः पयोभिराच्छादयन्तीतिशेषः । कीदृशं शिशुं नवं जज्ञानं जायमानं जेन्यं जयशीलंविपश्चितं विद्वांसं अपांजनकं तेषांमध्ये वर्तमानं वा गंधर्वं उदकस्यधातारं दिव्यं दिविभवं नृचक्षसं नृणांद्रष्टारंसोमं अभिगच्छन्ति किमर्थं विश्वस्य भुवनस्य राजसे विराजनार्थं ॥ ३६ ॥

३६. नवीन उत्पन्न, जेता, विद्वान्, जल के पिता, जल के धारक, स्वर्गोत्पन्न और नर-दर्शक सोम के पास, शिशु के समान, गङ्गा आदि सात मातृ-स्थानीया नदियाँ जाती हैं ।

ईशानइमाभुवनानिवीयसेयुजानइन्दोहरितःसुपर्ण्यः ।
तास्तेक्षरन्तुमधुमद्घृतंपयस्तवव्रतेसोमतिष्ठन्तुकृष्टयः ॥ ३७ ॥

ईशानः । इमा । भुवनानि । वि । ईयसे । युजानः । इन्दो इति ।
हरितः । सुऽपर्ण्यः । ताः । ते । क्षरन्तु । मधुऽमत् । घृतम् ।
पयः । तव । व्रते । सोम । तिष्ठन्तु । कृष्टयः ॥ ३७ ॥

हे इन्दो सोम ईशानः सर्वस्य स्वामी त्वं इमा इमानि भुवनानि भूतजातानि वीयसे गच्छसि वीगत्यादिषु । किंकुर्वन् हरितोहरितवर्णः सुपर्ण्यः सुपतनाश्चाश्वाः रथे युजानो योजयन् ताः सुपर्ण्यः ते तव संबन्धिन्यः मधुमत् माधुर्योपेतं घृतं दीप्तं पयउदकं क्षरन्तु । हेसोम तव व्रते कर्मणि तिष्ठन्तु कृष्टयोमनुष्याःसर्वे ॥ ३७ ॥

३७. सोम, हरितवर्ण, सबके स्वामी और घोड़ियों को रथ में जोतनेवाले तुम इन सारे भुवनों में गति-विधि करते हो । घोड़ियाँ मधुर घृत, दीप्त दुग्ध और जल ले आवें । तुम्हारे कर्म में मनुष्य रहें ।

त्वंनृचक्षाअसिसोमविश्वतःपवमानऋषभनाविधावसि ।
सनःपवस्ववसुमद्धिरण्यवद्वयंस्यामभुवनेषुजीवसे ॥ ३८ ॥

त्वम् । नृऽचक्षाः । असि । सोम । विश्वतः । पवमान । वृषभ ।
ता । वि । धावसि । सः । नः । पवस्व । वसुऽमत् । हिरण्यऽवत् ।
वयम् । स्याम । भुवनेषु । जीवसे ॥ ३८ ॥

हे सोम त्वं विश्वतः सर्वतः सर्वेषु भुवनेषु नृचक्षाः नृणांद्रष्टा असि भवसि । हे पवमान वृषभ अपांवर्षक ताअपोविधावसि विविधंगच्छसि सत्वं नोस्माकं पवस्व क्षर । किं वसुमत् बहुभिर्वसुभिर्वासकैर्गवादिद्रव्यैर्युक्तं तथा हिरण्यवत् बहुभिर्हिरण्यैर्युक्तं धनं वयंच वसुभिर्हिरण्यैर्युक्ताः भुवनेषु लोकेषु जीवसे जीवितुं प्रभवः स्याम भवेम ॥ ३८ ॥

३८. सोम, तुम सारे भुवनों में मनुष्यों के दर्शक हो। जलवर्षक, तुम विविध गतियोंवाले हो। गौ आदि से युक्त, सुवर्णमय धन हमें दो। हम सब द्रव्यों से युक्त होकर संसार में जी सकें।

गोवित्पवस्ववसुविद्धिरण्यविद्रेतोधाइन्दोभुवनेष्वर्पितः ।
त्वंसुवीरोअसिसोमविश्ववित्तंत्वाविप्राउपगिरेमआसते ॥ ३९ ॥

गोऽवित् । पवस्व । वसुऽवित् । हिरण्यऽवित् । रेतःऽधाः । इन्दो
इति । भुवनेषु । अर्पितः । त्वम् । सुऽवीरः । असि । सोम ।
विश्वऽवित् । तम् । त्वा । विप्राः । उप । गिरा । इमे । आसते ॥३९॥

हे सोम त्वं पवस्व क्षर । कीदृशः गोवित् गवांलंभकः वसुवित् धनस्य लंभकः हिरण्यवित् हिरण्यस्य लंभकः रेतोधाः रेतउदकं तस्य धाता ओषधीनां यद्वा रेतः प्रजननसामर्थ्यं तस्य धारयिता भुवनेषु उदकेष्वर्पितः । हे इन्दो सोम त्वं सुवीरः सुवीर्योसि भवसि । विश्ववित्सर्वस्यवेत्ता तं त्वा त्वां इमेविप्रागिरास्तुत्याउपासते ॥ ३९ ॥

३९. सोम, तुम गौ, धन और सुवर्ण को लानेवाले और जल के धारक हो। सोम, क्षरित होओ। तुम सुन्दर वीर्यवाले हो। तुम सर्वज्ञ हो। स्तोता लोग स्तोत्र-द्वारा तुम्हारी उपासना करते हैं।

अथ चत्वारिंशी—

उन्मध्वऊर्मिर्वननाअतिष्ठिपदपोवसानोमहिषोविगाहते ।
राजापवित्ररथोवाजमारुहत्सहस्रभृष्टिर्जयतिश्रवोबृहत् ॥४०॥१९॥

उत् । मध्वः । ऊर्मिः । वननाः । अतिस्थिपत् । अपः । वसानः ।
महिषः । वि । गाहते । राजा । पवित्रऽरथः । वाजम् । आ ।
अरुहत् । सहस्रऽभृष्टिः । जयति । श्रवः । बृहत् ॥ ४० ॥ १९ ॥

मध्वः मधुरस्योर्मीरसः वननाः वननीयावाचः उदक्षिपत् उत्थापयति । सोमाभिषव-काले स्तुतिवाचः प्रवृत्तेः । अपोवसानः आच्छादयन् महिषोमहान् विगाहते प्रविशति कलशं । राजा सोमः पवित्ररथः दशापवित्रं एवरथोयस्य सतथोक्तः तादृशः सोमोवाजं संग्राममारुहत् आरोहति । सहस्रभृष्टिः बहुभ्रंशः अपरिमितगमनो बृहच्छ्रवः महदन्नंजयति अस्मदर्थं ॥ ४० ॥

४०. मधुर सोमरस अभिषव-काल में, मननीय स्तोत्र का उत्थापन करते हैं। महान् सोम, जल में मिलकर कलश में जाते हैं। सोम का रथ दशापवित्र है। सोम युद्ध में जाते हैं। असीम-गति सोम हमारे लिए महान् अन्न को जीतते हैं। ॥ इति सप्तमस्य तृतीये एकोनविंशोवर्गः ॥ १९ ॥

सभ॒न्दना॒उदि॑यर्ति॒प्रजा॑वतीर्वि॒श्वायु॒र्विश्वाः॑सु॒भरा॒अह॑र्दिवि ।
ब्रह्म॑प्र॒जाव॑द्र॒यिमश्व॑पस्त्यं॒पीत॑इन्द॒विन्द्र॑म॒स्मभ्यं॑याचतात् ॥४१॥

सः । भ॒न्दनाः॑ । उत् । इ॒य॒र्ति॒ । प्र॒जाऽव॑तीः । वि॒श्वऽआ॑युः । विश्वाः॑ । सु॒ऽभराः॑ । अहः॑ऽदिवि । ब्रह्म॑ । प्र॒जाऽव॑त् । र॒यिम् । अश्व॑ऽपस्त्यम् । पी॒तः । इ॒न्दो॒ इति॑ । इन्द्र॑म् । अ॒स्मभ्य॑म् । या॒च॒ता॒त् ॥ ४१ ॥

ससोमः विश्वायुः सर्वस्यगन्ता सोमः प्रजावतीः प्रजारूपफलदात्र्यः सुभराः सुष्ठु ह्रियमाणा विश्वाः सर्वाभन्दनाः स्तुतीः उदियर्ति उत्कृष्टं प्रेरयति । कस्मिन्काले उच्यते । अहर्दिवि अहोरात्रयोश्च । अथ प्रत्यक्षकृतः । ब्रह्मपरिवृढंकर्म प्रजावत् प्रजाभिर्युक्तं प्रजाफलकमित्यर्थः । यद्वा ब्रह्मअन्नं तच्च प्रजावत् प्रजाद्युपेतं तथा रयिंधनं कीदृशं अश्वपस्त्यं व्याप्तगृहं तदुभयं हे इन्दो दीप्तसोम पीत इन्द्रेण पीतस्त्वं त्वमेवेन्द्रमस्मभ्यं याचताव याचस्व ॥४१॥

४१. सबके गन्ता सोम दिन-रात प्रजा और सुन्दर भरणवाली सारी स्तुतियों को प्रेरित करते हैं। दीप्त सोम, तुम इन्द्र से हमारे लिए प्रजा से युक्त अन्न और घर भरनेवाला धन, इन्द्र-द्वारा पिये जाकर, माँगो।

सोअग्रे॒अह्नां॒हरि॑र्हर्य॒तोमदः॒प्रचे॑तसाचेतयते॒अनु॒द्युभिः॑ ।
द्वाजना॑यातयन्न॒न्तरी॑यते॒नश॑ं॒ दैव्यं॑चध॒र्तरि॑ ॥ ४२ ॥

सः । अग्रे॑ । अह्ना॑म् । हरिः॑ । ह॒र्य॒तः । मदः॑ । प्र॒ । चेत॑सा । चे॒त॒य॒ते॒ । अनु॑ । द्युऽभिः॑ । द्वा । जना॑ । या॒त॒य॒न् । अ॒न्तः । ई॒य॒ते॒ । नशंसम् । च॒ । दैव्य॑म् । च॒ । ध॒तरि॑ ॥ ४२ ॥

ससोमोऽग्रे सर्वेषां संमुखं चेतसा प्राणिनां चेतनेनसह अह्नां द्युभिर्दीप्तिभिः अनुप्रचेतयते अनुप्रज्ञापयते यद्वा अह्नामग्रे अग्रभागे प्रातरित्यर्थः स्तोतॄणां चेतसा प्रज्ञानेन द्युभिर्दीप्तिभिः स्तुतिभिश्चानु प्रचेतयते । कीदृशः सहरिर्हरितवर्णः हर्यतः कान्तः मदोमदकरः । किंच द्वाजना द्वौजनौ स्तोतारं यष्टारंच याचयन् प्रापयन् स्वविहितेनकर्मणा लौकिकवैदिकौ द्वौजनौ द्रष्टव्यौ एवंकुर्वन्नन्तर्द्यावापृथिव्योर्मध्ये ईयते गच्छति । ईङ्गतौ । किंकुर्वन् नराशंसैः नरैः शंसनीयं मानुषमित्यर्थः दैव्यंचोभयविधं धनं धर्तरि धारके यजमाने प्रेरयन्निति शेषः ॥ ४२ ॥

४२. हरित-वर्ण, रमणीय और मदकर सोम प्रातःकाल स्तोताओं के ज्ञान और स्तुतियों से जाने जाते हैं। मनुष्य और देवता के द्वारा प्रशंसित धन यजमान को देनेवाले और मर्त्य तथा स्वर्ग के जीवों को अपने कर्म में प्रेरित करनेवाले सोम द्यावापृथिवी के बीच जाते हैं।

अञ्जतेव्यञ्जतेसमञ्जतेक्रतुंरिहन्तिमधुनाभ्यञ्जते ।
सिन्धोरुच्छ्वासेपतयन्तमुक्षणंहिरण्यपावाःपशुमासुगृभ्णते॥४३॥

अञ्जते । वि । अञ्जते । सम् । अञ्जते । क्रतुम् । रिहन्ति । मधुना ।
अभि । अञ्जते । सिन्धोः । उत्ऽश्वासे । पतयन्तम् । उक्षणम् ।
हिरण्यऽपावाः । पशुम् । आसु । गृभ्णते ॥ ४३ ॥

सोमस्ऋत्विजः अंजते गोभिः तथा व्यंजते विविधमञ्जन्ति समंजते सम्यगंजन्ति स्तुत्यर्थत्वादपुनरुक्तिः। तथा क्रतुं बलकर्तारं रिहन्ति लिहन्ति आस्वादयन्ति देवाः तथा पुनर्मधुना गव्येन अभ्यंजते तमेव सोमं सिंधोरुदकस्यरसस्याधारभूते उच्छ्वासे उच्छ्रितदेशे पतयन्तं गच्छन्तं पतृगतावित्यस्मात्स्वार्थेणिचि वृद्ध्यभावश्छान्दसः।उक्षणं सेक्तारं हिरण्यपावाः हिरण्येन पुनन्तः पशुं द्रष्टारं। पशुः पश्यतेरितिनिरुक्तं। आसु वसतीवरीषु गृभ्णते गृह्णन्ति ॥ ४३ ॥

४३. ऋत्विक् लोग गो-दुग्ध में सोम को मिलाते हैं, विविध प्रकार से मिलाते हैं। भली भाँति मिलाते हैं। देवता लोग बलकर्त्ता सोम का आस्वाद लेते हैं और सोम को मधुर गव्य में मिलाते हैं। जिस समय रस ऊपर उठता है, उस समय सोम नीचे गिरते हैं। सोम सेचक हैं। जैसे लोग पशु को स्नान के लिए जल में ले जाते हैं, वैसे ही सुवर्ण-भरणधारी पुरोहित लोग सोम को जल में ले जाते हैं।

विपश्चितेपवमानायगायतमहीनधारात्यन्धोअर्षति ।
अहिर्नजूर्णामतिसर्पतित्वचमत्योनक्रीळंनसर्दृषाहरिः ॥ ४४ ॥

विपःऽचितें । पवमानाय । गायत । मही । न । धारा ।

---

१ नि० ३. १६.

अति । अन्धः । अर्षति । अहिः । न । जूर्णाम् । अति । सर्पति । त्वचम् । अत्यः । न । क्रीळन् । असरत् । वृषा । हरिः ॥ ४४ ॥

हे ऋत्विजः विपश्चिते मेधाविने पवमानाय पूयमानाय गायत स्तुतिं कुरुत । सच विपश्चित् सोमः महीनधारा महतीवर्षधारेव अन्धोन्नरसात्मकं अत्यर्षति अहिर्न अहिरिव जूर्णां जीर्णां त्वचमतिसर्पति अतिमुंचति अभिषवादिकर्मणा त्वचंमुंचतीत्यर्थः। तद्वदतिसर्पति धारा दशापवित्रात् अत्योन अश्वइव क्रीळन् असरत् सरति गच्छति द्रोणकलशं । वृषा वर्षकः कामानां हरि र्हरितवर्णोरसः ॥ ४४ ॥

४४. ऋत्विको, मेधावी और सरणशील सोम के लिए गाओ । महती वर्षा धारा के समान रस-रूप अन्न को लाँघकर सोम जाते हैं । वे सर्प के समान सोम अभिषवादि कर्म के द्वारा अपने चमड़े को छोड़ते हैं । वर्षक और हरितवर्ण सोम क्रीड़ापरायण अश्व के समान दशापवित्र से कलश में जाते हैं ।

अग्रेगोराजाप्यंस्तविष्यतेविमानोअह्नांभुवनेष्वर्पितः ।
हरिर्घृतस्नुःसुदृशीकोअर्णवोज्योतीरथःपवतेरायओक्यः ॥४५॥२०॥

अग्रेऽगः । राजा । अप्यः । तविष्यते । विऽमानः । अह्नाम् । भुवनेषु । अर्पितः । हरिः । घृतऽस्नुः । सुऽदृशीकः । अर्णवः । ज्योतिःऽरथः । पवते । राये । ओक्यः ॥ ४५ ॥ २० ॥

अग्रेगः अग्रेगन्ता राजा राजमानः अप्यः अप्सुसंस्कृतः सोमः तविष्यते स्तूयते योऽह्नां दिनानां विमानो विमाता । चन्द्रकलाह्रासवृद्ध्यधीनत्वादहर्व्यवहारस्य भुवनेषूदकेषु वसतीवरीसंबंधिष्वर्पितः स्थापितः सराजा तविष्यते । किंच हरिर्हरितवर्णः घृतस्नुः प्रस्रुतोदकः सुदृशीकः शोभनदर्शनः अर्णवः उदकवान् अर्णइत्युदकनाम । ज्योतीरथः ज्योतिर्मयरथः राये धनस्य प्रापयिता ओक्यः ओकइतिनिवासनाम तत्रहितः एतादृशः सोमः पवते गच्छति ॥४५॥

४५. अग्रगन्ता, शोभन और जल में संस्कृत सोम की स्तुति की जाती है । सोम दिनों को मापनेवाले हैं । सोम हरित-वर्ण, जलमिश्रित, शोभन-दर्शन, जलवान् और धन प्रापक हैं । उनका रथ ज्योतिर्मय है । वे प्रयाहित होते हैं । ॥ इति सप्तमस्य तृतीये विंशोवर्गः ॥ २० ॥

असर्जिस्कम्भोदिवउद्यतोमदःपरित्रिधातुभुवनान्यर्षति ।
अंशुंरिहन्तिमतयःपनिप्नतंगिरायदीनिर्णिजमृग्मिणोययुः ॥४६॥

असर्जि । स्कम्भः । दिवः । उत्ऽयतः । मदः । परि । त्रिऽधातुः । भुवनानि । अर्षति । अंशुम् । रिहन्ति । मतयः । पनिप्नतम् । गिरा । यदि । निःऽनिजम् । ऋग्मिणः । ययुः ॥ ४६ ॥

दिवोद्युलोकस्य स्कंभः स्कंभयिता धारक उद्यतः मदः मादकः सोमः असर्जि सृज्यते अभिषूयतेइत्यर्थः। किंच त्रिधातुः द्रोणलकशाधवनीयपूतभृदाख्यास्त्रयोधातवोयस्य सतथोक्तः तादृशोभुवनानि उदकानि पर्यर्षति गच्छति अंशुं सोमं पनिमतं शब्दायमानं मतयः पूजकारिहन्ति लिहंति आस्वादयन्ति कदा यदि यदा निर्निजं निर्मिक्तं यद्वा निर्निगितिरूपनाम रूपवन्तमित्यर्थः तं ऋग्मिणः स्तोतारोगिरास्तुत्या ययुर्गच्छन्ति तदा ॥ ४६ ॥

४६. सोम द्युलोक के धारक और स्तम्भ हैं। मादक सोम अभिषुत किये जाते हैं। ये तीन धातुओं (द्रोण-कलश, आधवनीय और पूतभृत्) वाले हैं। सोम सारे भुवनों में विहार करते हैं। जिस समय ऋत्विक्-लोग रूपवान् सोम की स्तुति करते हैं, उस समय शब्दायमान सोम को पुरोहित लोग चाहते हैं।

प्रतेधाराअत्यण्वानिमेष्यःपुनानस्यसंयतोयन्तिरंहयः।
यद्गोभिरिन्दोचम्वोःसमज्यसआसुवानःसोमकलशेषुसीदसि॥४७॥

प्र। ते। धाराः। अति। अण्वानि। मेष्यः। पुनानस्य। सम्ऽयतः। यन्ति। रंहयः। यत्। गोभिः। इन्दो इति। चम्वोः। सम्ऽअज्यसे। आ। सुवानः। सोम। कलशेषु। सीदसि॥ ४७॥

पुनानस्य पूयमानस्य ते तव संयतः संगृह्यमाणाः रंहयोरंहणस्वभावा धाराः मेष्यःअण्वानि अणूनि लोमानि प्रतियन्ति अतिक्रम्यगच्छन्ति हे इन्दो सोम यद्यदा गोभिरुदकैः चम्वोः अधिषवणफलकयोरुपरि समज्यते तदानीं हे सोम सुवानः सूयमानस्त्वं कलशेष्वासीदसि॥ ४७॥

४७. शोधन-काल में तुम्हारी चञ्चल धारायें सूक्ष्म मेषलोमों को लाँघकर जाती हैं। सोम, जिस समय तुम दो अभिषव-फलकों पर जल में मिलाये जाते हो, उस समय चुलाये जाकर तुम कलश में बैठते हो।

पवस्वसोमक्रतुवित्नउक्थ्योव्योवारेपरिधावमधुप्रियम्।
जहिविश्वान्रक्षसइन्दोअत्रिणोबृहद्वदेमविदथेसुवीराः॥४८॥२१॥

पवस्व। सोम। क्रतुऽवित्। नः। उक्थ्यः। अव्यः। वारे। परि। धाव। मधु। प्रियम्। जहि। विश्वान्। रक्षसः। इन्दो इति। अत्रिणः। बृहत्। वदेम। विदथे। सुऽवीराः॥ ४८॥ २१॥

हे सोम नोस्माकं क्रतुविद् कर्मज्ञःस्तुतिज्ञइत्यर्थः उक्थ्यः स्तुत्यः यतः स्तुत्यः अतः क्रतुविदित्यभिप्रायः ईदृशस्त्वं नोस्माकं यागाय पवस्व स्रव रसं अव्योवारे दशापवित्रे प्रियं

मधु परिधाव परिक्षर हे इन्दो दीप्त सोम अविणो भक्षकान् विश्वान् रक्षसोजहि सुवीराः सुपुत्रावयं विदथे यज्ञे बृहन्महद्धनं वदेम उच्चारयेम याचेमेत्यर्थः। यद्वा प्रभूतं स्तोत्रं वदेम ॥४८॥

४८. सोम, तुम हमारी स्तुति को जानते हो। हमारे यज्ञ के लिए क्षरित होओ। मेषलोममय दशापवित्र में प्रिय मधु (रस) गिराओ। दीप्त सोम, सारे भक्षक राक्षसों को विनष्ट करो। यज्ञ में सुपुत्रवाले हम महान् धन की याचना करेंगे और प्रचुर स्तोत्र का पाठ करेंगे।

॥ इति सप्तमस्य तृतीये एकविंशोवर्गः ॥ २१ ॥

प्रतुद्रवेतिनवर्चं द्वितीयंसूक्तं काव्यस्योशनसआर्षं अनादेशपरिभाषया त्रैष्टुभं पवमानसोमदेवताकं। तथाचानुक्रान्तं—प्रतुनवोशनाइति। जागतमूर्ध्वं प्रागुशनसइतिवचनाज्जगत्यधिकारोनिवृत्तः। मतोविनियोगः।

प्रतुद्रवपरिकोशंनिषीदनृभिःपुनानोअभिवाजमर्ष।
अश्वंनत्वावाजिनंमर्जयन्तोच्छाबर्हीरशनाभिर्नयन्ति ॥ १ ॥

प्र। तु। द्रव। परि। कोशम्। नि। सीद। नृऽभिः। पुनानः।
अभि। वाजम्। अर्ष। अश्वम्। न। त्वा। वाजिनम्।
मर्जयन्तः। अच्छ। बर्हिः। रशनाभिः। नयन्ति ॥ १ ॥

हे सोम तु क्षिप्रं प्रद्रव गच्छ गत्वाच कोशं द्रोणकलशं परिनिषीद निषण्णोभव। नृभिर्नेतृभिः पुनानः पूयमानः वाजमन्नं यजमानार्थं उद्दिश्याभ्यर्ष अभिगच्छ। वाजिनं बलवन्तमश्वंन अश्वमिव तं यथा मार्जयन्ति तद्वद्वाजिनं त्वां मर्जयन्तः मार्जयन्तः शोधयन्तोबर्हिर्यज्ञमच्छ प्रति रशनाभीरशनावदायताभिरंगुलिभिर्नयन्ति अध्वर्युप्रमुखाः ॥ १ ॥

१. सोम, शीघ्र जाओ और द्रोण-कलश में बैठो। नेताओं (मनुष्यों) के द्वारा शोधित होकर यजमान के लिए अन्न दो। अध्वर्यु लोग यज्ञ के लिए बली सोम का इसी प्रकार मार्जन करते हैं, जिस प्रकार बली अश्व का मार्जन किया जाता है।

स्वायुधःपवतेदेवइन्दुरशस्तिहाव्रजनंरक्षमाणः।
पितादेवानांजनितासुदक्षोविष्टम्भोदिवोधरुणःपृथिव्याः ॥ २ ॥

सुऽआयुधः। पवते। देवः। इन्दुः। अशस्तिऽहा।
व्रजनम्। रक्षमाणः। पिता। देवानाम्। जनिता।
सुऽदक्षः। विष्टम्भः। दिवः। धरुणः। पृथिव्याः ॥ २ ॥

स्वायुधः शोभनायुधः इन्दुः सोमोदेवः पवते । सचदेवोशस्तिहा रक्षोहा वृजनं उपद्रवं रक्षमाणः पिता पालकोदेवानां तथा जनिताउत्पादकः । सुदक्षः सुबलः दिवोविष्टंभः विशेषेणस्तंभयिता पृथिव्याश्च धरुणोधारकः एवं महानुभावः पवते ॥ २ ॥

२. शोभन आयुधवाले, क्षरणशील, दिव्य, राक्षस-नाशक, उपद्रव-रक्षक, देवों के पालक, उत्पादक, सुबल, स्वर्ग-स्तम्भ और पृथिवी के धारक सोम क्षरित हो रहे हैं ।

ऋषिर्विप्रःपुरएताजनानामृभुर्धीरउशनाकाव्येन ।
सचिद्विवेदनिहितंयदासामपीच्यंगुह्यंनामगोनाम् ॥ ३ ॥

ऋषिः । विप्रः । पुरःऽएता । जनानाम् । ऋभुः । धीरः ।
उशना । काव्येन । सः । चित् । विवेद । निऽहितम् ।
यत् । आसाम् । अपीच्यम् । गुह्यम् । नाम । गोनाम् ॥ ३ ॥

ऋषिरतीन्द्रियद्रष्टा विप्रोमेधावी पुरएता पुरतोगन्ता जनानां मनुष्याणां ऋभुः उरुभासमानः धीरोधीमान् उशना एतन्नामाऋषिः यः सचित् सएव काव्येन कवित्वेन स्तोत्रेण विवेद लभते । किं यदासां गोनां गवां अपीच्यंअंतर्हितनामितत् अंतर्हितं गुह्यं गोपनीयं नाम नामकमुदकं पयोलक्षणं निहितं स्थापितं लभतइत्यर्थः ॥ ३ ॥

३. अतीन्द्रिय-द्रष्टा, मेधावी, अग्रगन्ता, मनुष्यों के प्रकाशक और धीर उशना ऋषि गायों के गुह्य और दुग्ध-मिश्रित जल को प्राप्त करते हैं ।

एषस्यतेमधुमाँइन्द्रसोमोवृषावृष्णेपरिपवित्रेअक्षाः ।
सहस्रसाःशतसाभूरिदावाशश्वत्तमंबर्हिरावाज्यस्थात् ॥ ४ ॥

एषः । स्यः । ते । मधुऽमान् । इन्द्र । सोमः । वृषा । वृष्णे ।
परि । पवित्रे । अक्षारिति । सहस्रऽसाः । शतऽसाः । भूरिऽदावा ।
शश्वत्ऽतमम् । बर्हिः । आ । वाजी । अस्थात् ॥ ४ ॥

हे इन्द्र वृष्णे वर्षकाय ते तुभ्यं एषस्यः ससोमोमधुमान् माधुर्योपेतोवृषा वर्षकः पवित्रे पर्यक्षाः परिक्षरति क्षरतेर्लुङिरूपं । सएव सहस्रसाः सहस्रसंख्याकधनस्यदावा शतसाः शतसंख्याकस्य दावा भूरिदावा ततोपि भूरेर्दाता वाजी अन्नवान् शश्वत्तमं नित्यं बर्हिर्यज्ञं आ अस्थाव आतिष्ठति ॥ ४ ॥

४. वर्षक इन्द्र, तुम्हारे लिए मधुर और वर्षक सोम पवित्र में क्षरित होते हैं । वही सौ और असीम धनों के दाता, अगणित दान-दाता, नित्य और बली हैं । वे यज्ञ में रहते हैं ।

अथ पंचमी—

एतेसोमाअभिगव्यासहस्रामहेवाजायामृताय श्रवांसि ।
पवित्रेभिःपवमानाअसृग्रञ्छ्रवस्यवोनपृतनाजोअत्याः॥५॥२२॥

एते । सोमाः । अभि । गव्या । सहस्रा । महे । वाजाय ।
अमृताय । श्रवांसि । पवित्रेभिः । पवमानाः । असृग्रन् ।
श्रवस्यवः । न । पृतनाजः । अत्याः ॥ ५ ॥ २२ ॥

एतेसोमाः गव्या गव्यानि सहस्रा सहस्राणि श्रवांस्यन्नानि आशिरलक्षणानि लक्षीकृत्य पवित्रेभिः पवित्रच्छिद्रैः पवमानाः पूयमानाः महे महते वाजायान्नाय अमृताय अमृतत्वाय अभ्यसृग्रन् सृज्यन्ते । किमिच्छवः श्रवस्यवः अन्नेच्छवः पृतनाजः सेनाजेतारःअत्यान अश्वाइव ॥ ५ ॥

५. अन्नाभिलाषी और सेना-विजयी अश्व के समान सोम गो-मिश्रित अन्नों को लक्ष्य करके महान् और अमर बल के लिए, मेषलोम के छनने से शोधित होकर, बनाये जाते हैं ।

॥ इति सप्तमस्य तृतीये द्वाविंशोवर्गः ॥ २२ ॥

परिहिष्मापुरुहूतोजनानांविश्वासरद्भोजनापूयमानः ।
अथाभरश्येनभृतप्रयांसिरयिंतुञ्जानोअभिवाजमर्ष ॥ ६ ॥

परि । हि । स्म । पुरुऽहूतः । जनानाम् । विश्वा । असरत् ।
भोजना । पूयमानः । अथ । आ । भर । श्येनऽभृत । प्रयांसि ।
रयिम् । तुञ्जानः । अभि । वाजम् । अर्ष ॥ ६ ॥

अयं पर्यसरत् परिसरति जनानां अर्थाय । विश्वा सर्वाणि भोजना भोजनानि अन्नानि धनानिवा । कीदृशः पुरुहूतः बहुभिराहूतः पूयमानः शोध्यमानः । अथप्रत्यक्षकृतः अथेदानीं हे श्येनभृत श्येनेनाहृत सोम त्वं प्रयांस्यन्नानि आभर आहर रयिं धनं तुंजानः ददानः वाजमन्नरसं अभ्यर्ष अभिगच्छ ॥ ६ ॥

६. बहुतों के द्वारा आहूत और शोध्यमान सोम मनुष्यों के लिए सारे भोज्य धनों को देते हैं । श्येन-द्वारा लाये गये सोम अन्न दो, धन दो और अन्न-रस की ओर जाओ ।

एषसुवानःपरिसोमःपवित्रेसर्गोनसृष्टोअदधावदर्वा ।
तिग्मेशिशानोमहिषोनशृङ्गेगागव्यन्नभिशूरोनसत्वा ॥ ७ ॥

एषः । सुवानः । परि । सोमः । पवित्रे । सर्गः । न । सृष्टः ।
अदधावत् । अर्वा । तिग्मे इति । शिशानः । महिषः । न ।
शृङ्गे इति । गाः । गव्यन् । अभि । शूरः । न । सत्वा ॥ ७ ॥

एषसुवानः सूयमानः अर्वा अरणकुशलः सोमः सर्गोनसृष्टः विसृष्टोऽश्वइव पवित्रे पर्यदधावत् परिधावति । किंच तिग्मे तीक्ष्णे शृंगे शिशानः तीक्ष्णीकुर्वन् महिषोन महान् महिषाख्योमृगइव । तथान्यदृष्टान्तः—गा गव्यन् प्रभूतागाइच्छन् शूरोन शूरइव एतौ महिषशूरौ यथा प्रतिबुद्धौ शीघ्रं धावतः तद्वत् सत्वा सदनशीलोयं अभिगच्छतीतिशेषः ॥ ७ ॥

७. गतिशील और अभिषुत सोम छोड़े हुए घोड़े के समान पवित्र की ओर दौड़ते हैं। अपनी सींगों को तेज करके महिष और गवाभिलाषी शूर के समान वे दौड़ते हैं।

एषाययौपरमादन्तरद्रेःकूचित्सतीरूर्वेगाविवेद ।
दिवोनविद्युत्स्तनयन्त्यभ्रैःसोमस्यतेपवतइन्द्रधारा ॥ ८ ॥

एषा । आ । ययौ । परमात् । अन्तः । अद्रेः । कूऽचित् । सतीः ।
ऊर्वे । गाः । विवेद । दिवः । न । विऽद्युत् । स्तनयन्ती । अभ्रैः ।
सोमस्य । ते । पवते । इन्द्र । धारा ॥ ८ ॥

एषा सोमधारा परमात् उच्छ्रितात् स्थानात् ययौ जगाम पात्रं तयाप्राप्तव्यंदेशंवा । किंच अद्रेः पणीनां निवासस्थानस्य पर्वतस्यान्तः कूचित् क्वचित् कुत्रचिद्गूढे ऊर्वे देशे सतीः वर्तमानाः पणिभिरपहृताः गाः विवेदलब्धवती । यत्र पणयोगाअपहृत्यस्थापितवन्तः सदेशऊर्वः । ऊर्वेगव्यंमहिगृणानइति हिमंत्रान्तरं । दिवोनविद्युत् दिवःसकाशाद्विद्युदिव स्तनयन्ती शब्दयन्ती विद्युद्विशेष्यते अभ्रैः मेरितेतिशेषः सायथाशब्दंकरोति तद्वच्छब्दं कुर्वन्ती सोमस्य संबन्धिनी सेयं धारा हे इन्द्र ते त्वदर्थं त्वत्पानाय पवते पूयते क्षरति वा ॥ ८ ॥

८. सोम-धारा ऊँचे स्थान से पात्र की ओर जाती है। पणियों के निवासस्थान पर्वत के गूढ़ स्थान में वर्त्तमान गायों को इसी सोम-धारा ने प्राप्त किया था। आकाश से शब्द करनेवाली, बिजली के समान यह सोम-धारा, इन्द्र, तुम्हारे लिए क्षरित होती है।

---

१ ऋ० सं० ४. ६. १. ।

उतस्मराशिंपरियासिगोनामिन्द्रेणसोमसरथंपुनानः ।
पूर्वीरिषोबृहतीर्जीरदानोशिक्षाशचीवस्तवताउपष्टुत् ॥ ९ ॥ २३॥

उत । स्म । राशिम् । परि । यासि । गोनाम् । इन्द्रेण । सोम ।
सऽरथम् । पुनानः । पूर्वीः । इषः । बृहतीः । जीरदानो इति
जीरऽदानो । शिक्ष । शचीऽवः । तव । ताः । उपऽस्तुत् ॥ ९ ॥ २३॥

उतस्म अपिच खलु हेसोम पुनानः पूयमानोगोनां गवांराशिंसमूहं पणिभिरपहृतं परियासि परिगच्छसि । कथंभूतःसन् उच्यते इन्द्रेणसह रथमेकमेवरथं आस्थाय । हे जीरदानो क्षिप्रदानसोम उपस्तुत् उपस्तूयमानस्त्वं पूर्वीर्बह्वीः बृहतीर्महतीरिषः उक्तलक्षणान्यन्नानि शिक्ष देहि । हेशचीवः अन्नवन् ताइषःतवस्वभूता इतिशेषः ॥ ९ ॥

९. सोम, शोधित तुम खोये हुए गो-समूह को प्राप्त करते हो । इन्द्र के साथ ही रथ पर जाते हो । शीघ्रदाता सोम, तुम्हारी स्तुति की जाती है । हमें महान् धन दो । अन्नवाले सोम, सब अन्न तुम्हारा है ।

॥ इति सप्तमस्य तृतीये त्रयोविंशोवर्गः ॥ २३ ॥

अयं सोमइत्यष्टर्चं तृतीयंसूक्तं ऋष्याद्याःपूर्ववत् । अयं सोमोष्टावित्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

अयंसोमइन्द्रतुभ्यंसुन्वेतुभ्यंपवतेत्वमस्यपाहि ।
त्वंहयंचकृषेत्वंवृषइन्दुंमदाययुज्यायसोमम् ॥ १ ॥

अयम् । सोमः । इन्द्र । तुभ्यम् । सुन्वे । तुभ्यम् । पवते । त्वम् ।
अस्य । पाहि । त्वम् । ह । यम् । चकृषे । त्वम् । वृषे ।
इन्दुम् । मदाय । युज्याय । सोमम् ॥ १ ॥

हे इंद्रअयं सोमः तुभ्यं त्वदर्थं सुन्वे सूयते सुनोतेः कर्मार्थे लटि लोपस्तआत्मनेपदेष्विति तलोपः तुभ्यं त्वदर्थमेव पवते पूयते त्वंचास्य अमुंपाहि पिब त्वंह यं इंदुं सोमं चकृषे करोषि त्वंच यं ववृषे वृतवानसि किमर्थं मदाय युज्याय सहायाय सोमं इन्द्राय बलकरत्वात् सहायइतिप्रसिद्धं यमेवंकरोषित्वं तंपाहीतिसमन्वयः ॥ १ ॥

१. इन्द्र तुम्हारे लिए ये सोम अभिषुत होते हैं । ये तुम्हारे लिए [illegible]रत होते हैं । इन्हें पियो । तुम जिन सोम को बनाते हो, जिनको स्वीकार करते हो, मद और सहायता के लिए उन्हें तुम पियो ।

अथ द्वितीया–

सईंरथोनभुरिपाळयोजिमहःपुरूणिसातयेवसूनि ।
आदींविश्वानहुष्याणिजातास्वर्षातावनंऊर्ध्वानवन्त ॥ २ ॥

सः । ईम् । रथः । न । भुरिषाट् । अयोजि । महः । पुरूणि ।
सातये । वसूनि । आत् । ईम् । विश्वा । नहुष्याणि ।
जाता । स्वःऽसाता । वने । ऊर्ध्वा । नवन्त ॥ २ ॥

सईं सोमं सोमः भुरिषाट् भूरिभारस्यसोढा रथोन रथइव भुरिषाट् प्रभूतस्य भारस्य सोढा अयोजि युज्यते । कीदृशः समहोमहान् किमर्थमयोजि पुरूणि बहूनि वसूनि धनानि सातयेस्मभ्यंदातुं । आदींयोगानंतरं विश्वा विश्वानि सर्वाणि नहुष्याणि नहुषोमनुष्यास्तेषां संबंधीनि जाता जातानि अस्मद्विरोधीनि ऊर्ध्वा उन्मुखानि वने वननीये स्वर्षाता स्वर्षातौ संग्रामनामैतत् स्वर्गलाभयुक्त । संग्रामे नवंत गच्छन्तु । नवतिर्गतिकर्मा यद्वा सोमं संग्रामे युद्धार्थिनः संगच्छन्ति ॥ २ ॥

२. सोम, रथ के समान, प्रचुर भार के वहन करनेवाले हैं। सोम महान् हैं। रथ के समान ही लोग उनको योजित करते हैं। सोम प्रभूत धन के दाता हैं। युद्धार्थी सोम को संग्राम में ले जाते हैं।

वायुर्नयोनियुत्वाँइष्टयामानासत्येवहवआशम्भविष्ठः ।
विश्ववारोद्रविणोदाइवत्मन्पूषेवधीजवनोसिसोम ॥ ३ ॥

वायुः । न । यः । नियुत्वान् । इष्टऽयामा । नासत्याऽइव ।
हवे । आ । शम्ऽभविष्ठः । विश्वऽवारः । द्रविणोदाःऽइव ।
त्मन् । पूषाऽइव । धीऽजवनः । असि । सोम ॥ ३ ॥

यः सोमोनियुत्वान् नियुतोवायोरश्वाः तद्वान् वायुर्न वायुरिव इष्टयामा इष्टगमनः । नासत्येव अश्विनाविव हवे हवमाह्वानमाकर्ण्य आसर्यतः शंभविष्ठः सुखस्यभावयितृतमः द्रविणोदातेव त्मन आत्मनि विश्ववारोविश्वैर्वरणीयोभवति तद्वद्विश्ववारोसि । पूषेवपोषकः सवितेवधीजवनोवेगोसि । यद्वा कर्मणांप्रवर्तयितासि हे सोम ॥ ३ ॥

३. सोम वायु के नियुत् नामक अश्वों के स्वामी हैं और वायु के समान ही इष्ट-गमन हैं। वे अश्विद्वय के समान आह्वान सुनते ही आते हैं। सोम धनी के समान सबके प्रार्थनीय हैं। वे सूर्य के समान वेगवाले हैं।

अथ चतुर्थी—

इन्द्रोनयोमहाकर्माणिचक्रिर्हन्तावृत्राणामसिसोमपूर्भित् ।
पैद्वोनहित्वमहिनाम्नांहन्ताविश्वस्यासिसोमदस्योः ॥ ४ ॥

इन्द्रः । न । यः । महा । कर्माणि । चक्रिः । हन्ता । वृत्राणाम् ।
असि । सोम । पूःऽभित् । पैद्वः । न । हि । त्वम् । अहिऽनाम्नाम् ।
हन्ता । विश्वस्य । असि । सोम । दस्योः ॥ ४ ॥

इन्द्रोन इन्द्रइव यस्त्वं महा महान्ति कर्माणि चक्रिः ताच्छील्येन करोषि सत्वं हेसोम वृत्राणां शत्रूणां हन्तासि भवसि। तथा पूर्भित् पुरांभेत्तासि। किंच पैद्वोनहि अश्वइवखलु अहिनाम्नां हन्ताभवसि । आगत्यहन्तीत्यहिः तन्नामकानामित्यर्थः । नकेवलंतेषामेव अपितु विश्वस्यापि सर्वस्यापि दस्योः उपक्षपयितुः शत्रोर्हन्तासि ॥ ४ ॥

४. इन्द्र के समान तुमने महान् कार्यों को किया है। सोम, तुम शत्रुओं के हन्ता और पुरियों के भेदन-कर्त्ता हो। अश्व के समान अहियों के हन्ता हो। तुम सारे शत्रुओं के हन्ता हो।

अग्निर्नयोवनआसृज्यमानोवृथापाजांसिकृणुतेनदीषु ।
जनोनयुध्वामहतउपब्दिरियर्तिसोमःपवमानऊर्मिम् ॥ ५ ॥

अग्निः । न । यः । वने । आ । सृज्यमानः । वृथा । पाजांसि ।
कृणुते । नदीषु । जनः । न । युध्वा । महतः । उपब्दिः ।
इयर्ति । सोमः । पवमानः । ऊर्मिम् ॥ ५ ॥

अग्निर्न अग्निरिव यः सोमोवने अरण्ये आसृज्यमानः वनसंबन्धी अग्निः यथा बलानि कुरुते एवंयः सोमोवृषा अनायासेन नदीष्वान्तरिक्षाणि पाजांसि कृणुते कुरुते । किंच युध्वा युद्धस्यकर्ता जनोन शूरो मनुष्यइव महतः शत्रोरुपब्दिः वाङ्मैतत् शब्दयितासन् पवमानः पूयमानः सोमः ऊर्मिं प्रवृद्धं रसमियर्ति प्रेरयति ॥ ५ ॥

५. जैसे अग्नि वन में उत्पन्न होकर अपने बल को प्रकट करते हैं, वैसे ही सोम जल में उत्पन्न होकर वीर्य का प्रकाश करते हैं। युद्ध-कर्त्ता, वीर के समान, शत्रु के पास भयंकर शब्द करनेवाले सोम प्रवृद्ध रस देते हैं।

एतेसोमाअतिवाराण्यव्यादिव्यानकोशासोअभ्रवर्षाः ।
वृथासमुद्रंसिन्धवोननीचीःसुतासोअभिकलशाँअसृग्रन् ॥ ६ ॥

एते । सोमाः । अति । वाराणि । अव्या । दिव्याः । न ।
कोशासः । अभ्रऽवर्षाः । वृथा । समुद्रम् । सिन्धवः ।
न । नीचीः । सुतासः । अभि । कलशान् । असृग्रन् ॥ ६ ॥

एते पूयमानाः सोमाः अव्या अविमयानि वाराणि वालानि अतिगच्छन्तीतिशेषः । तत्र दृष्टान्तः—दिव्यान कोशासः दिविभवाः कोशाः आपइव ताविशेष्यन्ते अभ्रवर्षाः अभ्रैर्वृष्यमाणाः । किंच वृथा अनायासेन समुद्रं सिंधवोन नद्यइव नीचीः नीचीनाग्राः सुतासोभिषुताः सोमाः कलशानभ्यसृग्रन् अभिगच्छन्ति ॥ ६ ॥

६. जैसे आकाश के मेघ से वर्षा होती है और जैसे नदियाँ नीचे समुद्र की ओर जाती हैं, वैसे ही अभिषुत सोम मेषलोम का अतिक्रम करके कलश में जाते हैं। अथ सप्तमी—

शुष्मीशर्धोनमारुतंपवस्वानभिशस्तादिव्यायथाविट् ।
आपोनमक्षुसुमतिर्भवानःसहस्राप्साःपृतनाषाण्नयज्ञः ॥ ७ ॥

शुष्मी । शर्धः । न । मारुतम् । पवस्व । अनभिऽशस्ता ।
दिव्या । यथा । विट् । आपः । न । मक्षु । सुऽमतिः । भव ।
नः । सहस्रऽअप्साः । पृतनाषाट् । न । यज्ञः ॥ ७ ॥

हे सोम शुष्मी शुष्मं बलं शोषणात् बलवांस्त्वं मारुतं शर्धोन मरुतां बलमिव पवस्व । तत्रदृष्टान्तमेवस्पष्टयति—यथा दिव्याविट् प्रजा अनभिशस्ता अभिशासोनिंदा अनिंदिता पवते । मरुतोवैदेवानांविशइतिहिब्राह्मणं । किंच आपोन उदकानीव मक्षु क्षिप्रं पवमानस्त्वं सुमतिर्भव नोस्माकं । किंच सहस्राप्साः अप्सइतिरूपनाम बहुरूपस्त्वं पृतनाषाट्न पृतनानामभिभवितेन्द्रइव यज्ञो यष्टव्योभवसीति ॥ ७ ॥

७. सोम, तुम बली हो। मरुतों के बल के समान क्षरित होओ। स्वर्ग की सुन्दर प्रजा के समान (वायु के समान) बहो। जल के समान हमारे लिए सुमतिदाता होओ। तुम बहुरूप हो। सेना-जेता इन्द्र के समान तुम यजनीय हो। अथाष्टमी—

राज्ञोनुतेवरुणस्यव्रतानिबृहद्गभीरंतवसोमधाम ।
शुचिष्ट्वमसिप्रियोनमित्रोदक्षाय्योअर्यमेवासिसोम ॥ ८ ॥ २४ ॥

राज्ञः । नु । ते । वरुणस्य । व्रतानि । बृहत् । गभीरम् । तव ।
सोम । धाम । शुचिः । त्वम् । असि । प्रियः । न । मित्रः ।
दक्षाय्यः । अर्यमाऽइव । असि । सोम ॥ ८ ॥ २४ ॥

---

१ ऐ० ब्रा० १.९.।

हे सोम वरुणस्य वारकस्य राज्ञः ते तव व्रतानि कर्माणि नुक्षिप्रं करोमीतिशेषः। हे सोम तव धाम तेजःस्थानं बृहन्महत् गभीरंच प्रियोन मित्रइव त्वं शुचिर्दीप्तः शुद्धोवासि अर्यमेव अर्यमादेवइव त्वं दक्षाय्योसि ॥ ८ ॥

८. सोम, तुम वारक राजा हो। तुम्हारे कामों को मैं शीघ्र करता हूँ। सोम, तुम्हारा तेज महान् और गम्भीर है। तुम प्रिय मित्र के समान शुद्ध हो। तुम अर्जमा देवता के समान पूजनीय हो।

॥ इति सप्तमस्य तृतीये चतुर्विंशोवर्गः ॥ २४ ॥

प्रोस्यवह्निरिति सप्तर्चंचतुर्थंसूक्तं ऋष्याद्याःपूर्ववत्। प्रोस्यसप्तेत्यनुक्रान्तं। गतोविनियोगः

तत्र प्रथमा—

प्रोस्यवह्निःपथ्याभिरस्यान्दिवोनवृष्टिःपवमानोअक्षाः।
सहस्रधारोअसदन्न्य१स्मेमातुरुपस्थेवनआचसोमः ॥ १ ॥

प्रो इति। स्यः। वह्निः। पथ्याभिः। अस्यान्। दिवः। न। वृष्टिः। पवमानः। अक्षारिति। सहस्रऽधारः। असदत्। नि। अस्मे इति। मातुः। उपऽस्थे। वने। आ। च। सोमः ॥ १ ॥

प्र उ इति निपातद्वयसमुदायएकोनिपातः। प्रो अस्यान् प्रस्यन्दते स्यः सवह्निः वोढा पथ्याभिः यज्ञमार्गैः दिवोनवृष्टिः दिवः सकाशात् वृष्टिरिव पवमानःसन् अक्षाः व्याप्नोषि। सोयंसोमः सहस्रधारोबहुधारःसन् अस्मे अस्मासु न्यसदत् निसीदति मातुः दशापवित्रस्य उपस्थे द्युलोकस्यवा उपस्थे अथवा वने सोमः आनिषीदति ॥ १ ॥

१. जैसे आकाश से वृष्टि होती है, वैसे ही यज्ञ-मार्गों से वोढ़ा सोम प्रवाहित हो रहे हैं। असीम धाराओंवाले सोम हमारे पास अथवा द्युलोक के पास बैठते हैं। अथ द्वितीया—

राजासिन्धूनामवसिष्टवासंऋतस्यनावमारुहद्रजिष्ठाम्।
अप्सुद्रप्सोवावृधेश्येनजूतोदुहईंपितादुहईंपितुर्जाम् ॥ २ ॥

राजा। सिन्धूनाम्। अवसिष्ट। वासः। ऋतस्य। नावम्। आ। अरुहत्। रजिष्ठाम्। अप्ऽसु। द्रप्सः। ववृधे। श्येनऽजूतः। दुहे। ईम्। पिता। दुहे। ईम्। पितुः। जाम् ॥ २ ॥

अयं राजा सोमः सिंधूनामुदकानां क्षीरादिस्यंदिनीनां गवांवासो वसनस्थानीयं क्षीराख्यं श्रयणद्रव्यं अवसिष्ट आच्छादयति तथाकृत्वा रजिष्ठां ऋजुतरां ऋतस्य यज्ञस्य नावमारुहत् आरोहति। सद्रप्सः सोमरसः श्येनजूतः श्येनेनापहृतोरसोप्सुवसतीवरीषु ववृधे वर्धते। ईं तमिमं पितुः पालकात् पितृस्थानीयात् द्युलोकात् जां जातमपत्यं सोमं ईमयं पितापालको

लोकोदुहे दोग्धिरसं। तथा अध्वर्युरपि दुहेदोग्धि अथवोक्तलक्षणमेवं सोमं पिता पालकः स्वामी यजमानोदोग्धि फलं। तथा दुहे अध्वर्युरपि रसंदुहे। यद्वा दुर्हईमिति पुनरुक्तिरादरार्था॥२॥

२. दुग्ध देनेवाली गायों के राजा सोम हैं। वे क्षीर में मिल रहे हैं। वे यज्ञ की सरल नौका में चढ़ते हैं। श्येन-द्वारा लगाये गये सोम जल में बढ़ते हैं। द्युलोक के पुत्र सोम को पालक लोग दूहते हैं। अध्वर्यु भी दूहते हैं। अथ तृतीया—

सिंहंनसन्तमध्वोअयासंहरिंमरुपंदिवोअस्यपतिम्।
शूरोयुत्सुप्रथमःपृच्छतेगाअस्यचक्षसापरिपात्युक्षा॥ ३॥

सिंहम्। नसन्त। मध्वः। अयासम्। हरिम्। अरुषम्। दिवः। अस्य। पतिम्। शूरः। युत्ऽसु। प्रथमः। पृच्छते। गाः। अस्य। चक्षसा। परि। पाति। उक्षा॥ ३॥

सिंहं शत्रूणां हिंसकं सिंहसदृशं मध्वउदकस्य अयासं प्रेरकं हरिं हरितवर्णं अरुषं रूपवन्तं अस्यदिवोद्युलोकस्यपतिं पालकं सोमं नसंत व्याप्नुवन्ति। यजमानाः। युत्सु संग्रामेषु शूरः प्रथमोदेवानांमध्ये मुख्यः सोमोगाः पणिभिरपहृताः पृच्छतेमार्गज्ञान् पणीन् हत्वा गालब्धुं गोमार्गं पृच्छतीत्यर्थः। किंच अस्यचक्षसासामर्थ्येन उक्षा सेक्तादेवेन्द्रः परिपाति विश्वं॥ ३॥

३. शत्रु-हिंसक, जल-प्रेरक, हरित-वर्ण, रूपवान् और द्युलोक के स्वामी सोम को यजमान लोग व्याप्त करते हैं। संग्रामों में शूर और देवों में मुख्य सोम पणियों के द्वारा अपहृत गायों को खोजने के लिए मार्ग पूछ रहे हैं सोम की ही सहायता से सेचक इन्द्र संसार की रक्षा करते हैं।

मधुपृष्ठंघोरमयासमश्वंरथेयुञ्जन्त्युरुचक्रंऋष्वम्।
स्वसारईंजामयोमर्जयन्तिसनाभयोवाजिनंमूर्जयन्ति॥ ४॥

मधुऽपृष्ठम्। घोरम्। अयासम्। अश्वम्। रथे। युञ्जन्ति। उरुऽचक्रे। ऋष्वम्। स्वसारः। ईम्। जामयः। मर्जयन्ति। सऽनाभयः। वाजिनम्। ऊर्जयन्ति॥ ४॥

मधुपृष्ठं मधुरपृष्ठभागं घोरंभयानकं अयासं गन्तारं ऋष्वं दर्शनीयं उक्तलक्षणमश्वमश्वस्थानीयं व्याप्तं सोमं उरुचक्रे प्रभूतचक्रे रथे यथाश्वं युंजंति रथिकास्तद्वत् प्रभूतचरणेरथे रंहणस्यसाधने यज्ञाख्ये रथेयुंजंति योजयंत्यध्वर्य्वादयः। किंच ईमेनंसोमं स्वसारः स्वयंसारिण्यः परस्परं स्वसृभूतावा जामयोबन्धुभूता अंगुलयः एकहस्तनिष्पन्नत्वाद् स्वसृत्वंजामित्वं च एवंभूतामार्जयन्ति शोधयन्ति। तदेवाह सनाभयः समानबंधना वाजिनं बलवन्तं सोममूर्जयन्ति बलिनंकुर्वन्ति॥ ४॥

४. मधुर पृष्ठवाले, भयानक, गन्ता और दर्शनीय सोम को अनेक चक्कोंवाले रथ में (यज्ञ में), अश्व के समान, जोता जाता है। परस्पर भगिनियों और बन्धुओं के समान अंगुलियां सोम का शोधन करती हैं। समान बन्धनवाले अध्वर्यु आदि सोम को बली करते हैं।

चतस्रईंघृतदुहःसचन्तेसमानेअन्तर्धरुणेनिषत्ताः।
ताईंमर्षन्तिनमसापुनानास्ताईंविश्वतःपरिषन्तिपूर्वीः॥ ५॥

चतस्रः। ईम्। घृतऽदुहः। सचन्ते। समाने। अन्तः। धरुणे। निऽसत्ताः। ताः। ईम्। अर्षन्ति। नमसा। पुनानाः। ताः। ईम्। विश्वतः। परि। सन्ति। पूर्वीः॥ ५॥

चतस्रो घृतदुहो घृतदोग्ध्र्यः गावईमेनं सोमं सचन्ते सेवन्ते। कीदृश्यस्ताः समाने एकस्मिन्धरुणे सर्वेषांधारके अन्तः अन्तरिक्षे निषत्ताः निषण्णाः ताघृतदुहः ईमेनमर्षन्ति प्राप्नुवन्ति नमसान्नेन पुनानाः पूयमानाः सत्यः ताः पूर्वीर्बह्व्यः प्रभूतागावोविश्वतः सर्वतः परिषंति परिभवन्ति॥ ५॥

५. घी देनेवाली चार गायें सोम की सेवा करती हैं। गायें सबके धारक अन्तरिक्ष (एक ही स्थान) में बैठी हुई हैं। अन्न से शोधित करनेवाली वे अनेक और बड़ी गायें चारों ओर से सोम को घेरकर रहती हैं।

विष्टम्भोदिवोधरुणःपृथिव्याविश्वाउताक्षितयोहस्तेअस्य।
असत्तउत्सोगृणतेनियुत्वान्मध्वोअंशुःपवतइन्द्रियाय॥ ६॥

विष्टम्भः। दिवः। धरुणः। पृथिव्याः। विश्वाः। उत। क्षितयः। हस्ते। अस्य। असत्। ते। उत्सः। गृणते। नियुत्वान्। मध्वः। अंशुः। पवते। इन्द्रियाय॥ ६॥

अयं सोमोदिवोद्युलोकस्य विष्टंभभूतः यथा गृहस्यस्तंभः तद्वत् तथा पृथिव्याधरुणोधारकः उतापिच विश्वाः सर्वाः क्षितयः प्रजाः अस्यसोमस्य हस्तेभवन्ति उत्सः उत्सरंत्यस्मात्कामाइत्युत्सः सोमः सगृणते स्तुवते ते तुभ्यं नियुत्वानश्ववान् असत् भवतु। ससोमोमध्वः मधुकर्मणिषष्ठी मधुररसः अंशुः सोमः। अंशुःशमष्टमात्रोभवती[1]तियास्कः। यइन्द्रियाय पवते पूयतेभिषूयते॥ ६॥

६. सोम द्युलोक के स्तम्भ और पृथिवी के धारक हैं। सारी प्रजा उनके हाथ में है। वे स्तुति करते हैं। तुम्हारे लिए वे अश्ववाले हों। सोम मधुर रसवाले हैं। वे इन्द्र के लिए अभिषुत होते हैं।

---

१ नि० २. ५.

वन्वन्नवातोअभिदेववीतिमिन्द्रायसोमवृत्रहापवस्व ।
शग्धिमहःपुरुश्चन्द्रस्यरायःसुवीर्यस्यपतयःस्याम ॥ ७ ॥ २५ ॥

वन्वन् । अवातः । अभि । देवऽवीतिम् । इन्द्राय । सोम ।
वृत्रऽहा । पवस्व । शग्धि । महः । पुरुऽचन्द्रस्य । रायः ।
सुऽवीर्यस्य । पतयः । स्याम ॥ ७ ॥ २५ ॥

वन्वन् सन् देववीतिं देवानांपानार्थं हे सोम इन्द्राय इन्द्रार्थं वृत्रहा वृत्रस्यहन्ता अवातः त्वं अभिपवस्व क्षर । कथंभूतः त्वं शग्धि शक्तिमान् महोमहानसि त्वत्प्रसादाद्वयं पुरुश्चन्द्रस्य बह्वाह्लादकस्य सुवीर्यस्य शोभनावीरायस्मिन् तादृशस्य रायं धनस्य पतयः स्याम ॥ ७ ॥

७. सोम, तुम बली और महान् हो। देवों और इन्द्र के पान के लिए वृत्रघ्न, तुम क्षरित होओ। तुम्हारी कृपा से हम अतीव आह्लादक और शोभन-वीर्य धन के स्वामी बन जायें।

॥ इतिसप्तमस्य तृतीये पंचविंशोवर्गः ॥ २५ ॥

प्रहिन्वानइति षळृचंपंचमंसूक्तं मैत्रावरुणेर्वसिष्ठस्यार्षं त्रैष्टुभं पवमानसोमदेवताकं । तथाचानुक्रान्तं । प्रहिन्वानःषड्वसिष्ठइति । गतोविनियोगः ।

प्रहिन्वानोजनितारोदस्योरथोनवाजंसनिष्यन्नयासीत् ।
इन्द्रंगच्छन्नायुधासंशिशानोविश्वावसुहस्तयोरादधानः ॥ १ ॥

प्र । हिन्वानः जनिता । रोदस्योः । रथः । न । वाजम् ।
सनिष्यन् । अयासीत् । इन्द्रम् । गच्छन् । आयुधा ।
सम्ऽशिशानः । विश्वा । वसु । हस्तयोः । आऽदधानः ॥ १ ॥

हिन्वानः प्रेर्यमाणोध्वर्य्वादिभिः जनिता उत्पादयिता रोदस्योर्द्यावापृथिव्योः । तयोर्जनयितृत्वं वृष्टिप्रदानद्वारिःप्रापणाभ्यां । रथोन यथा रथोगच्छति तादृक्सोमोवाजं अन्नं सनिष्यन् दास्यन् प्रायासीत् प्रयच्छति । इन्द्रंगच्छन् प्राप्नुवन् आयुधा आयुधानि संशिशानः सम्यक् तीक्ष्णीकुर्वन् इन्द्रसाहाय्यगमनार्थं तीक्ष्णायुधःसन् विश्वा सर्वाणि वसु वसूनि हस्तयोरादधानोस्मभ्यंदानाय एवंकुर्वन् प्रायासीत् ॥ १ ॥

१. अध्वर्युओं के द्वारा प्रेरित और द्यावापृथिवी के उत्पादक सोम रथ के समान अन्न प्रदान करनेवाले हैं। इन्द्र को पाकर, आयुधों को तेज कर और सारे धनों को हाथों में धारण कर सोम हमें देने को प्रस्तुत हैं।

अभित्रिपृष्ठंवृषणंवयोधामाङ्घ्राणामवावशन्तवाणीः ।
वनावसानोवरुणोनसिन्धून्विरत्नधादयतेवार्याणि ॥ २ ॥

अभि । त्रिऽपृष्ठम् । वृषणम् । वयःऽधाम् । आङ्घ्राणाम् ।
अवावशन्त । वाणीः । वना । वसानः । वरुणः । न ।
सिन्धून् । वि । रत्नऽधाः । दयते । वार्याणि ॥ २ ॥

त्रिपृष्ठं त्रीणिपृष्ठानि स्तोत्राणि द्रोणकलशादिस्थानानिवा सवनानि वा यस्यसतथोक्तः। तं वृषणं वर्षकं वयोधामन्नस्यदातारं सोमं आंगूषाणां आघोषवतां स्तोतॄणां वाणीर्वाचः अभ्यवावशन्त शब्दयन्ते। वना वनानि उदकानि वसानः आच्छादयन् वरुणोन वरुणइव सिन्धूनाच्छादयति तद्वत् रत्नधाः रत्नानांदाता सोमोवार्याणि धनानि विदयते प्रयच्छति स्तोतृभ्यः॥ २॥

२. तीन सवनोंवाले, वर्षक और अन्नदाता सोम को स्तोताओं की वाणी शब्दायमान कर रही है। जलमिश्रित सोम, वरुण के समान, जल के आच्छादक हैं और वे रत्न-दाता होकर स्तोताओं को धन देते हैं।

शूरग्रामःसर्ववीरःसहावाञ्जेतापवस्वसनिताधनानि।
तिग्मायुधःक्षिप्रधन्वासमत्स्वषाळ्हःसाह्वान्पृतनासुशत्रून्॥ ३॥

शूरऽग्रामः। सर्वऽवीरः। सहाऽवान्। जेता। पवस्व। सनिता। धनानि। तिग्मऽआयुधः। क्षिप्रऽधन्वा। समत्ऽसु। अषाळ्हः। सह्वान्। पृतनासु। शत्रून्॥ ३॥

हे सोम पवस्व त्वं। कीदृशस्त्वं शूरग्रामः शूराणां ग्रामः संघोयस्यसः सर्ववीरः सर्वे वीरायस्य सतथोक्तः सहावान् सहनवान् जेता जयशीलः सनिता संभक्ता धनानि तिग्मायुधः तीक्ष्णप्रहरणसाधनः क्षिप्रधन्वा क्षिप्रसहनशीलधन्वा समत्सु संग्रामेषु अषाळ्हः असोढः साह्वान् अभिभवन् कुत्र पृतनासु शत्रुसेनासु कान् शत्रून्॥ ३॥

३. सोम, तुम शूरों के समुदायक और वीरोंवाले हो। सोम सामर्थ्यवान्, विजेता, संभक्ता, तीक्ष्ण आयुधवाले, क्षिप्र और धनुर्धारी हाथवाले, युद्ध में अजेय और शत्रुओं को हरानेवाले हैं।

उरुगव्यूतिरभयानिकृण्वन्त्समीचीनेआपवस्वापुरन्धी।
अपःसिषासन्नुषसःस्वर्गाःसंचिक्रदोमहोअस्मभ्यंवाजान्॥ ४॥

उरुऽगव्यूतिः। अभयानि। कृण्वन्। समीचीने इति सम्ऽईचीने। आ। पवस्व। पुरन्धी इति पुरम्ऽधी। अपः। सिसासन्। उषसः। स्वः। गाः। सम्। चिक्रदः। महः। अस्मभ्यम्। वाजान्॥ ४॥

हे सोम उरुगव्यूतिर्विस्तीर्णमार्गस्त्वं अभयानि स्तोतृभ्यः कृण्वन् कुर्वन् पुरंधी इदं द्यावापृथिव्योर्नाम। ते समीचीने संगतेकुर्वन् आपवस्व आक्षर। अपः उषसः स्वः आदित्यं गारश्मींश्चसिषासन् पुष्टयर्थं संभक्तुमिच्छन् संचिक्रदः संदीप्ते। महोमहतः महान्ति वाजान् अन्नानिअस्मभ्यंदातुमितिशेषः॥ ४॥

४. सोम, तुम विस्तृत मार्गवाले हो। स्तोताओं के लिए अभय देते हुए और द्यावापृथिवी को सङ्गत करते हुए क्षरित होओ। हमें प्रचुर अन्न देने के लिए तुम उषा, आदित्य और किरणों को प्राप्त करने की इच्छा से शब्द करते हो।

मत्सिसोमवरुणंमत्सिमित्रंमत्सीन्द्रंमिन्दोपवमानविष्णुम् ।
मत्सिशर्धोमारुतंमत्सिदेवान्मत्सिमहामिन्द्रंमिन्दोमदाय ॥ ५ ॥

मत्सि । सोम । वरुणम् । मत्सि । मित्रम् । मत्सि । इन्द्रम् । इन्दो इति । पवमान । विष्णुम् । मत्सि । शर्धः । मारुतम् । मत्सि । देवान् । मत्सि । महाम् । इन्द्रम् । इन्दो इति । मदाय ॥ ५ ॥

हे पवमान पूयमानेन्दो सोम त्वं वरुणादीन् मत्सि तर्पय तेषां मदाय । इन्द्रस्य प्राधान्यात् द्विरभिधानं ॥ ५ ॥

५. क्षरणशील सोम, तुम वरुण, मित्र, विष्णु, बली मरुत्, इन्द्र और अन्य देवों के मद के लिए उन्हें तृप्त करो।

एवाराजेवक्रतुमाँअमेनविश्वाघनिघ्नद्दुरितापवस्व ।
इन्दोसूक्तायवर्चसेवयोधायूयंपातस्वस्तिभिःसदानः ॥ ६ ॥ २६ ॥

एव । राजाऽइव । क्रतुऽमान् । अमेन । विश्वा । घनिघ्नत् । दुःऽइता । पवस्व । इन्दो इति । सुऽउक्ताय । वर्चसे । वयः । धाः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥ २६ ॥

अनया स्तुतिमुपसंहरन् फलमाशास्ते । हेसोम एव एवं स्तुवइतिशेषः । क्रतुमांस्त्वं राजेव अमेन बलेन विश्वा सर्वाणिदुरिता दुरितानि घनिघ्नन् विनाशयन् पवस्व । हे इन्दो दीप्तसोम सूक्ताय शोभनमुदिताय वर्चसे अस्माकं स्तोत्राय तद्वचः विमृष्यार्थवदागत्य वयोधा अन्नंधेहि अन्नलाभस्य स्तुतिनिमित्तकत्वात्तस्य स्तुतिवचसः प्राधान्येनोक्तिः शिष्टं सिद्धं ॥ ६ ॥ ६. सोम, तुम यज्ञवाले हो। राजा के समान बल के द्वारा सारे पापों को नष्ट करके क्षरित होओ। दीप्त सोम, हमारे सुन्दर स्तोत्र के लिए हमें अन्न दो। कल्याण के द्वारा सदा हमारा पालन करो।

॥ इति सप्तमस्य तृतीये षड्विंशोवर्गः ॥ २६ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके तृतीयोऽध्यायः ॥३॥

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत् । निर्ममे तमहंवन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
तृतीयं श्रुतितत्वज्ञः सप्तमस्याष्टकस्यसः । व्याख्याय सायणामात्यश्चतुर्थं व्याचिकीर्षति ॥ २ ॥

तत्रासर्जीति षळृचमष्टमंसूक्तं मारीचस्य कश्यपस्यार्षं त्रैष्टुभं पवमानसोमदेवताकं । असर्जिकश्यपइत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

ॐम् असर्जिवक्वारथ्येयथाजौधियामनोताप्रथमोमनीषी ।
दशस्वसारोअधिसानोअव्येजन्तिवह्निंसदनान्यच्छ ॥ १ ॥

असर्जि । वक्वा । रथ्ये । यथा । आजौ । धिया । मनोता । प्रथमः । मनीषी । दश । स्वसारः । अधि । सानौ । अव्ये । अजन्ति । वह्निम् । सदनानि । अच्छ ॥ १ ॥

वक्वा शब्दायमानः वचपरिभाषणे वनिप् । एतादृशः पवमानः सोमः आजौ अजन्ति कर्मार्थमृत्विजइति आजिर्यज्ञः । तस्मिन् धिया कर्मणा स्तोत्रेणवा साकं असर्जि सृज्यते पात्रेष्विति । तत्र दृष्टान्तः—रथ्ये रथार्हे आजौ संग्रामनामैतत् । अजन्ति प्रक्षिपंत्यायुधान्यत्रेति तस्मिन् अश्वो यथा धिया अंगुल्या मृज्यते तद्वत् । कीदृशः मनोता यस्मिन्देवानां मनांसि ओतानि प्रोतानि सः । तथाचब्राह्मणं—तस्मिन्हितेषांमनांस्योतानीति । प्रथमः सर्वेषां देवानांमुख्यः मनीषी मनसईषा मनीषा स्तुतिः तद्वान् दश स्वसारः दशसंख्याका अंगुलयः सदनानि यज्ञगृहाणि अच्छाभिमुखीकृत्य वह्निं वोढारं सोमं सानौ समुच्छ्रिते । अधिः सप्तम्यर्थानुवादः । अव्ये अविभवे अविवालेन कृते पवित्रे अजन्ति प्रेरयन्ति । अजगतिक्षेपणयोः ॥ १ ॥

१. जैसे युद्धभूमि में अश्व का अंगुलि से परिमार्जन किया जाता है, वैसे ही शब्दायमान और क्षरणशील सोम का, कर्म के द्वारा यज्ञ में सृजन होता है । सोम देवों के मन के अनुकूल, देवों में श्रेष्ठ और स्तुति वा मन के अधिपति हैं । भगिनी-स्वरूप दस अँगुलियाँ, यज्ञ-गृह के सम्मुख, होनेवाले सोम को उन्नत देश—मेषलोममय दशापवित्र पर प्रेरित करती हैं ।

---

१ ऐ० ब्रा० २. १०. ।

अथ द्वितीया—

वीतीजनस्यदिव्यस्यकव्यैरधिसुवानोनहुष्येभिरिन्दुः ।
प्रयोनृभिरमृतोमर्त्येभिर्मृजानोविभिर्गोभिरद्भिः ॥ २ ॥

वीती । जनस्य । दिव्यस्य । कव्यैः । अधि । सुवानः । नहुष्येभिः ।
इन्दुः । प्र । य । नृऽभिः । अमृतः । मर्त्येभिः । मृजानः ।
अविऽभिः । गोभिः । अत्ऽभिः ॥ २ ॥

कव्यैः साधुभिः स्तोतृभिः नहुष्येभिर्मनुष्यैः सुवानः अभिषूयमाणः इंदुः सोमः दिव्यस्य दिविभवस्य जनस्य देवगणस्य वीती सुपांसुलुगिति चतुर्थ्याःपूर्वसवर्णदीर्घः सोमभक्षणार्थं यज्ञमधिगच्छति । किंच अमृतः मरणधर्मरहितोयः सोमः नृभिः कर्मनेतृभिः मर्त्येभिः मर्त्यैः अविभिरविमयैः पवित्रैः तथा गोभिरानडुहैः अधिषवणचर्मभिः । यद्वा गोविकारैः क्षीरादिभिः अद्भिःवसतीवर्यादिभिरुदकैश्च मर्मृजानः भृशंशोध्यमानःसन् यज्ञंप्रति गच्छति । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ २ ॥

२. कवि (स्तोता) नहुष-वंशीयों के द्वारा अभिषुत, क्षरणशील और देवों के समीपवर्ती सोम यज्ञ में जाते हैं। अमर सोम, कर्मनिष्ठ मनुष्यों के द्वारा, पवित्र अभिषवचर्म, गोरस और जल के द्वारा बार-बार शोधित होकर यज्ञ में जाते हैं।

अथ तृतीया—

वृषावृष्णेरोरुवदंशुरस्मैपवमानोरुशदीर्तेपयोगोः ।
सहस्रमृक्वापथिभिर्वचोविदध्वस्मभिःसूरोअण्वंवियाति ॥ ३ ॥

वृषा । वृष्णे । रोरुवत् । अंशुः । अस्मै । पवमानः । रुशत् ।
ईर्ते । पयः । गोः । सहस्रम् । ऋक्वा । पथिऽभिः । वचःऽवित् ।
अध्वस्मऽभिः । सूरः । अण्वम् । वि । याति ॥ ३ ॥

वृषा कामानांवर्षकः वृषेवाचरन्वा रोरुवत् भृशंशब्दायमानः अंशुः सोमः पवमानः पूयमानः सन् अस्मै वृष्णे वर्षकायेन्द्राय तदर्थं रुशत् रोचतेरिदंरूपं । आरोचमानं श्वेतं गोः पय आश्रयणद्रव्यं ईर्ते गच्छति ईरगतौ आदादिकः । किंच ऋक्वा छन्दसीवनिपाविति मत्वर्थीयोवनिप् स्तोत्रवान् अतएव वचोवित् स्तुतीनांज्ञाता सूरः सुवीर्यः सर्वेषामग्निष्टोमादिकर्मप्रेरकः सोमः अध्वस्मभिः ध्वंसनवर्जितैः हिंसारहितैः सहस्रं पथिभिर्बहुभिर्मार्गैः अण्वं सूक्ष्मच्छिद्रं पवित्रं वियाति अतीत्य द्रोणकलशं गच्छति ॥ ३ ॥

३. काम-वर्षक, बार-बार शब्दायमान और क्षरणशील सोमवर्षक इन्द्र के लिए शोभन और श्वेत गोरस के पास जाते हैं। स्तोत्रवान्, स्तोत्रज्ञ और सुवीर्य सोम हिंसा-शून्य अनेक मार्गों से सूक्ष्म-छिद्र पवित्र को लांघकर द्रोण-कलश में जाते हैं।

रुजादृह्लाचिद्रक्षसःसदांसिपुनानइन्दऊर्णुहिविवाजान्।
वृश्चोपरिष्टात्तुजतावधेनयेअन्तिदूरादुपनायमेषाम् ॥ ४ ॥

रुज। दृह्ला। चित्। रक्षसः। सदांसि। पुनानः। इन्दो इति।
ऊर्णुहि। वि। वाजान्। वृश्च। उपरिष्टात्। तुजता। वधेन।
ये। अन्ति। दूरात्। उपऽनायम्। एषाम् ॥ ४ ॥

हे सोम दृह्लाचित् दृढान्यपि परैरगन्तव्यत्वेन रक्षसोराक्षसस्य सदांसि स्थानानि पुराणि रुज विनाशय। रुजोभंगे तौदादिकः। किंच हे इन्दो पवमानः पुनानः पवित्रादिभिः पूयमानस्त्वं वाजान् अन्नानि तस्य बलानिवा विविधं ऊर्णुहि आच्छादय आहरेत्यर्थः। तथा येराक्षसा उपरिष्टादूर्ध्वदेशादागच्छन्ति ये वा अन्तिके समीपे आगच्छन्ति ये च दूराद् दूरदेशाद्वा आगच्छन्ति येषां राक्षसानां उपनायं उपनेतारं स्वामिनं तुजता तुजतिर्हिंसाकर्मा। हिंसकेन वधेन हननसाधनेनायुधेन त्वं वृश्च छिन्धि। ओव्रश्चूछेदने तौदादिकः ॥ ४ ॥

४. सोम, सुदृढ़ राक्षस-पुरियों को विनष्ट करो। इन्दु (सोम), पवित्र में शोध्यमान (शोधन किये जाते हुए) तुम अन्न ले आओ। जो राक्षस दूर वा समीप से आते हैं, उनके स्वामी को तुम घातक हथियार से काट डालो।

अथ पंचमी—

सप्रत्नवन्नव्यसेविश्ववारसूक्तायपथःकृणुहिप्राचः।
येदुःषहासोवनुषाबृहन्तस्तांस्तेअश्यामपुरुकृत्पुरुक्षो ॥ ५ ॥

सः। प्रत्नऽवत्। नव्यसे। विश्वऽवार। सुऽउक्तायं। पथः। कृणुहि
प्राचः। ये। दुःऽसहासः। वनुषा। बृहन्तः। तान्। ते।
अश्याम। पुरुऽकृत्। पुरुक्षो इति पुरुऽक्षो ॥ ५ ॥

हे विश्ववार विश्वैः सर्वैर्वरणीय हे सोम तादृशस्त्वं प्रत्नवत् पुराणइव स्थितस्त्वं नव्यसे नवीयसे नवतराय नवशब्दादीयसुनीकारलोपश्छांदसः। तस्मै सूक्ताय शोभनस्तुतिकाय मह्यं पथोमार्गान् प्राचः प्राचीनान् कृणुहि कुरु सर्वत्रगमनं प्रयच्छेत्यर्थः। कृविहिंसाकरणयोः धिन्विकृण्व्योरचेत्युप्रत्ययः। हेपुरुकृत् बहुकर्मन् हेपुरुक्षो दुक्षुशब्दे गितद्वादित्वात् डुप्रत्ययः। बहुविधं शब्दायमान हेसोम दुःसहासः रक्षोभिःसोढुमशक्याः अतएव वनुषा वनतिर्हिंसार्थः।

हिंसयायुक्ताः बृहन्तोमहान्तः येत्वदीया अंशाःसन्ति तान् ते तव स्वभूतान् अंशान् वयं यज्ञे अश्याम प्राप्नुयाम ॥ ५ ॥

५. सबके प्रार्थनीय सोम, प्राचीन काल के समान स्थित तुम नवीन सुक्त और शोभन स्तोत्रवाले मेरे मार्गों को पुराने करो अर्थात् मेरे लिए कोई मार्ग नया न रहे। बहुकर्मा और शब्दायमान सोम, राक्षसों के लिए असह्य, हिंसक और महान् जो तुम्हारे अंश हैं, उन्हें हम यज्ञ में प्राप्त करें। अथ षष्ठी—

एवापुनानोअपःस्व१र्गाअस्मभ्यंतोकातनयानिभूरि।
शंनःक्षेत्रंमुरुज्योतींषिसोमज्योङ्नःसूर्यंदृशयेरिरीहि ॥ ६ ॥ १ ॥

एव। पुनानः। अपः। स्वः। गाः। अस्मभ्यम्। तोका। तनयानि। भूरि। शम्। नः। क्षेत्रम्। उरु। ज्योतींषि। सोम। ज्योक्। नः। सूर्यम्। दृशये। रिरीहि ॥ ६ ॥ १ ॥

हे सोम एव एवं पुनानः पूयमानः पवित्रादिभिः अस्मभ्यं रिरीहि प्रापय प्रयच्छ। किं तत् अपः अपइत्यन्तरिक्षनाम आप्नोति सर्वमपि अन्तरिक्षं स्वः स्वर्गं द्युलोकं गाः सर्वैर्गम्यते अत्रेतिगावः पृथिव्यः ताः पृथिवीश्च भूरि सुपांसुलुगिति द्वितीयायालुक्। बहून् तोका तोकान् तनयानि तन्वन्ति कुलमिति तनयाः पौत्राः तांश्च तथा नोस्मभ्यं क्षेत्रं शं सुखकरं कुरु। हेसोम ज्योतींषि नक्षत्राणि उरु उरूणि अन्तरिक्षे विस्तीर्णानिकुरु। तथा नोस्मभ्यं सूर्यमादित्यं ज्योक् चिरनामैतत् चिरकालं दृशये द्रष्टुं कुरु ॥ ६ ॥

६. क्षरणशील (पवमान) सोम, हम जल, स्वर्ग, गोधन और अनेक पुत्र-पौत्र दो। हमारे खेत का मङ्गल करो। सोम, अन्तरिक्ष में नक्षत्रों को विस्तृत करो। हम चिरकाल तक सूर्य को देख सकें।

॥ इति सप्तमस्य चतुर्थे प्रथमोवर्गः ॥ १ ॥

परिसुवानइति षळृचंसप्तमंसूक्तं मारीचस्यकश्यपस्यार्षं त्रैष्टुभं पवमानसोमदेवताकं। परिसुवानइत्यनुक्रान्तं गतोविनियोगः।

परिसुवानोहरिरंशुःपवित्रेरथोनसर्जिसनयेहियानः।
आपच्छ्लोकमिन्द्रियंपूयमानःप्रतिदेवाँअजुषतप्रयोभिः ॥ १ ॥

परि। सुवानः। हरिः। अंशुः। पवित्रे। रथः। न। सर्जि। सनये। हियानः। आपत्। श्लोकम्। इन्द्रियम्। पूयमानः। प्रति। देवान्। अजुषत। प्रयःऽभिः ॥ १ ॥

सुवानः अभिषूयमाणः हियानः ऋत्विग्भिः प्रेर्यमाणः हरिर्हरितवर्णःअंशुः सोमः पवित्रे अविवाडेन कृतेदशापवित्रे परिसर्जि परिसृज्यते। किमर्थं सनये धनलाभाय देवानां संभजनाय वा। तत्रदृष्टान्तः—रथोन रथोयथा युद्धे शत्रुवधार्थं शत्रुधनहरणार्थंवा सृज्यते तद्वत्। किंच पूयमानः पवित्रेण सोयंसोमः इन्द्रियं इन्द्रलिंगं इन्द्रस्य पर्याप्तं वा श्लोकं स्तोत्रमापत्रआमोति आपूर्व्याप्तौलेटचडागमः। तथाससोमः मयोभिः प्रीणयितृभिः हवीरूपैः अन्नैर्देवान् मत्यजुषत प्रतिसेवते जुषीप्रीतिसेवनयोः॥ १॥

१. शोध्यमान, पुरोहितों के द्वारा भेजे जाते और हरित-वर्ण सोम वैसे ही मेषलोम के पवित्र (चलनी या छनने) में, देवों के उपासन के लिए, संचालित किये जाते हैं, जैसे युद्ध में, शत्रु-वध के लिए, रथ-संचालित किया जाता है। शोध्यमान सोम इन्द्र का स्तोत्र प्राप्त करते हैं। सोम प्रसन्नकर अन्न से देवों की सेवा करते हैं। अथ द्वितीया—

अच्छानृचक्षाअसरत्पवित्रेनामदधानःकविरस्ययोनौ।
सीदन्होतेवसदनेचमूषूपेमग्मन्नृषयःसप्तविप्राः॥ २॥

अच्छ। नृऽचक्षाः। असरत्। पवित्रे। नाम। दधानः। कविः।
अस्य। योनौ। सीदन्। होताऽइव। सदने। चमूषु।
ईम्। अग्मन्। ऋषयः। सप्त। विप्राः॥ २॥

नृचक्षाः नृणांद्रष्टा कविः क्रान्तप्रज्ञः सोमः नाम वसतीवर्याख्यमुदकं दधानोधारयन् अस्य एतादृशस्यात्मनः योनौ स्थाने पवित्रे अच्छासरत् अभितः सरति ततः सदने सीदंत्यत्रेति सदनोयज्ञः तस्मिन् होतेव होतायथा देवान्स्तोतुमुपविशति तद्वत् देवानागन्तुं सीदन् उपविशन् सोमः चमूषु चमन्ति चम्योग्रहादयः तेषु अभिसर। अनंतरं सप्त सप्तसंख्याका विप्रामेधाविनः भरद्वाजः कश्यपोगोतमोत्रिर्विश्वामित्रोजमदग्निर्वसिष्ठइत्येतेऋषयः ईमेनंसोमं उपाग्मन् स्तोत्रैरुपगच्छन्ति॥ २॥

२. मनुष्यों के दर्शक और क्रान्तप्रज्ञ सोम जल में मिलकर तथा अपने स्थान पवित्र में फैलकर यज्ञ में उसी प्रकार जाते हैं, जिस प्रकार स्तोत्र के लिए होता देवों के पास जाता है। अनन्तर सोम चमस आदि पात्रों में जाते हैं। सात मेधावी (भरद्वाज, कश्यप, गौतम, अत्रि, विश्वामित्र, जमदग्नि और वसिष्ठ) ऋषि सोम के पास जाते हैं।

प्रसुमेधागातुविद्विश्वदेवःसोमःपुनानःसदएतिनित्यम्।
भुवद्विश्वेषुकाव्येषुरन्तानुजनान्यततेपञ्चधीरः॥ ३॥

प्र। सुऽमेधाः। गातुऽवित्। विश्वऽदेवः। सोमः। पुनानः।
सदः। एति। नित्यम्। भुवत्। विश्वेषु। काव्येषु। रन्ता।
अनु। जनान्। यतते। पञ्च। धीरः॥ ३॥

सुमेधाः। नित्यमसिच्प्रजामेधयोरिति असिच् समासान्तः। शोभनप्रज्ञः गातुविद् मार्गस्यवेत्ता यद्वा गातवः स्तोतारः तेषां धनस्यलंभयितावा विश्वदेवः सर्वदेवोपगतः यद्वादेवो देवनं दीप्तिः व्यापकदीप्तियुक्तः एतादृशः सोमः पुनानः पूयमानः सन् नित्यमविनश्वरं सदः स्थानं द्रोणकलशं मैति प्रगच्छति अतः विश्वेषु सर्वेषु काव्येषु कविकर्मसु स्तोत्रेषु रन्ताभुवत् रमणशीलोभवति रमेस्ताच्छीलिकस्तृन्। तथा धीरः प्राज्ञः सोयंपंचजनान् निषादपंचमान् चतुरोवर्णान् अनुयतते अनुगन्तुं प्रयत्नंकरोति अनुगच्छतीतियावत् ॥ ३ ॥

३. शोभन-प्रज्ञ, मार्गज्ञ, सब देवों के समीपी और पवमान (शोध्यमान) सोम अविनश्वर द्रोण-कलश में जाते हैं। सारे कार्यों में रमणीय और प्राज्ञ सोम निषाद आदि पाँच वर्णों का अनुगमन करते हैं।

तवत्येसोमपवमाननिण्येविश्वेदेवास्त्रयएकादशासः।
दशस्वधाभिरधिसानोअव्येमृजन्तित्वानद्यःसप्तयह्वीः ॥ ४ ॥

तव। त्ये। सोम। पवमान। निण्ये। विश्वे। देवाः। त्रयः।
एकादशासः। दश। स्वधाभिः। अधि। सानौ। अव्ये।
मृजन्ति। त्वा। नद्यः। सप्त। यह्वीः ॥ ४ ॥

हे पवमान पूयमान हेसोम तवस्वभूताः त्ये ते प्रसिद्धाः त्रयएकादशासः पूरणार्थेडट्प्रत्ययः। त्रयस्त्रिंशत्संख्याका विश्वेसर्वेदेवाः निण्ये अन्तर्हितनामैतत्। अंतर्हिते स्थाने द्युलोकेवर्तन्ते तादृशं त्वां दशसंख्याका अंगुलयः अधिसानौ अधिके समुच्छ्रिते अव्ये अविमये पवित्रे स्वधाभिरुदकैर्वा मृजन्ति शोधयन्ति। किंच यह्वीः वाछन्दसीति पूर्वसवर्णदीर्घः। यत्प्रोमहत्यः सप्तसंख्याकागंगाद्यानद्यः त्वा त्वां मृजन्ति वसतीवर्याख्यैरेकधनाख्यैश्च स्वीयैरुदकैस्त्वां मार्जयन्ति इत्यर्थः ॥ ४ ॥

४. पूयमान (शोध्यमान) सोम, तुम्हारे ये प्रसिद्ध ३३ देवता अन्तर्हित स्थान (स्वर्ग = द्युलोक) में रहते हैं। दस अँगुलियाँ उन्नत और मेषलोम के पवित्र में जल के द्वारा तुम्हें शोधित करती हैं।

तन्नुसत्यंपवमानस्यास्तुयत्रविश्वेकारवःसंनसन्त।
ज्योतिर्यदह्नेअकृणोदुलोकंप्रावन्मनुंदस्यवेकरभीकम् ॥ ५ ॥

तत्। नु। सत्यम्। पवमानस्य। अस्तु। यत्र। विश्वे। कारवः।
सम्ऽनसन्त। ज्योतिः। यत्। अह्ने। अकृणोत्। ऊँ इति।
लोकम्। प्र। आवत्। मनुम्। दस्यवे। कः। अभीकम् ॥ ५ ॥

सत्यं सत्यभूतं तत्प्रसिद्धस्य पवमानस्य सोमस्यस्थानं नुक्षिप्रं अस्माकमस्तु यत्र यस्मिन्स्थाने विश्वेसर्वे कारवः स्तोतारः संनसन्त स्तोतुं संगच्छंते तवस्थानमस्तु । अस्यसोमस्य यत् ज्योतिः अह्ने दिवसाय लोकमालोकं प्रकाशं अरुणोत् करोति । उदित्यवधारणे । तत् ज्योतिः मनुं एतन्नामानं राजर्षिं मावत् प्रकर्षेणारक्षत् । तथा सोमः स्वीयंतेजः दस्यवे सर्वस्योपक्षपयित्रे असुराय अभीकं अभिगमनशीलं कःअकार्षीत् करोतेर्लुङि मंत्रेघसेति च्लेर्लुक् ॥५॥

५. पवमान सोम के जिस प्रसिद्ध स्थान पर स्तोता लोग, स्तुति के लिए, एकत्र होते हैं, उस सत्य स्थान को हम प्राप्त करें। सोम की जो ज्योति दिन के लिए प्रकाश प्रदान करती है, उसने मनु नामक राजर्षि की उत्तम रूप से रक्षा की है। सोम ने अपने तेज को सर्वनाशक असुर के लिए अभिगमनशील किया है।

परिसद्मेवपशुमान्तिहोतारराजानसत्यःसमितीरियानः ।
सोमःपुनानःकलशाँअयासीत्सीदन्मृगोनमहिषोवनेषु ॥ ६ ॥ २॥

परि । सद्मऽइव । पशुऽमन्ति । होता । राजा । न । सत्यः ।
सम्ऽइतीः । इयानः । सोमः । पुनानः । कलशान् ।
अयासीत् । सीदत् । मृगः । न । महिषः । वनेषु ॥

होता देवानामाह्वाता ऋत्विक् पशुमन्ति पशुमतः सद्मेव यज्ञगृहान् यथापरिगच्छते । किंच राजा न यथाराजा सत्यः सत्यकर्मासन् समितीः संग्रामनामैतत् सम्यक्प्राप्यते योद्धृभिरत्रेतितान् संग्रामान् इयानोगच्छन् भवति । तथा पुनानः सोमोवनेषु वननीयेषु वसतीवर्याख्येषूदकेषुसीदन् मृगोन महिषः महिषाख्योमृगइव उदकेषुतिष्ठन् कलशान् द्रोणाभिधानान् अयासीत् परियाति । यद्वा महिषोमहान् पूज्योवा सोमः कलशान् परिगच्छतीति ॥ ६ ॥

६. जैसे देवों को बुलानेवाले ऋत्विक् पशुवाले के सदन (यज्ञगृह) में जाते हैं और जैसे सत्यकर्मा राजा युद्ध-क्षेत्र में जाता है, वैसे ही पवमान सोम, गमनशील जल में महिष के सदृश रहकर, द्रोण-कलश में जाते हैं।

॥ इति सप्तमस्य चतुर्थे द्वितीयोवर्गः ॥ २ ॥

साकमुक्षइति पंचर्चमष्टमंसूक्तं गौतमस्यनोधसआर्षं पूर्ववच्छंदोदेवते । तथाचानुक्रम्यते । साकमुक्षःपंचनोधाइति । गतोविनियोगः ।

साकमुक्षोमर्जयन्तस्वसारोदशधीरस्यधीतयोधनुत्रीः ।
हरिःपर्यद्रवज्जाःसूर्यस्यद्रोणंननक्षेअत्योनवाजी ॥ १ ॥

साकमुक्षः । मर्जयन्त । स्वसारः । दश । धीरस्य ।
धीतयः । धनुत्रीः । हरिः । परि । अद्रवत् । जाः । सूर्यस्य ।
द्रोणम् । ननक्षे । अत्यः । न । वाजी ॥ १ ॥

साकमुक्षः सहयुगपत्सिंचत्यः उक्षसेचने क्विपिरूपं । दशस्यः स्वसारः कर्मकरणार्थं इतस्ततः सुष्ठुगच्छंत्योंगुलयः मर्जयंत सोमंशोधयन्ति । मृजूशौचालंकारयोः । तथा दश दशसंख्याकाः धीतयः अंगुलिनामैतत् । अंगुलयः धीरस्य समर्थस्य प्राज्ञस्यवा देवैर्ध्यातव्यस्य काम्यमानस्यवा सोमस्य धनुत्रीः प्रेरयित्र्योभवन्ति ततः हरिर्हरितवर्णः सोमः सूर्यस्यजाः प्रादुर्भूता जायादिशः ताः पर्यद्रवत् परितोगच्छति । सूर्यतेजसाहि आविर्भवन्तीति दिशां तस्यजात्वं । अत्यः अतनशीलोवाजीन अश्वइव स्थितः सोमः द्रोणं कलशं ननक्षे व्याप्नोति । नक्षतिर्व्याप्तिकर्मा ॥ १ ॥

१. एक साथ सिंचन करनेवाली भगिनी-स्वरूप जो दस अँगुलियाँ सोम का शोधन करती हैं, वे ही प्राज्ञ और देवों के द्वारा काम्यमान सोम की प्रेरिका हैं। हरितवर्ण सोम सूर्य की पत्नियों (दिशाओं) की ओर जाते हैं। गतिशील अश्व के समान स्थित सोम कलश में जाते हैं।

संमातृभिर्नशिशुर्वावशानोवृषादधन्वेपुरुवारोअद्भिः ।
मर्योनयोषामभिनिष्कृतंयन्त्सङ्गच्छतेकलशंउस्रियाभिः ॥ २ ॥

सम् । मातृऽभिः । न । शिशुः । वावशानः । वृषा । दधन्वे ।
पुरुऽवारः । अतृऽभिः । मर्यः । न । योषाम् । अभि ।
निःऽकृतम् । यत् । सम् । गच्छते । कलशे । उस्रियाभिः ॥ २ ॥

वावशानः देवान्कामयमानः वृषा कामानांवर्षकः अतएव पुरुवारः बहुभिर्वरणीयःसोमः अद्भिः मातृभूताभिः वसतीवरीभिः संदधन्वे संधार्यते । तत्रदृष्टान्तः—मातृभिर्नशिशुः कामयमानः पुत्रोयथा मातृभिः पयःप्रदानेन संधार्यते । धविर्गत्यर्थः कर्मणिलिटिरूपं । मर्योन मनुष्योयथा योषां युवतिं अभिगच्छति तद्वत् निष्कृतं संस्कृतं स्वस्थानं अभियन् अभिगच्छन् कलशे द्रोणाभिधाने उस्रियाभिरद्भिः गोविकारैः क्षीरादिभिर्वासंगच्छते । गमेरकर्मकाद्व समोगम्यृच्छीत्यात्मनेपदं ॥ २ ॥

२. देवकामी, कामवर्षक और वरणीय सोम जल के द्वारा उसी प्रकार धृत किये जाते हैं, जिस प्रकार माताएँ शिशु का धारण करती हैं। जैसे पुरुष अपनी स्त्री के पास जाता है, वैसे ही सोम अपने संस्कृत स्थान को प्राप्त करते हुए, दूध आदि के साथ, द्रोण-कलश में जाते हैं।

अथ तृतीया—

उतप्रपिप्यऊधरघ्न्यायाइन्दुर्धाराभिःसचतेसुमेधाः ।
मूर्धानंगावःपयसाचमूष्वभिश्रीणन्तिवसुभिर्ननिक्तैः ॥ ३ ॥

उत । प्र । पिप्ये । ऊधः । अघ्न्यायाः । इन्दुः । धाराभिः ।
सचते । सुऽमेधाः । मूर्धानम् । गावः । पयसा । चमूषु ।
अभि । श्रीणन्ति । वसुऽभिः । न । निक्तैः ॥ ३ ॥

उतापिच अघ्न्यायाः अघ्न्येतिगोनाम अहंतव्यायागोरूधः पयःस्थानं सोमः प्रपिप्ये ओषध्यादिषु सोमः प्रविश्य प्रकर्षेणाप्याययति । प्यायतेर्लिटिलिङ्यङोश्चेतिपीभावः । सुमेधाः शोभनप्रज्ञः सोयं इन्दुः सोमः धाराभिः सचते समवैति संगच्छते । ततोगावः चमूषु चमन्ति भक्षयंत्यत्रसोममिति चम्वोग्रहादयः तेषुस्थितं मूर्धानं समुच्छ्रितमिमंसोमं पयसा श्वेतेन अभिश्रीणंति अभितआच्छादयन्ति । तत्रदृष्टान्तः—निक्तैः प्रक्षालितैर्वसुभिर्न वस्त्रैर्यथा आच्छादयन्ति तद्वत् ॥ ३ ॥

३. सोम गाय के स्तन को आप्यायित करते हैं । शोभनप्रज्ञ सोम धाराओं के रूप में क्षरित होते हैं। चमसों में स्थित उन्नत सोम को गायें श्वेत दुग्ध से उसी प्रकार आच्छादित करती हैं, जिस प्रकार धौत वस्त्र से कोई पदार्थ आच्छादित किया जाता है।

अथ चतुर्थी—

सनोदेवेभिःपवमानरदेन्दोरयिमश्विनंवावशानः ।
रथिरायतांमुशतीपुरंन्धिरस्मद्र्यंगादावनेवसूनाम् ॥ ४ ॥

सः । नः । देवेभिः । पवमान । रद । इन्दो इति । रयिम् ।
अश्विनम् । वावशानः । रथिरायताम् । उशती ।
पुरंऽधिः । अस्मन्यक् । आ । दावने । वसूनाम् ॥ ४ ॥

हे पवमान पूयमानसोम सतादृशः त्वं नोस्मभ्यं देवेभिर्देवैःसह रद प्रयच्छ । किंतत् उच्यते हेइन्दो पात्रेषु क्षरन्सोम वावशानः कामयमानः सन् अश्विनं अश्ववन्तं रयिं धनं प्रयच्छेति । किंच रथिरायतां रथोयेषामस्तीति रथिराः । मेधारथाभ्यामितीरचूप्रत्ययः । तद्वदाचरतः तानिच्छतोवा पुरुषान् उशती कामयमाना पुरंधिः त्वदीया बहुविधाधीः वसूनां धनानां दावने दानाय अस्मद्र्यक् अस्मदभिमुख्यागच्छतु यद्वा रथिरायतामिति धनानांविशेषणं बलवतां

धनानामिति। अस्मद्यक् विष्वग्देवयोश्चेरद्यञ्चतावप्रत्ययइति अञ्चादेशः अद्रिसद्योरन्तोदात्तत्वनिपातनात् उदात्तस्वरितयोर्यणइतितित्स्वरितः ॥ ४ ॥

४. पवमान सोम, पात्रों में गिरते-गिरते देवों के साथ कामयमान तुम अश्व से युक्त धन दो। रयियों की इच्छा करनेवाले सोम की अभिलाषिणी और बहुविध बुद्धि धन-दान के लिए हमारे सामने आवे।

नूनोंरयिमुपमास्वनृवन्तंपुनानोवाताप्यंविश्वश्चन्द्रम्।
प्रवन्दितुरिन्दोतार्यायुःप्रातर्मक्षूधियावसुर्जगम्यात् ॥ ५ ॥ ३ ॥

नु। नः। रयिम्। उप। मास्व। नृऽवन्तम्। पुनानः।
वाताप्यम्। विश्वऽचन्द्रम्। प्र। वन्दितुः। इन्दो इति। तारि।
आयुः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात् ॥ ५ ॥ ३॥

हे सोम पुनानः पूयमानस्त्वं नोस्मभ्यं नृक्षिपं नृवन्तं मनुष्यैर्युक्तं। छान्दसंमतुपोवत्वं। तादृशं रयिं धनं उपमास्व उपनिर्मिमीष्व उपकुर्वित्यर्थः। किंच विश्वचन्द्रं सर्वेषामाह्लादकंवाताप्यं उदकनामैतत् उदकंचकुरु। तथा हे इन्दो सोम वन्दितुस्तवस्तोतुः आयुर्जीवनं प्रतारि त्वया वर्धितमस्तु सोयंसोमः धियावसुः बुध्याकर्मणावा प्रातधनः प्रातः काले वा सवने वा मक्षु शीघ्रं अस्मदीयं यज्ञं प्रति जगम्यादागच्छेत् गमेर्लिङि बहुलंछन्दसीतिशपःश्लुः ॥ ५ ॥

५. सोम, हमारे लिए शीघ्र ही पुत्रादि-युक्त धन दो। जल को सबके लिए आह्लादक बनाओ। सोम, स्तोता की आयु को बढ़ाओ। सोम अपने कर्म से सवन में, हमारे यज्ञ के प्रति, शीघ्र आवें।

॥ इति सप्तमस्य चतुर्थे तृतीयोवर्गः ॥ ३ ॥

अधियदिति पंचर्चंनवमंसूक्तं आंगिरसस्यकण्वस्यार्षं तथाचानुक्रम्यते—अधियत्कण्वइति। पूर्ववच्छन्दोदेवते गतोविनियोगः।

तत्र प्रथमा—

अधियदस्मिन्वाजिनीवशुभःस्पर्धन्तेधियःसूर्येनविशः।
अपोवृणानःपवतेकवीयन्व्रजंनपशुवर्धनायमन्म ॥ १ ॥

अधि। यत्। अस्मिन्। वाजिनीऽइव। शुभः। स्पर्धन्ते।
धियः। सूर्ये। न। विशः। अपः। वृणानः। पवते।
कविऽइयन्। व्रजम्। न। पशुऽवर्धनाय। मन्म ॥ १ ॥

यद्यदास्मिन्सोमे वाजिनीव शुभः अश्वेयथा वस्त्रमभ्यलंकाराभवन्ति । यदावास्मिन् सोमे सूर्येन यथासूर्ये विशोरश्मयउदिताभवन्ति तदा धियोंगुलयः अधिस्पर्धन्ते अहंपुरस्ताच्छोधयामि अहंपुरस्ताच्छोधयामीत्यहमहमिकया उपतिष्ठन्ति । ततोयंसोमः अपोवसतीवरीर्वृणानः आच्छादयन् पवते पात्रेषु क्षरति कलशानि अधिगच्छति । कीदृशः कवीयन् कविरिवाचरन् । यद्वा कवयःस्तोतारः तानिच्छन् तत्रदृष्टान्तः—व्रजंन मन्म मननीयं गवां गोष्ठं पशुवर्धनाय पशूनां वर्धनाय गोपालः परिगच्छति तथा देवानां प्रीणनाय पात्राणिप्रति पववइति ॥ १ ॥

१. जिस समय घोड़े के समान सोम अलंकृत होते हैं और जिस समय सूर्य के समान सोम की किरणें उदित होती हैं, उस समय अँगुलियाँ स्पर्द्धा करके सोम का शोधन करती हैं। अनन्तर कवि सोम जल में मिलकर उसी प्रकार कलश में क्षरित होते हैं, जिस प्रकार पशुपोषण के लिए गोपाल गोष्ठ में जाता है।

द्विताव्यूर्ण्वन्नमृतस्यधामस्वर्विदेभुवनानिप्रथन्त ।
धियःकृण्वानाःस्वसरेनगावऋतायन्तीरभिवावश्रइन्दुम् ॥ २ ॥

द्विता । विऽऊर्ण्वन् । अमृतस्य । धाम । स्वःऽविदे । भुवनानि । प्रथन्त । धियः । पिन्वानाः । स्वसरे । न । गावः । ऋतऽयन्तीः । अभि । वावश्रे । इन्दुम् ॥ २ ॥

अमृतस्योदकस्यधाम धारकंस्थानमन्तरिक्षं सोमोद्विता द्विधा व्यूर्ण्वन् उभयतः स्वतेजसाच्छादयन् मध्येनगच्छति । ततः स्वर्विदे सर्वज्ञाय तस्मै सोमाय भुवनानि प्रथन्त विस्तीर्णानिभवन्ति । तस्यरश्मीनां संचरणार्थं प्रथन्तइत्यर्थः । अथ पिन्वानाः प्रीणयित्र्यः धियः स्तुतिलक्षणावाचः ऋतायन्तीर्यज्ञमिच्छंत्यः सत्यः तमिमंमिंदुं सोममभिलक्ष्य स्वसरे यागाहनि वावश्रे शब्दायन्ते । यद्वा सोमं कामयन्ते । तत्रदृष्टान्तः—गावोन यथापिन्वमानाः पयः क्षरंत्योगावः स्वसरे सुष्ठु अस्यन्ते प्रेर्यंते गावोत्रेति स्वसरोगोष्ठं तस्मिन्नच्छाभिलक्ष्य शब्दंकुर्वन्ति तद्वत् ॥ २ ॥

२. जल-धारक अन्तरिक्ष को सोम अपने तेज से दोनों ओर से आच्छादित करते हैं। सर्वज्ञ सोम के लिए सारे भुवन विस्तृत हों। प्रसन्नताकारिणी और यज्ञ-विधायिनी स्तुतियाँ सोम को लक्ष्य करके यज्ञ-दिनों में वैसे ही शब्द करती हैं, जैसे दुग्धवाहिनी गायें गोष्ठ में शब्द करती हैं।

परियत्कविःकाव्याभरतेशूरोनरथोभुवनानिविश्वा ।
देवेषुयशोमर्तायभूषन्दक्षायरायःपुरुभूषुनव्यः ॥ ३ ॥

परि । यत् । कविः । काव्या । भरते । शूरः । न । रथः ।
भुवनानि । विश्वा । देवेषु । यशः । मर्ताय । भूषन् ।
दक्षाय । रायः । पुरुऽभूषु । नव्यः ॥ ३ ॥

कविः क्रान्तप्रज्ञः सोमः काव्या काव्यानि कवेः कर्माणि स्तोत्राणि यद्यदा परिभरते परितोबिभर्ति परिगच्छतीतियावत् । कथमिव शूरोन यथाशूरः शत्रूणांबाधकोरथस्तदीयः विश्वा भुवनानि सांग्रामिकानि भूतानि परियाति तद्वत् तदानीं देवेषुस्थितं यशोव्यापकं धनं मर्ताय मनुष्याय स्तोत्रे भूषन् भवतेरन्तर्भावितण्यर्थात् सनिरूपं भावयितुमिच्छन् सोमः रायः आत्मना दत्तस्यधनस्य दक्षाय वृध्यर्थं पुरुभूषु बहुषुयज्ञभवनेषु नव्यः स्तोतव्योभवति । णुस्तुतौ अचोयत् ॥ ३ ॥

३. बुद्धिमान् सोम जिस समय स्तोत्रों की ओर आते हैं, उस समय वीर पुरुष के रथ के समान वह सर्वत्र गति-विधि करते हैं। सोम देवों का धन मनुष्य को देते हैं। प्रदत्त धन की वृद्धि के लिए सोम की स्तुति की जाती है। अथ चतुर्थी—

श्रियेजातःश्रियआनिरियायश्रियंवयोजरितृभ्योदधाति।
श्रियंवसानाअमृतत्वमायन्भवन्तिसत्यासमिथामितद्रौ ॥ ४ ॥

श्रिये । जातः । श्रिये । आ । निः । इयाय । श्रियम् ।
वयः । जरितृऽभ्यः । दधाति । श्रियम् । वसानाः । अमृतऽत्वम् ।
आयन् । भवन्ति । सत्या । समऽइथा । मितऽद्रौ ॥ ४ ॥

ससोमः श्रियेजातः संपदर्थं प्रादुर्भूतोभवति । तदेवाह श्रिये श्र्यर्थएव आनिरियाय अंशुभ्य आभिमुख्येन निर्गच्छति निर्गतश्च ससोमः जरितृभ्यः स्तोतृभ्यः श्रियं वयोन्नं जीवनं चादधाति विदधाति प्रयच्छति । तेन दत्तांश्रियं वसाना आच्छादयन्तः स्तोतारः अमृतत्वं देवत्वं अमरणत्वं वा आयन् प्राप्नुवन् तस्मिन् मितद्रौ मितगमने सोमे समिथा युद्धनामैतत् सम्यक्प्राप्यते अत्रेति समीणइति । एतेः समपूर्वस्यथक्प्रत्ययः । तानि युद्धानि सत्या सत्यानि यथार्थानिभवन्ति नतुमिथ्यानि तेनसोमेन पराजितानिभवन्तीत्यर्थः ॥ ४ ॥

४. सम्पत्ति के लिए सोम अंशुओं (लता-प्रतान) से निकलते हैं। स्तोताओं को सोम अन्न और आयु प्रदान करते हैं। सोम से सम्पत्ति प्राप्त करके स्तोता लोगों ने अमरत्व प्राप्त किया। सोम से युद्ध यथार्थ होते हैं। अथ पञ्चमी—

इषमूर्जमभ्यर्षाश्वंगामुरुज्योतिःकृणुहिमात्तिंदेवान् ।
विश्वानिहिसुषहातानितुभ्यंपवमानबाधसेसोमशत्रून् ॥ ५ ॥ ४॥

इषम् । ऊर्जम् । अभि । अर्ष । अश्वम् । गाम् । उरु । ज्योतिः ।
कृणुहि । मत्सि । देवान् । विश्वानि । हि । सुऽसहा । तानि ।
तुभ्यम् । पवमान । बाधसे । सोम । शत्रून् ॥ ५ ॥ ४ ॥

हे सोम इषं अन्नं ऊर्जमन्नरसंच अस्मभ्यमभ्यर्ष अभिगमय । किंच अश्वं वाहनं गां पयःप्रदानेन यज्ञस्यसाधनभूतां गां च तथा उरु महत् ज्योतिः सूर्याख्यं कृणुहि जगदालोकनार्थंकुरु । किंच देवानिन्द्रादीन् मत्सि सोमेन तर्पय मदेर्लेटि बहुलंछन्दसीति विकरणस्यलुक् वाक्यभेदादनिघातः । अपिच हेसोम तुभ्यं तानि विश्वानि सर्वाणि रक्षांसि सुषहा सुसहानि अनायासेनैव अभिभवितुं शक्यानि भवन्ति । हिरवधारणे। अतएव हे पवमान पूयमान हेसोम सर्वान् शत्रून् बाधसे जहि ॥ ५ ॥

५. सोम, सम्पत्ति, बल, अश्व, गौ आदि दो। महान् ज्योति का विस्तार करो। इन्द्रादि देवों को तृप्त करो। सोम, तुम्हारे लिए सारे राक्षस पराजेय हैं। क्षरणशील सोम, सारे शत्रुओं को मारो।

॥ इति सप्तमस्य चतुर्थे चतुर्थोवर्गः ॥ ४ ॥

कनिक्रन्तीति पंचचैदशमंसूक्तं कण्वपुत्रस्य प्रस्कण्वस्यार्षं । तथानुक्रम्यते । कनिक्रन्तिप्रस्कण्वइति । पूर्ववच्छन्दोदेवते । गतोविनियोगः ।

कनिक्रन्तिहरिरासृज्यमानःसीदन्वनस्यजठरेपुनानः ।
नृभिर्यतःकृणुतेनिर्णिजंगाअतोमतीर्जनयतस्वधाभिः ॥ १ ॥

कनिक्रन्ति । हरिः । आ । सृज्यमानः । सीदन् । वनस्य ।
जठरे । पुनानः । नृऽभिः । यतः । कृणुते । निःऽनिजम् ।
गाः । अतः । मतीः । जनयत । स्वधाभिः ॥ १ ॥

आसृज्यमान आसमन्तात् विसृज्यमानोभिषूयमाणः हरिर्हरितवर्णः सोमः कनिक्रन्ति पुनःपुनः शब्दायते क्रन्देर्यङ्लुकि तिपीडभावे दाधर्तिदर्धर्ति इत्यादिनानिपातनादभ्यासस्य निगागमः अभ्यस्तस्वरः । तथा पुनानः पूयमानः वनस्य वननीयस्य द्रोणकलशस्य जठरे सीदन्नुपविशन् शब्दायते । किंच नृभिः कर्मनेतृभिर्ऋत्विग्भिः यतः संयतः सोमः गागोविकारान् क्षीरादीनि आच्छादयन् निर्णिजं आत्मनोरूपं । कृणुते महादिषु करोति अतोस्मै सोमाय मतीर्मननीयाः स्तुतीः स्वधाभिर्हविर्भिः सह जनयत स्तोतारोजनयन् । झस्यान्तादेशाभावश्छान्दसः । यद्वा हे स्तोतारः अस्मै सोमाय स्तुतीर्जनयत उत्पादयत कुरुतेतियावत् ॥ १ ॥

१. चारों ओर अभिषुत होनेवाले और हरित-वर्ण सोम शब्द करते हैं तथा शोधित होते-होते कलश के पेट में बैठते हैं। मनुष्यों के द्वारा संयत सोम दुग्ध में मिश्रित होकर अपने रूप को प्रकट करते हैं। इन सोम के लिए, स्तोताओ, हवि के साथ मननीय स्तुति उत्पन्न करो।

हरिःसृजानःपथ्यामृतस्येयर्तिवाचमरितेवनावम् ।
देवोदेवानांगुह्यानिनामाविष्कृणोतिबर्हिषिप्रवाचे ॥ २ ॥

हरिः । सृजानः । पथ्याम् । ऋतस्य । इयर्ति । वाचम् ।
अरिताऽइव । नावम् । देवः । देवानाम् । गुह्यानि । नाम ।
आविः । कृणोति । बर्हिषि । प्रऽवाचे ॥ २ ॥

सृजानः सृज्यमानः हरिर्हरितवर्णः सोमः ऋतस्य सत्यभूतस्य पथ्यां पथिभवांवाचं देवीं इयर्ति प्रेरयति । तत्रदृष्टान्तः—अरितेव जनान् तीरंप्रापयन् नाविकोयथा नावं प्रेरयति तद्वत् ऋगतौ जौहोत्यादिकः अर्तिपिपर्त्योरित्यभ्यासस्येत्वं । ततः देवोदीप्यमानः सोमः देवानां इन्द्रादीनां गुह्यानि अन्तर्हितानि नाम नामानि शरीराणि प्रवाचे प्रकर्षेणवाचयित्रे स्तोत्रे बर्हिषियज्ञे आविष्कृणोति स्तोतुमाविष्करोति ॥ २ ॥

२. जैसे नाविक नौका को चलाता है, वैसे ही बनाये जानेवाले और हरितवर्ण सोम सत्यरूप यज्ञ के उपयोगी वचन को प्रेरित करते हैं। दीप्यमान सोम इन्द्रादि देवों के अन्तर्हित शरीरों को यज्ञ में उत्तम वक्ता के लिए आविष्कृत करते हैं।

अपामिवेदूर्मयस्तर्तुराणाःप्रमनीषाईरतेसोममच्छ ।
नमस्यन्तीरुपचयंतिसंचाचविशन्त्युशतीरुशन्तम् ॥ ३ ॥

अपामऽइव । इत् । ऊर्मयः । तर्तुराणाः । प्र । मनीषाः । ईरते ।
सोमम् । अच्छ । नमस्यन्तीः । उप । च । यन्ति । सम् ।
च । आ । च । विशन्ति । उशतीः । उशन्तम् ॥ ३ ॥

अपामिव यथाउदकानामूर्मयस्त्वरन्ते इदितिपूरणः तद्वत् तर्तुराणाः कर्मणि देवानस्तोतुं त्वरमाणाः । तुरत्वरणे जौहोत्यादिकः यङ्लुगन्तस्यशानचिरूपं अभ्यासस्यअवर्णश्च रेफादेशश्छान्दसः अभ्यस्तस्वरः । तादृशाऋत्विजः मनीषामनसईशित्रीः स्तुतीः सोममच्छ सोमं प्रतिप्रेरते प्रेरयन्ति । नमस्यन्तीः नमस्यन्त्यः सोमं पूजयंत्यः सत्यः तमुपयन्तिच उपगच्छन्ति तमेवसंयन्तिच । चवायोगेप्रथमेतिननिघातः । ततउशतीः कामयमानाः स्तुतयः उशन्तंकामयमानंसोमं आविशंति च प्रविशन्ति च ॥ ३ ॥

३. स्तुति के लिए शीघ्रता करनेवाले ऋत्विक् लोग, जल-तरङ्ग के समान, मन को स्वामिनी स्तुतियों को सोम के लिए प्रेरित करते हैं। सोम की पूजा करनेवाली स्तुतियाँ सोम के पास जाती हैं। अभिलाषिणी स्तुतियाँ अभिलाषी सोम में प्रविष्ट होती हैं।

अथ चतुर्थी—

तंमर्मृजानंमहिषंनसानावंशुंदुहन्त्युक्षणंगिरिष्ठाम् ।
तंवावशानंमतयःसचन्तेत्रितोबिभर्तिवरुणंसमुद्रे ॥ ४ ॥

तम् । मर्मृजानम् । महिषम् । न । सानौ । अंशुम् । दुहन्ति ।
उक्षणम् । गिरिऽस्थाम् । तम् । वावशानम् । मतयः ।
सचन्ते । त्रितः । बिभर्ति । वरुणम् । समुद्रे ॥ ४ ॥

मर्मृजानं यज्ञैः परिचर्यमाणं महिषं न महिषाख्यंमृगमिव सानौ समुच्छ्रितेदेशे वर्तमानं उक्षणं कामानांसेक्तारं गिरिष्ठां अभिषवार्थं ग्रावसुनिष्ठितं तं तादृशं प्रसिद्धं अंशुं सोमं दुहन्ति ऋत्विजोदुहते । ग्रावाणंवत्साः ऋत्विजोदुहन्तीति तैत्तिरीयब्राह्मणं 1 तं तादृशं वावशानं कामयमानं सोमं मतयोमन्तव्याः स्तुतयः सचन्ते समवयन्ति सेवन्तेइतियावत् । ततः त्रितः त्रिषुस्थानेषु वर्तमानः इन्द्रः वरुणं शत्रूणांनिवारकमेनंसोमं समुद्रे अन्तरिक्षे बिभर्ति शत्रुवधार्थं धारयति यद्वा त्रितः त्रिषु स्थानेषु द्रोणाधवनीयपूतभृदाख्येषु कलशेषुस्थितःसोमः शत्रूणांनिवारकमिन्द्रं द्युलोकेबिभर्ति पोषयति ॥ ४ ॥

४. ऋत्विक् लोग सोम का शोधन करते हुए, महिष के समान, उन्नत देश में स्थित काम-वर्षक और अभिषव के लिए पत्थरों में स्थित उन प्रसिद्ध सोम को दूहते हैं। कामयमान सोम को मननीय स्तुतियाँ सेवित करती हैं। तीन स्थानों में वर्त्तमान इन्द्र शत्रु-निवारक सोम को अन्तरिक्ष में धारण करते हैं।

अथ पञ्चमी—

इष्यन्वाचंमुपवक्तेवहोतुःपुनानइन्दोविष्यामनीषाम् ।
इन्द्रश्चयत्क्षयथःसौभगायसुवीर्यस्यपतयःस्याम ॥ ५ ॥ ५ ॥

इष्यन् । वाचम् । उपवक्ताऽइव । होतुः । पुनानः । इन्दो
इति । वि । स्य । मनीषाम् । इन्द्रः । च । यत् । क्षयथः ।
सौभगाय । सुऽवीर्यस्य । पतयः । स्याम ॥ ५ ॥ ५ ॥

हे इन्दो सोम वाचं स्तुतिमिष्यन् प्रेरयन् होतुरुपवक्तेव यथा अध्वर्युः प्रतिगरंकुर्वन् प्रोत्साहयति तद्वत् स्तोतॄणां शंसनाय प्रोत्साहंकुर्वन् पुनानः पूयमानस्त्वं मनीषांबुद्धिं विष्य विमुंच । किंतु बुद्धिं धनप्रदानाभिमुखीं कुरु । किंच यथदाइन्द्रश्च त्वं सह यज्ञे क्षयथः निवसथः तदा

1 तै० सं० ६. २. ११. ।

स्तोतारोवयंसौभगाय सौभाग्याय स्याम। किंच सुवीर्यस्य शोभनवीर्योपेतस्य धनस्य पतयः स्वामिनः स्याम भवेम ॥ ५ ॥

५. सोम, जैसे स्तोत्र-प्रेरक उपवक्ता नामक पुरोहित होता को उत्साहित करता है, वैसे ही स्तोताओं के प्रशंसन के लिए क्षरणशील तुम बुद्धि को धनप्रदानाभिमुखी करो। जब तुम इन्द्र के साथ यज्ञ में रहते हो, तब हम स्तोता सौभाग्यशाली हों और शोभन वीर्यवाले धन के अधिपति हों।

॥ इति सप्तमस्य चतुर्थे पञ्चमोवर्गः ॥ ५ ॥

प्रसेनानीरिति चतुर्विंशत्यृचमेकादशंसूक्तं दिवोदासपुत्रस्य प्रतर्दनाख्यस्य राजर्षेरिदं त्रैष्टुभं पवमानसोमदेवताकं। तथाचानुक्रम्यते—प्रसेनानीश्चतुर्विंशतिर्दैवोदासिःप्रतर्दनइति। गतः सूक्तविनियोगः।

प्रसेनानीःशूरोअग्रेरथानांगव्यंनेतिहर्षतेअस्यसेना।
भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्यआसोमोवस्त्रारभसानिदत्ते ॥ १॥

प्र। सेनाऽनीः। शूरः। अग्रे। रथानाम्। गव्यन्। एति।
हर्षते। अस्य। सेना। भद्रान्। कृण्वन्। इन्द्रऽहवान्। सखिऽभ्यः।
आ। सोमः। वस्त्रा। रभसानि। दत्ते ॥ १ ॥

सेनानीः सेनानामग्रे उपनेताशूरः शत्रूणांबाधकः सोमः गव्यन् शत्रूणांगाइच्छन् यद्वा यजमानानां पश्वादिकमिच्छन् रथानामग्रे रथानांपुरतः प्रैति प्रकर्षेण संग्रामं गच्छति। अस्यसोमस्य सेनाच हर्षते हृष्यति वाक्यभेदादनिघातः। किंच सखिभ्यः समानख्यानेभ्यः यजमानेभ्यः इन्द्रहवान् तैःकृतान् इन्द्रस्याह्वानानि भद्रान् कल्याणानि यथार्थानिकृण्वन् कुर्वन् आहूतोहीन्द्रः सोमंपीत्वा कामान् प्रयच्छतीति। रभसानि इन्द्रस्य वेगेनागमनेनिमित्तानि वस्त्रा वस्त्राणि आच्छादकानि पयःप्रभृतीन्याश्रयणानि आदत्ते आगृह्णाति ॥ १ ॥

१. सेनापति और शत्रु-बाधक सोम शत्रुओं की गायें पाने की इच्छा से रथों के आगे युद्ध में जाते हैं। सोम की सेना प्रसन्न होती है। मित्र यजमानों के लिए इन्द्र के आह्वान को कल्याणकर बनाते हुए सोम उन दुग्ध आदि को ग्रहण करते हैं, जिनके लिए इन्द्र शीघ्र आते हैं।

समस्यहरिंहरयोमृजन्त्यश्वहयैरनिशितंनमोभिः।
आतिष्ठतिरथमिन्द्रस्यसखाविद्वाँएनासुमतिंयात्यच्छ॥ २ ॥

सम्। अस्य। हरिम्। हरयः। मृजन्ति। अश्वऽहयैः।
अनिऽशितम्। नमःऽभिः। आ। तिष्ठति। रथम्। इन्द्रस्य।
सखा। विद्वान्। एन। सुऽमतिम्। याति। अच्छ ॥ २ ॥

हरयः हरंत्यभिषुण्वन्ति सोममित्यृत्विजोंगुलयोवा हरिं हरितवर्णमस्य सोमस्य कारणमंशुं संमृजन्ति सम्यगभिषुण्वंति । ततः सोमः नमोभिः नामयितृभिः अश्वहयैर्व्याप्तैरपि अनिशितं असंस्कृतं अयुक्तमननुगतं रथं रमणसाधनमात्मीयं दशापवित्रं आतिष्ठति आसीदति । अनन्तरं इन्द्रस्य सखा सखिभूतः विद्वान् प्राज्ञः सोमः एना एतेन रथेन पवित्रेण सुमतिं शोभनस्तुतिकं स्तोतारं अच्छयाति अभिगच्छति अस्मिन्काले तेनक्रियमाणां स्तुतिमभिगच्छतीत्यर्थः ॥२॥

२. अँगुलियाँ सोम को हरित-वर्ण किरण का अभिषव करती हैं। व्याप्त रहने पर भी सोम अननुगत-रथ रूप दशापवित्र में ठहरते हैं। इन्द्र के मित्र और प्राज्ञ सोम पवित्र से शोभन स्तुतिवाले स्तोता के पास जाते हैं।

सनोदेवदेवतातेपवस्वमहेसोमप्सरसइन्द्रपानः ।
कृण्वन्नपोवर्षयन्द्यामुतेमामुरोरानोवरिवस्यापुनानः ॥ ३ ॥

सः । नः । देव । देवऽतातेे । पवस्व । महे । सोम । प्सरसे ।
इन्द्रऽपानः । कृण्वन् । अपः । वर्षयन् । द्याम् । उत । इमाम् ।
उरोः । आ । नः । वरिवस्य । पुनानः ॥ ३ ॥

हे देव द्योतमान हे सोम सदादृश इन्द्रपानः इन्द्रेणपातव्यस्त्वं नोस्माकं स्वभूते देवतातेे देवैस्तते विततेे यज्ञे महे महते प्सरसे भक्षणाय इन्द्रस्य पानाय पवस्व प्रहादिपुक्षर । किंच अपउदकानि कृण्वन् कुर्वन् उतापिच द्यामिमां द्यावापृथिव्यौ वर्षयन् भूमिं पर्जन्यरूपेण तर्पयति द्युलोकमग्निरूपेणेति । भूमिपर्जन्याजिन्वंतिदिवंजिन्वंत्यग्नयइतिश्रवणाद्। उरोः विस्तीर्णादन्तरिक्षात् आगच्छंस्त्वं पुनानः पूयमानःसन् नोस्मान् वरिवस्य धनादिप्रदानेन परिचरेति॥३॥

३. द्योतमान सोम, तुम इन्द्र के पीने की वस्तु हो। हमारे देव व्याप्त यज्ञ में इन्द्र के महान् पान के लिए क्षरित होओ। तुम जल-कर्त्ता और द्यावापृथिवी के अभिषेक्ता हो। विस्तृत अन्तरिक्ष से आगत और शोधित तुम हमें धनादि प्रदान करो।

अजीतयेहतयेपवस्वस्वस्तयेसर्वतातयेबृहते ।
तदुशन्तिविश्वइमेसखायस्तदहंवृणेपवमानसोम ॥ ४ ॥

अजीतये । अहतये । पवस्व । स्वस्तये । सर्वऽतातये ।
बृहते । तत् । उशन्ति । विश्वे । इमे । सखायः । तत् ।
अहम् । वृणे । पवमान । सोम ॥ ४ ॥

---

१ ऋ० सं० २. ३. २६.।

हे सोम अजीतये यथा वयंशत्रुभिरजिताभवेम तथा तेषामजयाय अहतये यथा तैरहताःस्याम तस्यैच अतएव स्वस्तये अविनाशाय। किंच बृहते सर्वतातये सर्वैरिन्द्रादिभिर्देवैःस्तूयमानाय यज्ञाय एतदर्थं पवस्व अस्मदभिमुखमागच्छ। पवि र्गतिकर्मा। विश्वे सर्वे इमे मदीयाः सखायः स्तोतारः तत् त्वदीयं रक्षणमुशन्ति कामयन्ते। हे पवमानसोम तद्रक्षणं अहमपि वशि कामये ॥ ४ ॥

४. सोम, हमारे अपराजय, अविनाश और यज्ञ के लिए सामने आओ। मेरे सारे मित्र स्तोता तुम्हारा रक्षण चाहते हैं। पवमान सोम, मैं भी तुम्हारा रक्षण चाहता हूँ। अथ पंचमी—

सोमः॑पवतेजनि॒ताम॑तीनांज॑नि॒तादि॒वोज॑नि॒तापृ॑थि॒व्याः।
ज॒नि॒ताग्नेर्ज॑नि॒तासूर्य॑स्यजनि॒तेन्द्र॑स्यजनि॒तोतविष्णोः॑ ॥ ५ ॥ ६॥

सोमः॑। प॒व॒ते॒। ज॒नि॒ता। म॒ती॒नाम्। ज॒नि॒ता। दि॒वः।
ज॒नि॒ता। पृ॒थि॒व्याः। ज॒नि॒ता। अग्नेः॑। ज॒नि॒ता। सूर्य॑स्य।
ज॒नि॒ता। इन्द्र॑स्य। ज॒नि॒ता। उ॒त। विष्णोः॑ ॥ ५ ॥ ६ ॥

सोमः अभिषूयमाणः पवते पात्रेषु क्षरति। कीदृशः मतीनां बुद्धीनां यद्वा मननीयानां स्तुतीनां जनिता जनयिता। जनिवामंत्रइति निपातनाण्णिलोपः। किंच दिवोद्युलोकस्य जनिता प्रादुर्भावयिता। तथा पृथिव्या जनयिता अग्नेर्जनयिता प्रकाशयिता सूर्यस्य सर्वस्यप्रेरकस्यादित्यस्य जनिता इन्द्रस्यजनिता पानेन मदस्य जनयिता। उतापिच विष्णोः व्यापकस्य जनिता जनयिता एतत्सर्वं सोमेभिषूयमाणे भवतीति सोमोहि देवानाप्याययतीति ॥ ५ ॥

५. सोम क्षरित होते हैं। सोम स्तुति, द्युलोक, पृथिवी, अग्नि, प्रेरक सूर्य, इन्द्र और विष्णु के जनक हैं।

॥ इति सप्तमस्य चतुर्थे षष्ठोवर्गः ॥ ६ ॥

देवसुवां हविष्षु सोमस्य वनस्पतेर्ब्रह्मादेवानामितियाज्या। सूत्र्यतेच—त्वंचसोमनोवशो ब्रह्मादेवानांपदवीःकवीनामिति।

सैषा सूक्ते षष्ठी—

ब्र॒ह्मादे॒वानां॑पद॒वीः क॑वी॒नामृ॒षिर्विप्रा॑णांमहि॒षोमृ॒गाणा॑म्।
श्ये॒नोगृ॒ध्राणां॒स्वधि॑ति॒र्वना॑नां॒सोमः॑प॒वित्र॒मत्ये॑ति॒रेभ॑न् ॥ ६ ॥

ब्रह्मा । देवानाम् । पदऽवीः । कवीनाम् । ऋषिः । विप्राणाम् ।
महिषः । मृगाणाम् । श्येनः । गृध्राणाम् । स्वऽधितिः । वनानाम् ।
सोमः । पवित्रम् । अति । एति । रेभन् ॥ ६ ॥

सोमएवंरूपोभवति देवानां स्तोत्रकारिणामृत्विजां ब्रह्मा ब्रह्माख्यर्त्विक्स्थानीयोभवति यद्वा देवानां द्योतमानानामिन्द्रादीनां ब्रह्मा राजाभवति । तथा कवीनां क्रान्तप्रज्ञानां पदवीः स्वलन्ति पदानि साधुत्वेन योयोजयति सपदवीः । वीगत्यादिष्वित्येतस्माद्विक्विपि रूपं । तथा विप्राणां मेधाविनांमध्ये ऋषिर्भवति । यः परोक्षंपश्यति सऋषिः । ऋषिर्दर्शनादिति । मृगाणां महिषोभवति महिषाख्योबलवान् राजाभवति । तथा गृध्राणां पक्षिविशेषाणां श्येनः शंसनीयः पक्षिराजोभवति । वनानां वनतिर्हिंसाकर्मा । हिंसकानां छेदकानांमध्ये स्वधितिः एतन्नामकः छेदकोसि । एवंप्रभावः सोमः रेभन् शब्दायमानःसन् पवित्रमूर्णास्तुकेन छतमत्येति अतिक्रमच्छति ॥ ६ ॥

६. सोम देव-स्तोता पुरोहितों के ब्रह्मा, कवियों के शब्दविन्यास-कर्त्ता, मेधावियों के ऋषि, वन्य प्राणियों के महिष, पक्षियों के राजा और अस्त्रों के स्वधिति नामक अस्त्र हैं। शब्द करते हुए सोम पवित्र का अतिक्रम करते हैं। अथ सप्तमी—

प्रावीविपद्वाचऊर्मिंनसिन्धुर्गिरःसोमःपवमानोमनीषाः ।
अन्तःपश्यन्वृजनेमावराण्यातिष्ठतिवृषभोगोषुजानन् ॥ ७ ॥

प्र । अवीविपत् । वाचः । ऊर्मिम् । न । सिन्धुः । गिरः । सोमः ।
पवमानः । मनीषाः । अन्तरिति । पश्यन् । वृजना । इमा ।
अवराणि । आ । तिष्ठति । वृषभः । गोषु । जानन् ॥ ७ ॥

पवमानः सोमः मनीषाः मनसईशिताः हृदयंगमाः गिरः स्तुतीः प्रावीविपत् प्रकर्षेणाऽवपयति प्रेरयति । कथमिव सिन्धुः स्यन्दमानानदीव वाचः शब्दस्य ऊर्मिंन संघंयथा प्रेरयति तद्वत् । किंच वृषभः कामानामुदकानांवा वर्षकः सोमः अन्तः अन्तर्हितं वस्तुजातं पश्यन् अवराणि दुर्बलैर्वारयितुमशक्यानि इमा वृजना इमानि बलानि आतिष्ठति आसीदति। किंकुर्वन् गोषुजानन् गवांजानानःसन् परबलानि प्रविशति ॥ ७ ॥

७. पवमान सोम तरङ्गायित नदी के समान हृदयङ्गम स्तुतिवाक्य के प्रेरक हैं। काम-वर्षक और गोज्ञाता सोम अन्तर्हित वस्तुओं को देखते हुए दुर्बलों के न रोकने योग्य बल पर अधिष्ठित रहते हैं।

समत्सरःपृत्सुवन्वन्नवातःसहस्ररेताअभिवाजमर्ष ।
इन्द्रायेन्दोपवमानोमनीष्यंशोरूर्मिमीरयगाइषण्यन् ॥ ८ ॥

सः । मत्सरः । पृत्ऽसु । वन्वन् । अवातः । सहस्रंऽरेताः । अभि ।
वाजम् । अर्ष । इन्द्राय । इन्दो इति । पवमानः । मनीषी ।
अंशोः । ऊर्मिम् । ईरय । गाः । इषण्यन् ॥ ८ ॥

मत्सरोमदकरः पृत्सुसंग्रामेषु वन्वन् शत्रून्हिंसन् अतएव अवातः अन्यैर्गन्तुमशक्यः सहस्ररेताः सहस्रोदकधारोपेतः ससोमः वाजं शत्रूणांबलमभ्यर्ष अभिगच्छ । हे इन्दो सोम पवमानः पूयमानः मनीषी प्राज्ञस्त्वं गाइषण्यन् शब्दान् प्रेरयन् । यद्वा यजमानानां यज्ञसाधनभूताः गाःप्रेरयन् इन्द्राय इन्द्रार्थं अंशोरभिषूयमाणस्यसोमस्य ऊर्मिं संघमीरय प्रेरय ॥ ८ ॥

८. सोम, तुम मदकर, युद्ध में शत्रुहन्ता, अगम्य और असीम जल-युक्त हो। शत्रुओं के बल को अधिकृत करो। सोम, तुम प्राज्ञ हो। तुम गायों को प्रेरित करते हुए अपनी अंशु-तरङ्ग इन्द्र के प्रति भेजो।

परिप्रियःकलशेदेववातइन्द्रायसोमोरण्योमदाय ।
सहस्रंधारःशतवाजइन्दुर्वाजीनसप्तिःसमनाजिगाति ॥ ९ ॥

परि । प्रियः । कलशे । देवऽवातः । इन्द्राय । सोमः । रण्यः ।
मदाय । सहस्रंऽधारः । शतऽवाजः । इन्दुः । वाजी ।
न । सप्तिः । समना । जिगाति ॥ ९ ॥

प्रियः प्रीणयिता अतएव देववातः देवैरभिगतः रण्यः रमणीयः सोमः इन्द्राय इन्द्रस्य मदाय मदार्थं कलशे द्रोणाभिधाने परिजिगाति परिगच्छति । कीदृशः सहस्रधारोबहुविधधारोपेतः शतवाजः बहुबलः इन्दुः पात्रेषु क्षरन् । तत्रदृष्टान्तः—वाजीन यथावाजी बलवान् सप्तिरश्वः समना संग्रामनामैतत् समष्टमअवैकुव्ये । समन्ति पृष्टाभवन्ति योद्धारोत्रेति तस्मिन्संग्रामे यथाश्वोजिगाति गच्छति तद्वत् ॥ ९ ॥

९. सोम प्रसन्नता-दायक हैं; रमणीय हैं। उनके पास देव लोग जाते हैं। अनेक धाराओंवाले, बहुबल और पात्रों में क्षरणशील सोम इन्द्र के मद के लिए द्रोण-कलश में उसी प्रकार जाते हैं, जिस प्रकार युद्ध में बली अश्व जाता है। अथ दशमी—

सपूर्व्योवसुविज्जायमानोमृजानोअप्सुदुदुहानोअद्रौ ।
अभिशस्तिपाभुवनस्यराजाविदद्गातुंब्रह्मणेपूयमानः ॥ १० ॥७ ॥

सः । पूर्व्यः । वसुऽवित् । जायमानः । मृजानः । अप्ऽसु ।
दुदुहानः । अद्रौ । अभिशस्तिऽपाः । भुवनस्य । राजा ।
विदत् । गातुम् । ब्रह्मणे । पूयमानः ॥ १० ॥ ७ ॥

पूर्व्यः पुराणः यद्वा पूर्वैःकृतोभिषुतः वसुवित् धनानांलंभकः जायमानः अप्सु वसतीवर्याख्येषूदकेषु मृजानोमृज्यमानःअद्रौ अभिषवग्रावणि दुदुहानोदुह्यमानः अभिशस्तिपाः अभितः शस्तिर्हिंसा येषां तेअभिशस्तयः शत्रवः तेभ्यः परिरक्षकः भुवनस्य भूतजातस्य राजा स्वामी एवंविधः सतादृशः सोमः ब्रह्मणे कर्मार्थं पूयमानः सन् गातुं मार्गं समीचीनं विदत् यजमानेभ्यः प्रयच्छति ॥ १० ॥

१०. प्राचीन, धनाधिपति, जन्म के साथ जल में शोधित, अभिषव-प्रस्तर पर निष्पीड़ित, शत्रुओं से रक्षक, प्राणियों के राजा और कर्म के लिए क्षरणशील सोम यजमान को समीचीन मार्ग बताते हैं।

॥ इति सप्तमस्य चतुर्थे सप्तमोवर्गः ॥ ७ ॥

महापितृयज्ञेपितरः सोमवन्तइत्यस्य द्वितीयानुवाक्या त्वयाहिनःपितरइत्येषा। सूत्रितंच—पितरोग्निष्वात्तायम उदीरतामवरउत्परासस्त्वयाहिनःपितरःसोमपूर्वइति ।

त्वयाहिनःपितरःसोमपूर्वेकर्माणिचक्रुःपवमानधीराः
वन्वन्नवातःपरिधीँरपोर्णुवीरेभिरश्वैर्मघवाभवानः ॥ ११ ॥

त्वया । हि । नः । पितरः । सोम । पूर्वे । कर्माणि । चक्रुः ।
पवमान । धीराः । वन्वन् । अवातः । परिऽधीन् । अप । ऊर्णु ।
वीरेभिः । अश्वैः । मघऽवा । भव । नः । ॥ ११ ॥

हे पवमान पूयमानसोम धीराः कर्मणिकुशलाः प्राज्ञाः नोस्माकं पितरः पूर्वे पुरातनाः अंगिरसस्त्वया हिस्वधारणे त्वयासहायेनैवकर्माणि अग्निष्टोमादीनि चक्रुः कृतवन्तः। किंच वन्वन् स्तोतॄन् संभजन्। यद्वा वनतिर्हिंसार्थः। शत्रून् हिंसन् अवातः तैरभिगतस्त्वंवीरेभिर्वेगवद्भिः अश्वैः व्यापकैः परिधीन् परिधीयते एभिः सर्वमिति परिधयोराक्षसाःतान् अपोर्णु अपोर्णुहि अपच्छादय जहीतियावत्। ऊर्णोतेर्लोटिछान्दसोहेर्लुक्। एतादृशस्त्वं नोस्माकं मघवा इन्द्रोभव भूयाः। पुत्रादियुक्तं धनं प्रयच्छेत्यर्थः ॥ ११ ॥

११. पवमान सोम, हमारे कर्मकुशल पूर्वजों ने, तुम्हारी सहायता से अग्निष्टोमादि कर्म किये थे। वेगवान् अश्वों की सहायता के द्वारा तुम शत्रुओं को मारते हो। राक्षसों को हटाओ। तुम हमारे इन्द्र बनो—धन दो।

अथ द्वादशी—

यथापवथामनवेवयोधाअमित्रहावरिवोविद्धविष्मान् ।
एवापवस्वद्रविणंदधानइन्द्रेसंतिष्ठजनयायुधानि ॥ १२ ॥

यथा । अपवथाः । मनवे । वयःऽधाः । अमित्रऽहा । वरिवःऽवित् ।
हविष्मान् । एव । पवस्व । द्रविणम् । दधानः । इन्द्रे ।
सम् । तिष्ठ । जनय । आयुधानि ॥ १२ ॥

हे सोम यथा पुरा त्वं मनवेराज्ञे वयोधाः अन्नस्यधाता तथा अमित्रहा शत्रूणांहन्ता वरिवोवित् धनस्यलंभयिता हविष्मान् पुरोडाशादियुक्तःसन् अपवथाः तस्मैधनादिकं प्रदातुंयथागच्छः एव एवमस्मभ्यमपि द्रविणं धनं दधानः प्रयच्छन् पवस्व अस्मदभिमुखमागच्छ।किंच अस्माभिर्दीयमानस्त्वं इन्द्रेसन्तिष्ठ सम्यक्तिष्ठ। अपिच आयुधानि त्वदीयानि जनय तस्मै प्रकाशय वाक्यभेदादनिघातः ॥ १२ ॥

१२. प्राचीन काल में जैसे तुम राजा मनु के लिए अन्न-धारक हुए थे, शत्रुओं का संहार किया था और धन, पुरोडाश आदि से युक्त होकर उनको धन-प्रदान करने के लिए आये थे, वैसे हमें भी धन देने के लिए पधारो, इन्द्र का आश्रय करो और उन्हें अस्त्र दो।

पवस्वसोममधुमाँऋतावापोवसानोअधिसानोअव्ये ।
अवद्रोणानिघृतवान्तिसीदमदिन्तमोमत्सरइन्द्रपानः ॥ १३ ॥

पवस्व । सोम । मधुऽमान् । ऋतऽवा । अपः । वसानः ।
अधि । सानौ । अव्ये । अव । द्रोणानि । घृतऽवन्ति ।
सीद । मदिन्ऽतमः । मत्सरः । इन्द्रऽपानः ॥ १३ ॥

हे सोम मधुमान् मदकररसोपेतः ऋतावा यज्ञवान् छन्दसीवनिपाविति वनिप् मत्वर्थीयः तादृशस्त्वं अपोवसतीवरीरेकधनाश्च वसानः आच्छादयन् अधि अधिकं सानौ समुच्छ्रिते अव्ये अविमये पवित्रे पवस्व क्षर। ततोमदिन्तमः अतिशयेनमदकरः इन्द्रपानः इन्द्रेणपातव्योमत्सरोमादयिता सोमः घृतवन्ति उदकवन्ति द्रोणानि द्रोणकलशान् अवसीद अवतिष्ठस्व॥१३॥

१३. सोम, तुम मदकर रसवाले और याज्ञिक हो। जल में मिश्रित होकर उन्नत मेषलोममय पवित्र में क्षरित होओ। अतीव मदकर इन्द्र के पीने योग्य और मादक सोम, जलवाले द्रोणकलश में ठहरो।

वृष्टिंदिवःशतधारःपवस्वसहस्रसावाजयुर्देववीतौ ।
संसिन्धुभिःकलशेवावशानःसमुस्रियाभिःप्रतिरन्नआयुः ॥ १४ ॥

वृष्टिम् । दिवः । शतऽधारः । पवस्व । सहस्रऽसाः । वाजऽयुः ।
देवऽवीतौ । सम् । सिन्धुऽभिः । कलशे । वावशानः ।
सम् । उस्रियाभिः । प्रऽतिरन् । नः । आयुः ॥ १४ ॥

हेसोम शतधारः बहुधोदकधारोपेतस्त्वं दिवोन्तरिक्षादादित्याद्वा वृष्टिंपवस्व कुरु । यद्वा शतधारः बहुधात्मीयधारोपेतस्त्वं दिवोद्योतमानात् पवित्रात् वृष्टिमविच्छिन्नधारां पवस्व पात्रेषुकुरु । कीदृशः देववीतौ देवानांवीतिः हविर्भक्षणं यस्मिन् सदेववीतिर्यज्ञः । तस्मिन् सहस्रसाः यजमानानां सहस्रस्य धनस्यदाता वाजयुः तेषामन्नंकामयमानस्त्वं सिन्धुभिः स्यन्दमानाभिः वसतीवरीभिः कलशेद्रोणाभिधानेसंवावशानः संगच्छस्व । तथात्वं नोस्माकमायुर्जीवनं प्रतिरन्वर्धयन् उस्रियाभिः गोविकारैः क्षीरादिभिश्च कलशे संगच्छस्व ॥ १४ ॥

१४. सोम, तुम यज्ञ में यजमानों को विविध प्रकार के धन देनेवाले, अन्नकामी और अनेक धाराओंवाले हो। आकाश से वृष्टि बरसाओ और जल तथा दुग्ध के साथ, हमारे जीवन को बढ़ाते हुए, द्रोणकलश में क्षरित होओ। अथ पंचदशी—

एषस्यसोमोमतिभिःपुनानोत्यो॒नवा॒जीतर॒तीदरा॑तीः ।
पयो॒नदु॒ग्धमदि॑तेरिषि॒रमु॒र्विवगा॒तुःसु॒यमो॒नवोह्वा॑ ॥ ८ ॥

एषः । स्यः । सोमः । मतिऽभिः । पुनानः । अत्यः । न । वाजी ।
तरति । इत् । अरातीः । पयः । न । दुग्धम् । अदितेः । इषिरम् ।
उरुऽइव । गातुः । सुऽयमः । न । वोह्वा ॥ १५ ॥ ८ ॥

एषस्यः एतादृशः सोमः मतिभिर्मननसाधनैः स्तोत्रैः पुनानः पूयमानोभवति । यः सोमः अत्योन अवनशीलोवाजी अश्वइव संग्रामे अरातीः अरातीन् शत्रून् तरति इदवधारणे तरत्येव हिनस्त्येव । यद्वृत्तयोगादनिघातः । किंच अदितेर्गोनामैतत् अदीनायाः गोः इषिरं अन्वेषणीयं दुग्धंपयोन क्षीरं यथा पूतं भवति एवं सोमः परिशुद्धः । अपिच उर्वीव सुपांसुलुगिति सोर्लुक् । उरुविस्तीर्णो गातुः मार्गइव सर्वैः समाश्रयणीयः तथा वोह्वान वोढाअश्वइव सुयमः सुखनियन्तुं शक्योयथाभवति तद्वदयंसोमः सोतृभिर्नियन्तव्योभवति ॥१५॥

१५. ऐसे सोम स्तोत्रों से शोधित होते हैं। सोम गमनशील अश्व के समान शत्रुओं के पार जाते हैं। ये अदीन गौ के दूध के समान परिशुद्ध हैं। विस्तीर्ण मार्ग के समान सबके आश्रयणीय हैं। वाहक अश्व के समान सोम स्तोत्रों के द्वारा नियन्त्रण में आते हैं।

॥ इति सप्तमस्य चतुर्थोऽष्टमोवर्गः ॥ ८ ॥

स्वायुधःसोतृभिःपूयमानोभ्यर्षगुह्यंचारुनाम ।
अभिवाजंसप्तिरिवश्रवस्याभिवायुमभिगादेवसोम ॥ १६ ॥

सुऽआयुधः । सोतृऽभिः । पूयमानः । अभि । अर्ष । गुह्यम् ।
चारु । नाम । अभि । वाजम् । सप्तिःऽइव । श्रवस्या ।
अभि । वायुम् । अभि । गाः । देव । सोम ॥ १६ ॥

स्वायुधः शोभनायुधोपेतः । यद्वा यज्ञे स्फ्यकपालादीनि दशायुधानिसन्ति तद्वान् सोतृभिरभिषुण्वद्भिः पूयमानस्त्वं गुह्यं गुहायांनिहितं चारु कमनीयंनाम त्वदीयं रसात्मकंशरीरं स्तुतिभिः सहाभ्यर्ष कलशादीन्यभिगमय । किंच सप्तिरिव अश्वइव वर्तमानस्त्वं श्रवस्या । सुपांसुलुगिति सप्तम्याआजादेशः । अस्मदीयायामन्नेच्छायां वाजं अन्नमस्मभ्यमभिगमय । अपिच हेदेवस्तोतव्य हेसोम वायुं प्राणं जीवनं अभिगमय गाः पशूंश्च अस्मभ्यमभिगमय ॥ १६ ॥

१६. शोभन आयुधवाले और ऋत्विकों के द्वारा शोधित सोम अपनी गुह्य और रमणीय मूर्त्ति को धारण करो। अश्व के समान वर्त्तमान तुम हमारी अन्नाभिलाषा के लिए हमें अन्न दो। देव सोम, हमें आयु और पशु दो। अथ सप्तदशी—

शिशुंजज्ञानंहर्यतंमृजन्तिशुंभन्तिवह्निंमरुतोगणेन ।
कविर्गीर्भिःकाव्येनाकविःसन्त्सोमःपवित्रमत्येतिरेभन् ॥ १७ ॥

शिशुम् । जज्ञानम् । हर्यतम् । मृजन्ति । शुंभन्ति । वह्निम् ।
मरुतः । गणेन । कविः । गीःऽभिः । काव्येन । कविः । सन् ।
सोमः । पवित्रम् । अति । एति । रेभन् ॥ १७ ॥

शिशुं इदानीमुत्पन्नत्वात् शिशुवदतिष्ठन्तं यद्वा पापानि तनूकुर्वन्तं विनाशयन्तंजज्ञानं प्रादुर्भूतं अतएवहर्यतं हर्यगतिकान्त्योः । भृमृदृशीत्यादिनाअतच् । सर्वैःकाम्यमानं सोमं मृजन्ति मरुतः शोधयन्ति । किंच वह्निं वोढारं सोमं गणेनात्मीयेन सप्तसंख्याकेनगणेन शुंभन्ति अलंकुर्वन्ति । ततः कविः क्रान्तप्रज्ञः सोमः काव्येन कविकर्मणैव कविः शब्दोपेतःसन् रेभन् शब्दायमानः गीर्भिः स्तुतिभिः सह पवित्रं अत्येति अतीत्यगच्छति ॥ १७ ॥

१७. मरुत् लोग, शिशु के समान, प्रकट और सबके अभिलषणीय सोम को शोधित करते हैं। ये वाहक सोम को सप्तसंख्यक गण के द्वारा अलंकृत करते हैं। क्रान्तकर्मा और कवि-कार्य के द्वारा कविशब्द-वाच्य सोम, शब्द करते हुए, स्तुति के साथ पवित्र को लांघकर जाते हैं।

अथाष्टादशी—

ऋषिमनायऋषिकृत्स्वर्षाःसहस्रणीथःपदवीःकवीनाम् ।
तृतीयंधाममहिषःसिषासन्त्सोमोविराजमनुराजतिष्टुप् ॥ १८ ॥

ऋषिऽमनाः । यः । ऋषिऽकृत् । स्वःऽसाः । सहस्रऽनीथः ।
पदऽवीः । कवीनाम् । तृतीयम् । धाम । महिषः । सिसासन् ।
सोमः । विऽराजम् । अनु । राजति । स्तुप् ॥ १८ ॥

ऋषिमनाः सर्वदर्शनशीलमनस्कः अतएव ऋषिकृत् सर्वस्य दर्शनकर्ता प्रकाशनस्यकर्ता स्वर्षाः सर्वस्यसूर्यस्य वा संभक्ता सहस्रणीथः नीथा स्तुतिः बहुविधस्तुतिकः कवीनां क्रान्तप्रज्ञानांमध्ये पदवीः स्खलतांपदानां साधुत्वेन संयोजयिता यः सोमोविद्यते समहिषो महान् पूज्योवा सोमः तृतीयंधाम द्युलोकं सिषासन् संभक्तुमिच्छन् स्तुप् स्तूयमानःसन् विराजं विशेषेणराजन्तं दीप्यमानमिन्द्रं अनुराजति प्रकाशयति ॥ १८ ॥

१८. ऋषियों के समान मनवाले, सबको देखनेवाले, सूर्य के संभक्त, अनेक स्तुतियोंवाले, कवियों में शब्द-विन्यास-कर्त्ता और पूज्य सोम द्युलोक में रहने की इच्छा करते हुए, स्तुत होते हुए और विराजमान इन्द्र को प्रकाशित करते हैं।

चमूषच्छ्येनःशकुनोविभृत्वागोविन्दुर्द्रप्सआयुधानिबिभ्रत् ।
अपामूर्मिंसचमानःसमुद्रंतुरीयंधाममहिषोविवक्ति ॥ १९ ॥

चमूऽसत् । श्येनः । शकुनः । विऽभृत्वा । गोऽविन्दुः ।
द्रप्सः । आयुधानि । बिभ्रत् । अपाम् । ऊर्मिम् । सचमानः ।
समुद्रम् । तुरीयम् । धाम । महिषः । विवक्ति ॥ १९ ॥

चमूषत् चमन्ति भक्षयंत्यत्रेति चम्वश्चमसाः तेषु सीदन् यद्वा चम्वौ अधिषवणफलके तयोर्वर्तमानः श्येनः शंसनीयः शकुनः शक्तः सामर्थ्यकारी विभृत्वा हरतेः आतोमनिन्नित्यादिनाक्वनिप् । पात्रेषु विहरणशीलः गोविन्दुः यजमानानां गवां लंभकः विन्दुरिच्छुरिति उमत्ययान्तत्वेननिपातितः द्रप्सः द्रवणशीलः आयुधानि स्फ्यकपालादीनि बिभ्रत् धारयन् अपामुदकानामूर्मिं प्रेरकं समुद्रं अन्तरिक्षनामैतत् अन्तरिक्षलोकं सचमानः सेवमानः महिषोमहान् यएवंविधः सोमः ससोमः तुरीयं चतुर्थंधाम चान्द्रमसंस्थानं विवक्ति सेवते । सूर्यलोकस्योपरि

चंद्रमसोलोकोवियतेइति—यमःपृथिव्याअधिपतिःसमावत्वित्यादिभिः चन्द्रमानक्षत्राणामधिपतिः समावत्वित्यन्तैर्मंत्रैर्गीयते ॥ १९ ॥

१९. अभिषवण-फलकों पर वर्तमान, प्रशंसनीय, समर्थ, पात्रों में विहरण करनेवाले, आयुधों का धारण करनेवाले, जलप्रेरक, अन्तरिक्ष का सेवन करनेवाले और महान् सोम चतुर्थचन्द्र-धाम का सेवन करते हैं।

मर्योनशुभ्रस्तन्वंमृजानोत्योनसृत्वासनयेधनानाम् ।
वृषेवयूथापरिकोशमर्षन्कनिक्रदच्चम्वो३राविवेश ॥ २० ॥ ९ ॥

मर्यः । न । शुभ्रः । तन्वम् । मृजानः । अत्यः । न । सृत्वा । सनये । धनानाम् । वृषाऽइव । यूथा । परि । कोशम् । अर्षन् । कनिक्रदत् । चम्वोः । आ । विवेश ॥ २० ॥ ९ ॥

शुभ्रोदीप्यमानोलंकृतः मर्योन मनुष्यइव तन्वमात्मीयंशरीरं मृजानः वसतीवरीभिःशोधयन किंच धनानां सनये संभजनाय लाभाय अत्योन अतनशीलोश्वइव सृत्वा सरणशीलः अपिच वृषेव वृषा यथा यूथा यूथानि प्रतिगच्छन् शब्दंकरोति तद्वत् कोशं अधिषवणचर्मणा कृतंपात्रं परि अर्षन् प्रतिगच्छन् सोमः कनिक्रदत् पुनःपुनः शब्दं कुर्वन् चम्वोः अधिषवणफलकयोराविवेश आविशति । कनिक्रदत् क्रदेर्यङ्लुकि दाधर्तिदर्धर्तीत्यादिनानिपातनादभ्यासस्य निगागमः तस्यशतरि अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ २० ॥

२०. अलंकृत मनुष्य के समान, अपने शरीर के शोधक, धनदान के लिए वेगवान् अश्व के समान चलनेवाले, वृषभ के समान शब्द करनेवाले और पात्र में जानेवाले सोम, शब्द करते हुए, अभिषवण-फलकों पर बैठते हैं। ॥ इति सप्तमस्य चतुर्थे नवमोवर्गः ॥ ९ ॥

अथैकविंशी—

पवस्वेन्दोपवमानोमहोभिःकनिक्रदत्परिवाराण्यर्ष ।
क्रीळंश्चम्वो३राविशपूयमानइन्द्रंतेरसोमदिरोममत्तु ॥ २१ ॥

पवस्व । इन्दो इति । पवमानः । महःऽभिः । कनिक्रदत् । परि । वाराणि । अर्ष । क्रीळन् । चम्वोः । आ । विश । पूयमानः । इन्द्रम् । ते । रसः । मदिरः । ममत्तु ॥ २१ ॥

---

१ तै० सं० ३. ४. ५ ।

हे इन्दो सोम महोभिः पूजकैर्ऋत्विग्भिः पवमानः पूयमानस्त्वं पवस्व । ततः कनिक्रदत् भृशंशब्दंकुर्वन् वाराणि अवेर्वालानि पवित्राणि पर्यर्ष परिगच्छ ।किंच पूयमानस्त्वं चम्वोरधिषवणफलकयोः क्रीळन् संक्रीडमानःसन् आविश पात्राणि प्रविश । अनन्तरं मदिरः मदकरस्ते त्वदीयोरसःइन्द्रं मत्सतु मोदयतु माद्यतेः बहुलंछन्दसीतिश्लुः ॥ २१ ॥

२१. सोम, ऋत्विकों के द्वारा शोधित होकर तुम क्षरित होओ। बार-बार शब्द करते हुए मेषलोममय पात्र में जाओ। अभिषवण-फलकों पर क्रीड़ा करते हुए पात्रों में पैठो। तुम्हारा मदकर रस इन्द्र को प्रमत्त करे।

प्रास्यधारांबृहतीरसृग्रन्नक्तोगोभिःकलशाँआविवेश ।
सामंकृण्वन्त्सामन्योविपश्चित्क्रन्दन्नेत्यभिसख्युर्नजामिम् ॥२२॥

प्र । अस्य । धाराः । बृहतीः । असृग्रन् । अक्तः । गोभिः । कलशान् ।
आ । विवेश । साम । कृण्वन् । सामन्यः । विपःऽचित् । क्रन्दन् ।
एति । अभि । सख्युः । न । जामिम् ॥ २२ ॥

अस्य सोमस्य बृहतीर्बृहत्योमहत्योधाराः प्रासृग्रन् प्रसृज्यन्ते सृजेः कर्मार्थेलङि व्यत्ययेन झेरनादेशः बहुलंछन्दसीति रुडागमः ।ततः सोयंसोमः गोभिर्गोविकारैः क्षीरादिभिः अक्तःसन् कलशान् द्रोणाभिधानान् आविवेश आविशति । साम सामानि कृण्वन् कुर्वन् सोमः सामन्यः सामगानकुशलः सुष्ठुशब्दायमानइत्यर्थः विपश्चित् सर्वज्ञानानः सोमः क्रन्दन् देवानाह्वयन् अभ्येति ग्रहादीनि त्वरया अभिगच्छति । तत्रदृष्टान्तः—सख्युर्न सख्युर्जामिं जायां यथा इतरोलंपटोवेगेनाभिगच्छति तद्वत् ॥ २२ ॥

२२. सोम की महती धारायें बनाई जा रही हैं। गोरस से मिश्रित होकर सोम द्रोण-कलश में गये। सोम गान करने में कुशल हैं; इसलिए गाते हुए विद्वान् सोम वैसे ही पात्रों में जाते हैं, जैसे लम्पट मनुष्य अपने मित्र की स्त्री के पास जाता है।

अपघ्नन्नेषिपवमानशत्रूंन्प्रियांनजारोअभिगीतइन्दुः ।
सीदन्वनेषुशकुनोनपत्वासोमःपुनानःकलशेषुसत्ता ॥ २३ ॥

अपऽघ्नन् । एषि । पवमान । शत्रून् । प्रियाम् । न । जारः ।
अभिऽगीतः । इन्दुः । सीदन् । वनेषु । शकुनः । न । पत्वा ।
सोमः । पुनानः । कलशेषु । सत्ता ॥ २३ ॥

हे पवमान पूयमान सोम अभिगीतः स्तोतृभिरभिष्टुतः इन्दुः पात्रेषु क्षरन् त्वंशत्रूनपघ्नन् अपहिंसन् एषि आगच्छसि । कथमिव जारः प्रियांन प्रियतमामसतींस्त्रीं अन्यान् बाध-

मानःसन् यथाभिगच्छति तद्वत् । पत्वा पतनशीलः शकुनोन यथा शकुनोवनेषु वृक्षेषु सीदन् भवति तद्वत् पतनशीलः पुनानः पूयमानः सोमः कलशेषु सत्ता सदनशीलो निषण्णोभवति । सदेस्ताच्छीलिकस्तृन् एकाचइतीट्प्रतिषेधः ॥ २३ ॥

२३. शोध्यमान सोम, जैसे जार व्यभिचारिणी स्त्री के पास जाता है, वैसे ही स्तोताओं के द्वारा अभिषुत और पात्रों में क्षरणशील सोम, तुम शत्रुओं का विनाश करते हुए आते हो। जैसे उड़नेवाला पक्षी वृक्षों पर बैठा करता है, वैसे ही शोधित सोम कलश में बैठते हैं।

आतेरुचःपवमानस्यसोमयोषेवयन्तिसुदुघाःसुधाराः ।
हरिरानीतःपुरुवारोअप्स्वचिक्रदत्कलशेदेवयूनाम् ॥ २४ ॥ १०॥

आ । ते । रुचः । पवमानस्य । सोम । योषाऽइव । यन्ति ।
सुऽदुघाः । सुऽधाराः । हरिः । आऽनीतः । पुरुऽवारः । अप्ऽसु ।
अचिक्रदत् । कलशे । देवऽयूनाम् ॥ २४ ॥ १० ॥

हे सोम पवमानस्य पूयमानस्य ते तव स्वभूताः योषेव स्त्रीयथा पुत्राणां पयोदोग्धि तद्वत् यजमानानां धनादिकस्य सुदुघाः सुदुदोग्ध्र्यः सुधाराः शोभनधारोपेताः रुचोदीप्तयः आयन्तिपात्रादीन्यागच्छन्ति । किंच हरिर्हरितवर्णः आनीतः ऋत्विग्भिः पुरुवारः बहुधावरणीयः सोमः अप्सु वसतीवरीषु देवयूनां देवानिच्छतां यजमानानां स्वभूते कलशे द्रोणाख्येच अचिक्रदत् पुनःपुनः क्रन्दते शब्दायते ॥ २४ ॥

२४. सोम, बच्चों के लिए दूध का दोहन करनेवाली स्त्री के समान तुम्हारी यजमानों का धन दोहन करनेवाली और शोभन धाराओंवाली दीप्तियाँ पात्रों में आती हैं। हरित-वर्ण, लाये गये और ऋत्विकों के द्वारा बहुधा वरणीय सोम वसतीवरी-जल में और देवकामी यजमानों के कलश में बार-बार शब्द करते हैं।

॥ इति सप्तमस्य चतुर्थे दशमोवर्गः ॥ १० ॥
॥ इति नवमे मंडले पंचमोनुवाकः ॥ ५ ॥

षष्ठेनुवाके सप्तसूक्तानि । तत्र अस्यमेषेत्यष्टापंचाशदृचं प्रथमंसूक्तं त्रैष्टुभं पवमानसोमदेवताकं ततः आद्यस्यतृचस्य मैत्रावरुणोवसिष्ठऋषिः द्वितीयस्येन्द्रःप्रमतिर्नाम तृतीयस्यवृषगणाः चतुर्थस्यमन्युः पंचमस्योपमन्युः षष्ठस्यव्याघ्रपाद् सप्तमस्यशक्तिः अष्टमस्यकर्णश्रुत् नवमस्य मृळीकः दशमस्यवसुक्रः एतेसर्वेवसिष्ठगोत्राः एवंत्रिंशदृचोगताः अथ चतुर्दशानामृचां शक्तिपुत्रः पराशरऋषिः शिष्टानामांगिरसःकुत्सः। तथानुक्रम्यते—अस्यमेषाष्टापंचाशदाद्यंतृचंवसिष्ठोपश्यदुत्तरान्नव पृथग्वसिष्ठाः इन्द्रप्रमतिर्वृषगणोमन्युरुपमन्युर्व्याघ्रपाच्छक्तिःकर्णश्रुन्मृळीकोवसुक्रइति चतुर्दशपराशरोत्याःकुत्सइति । गतोविनियोगः ।

अस्यप्रेषाहेमनापूयमानोदेवोदेवेभिःसमपृक्तरसम् ।
सुतःपवित्रंपर्येतिरेभन्मितेवसद्मपशुमान्तिहोता ॥ १ ॥

अस्य । प्रेषा । हेमना । पूयमानः । देवः । देवेभिः । सम् ।
अपृक्त । रसम् । सुतः । पवित्रम् । परि । एति । रेभन् ।
मिताऽइव । सद्म । पशुऽमन्ति । होता ॥ १ ॥

अस्य सोमस्य प्रेषा प्रेषतिर्गत्यर्थः क्विपिरूपं सावेकाचइतिविभक्तेरुदात्तत्वं । प्रेषा प्रेरकेण हेमना हिरण्येन पूयमानः हिरण्यपाणिरभिषुणोतीति हिरण्यसंबन्धः । तादृशः देवोदीप्यमानांशुः रसमात्मीयं देवेभिःदेवैः सह समपृक्त संपर्चयति संयोजयति । पृचीसंपर्के ततः सुतोभिषुतः सोमः रेभन् शब्दायमानःसन् पवित्रं ऊर्णास्तुकेननिर्मितं पर्येति परिगच्छति । कथमिव होता देवानामाह्वाता ऋत्विक् मितेव निर्मितान् पशुमन्ति बद्धपशून् सद्म सदनानि यज्ञगृहान् यथा पर्येति तद्वत् ॥ १ ॥

१. प्रेरक सुवर्ण के द्वारा शोधित और प्रदीप्त-किरण सोम अपने रस को देवों के पास भेजते हैं। अभिषुत सोम शब्दायमान होकर पवित्र की ओर उसी प्रकार जाते हैं, जिस प्रकार ऋत्विक् यजमान के पशुवाले और सुनिर्मित यज्ञ-गृह में जाते हैं।

भद्रावस्त्रासमन्याउ३वसानोमहान्कविर्निवचनानिशंसन् ।
आवच्यस्वचम्वोःपूयमानोविचक्षणोजागृविर्देववीतौ ॥ २ ॥

भद्रा । वस्त्रा । समन्या । वसानः । महान् । कविः । निऽवचनानि ।
शंसन् । आ । वच्यस्व । चम्वोः । पूयमानः । विऽचक्षणः ।
जागृविः । देवऽवीतौ ॥ २॥

भद्रा भद्राणि कल्याणानि समन्या समनमिति संग्रामनाम तत्र साधुरिति यत् संग्रामयोग्यानि वस्त्रा वस्त्राणि आच्छादकानि तेजांसि वसानः आच्छादयन् महान् पूज्यः कविः क्रान्तदर्शी अतएव निवचनानि नितरांवक्तव्यानि ऋत्विक्कृतानि स्तोत्राणि शंसन् विचक्षणः विशेषेण सर्वस्यद्रष्टा जागृविर्जागरणशीलः सोमः त्वं देववीतौ देवानांवीतिर्भक्षणं यस्मिन्सदेववीतिर्यज्ञः तस्मिन् चम्वोरधिषवणफलकयोः आवच्यस्व पात्राण्याविश । वचिर्गत्यर्थः व्यत्ययेन श्यन् पूयमानः सन् ॥ २ ॥

२. संग्राम के योग्य, आच्छादक और कल्याणकर तेज को धारण करनेवाले, पूज्य, कवि, ऋत्विकों के वक्तव्यों के प्रशंसक, सर्व-द्रष्टा और जागरणशील सोम, तुम यज्ञ में अभिषवण फलकों पर बैठो।

अथ तृतीया—

समुप्रियोमृज्यतेसानोअव्येयशस्तरोयशसांक्षैतोअस्मे ।
अभिस्वरधन्वापूयमानोयूयंपातस्वस्तिभिःसदानः ॥ ३ ॥

सम् । ऊँ इति । प्रियः । मृज्यते । सानौ । अव्ये । यशःऽतरः ।
यशसाम् । क्षैतः । अस्मे इति । अभि । स्वर । धन्व ।
पूयमानः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥

यशसां यशस्विनांमध्ये यशस्तरः अतिशयेनयशस्वी क्षैतः क्षितौभवः प्रियः प्रीणयिता सोमः सानौ समुच्छ्रिते अव्ये अविमये पवित्रे अस्मे अस्मदर्थं संमृज्यते ऋत्विग्भिः परिपूयते । उ अवधारणे । पूयमानस्त्वं धन्वान्तरिक्षे अभिस्वर अभितः शब्दय यूयं पूजायां बहुवचनं हे सोम त्वं नोस्मान् स्वस्तिभिः कल्याणतमैः पालनैः सदा सर्वदा पात रक्षत पालयत ॥ ३ ॥

३. यशस्वियों में भी यशस्वी, पृथिवी पर उत्पन्न और प्रसन्नतादायक सोम उच्च और मेषलोममय पवित्र में शोधित होते हैं। सोम शोधित होकर तुम अन्तरिक्ष में शब्द करो। मंगलमय रक्षणों से हमारी रक्षा करो।

प्रगायताभ्यर्चामदेवान्त्सोमंहिनोतमहतेधनाय ।
स्वादुःपवातेअतिवारमव्यमासीदातिकलशंदेवयुर्नः ॥ ४ ॥

प्र । गायत । अभि । अर्चाम । देवान् । सोमम् । हिनोत ।
महते । धनाय । स्वादुः । पवाते । अति । वारम् । अव्यम् ।
आ । सीदाति । कलशम् । देवऽयुः । नः ॥ ४ ॥

हेस्तोतारः प्रगायत सोमं प्रकर्षेणाभिष्टुत । तथा देवान् अभ्यर्चाम अभ्यर्चत पुरुषव्यत्ययः। यद्वा वयं देवानभिष्टुमः यूयं सोमंस्तुतेति । किंच महते महत् प्रभूतधनाय धनं प्राप्तुं सोमं हिनोत अभिषवार्थं प्रेरयत । क्रियार्थोपपदस्यचकर्मणिस्थानिनइति धनशब्दस्य चतुर्थी । ततः स्वादुः स्वादुकरः सोमः अव्यमविभवं वारं वालं पवित्रमतिपवाते अतीत्यपवते । किंच देवयुः देवानकामयमानः नोस्मदीयः सोमः कलशं पात्रमासीदाति आसीदति प्रविशति । उभयत्रलेट्यडागमः ॥ ४ ॥

४. स्तोताओ, भली भाँति स्तुति करो और देवों की पूजा करो। प्रचुर धन की प्राप्ति के लिए सोम को प्रेरित करो। स्वादुकर सोम मेषलोममय पवित्र में शोधित होते हैं। देवाभिलाषी सोम कलश में बैठते हैं।

इन्दुर्देवानामुपसख्यमायन्त्सहस्रधारःपवतेमदाय ।
नृभिःस्तवानोअनुधामपूर्वमगन्निन्द्रंमहतेसौभगाय ॥ ५ ॥११॥

इन्दुः । देवानाम् । उप । सख्यम् । आऽयन् । सहस्रऽधारः ।
पवते । मदाय । नृऽभिः । स्तवानः । अनु । धाम । पूर्वम् ।
अगन् । इन्द्रम् । महते । सौभगाय ॥ ५ ॥ ११ ॥

देवानामिन्द्रादीनां सख्यं सखिभावं उपायन् उपगच्छन् सहस्रधारः बहुविधधारः इन्दुः सोमः मदाय देवानांमदार्थं पवते कलशादिषुक्षरति । नृभिः कर्मनेतृभिः स्तवानः स्तूयमानः सोमः पूर्वं पुरातनं धाम द्युलोकमनुगच्छति । तदेवाह—महते प्रभूताय सौभगाय सौभाग्याय इन्द्रं अगन् गच्छति । सोमे इन्द्रेण पीते सति यजमानानां महासौभाग्यं भवति खलु । अगन् गमेर्लुङि घसेति च्लेर्लुक् मोनोधातोरिति नत्वं ॥ ५ ॥

५. देवों की मैत्री की प्राप्ति की इच्छा से अनेक धाराओंवाले सोम कलश में क्षरित होते हैं। कर्म-निष्ठों के द्वारा स्तुत होकर सोम प्राचीन धाम (द्युलोक) में जाते हैं। महान् सौभाग्य के लिए वे इन्द्र के पास जाते हैं। ॥ इति सप्तमस्य चतुर्थे एकादशोवर्गः ॥ ११ ॥

स्तोत्रेरायेहरिरर्षापुनानइन्द्रंमदोगच्छतुतेभराय ।
देवैर्याहिसरथंराधोअच्छायूयंपातस्वस्तिभिःसदानः ॥ ६ ॥

स्तोत्रे । राये । हरिः । अर्ष । पुनानः । इन्द्रम् । मदः । गच्छतु ।
ते । भराय । देवैः । याहि । सऽरथम् । राधः । अच्छ ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

हे सोम हरिर्हरितवर्णः पुनानः पूयमानस्त्वं स्तोत्रे अस्माभिः क्रियमाणेसति रायेधनार्थं अर्ष आगच्छ । ततस्ते त्वदीयोमदोमदकरोरसः भराय भृभर्त्तने । भर्त्सयन्ति शत्रूनत्रयोद्धार-इति भरःसंग्रामः । तदर्थमिन्द्रंगच्छतु । किंच सरथं देवैःसमानरथमास्थाय राधः अच्छ अस्माकं धनार्थंयाहि आगच्छ । यूयं नोऽस्मान् स्वस्तिभिः सदा पात त्वं रक्ष ॥ ६ ॥

६. हरित-वर्ण और शोधित सोम, स्तोत्र करने पर तुम धन के लिए पधारो। तुम्हारा मदकर रस, युद्ध के लिए, इन्द्र के पास जाय। देवों के साथ रथ पर बैठकर आओ। तुम हमें कल्याण-वचनों से हमारी रक्षा करो।

अथ सप्तमी—

प्रकाव्यमुशनेवब्रुवाणोदेवोदेवानांजनिमाविवक्ति ।
महिव्रतःशुचिबन्धुःपावकःपदावराहोअभ्येतिरेभन् ॥ ७ ॥

प्र । काव्यम् । उशनाऽइव । ब्रुवाणः । देवः । देवानाम् ।
जनिम । विवक्ति । महिऽव्रतः । शुचिऽबन्धुः । पावकः ।
पदा । वराहः । अभि । एति । रेभन् ॥ ७ ॥

उशनेव एतन्नामकऋषिरिव काव्यं कविकर्म स्तोत्रं ब्रुवाणः उच्चारयन् देवःस्तोता अयमृषिः वृषगणोनाम देवानामिन्द्रादीनां जनिम जन्मानि प्रविवक्ति प्रकर्षेण ब्रवीति । वचपरिभाषणे व्यत्ययेनविकरणस्य श्लुः बहुलंछंदसीतिअभ्यासस्येत्वं । महिव्रतः प्रभूतकर्मा शुचिबन्धुः बध्नन्तिशत्रूनिति बन्धूनि तेजांसि बलानिवा दीप्ततेजस्कः पावकः पापानां शोधकः वराहः वरं च तदहः वराहः राजाहःसखिभ्यष्टजिति टच्समासान्तः । तस्मिन्नहनि अभिषूयमाणत्वेन तद्वान् अर्शआदित्वान्मत्वर्थीयःअच् तादृशःसोमः रेभन् शब्दंकुर्वन् पदा पदानि स्थानानि पात्राणि अभ्येति अभिगच्छति । यद्वा यथाकश्चनवराहः पदा पादेन भूमिं विक्रममाणः शब्दंकरोति तद्वत् ॥ ७ ॥

७. उशना नामक कवि के समान काव्य (स्तोत्र) करते हुए इस मंत्र के कर्त्ता ऋषि इन्द्रादि देवों का जन्म भली भाँति जानते हैं। प्रचुरकर्मा, साधुमित्र, पवित्रता के उत्पादक और राज-दिनवाले सोम, शब्द करते हुए, पात्रों में जाते हैं।

अथाष्टमी—

प्रहंसासस्तृपलंमन्युमच्छामादस्तंवृषगणाअयासुः ।
आद्रूष्यं[1]पवमानंसखायोदुर्मर्षंसाकंप्रवदन्तिवाणम् ॥ ८ ॥

प्र । हंसासः । तृपलम् । मन्युम् । अच्छ । अमात् । अस्तम् ।
वृषऽगणाः । अयासुः । आद्रूष्यम् । पवमानम् । सखायः ।
दुःऽमर्षम् । साकम् । प्र । वदन्ति । वाणम् ॥ ८ ॥

हंसासः शत्रुभिर्हन्यमानाः हंसाइव चरन्तोवावृषगणाः एतन्नामकाऋषयः अमात् शत्रूणां बलात् त्रासिताःसन्तः तृपलं तृपलशब्दःक्षिप्रचारी तदुक्तंयास्केन—तृपलप्रमर्माक्षिप्रमहारीति । क्षि-

---

१ सि० ५. १२. ।

प्रमहारिणंमन्युं शत्रूनभिहन्यमानं सोमं अच्छ अभिलक्ष्य अस्तं यज्ञगृहं प्रायासुः प्रयासिषुः प्रगच्छन्ति । ततः सखायः स्तुत्यस्तोतृत्वलक्षणेन संबन्धेन सखिभूताः स्तोतारः आंगूष्यं सर्वैरभिगंतव्यं यद्वा घोषशब्दस्य पृषोदरादित्वादांगूषइत्यादेशः आङ्अनुनासिकश्छान्दसः स्तोत्राहं दुर्धर्षं शत्रुभिर्दुर्धरं दुःसहं एवंविधंसोमं पवमानमुद्दिश्य वाणं वाद्यविशेषं साकं सहैवप्रवदन्ति प्रवादयन्ति तदुपलक्षितं गानंकुर्वन्तीत्यर्थः ॥ ८ ॥

८. हंसों के समान विचरण करनेवाले वृषगण नाम के ऋषि लोग शत्रु-बल-भीत होकर क्षिप्रघातक और शत्रुहन्ता सोम को लक्ष्य कर यज्ञ-गृह में जाते हैं। मित्र-रूप स्तोता लोग स्तोत्र-योग्य, दुर्द्धर्ष और क्षरणशील सोम को लक्ष्य करके वाद्य के साथ गान करते हैं।

सरंहतउरुगायस्यजूतिंवृथाक्रीळन्तंमिमतेनगावः ।
परीणसंकृणुतेतिग्मशृङ्गोदिवाहरिर्ददृशेनक्तमृञ्जः ॥ ९ ॥

सः । रंहते । उरुऽगायस्य । जूतिम् । वृथा । क्रीळन्तम् ।
मिमते । न । गावः । परीणसम् । कृणुते । तिग्मऽशृङ्गः ।
दिवा । हरिः । ददृशे । नक्तम् । ऋञ्जः ॥ ९ ॥

ससोमः रंहते अतिशीघ्रं गच्छतीत्यर्थः। उरुगायस्य बहुभिःस्तुत्यस्यात्मनोजूतिं गविमनुसरन् तंवृथा अनायासेन क्रीळंतं विहरन्तं गच्छन्तंसोमं गावः अन्येगन्तारः नमिमते नपरिच्छिन्दन्ति तमनुगन्तुं नशक्नुवन्तीत्यर्थः । किंच तिग्मशृंगः शृणन्तिहिंसन्ति तमांसीति शृंगाणि तेजांसि तीक्ष्णतेजस्कः परीणसं बहुनामैतत् बहुविधतेजः कृणुते करोति अन्तरिक्षे वर्तमानोयः सोमः दिवा अहनि हरिर्हरितवर्णः ददृशे दृश्यते नमकाशतेइत्यर्थः । नक्तं रात्रौतु ऋञ्जः ऋजुगामी विस्पष्टः प्रकाशयुक्तोदृश्यते दृशेः कर्मणिलिटिरूपं ॥ ९ ॥

९. सोम शीघ्रगामी हैं। बहुतों के द्वारा स्तुत्य और अनायास क्रीड़ा करनेवाले सोम का अनुगमन दूसरे लोग नहीं कर सकते। तीक्ष्ण-तेजस्वी सोम अनेक प्रकार के तेज प्रकट करते हैं। अन्तरिक्ष में वर्त्तमान सोम दिन में हरित-वर्ण के दिखाई देते हैं और रात में सरलगामी और प्रकाशयुक्त दिखाई देते हैं।

इन्दुर्वाजीपवतेगोन्योघाइन्द्रेसोमःसहइन्वन्मदाय ।
हन्तिरक्षोबाधतेपर्यरातिंवरिवःकृण्वन्वृजनस्यराजा ॥ १०॥१२॥

इन्दुः । वाजी । पवते । गोऽन्योघाः । इन्द्रे । सोमः । सहः ।
इन्वन् । मदाय । हन्ति । रक्षः । बाधते । परि । अरातीः ।
वरिवः । कृण्वन् । वृजनस्य । राजा ॥ १० ॥ १२ ॥

इन्दुः क्षरणशीलः वाजी बलवान् गोन्योघाः गमनशीलनीचीनाग्ररससंघातः इन्द्रे सहोबलकररसं इन्वन् प्रेरयन् सोमः मदाय तस्यमदार्थं पवते क्षरति। किंच रक्षःकुलं हन्ति हिनस्ति। किंच अरातीः अरातीन् शत्रून्परिबाधते परितः संहरति। कीदृशः वरिवोवरणीयं धनं कृण्वन् स्तोतॄणां कुर्वन् वृजनस्य बलस्यराजा ईशितासोमइति ॥ १० ॥

१०. क्षरणशील, बलवान् और गमनशील सोम इन्द्र के लिए बलकर रस को भेजते हुए उनके मद के लिए क्षरित होते हैं। ये राक्षस-कुल को मारते हैं। वरणीय धन देनेवाले और बल के राजा सोम चारों ओर से शत्रुओं का संहार करते हैं। ॥ इति सप्तमस्य चतुर्थे द्वादशोवर्गः ॥ १२ ॥

अधधारयामध्वापृचानस्तिरोरोमपवतेअद्रिदुग्धः।
इन्दुरिन्द्रस्यसख्यंजुषाणोदेवोदेवस्यमत्सरोमदाय ॥ ११ ॥

अध। धारया। मध्वा। पृचानः। तिरः। रोम। पवते। अद्रिऽदुग्धः।
इन्दुः। इन्द्रस्य। सख्यम्। जुषाणः। देवः। देवस्य। मत्सरः। मदाय॥११॥

अधाथानन्तरं अद्रिदुग्धाः ग्रावभिर्दुग्धोभिषुतः सोमः मध्वा मदकारिण्याधारया पृचानः देवान्संपर्चयन् संयोजयन् रोम अविरोमभिः कृतं पवित्रं तिरस्तिरस्कृत्य व्यवधायकंकृत्वा पवते कलशेषु क्षरति। किंच इन्द्रस्यसख्यं सखिभावंकर्मवा जुषाणः सेवमानः देवोद्योतमानः मत्सरोमदकरइन्दुः सोमः देवस्येन्द्रस्य मदाय मदार्थं पवते क्षरति ॥ ११ ॥

११. पत्थरों से अभिषुत और मदकारिणी धाराओं से देवों की पूजा करनेवाले सोम मेषलोममय पवित्र का व्यवधान करके क्षरित होते हैं। इन्द्र की मैत्री को आश्रय करते हुए द्योतमान और मदकर सोम इन्द्र के मद के लिए क्षरित होते हैं। अथ द्वादशी—

अभिप्रियाणिपवतेपुनानोदेवोदेवान्त्स्वेनरसेनपृञ्चन्।
इन्दुर्धर्माण्यृतुथावसानोदशक्षिपोअव्यतसानोअव्ये ॥ १२ ॥

अभि। प्रियाणि। पवते। पुनानः। देवः। देवान्। स्वेन। रसेन।
पृञ्चन्। इन्दुः। धर्माणि। ऋतुऽथा। वसानः। दश।
क्षिपः। अव्यत। सानौ। अव्ये ॥ १२ ॥

प्रियाणि प्रीणयितॄणि धर्माणि धारकाणि तेजांसि ऋतुथा कालेकाले वसान आच्छादयन् इन्दुः सोमः पुनानः पूयमानः सन् अभिपवते कलशानभिलक्ष्य क्षरति। कीदृशः देवः संक्रीडनशीलः स्वेन आत्मीयेनरसेन देवानिन्द्रादीन् पृंचन् संपर्चयन् संयोजयन् तमिमं दश दशसंख्याकाः क्षिपः अंगुलिनामैतत् कर्मार्थं प्रेयंतइति तत्संख्याकाअंगुलयः सानौ समुच्छ्रिते अव्ये

अविभवेपवित्रे अव्यत गमयन्ति यद्वा अत्र पवित्रे पूयमानंसोमं अव्यत गच्छन्ति वीगत्यादिषु लङ्व्यत्ययेनात्मनेपदं ॥ १२ ॥

१२. यथाकाल प्रिय कर्मों के करनेवाले, शोधित, क्रीड़ाशील और अपने रस से इन्द्रादि देवों का पूजन करनेवाले दिव्य सोम क्षरित होते हैं। उन्हें उच्च और मेषलोममय पवित्र पर दस अंगुलियाँ भेजती हैं।

वृषाशोणोअभिकनिक्रदद्गानदयन्नेतिपृथिवीमुतद्याम् ।
इन्द्रस्येववग्नुराशृण्वआजौप्रचेतयन्नर्षतिवाचमेमाम् ॥ १३ ॥

वृषा । शोणः । अभिऽकनिक्रदत् । गाः । नदयन् । एति । पृथिवीम् ।
उत । द्याम् । इन्द्रस्यऽइव । वग्नुः । आ । शृण्वे । आजौ ।
प्रऽचेतयन् । अर्षति । वाचम् । आ । इमाम् ॥ १३ ॥

शोणः शोणवर्णोवृषा कश्चिद्वृषभः गाः पशून् अभिकनिक्रदत् अभिलक्ष्य शब्दंकरोति । एवं गाः स्तुतीः विश्रयणार्थं पयसोदोग्धीर्धेनूः वा अभिकनिक्रदत् अभिशब्दायमानः तदेवाह नदयन् शब्दमुत्पादयन् सोमः पृथिवीं उतापि च द्यां एतौलोकौ एति गच्छति । किंच वग्नुः वाङ्नामैतत् तस्य वाक् सुशब्दः आजौ संग्रामे इन्द्रस्येव इन्द्रस्यशब्दइव आशृण्वे सर्वैः श्रूयते । ततः प्रचेतयन् आत्मानं सर्वेषां प्रज्ञापयन् इमां वाचमर्षति समंताद्गमयति उच्चैः शब्दायतेइत्यर्थः ॥ १३ ॥

१३. जैसे गायों को देखकर लोहित-वर्ण वृषभ शब्द करता है, वैसे ही शब्द करते हुए सोम द्यावापृथिवी को जाते हैं। युद्ध में, इन्द्र के समान ही, सोम का शब्द सब सुनते हैं। सोम अपना परिचय सबको देते हुए जोर से बोलते हैं। अथ चतुर्दशी—

रसाय्यःपयसापिन्वमानईरयन्नेषिमधुमन्तमंशुम् ।
पवमानःसन्तनिमेषिकृण्वन्निन्द्रायसोमपरिषिच्यमानः ॥ १४ ॥

रसाय्यः । पयसा । पिन्वमानः । ईरयन् । एषि । मधुऽमन्तम् ।
अंशुम् । पवमानः । सम्ऽतनिम् । एषि । कृण्वन् ।
इन्द्राय । सोम । परिऽसिच्यमानः ॥ १४ ॥

हे सोम रसाय्यः रसेरौणादिकआय्यप्रत्ययः । आस्वाद्यः पयसायुक्तः पिन्वमानः क्षरन् त्वं ईरयन् शब्दंप्रेरयन् मधुमन्तं माधुर्योपेतं अंशुं रसभावं एषि प्राप्नोषि । अंशुःशमष्टमात्रोभवतीतियास्कः । अनेन सोमरसोभिधीयते । किंच हेसोम परिषिच्यमानः अद्भिः परिषिक्तस्त्वं प-

१ नि० २. ५. ।

वमानः पवित्रेपूयमानःसन् संतनिं तनुविस्तारे इमत्ययः संततांधारां कृण्वन्कुर्वन्निन्द्राय इंद्रार्थं एपि गच्छसि ॥ १४ ॥

१४. सोम, तुम दुग्ध-युक्त, क्षरणशील और शब्द-कर्त्ता हो। तुम मधुर रस को प्राप्त करते हो। सोम, जल से परिषिक्त और शोधित तुम, अपनी धारा को विस्तृत करके, इन्द्र के लिए जाते हो।

एवापवस्वमदिरोमदायोदग्राभस्यनमयन्वधस्नैः।
परिवर्णंभरमाणोरुशन्तंगव्युर्नोअर्षपरिसोमसिक्तः ॥ १५ ॥ १३॥

एव। पवस्व। मदिरः। मदाय। उदग्राभस्य। नमयन्।
वधस्नैः। परि। वर्णम्। भरमाणः। रुशन्तम्। गव्युः।
नः। अर्ष। परि। सोम। सिक्तः ॥ १५ ॥ १३ ॥

हेसोम मदिरोमदकरस्त्वं उदग्राभस्य क्रियाग्रहणंकर्तव्यमिति कर्मणःसंप्रदानसंज्ञा चतुर्थ्यर्थेबहुलमितिषष्ठी। उदग्राभं उदकग्राहिणंमेघं वधस्नैः हननसाधनैरायुधैः नमयन् वृष्ट्यर्थंप्रह्वीकुर्वन् मदाय मदार्थमेव पवस्व एवं पात्रेपुक्षर। किंच रुशंतं आरोचमानं श्वेतं वर्णं परिभरमाणः परितोबिभ्रत् सिक्तः पवित्रेसिच्यमानस्त्वं गव्युः नोस्माकं गाइच्छन् पर्षर्ष परिगच्छ॥ १५॥

१५. मदकर सोम, तुम जलग्राही मेघ को, वृष्टि के लिए, घातक आयुधों से निम्नगामी बनाते हुए, मद के लिए क्षरित होओ। शोभन, श्वेतवर्ण, पवित्र में अभिषिक्त और हमारी गाय की अभिलाषा करनेवाले सोम, क्षरित होओ।

॥ इति सप्तमस्य चतुर्थे त्रयोदशोवर्गः ॥ १३ ॥

अथ षोडशी—

जुष्टीनइन्दोसुपथासुगान्युरौपवस्ववरिवांसिकृण्वन्।
घनेवविष्वग्दुरितानिविघ्नन्नधिष्णुनाधन्वसानोअव्ये ॥ १६ ॥

जुष्टी। नः। इन्दो इति। सुऽपथा। सुऽगानि। उरौ। पवस्व।
वरिवांसि। कृण्वन्। घनाऽइव। विष्वक्। दुःऽइतानि।
विऽघ्नन्। अधि। स्नुना। धन्व। सानौ। अव्ये ॥ १६ ॥

हे इन्दो दीप्त पवमान जुष्टी स्नात्व्यादयश्चेतिनिपातितः स्तुतिभिः प्रीतोभूत्वा नोस्माकं सुपथा सुपथानि वैदिकमार्गान् तथा वरिवांसि वरणीयानि धनानि सुगानि सुगमनानि सुप्राप्तव्यानि कृण्वन् कुर्वन्। उरौ विस्तीर्णे द्रोणकलशे पवस्व क्षर। किंच घनेव घनीभूतेन लोहमयेनायुधेनेव विष्वक् सर्वतोदुरितानि दुःप्राप्तव्यानि रक्षांसि विघ्नन् हिंसन् सानौ समुच्छ्रितेदेशे अव्येअविभवे स्नुना स्रवता धारासंघेन अधिधन्व अधिगच्छ। धविर्गत्यर्थः ॥१६॥

१६. दीप्त सोम, तुम स्तोत्र से प्रसन्न होकर और हमारे लिए वैदिक मार्गों को सुगम कर विस्तृत द्रोण-कलश में क्षरित होओ। घने लोहे के हथियार से दुष्ट राक्षसों को मारते हुए उन्नत और मेषलोममय पवित्र में धाराओं के साथ जाओ।

वृष्टिंनोअर्षदिव्यांजिगत्नुमिळावतींशंगयींजीरदानुम् ।
स्तुकेववीताधन्वाविचिन्वन्बन्धूँरिमाँअवराँइन्दोवायून् ॥ १७ ॥

वृष्टिम् । नः । अर्ष । दिव्याम् । जिगत्नुम् । इळाऽवतीम् ।
शम्ऽगयीम् । जीरऽदानुम् । स्तुकाऽइव । वीता । धन्व । विऽचिन्वन् ।
बन्धून् । इमान् । अवरान् । इन्दो इति । वायून् ॥ १७ ॥

हे सोम नोस्माकं वृष्टिं अर्ष गमय। कीदृशीं दिव्यां दिविभवां जिगत्नुं गमनशीलां इरावतीं अन्नवतीं शंगयीं सुखस्यनिवासभूतां जीरदानुं क्षिप्रदानोपेतां। किंच हे इन्दो त्वं स्तुकेववीता कांतानि स्तुकशब्दोपत्यवचनः अपत्यानि यथाविचिनोषि तद्वत् बन्धून् स्तुत्यस्तोतृत्वेन बन्धुभूतान् अवरान् अवरदेशेस्थितान् पार्थिवान् वायून् त्वां अभिगच्छत इमानस्मान्विचिन्वन् धनादिप्रदानार्थं गवेषमाणःसन् धन्व गच्छ ॥ १७ ॥

१७. सोम, द्युलोकोत्पन्न, गमनशील, अन्नवाली, सुखदायी और दान करनेवाली वृष्टि को बरसाओ। सोम पृथिवी-स्थित वायु प्रेमपात्र पुत्र के समान हैं। इन्हें खोजते-खोजते आओ।

ग्रन्थिनविष्यग्रथितंपुनानऋजुंचगातुंवृजिनंचसोम ।
अत्योनक्रदोहरिरासृजानोमर्योदेवधन्वपस्त्यावान् ॥ १८ ॥
ग्रन्थिम् । न । वि । स्य । ग्रथितम् । पुनानः । ऋजुम् । च ।
गातुम् । वृजिनम् । च । सोम । अत्यः । न । क्रदः । हरिः ।
आ । सृजानः । मर्यः । देव । धन्व । पस्त्यऽवान् ॥ १८ ॥

पुनानः पूयमानस्त्वं ग्रथितं पापैर्बद्धं मां विष्य मुंच पापेभ्योविश्लेषय। कथमिव ग्रंथिंन यथाकश्चित् ग्रंथिंविश्लेषयति षोन्तकर्मणीति अस्यलोटिरूपं । किंच हेसोम त्वं ऋजुं अवक्रं गातुं मार्गं च वृजिनं बलं च मह्यं देहि । हरिर्हरितवर्णस्त्वं आसृजानः पात्रेष्वासृज्यमानःसन् अत्योन अतनशीलोश्वइव क्रदः क्रंदसि शब्दायसे । किंच हेदेव मर्त्योमनुष्यहितो मारकोहिंसकोवा शत्रूणां पस्त्यवान् पस्त्यंगृहं तद्वांस्त्वं धन्व मामभिगच्छ कलशान्वा ॥ १८ ॥

१८. जैसे गाँठ को सुलझाकर अलग किया जाता है, वैसे ही मुझे पापों से अलग करो। सोम, तुम मुझे सरल मार्ग और बल दो। हरितवर्ण और पात्रों में निर्मित होकर वेगशाली अश्व के समान शब्द करते हो। देव, शत्रु-हिंसक तुम गृहवाले हो। मेरे पास आओ।

जुष्टोमदायदेवतातइन्दोपरिष्णुनाधन्वसानोअव्ये ।
सहस्रधारःसुरभिरदब्धःपरिस्रवावाजसातौनृषह्ये ॥ १९ ॥

जुष्टः । मदाय । देवऽतातेः । इन्दो इति । परि । स्रुना ।
धन्व । सानौ । अव्ये । सहस्रऽधारः । सुरभिः । अदब्धः ।
परि । स्रव । वाजऽसातौ । नृऽसह्ये ॥ १९ ॥

हेइन्दो मदाय जुष्टः पर्याप्तस्त्वं देवताते देवैस्ततेयज्ञे सानौ समुच्छ्रिते अव्ये अविभवे स्रुनाश्रयणशीलेन धारासंघेन सह परिधन्व परिगच्छ सहस्रधारः बहुधारोपेतः सुरभिः सुगन्धिभिः त्वं अदब्धः नकैश्चित् हिंसितः सन् वाजसातौ अन्नलाभाय निमित्ते नृसह्ये नृभिः सोढव्येयुद्धे परिस्रव परितोगच्छ ॥ १९ ॥

१९. तुम पर्याप्त मदवाले हो। देवों के यज्ञ में और मेषलोममय पवित्र में, धाराओं के साथ, जाओ। अनेक धाराओं से युक्त और सुन्दर गन्ध से सम्पन्न होकर मनुष्यों के द्वारा क्रियमाण युद्ध में, अन्न-लाभ के लिए, चारों ओर जाओ। अथ विंशी—

अरश्मानोयेरथाअयुक्ताअत्यासोनससृजानासआजौ ।
एतेशुक्रासोधन्वन्तिसोमादेवासस्तांउपयातापिबध्यै ॥ २०॥१४॥

अरश्मानः । ये । अरथाः । अयुक्ताः । अत्यासः । न ।
ससृजानासः । आजौ । एते । शुक्रासः । धन्वन्ति । सोमाः ।
देवासः । तान् । उप । यात । पिबध्यै ॥ २० ॥ १४ ॥

अरश्मानोरश्मिवर्जिता रज्जुवर्जिताइतियावत् अरथारथवर्जिताः अयुक्ताः कुत्रापिननियुक्ताः अबद्धाइत्यर्थः एतादृशाये आजौ युद्धे ससृजानासः सृज्यमानाः अत्यासोन अश्वायथा त्वरयालक्ष्यं गच्छन्ति तद्वत् आजौ अजन्ति कर्मकरणार्थमृत्विजोत्रेति आजिर्यज्ञस्तस्मिन् सृज्यमानाः शुक्रासः शुक्रादीप्यमाना एतेसोमाः धन्वन्ति क्षिप्रं कलशानभिगच्छन्ति। अथप्रत्यक्षः हेदेवासोदेवाः तानागच्छतः सोमानपिबध्यैपानायउपयातउपगच्छत ॥ २० ॥

२०. जैसे रज्जु-रहित, रथ-शून्य और अबद्ध अश्व, युद्ध में सज्जित करके, शीघ्रता के साथ अपने लक्ष्य को जाते हैं, वैसे ही यज्ञ में निर्मित और दीप्त सोम शीघ्र ही कलश की ओर जाते हैं। देवो, आनेवाले सोम को पान करने के लिए पास जाओ।

॥ इति सप्तमस्य चतुर्थे चतुर्दशोवर्गः ॥ १४ ॥

एवानइन्दोअभिदेववीतिंपरिस्रवनभोअर्णश्चमूषु ।
सोमोअस्मभ्यंकाम्यंबृहन्तंरयिंददातुवीरवन्तमुग्रम् ॥ २१ ॥

एव । नः । इन्दो इति । अभि । देवऽवीतिम् । परि । स्रव ।
नभः । अर्णः । चमूषु । सोमः । अस्मभ्यम् । काम्यम् । बृहन्तम् ।
रयिम् । ददातु । वीरऽवन्तम् । उग्रम् ॥ २१ ॥

हे इन्दो सोम नोस्मदीयमेव देववीतिं देवानांवीतिर्भक्षणं गमनंवा यस्मिन् देववीतिर्यज्ञः तमभिलक्ष्य नभोनभसोद्युलोकात् अर्णउदकं अनेनपवित्रान्निर्गतः सोमरसोभिधीयते तं रसं चमूषु चमसेषु परिस्रव परितःक्षर । ततः सोमः काम्यं काम्यमानं बृहन्तं प्रवृद्धं वीरवन्तं पुत्रयुक्तं उग्रमुद्गूर्णबलं रयिं धनं अस्मभ्यं ददातु प्रयच्छतु ॥ २१ ॥

२१. सोम, हमारे यज्ञ को लक्ष्य करके द्युलोक से रस को चमसों में गिराओ। सोम अभिलषित, प्रवृद्ध और वीर पुत्र तथा बलिष्ठ धन हमें दें।

अथ द्वाविंशी—

तक्षद्यदीमनसोवेनतोवाग्ज्येष्ठस्यवाधर्मणिक्षोरनीके ।
आदीमायन्वरमावावशानाजुष्टंपतिंकलशेगावइन्दुम् ॥ २२ ॥

तक्षत् । यदि । मनसः । वेनतः । वाक् । ज्येष्ठस्य । व[illegible] । क्षोः । अनीके । आत् । ईम् । आयन् । वरम् । आ । वावशानाः । जुष्टम् । पतिम् । कलशे । गावः । इन्दुम् ॥ २२ ॥

वेनतः वेनोवेनतेःकान्तिकर्मणइतियास्कः । कामयमानस्य मनसः मन्यतेःस्तुतिकर्मणः स्तोतुर्वाक् स्तुतिलक्षणायद्येनंतक्षत् संस्करोति वाशब्दउपमार्थे यथा धर्मणि निमित्तात्कर्मसंयोगइतिसप्तमी धारकं योगक्षेमविषयं कर्मोद्दिश्य क्षोःशब्दायमानस्य अनीके संग्राममुखे तत्र स्थितस्य जानपदिकस्य वाक् ज्येष्ठस्य द्वितीयार्थेषष्ठी प्रशस्यतमं राजानं यथास्तौति तथास्तोतुर्वाक् सोमंस्तौतीत्यर्थः । आदनंतरमेव वरं वरणीयं जुष्टं देवानां मदायपर्याप्तं पतिं सर्वस्य पालकं कलशे स्थितं इन्दुं ईमेनं सोमं वावशानाः कामयमानाः गावआयन् पयसा स्वीये नमि श्रयितुमागच्छंति ॥ २२ ॥

२२. ज्यों ही अभिलषित स्तोता का वचन अन्तःकरण से निकलता है और ज्यों ही अतीव चमत्कृत याज्ञिक द्रव्य, अनुष्ठान-काल में, लाया जाता है; त्यों ही गौ का दूध अभिलाषा के साथ सोम की ओर जाता है और [illegible] सोम कलश में अवस्थित करते हैं। सोम सबके प्रेमपात्र स्वामी के समान हैं।

---

१ नि० १०. ३८.।

प्रदानुदोदिव्योदानुपिन्वऋतमृतायपवतेसुमेधाः ।
धर्माभुवद्वृजन्यस्यराजाप्ररश्मिभिर्दशभिर्भारिभूर्म ॥ २३ ॥

प्र । दानुऽदः । दिव्यः । दानुऽपिन्वः । ऋतम् । ऋताय । पवते ।
सुऽमेधाः । धर्मा । भुवत् । वृजन्यस्य । राजा । प्र ।
रश्मिऽभिः । दशऽभिः । भारि । भूर्म ॥ २३ ॥

दिव्योदिविभवः दानुदः दातृभ्योधनादीनांदाता तदेवाह दानुपिन्वः पिविसेचने कर्मण्यणित्यण् दातृभ्यः कामानां रक्षयिता सुमेधाः शोभनप्रज्ञः सोमः ऋताय सत्यभूतायेन्द्राय तं सत्यभूतमात्मीयं रसंपवते प्रकर्षेण क्षरति । राजा दीप्यमानः सोमः वृजन्यस्य साधुबलस्य धर्मा धारयिता भुवद्भवति । किंच दशभिः एतत्संज्ञकाभीरश्मिभिः कर्मकरणार्थमश्नुवानाभिः अंगुलिभिः भूम प्रभूतं प्रभारि प्रभार्यते चिणिरूपं ॥ २३ ॥

२३. द्युलोकोत्पन्न, धन-दाताओं के मनोरथ-रक्षक और शोभन-बुद्धि सोम सत्य-रूप इन्द्र के लिए अपने रस को गिराते हैं। राजा सोम साधु-बल के धारक हैं। दस अंगुलियां प्रचुर परिमाण में सोम प्रस्तुत करती हैं।

पवित्रेभिःपवमानोनृचक्षाराजादेवानामुतमर्त्यानाम् ।
द्विताभुवद्रयिपतीरयीणामृतंभरत्सुभृतंचार्विन्दुः ॥ २४ ॥

पवित्रेभिः । पवमानः । नृऽचक्षाः । राजा । देवानाम् । उत ।
मर्त्यानाम् । द्विता । भुवत् । रयिऽपतिः । रयीणाम् ।
ऋतम् । भरत् । सुऽभृतम् । चारु । इन्दुः ॥ २४ ॥

पवित्रेभिः पवित्रैः पवमानः पूयमानः नृचक्षाः नृणांफलाफलयोः द्रष्टा अथ देवानामिन्द्रादीनां उतापिच मर्त्यानां मनुष्याणां एवमुभयेषां जनानां राजा रयिपतिः धनस्यपतिः नत्वल्पस्यपतिः किंतु रयीणां बहूनां धनानांस्वामी । वृत्यवृत्तिभ्यांस्वामित्वं बाहुल्यंच विवक्ष्यते । ईदृशः सोमः द्विता द्विधा देवेष्वपिच मनुष्येषु भुवत् भवति । सोयमिन्दुः सोमः सुभृतं संभृतं चारु कल्याणं ऋतमुदकं भरत् बिभर्ति ॥ २४ ॥

२४. पवित्र में शोधित, मनुष्यों के दर्शक, देवों और मनुष्यों के राजा और धन-पति—असीम धन के स्वामी सोम देवों और मनुष्यों में सुन्दर और कल्याणकारी जल को धारण करते हैं।

अथ पंचविंशी—

अवीँइवश्रवसेसातिमच्छेन्द्रस्यवायोरभिवीतिमर्ष ।
सनःसहस्राबृहतीरिषोदाभवासोमद्रविणोवित्पुनानः ॥ २५॥१५॥

अर्वानृऽइव । श्रवसे । सातिम् । अच्छ । इन्द्रस्य । वायोः । अभि । वीतिम् । अर्ष । सः । नः । सहस्रा । बृहतीः । इषः । दाः । भव । सोम । द्रविणःऽवित् । पुनानः ॥ २५ ॥ १५ ॥

हेसोम अन्नार्थं युद्धे अर्वानिव अश्वोयथा गच्छति तद्वत् त्वं श्रवसे अस्माकमन्नार्थं तथा सातिमच्छ धनलाभंप्रति इन्द्रस्य वायोश्चवीतिं पानमभ्यर्ष अभिगच्छ । ऐन्द्रवायवग्रहे हि इन्द्रवायू सह सोमंपिबतइति सहोपादानं । सत्वं सहस्रा सहस्राणि बहुविधानि बृहतीः बृंहितानि प्रवृद्धानि इषोन्नानि नोस्मभ्यं दाः प्रयच्छ । हे सोम पुनानः पूयमानस्त्वं नोस्मभ्यं द्रविणोवित् धनस्य लंभयिता भव । द्रविणशब्दात्सर्वप्रातिपदिकेभ्योलालसायांसुग्वक्तव्यइति सुगागमः ॥ २५ ॥

२५. सोम, जैसे अश्व युद्ध में जाता है, वैसे ही यजमानों के अन्न के लिए और इन्द्र-वायु के पान के लिए जाओ। तुम बहुविध और प्रवृद्ध अन्न हमें दो। सोम, शोधित तुम हमारे लिए धन-प्रापक हो।

॥ इति सप्तमस्य चतुर्थे पंचदशोवर्गः ॥ १५ ॥

देवाव्योनःपरिषिच्यमानाःक्षयंसुवीरंधन्वन्तुसोमाः ।
आयज्यवःसुमतिंविश्ववाराहोतारोनदिवियजोमन्द्रतमाः॥२६॥

देवऽअव्यः । नः । परिऽसिच्यमानाः । क्षयम् । सुऽवीरम् । धन्वन्तु । सोमाः । आऽयज्यवः । सुऽमतिम् । विश्वऽवाराः । होतारः । न । दिविऽयजः । मन्द्रऽतमाः ॥ २६ ॥

देवाव्यः अवतेस्तर्पणार्थस्य अविवृस्तृतविभ्यईरिति ईप्रत्ययः । उदात्तस्वरितयोर्यणइति जसःस्वरितत्वं । देवानां तर्पयितारः परिषिच्यमानाः परितः पात्रेषु सिच्यमानाः सोमाः नोस्माकं सुवीरंशोभनपुत्रं क्षयं गृहं धन्वन्तु प्रेरयन्तु । कीदृशाः सुमतिं शोभनमतिं यजमानं आयज्यवः यष्टुमिच्छवः विश्ववाराः विश्वैर्वरणीयाः होतारोन होतारोयथा देवानिन्द्रादीन् स्तुवन्ति एवं दिवियजः दिवि द्युलोकस्थितानिन्द्रादीन् देवान् यजन्तः । दिवूशब्दे तत्पुरुषेकृतिबहुलमिति सप्तम्याअलुक् । मन्द्रतमाः अत्यन्तंमदकराः ॥ २६ ॥

२६. देवों के तर्पक, पात्रों में सिक्त, शोभन-बुद्धि, यजमान के यज्ञ-कर्त्ता, सबके स्वीकार्य, होताओं के समान द्युलोक-स्थित इन्द्रादि की स्तुति करनेवाले और अतीव मदकर सोम हमें वीर पुत्र और गृह प्रदान करें।

एवादेवदेवतातेपवस्वमहेसोमप्सरसेदेवपानः ।
महश्चिद्धिष्मसिहिताःसमर्येकृधिसुष्ठानेरोदसीपुनानः ॥ २७ ॥

एव । देव । देवऽतातेः । पवस्व । महे । सोम । प्सरसे । देवऽपानः ।
महः । चित् । हि । स्मसि । हिताः । सऽमर्ये । कृधि ।
सुस्थाने इति सुऽस्थाने । रोदसी इति । पुनानः ॥ २७ ॥

हेदेव द्योतमान स्तोतव्य वा हेसोम देवपानः देवैःपातव्यस्त्वं देवतातेः देवैस्तते विततेयज्ञे महे महते प्सरसे भक्षणाय देवानांपानाय एव एवं पवस्व क्षर । ततोवयं हिताः त्वयापेरिताःसन्तः समर्ये मरणधर्मरहिते संग्रामे महश्चित् महतोबलाधिकानपि शत्रून् स्मसिहि अभिभवेम खलु । किंच पुनानः पूयमानस्त्वं रोदसी द्यावापृथिव्यौ सुस्थाने अस्माकं शोभनावासस्थाने सत्यौ कृधि कुरु ॥ २७ ॥

२७. स्तुत्य सोम, तुम्हें देवता लोग पीते हैं। देवों के द्वारा विस्तृत यज्ञ में, महान् भक्षण के लिए, देवों के पान के लिए क्षरित होओ। तुम्हारे द्वारा भेजे जाकर हम अमर संग्राम में महाबली शत्रुओं को हरावें। शोधित होकर तुम हमारे लिए द्यावापृथिवी को शोभन निवासवाली करो।

अश्वोनक्रदोवृषभिर्युजानःसिंहोनभीमोमनसोजवीयान् ।
अर्वाचीनैःपथिभिर्येरजिष्ठाआपवस्वसौमनसंनइन्दो ॥ २८ ॥

अश्वः । न । क्रदः । वृषऽभिः । युजानः । सिंहः । न । भीमः ।
मनसः । जवीयान् । अर्वाचीनैः । पथिऽभिः । ये । रजिष्ठाः ।
आ । पवस्व । सौमनसम् । नः । इन्दो इति ॥ २८ ॥

हेसोम वृषभिर्ऋत्विग्भिः सोमसभिषुण्वद्भिः युजानोयोज्यमानस्त्वं अश्वोन अश्वइव क्रदः क्रन्दसि शब्दायसे । कीदृशः सिंहोन सिंहइव भीमः शत्रूणां भयंकरः तथा मनसोपि जवीयान् वेगवत्तरः अर्वाचीनैः अभिमुखैः पथिभिर्मार्गैः येमार्गाः रजिष्ठाः अत्यन्तमृजवोभवन्ति विभाषर्जोश्छन्दसीतिऋकारस्यरादेशः । हेइन्दो दीप्यमान सोम तैर्मार्गैः नोस्माकं सौमनसं सौमनस्यं आपवस्व आप्रापय ॥ २८ ॥

२८. सोम, सिंह के समान शत्रुओं के लिए भयंकर, मन से भी अधिक वेगवाले और सोमाभिषव करनेवाले ऋत्विकों के द्वारा योजित तुम अश्व के समान शब्द करते हो। दीप्त सोम, जो मार्ग अतीव सरल हैं, उन्हीं से हमारे लिए मन की प्रसन्नता उत्पन्न करो।

शतंधारादेवजाताअसृग्रन्त्सहस्रमेनाःकवयोमृजन्ति ।
इन्दोसनित्रंदिवआपवस्वपुरएतासिमहतोधनस्य ॥ २९ ॥

शतम् । धाराः । देवऽजाताः । असृग्रन् । सहस्रम् । एनाः ।
कवयः । मृजन्ति । इन्दो इति । सनित्रम् । दिवः । आ ।
पवस्व । पुरःऽएता । असि । महतः । धनस्य ॥ २९ ॥

हे सोम देवजाताः देवार्थं प्रादुर्भूताः शतं शतसंख्याकाः त्वदीयाधाराः असृग्रन् सृज्यन्ते । ततः कवयः क्रान्तदर्शिनः ऋत्विजः सहस्रं बहुविधाः एनाः त्वदीयाधाराः मृजन्ति अलंकुर्वन्ति यद्वा सहस्रमनेकधामृजन्ति शोधयन्ति । हेइन्दो सनित्रं भजनसाधनं दिवोद्युलोकात् अस्माकं पुत्रादीनांच आपवस्व आपापय । कुतोस्यधनमितिचेत् तत्राह महतः प्रभूतधनस्य पुरएता पुरतोगंतासि भवसि तस्माद्देहि इति ॥ २९ ॥

२९. सोम, देवों के लिए उत्पन्न होकर सोम की सौ धारायें बनाई जा रही हैं। क्रान्तदर्शी लोग सोम की बहुविध धाराओं को शोधित करते हैं। सोम, हमारे पुत्रों के लिए द्युलोक से गुप्त धन भेजो। तुम महान् धन के अग्रगामी हो। अथ विंशी—

दिवोनसर्गाअससृग्रमह्नांराजानमित्रंप्रमिनातिधीरः ।
पितुर्नपुत्रःक्रतुभिर्यतानआपवस्वविशेअस्याअजीतिम् ॥३०॥१६॥

दिवः । न । सर्गाः । अससृग्रम् । अह्नाम् । राजा । न । मित्रम् ।
प्र । मिनाति । धीरः । पितुः । न । पुत्रः । क्रतुऽभिः । यतानः ।
आ । पवस्व । विशे । अस्यै । अजीतिम् ॥ ३० ॥ १६ ॥

दिवोन यथादिवोद्योतमानस्य आदित्यस्याह्नां संबन्धिनः सर्गारश्मयः अससृग्रं विसृज्यन्ते तद्वत् सोमस्य सर्गाः सृज्यन्ते इतिसर्गाधाराः विसृज्यन्ते सृजेर्व्यत्ययेनकर्मार्थेलङिबहुलंछन्दसीतिशस्यश्लुः झेरमादेशश्छांदसः । धीरः प्राज्ञोराजा अयंसोमः मित्रं सखायं नप्रमिनाति नहिनस्ति क्रतुभिः कर्मभिर्यतानोयतमानः पुत्रः पितुर्न पितुर्यथा अपराभवंकरोति तद्वत् कर्मभिर्यतमानस्त्वं अस्यै विशे प्रजायै अजीतिं अपराजितिं अपराभवं आपवस्व आपापय यथा नपराजिताभवन्ति तथाकुर्वित्यर्थः ॥ ३० ॥

३०. जैसे दीप्त सूर्य की दिन करनेवाली किरणें बनाई जाती हैं, वैसे ही सोम की धारायें बनाई जाती हैं। सोम धीर राजा और मित्र हैं। कर्मकर्त्ता पुत्र जैसे पिता को नहीं हराता, वैसे ही सोम, तुम प्रजा को पराजित मत करो। ॥ इति सप्तमस्य चतुर्थे षोडशोवर्गः ॥ १६ ॥

प्रतेधारामधुमतीरसृग्रन्वारान्यत्पूतोअत्येष्यव्यान् ।
पवमानपवसेधामगोनांजज्ञानःसूर्यमपिन्वोअर्कैः ॥ ३१ ॥

प्र । ते । धाराः । मधुऽमतीः । असृग्रन् । वारान् । यत् । पूतः ।
अति ऽएषि । अव्यान् । पवमान । पवसे । धाम । गोनाम् ।
जज्ञानः । सूर्यम् । अपिन्वः । अर्कैः ॥ ३१ ॥

ते तव स्वभूता मधुमतीः मधुरत्वोधाराः प्रासृग्रन् तदाप्रसृज्यन्ते यद्यदा पूतोवसतीवरीभिः त्वं अव्यानविभवान् वारान् वालान् पवित्राण्यत्येषि अतीत्य गच्छसि । किंच हेपवमान गोनां गवांधाम धारकं पयोलक्षीकृत्य पवसे ततः जज्ञानः जायमानस्त्वं अर्कैरर्चनीयैः स्वतेजोभिः सूर्यमादित्यमपिन्वः पूरयसि ॥ ३१ ॥

३१. सोम, जिस समय तुम जल से मेषलोममय पवित्र को लाँघकर जाते हो, उस समय तुम्हारी मधुर धारायें बनाई जाती हैं। शोध्यमान सोम, गोदुग्ध को लक्ष्य करके तुम क्षरित होते हो। उत्पन्न होकर तुम अपने पूजनीय तेज के द्वारा आदित्य को भरपूर करते हो।

कनिक्रदद्नुपन्थामृतस्यशुक्रोविभास्यमृतस्यधाम ।
सइन्द्रायपवसेमत्सरवान्हिन्वानोवाचंमतिभिःकवीनाम् ॥ ३२ ॥

कनिक्रदत् । अनु । पन्थाम् । ऋतस्य । शुक्रः । वि । भासि ।
अमृतस्य । धाम । सः । इन्द्राय । पवसे । मत्सरऽवान् ।
हिन्वानः । वाचम् । मतिऽभिः । कवीनाम् ॥ ३२ ॥

अभिषूयमाणः सोमः ऋतस्य सत्यभूतस्य यज्ञस्य पंथां पंथानं मार्गमनु कनिक्रदत् पुनःपुनः शब्दायते । अथप्रत्यक्षः अमृतस्यामरणधर्मस्य धाम स्थानभूतः मरणरहितइत्यर्थः । तादृशः शुक्रः शुक्लवर्णः त्वं विभासि विशेषेणराजसि मत्सरवान् मदकररसयुक्तः सत्वं इन्द्रायेन्द्रार्थं पवसे क्षरसि । कीदृशः कवीनां स्तोतॄणां मतिभिः सह वाचं शब्दं हिन्वानः प्रेरयन् पवसे ॥ ३२ ॥

३२. अभिषुत सोम सत्यरूप यज्ञ के मार्ग पर बार-बार शब्द करते हैं। अमर और शुक्लवर्ण सोम, तुम विशेष रूप से शोभित हो रहे हो। स्तोताओं की बुद्धि के साथ शब्द का प्रेरण करनेवाले सोम, तुम मदकर होकर इन्द्र के लिए क्षरित होते हो।

दिव्यःसुपर्णोवचक्षिसोमपिन्वन्धाराःकर्मणादेववीतौ ।
एन्दोविशकलशंसोमधानंक्रन्दन्निहिसूर्यस्योपरिश्मिम् ॥ ३३ ॥

दिव्यः । सुऽपर्णः । अव । चक्षि । सोम । पिन्वन् । धाराः ।
कर्मणा । देवऽवीतौ । आ । इन्दो इति । विश । कलशम् ।
सोमऽधानम् । क्रन्दन् । इहि । सूर्यस्य । उप । रश्मिम् ॥ ३३ ॥

हे सोम दिव्योदिविभवः सुपर्णः सुपतनस्त्वं अवचक्षि अवस्तात् पश्य च । चष्टेर्लेटिसि-पिव्यत्ययेनपरस्मैपदं । किंकुर्वन् देववीतौ देवानां हविर्भक्षणस्थानेयज्ञे कर्मणा धाराः पिन्वन् क्षरन् । किंच हे इन्दो सोमधानं कलशं आविश क्रन्दन्शब्दायमानस्त्वं सूर्यस्य प्रेरकस्यादित्यस्य रश्मिकान्तिमुपोहि उपगच्छ ॥ ३३ ॥

३३. सोम, देवों के यज्ञ में कर्म के द्वारा धाराओं को गिराते हुए तुम द्युलोकोत्पन्न और सुन्दर पतनवाले हो। नीचे देखो। सोम, कलश की ओर जाओ। शब्द करते हुए तुम प्रेरक सूर्य की कान्ति को प्राप्त करो।

तिस्रोवाचईरयतिप्रवह्निर्ऋतस्यधीतिंब्रह्मणोमनीषाम् ।
गावोयन्तिगोपतिंपृच्छमानाःसोमंयन्तिमतयोवावशानाः ॥ ३४ ॥

तिस्रः । वाचः । ईरयति । प्र । वह्निः । ऋतस्य । धीतिम् ।
ब्रह्मणः । मनीषाम् । गावः । यन्ति । गोऽपतिम् । पृच्छमानाः ।
सोमम् । यन्ति । मतयः । वावशानाः ॥ ३४ ॥

वह्निर्वोढा यजमानः तिस्रोवाचः ऋग्यजुःसामात्मिकाः स्तुतीः प्रेरयति । तथा ऋतस्य यज्ञस्यधीतिं धारयित्रीं ब्रह्मणःपरिवृढस्य सोमस्य मनीषां मनसईशित्रीं कल्याणीं वाचं च प्रेरयति । किंच गोपतिं वृषभंयथा गावोभिगच्छन्ति तद्वत् । गवांस्वामिनं सोमं गावः पृच्छमानाः पृच्छंत्यः सत्योयन्ति स्वपयसामिश्रयितुमभिगच्छन्ति । तथा वावशानाः कामयमानाः मतयः स्तोतारः सोमं यन्ति स्तोतुमभिगच्छन्ति ॥ ३४ ॥

३४. वहनकर्त्ता यजमान तीनों वेदों की स्तुतियाँ करता है। वह यज्ञधारक और वृद्ध सोम की कल्याणकर स्तुति को प्रेरित करता है। जैसे साँड़ गायों की ओर जाता है, वैसे ही अपने पति सोम को दूध में मिलाने के लिए गायें सोम के पास जाती हैं। अभिलाषी स्तोता लोग स्तुति के लिए सोम के पास जाते हैं।

सोमंगावोधेनवोवावशानाःसोमंविप्रामतिभिःपृच्छमानाः ।
सोमःसुतःपूयतेअज्यमानःसोमेअर्कास्त्रिष्टुभःसंनवन्ते ॥३५॥१७॥

सोमम् । गावः । धेनवः । वावशानाः । सोमम् । विप्राः ।
मतिऽभिः । पृच्छमानाः । सोमः । सुतः । पूयते । अज्यमानः ।
सोमे । अर्काः । त्रिऽस्तुभः । सम् । नवन्ते ॥ ३५ ॥ १७ ॥

धेनवः प्रीणयित्र्योगावः सोमं वावशानाः कामयमानाभवन्तिविप्रामेधाविनःस्तोतारः मतिभिः पृच्छमानाः पृच्छन्तोभवन्ति । अज्यमानः गोभिः सिच्यमानः सुतोभिषुतः सोमः ऋत्विग्भिः परिपूयते । तथा त्रिष्टुभः त्रिष्टुब्रूपाः अर्काः अस्माभिः क्रियमाणाः एतेमंत्राः सोमे संनवन्ते संगच्छन्ते ॥ ३५ ॥

३५. प्रसन्नता देनेवाली गायें सोम की अभिलाषा करती हैं। मेधावी स्तोता लोग स्तुति के द्वारा सोम को पूछते हैं। गोरस के द्वारा सिक्त और अभिषुत सोम ऋत्विकों के द्वारा परिपूरित किये जाते हैं। त्रिष्टुप् छन्दवाले मंत्र सोम से मिलते हैं।

॥ इति सप्तमस्य चतुर्थे सप्तदशो वर्गः ॥१७॥

एवानःसोमपरिषिच्यमानआपवस्वपूयमानःस्वस्ति ।
इन्द्रमाविशबृहतारवेणवर्धयावाचंजनयापुरंन्धिम् ॥ ३६ ॥

एव । नः । सोम । परिऽसिच्यमानः । आ । पवस्व । पूयमानः ।
स्वस्ति । इन्द्रम् । आ । विश । बृहता । रवेण । वर्धय ।
वाचम् । जनय । पुरम्ऽधिम् ॥ ३६ ॥

हेसोम परिषिच्यमानः परितः पात्रेषु सिच्यमानः पूयमानस्त्वं नोस्माकमेव स्वस्ति अविनाशमापवस्व आप्रापय । किंच बृहता महता रवेण शब्देनसह इन्द्रमाविश प्रविश तथा वाचं स्तुतिलक्षणां वर्धय । किंच पुरंधिं बहुधियं प्रज्ञानं जनय अस्मभ्यं उत्पादय । वाक्यभेदादनिघातः ॥ ३६ ॥

३६. सोम, पात्रों में परिषिक्त और शोधित होकर हमारे लिए कल्याण-पूर्वक क्षरित होओ। महान् शब्द करते हुए इन्द्र के पेट में पैठो। स्तुति-रूप वचन को वर्द्धित करो। हमारे लिए अनेक स्तवों को विस्तृत करो।

अथ सप्तत्रिंशी—

आजाग्रविर्विप्रःक्रतामतीनांसोमःपुनानोअसदच्चमूषु ।
सपन्तियंमिथुनासोनिकामाअध्वर्यवोरथिरासःसुहस्ताः ॥ ३७ ॥

आ । जाग्रविः । विप्रः । क्रता । मतीनाम् । सोमः । पुनानः ।
असदत् । चमूषु । सपन्ति । यम् । मिथुनासः । निऽकामाः ।
अध्वर्यवः । रथिरासः । सुऽहस्ताः ॥ ३७ ॥

जागृविर्जागरणशीलः क्रता सुपांसुलुगितिषष्ठ्याआकारः । क्रतानां सत्यानां मतीनां स्तुतीनां विप्रोज्ञाता ससोमः पुनानः पूयमानःसन् चमूषु चमसेष्वासदत् आसीदति । मिथुनासः

परस्परंसंगताः निकामाः नितरांकामयमानाः रथिरासः यज्ञस्यनेतारः सुहस्ताः कल्याणपाणयः अध्वर्यवः पवित्रे यं सोमंसपन्ति स्पृशन्ति । षपसमवाये । सपतिःस्पृशतिकर्मेतिनिरुक्तः ॥३७॥

३७. जागरणशील, सत्य स्तोत्रों के ज्ञाता और शोधित सोम चमसों में बैठते हैं। परस्पर मिले हुए, अतीव अभिलाषी, यज्ञ के नेता और कल्याण-पाणि पुरोहित लोग जिन सोम को पवित्र में छूते हैं।

सपुनानउपसूरेनधातोभेअप्रारोदसीविषआवः ।
प्रियाचिद्यस्यप्रियसासऊतीसतूधनंकारिणेनप्रयंसत् ॥ ३८ ॥

सः । पुनानः । उप । सूरे । न । धाता । आ । उभे इति । अप्राः ।
रोदसी इति । वि । सः । आवरित्यावः । प्रिया । चित् । यस्य ।
प्रियसासः । ऊती । सः । तु । धनम् । कारिणे । न । प्र । यंसत् ॥३८॥

पुनानः पूयमानः ससोमः इन्द्रे उपगच्छति । तत्रदृष्टान्तः—सूरेन यथा सूर्ये धाता संवत्सरउपगच्छति । ससंवत्सरोविधातारं । संवत्सरेणैवास्मैप्रजाःप्रजनयतीत्याम्नानात् । किंचोभेरोदसी द्यावापृथिव्यौ आप्राः स्वमहिम्ना आपूरयति । तथा ससोमः व्यावः स्वतेजसा तमांसि विवृणोति । वृणोतेर्मत्रेघसेतिचेर्लुक् छन्दस्यपिदृश्यतेइत्यडागमः पूर्वपदादितिसइत्यस्यसांहितिकंषत्वं । प्रिया षष्ठ्याआकारः प्रियस्य यस्यसोमस्य यद्वा प्रियाणि प्रयच्छतः यस्यसोमस्य प्रियसासः अत्यन्तं प्रियतमाधाराः ऊती ऊत्यै रक्षणाय भवन्ति स तु क्षिप्रं अस्मभ्यं धनं प्रयंसत् प्रयच्छतु । यच्छतेर्लेटिसिप्यडागमः । तत्रदृष्टान्तः—कारिणेन यथा कारिणे च कृतकाय भृतिं प्रयच्छन्ति तद्वत् ॥३८॥

३८. वह शोधित सोम इन्द्र के पास वैसे ही जाते हैं, जैसे वर्ष आता है। वे द्यावापृथिवी को अपनी महिमा से पूरित करते हैं। सोम स्वतेज से अन्धकार को दूर करते हैं। जिन प्रिय सोम की प्रियतम धाराएँ रक्षा करती हैं, वे कर्मचारी के वेतन के समान हमें शीघ्र धन दें।

अथैकोनचत्वारिंशी—

सवर्धिताविवर्धनःपूयमानःसोमोमीढ्वाँअभिनोज्योतिषावीत् ।
येनानःपूर्वेपितरःपदज्ञाःस्वर्विदोअभिगाअद्रिमुष्णन् ॥ ३९ ॥

सः । वर्धिता । वर्धनः । पूयमानः । सोमः । मीढ्वान् । अभि । नः ।
ज्योतिषा । आवीत् । येन । नः । पूर्वे । पितरः । पदज्ञाः ।
स्वःविदः । अभि । गाः । अद्रिम् । उष्णन् ॥ ३९ ॥

---

१ नि०५. १६. । २ तै० ब्रा० १. ७. २ ।

वर्धिता देवानां स्वकलाप्रदानेन वर्धयिता वर्धनः स्वयंवर्धमानः पवित्रेण पूयमानः मीढ्वान् कामानांसेक्ता ससोमः नोस्माकं ज्योतिषा स्वतेजसा अभ्यावीत् अभिरक्षतु । येन सोमेन पदज्ञाः पणिभिरपहृतानां गवांपदानि जानन्तः स्वर्विदः सर्वज्ञाः सूर्यंजानन्तोवा नोस्माकंपूर्वे चिरन्तनाः पितरोंगिरसःगाः पशूनभिलक्ष्य अद्रिमुष्णन् शिलोच्चयमुष्णन् सोमतेजसा अंधकारावृतं शिलोच्चयंगत्वा पशूनाहरन्नित्यर्थः । उषिरिहमुष्णातिसमानकर्मा । यद्वा मुष्णातेर्लङि वर्णलोपः ॥ ३९ ॥

३९. देवों के वर्द्धक स्वयं वर्द्धमान, पवित्र में शोधित और मनोरथों के सेचक सोम अपने तेज से हमारी रक्षा करें। सोमपान के द्वारा पणियों के द्वारा अपहृत गायों के पद-चिह्नों को जानते हुए, सर्वज्ञ, सूर्य-ज्ञाता (हमारे) पितर (अङ्गिरा लोग) पशुओं को लक्ष्य करके अन्धकारावृत्त शिलासमूहों को सोम के तेज से देखकर पशुओं को ले आयें।

अक्रान्त्समुद्रःप्रथमेविधर्मञ्जनयन्प्रजाभुवनस्यराजा ।
वृषापवित्रेअधिसानोअव्येबृहत्सोमोवावृधेसुवानइन्दुः ॥४०॥१८॥

अक्रान् । समुद्रः । प्रथमे । विऽधर्मन् । जनयन् । प्रऽजाः ।
भुवनस्य । राजा । वृषा । पवित्रे । अधि । सानौ । अव्ये ।
बृहत् । सोमः । ववृधे । सुवानः । इन्दुः ॥ ४० ॥ १८ ॥

समुद्रः यस्मादापः समुद्रवन्ति ससमुद्रः अपांवर्षकोराजासोमः प्रथमे विस्तृते भुवनस्योदकस्य विधर्मन् विधारकेन्तरिक्षे प्रजा जनयन् । उत्पादयन् अक्रान् सर्वमतिक्रामति । क्रमतेर्लुङि तिपीडभावे वृद्धौ च कृतायां सिजलोपे मकारस्य मोनोधातोरितिनकारेरूपं । वृषा कामानां वर्षिता सुवानोभिषूयमाणः इन्दुर्दीप्तः ससोमः अधि अधिकं सानौ समुच्छ्रिते अव्ये अविमये पवित्रे बृहत् प्रभूतं ववृधे वर्धते ॥ ४० ॥

४०. जल-वर्षक और राजा सोम विस्तृत और भुवन के जल के धारक अन्तरिक्ष में प्रजा का उत्पादन करते हुए सबको लाँघ जाते हैं। कामवर्षक, अभिषुत और दीप्त सोम उच्च और मेषलोममय पवित्र में यथेष्ट बढ़ते हैं। ॥ इति सप्तमस्य चतुर्थेष्टादशोवर्गः ॥ १८ ॥

महत्तत्सोमोमहिषश्चकारापांयद्गर्भोवृणीतदेवान् ।
अदधादिन्द्रेपवमानओजोजनयत्सूर्येज्योतिरिन्दुः ॥ ४१ ॥

महत् । तत् । सोमः । महिषः । चकार । अपाम् । यत् । गर्भः ।
अवृणीत । देवान् । अदधात् । इन्द्रे । पवमानः । ओजः ।
अजनयत् । सूर्ये । ज्योतिः । इन्दुः ॥ ४१ ॥

महिषो महानपूज्योवा सोमो महत्प्रभूतं तत्कर्म चकार अकरोत्। किंतत् अपांगर्भः उदकानांगर्भभूतः जनयितृत्वाज्जन्यत्वाच्च ससोमः देवानवृणीत समभजतेतियत् तत्कृतवानिति। किंच पवमानः पूयमानः सोमः ओजः सोमपानेन जन्यं बलं इन्द्रे अदधात् व्यदधात्। तथा इन्दुः सोमः सूर्येज्योतिस्तेजःअजनयत् ॥ ४१ ॥

४१. पूज्य सोम ने प्रचुर कार्य किये हैं। जल के गर्भ सोम ने देवों का आश्रय किया। शोधित सोम ने इन्द्र के लिए बल धारण किया। सोम ने सूर्य में तेज उत्पन्न किया।

मत्सिवायुमिष्टयेराधसेचमत्सिमित्रावरुणापूयमानः।
मत्सिशर्धोमारुतंमत्सिदेवान्मत्सिद्यावापृथिवीदेवसोम ॥ ४२ ॥

मत्सि। वायुम्। इष्टये। राधसे। च। मत्सि। मित्रावरुणा।
पूयमानः। मत्सि। शर्धः। मारुतम्। मत्सि। देवान्। मत्सि।
द्यावापृथिवी इति। देव। सोम ॥ ४२ ॥

हे सोम त्वं वायुं मत्सि मादय। किमर्थं इष्टये अस्माकमेषणाय अन्नाय राधसे धनाय च। तथा पूयमानः पवित्रेण त्वं मित्रावरुणा मित्रावरुणौ च मत्सि तर्पयसि। किंच मारुतं मरुतां स्वभूतं शर्धोबलं च मत्सि। तथा देवानिन्द्रादीन् मत्सि हर्षयसि। हेदेव स्तोतव्य हेसोम द्यावापृथिवी द्यावापृथिव्यौ च मत्सि मादय एतान् हर्षयुक्तान् कृत्वास्मभ्यंधनं प्रयच्छेत्यर्थः ॥४२॥

४२. सोम, हमारे धन और अन्न के लिए वायु को प्रमत्त करो। शोधित होकर तुम मित्र और वरुण को तृप्त करते हो। मरुतों के बल और इन्द्रादि को हृष्ट करते हो। स्तुत्य सोम, द्यावापृथिवी को प्रमत्त करो। हमें धन दो।

अथ त्रिचत्वारिंशी—

ऋजुःपवस्ववृजिनस्यहन्तापामीवांबाधमानोमृधश्च।
अभिश्रीणन्पयःपयसाभिगोनामिन्द्रस्यत्वंतववयंसखायः ॥४३॥

ऋजुः। पवस्व। वृजिनस्य। हन्ता। अप। अमीवाम्।
बाधमानः। मृधः। च। अभिऽश्रीणन्। पयः। पयसा।
अभि। गोनाम्। इन्द्रस्य। त्वम्। तव। वयम्। सखायः ॥ ४३ ॥

हेसोम ऋजुः ऋजुगमनःसन् पवस्व क्षर। किंकुर्वन् वृजिनस्य उपद्रवस्य हन्ता अमीवां रोगरूपं राक्षसं अपबाधमानः तथा अस्मदीयान् मृधोहिंसकान् शत्रूंश्च बाधमानः सन् प-

वस्व ततः पयआत्मीयंरसं गोनां गवांपयसाक्षीरेण अभिश्रीणन् अभिसंयोजयन् पात्राण्यभिगच्छसि । अपिच त्वं इन्द्रस्य सखासि हेसोम तव वयं सखायः स्तुत्यस्तोतृत्वयष्टृयष्टव्यत्वलक्षणेन सखिभूताः स्मः ॥ ४३ ॥

४३. उपद्रवों के घातक, वेगशाली राक्षस और हिंसकों के बाधक सोम, क्षरित होओ। अपने रस को दूध में मिलाते हुए पात्रों में जाते हो। तुम इन्द्र के मित्र हो। सोम, हम तुम्हारे मित्र हों।

मध्वः॑सूदं॑पवस्व॒वस्व॒उत्सं॑वी॒रंच॑न॒आप॑वस्वा॒भगं॑च ।
स्वद॒स्वेन्द्रा॑य॒पव॑मानइन्दोर॒यिंच॑न॒आप॑वस्वासमु॒द्रात् ॥ ४४ ॥

मध्वः॑ । सूद॑म् । प॒व॒स्व॒ । वस्वः॑ । उत्स॑म् । वी॒रम् । च॒ । नः॒ । आ । प॒व॒स्व॒ । भग॑म् । च॒ । स्वद॑स्व । इन्द्रा॑य । पव॑मानः । इ॒न्दो॒ इति॑ । र॒यिम् । च॒ । नः॒ । आ । प॒व॒स्व॒ । स॒मु॒द्रात् ॥ ४४ ॥

हे सोम मध्वोमाधुर्यस्य सूदं क्षारयितारं घनीभूतं आपवस्व । वस्वो वसु धनस्य उत्सं उत्स्यन्दकं रसं पवस्व । किंच नोस्मभ्यं वीरं पुत्रं आपवस्व आप्रापय । तथा भगं भजनीयं धनंच देहि । हेइन्दो पवमानः पूयमानः सन् इन्द्राय स्वदस्व रुचितोभव । ततस्त्वं नोस्मभ्यं समुद्रादन्तरिक्षाद रयिं धनं पुत्रंवा राति ददाति क्षीरमिति रयिर्गौर्वा तांवा पवस्व देहि ॥४४॥

४४. सोम, मधुर भाण्डार को क्षरित करो। धन के वर्षक रस को क्षरित करो। हमें वीर पुत्र दो। भजनीय अन्न भी दो। सोम शोधित होकर तुम इन्द्र के लिए रुचिकर होओ। हमारे लिए अन्तरिक्ष से धन दो।

अथ पञ्चचत्वारिंशी—

सोमः॑सु॒तोधार॒यात्यो॒नाहित्वा॒सिन्धु॑र्नि॒म्नम॒भिवा॒ज्य॑क्षाः ।
आयोनि॒वन्य॑मसदत्पुना॒नःसमिन्दु॑र्गो॒भिरसर॒त्सम॒द्भिः॥४५॥१९॥

सोमः॑ । सु॒तः । धार॑या । अत्यः॑ । न । हित्वा॑ । सिन्धुः॑ । न । नि॒म्नम् । अ॒भि । वा॒जी । अ॒क्षा॒रिति॑ । आ । योनि॑म् । वन्य॑म् । अ॒स॒द॒त् । पु॒ना॒नः । सम् । इन्दुः॑ । गो॒भिः । अ॒स॒र॒त् । सम् । अ॒त्ऽभिः ॥ ४५ ॥ १९ ॥

सुतोभिषुतः सोमोधारयास्वीययाअत्योनअतनशीलोश्वइव हित्वागत्वा हिनोतेः क्वनिपिरूपं । किंच वाजी बलवान् सोमः सिन्धुर्न यथासिन्धुः स्यन्दमाना नदी निम्नं प्रदेशमभिगच्छति तद्वत् निम्नमधरभाविनं कलशमभ्यक्षाः अभिक्षरति । ततः पुनानः पूयमानः सोमः वन्यं

वृक्षभवं योनिं योनिस्थानं कलशं आसदत् आसीदति । सोयमिन्दुः सोमः गीर्भिर्गोविकारैः क्षीरादिभिः श्रयणैः सं असरत् संसरति तथा अद्भिर्वसतीवरीभिश्च संगच्छते ॥ ४५ ॥

४५. अभिषुत सोम अपनी धारा से, वेगशाली अश्व के समान, जानेवाले हैं। जैसे प्रस्रवणशील नदी नीचे जाती है, वैसे ही सोम कलश को जाते हैं। शोधित सोम वृक्षोत्पन्न कलश में बैठते हैं। सोम जल और दूध में मिलाये जाते हैं। ॥ इति सप्तमस्य चतुर्थे एकोनविंशोवर्गः ॥ १९ ॥

एषस्यतेपवतइन्द्रसोमश्चमूषुधीरउशतेतवस्वान् ।
स्वर्चक्षारथिरःसत्यशुष्मःकामोनयोदेवयतामसर्जि ॥ ४६ ॥

एषः । स्यः । ते । पवते । इन्द्र । सोमः । चमूषु । धीरः ।
उशते । तवस्वान् । स्वःऽचक्षाः । रथिरः । सत्यऽशुष्मः ।
कामः । न । यः । देवऽयताम् । असर्जि ॥ ४६ ॥

हे इन्द्र उशते कामयमानाय ते तुभ्यं त्वदर्थं धीरः प्राज्ञः तवस्वान् वेगवान् स्यः सएषसोमः चमूषु चमसेषु पवते क्षरति स्वर्चक्षाः सर्वदर्शिनः रथिरोरथवान् सत्यशुष्मः यथार्थबलोयः सोमः देवयतां देवानिच्छतां यजमानानां कामोन कामदइवासर्जि असृज्यत अदीयतइत्यर्थः ॥ ४६ ॥

४६. इन्द्र, अभिलाषी तुम्हारे लिए प्राज्ञ और वेगशाली सोम चमसों में क्षरित होते हैं। सर्वदर्शी, रथवाले और यथार्थ बली सोम देवकामी यजमानों के लिए कामदाता के समान बनाये गये हैं।

एषप्रत्नेनवयसापुनानस्तिरोवपांसिदुहितुर्दधानः ।
वसानःशर्मत्रिवरूथमप्सुहोतेवयातिसर्मनेषुरेभन् ॥ ४७ ॥

एषः । प्रत्नेन । वयसा । पुनानः । तिरः । वपांसि । दुहितुः ।
दधानः । वसानः । शर्म । त्रिऽवरूथम् । अऽप्सु ।
होताऽइव । याति । सर्मनेषु । रेभन् ॥ ४७ ॥

प्रत्नेन पूर्वकालीनेन वयसा अन्नेन पुनानः पूयमानः अन्नात्मिकया धारया क्षरन्नित्यर्थः तादृशः दुहितुः सर्वस्यदोग्ध्र्याः पृथिव्यां वपांसि वर्पइतिरूपनाम वृणोति शरीरमिति रूपाणि तिरोदधानः स्वतेजसा तिरस्कुर्वन् आच्छादयन् तथा त्रिवरूथं त्रिभूमिकोपेतं यद्वा त्रयः शीतातपवर्षाः तेषां निवारकं शर्म यज्ञगृहं वसानः आच्छादयन् अप्सु वसतीवरीषुस्थि-

तः एषसोमः होतेव यथाहोता स्तुतिध्वनिं कुर्वन् यज्ञेषु याति तद्वत् रेभन् शब्दायमानःसन् समनेषु समन्ति कर्माणिपृष्टाः प्रगल्भायंत्यत्रेति समना यज्ञाः तेषु याति गच्छति ॥ ४७ ॥

४७. पूर्वकालीन और अन्नरूप धारा से गिरते हुए सबका वोहन करनेवाली पृथिवी के रूपों को अपने तेज से ढकते हुए, शीत, आतप और वर्षा के निवारक यज्ञ-गृह को बनाते हुए तथा जल में अवस्थिति करते हुए सोम, स्तोत्र-ध्वनि करनेवाले होता के समान, शब्द करते हुए यज्ञों में जाया करते हैं। अथाष्टाचत्वारिंशी—

नूनस्त्वंरथिरोदेवसोमपरिस्रवचम्वोःपूयमानः ।
अप्सुस्वादिष्ठोमधुमाँऋतावादेवोनयःसवितासत्यमन्मा ॥ ४८ ॥

नु । नः । त्वम् । रथिरः । देव । सोम । परि । स्रव ।
चम्वोः । पूयमानः । अप्ऽसु । स्वादिष्ठः । मधुऽमान् ।
ऋतऽवा । देवः । न । यः । सविता । सत्यऽमन्मा ॥ ४८ ॥

हे देव काम्यमान हेसोम रथिरोरथवांस्त्वं नोस्माकं स्वभूतेयज्ञे चम्वोरभिषवणफलकयोः पूयमानः सन् अप्सु वसतीवरीषु नुक्षिप्रं परिस्रव परितः क्षर । स्वादिष्ठः स्वादुतमः अतएव मधुमान् माधुर्ययुक्तः ऋतावा ऋतवान् यज्ञवान् सविता सर्वस्यप्रेरकोयस्त्वं देवोन देवइव सत्यमन्मा सत्यस्तुतिकोभवसि सत्वं परिस्रवेति ॥ ४८ ॥

४८. अभिलषणीय देव, तुम रथवाले हो। हमारे यज्ञ में अभिषवणफलकों पर क्षरित होकर वसतीवरी-जल में शीघ्र और चारों ओर क्षरित होओ। स्वादिष्ठ, मधुर, याज्ञिक और सबके प्रेरक तुम, देवता के समान, सत्य स्तोत्रवाले हो।

अभिवायुंवीत्यर्षागृणानोऽभिमित्रावरुणापूयमानः ।
अभीनरंधीजवनंरथेष्ठामभीन्द्रंवृषणंवज्रबाहुम् ॥ ४९ ॥

अभि । वायुम् । वीती । अर्ष । गृणानः । अभि ।
मित्रावरुणा । पूयमानः । अभि । नरम् । धीऽजवनम् ।
रथेऽस्थाम् । अभि । इन्द्रम् । वृषणम् । वज्रऽबाहुम् ॥ ४९ ॥

हेसोम गृणानः स्तूयमानः त्वं वीती सुपांसुलुगिति चतुर्थ्याःपूर्वसवर्णदीर्घः । वीत्यै पानाय वायुमभ्यर्ष अभिगच्छ । तथा पवित्रेण पूयमानस्त्वं मित्रावरुणा मित्रावरुणौच पानायाभिगच्छ । किंच नरं सर्वस्यनेतारं धीजवनं बुध्यासमंवेगं कुर्वाणं रथेष्ठां रथेस्थां रथेतिष्ठन्तं अनेनाश्विनावभिधीयेते । एकवचनं प्रत्येकविवक्षया समुदायविवक्षयावा।एवादृशावश्विनौचाभिगच्छ । तथा वृषणं कामानां वर्षकं वज्रबाहुं वज्रयुक्तबाहुं इन्द्रंच त्वंपानायाभिगच्छ॥४९॥

४९. स्तुत होते हुए तुम पान के लिए वायु के पास जाओ। पवित्र में शोधित होकर तुम पान के लिए मित्र और वरुण के पास जाओ। सबके नेता, वेगशाली और रथ पर रहनेवाले अश्विद्वय के पास जाओ। कामवर्षक और वज्रबाहु इन्द्र के पास भी जाओ।

अभिवस्त्रांसुवसनान्यर्षाभिधेनूःसुदुघाःपूयमानः ।
अभिचन्द्राभर्तवेनोहिरण्याभ्यश्वान्रथिनोदेवसोम ॥ ५०॥२०॥

अभि । वस्त्रा । सुऽवसनानि । अर्ष । अभि । धेनूः । सुऽदुघाः ।
पूयमानः । अभि । चन्द्रा । भर्तवे । नः । हिरण्या ।
अभि । अश्वान् । रथिनः । देव । सोम ॥ ५० ॥ २० ॥

हेसोम त्वमस्माकं सुवसनानि सुपरिधानानि वस्त्रा वस्त्राणि अभ्यर्ष अभिगमय । यद्वा सुवसनानि शोभनवस्त्रसहितानि वस्त्रा आच्छादकानि धनान्यभिगमय । किंच पूयमानः पवित्रेण त्वं सुदुघाः सुष्ठुपयसोदोग्ध्रीः धेनूः नवप्रसूतिकागाः अभिप्रापय । अपिच चन्द्रा चन्द्राण्याह्लादकानि हिरण्या हिरण्यानि भर्तवे भरणाय पोषणाय नोस्माकमभिगमय । तथा हे-देव स्तोतव्य हेसोम रथिनोरथवतोश्वान् अस्माकमभिप्रापय ॥ ५० ॥

५०. सोम, हमारे लिए तुम सुन्दर-सुन्दर वस्त्र ले आओ। शोधित होकर तुम हमें मधुर दूध देनेवाली और नवप्रसूता गाय दो। हमारे भरण के लिए अह्लादक सोना हमें दो। स्तुत्य सोम, रथवाले अश्व भी हमें दो।

॥ इति सप्तमस्य चतुर्थे विंशोवर्गः ॥ २० ॥

अथैकपंचाशी—

अभीनोअर्षदिव्यावसून्यभिविश्वापार्थिवापूयमानः ।
अभियेनद्रविणमश्नवामाभ्यार्षेयंजमदग्निवत्नः ॥ ५१॥

अभि । नः । अर्ष । दिव्या । वसूनि । अभि । विश्वा । पार्थिवा ।
पूयमानः । अभि । येन । द्रविणम् । अश्नवाम ।
अभि । आर्षेयम् । जमदग्निऽवत् । नः ॥ ५१ ॥

हे सोम पवित्रेण पूयमानस्त्वं दिव्या दिव्यानि दिविभवानि वसूनि धनानि नोस्माकमभ्यर्ष अभिगमय । तथा पार्थिवा पार्थिवानि पृथिव्यांभवानि विश्वा सर्वाणि धनान्यभिगमय । तथा येन त्वदीयेन सामर्थ्येन द्रविणं धनं वयमभ्यश्नवाम अभिव्याप्नुयाम तत्सामर्थ्यमभिगमय । किंच आर्षेयं आर्षाणामृषिपुत्राणां योग्यंधनं जमदग्निवत् जमदग्नेर्यथा त्वंप्रापयः एवं नोस्माकमपि अभ्यर्ष । यद्वा आर्षेयं आर्षाणां योग्यं मंत्रं जमदग्नेःस्वभूतंमंत्रं यथा स्वादुतममकार्षीः एवमस्माकं तादृशंमंत्रं स्वादुतमंकुर्विति कुत्सोनामऋषिःप्रार्थयते ॥ ५१ ॥

११. सोम, पवित्र-द्वारा शोधित होकर तुम द्युलोकोत्पन्न धन हमें दो। पृथिवी पर उत्पन्न धन भी हमें दो। हमें द्रव्य प्राप्त करने की शक्ति दो। जमदग्नि ऋषि के समान ऋषि-पुत्रों का योग्य धन हमें दो।

अयापवापवस्वैनावसूनिमांश्चत्वइन्दोसरसिप्रधन्व ।
ब्रध्नश्चिदत्रवातोनजूतःपुरुमेधश्चित्तकवेनरंदात् ॥ ५२ ॥

अया । पवा । पवस्व । एना । वसूनि । मांश्चत्वे । इन्दो
इति । सरसि । प्र । धन्व । ब्रध्नः । चित् । अत्र । वातः ।
न । जूतः । पुरुऽमेधः । चित् । तकवे । नरम् । दात् ॥ ५२ ॥

हे सोम अया अनया पवा पवमानया धारया सह एना एनानि वसूनि धनानि पवस्व क्षर। पवा पूङ्पवने अन्येभ्योदृश्यन्तइतिविच्प्रत्ययः आर्धधातुकलक्षणोगुणः सावेकाचइतितृतीयायाउदात्तत्वं। तथा हेइन्दो तथा त्वं मांश्चत्वे मन्यमानानां चातके सरसि उदके वसतीवर्याख्ये प्रधन्व प्रगच्छ। ततः अत्र अस्मिन्सोमे पूयमानेसति ब्रध्नःचित् सर्वेषां प्रज्ञापकः मूलभूतोपि आदित्योपि वातोन वातइव जूतः वेगितःसन् किंच पुरुमेधःचित् बहुविधयज्ञइन्द्रश्चित् इन्द्रोपि तकवे तकतिर्गतिकर्मसुपठितः अस्मादौणादिकऊनप्रत्ययः सोममभिगच्छते स्तुतिभिः मह्यं नरं कर्मनेतारं पुत्रं दात् प्रयच्छतु हेसोम त्वया तर्पितौ सन्ताविन्द्रादित्यौ मह्यं पुत्रं प्रयच्छता मित्यर्थः ॥ ५२ ॥

५२. सोम, शोधित धारा के द्वारा ये सारे धन क्षरित करो। सोम, माननेवाले यजमानों के वसतीवरी-जल में जाओ। सबके ज्ञापक और वायु के समान वेगशाली सूर्य और अनेक यज्ञोंवाले इन्द्र भी सोम के पास जाते हैं। सोम मुझे कर्मनिष्ठ पुत्र दें। सोम, तुम्हारे द्वारा तृप्त किये गये इन्द्र और सूर्य भी पुत्र दें।

उतनएनापवयापवस्वाधिश्रुतेश्रवाय्यस्यतीर्थे ।
षष्टिंसहस्रानैगुतोवसूनिवृक्षंनपक्वंधूनवद्रणाय ॥ ५३ ॥

उत । नः । एना । पवया । पवस्व । अधि । श्रुते । श्रवाय्यस्य ।
तीर्थे । षष्टिम् । सहस्रा । नैगुतः । वसूनि । वृक्षम् । न ।
पक्वम् । धूनवत् । रणाय ॥ ५३ ॥

हेसोम उतापिच श्रवाय्यस्य सर्वैः श्रवणीयस्य सोमस्य तव श्रुते प्रसिद्धौ यद्वा षष्ठ्यर्थेचतुर्थी श्रुतः शब्दस्य तीर्थे स्थाने नोस्माकं स्वभूतेयज्ञे एना अनया पवया पूयमानया धारया अधि अधिकं पवस्व क्षर। नैगुतः नीचीनं गवन्ते शब्दायन्तइति निगुतः शत्रवः। तेषां

हन्तृत्वेन संबन्धी सोयंसोमः षष्टिं सहस्रा षष्टिसंख्याकानि सहस्राणि वसूनि धनानि रणाय शत्रूणां जयार्थं धूनवत् अस्माकमकंपयत् प्रायच्छदितियावत्। कथमिव वृक्षंनपक्वं पक्वफलं वृक्षं यथा कंपयति फलार्थी तद्वत् ॥ ५३ ॥

५३. सोम, सबके द्वारा तुम आश्रयणीय हो। हमारे शब्दतीर्थ (यज्ञ) में इस धारा के द्वारा भली भाँति क्षरित होओ। जैसे फल पाने की इच्छा करनेवाला वृक्ष को कँपाता है, वैसे ही शत्रु-घातक सोम ने साठ हजार धनों को, शत्रु-जय के लिए, हमें दिया।

महीमेअस्यवृषनामशूषेमांश्वत्वेवापृशनेवावधत्रे ।
अस्वापयन्निगुतःस्नेहयच्चापामित्राँअपाचितोअचेतः ॥ ५४ ॥

महि । इमे इति । अस्य । वृषनाम । शूषे इति । मांश्वत्वे ।
वा । पृशने । वा । वधत्रे इति । अस्वापयत् । निऽगुतः ।
स्नेहयत् । च । अप । अमित्रान् । अप । अचितः । अच । इतः ॥५४॥

महि महती प्रभूते वृषनाम सुपांसुलुगितिसुपोलुक् वृषनामनी वर्षणनमने शत्राणां वर्षणं शत्रूणां नमनं इमे एते द्वेकर्मणी अस्यसोमस्य शूषे सुखकरेभवतः। येच कर्मणी मांश्वत्वे अश्वनामैतत्। मक्षू चरतीति अश्वैःक्रियमाणेयुद्धे तत्साध्यत्वात् युद्धे वा अपिवा पृशने स्पर्शनसाध्ये बाहुयुद्धे वधत्रे शत्रूणांहिंसनशीले भवतः सोयं निगुतः नीचैः शब्दायमानान् शत्रून् अस्वापयत् ताभ्यामसूषुपत्। अवधीदित्यर्थः। किंच स्नेहयत् प्राद्रवयत् संग्रामाच्छत्रून्। अथप्रत्यक्षकृतः हेसोम सर्वे अमित्रान् शत्रून् अपाच अपागमय। तथा अचितः अग्निचयनमकुर्वतो नास्तिकांश्च इतोस्मत्सकाशात् अपाच अपगमय अचतिर्गतिकर्मा ॥ ५४ ॥

५४. बाण बरसाना और शत्रुओं को नीचे करना—सोम के ये दो कर्म सुखावह हैं। ये दोनों कर्म अश्व-युद्ध और द्वन्द्व-युद्ध में शत्रु-संहारक होते हैं। इन दोनों कर्मों से सोम ने शब्द करनेवाले शत्रुओं का बध किया। सोम ने शत्रुओं को युद्ध से दूर किया। सोम, शत्रुओं को दूर करो। अग्निहोत्र न करनेवालों को भी दूर करो।

संत्रीपवित्राविततान्येष्यन्वेकंधावसिपूयमानः ।
असिभगोअसिदात्रस्यदातासिमघवाममघवद्भ्यइन्दो ॥५५॥२१॥

सम् । त्री । पवित्रा । विऽततानि । एषि । अनु । एकम् ।
धावसि । पूयमानः । असि । भगः । असि । दात्रस्य ।
दाता । असि । मघऽवा । मघवत्ऽभ्यः । इन्दो इति ॥ ५५ ॥ २१ ॥

हेसोम वितत्तानि विस्तृतानि त्री त्रीणि पवित्रा अग्निवायुसूर्यात्मकानि पवित्राणि समेपि सम्यक्प्राप्तोपि। किंच पूयमानस्त्वं एकमविवालकृतंपवित्रं अनुधावसि अनुगच्छसि। किंच त्वं भगोभजनीयोसि तथा दात्रस्यदेयस्यधनस्य दातासि । कथमस्यधनदत्वमितिचेत्तदुच्यते। हेइन्दो सोम मघवद्भ्योन्येभ्योपित्वं मघवासि अतिशयेन धनवान्भवसि ॥ ५५ ॥

५५. सोम, अग्नि, वायु और सूर्य नाम के तीन विस्तृत पवित्रों को तुम भली भाँति प्राप्त करते हो। शोधित होते हुए तुम मेषलोममय पवित्र में जाते हो। तुम भजनीय हो। दातव्य धन के दाता हो। सोम, सारे धनियों से तुम धनी हो। ॥ इतिसप्तमस्य चतुर्थे एकविंशोवर्गः ॥ २१॥

एषविश्ववित्पवतेमनीषीसोमोविश्वस्यभुवनस्यराजा ।
द्रप्साँ ईरयन्विदथेष्विन्दुर्विवारमव्यंसमयातियाति ॥ ५६ ॥

एषः । विश्वऽवित् । पवते । मनीषी । सोमः । विश्वस्य ।
भुवनस्य । राजा । द्रप्सान् । ईरयन् । विदथेषु । इन्दुः ।
वि । वारम् । अव्यम् । समया । अति । याति ॥ ५६ ॥

विश्ववित् सर्वस्यवेत्ता अतएव मनीषी मेधावी विश्वस्य भुवनस्य सर्वस्य लोकस्य राजा स्वामी एषसोमः पवते क्षरति। एतदेव विवृणोति। विदथेषु विन्दन्ति जानंत्यत्रदेवानिति। यद्वा विन्दन्ति लभन्ते विदथायज्ञास्तेषु द्रप्सान् रसकणान् ईरयन् प्रेरयन्। इन्दुः सोमः अव्यं अविभवं वारं वालं पवित्रं समया उभयतः व्यतियाति व्यतीत्यगच्छति ॥५६॥

५६. सर्वज्ञ, मेधावी और सारे संसार के स्वामी सोम क्षरित होते हैं। यज्ञों में रस-कणों को भेजते हुए सोम मेषलोममय पवित्र में दोनों ओर से जाते हैं।

अथ सप्तपंचाशत्तमी—

इन्दुंरिहन्तिमहिषाअदब्धाःपदेरेभन्तिकवयोनगृध्राः ।
हिन्वन्तिधीरादशभिःक्षिपाभिःसमञ्जतेरूपमपांरसेन ॥ ५७ ॥

इन्दुम् । रिहन्ति । महिषाः । अदब्धाः । पदे । रेभन्ति ।
कवयः । न । गृध्राः । हिन्वन्ति । धीराः । दशऽभिः ।
क्षिपाभिः । सम् । अञ्जते । रूपम् । अपाम् । रसेन ॥ ५७ ॥

महिषा महान्तः पूज्यावा अतएवादब्धाः केश्चिदप्यहिंसिता देवा इन्दुं सोमं रिहन्ति लिहंत्यास्वादयन्ति । किंच देवाः सोममुशन्तः सन्तः पदे तस्यास्य सोमस्य धारास्थाने रेभन्ति शब्दायन्ते । तत्र दृष्टान्तः—कवयोनगृध्राः धनमभिकांक्षमाणाः कवयः स्तोतारोयथा स्तुवन्तः शब्दायन्ते तद्वत् धीराः कर्मणिकुशला ऋत्विजः दशभिः एतत्संख्याकाभिः क्षिपाभिरंगुलीभिः तमिमंसोमं हिन्वंति अभिषवार्थं प्रेरयन्ति । अपिच रूपं अंशुं अपां वसतीवर्याख्यानां रसेन समंजते सम्यक्सेवयन्ति ॥ ५७ ॥

५७. पूज्य और अहिंसित देव लोग सोम का आस्वादन करते हैं। सोमास्वादन करनेवाले देवता सोम की धारा के पास शब्द करते हैं। जैसे धनाभिलाषी स्तोता लोग शब्द करते हैं, वैसे ही कर्म-कुशल पुरोहित लोग दस अंगुलियों से सोम को प्रेरित करते हैं और जल के द्वारा सोम-रूप को मिश्रित करते हैं। अथाष्टापंचाशत्तमी—

त्वयावयंपवमानेनसोमभरेकृतंविचिनुयामशश्वत् ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ॥५८॥२२॥

त्वया । वयम् । पवमानेन । सोम । भरे । कृतम् । वि । चिनुयाम ।
शश्वत् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः ।
सिन्धुः । पृथिवी । उत । द्यौः ॥ ५८ ॥ २२ ॥

हेसोम पवमानेन पवित्रेण पूयमानेन त्वया सहायेन भरे संग्रामनाम संग्रामे शश्वद्बहु कृतं कर्तव्यं वयं विचिनुयाम विशेषेणकुर्याम । यस्मात्तवसहायेन कर्माणिकुर्मः तत्तस्माद् नोस्मान् मित्रोवरुणः अदितिः एतन्नामका सिंधुः एतदभिधानाच पृथिवी उतापिच द्यौः एतेमित्रादयोनोस्मान् मामहंतां पूजयन्तु धनादिदानेन ॥ ५८ ॥

५८. पवित्र में संशोधित तुम्हारी सहायता से हम युद्ध में अनेक कर्त्तव्य कर्मों को करें। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और द्युलोक, धन के द्वारा, हमारा मान करें।

॥ इति सप्तमस्य चतुर्थे द्वाविंशोवर्गः ॥ २२ ॥

अभिनइति द्वादशर्चं द्वितीयंसूक्तं वृषागिरोराज्ञःपुत्रअंबरीषः भरद्वाजपुत्रऋजिश्वाच उभौसहितावस्यऋषी इदमुत्तराणिचत्रीण्यानुष्टुभानि अत्रत्वेकादशीबृहती पवमानःसोमोदेवता । तथाचानुक्रम्यते—अभिनोद्वादशांबरीषऋजिश्वाचानुष्टुभंह बृहत्युपांत्येति । गतोविनियोगः ।

तत्र प्रथमा—

अभिनोवाजसातमंरयिमर्षपुरुस्पृहम् ।
इन्दोसहस्रभर्णसंतुविद्युम्नंविभ्वासहम् ॥ १ ॥

अभि । नः । वाजऽसातमम् । रयिम् । अर्ष । पुरुऽस्पृहम् ।
इन्दो इति । सहस्रऽभर्णसम् । तुविऽद्युम्नम् । विभ्वऽसहम् ॥ १ ॥

हे इन्दो दीप्त वाजसातमं अत्यन्तं बलप्रदं अन्नप्रदंवा रयिं धनं पुत्रंवानोस्माकमभ्यर्ष अभिगमय । कीदृशं पुरुस्पृहं बहुभिःस्पृहणीयं सहस्रभर्णसं बहुविधभरणं अनेकपोषणयुक्तमित्यर्थः । तुविद्युम्नं द्युम्नंद्योततेर्यशोवान्वेतियास्कः । बहुद्युम्नं बहुयशोयुक्तंवा विभ्वसहं विभ्वइतिमहन्नाम महतोभिभवितारं ॥ १ ॥

१. सोम, बहुतों के द्वारा अभिलषणीय, अनेक पोषणों से युक्त, अनेक यशवाला, महान् को भी पराजित करनेवाला और बलप्रद पुत्र हमें दो।

परिष्यसुवानोअव्ययंरथेनवर्माव्यत ।
इन्दुरभिद्रुणाहितोहियानोधाराभिरक्षाः ॥ २ ॥

परि । स्यः । सुवानः । अव्ययम् । रथे । न । वर्म । अव्यत ।
इन्दुः । अभि । द्रुणा । हितः । हियानः । धाराभिः । अक्षारिति ॥२॥

सुवानः सूयमानः स्यः ससोमः अव्ययमविमयं पवित्रं परिपवते । तत्रदृष्टान्तः—रथेन यथा रथेस्थितः पुरुषः वर्मकवचमव्यत परिव्ययति । व्ययतेर्लुङिवर्णलोपश्छान्दसः । अभिहितः अभितः प्रेरितः । यद्वा स्तोतृभिरभिष्टुतः सइन्दुः सोमः द्रुणा द्रुमयेन द्रोणकलशेन हियानः हि गतौवृद्धौच तेन पूर्यमाणःसन् धाराभिः अक्षाः क्षरति । क्षरतेर्लुङिरूपं ॥ २ ॥

२. रथ पर स्थित पुरुष जैसे कवच को धारण करता है, वैसे ही निष्पीड़ित सोम मेषलोममय पवित्र पर क्षरित होते हैं। स्तुत सोम काष्ठमय कलश से चालित होकर धारा-द्वारा क्षरित होते हैं।

अथ तृतीया—

परिष्यसुवानोअक्षाइन्दुरव्येमदच्युतः ।
धारायऊर्ध्वोअध्वरेभ्राजानैतिगव्ययुः ॥ ३ ॥

परि । स्यः । सुवानः । अक्षारिति । इन्दुः । अव्ये । मदऽच्युतः ।
धारा । यः । ऊर्ध्वः । अध्वरे । भ्राजा । न । एति । गव्यऽयुः ॥ ३ ॥

---

१ नि० ५. ५.

सुवानः सूयमानः स्यः सइन्दुः सोमः मदच्युतः मदार्थं देवैः प्रेरितःसन् अव्ये अविभवे पवित्रे पर्यक्षाः परितःक्षरति अध्वरे। ऊर्ध्वः समुच्छ्रितः सर्वेषांमुख्योयः सोमः गव्ययुः गोकामः। यद्वाक्षीरादिकं कामयमानःसन् धारा धारया सह एति गच्छति। भ्राजा न भ्राजमानया दीप्त्या यथान्तरिक्षे गच्छति तद्वत् ॥ ३ ॥

३. निष्पीड़ित सोम, मद के लिए देवों के द्वारा प्रेरित होकर, मेषलोम के पवित्र में क्षरित होते हैं। जैसे शोभन दीप्ति से सोम अन्तरिक्ष में जाते हैं, वैसे ही सबके मुख्य सोम दुग्ध आदि की इच्छा करके धारा के साथ जाते हैं।

सहित्वंदेवशश्वतेवसुमर्तायदाशुषे।
इन्दोसहस्रिणंरयिंशतात्मानंविवाससि ॥ ४ ॥

सः। हि। त्वम्। देव। शश्वते। वसु। मर्ताय। दाशुषे। इन्दो इति। सहस्रिणम्। रयिम्। शतऽआत्मानम्। विवाससि ॥ ४ ॥

हे देव सोम सत्वं शश्वते पुत्रादिमत्वेन बहवे मर्ताय मनुष्याय दाशुषे हविर्दत्तवते यजमानाय वसु धनं विवाससि। हेइन्दो सोम त्वं सहस्रिणं सहस्रसंख्याकं रयिं धनं शतात्मानं अपरिमितपुत्रपौत्राद्युपेतं मह्यंच विवाससि प्रेरयसि। एकवाक्यतापक्षेहि तिङन्तस्यहियोगादनिघातः स्यात् ॥ ४ ॥

४. सोम, तुम अनेक मनुष्यों और हविर्दाता यजमान के लिए धन देते हो। सोम, तुम अनेक पुत्र-पौत्रों से युक्त अनेक संख्यक धन मुझे देते हो।

वयंतेअस्यवृत्रहन्वसोवस्वःपुरुस्पृहः।
निनेदिष्ठतमाइषःस्यामसुम्नस्याध्रिगो ॥ ५ ॥

वयम्। ते। अस्य। वृत्रऽहन्। वसो इति। वस्वः। पुरुऽस्पृहः। नि। नेदिष्ठऽतमाः। इषः। स्याम। सुम्नस्य। अध्रिगो इत्यध्रिऽगो॥५॥

हे वृत्रहन् शत्रूणांहन्तः सोम अस्यैतादृशस्य ते तव स्वभूतावयं स्मः। ततः हेवसो वासयितः पुरुस्पृहः बहुभिः स्पृहणीयस्य वस्वोवसुनोधनस्य त्वयादीयमानस्य वयं नितरां नेदिष्ठतमाः अत्यंतमन्तिकतमाः स्याम। तथा इषोन्नस्य। किंच हे अध्रिगो अधृतगमनसोम सुम्नस्य सुखस्य वयमन्तिकतमाः स्याम भवेम ॥ ५ ॥

५. शत्रुघातक सोम, हम तुम्हारे हों। वासक सोम, अनेकों द्वारा अभिलषणीय और तुम्हारे द्वारा प्रदत्त धन और अन्न के हम अत्यन्त समीपतम हों। धन-स्वरूप सोम, हम सुख के अत्यन्त समीप हों।

द्विर्यंपञ्चस्वयंशसंस्वसारोऽअद्रिसंहतम्।
प्रियमिन्द्रस्यकाम्यंप्रस्नापयन्त्यूर्मिणम्॥ ६॥ २३॥

द्विः। यम्। पञ्च। स्वऽयंशसम्। स्वस्वारः। अद्रिऽसंहतम्। प्रियम्। इन्द्रस्य। काम्यम्। प्रऽस्नापयन्ति। ऊर्मिणम्॥ ६॥ २३॥

द्विः पञ्च दशसंख्याकाः स्वसारः कर्मकरणार्थगितस्ततोगच्छंत्योंगुलयः स्वयशसं स्वभूतयशस्कं अद्रिसंहतं ग्रावभिरभिषुतं इन्द्रस्य प्रियं काम्यं सर्वैःकाम्यमानं ऊर्मिणं धाराभिस्वद्वन्तं यं सोमं प्रस्नापयन्ति वसतीवरीभिः प्रकर्षेण सेवयन्ति यजमानाः तं पुनन्तीत्युत्तरत्रसंबन्धः॥ ६॥

६. कर्म करने के लिए इधर-उधर जाननेवाली भगिनी-स्वरूपा दस अँगुलियाँ यशस्वी, पत्थरों पर अभिषुत, इन्द्रप्रिय, सबके द्वारा अभिलषित और धारावले जिस सोम की वसतीवरी के द्वारा सेवा करती हैं, उनको यजमान शोधित करते हैं। ॥ इति सप्तमस्य चतुर्थे त्रयोविंशोवर्गः॥ २३॥

परित्यंहर्यतंहरिंबभ्रुंपुनन्तिवारेण।
योदेवान्विश्वाँइत्परिमदेनसहगच्छति॥ ७॥

परि। त्यम्। हर्यतम्। हरिम्। बभ्रुम्। पुनन्ति। वारेण। यः। देवान्। विश्वान्। इत्। परि। मदेन। सह। गच्छति॥ ७॥

हर्यतं सर्वैःस्पृहणीयं हरिं हरितवर्णं बभ्रुं बभ्रुवर्णंच त्यं तं सोमं वारेण वालेन पवित्रेण परिपुनन्ति परिशोधयन्ति। यः सोमः विश्वान् सर्वानिन्द्रादीन् देवानिव देवानेव मदेन मादकेन रसेन सह परिगच्छति॥ ७॥

७. सबके काम्य, हरित-वर्ण और बभ्रु-वर्ण (पिङ्गल-वर्ण) सोम को मेषलोम के द्वारा संशोधित किया जाता है। सोम, अपने मदकर रस के साथ, सारे देवों के पास जाते हैं।

अस्यवोह्यवसापान्तोदक्षसाधनम्।
यःसूरिषुश्रवोबृहद्दधेस्वर्णहर्यतः॥ ८॥

अस्य। वः। हि। अवसा। पान्तः। दक्षऽसाधनम्। यः। सूरिषु। श्रवः। बृहत्। दधे। स्वः। न। हर्यतः॥ ८॥

वः इति छान्दसोवसादेशः हिरण्यधारणे योयूयं अस्यसोमस्य अवसा रक्षणेन दक्षसाधनं बलस्यसाधनं रसं पान्तः पिबन्तोभवथ। स्वर्ण आदित्यइव हर्यतः सर्वैःकाम्यमानोयोयंसोमः सूरिषु स्तोत्रेषु स्तोतृषु बृहन्महत् प्रभूतं श्रवोन्नं दधे विदधे स्थापयन्तीतियावत् ॥८॥

८. तुम लोग सोम के द्वारा रक्षित होकर बल-साधन रस का पान करो। सूर्य के समान सबके अभिलषणीय सोम स्तोताओं को प्रचुर अन्न देते हैं।

सवांयज्ञेषुमानवीइन्दुर्जनिष्टरोदसी।
देवोदेवीगिरिष्ठाअस्रेधन्तंतुविष्वणि ॥ ९ ॥

सः। वाम्। यज्ञेषु। मानवी इति। इन्दुः। जनिष्ट।
रोदसी इति। देवः। देवी इति। गिरिऽस्थाः। अस्रेधन्।
तम्। तुविऽस्वनि ॥ ९ ॥

हे मानवी मानव्यौ मनोःस्वभूते हेदेवी द्योतमाने हे रोदसी द्यावापृथिव्यौ वां युवयोः यज्ञेषुसइन्दुः सोमः जनिष्ट अजनि अन्तरिक्षे देवः स्वतेजसा सर्वंप्रकाशयन् पृथिव्यां गिरिष्ठाः ग्रावसुतिष्ठन् तंजातं सोमं तुविस्वनि बहुस्वने उपरे यज्ञेवा अस्रेधन् ऋत्विजोग्रावभिः अघ्नन् अभ्यषुण्वन्निति यावत् ॥ ९ ॥

९. मनु से उत्पन्न द्यावापृथिवी, पर्वतवासी सोम ने यज्ञ में तुम दोनों को बनाया। उच्च शब्दवाले यज्ञ में ऋत्विकों ने सोम का अभिषव किया।

इन्द्रायसोमपातवेवृत्रघ्नेपरिषिच्यसे।
नरेचदक्षिणावतेदेवायसदनासदे ॥ १० ॥

इन्द्राय। सोम। पातवे। वृत्रऽघ्ने। परि। सिच्यसे। नरे।
च। दक्षिणाऽवते। देवाय। सदनऽसदे ॥ १० ॥

हे सोम वृत्रघ्ने वृत्रस्यहंत्रे इन्द्राय षष्ठ्यर्थेचतुर्थी इन्द्रस्य पातवे पानार्थं परिषिच्यसे परितः पात्रेषु सिच्यसे। वसतीवरीभिर्वा। किंच दक्षिणावते ऋत्विग्भ्योदक्षिणादानेन वर्तते देवाय देवार्थं हवींषिदातुं सदनसदे यज्ञगृहे सीदते नरे मनुष्याय यजमानाय तस्मै फलदानार्थंपरिषिच्यसे ॥ १० ॥

१०. सोम, वृत्रघ्न इन्द्र के पान के लिए पात्रों में सिञ्चित किये जाते हो। ऋत्विकों को दक्षिणा देनेवाले और देवों के लिए हवि देने की इच्छा से यज्ञ-गृह में बैठे हुए यजमान को फल देने के लिए तुम सींचे जाते हो।

अथैकादशी—

तेप्रत्नासोव्युष्टिषुसोमाःपवित्रेअक्षरन् ।
अपप्रोथन्तःसनुतर्दुरश्चितःप्रातस्ताँअप्रचेतसः ॥ ११ ॥

ते । प्रत्नासः । विऽउष्टिषु । सोमाः । पवित्रे । अक्षरन् ।
अपऽप्रोथन्तः । सनुतः । दुरःऽचितः । प्रातरिति ।
तान् । अप्रऽचेतसः ॥ ११ ॥

व्युष्टिषु उषसां व्युच्छनेषु प्रकाशनेषु प्रत्नासः प्रत्नाः ते सोमाः पवित्रे अक्षरन् क्षरन्ति । येसोमाःसनुतः अन्तर्हितान् अप्रचेतसः प्रज्ञारहितान् दुरश्चितः स्तेननामैतत् कौटिल्येन चिन्वन्तीति तान् मायाविनः स्तेनान् प्रातः प्रातःकालएव अपप्रोथन्तः अपप्रोथनं चापप्रेरणं अपप्रेरयन्तः शब्देननिराकुर्वन्तोभवन्ति तेक्षरन्तीतिसमन्वयः ॥ ११ ॥

११. प्रतिदिन प्रातःकाल प्राचीन सोम पवित्र के ऊपर क्षरित होते हैं। मूर्ख "दुरश्चित्" नाम के दस्यु लोग प्रातःकाल सोम को देखकर अन्तर्धान और प्रवीभूत हो गये ।

तंसखायःपुरोरुचंयूयंवयंचसूरयः ।
अश्यामवाजंगन्ध्यंसनेमवाजंपस्त्यम् ॥ १२ ॥ २४ ॥

तम् । सखायः । पुरःऽरुचम् । यूयम् । वयम् । च । सूरयः । अश्याम ।
वाजंऽगन्ध्यम् । सनेम । वाजंऽपस्त्यम् ॥ १२ ॥ २४ ॥

हे सखायः स्तोतारः सूरयः प्राज्ञा यूयं वयंच यजमानाः पुरोरुचं पुरतोरोचमानं वाजगंध्यं बलकरसाधुगंधोपेतं तत्रभवं सोमं अश्याम अश्नीम पिबेम । किंच वाजपस्त्यं अन्नयुक्तगृहसहितं । यद्वा बलकरं सोमं सनेम संभजेमहि सोमेन बलान्नगृहादीनि भवन्तीत्यर्थः॥१२॥

१२. मित्रो, प्राज्ञ तुम और हम शोभित और बलकर तथा सुन्दर गन्ध से युक्त सोम को पियें। हम बलिष्ठ सोम का आश्रय करें।

॥ इति सप्तमस्य चतुर्थे चतुर्विंशोवर्गः ॥ २४ ॥

आहर्यतायेत्यष्टर्चं तृतीयंसूक्तं कश्यपगोचौरेभसूनू एतत्संज्ञौ द्वावृषी आद्यावृहती सप्तानुष्टुभः पवमानःसोमोदेवता । तथाचानुक्रान्तं—आहर्यतायाष्टौ रेभसूनूकाश्यपौबृहत्याद्येति । गवो विनियोगः ।

तत्र प्रथमा—

आहर्यतायधृष्णवेधनुस्तन्वन्तिपौंस्यम् ।
शुक्रांवयन्त्यसुरायनिर्णिजंविपामग्रेमहीयुवः ॥ १ ॥

आ । हर्यताय । धृष्णवे । धनुः । तन्वन्ति । पौंस्यम् । शुक्राम् ।
वयन्ति । असुराय । निःऽनिजम् । विपाम् । अग्रे । महीयुवः ॥ १॥

हर्यताय सर्वैःस्पृहणीयाय धृष्णवे शत्रूणांधर्षणशीलाय सोमाय पौंस्यं पुंस्त्वस्याभिव्यंजकं धनुरातन्वंति धनुषि ज्यांकुर्वन्तीति सोमस्य धाराविसर्गार्थं वितायमानं पवित्रमभिधीयते। तदेव विवृणोति महीयुवः पूजाकामा ऋत्विजः विपां मेधाविनां देवानामग्रे पुरस्ताद् शुक्रां शुक्लवर्णां निर्णिजं ययासोमोनिर्णिज्यते तां असुराय बलवते वयन्ति वितन्वंति । दशापवित्रं विस्तारयन्तीत्यर्थः । वयतिर्गतिकर्मा ॥ १ ॥

१. सबके काम्य और शत्रुओं को रगड़नेवाले सोम के लिए पौरुष प्रकट करनेवाले धनुष पर ज्या (गुण) को चढ़ाया जाता है। पूजार्थी ऋत्विक् लोग मेधावी देवों के आगे असुर (बली) सोम के लिए शुक्लवर्ण दशापवित्र (छनना) फैलाते हैं।

अधक्षपापरिष्कृतोवाजाँअभिप्रगाहते ।
यदींविवस्वतोधियोहरिंहिन्वन्तियातवे ॥ २ ॥

अध । क्षपा । परिऽकृतः । वाजान् । अभि । प्र । गाहते ।
यदि । विवस्वतः । धियः । हरिम् । हिन्वन्ति । यातवे ॥ २ ॥

क्षपा सुपांसुलुगितिपंचम्याआकारः क्षपाया रात्रेः अध अनन्तरं प्रातःकाले परिष्कृतः भूषणार्थं संपर्युपेभ्यइति करोतेःसुडागमः । अद्भिरलंकृतः यद्वा क्षपयित्र्यां सेनायां अलंकृतः सोमः वाजान् अन्नानि बलानिवा अभिलक्ष्य प्रगाहते प्रगच्छति । विवस्वतः परिचरणवतोयजमानस्य धियः कर्मसाधनभूता अंगुलयः हरिं हरितवर्णं पूतमंशुं यातवे पात्राण्यभिगमनाय यदि हिन्वन्ति प्रेरयन्ति तर्हि सवनानि गच्छतीति ॥ २ ॥

२. रात्रि के अनन्तर जल के द्वारा अलंकृत होकर सोम अन्नों को लक्ष्य करके जा रहे हैं। सेवक यजमान की कर्मसाधिका अंगुलियाँ हरितवर्ण सोम को पात्र में जाने के लिए प्रेरित करती हैं। तभी सोम सवनों के लिए जाते हैं।

तमस्यमर्जयामसिमदोयइन्द्रपातमः ।
यंगावआसाभिर्दधुःपुरानूनंचसूरयः ॥ ३ ॥

तम् । अस्य । मर्जयामसि । मदः । यः । इन्द्रऽपातमः ।
यम् । गावः । आसऽभिः । दधुः । पुरा । नूनम् । च । सूरयः ॥ ३ ॥

अस्य सोमस्य तं रसं मर्जयामसि मर्जयामः अलंकुर्मोवा योमदोमदकरोरसः इन्द्रपातमः इन्द्रेणात्यन्तं पातव्योभवति । किंच गावोगन्तारः सूरयः स्तोतारः पुराच नूनमिदानींच यंसोमरसं आसभिः आस्यैः दधुर्धारयन्ति पिबन्तीतियावत् । यद्वा गावोधेनवः यंसोमं तृणादिष्ववस्थितमासभिरास्यैः दधुर्धारयन्ति तृणरूपेण भक्षयन्ति ॥ ३ ॥

३. जिस रस का इन्द्र पान करते हैं, सोम के उसी रस को हम सुशोभित करते हैं। गमनशील स्तोता लोग पहले और इस समय सोमरस को पीते हैं।

तंगाथयापुराण्यापुनानमभ्यनूषत ।
उतोक्लृपन्तधीतयोदेवानांनामबिभ्रतीः ॥ ४ ॥

तम् । गाथया । पुराण्या । पुनानम् । अभि । अनूषत ।
उतो इति । क्लृपन्त । धीतयः । देवानाम् । नाम । बिभ्रतीः ॥ ४ ॥

पुनानं पूयमानं तं सोमं पुराण्या पुराकृतया गाथया स्तुत्या अभ्यनूषत स्तोतारोऽभिष्टुवन्ति । नुस्तवने लुङिरूपं । उतोअपिच नामकर्मार्थं नमनं बिभ्रतीर्बिभ्राणाः धीतयोंगुलयः देवानां सोमरूपहविःप्रदानाय क्लृपन्त कल्पयन्ति समर्थाभवन्ति । क्लृपूसामर्थ्ये ॥ ४ ॥

४. उन शोधित सोम को प्राचीन गाथाओं के द्वारा स्तोता लोग स्तुत करते हैं। इधर-उधर आनेवाली अँगुलियाँ देवों को सोम-रूप हवि देने में समर्थ हैं।

तमुक्षमाणमव्ययेवारेपुनन्तिधर्णसिम् ।
दूतंनपूर्वचित्तयआशासतेमनीषिणः ॥ ५ ॥ २५ ॥

तम् । उक्षमाणम् । अव्यये । वारे । पुनन्ति । धर्णसिम् । दूतम् ।
न । पूर्वऽचित्तये । आ । शासते । मनीषिणः ॥ ५ ॥ २५ ॥

उक्षमाणं अद्भिःसिच्यमानं धर्णसिं सर्वस्यधारकं सोमं अव्यये अविमये वारे वाले पवित्रे पुनन्ति शोधयन्ति । ततः मनीषिणोमेधाविनोयजमानाः तमिमंसोमं दूतंन दूतमिव पूर्वचित्तये देवानां पूर्वमेव प्रज्ञापनाय आशासते प्रार्थयते ॥ ५ ॥

५. जल से सिक्त और सर्वधारक सोम को यजमान मेषलोममय पवित्र पर शोभित करते हैं। मेधावी यजमान सोम की, दूत के समान, देवों की सूचना के लिए, प्रार्थना करते हैं।

अथ षष्ठी—

सपुनानोमदिन्तमःसोमश्चमूषुसीदति ।
पशौनरेतआदधत्पतिर्वचस्यतेधियः ॥ ६ ॥

सः । पुनानः । मदिन्ऽतमः । सोमः । चमूषु । सीदति । पशौ ।
न । रेतः । आऽदधत् । पतिः । वचस्यते । धियः ॥ ६ ॥

मदिन्तमः अत्यन्तं मादयितासोमः पुनानः पूयमानःसन् चमूषु चमसेषु सीदति । ततः पशौन यथापशौ कश्चिद्वृषभोरेतआदधत् आदधाति तद्वच्चमसादिषु रेतः स्वीयंरसं आदधत् आदधानः धियः कर्मणः पतिः पालयिता यं सोमोवचस्यते अभिषूयते ॥ ६ ॥

६. अतीव मदकर सोम, शोधित होकर, चमसों पर बैठते हैं। जैसे साँड़ गाय में रेत देता है, वैसे ही सोम चमसों पर रस देते हैं। सोम कर्म के स्वामी हैं। वे अभिषुत होते हैं।

समृज्यतेसुकर्मभिर्देवोदेवेभ्यःसुतः ।
विदेयदासुसंददिर्महीरपोविगाहते ॥ ७ ॥

सः । मृज्यते । सुकर्मऽभिः । देवः । देवेभ्यः । सुतः । विदे ।
यत् । आसु । सम्ऽददिः । महीः । अपः । वि । गाहते ॥ ७ ॥

देवेभ्योदेवार्थं सुतोभिषुतः देवोद्योतमानः स्तोतव्योवा ससोमः सुकर्मभिः ऋत्विग्भिः मृज्यते परिपूयते यद्यदायंसोमः आसु प्रजासु संददिः सम्यग्धनदानशीलइति विदे ज्ञायते तदानीं महीर्महतीरपोवसतीवरीः विगाहते विशेषेणाभिगच्छति यदासोममभिषुण्वन्ति तदा तेभ्योधनं प्रयच्छतीत्यर्थः ॥ ७ ॥

७. देवों के लिए अभिषुत और प्रकाशमान सोम को ऋत्विक् लोग शोधित करते हैं। जब सोम प्रजा में धनदाता जाने जाते हैं, तब महान् जल में स्नान करते हैं।

अथाष्टमी—

सुतइन्दोपवित्रआनृभिर्यतोविनीयसे ।
इन्द्रायमत्सरिन्तमश्चमूष्वानिषीदसि ॥ ८ ॥ २६ ॥

सुतः । इन्दो इति । पवित्रे । आ । नृऽभिः । यतः । वि । नीयसे ।
इन्द्राय । मत्सरिन्ऽतमः । चमूषु । आ । नि । सीदसि ॥ ८ ॥ २६ ॥

हे इन्दो सुतोभिषुतः यतः आयतः सर्वतोविस्तृतस्त्वं नृभिः कर्मनेतृभिर्ऋत्विग्भिः पवित्रे विनीयसे विशेषेण नीयमानोभवसि। ततः मत्सरिन्तमः अतिशयेन मादयिता त्वं इन्द्रायेन्द्रार्थं चमूषु चमसेष्वानिषीदसि ॥ ८ ॥

८. सोम, अभिषुत और सर्वत्र विस्तृत होकर तुम ऋत्विकों के द्वारा छनने (पवित्र) में भली भाँति लाये जाते हो। अतीव मदकर तुम इन्द्र के लिए चमसों पर बैठते हो।

॥ इति सप्तमस्य चतुर्थे षड्विंशोवर्गः ॥ २६ ॥

अभीनवन्तइति नवर्चंचतुर्थंसूक्तं पूर्ववदृषिदेवते सर्वाअनुष्टुभः। तथाचानुक्रम्यते—अभीनवन्तेनवेति। गतोविनियोगः।

अभीनवन्तेअद्रुहः प्रियमिन्द्रस्यकाम्यम्।
वत्संनपूर्वआयुनिजातंरिहन्तिमातरः ॥ १ ॥

अभि। नवन्ते। अद्रुहः। प्रियम्। इन्द्रस्य। काम्यम्। वत्सम्।
न। पूर्वे। आयुनि। जातम्। रिहन्ति। मातरः ॥ १ ॥

यथा मातरोगावः पूर्वे प्रथमे आयुनि वयसि जातंवत्सं रिहंतिलिहन्ति तथा अद्रुहः अद्रोहाः वसतीवर्याख्याः आपः इन्द्रस्यप्रियं काम्यं सर्वैःकाम्यमानं सोममभिनवन्ते अभिगच्छन्ति ॥ १ ॥

१. जैसे गायें प्रथम आयु में उत्पन्न बछड़े को चाटती हैं, वैसे ही द्रोहशून्य जल इन्द्र के प्रिय और सबके अभिलषणीय सोम के पास जाता है।

पुनानइन्दवाभरसोमद्विबर्हसंरयिम्।
त्वंवसूनिपुष्यसिविश्वानिदाशुषोगृहे ॥ २ ॥

पुनानः। इन्दो इति। आ। भर। सोम। द्विऽबर्हसम्। रयिम्।
त्वम्। वसूनि। पुष्यसि। विश्वानि। दाशुषः। गृहे ॥ २ ॥

हे इन्दो दीप्यमान हे सोम पुनानः पूयमानस्त्वं द्विबर्हसं द्वयोःस्थानयोः परिबृंहणशीलं रयिं धनं अस्मभ्यमाभराहर देहि त्वं हि दाशुषोहविर्दत्तवतोयजमानस्य गृहेस्थित्वा विश्वानि सर्वाणि वसूनि धनानि पुष्यसि पोषयसि ॥ २ ॥

२. दीप्यमान सोम, शोधित होकर तुम दोनों लोकों में बढ़नेवाले धन को हमारे लिए ले आओ। तुम यजमान के घर में रहकर हविर्दाता यजमान के सारे धनों की रक्षा करते हो।

अथ तृतीया–

त्वंधियंमनोयुजंसृजावृष्टिंनतन्यतुः ।
त्वंवसूंनिपार्थिवादिव्याचसोमपुष्यसि ॥ ३ ॥

त्वम् । धियम् । मनःऽयुजम् । सृज । वृष्टिम् । न । तन्यतुः ।
त्वम् । वसूनि । पार्थिवा । दिव्या । च । सोम । पुष्यसि ॥ ३ ॥

हे सोम त्वं मनोयुजं मनसा युज्यमानां मनोवेगां धियं ध्यातव्यां धारां सृज पात्रेषु विसृज । तत्रदृष्टान्तः–वृष्टिंन तन्यतुः तनुविस्तारे क्रतन्यञीत्यादिनायतुच्प्रत्ययः तनोति विस्तारयतीति तन्यतुर्मेघः यथा मेघोवृष्टिं सृजति तद्वत् । ततोहेसोम त्वं पार्थिवा पृथिव्यांभवानि वसूनि धनानि तथा दिव्यानि दिविभवानि धनानिच पुष्यसि अस्मभ्यं पोषयसि प्रयच्छसीत्यर्थः ॥३॥

३. सोम, तुम मनोवेग के समान धारा को उसी प्रकार बनाओ, जिस प्रकार मेघ वृष्टि को बनाता है। सोम, तुम पार्थिव और द्युलोकोत्पन्न धन देते हो।

परितेजिग्युषोयथाधारासुतस्यधावति ।
रंहमाणाव्यव्ययंवारंवाजीवसानसिः ॥ ४ ॥

परि । ते । जिग्युषः । यथा । धारा । सुतस्य । धावति । रंहमाणा ।
वि । अव्ययम् । वारम् । वाजीऽइव । सानसिः ॥ ४ ॥

सुतस्य ते त्वदीया सानसिः संभजनशीला यद्वा स्तोतृभिः संभजनीया रंहमाणा वेगंकुर्वाणा धारा अव्ययं अविमयं वारं वालं पवित्रं विपरिधावति विशेषेणपरितोगच्छति तत्रदृष्टान्तः–जिग्युषः शत्रूणांजेतुः वीरस्य वाजीव अश्वोयथा युद्धं परितोधावति तद्वत् । जयतेः क्वसौ सनलिटोर्जेरिति कुत्वं यथेतिपूरकः ॥ ४ ॥

४. शत्रुजेता शूर का अश्व जैसे युद्ध में दौड़ता है, वैसे ही तुम्हारी भजनीय और वेगवाली धारा मेषलोममय पवित्र पर दौड़ती है।

अथ पंचमी–

क्रत्वेदक्षायनःकवेपवस्वसोमधारया ।
इन्द्रायपातवेसुतोमित्रायवरुणायच ॥ ५ ॥ २७ ॥

क्रत्वे । दक्षाय । नः । कवे । पवस्व । सोम । धारया । इन्द्राय ।
पातवे । सुतः । मित्राय । वरुणाय । च ॥ ५ ॥ २७ ॥

हे कवे क्रान्तदर्शन हे सोम नोस्मभ्यं क्रत्वे प्रज्ञानाय दक्षाय बलाय च त्वं धारया पवस्व क्षर। कीदृशः इन्द्राय पातवे पानार्थं तथा मित्राय वरुणायच सुतोभिषुतः खलु ॥ ५ ॥

५. क्रान्तदर्शी सोम, इन्द्र, मित्र और वरुण के पान के लिए अभिषुत तुम हमारे ज्ञान और बल के लिए धारा से बहो।

॥ इति सप्तमस्य चतुर्थे सप्तविंशोवर्गः ॥ २७ ॥

अथ षष्ठी—

पवस्ववाजसातमःपवित्रेधारयासुतः।
इन्द्रायसोमविष्णवेदेवेभ्योमधुमत्तमः ॥ ६ ॥

पवस्व। वाजऽसातमः। पवित्रे। धारया। सुतः। इन्द्राय।
सोम। विष्णवे। देवेभ्यः। मधुमत्ऽतमः ॥ ६ ॥

हे सोम वाजसातमः अतिशयेनान्नस्यदाता सुतो अभिषुतस्त्वं पवित्रे धारयासह पवस्व क्षर। ततः हे सोम त्वं इन्द्राय विष्णवेच अन्येभ्योमित्रादिभ्योदेवेभ्यश्च मधुमत्तमः अतिशयेन माधुर्योपेतोभव ॥ ६ ॥

६. सोम, अत्यन्त अन्नदाता और अभिषुत तुम पवित्र में धारा से गिरो। सोम, तुम इन्द्र, विष्णु और अन्य देवों के लिए मधुर बनो।

त्वांरिहन्तिमातरोहरिंपवित्रेअद्रुहः।
वत्संजातंनधेनवःपवमानविधर्मणि ॥ ७ ॥

त्वाम्। रिहन्ति। मातरः। हरिम्। पवित्रे। अद्रुहः। वत्सम्।
जातम्। न। धेनवः। पवमान। विऽधर्मणि ॥ ७ ॥

हे पवमानसोम विधर्मणि विविधं हविषांधारके यज्ञे अद्रुहः द्रोहवर्जितः मातरोमातृभूता वसतीवर्यः हरिं हरितवर्णं त्वां पवित्रे स्थितं रिहन्ति लिहन्ति आस्वादयन्ति। कथमिव यथा धेनवोजातंवत्सं लिहन्ति तथा ॥ ७ ॥

७. सोम, जैसे बछड़ों को गायें चाटती हैं, वैसे ही हविर्धारक यज्ञ में द्रोह-शून्य और मातरूप जल हरितवर्ण तुम्हें चाटता है।

अथाष्टमी—

पवमानमहिश्रवश्चित्रेभिर्यासिरश्मिभिः।
शर्धन्तमांसिजिघ्नसेविश्वानिदाशुषोगृहे ॥ ८ ॥

पवमान । महि । श्रवः । चित्रेभिः । यासि । रश्मिऽभिः । शर्धन् ।
तमांसि । जिघ्नसे । विश्वानि । दाशुषः । गृहे ॥ ८ ॥

हे पवमान महि महत् श्रवः श्रवणीयमन्तरिक्षं चित्रेभिश्चित्रैर्नानाविधैश्चायनीयैर्वा रश्मिभिः परियासि परिगच्छसि । तथा शर्धन् वेगंकुर्वंस्त्वं दाशुषो हविर्दत्तवतोयजमानस्यगृहे स्थित्वा विश्वानि सर्वाणि तमांसि तमोरूपाणि रक्षांसि जिघ्नसे हंसि एवं द्यावापृथिव्योः वर्तसे इत्यर्थः ॥ ८ ॥

८. सोम, तुम महान् और श्रवणीय अन्तरिक्ष को नानाविध किरणों के साथ जाते हो। वेगवान् तुम हविर्दाता यजमान के गृह में रहकर सारे अन्धकारों को नष्ट करते हो।

त्वंद्यांचमहिव्रतपृथिवींचातिजभ्रिषे ।
प्रतिद्रापिमंमुञ्चथाःपवमानमहित्वना ॥ ९ ॥ २८ ॥

त्वम् । द्याम् । च । महिऽव्रत । पृथिवीम् । च । अति । जभ्रिषे ।
प्रति । द्रापिम् । अमुञ्चथाः । पवमान । महिऽत्वना ॥ ९ ॥ २८ ॥

हे महिव्रत महाकर्मन् बहुविधकर्मन् सोम त्वं द्यां द्युलोकंचपृथिवींच अतिजभ्रिषे अत्यन्तंबिभर्षि । डुभृञ्धारणपोषणयोः । तस्यछन्दसिलिटि सर्वविधीनांछन्दसावकल्पितत्वादत्र इडागमः । अन्तरिक्षे सोमात्मनेति पृथिव्यां लतारूपेणेति एवंलोकद्वयवर्तित्वं । हे पवमान क्षरन् सोम त्वं महित्वना महत्त्वेनयुक्तःसन् द्रापिं कवचं प्रत्यमुंचथाः प्रतिमुंचसि संवृणोषि ॥ ९ ॥

९. महान् कर्मवाले सोम, तुम द्यावापृथिवी को धारण करते हो। क्षरणशील सोम, महिमा से युक्त होकर तुम कवच को धारण करते हो।

॥ इति सप्तमस्य चतुर्थे अष्टाविंशोवर्गः ॥ २८ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके चतुर्थोऽध्यायः ॥ ४ ॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत् । निर्ममे तमहंवन्दे विद्यातीर्थमहेश्वरं ॥ १ ॥

विज्ञातवेदगांभीर्यस्तुर्यं व्याख्यायसप्तमे । सायणार्यस्ततोध्यायं पंचमंव्याचिकीर्षति ॥२॥

तत्र पुरोजितीवइति षोडशर्चं अनुवाकापेक्षया पंचमंसूक्तं आद्यस्यतृचस्य श्यावाश्वपुत्रा-अंधीगुर्नामर्षिः द्वितीयस्य नहुषस्यराज्ञःपुत्रोययातिर्नाम तृतीयस्य मनोःपुत्रोनहुषोनामराजर्षिः चतुर्थस्य संवरणाख्यस्यराज्ञःपुत्रोमनुः एवं द्वादशगताः शिष्टस्यचतुर्ऋचस्य वाचःपुत्रोवैश्वामित्रोवा प्रजापतिर्ऋषिः द्वितीयातृतीयेगायत्र्यौ शिष्टाश्चतुर्दशानुष्टुभः। तथाचानुक्रम्यते—पुरोजितीषोळशांधीगुः श्यावाश्वियंययातिर्नाहुषो नहुषोनाममानवो मनुःसांवरणइतितृचाः शेषेप्रजापतिरुपायेगायत्र्याविति गतःसूक्तविनियोगः ।

तत्र प्रथमा—

ॐम् पुरोजितीवोअन्धसःसुतायमादयित्नवे ।
अपश्वानंश्रथिष्टनसखायोदीर्घजिह्र्यम् ॥ १ ॥

पुरःऽजिती । वः । अन्धसः । सुताय । मादयित्नवे । अप । श्वानम् । श्रथिष्टन । सखायः । दीर्घऽजिह्र्यम् ॥ १ ॥

हे सखायः सखिभूताः समानख्यानावा हे स्तोतारः वो यूयं पुरोजिती षष्ठ्याःपूर्वसवर्णदीर्घः पुरःस्थितस्य जयस्य अंधसो अदनीयस्य सोमस्य स्वभूताय सुतायाभिषुताय मादयित्नवे अत्यन्तं मदकराय रसाय दिर्घजिह्वं दीर्घाजिह्वा यस्यसः दीर्घजिह्वीचच्छंदसीतिङीषंतत्वेन निपातितः तादृशं श्वानंच अपश्रथिष्टन अपश्रथयत अपबाधध्वं यथा श्वा राक्षसावा सुतं सोमं नलिहन्ति तथाकुरुतेत्यर्थः ॥ १ ॥

१. मित्रो, अग्रेस्थित भक्षणीय (अन्न) सोम के अभिषुत और अत्यन्त मदकर रस के लिए लम्बी जीभवाले कुत्ते या राक्षस को अलग करो—वह चाटने न पावे ।

पवित्रेष्ट्यां द्वितीयस्याज्यभागस्य योधारयेत्येषानुवाक्या सूत्रितंच—पावकवन्तावाज्यभागावग्नीरक्षांसिसेधतियोधारयापावकयेति ।

सैषा सूक्ते द्वितीया—

योधारयापावकयापरिप्रस्यन्दतेसुतः । इन्दुरश्वोनकृत्व्यः ॥२ ॥

यः । धारया । पावकया । परिऽप्रस्यन्दते । सुतः ।
इन्दुः । अश्वः । न । कृत्व्यः ॥ २ ॥

सुतोभिषुतः कृत्व्यः कृत्वीति कर्मनाम कर्मणि साधुर्यइन्दुः सोमः पावकया पापानां शोधकया धारया परिप्रस्यन्दते परितः प्रक्षरति । कथमिव अश्वोन अश्वोयथा वेगेन प्रगच्छंति तद्वत् ॥ २ ॥

२. अभिषुत और कर्मनिष्ठ सोम पाप-शोधक धारा से चारों ओर वैसे ही क्षरित होते हैं, जैसे वेग से घोड़ा जाता है ।

तंदुरोषमभीनरःसोमंविश्वाच्याधिया । यज्ञंहिन्वन्त्यद्रिभिः ॥ ३ ॥

तम् । दुरोषम् । अभि । नरः । सोमम् । विश्वाच्या ।
धिया । यज्ञम् । हिन्वन्ति । अद्रिऽभिः ॥ ३ ॥

नरः कर्मनेतार ऋत्विजः दुरोषं रोषतेर्हिंसार्थस्यरेफलोपे दीर्घा...व आपतदीहार्थस्य वा खलु रूपमितिसंदेहादनवग्रहः ।तं दुर्दहं दुर्धर्षं वा यज्ञं यष्टव्यं तंवा सोमं विश्वाच्या सर्वान् कामानंचित्र्या धिया बुध्या अद्रिभिर्ग्रावभिरभिहिन्वन्ति अभिप्रेरयन्ति अभिषुण्वन्तीति यावत् ॥३॥

३. ऋत्विक् लोग दुर्द्धर्ष और भजनीय सोम को, सारी लालसाओं की इच्छा से, पत्थरों से अभिषुत करते हैं।

पृष्ठ्यस्य षष्ठेहनि ब्राह्मणाच्छंसिशस्त्रे सुतासइति तिस्रः । सूत्रितंच—दधिक्राव्णोअकारिषमित्यनुष्टुप् सुतासोमधुमत्तमाइति च तिस्रइति ।

तत्र प्रथमा सूक्ते चतुर्थी—

सुतासोमधुमत्तमाःसोमाइन्द्रायमन्दिनः ।
पवित्रवन्तोअक्षरन्देवान्गच्छन्तुवोमदाः ॥ ४ ॥

सुतासः । मधुमत्ऽतमाः । सोमाः । इन्द्राय । मन्दिनः । पवित्रऽवन्तः ।
अक्षरन् । देवान् । गच्छन्तु । वः । मदाः ॥ ४ ॥

मधुमत्तमाः अतिशयेन माधुर्योपेताः अतएव मंदिनोमदकराः सुतासोभिषुताः सोमाः पवित्रवन्तः पवित्रे वर्तमानाः सन्तः इन्द्राय इन्द्रार्थं अक्षरन् पात्रेषु क्षरन्ति । अथ प्रत्यक्षकृतः सोयुष्माकं मदामदकरारसाः देवानिन्द्रादीनागच्छन्तु ॥ ४ ॥

४. अतीव मधुर, मदकर और अभिषुत सोम पवित्र में रहकर इन्द्र के लिए पात्रों में क्षरित होते हैं। सोम, तुम्हारा मदकर रस इन्द्रादि के पास जाय। अथ पञ्चमी—

इन्दुरिन्द्रायपवतइतिदेवासोअब्रुवन् ।
वाचस्पतिर्मखस्यतेविश्वस्येशानओजसा ॥ ५ ॥ १ ॥

इन्दुः । इन्द्राय । पवते । इति । देवासः । अब्रुवन् । वाचः ।
पतिः । मखस्यते । विश्वस्य । ईशानः । ओजसा ॥ ५ ॥ १ ॥

इन्दुः सोमः इन्द्राय इन्द्रार्थं पवते कलशे क्षरति इति देवासः स्तुतिकारिणः स्तोतारोब्रुवन् वदन्ति । यदा स्तोतार एवंवदन्ति तदानीं वाचः स्तुतेः पतिः पालयिता यद्वा शब्दस्य स्वामी अत्यन्तं शब्दायमानइत्यर्थः । तादृशः सोमः मखस्यते स्तुतिभिः पूजामिच्छति लालसायां सुगागमः । कीदृशः ओजसा बलेन विश्वस्य सर्वस्येशानः प्रभुः ॥ ५ ॥

५. सोम इन्द्र के लिए क्षरित होते हैं—देवता लोग ऐसा स्तोत्र करते हैं। स्तुतियों के पालक, शब्दकारी और अपने बल के द्वारा संसार के प्रभु सोम अतिथियों के द्वारा पूजा की अभिलाषा करते हैं।

॥ इति सप्तमस्य पंचमे प्रथमोवर्गः ॥ १ ॥

सहस्रधारःपवतेसमुद्रोवाचमीङ्खयः ।
सोमःपतीरयीणांसखेन्द्रस्यदिवेदिवे ॥ ६ ॥

सहस्रऽधारः । पवते । समुद्रः । वाचमऽईङ्खयः । सोमः ।
पतिः । रयीणाम् । सखा । इन्द्रस्य । दिवेऽदिवे ॥ ६ ॥

सहस्रधारः बहुविधधारोपेतः सोमः पवते क्षरति । कीदृशः समुद्रः यस्मात्समुद्रवन्ति रसाः रसस्थानीयः वाचमींखयः ईखतेर्ण्यन्तस्य सुप्युपपदे खचूप्रत्ययः । स्तुतीनां प्रेरयिता रयीणां धनानां पतिः प्रभुः यद्वा रयीणां हविषोदातॄणां यजमानानां पतिः पालयिता दिवेदिवे प्रत्यहं इन्द्रस्य सखामित्रभूतः सोमः पवते ॥ ६ ॥

६. अनेक धाराओंवाले सोम क्षरित होते हैं। सोम से रस बहता है। सोम स्तुतियों के प्रेरक हैं, धन के प्रभु हैं और इन्द्र के सखा हैं।

अथ सप्तमी—

अयंपूषारयिर्भगःसोमःपुनानोअर्षति ।
पतिर्विश्वस्यभूमनोव्यख्यद्रोदसीउभे ॥ ७ ॥

अयम् । पूषा । रयिः । भगः । सोमः । पुनानः । अर्षति । पतिः ।
विश्वस्य । भूमनः । वि । अख्यत् । रोदसी इति । उभे इति ॥ ७ ॥

पूषा पोषकः सर्वेषां भगोभजनीयः रयिर्धनहेतुः अयं सोमः पुनानः पूयमानः सन् अर्षति कलशे गच्छति । तथा विश्वस्य सर्वस्य भूमनोभूतजातस्य पतिः पालयिता सोमः उभे रोदसी द्यावापृथिव्यौ व्यख्यद् स्वतेजसा प्रकाशयति । अनेन लोकद्वयवर्तित्वं सूचितं ॥ ७ ॥

७. पोषक, भजनीय और धन-कारण सोम, शोधित होकर गिरते हैं। सारे प्राणियों के स्वामी सोम अपने तेज से द्यावापृथिवी को प्रकाशित करते हैं ।

समुप्रियाअनूषतगावोमदायघृष्वयः ।
सोमासःकृण्वतेपथःपवमानासइन्दवः ॥ ८ ॥

सम् । ऊँ इति । प्रियाः । अनूषत । गावः । मदाय । घृष्वयः ।
सोमासः । कृण्वते । पथः । पवमानासः । इन्दवः ॥ ८ ॥

प्रियाः प्रियतमाः घृष्वयः अत्यन्तदीप्ताः यद्वा अहं प्रथमतः स्तौमि अहं पुरस्तात् स्तौमीति परस्परं स्पर्धमानाः गावः स्तुतिलक्षणावाचः सोमस्य मदाय मदार्थं समनूषत संस्तुवन्ति । उःप्रसिद्धौ । यद्वा गावोधेनवः सोमस्य मदाय शब्दायन्ते ततः पवमानासः पूयमानाः इन्दवोदीप्ताः सोमासः सोमाः पथोमार्गान् कृण्वते रक्षणार्थं कुर्वन्ति ॥ ८ ॥

८. सोम के मद के लिए प्रिय गायें शब्द करती हैं। शोधित सोम रक्षण के लिए मार्ग बना रहे हैं।

अथ नवमी—

यओजिष्ठस्तमाभरपवमानश्रवाय्यम् ।
यःपञ्चचर्षणीरभिरयिंयेनवनामहै ॥ ९ ॥

यः । ओजिष्ठः । तम् । आ । भर । पवमान । श्रवाय्यम् । यः ।
पञ्च । चर्षणीः । अभि । रयिम् । येन । वनामहै ॥ ९ ॥

हे पवमान पूयमान सोम ओजिष्ठःओजस्वितमोयस्त्वदीयोरसोस्ति तं श्रवाय्यं श्रवणीयं रसं आभर अस्मभ्यमाभर। किंच योरसः पञ्चचर्षणीः पञ्चजनान् निषादपञ्चमान् चतुरोवर्णान् अभितिष्ठति। अपिच येन रसेन वयं रयिं धनं च वनामहै संभजामहै यद्वा येन त्वां रयिं याचामहै तमाभर ॥ ९ ॥

९. सोम, तुम्हारा जो ओजस्वी और चमत्कार-पूर्ण रस है, उसे क्षरित करो। रस पाँचों वर्णों के पास रहता है। उस रस से हम धन प्राप्त करें।

सोमाःपवन्तइन्दवोस्मभ्यंगातुवित्तमाः।
मित्राःसुवानाअरेपसःस्वाध्यःस्वर्विदः ॥ १० ॥ २ ॥

सोमाः। पवन्ते। इन्दवः। अस्मभ्यम्। गातुवित्ऽतमाः। मित्राः। सुवानाः। अरेपसः। सुऽआध्यः। स्वःऽविदः ॥ १० ॥ २ ॥

गातुवित्तमाः अतिशयेन मार्गस्य लंभकाः इन्दवोदीप्ताः सोमाः पवन्ते अस्मभ्यं अस्मदर्थं क्षरन्ति आगच्छन्तिवा। कीदृशाः मित्रादेवानां सखिभूताः सुवानाः अभिषूयमाणाः अरेपसः पापरहिताः अतएव स्वाध्यः शोभनध्यानाः स्वर्विदः सर्वज्ञाः सर्वपापकावा ॥ १० ॥

१०. पथ-प्रदर्शक, देवों के मित्र, अभिषुत, पाप-शून्य, दीप्त, शोभन-ध्यान और सर्वज्ञ सोम हमारे लिए आ रहे हैं।

॥ इति सप्तमस्य पञ्चमे द्वितीयोवर्गः ॥ २ ॥

अथैकादशी—

सुष्वाणासोव्यद्रिभिश्चितानागोरधित्वचि।
इषमस्मभ्यमभितःसमस्वरन्वसुविदः ॥ ११ ॥

सुस्वानासः। वि। अद्रिऽभिः। चितानाः। गोः। अधि। त्वचि। इषम्। अस्मभ्यम्। अभितः। सम्। अस्वरन्। वसुऽविदः ॥ ११ ॥

गोः अनडुहः अधित्वचि अधिषवणचर्मणि चितानाः ज्ञायमानाः अद्रिभिर्ग्रावभिः विविधं सुष्वाणासः सूयमानाः वसुविदोवसुनोलंभकाः एते सोमाः अस्मभ्यमिषमन्नमभितः समस्वरन् सम्यक्शब्दयन्ति प्रयच्छन्तीतियावत ॥ ११ ॥

११. गोचर्म पर उत्पन्न, पत्थरों से भली भाँति अभिषुत और धन के प्रापक सोम चारों ओर शब्द करते हैं।

अथ द्वादशी—

एतेपूताविपश्चितःसोमासोदध्याशिरः ।
सूर्यासोनदर्शतासोजिगत्नवोध्रुवाधृते ॥ १२ ॥

एते । पूताः । विपःऽचितः । सोमासः । दधिऽआशिरः । सूर्यासः ।
न । दर्शतासः । जिगत्नवः । ध्रुवाः । धृते ॥ १२ ॥

पूताः पवित्रेण परिपूताः विपश्चितोमेधाविनोदध्याशिरः दध्यामिश्रणाः धृते वसतीवर्याख्ये उदके जिगत्नवोगमनशीला ध्रुवाः तत्र स्थैर्येण वर्तमानाः एते सोमासः सोमाः सूर्यासोन सूर्याइव दर्शतासः पात्रेषु सर्वैर्दर्शनीया भवन्ति ॥ १२ ॥

१२. पवित्र में शोधित, मेधावी, दधि-मिश्रित, जल में गमनशील और स्थिरता से वर्तमान सोम, सूर्य के समान, पात्रों में दर्शनीय होते हैं ।

प्रसुन्वानस्यान्धसोमर्तोनवृतत्तद्वचः ।
अपश्वानंमराधसंहतामखंनभृगवः ॥ १३ ॥

प्र । सुन्वानस्य । अन्धसः । मर्तः । न । वृत । तत् । वचः ।
अप । श्वानम् । अराधसम् । हत । मखम् । न । भृगवः ॥ १३ ॥

सुन्वानस्याभिषूयमाणस्य अन्धसोदनीयस्य सोमस्य तत्प्रसिद्धं वचः वचनं घोषं मर्तो-मारकः कर्मविघ्नकारी श्वा न प्रवृत नभजतां नश्रृणोत्विति यावत् । तथा हे स्तोतारः अराधसं राधककर्मरहितं तं श्वानं अपहत । तत्र दृष्टान्तः—मखं न यथा पुरा अपराजमखं एतन्नामानं भृगवोपहतवन्तः तथा अपहतेत्यर्थः ॥ १३ ॥

१३. अभिषुत और पीने योग्य सोम का प्रसिद्ध घोष कर्मविघ्नकर्त्ता कुत्ते का विनाश करे। स्तोताओ, नम्रता-शून्य उस कुत्ते को उसी प्रकार मारो, जिस प्रकार भृगुओं ने प्राचीन काल में मख नामक व्यक्ति का वध किया था।

आजामिरत्केअव्यतभुजेनपुत्रओण्योः ।
सरंज्जारोनयोषणांवरोनयोनिमासदम् ॥ १४ ॥

आ । जामिः । अत्के । अव्यत । भुजे । न । पुत्रः । ओण्योः ।
सरत् । जारः । न । योषणाम् । वरः । न । योनिम् । आऽसदम् ॥ १४ ॥

जामिर्बंधुभूतो देवानां सोमः अत्के आच्छादके पवित्रे आव्यत आवृणोति संबद्धोभवति। तत्र दृष्टान्तः—भुजेन यथा ओण्योः रक्षकयोः मातापित्रोर्भुजे पुत्र आवृणोति तद्वत्। ततः सोयं सोमः योनिं स्वस्थानभूतं कलशमासदं आसत्तुं सरत् सरति। तत्र दृष्टान्तद्वयं—जारोन यथा जारोयोषणां असतीं स्त्रियं प्रामुं सरति यथावा वरः कन्यां प्रामुं गच्छति तद्वत् ॥ १४ ॥

१४. जैसे रक्षक माता-पिता की बाँहों में पुत्र कूद पड़ता है, वैसे ही देवों के मित्र सोम आच्छादक पवित्र में ढल पड़ते हैं। जैसे जार व्यभिचारिणी स्त्री की प्राप्ति के लिए जाता है, वैसे ही सोम अपने स्थान कलश में जाते हैं।

सवीरोदक्षसाधनोवियस्तस्तम्भरोदसी।
हरिःपवित्रेअव्यतवेधानयोनिमासदम् ॥ १५ ॥

सः। वीरः। दक्षऽसाधनः। वि। यः। तस्तम्भ। रोदसी इति।
हरिः। पवित्रे। अव्यत। वेधाः। न। योनिम्। आऽसदम् ॥१५॥

दक्षसाधनः बलसाधनः ससोमः वीरः समर्थो भवति। यः सोमः रोदसी द्यावापृथिव्यौ वितस्तंभ स्वतेजसा व्यस्तभ्नात् आच्छादयतीत्यर्थः। किंच हरिर्हरितवर्णः सोमः वेधान विधाता यजमानः यथा स्वगृहं आसीदति तद्वत् योनिं स्वस्थानं कलशमासदं आसत्तुं पवित्रे अव्यत आवृणोति संबद्धोभवति ॥ १५ ॥

१५. बल साधन वे सोम शक्तिमान् हैं। सोम अपने तेज से द्यावापृथिवी को आच्छादित करते हैं। जैसे विधाता यजमान अपने गृह में जाता है, वैसे ही हरित-वर्ण सोम अपने कलश में सम्बद्ध होते हैं।

अव्योवारेभिःपवतेसोमोगव्येअधित्वचि।
कनिक्रदद्वृषाहरिरिन्द्रस्याभ्येतिनिष्कृतम् ॥ १६ ॥ ३ ॥

अव्यः। वारेभिः। पवते। सोमः। गव्ये। अधि। त्वचि। कनिक्रदत्।
वृषा। हरिः। इन्द्रस्य। अभि। एति। निःऽकृतम् ॥ १६ ॥ ३ ॥

अयं सोमः अव्यः अवेर्वारेभिः वालैः पवित्रैः तेभ्यः पवते कलशं प्रति क्षरति। गव्ये आनदुहे अधित्वचि चर्मणि कनिक्रदत् शब्दायमानः वृषा कामानां वर्षकः हरिर्हरितवर्णः सोमः इन्द्रस्य स्वभूतं निष्कृतं संस्कृतं स्थानं अभ्येति अभिगच्छति ॥ १६ ॥

१६. सोम मेषलोममय पवित्र से कलश में जाते हैं। गोचर्म पर शब्दायमान, काम-वर्षक और हरितवर्ण सोम इन्द्र के संस्कृत स्थान को जाते हैं।

॥ इति सप्तमस्य पंचमे तृतीयोवर्गः ॥ ३ ॥

क्राणाशिशुरित्यष्टर्चं षष्ठं सूक्तं। आद्यस्य त्रितस्यार्षं। इदमुत्तराणि चत्वारिसूक्तानि औष्णिहानि। पवमानः सोमोदेवता। तथाचानुक्रम्यते—क्राणाष्टौत्रितऔष्णिहंचैइति। गतोविनियोगः। तत्र प्रथमा—

क्राणाशिशुर्महीनांहिन्वन्नृतस्यदीधितिम्।
विश्वापरिप्रियाभुवदधद्वितां ॥ १ ॥

क्राणा। शिशुः। महीनाम्। हिन्वन्। ऋतस्य। दीधितिम्।
विश्वा। परि। प्रिया। भुवत्। अध। द्विता ॥ १ ॥

क्राणा करोतेः शानचि बहुलं छन्दसीति विकरणस्य लुक् सुपांसुलुगिति सुपआकारादेशः। यज्ञं कुर्वाणः महीनां महतीनां महनीयानांवा अपां शिशुः पुत्रस्थानीयः सोमः ऋतस्य यज्ञस्य दीधितिं प्रकाशकं धारकं वा स्वीयं रसं हिन्वन् प्रेरयन् विश्वा सर्वाणि प्रिया प्रियाणि हवींषि परिभुवत् परिभवति व्याप्नोति। अधापिच द्विता द्विधाभवति दिविच पृथिव्यां च वर्ततइत्यर्थः ॥ १ ॥

१. यज्ञ-कर्त्ता और पूजनीय जल के पुत्र सोम यज्ञ-धारक रस को प्रेरित करते हुए समस्त प्रिय हवि को व्याप्त करते हैं। सोम द्यावापृथिवी में रहते हैं।

उपत्रितस्यपाष्योरभक्तयद्गुहापदम्।
यज्ञस्यसप्तधामभिरधप्रियम् ॥ २ ॥

उप। त्रितस्य। पाष्योः। अभक्त। यत्। गुहा। पदम्। यज्ञस्य।
सप्त। धामऽभिः। अध। प्रियम् ॥ २ ॥

त्रितस्य मम यज्ञे गुहा गुहायां हविर्धाने वर्तमानयोः पाष्योः पाषाणवत् दृढयोः अधिषवणफलकयोः पदं स्थानं सोमो यद्यदा उपाभक्त समभजत। अधानन्तरं यज्ञस्य धामभिर्धारकैः सप्त सप्तभिः छन्दोभिः गायत्र्यादिभिः प्रियं प्रीणयितारं सोममभिष्टुवन्ति ऋत्विजः। अथवा सप्तसर्पणशीलैः वसतीवर्यादिभिरुदकैः सोममभिषुण्वन्ति ॥ २ ॥

२. त्रित के यज्ञ में, हविर्द्धान में, वर्त्तमान और पाषाण के समान सुदृढ़ अभिषवण-फलक पर सोम गये। ऋत्विक् लोग यज्ञ-धारक सात गायत्री आदि छन्दों में प्रिय सोम की स्तुति करते हैं।

त्रीणित्रितस्यधारयापृष्ठेष्वेरयारयिम्।
मिमीतेअस्ययोजनाविसुक्रतुः ॥ ३ ॥

त्रीणि । त्रितस्य । धारया । पृष्ठेषु । आ । ईरय । रयिम् ।
मिमीते । अस्य । योजना । वि । सुऽक्रतुः ॥ ३ ॥

हे सोम त्रितस्य मम यज्ञस्य स्वभूतानि त्रीणिसवनानि धारया आत्मीयया विधारय । किंच पृष्ठेषु सामसु रयिं दातारमिन्द्रं एरय आगमय सुक्रतुः सुप्रज्ञः स्तोता अस्येन्द्रस्य योजना योजनानि योजनकारीणि स्तोत्राणि विमिमीते करोति यस्मादेवं तस्मादिन्द्रं सामसु प्रेरयेत्यर्थः ॥३॥

३. सोम, त्रित के यज्ञ के तीनों सवनों में प्रवाहित होओ। सामगान के समय दाता इन्द्र को ले आओ। बुद्धिमान् स्तोता इन्द्र का योजक स्तोत्र करता है। अथ चतुर्थी—

जज्ञानंसप्तमातरोवेधामशासतश्रिये ।
अयंध्रुवोरयीणांचिकेतयत् ॥ ४ ॥

जज्ञानम् । सप्त । मातरः । वेधाम् । अशासत । श्रिये । अयम् ।
ध्रुवः । रयीणाम् । चिकेत । यत् ॥ ४ ॥

जज्ञानं प्रादुर्भूतं वेधां कर्मणोविधातारं सोमं सप्त सप्तसंख्याकामातरो गंगाद्यानद्यः सप्तच्छंदांसिवा श्रिये यजमानानां ऐश्वर्यार्थं आशासत अनुशासन्ति अनुशासनं कुर्वन्ति । शासेर्लङि व्यत्ययेनात्मनेपदं । यद्यस्माद् ध्रुवोयं सोमः रयीणां धनानि चिकेत जानाति । तस्मादस्यानुशासने कृते यजमानानां धनादिसमृद्धिर्भवति ॥ ४ ॥

४. प्रादुर्भूत और कर्मधारक सोम का, यजमानों के ऐश्वर्य के लिए, मातृरूप गंगा आदि सात नदियाँ वा सात छन्द प्रशंसित करते हैं। सोम धन के निश्चित ज्ञाता हैं।

अस्यव्रतेसजोषसोविश्वेदेवासोअद्रुहः ।
स्पार्हाभवन्तिरन्तयोजुषन्तयत् ॥ ५ ॥ ४ ॥

अस्य । व्रते । सऽजोषसः । विश्वे । देवासः । अद्रुहः । स्पार्हाः ।
भवन्ति । रन्तयः । जुषन्त । यत् ॥ ५ ॥ ४ ॥

अद्रुहोद्रोहवर्जिताः विश्वे सर्वे देवासोदेवाः अस्य सोमस्य व्रते कर्मणि सजोषसः संगताः सन्तः स्पार्हाः स्पृहणीयाभवन्ति । रन्तयो रमणशीलाः देवाः सुतमेनं सोमं यद्यदि जुषन्त सेवन्ते तर्हि स्पृहणीया भवन्ति ॥ ५ ॥

५. समस्त द्रोह-शून्य देवता सोम के कर्म में मिलकर अभिलाषी होते हैं। रमणशील देवता अभिषुत सोम की सेवा करते हैं।

अथ षष्ठी—

यमीगर्भमृतावृधोदृशेचारुमजीजनन् ।
कविंमंहिष्ठमध्वरेपुरुस्पृहम् ॥ ६ ॥

यम् । ईमिति । गर्भम् । ऋतऽवृधः । दृशे । चारुम् । अजीजनन् ।
कविम् । मंहिष्ठम् । अध्वरे । पुरुऽस्पृहम् ॥ ६ ॥

ऋतावृधः यज्ञस्यवर्धयित्र्यः वसतीवर्याख्याआपः गर्भं गर्भस्थानीयं ईमेनं यं सोमं अध्वरे यज्ञे दृशे दर्शनाय अजीजनन् उदपादयन् । कीदृशं चारुं सर्वेषां कल्याणरूपं कविं क्रान्तप्रज्ञं मंहिष्ठं पूज्यतमं दातृतमंवा । अतएव पुरुस्पृहं बहुभिः स्पृहणीयं सोमं देवाः सेवन्तइति पूर्वेण समन्वयः ॥ ६ ॥

६. यज्ञ-वर्द्धक वसतीवरी-जल ने गर्भ-रूप सोम को यज्ञ में, दर्शनार्थ, उत्पन्न किया। सोम सबके कल्याणदाता, क्रान्तप्रज्ञ, पूज्य और बहुतों के अभिलषणीय हैं।

समीचीनेअभित्मनायह्वीऋतस्यमातरा ।
तन्वानायज्ञमानुषग्यदञ्जते ॥ ७ ॥

समीचीने इति सम्ऽईचीने । अभि । त्मना । यह्वी इति । ऋतस्य ।
मातरा । तन्वानाः । यज्ञम् । आनुषक् । यत् । अञ्जते ॥ ७ ॥

ससोमः समीचीने परस्परं संगते यह्वी महत्यौ ऋतस्य यज्ञस्य मातरा निर्मात्र्यौ द्यावापृथिव्यौ त्मना आत्मना स्वयमेव तदाभिगच्छति । यदा यज्ञं तन्वानाः अध्वर्यव आनुषक् अनुषक्तं च वसतीवरीभिरंजते सोमं मिश्रयन्ति तदा स्वयमभिगच्छति ॥ ७ ॥

७. परस्पर संगत, महान् और सत्य-यज्ञ की मातृ-रूप द्यावापृथिवी के पास सोम स्वयं आगमन करते हैं। याज्ञिक पुरोहित लोग सोम को जल में मिलाते हैं।

ऋत्वाशुक्रेभिरक्षभिर्ऋणोरपव्रजंदिवः ।
हिन्वन्नृतस्यदीधितिंप्राध्वरे ॥ ८ ॥ ५ ॥

ऋत्वा । शुक्रेभिः । अक्षऽभिः । ऋणोः । अप । व्रजम् । दिवः ।
हिन्वन् । ऋतस्य । दीधितिम् । प्र । अध्वरे ॥ ८ ॥ ५ ॥

हे सोम त्वं क्रत्वा कर्मणा ज्ञानेनवा शुक्रेभिः शुक्रैर्दीप्यमानैः अक्षभिरक्षैः इन्द्रियैरिवाश्नुवानैः स्वतेजोभिः व्रजं अंधकारसमूहं दिवोन्तरिक्षाद् अपक्रणोः अपगमय विनाशय । क्रणुगतौ तानादिकः । किंकुर्वन् अध्वरे हिंसारहिते यज्ञे ऋतस्य यज्ञस्य दीधितिं धारकं स्वीयं रसं प्रहिन्वन् प्रेरयन् अनेन लोकद्वयवर्तित्वमभिहितं ॥ ८ ॥

८. सोम, ज्ञान, दीप्त इन्द्रियों और अपने तेज से, द्युलोक से अन्धकार-समूह को नष्ट करो। तुम हिंसा-शून्य यज्ञ में, अपने सत्य-धारक रस को प्रेरित करते हो।॥ इति सप्तमस्य पञ्चमे पञ्चमोवर्गः ॥ ५ ॥

प्रपुनानायेति षळृचं सप्तमं सूक्तं । आप्त्यस्य द्वितस्यार्षं पूर्ववत् छंदोदेवते । तथाचानुक्रम्यते—प्रपुनानायषट्द्वितआप्त्यइति । गतोविनियोगः ।

तत्र प्रथमा—

प्रपुनानायवेधसेसोमायवचउद्यतम् ।
भृतिंनभरामतिभिर्जुजोषते ॥ १ ॥

प्र । पुनानाय । वेधसे । सोमाय । वचः । उत्ऽयतम् । भृतिम् ।
न । भर । मतिऽभिः । जुजोषते ॥ १ ॥

द्वितोनामऋषिः स्वात्मानं प्रत्याह । पुनानाय पवित्रेण पूयमानाय वेधसे कर्मणोविधात्रे मतिभिर्जुजोषते प्रीयमाणाय । यद्वा मतिभिः स्तुतिभिः स्तोतृभिः सह जुजोषते प्रीणयित्रे सोमाय उद्यतमुद्युक्तं वचः प्रभर प्रकर्षेण संपादय अभिष्टुहीत्यर्थः। तत्र दृष्टान्तः—भृतिंन यथा भृतकाभृतिं संपादयन्ति तद्वत् ॥ १ ॥

१. द्वित, तुम पवित्र से शोधित, कर्म-विधाता और स्तोताओं के साथ प्रसन्नता-दायक सोम के लिए वैसे ही उद्यत वचन कहो, जैसे नौकर वेतन पाता है।

अथ द्वितीया—

परिवाराण्यव्ययागोभिरञ्जानोअर्षति ।
त्रीषधस्थापुनानःकृणुतेहरिः ॥ २ ॥

परि । वाराणि । अव्ययया । गोभिः । अञ्जानः । अर्षति । त्री ।
सधऽस्था । पुनानः । कृणुते । हरिः ॥ २ ॥

गोभिर्गोविकारैः क्षीरादिभिः अंजानः अज्यमानः सोमः अव्यया अविमयानि वाराणि वालानि पवित्राणि पर्यर्षति परिगच्छति । अपिच हरिर्हरितवर्णः सोमः पुनानः पूयमानः सन्

त्री त्रीणि सधस्था सहतिष्ठंत्यत्रेति सधस्थं स्थानं द्रोणकलशाधवनीयपूतभृदात्मकानि त्रीणि स्थानानि कृणुते करोति ॥ २ ॥

२. गोदुग्ध में मिश्रित सोम मेषलोममय पवित्र में जाते हैं। हरितवर्ण सोम, शोधित होकर द्रोण-कलश, आधवनीय और पूतभृत् आदि तीनों स्थानों को बनाते हैं।

परि॒कोशं॑मधु॒श्चुतं॑म॒व्यये॒वारे॑अर्षति ।
अ॒भि॒वाणी॒रृषी॑णांस॒सन्नू॑षत ॥ ३ ॥

परि॑ । कोश॑म् । म॒धु॒ऽश्चुत॑म् । अ॒व्यये॑ । वारे॑ । अ॒र्ष॒ति॒ । अ॒भि । वाणीः॑ । ऋषी॑णाम् । स॒स । नू॒ष॒त॒ ॥ ३ ॥

ससोमः अव्यये अविमये वारे वाले पवित्रे मधुश्चुतं मधुररसस्य च्यावयितारं कोशं द्रोणकलशं प्रति आत्मीयं रसं पर्यर्षति गमयति तमिमं सोमं ऋषीणां सप्तवाणीः छन्दांसि अभिनूषत अभिष्टुवन्ति । नूस्तवने कुटादिः ॥ ३ ॥

३. सोम मेषलोममय पवित्र से मधुर रस को चुलानेवाले द्रोण-कलश में अपना रस भेजते हैं। सातों छन्द सोम की स्तुति करते हैं।

परि॑णे॒तामती॒नांवि॒श्वदे॑वो॒अदा॑भ्यः ।
सोमः॑पुना॒नश्च॒म्वोर्वि॑शद्धरिः ॥ ४ ॥

परि॑ । ने॒ता । म॒ती॒नाम् । वि॒श्वऽदे॑वः । अदा॑भ्यः । सोमः॑ । पु॒ना॒नः । च॒म्वोः । वि॒श॒त् । हरिः॑ ॥ ४ ॥

हरिर्हरितवर्णः ससोमः पुनानः पूयमानः सन् चम्वोरभिषवणफलकयोः परिविशव परिविशति। कीदृशः मतीनां स्तुतीनां नेता यद्वा मतीनां स्तोतॄणां स्वकर्मणि उपनेता विश्वदेवः सर्वदेवः सोमेभिषूयमाणे सति इन्द्रादयः सर्वेदेवाः सोमं प्रत्यागच्छन्तिखलु तस्मात् सर्वदेवोपेतः अतएव अदाभ्यः अहिंस्यः कैश्चिदपि ॥ ४ ॥

४. स्तुतियों के नेता, सबके देव, हरित-वर्ण और शोधित सोम अभिषवण-फलकों पर बैठते हैं। अभिषव हो जाने पर इन्द्रादि सब देवता अहिंसनीय सोम के पास जाते हैं।

परि॒दैवी॒रनु॑स्व॒धाइन्द्रे॑णयाहिस॒रथ॑म् ।
पुना॒नोवा॒घद्वा॒घद्भि॒रम॑र्त्यः ॥ ५ ॥

परि । देवीः । अनु । स्वधाः । इन्द्रेण । याहि । सऽरथम् ।
पुनानः । वाघत् । वाघतऽभिः । अमर्त्यः ॥ ५ ॥

हे सोम त्वं इन्द्रेण सरथं समानं रथमारुह्य देवीः देवानां संबन्धीनि स्वधाः बलानि अनु देवसेनाः परियाहि परिगच्छ। कीदृशः पुनानः पूयमानः वाघद्भिः वाघतइति ऋत्विङ्नाम हविषां प्रेरकैर्ऋत्विग्भिर्वाघत् ऊह्यमानां अमर्त्यः मनुष्यधर्मरहितः यद्वा वाघद्भिर्ऋत्विग्भिः पुनानः पूयमानः वाघत् स्तोतॄणां यष्टॄणां धनादीनि प्रापयन् परिगच्छ ॥ ५ ॥

५. सोम, तुम इन्द्र के समान रथ पर चढ़कर देव-सेना के पास जाओ। ऋत्विकों के द्वारा शोधित और अमर सोम स्तोताओं को धन आदि देते हैं।

परिसप्तिर्नवाजयुर्देवोदेवेभ्यःसुतः । व्यानशिःपवमानोविधावति ॥६॥६॥

परि । सप्तिः । न । वाजऽयुः । देवः । देवेभ्यः । सुतः ।
विऽआनशिः । पवमानः । वि । धावति ॥ ६ ॥ ६ ॥

सप्तिर्न अश्वइव वाजयुः युद्धमिच्छन् देवोदीप्यमानः देवेभ्योदेवार्थं सुतोभिषुतः व्यानशिः पात्रेषु व्यापी पवमानः पवित्रेण पूयमानः एतादृशः सोमः विविधं परिधावति परितः पात्राण्यभिगच्छति। व्यानशिः अशूव्याप्तौ आदृगमहनेत्यत्र उत्सर्गश्छन्दसि सदादिभ्यो दर्शनादिति किव् प्रत्ययः अश्नोतेश्चेति नुडागमः ॥ ६ ॥

६. अश्व के समान युद्धाभिलाषी दीप्यमान, देवों के लिए अभिषुत, पात्रों में व्यापक और पवित्र से शोधित सोम चारों ओर दौड़ते हैं।

॥ इति सप्तमस्य पंचमे षष्ठोवर्गः ॥ ६ ॥

॥ इति नवमे मंडले षष्ठोनुवाकः ॥ ६ ॥

सप्तमेनुवाके एकादशसूक्तानि तत्र सखायइति षळृचं प्रथमं सूक्तं काण्वौ पर्वतनारदावृषी। अथवा कश्यपस्यपुत्र्यौ शिखंडिन्याख्ये द्वे अप्सरसावस्य सूक्तस्य द्रष्ट्र्यौ पूर्ववच्छन्दोदेवते। तथानुक्रम्यते—सखायः पर्वतनारदौ काश्यपौ द्वेशिखंडिन्यौ वाप्सरसाविति। गतः सूक्तविनियोगः।

तत्र प्रथमा—

सखायआनिषीदतपुनानायप्रगायत । शिशुंनयज्ञैःपरिभूषतश्रिये ॥१॥

सखायः । आ । नि । सीदत । पुनानाय । प्र । गायत ।
शिशुम् । न । यज्ञैः । परि । भूषत । श्रिये ॥ १ ॥

हे सखायः सखिभूताः स्तोतारऋत्विजः आनिषीदत स्तोतुं उपविशत। अथ पुनानाय पूयमानाय सोमाय प्रगायत प्रकर्षेण गायत तमभिष्टुत। ततः अभिषुतं सोमं यज्ञैर्यजनीयैः हविर्भिः मिश्रणैश्च श्रिये शोभनार्थं परिभूषत परितोलंकुरुत। तत्र दृष्टान्तः—शिशुं न यथा शिशुं बालं पुत्रं पितर आभरणैरलंकुर्वन्ति तद्वत्॥ १॥

१. मित्र पुरोहितो, बैठो और शोधित सोम के लिए गाओ। अभिषुत सोम का यज्ञीय हवि आदि से, शोभा के लिए, वैसे ही अलंकृत करो, जैसे बच्चों को गहनों से माँ-बाप विभूषित करते हैं।

प्रवर्ग्येऽभिष्टवे समीवत्समित्येका। सृजितंच—समीवत्संनमातृभिःसंवत्सइवमातृभिरिति।

समीवत्संनमातृभिःसृजतागयसाधम्।
देवाव्यंमदमभिद्विशवसम्॥ २॥

सम्। ईमिति। वत्सम्। न। मातृऽभिः। सृजत। गयऽसाधनम्।
देवऽअव्यम्। मदम्। अभि। द्विऽशवसम्॥ २॥

हे ऋत्विजः गयसाधनं गृहस्य साधनं ईमेनं सोमं मातृभिर्मातृभूताभिर्वसतीवरीभिः संसृजत संमिश्रयत। कथमिव वत्सं न यथावत्सं मातृभिर्गोभिः संयोजयन्ति तद्वत्। कीदृशं देवाव्यं देवानां रक्षकं मदं मदनहेतुं द्विशवसं द्विगुणवेगं अतिशयितबलंवा यद्वा द्वयोर्लोकयोः तत्र स्थितादेवमनुष्याइत्यर्थः। तेषां हविर्धनप्रदानेन वर्धयितारं तं सोममभिसंसृजत॥ २॥

२. ऋत्विको, गृह-साधन, देवों के रक्षक, मद-कारण और अतीव बली सोम को मातृ-रूप जल में वैसे ही मिलाओ, जैसे बछड़े को गाय से मिलाया जाता है। अथ तृतीया—

पुनानोदक्षसाधनंयथाशर्धायवीतये।
यथामित्रायवरुणायशंतमः॥ ३॥

पुनानः। दक्षऽसाधनम्। यथा। शर्धाय। वीतये। यथा।
मित्राय। वरुणाय। शम्ऽतमः॥ ३॥

दक्षसाधनं बलस्य साधनं धनादिवृद्धेर्वा साधकं सोमं पुनात पवित्रेण पुनीत। पूञ् पवने क्र्यादिः तस्माल्लोटि तप्तनप्तनथनाश्चेति तस्य तबादेशः पित्वादीत्वाभावः। असौ सोमः शर्धाय वेगार्थं वीतये देवानां पानार्थं यथा भवति यथावा मित्राय वरुणायच शंतमः अतिशयेन सुखं करोति तथा पुनीतेत्यर्थः॥ ३॥

३. बल-साधन सोम को पवित्र में शोधित करो। सोम वेग, देवों के पान तथा मित्र और वरुण के पान के लिए अतीव सुख देते हैं।

अथ चतुर्थी—

अस्मभ्यंत्वावसुविदमभिवाणीरनूषत ।
गोभिष्टेवर्णमभिवासयामसि ॥ ४ ॥

अस्मभ्यम् । त्वा । वसुऽविदम् । अभि । वाणीः । अनूषत ।
गोभिः । ते । वर्णम् । अभि । वासयामसि ॥ ४ ॥

हे सोम वसुविदं धनस्य दातारं त्वा त्वामस्मभ्यं धनादिप्रदानार्थं वाणीः अस्मदीया-वाचो अभ्यनूषत अभिष्टुवन्ति नूस्तवने । वयं ते तव वर्णं आवरकं रसं गोभिर्गोविकारैः क्षीरादिभिः अभिवासयामसि अभिवासयामः अभितआच्छादयामः ॥ ४ ॥

४. सोम, हमें दान दिलाने के लिए धनदाता तुम्हें हमारी वाणी स्तुत करती है। हम तुम्हारे आवरक रस को गोदुग्ध में मिलाते हैं।

सनोमदानांपतइन्दोदेवप्सराअसि ।
सखेवसख्येगातुवित्तमोभव ॥ ५ ॥

सः । नः । मदानाम् । पते । इन्दो इति । देवऽप्सराः । असि ।
सखाऽइव । सख्ये । गातुवित्ऽतमः । भव ॥ ५ ॥

नः अस्मदादीनां मदानां मदकानां पते स्वामिन् हे इन्दो सोम सत्वं देवप्सराअसि प्सरइति रूपनाम दीप्तरूपोभवसि । सत्वं सखेव यथा सखा सुहृत् सख्ये मित्राय सत्यं मार्गं ज्ञापयति तद्वत् अस्माकमपि गातुवित्तमःअत्यन्तं मार्गस्य लंभकोभव ज्ञापकोभव ॥ ५ ॥

५. मद के स्वामी सोम, तुम्हारा रूप दीप्त है। जैसे मित्र मित्र को सच्चा मार्ग बताता है, वैसे ही तुम हमारे मार्ग-ज्ञापक बनो।

अथ षष्ठी—

सनेमिकृध्यस्मदारक्षसंकंचिदत्रिणम् ।
अपादेवंद्वयुमंहोयुयोधिनः ॥ ६ ॥ ७ ॥

सनेमि । कृधि । अस्मत् । आ । रक्षसम् । कम् । चित् । अत्रिणम् ।
अप । अदेवम् । द्वयुम् । अंहः । युयोधि । नः ॥ ६ ॥ ७ ॥

हे सोम अस्मत् अस्माकं सनेमि पुराणनामैतत् पुराणं सख्यं सधि कुरु। आ अपिच अत्रिणमदनशीलं कंचिद्राक्षसं अपयुध्यस्व। कीदृशं अदेवं अदेवनशीलं द्वयुद्वयवन्तं सत्यानृतयुक्तंवाह्याभ्यन्तरमायायुक्तंवा। किंच नोस्माकमंहः पापंच अपयुयोधि संपहर युध्यतेर्बहुलंछन्दसीति शपःश्लुः बाछन्दसीति हेर्ङित्त्वाद्गुणः धलोपश्छान्दसः यौतेर्वाश्लौ पूर्ववद्रूपं ॥ ६ ॥

६. सोम, हमारे साथ पुरानी मैत्री करो। उद्दण्ड, बाहर और भीतर मायावाले तथा पेटू राक्षस को मारो और हमारे पाप को काटो।

॥ इति सप्तमस्य पंचमे सप्तमोवर्गः ॥ ७ ॥

तंवइति षळृचं द्वितीयंसूक्तं पर्वतनारदयोरार्षं अन्यत्पूर्ववत्। तंवइत्यनुक्रान्तं। गतः सूक्तविनियोगः।

तंवःसखायोमदायपुनानमभिगायत ।
शिशुंनयज्ञैःस्वदयन्तगूर्तिभिः ॥ १ ॥

तम्। वः। सखायः। मदाय। पुनानम्। अभि। गायत।
शिशुम्। न। यज्ञैः। स्वदयन्त। गूर्तिऽभिः॥ १ ॥

हे सखायः ऋत्विजोवोयूयं मदाय देवानां मदार्थं पुनानं पूयमानं तं [illegible]गायत अभिष्टुत तमिमं सोमं शिशुंन शिशुमिवालंकारैः क्षीरादिभिश्च यथा स्वादूकुर्वन्ति तद्वत्। यज्ञैर्हविर्भिर्मिश्रणैः गूर्तिभिः स्तुतिभिश्च स्वदयन्त स्वादूकुर्वन्ति ॥ १ ॥

१. मित्र पुरोहितो, देवों के मद के लिए सोम की स्तुति करो। जैसे शिशु को अलंकृत किया जाता है, वैसे ही गोदुग्ध और स्तुति आदि से सोम को विभूषित किया जाता है।

प्रवर्ग्येभिष्टवे संवत्सइवमातृभिरित्येका। सूत्रंच—समीवत्समित्यनया सहोक्तं।

सैषा सूक्ते द्वितीया—

संवत्सइवमातृभिरिन्दुर्हिन्वानोअज्यते ।
देवावीर्मदोमतिभिःपरिष्कृतः ॥ २ ॥

सम्। वत्सःइव। मातृऽभिः। इन्दुः। हिन्वानः। अज्यते।
देवऽअवीः। मदः। मतिऽभिः। परिऽकृतः॥ २ ॥

हिन्वानः प्रेर्यमाणः इंदुःसोमः वसतीवरीभिः समज्यते सम्यक्सिक्तोभवति। तत्र दृष्टान्तः—वत्सइव वत्सोयथा मातृभिः गोभिः समक्तोभवति तद्वत्। कीदृशः देवावीः देवानां र-

शकः मदोमदकरः मतिभिः स्तुतिभिः परिष्कृतोलंकृतः भूषणार्थे संपर्युपेभ्यइति सुडागमः परिनिविभ्यइतिसुटः षत्वं ॥ २ ॥

२. सेना-रक्षक, मदकर, स्तुतियों के द्वारा अलंकृत और प्रेरित सोम जल के द्वारा वैसे ही मिश्रित किये जाते हैं, जैसे माता गौ के द्वारा बछड़ा मिलया जाता है।

अयंदक्षायसाधनोयंशर्धायवीतये ।
अयंदेवेभ्योमधुमत्तमःसुतः ॥ ३ ॥

अयम् । दक्षाय । साधनः । अयम् । शर्धाय । वीतये ।
अयम् । देवेभ्यः । मधुमत्ऽतमः । सुतः ॥ ३ ॥

अयं सोमः दक्षाय बलाय वर्धनाय वा साधनः साधयिता भवति । तथा यं सोमः शर्धाय वेगार्थं वीतये देवानां भक्षणार्थंच भवति सुतः अभिषुतोयं सोमः देवेभ्यइन्द्रादिभ्योमधुमत्तमः अतिशयेन माधुर्ययुक्तोभवति । अत्यन्तं मदकरोभवतीतिवा ॥ ३ ॥

३. सोम बल के साधक हैं। वेग और देवों के भक्षण के लिए अभिषुत सोम अत्यन्त मधुर होते हैं।

गोमन्नइन्दोअश्ववत्सुतःसुदक्षधन्व ।
शुचिंतेवर्णमधिगोषुदीधरम् ॥ ४ ॥

गोऽमत् । नः । इन्दो इति । अश्वऽवत् । सुतः । सुऽदक्ष ।
धन्व । शुचिम् । ते । वर्णम् । अधि । गोषु । दीधरम् ॥ ४ ॥

हे सुदक्ष सुबल हे इन्दो सोम सुतोभिषुतस्त्वं नोस्माकं गोमत् यज्ञसाधनगोयुक्तं अश्ववदश्वयुक्तं धनं धन्व गमय धविर्गत्यर्थः भ्वादिः । ततोहं शुचिं पूतं दीप्यमानंवा ते तव वर्णं रसं गोषु गव्येषु क्षीरादिषु अधिदीधरं अधिधारयामि मिश्रयामि ॥ ४ ॥

४. सुन्दर बलवाले सोम, अभिषुत होकर तुम यज्ञ-साधक तथा गौ और अश्व से युक्त धन ले आओ। मैं तुम्हारे रस को दुग्ध आदि में मिलाता हूँ।

अथ पंचमी—

सनोहरीणांपतइन्दोदेवप्सरस्तमः ।
सखेवसख्येनर्योरुचेभव ॥ ५ ॥

सः । नः । हरीणाम् । पते । इन्दो इति । देवप्सरःऽतमः ।
सखाऽइव । सख्ये । नर्यः । रुचे । भव ॥ ५ ॥

हे हरीणां पते नः अस्मदीयानां हरितवर्णानां पशूनां स्वामिन् हे इन्दो सोम देवप्सरस्तमः अतिशयेन दीप्तरूपोपेतः सत्वं नर्यः कर्मनेतृभ्यः ऋत्विग्भ्यः हितः सत्वं नोस्माकं रुचे भव दीप्तिकरोभव । किमिव सखेव यथा सखासख्ये मित्राय दीप्तिकरोभवति तद्वत् ॥ ५ ॥

५. हमारे हरित-वर्ण पशुओं के स्वामी सोम, अत्यन्त दीप्त रूप से युक्त और ऋत्विकों के द्वारा नियुक्त तुम हमारे लिए दीप्त किरणोंवाले बनो।

अथ षष्ठी—

सनेमित्वमस्मदाँअदेवंकंचिदत्रिणम् ।
साह्वाँइन्दोपरिबाधोअपद्वयुम् ॥ ६ ॥ ८ ॥

सनेमि । त्वम् । अस्मत् । आ । अदेवम् । कम् । चित् । अत्रिणम् ।
सह्वान् । इन्दो इति । परि । बाधः । अप । द्वयुम् ॥ ६ ॥ ८ ॥

हे सोम त्वं सनेमि पुराणं सख्यं अस्मदस्मासु कुरु । आ अपिच अदेवं अदेवनशीलं कंचिदपि अत्रिणमदनशीलं राक्षसं अस्मदस्मत्तोपगमय । किंच हे इन्दो साह्वान् शत्रूनभिभवन् बाधोबाधमानान् परिजहि । तथा द्वयुं द्वयवंतं सत्यानृतयुक्तं बाह्याभ्यन्तरमायाद्वयोपेतं वा राक्षसं अस्मत्तोपगमय ॥ ६ ॥

६. सोम, तुम हमसे पुरानी मैत्री करो। देव-शून्य और पशु राक्षस को हमसे अलग करो। सोम, शत्रुओं को हराते हुए बाधकों को ताड़ित करो। बाह्य और आभ्यन्तर की मायाओं से युक्त राक्षस को हमसे दूर करो। ॥ इति सप्तमस्य पंचमेष्टमोवर्गः ॥ ८ ॥

इन्द्रमच्छेति चतुर्दशर्चं तृतीयं सूक्तं औष्णिहं पवमानसोमदेवताकं । प्रथमतृचस्य चक्षुराख्यपुत्रोग्निर्ऋषिः द्वितीयस्य मनुपुत्रश्चक्षुर्नामा अप्सुनाम्नः पुत्रोमनुस्तृतीयस्य एवंनवर्चोगताः शिष्टानामपि पंचानां चाक्षुषोग्निः । तथाचानुक्रम्यते—इन्द्रमच्छपळूनाग्निश्चाक्षुषश्चक्षुर्मानवोमनुराप्सवइति तृचाः पंचाग्निरिति । गतोविनियोगः ।

तत्र प्रथमा—

इन्द्रमच्छसुताइमेवृषणंयन्तुहरयः ।
श्रुष्टीजातासइन्दवःस्वर्विदः ॥ १ ॥

इन्द्रम् । अच्छ । सुताः । इमे । वृषणम् । यन्तु । हरयः ।
श्रुष्टी । जातासः । इन्दवः । स्वःऽविदः ॥ १ ॥

श्रुष्टी श्रुष्टीति क्षिप्रनाम क्षिप्रं जातासोजाताः इन्दवः पात्रेषु क्षरन्तः स्वर्विदः सर्वज्ञाः हरयोहरितवर्णाः सुताअभिषुताः इमे सोमाः वृषणं कामानां सेकारमिन्द्रं अच्छयन्तु अभिगच्छन्तु ॥ १ ॥

१. शीघ्रज्ञाता, पात्रों में क्षरणशील, सर्वज्ञ हरित-वर्ण, अभिषुत और काम-सेचक सोम इन्द्र के पास जायें।

अयंभरायसानसिरिन्द्रायपवतेसुतः ।
सोमोजैत्रस्यचेततियथाविदे ॥ २ ॥

अयम् । भराय । सानसिः । इन्द्राय । पवते । सुतः ।
सोमः । जैत्रस्य । चेतति । यथा । विदे ॥ २ ॥

भराय संग्रामाय तदर्थं सानसिर्भजनीयः सुतोभिषुतोयं सोमः इन्द्रायेन्द्रार्थं पवते ग्रहादिषु क्षरति । ततः सोमः जैत्रस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञा चतुर्थ्यर्थे बहुलमिति षष्ठी । जयशीलमिन्द्रं चेतति जानाति यथा इन्द्रोविदे लोकैर्ज्ञायते तथा जानाति ॥२॥

२. संग्राम के लिए आश्रयणीय और अभिषुत सोम इन्द्र के लिए क्षरित होते हैं। जैसे संसार इन्द्र को जानता है, वैसे ही जयशील इन्द्र को सोम जानते हैं।

अस्येदिन्द्रोमदेष्वाग्राभंगृभ्णीतसानसिम् ।
वज्रंचवृषणंभरत्समप्सुजित् ॥ ३ ॥

अस्य । इत् । इन्द्रः । मदेषु । आ । ग्राभम् । गृभ्णीत । सानसिम् ।
वज्रम् । च । वृषणम् । भरत् । सम् । अप्सुऽजित् ॥ ३ ॥

आअनन्तरं इन्द्रः अस्येव अस्य सोमस्यैव मदेषु संजातेषु सानसिं सर्वैः संभजनीयं ग्राभं ग्राहं गृहीतव्यं धनुर्गृभ्णीत गृह्णाति ह्यग्रहोर्भइति भत्वं । किंच अप्सुजित् उदकार्थवृत्रस्य जेता । यद्वा आपइत्यन्तरिक्षनाम अन्तरिक्षे अहिनामकस्य जेता इन्द्रः वृषणं वर्षितारं वज्रं च संभरत् संबिभर्तु बिभर्तेर्लेटयडागमः ॥ ३ ॥

३. सोम का मद उत्पन्न होने पर इन्द्र सबके भजनीय और ग्रहणीय धनुष को धारण करते हैं। अन्तरिक्ष में "अहि" के जेता इन्द्र वर्षक वज्र को धारण करते हैं।

प्रधन्वासोमजागृविरिन्द्रायेन्दोपरिस्रव ।
द्युमन्तंशुष्ममाभरास्वर्विदम् ॥ ४ ॥

प्र । धन्व । सोम । जागृविः । इन्द्राय । इन्दो इति । परि । स्रव ।
द्युऽमन्तम् । शुष्मम् । आ । भर । स्वःऽविदम् ॥ ४ ॥

हे सोम जागृविर्जागरणशीलस्त्वं प्रधन्व प्रक्षर । हे इन्दो सोम इन्द्राय परिस्रव परितः पात्रेषु क्षर । किंच द्युमन्तं दीप्तियुक्तं स्वर्विदं सर्वस्य लंभकं शुष्मं शत्रूणां शोषकं बलं आभराहर ॥ ४ ॥

४. सोम, तुम जागरणशील हो। क्षरित होओ। सोम, इन्द्र के लिये पात्रों में क्षरित होओ। दीप्ति-युक्त, सर्वज्ञ और शत्रु-शोषक बल को ले आओ।

इन्द्रायवृषणंमदंपवस्वविश्वदर्शतः ।
सहस्रयामापथिकृद्विचक्षणः ॥ ५ ॥ ९ ॥

इन्द्राय । वृषणम् । मदम् । पवस्व । विश्वऽदर्शतः ।
सहस्रऽयामा । पथिऽकृत् । विऽचक्षणः ॥ ५ ॥ ९ ॥

हे सोम त्वं वृषणं वर्षितारं मदं मदहेतुं रसं इन्द्रायेन्द्रार्थं पवस्व क्षर । कीदृशः विश्वदर्शतः सर्वैर्दर्शनीयः सहस्रयामा बहुमार्गः पथिकृत् यजमानानां सन्मार्गकरणशीलः विचक्षणः सर्वस्य विद्रष्टा ॥ ५ ॥

५. तुम सबके दर्शनीय, बहुमार्ग; यजमानों के सन्मार्गकर्त्ता और सबके द्रष्टा सोम, तुम वर्षक और मद-कारण रस, इन्द्र के लिए क्षरित होओ।

॥ इति सप्तमस्य पंचमे नवमोवर्गः ॥ ९ ॥

अथ षष्ठी—

अस्मभ्यंगातुवित्तमोदेवेभ्योमधुमत्तमः ।
सहस्रंयाहिपथिभिःकनिक्रदत् ॥ ६ ॥

अस्मभ्यम् । गातुवित्ऽतमः । देवेभ्यः । मधुमत्ऽतमः ।
सहस्रम् । याहि । पथिऽभिः । कनिक्रदत् ॥ ६ ॥

हे सोम अस्मभ्यं गातुवित्तमः अत्यन्तं मार्गस्य लंभकः तथा देवेभ्यश्च मधुमत्तमः अत्यन्तं स्वादुकारी त्वं कनिक्रदत् शब्दंकुर्वन् सहस्रं पथिभिर्बहुभिर्मार्गैः याहि कलशमागच्छ ॥६॥

६. सोम, अतीव मार्ग-प्रदर्शक, देवों के लिए मधुर और शब्दायमान तुम अनेक मार्गों से कलश में जाओ।

अथ सप्तमी—

पवस्वदेववीतयइन्दोधाराभिरोजसा ।
आकलशंमधुमान्त्सोमनःसदः ॥ ७ ॥

पवस्व । देवऽवीतये । इन्दो इति । धाराभिः । ओजसा । आ ।
कलशम् । मधुऽमान् । सोम । नः । सदः ॥ ७ ॥

हे इन्दो सोम देववीतये देवानां भक्षणार्थं ओजसा बलेन धाराभिरात्मीयाभिः पवस्व क्षर । हे सोम मधुमान् मदकररसवांस्त्वं नोस्मदीयं कलशं द्रोणाभिधानं आसदः । सदेर्लुङि रूपं । आसीद ॥ ७ ॥

७. सोम, देवों के भक्षण के लिए बल-पूर्वक धाराओं के द्वारा क्षरित होओ। सोम, तुम मदकर रसवाले हो। कलश पर बैठो।

तवद्रप्साउदप्रुतइन्द्रंमदायवावृधुः ।
त्वांदेवासोअमृतायकंपपुः ॥ ८ ॥

तव । द्रप्साः । उदऽप्रुतः । इन्द्रम् । मदाय । ववृधुः । त्वाम् ।
देवासः । अमृताय । कम् । पपुः ॥ ८ ॥

उदप्रुतः वसतीवर्याख्यमुदकं प्रति गच्छंतः यद्वा उदकस्य निर्गमयितारः तव स्वभूताद्रप्साः द्रुतगामिनोरसाः मदाय मदार्थं इन्द्रं वावृधुर्वर्धयन्ति । ततः देवासोदेवाः इन्द्रादयः कं सुखकरं त्वां अमृताय अमरणार्थं पपुः पिबन्ति ॥ ८ ॥

८. तुम्हारा जल से बहनेवाला रस इन्द्र को वर्द्धित करता है । इन्द्रादि देवता अमर होने के लिए सुखकर तुम्हें पीते हैं ।

अथ नवमी—

आनःसुतासइन्दवःपुनानाधावतारयिम् ।
वृष्टिद्यावोरीत्यापःस्वर्विदः ॥ ९ ॥

आ । नः । सुतासः । इन्दवः । पुनानाः । धावत । रयिम् ।
वृष्टिऽद्यावः । रीतिऽआपः । स्वःऽविदः ॥ ९ ॥

हे सुतासः अभिषूयमाणाः हे इन्दवः दीप्ताः पात्रेषु क्षरन्तोवा हे रीत्यापः यैः पृथिवीं प्रति स्रवणशीलाआपः कृताः तादृशाः हे सोमाः पुनानाः पूयमानाः यूयं नोस्मभ्यं रयिं आधा-

वत आगमयत। कीदृशाः वृष्टियावः वृष्टिभिर्यौः यैः क्रियते वृष्ट्यभिमुखद्युलोकवन्तः स्वर्विदः सर्वस्य लंभकाः ॥ ९ ॥

९. अभिषव किये जाते हुए और पृथिवी पर जल बरसानेवाले सोम, वृष्टि से युक्त द्युलोकवाले और सर्वज्ञ सोम, तुम हमारे लिए धन ले आओ।

सोमः पुनान ऊर्मिणाव्योवारं विधावति।
अग्रे वाचः पवमानः कनिक्रदत् ॥ १० ॥ १० ॥

सोमः। पुनानः। ऊर्मिणा। अव्यः। वारम्। वि। धावति।
अग्रे। वाचः। पवमानः। कनिक्रदत् ॥ १० ॥ १० ॥

पुनानः पूयमानः सोमः ऊर्मिणा स्वीयया धारया अव्यः अवेर्वारं वालं पवित्रं विधावति विविधं गच्छति। कीदृशः पवमानः पूतः वाचः स्तोत्रस्याग्रे कनिक्रदत् पुनःपुनः शब्दं कुर्वन् विधावति ॥ १० ॥

१०. पवित्र, स्तोत्र के आगे शब्द करनेवाले और शोधित सोम अपनी धारा से मेषलोममय पवित्र में जाते हैं।

॥ इति सप्तमस्य पञ्चमे दशमोवर्गः ॥ १० ॥

अथैकादशी—

धीभिर्हिन्वन्ति वाजिनं वने क्रीळन्तमत्यविम्।
अभि त्रिपृष्ठं मतयः समस्वरन् ॥ ११ ॥

धीभिः। हिन्वन्ति। वाजिनम्। वने। क्रीळन्तम्। अतिऽअविम्।
अभि। त्रिऽपृष्ठम्। मतयः। सम्। अस्वरन् ॥ ११ ॥

वाजिनं बलवन्तं वननीये वसतीवर्याख्ये उदके क्रीळन्तं संक्रीडमानं अत्यविं अविशब्देन तद्रोमकृतं पवित्रमभिधीयते अतिक्रान्तपवित्रं सोमं ऋत्विजो धीभिः स्तुतिभिः हिन्वन्ति वर्धयन्ति। यद्वा धीभिर्वर्णलोपश्छान्दसः धीतिभिरंगुलीभिः हिन्वन्ति प्रेरयन्ति। हिगतौ वृद्धौ च स्वादिः। किंच त्रिपृष्ठं त्रीणि पवित्राणि द्रोणकलशाधवनीयपूतभृदात्मकानि पात्राणि त्रीणि सवनानि वा स्पृशतीति सतथोक्तः तं सोमं मतयः स्तुतयः अभिसमस्वरन् अभितः संस्तुवन्ति ॥ ११ ॥

११. बली, जल में क्रीड़ा करनेवाले और पवित्र को लांघनेवाले सोम को स्तोता लोग, स्तुति के द्वारा, वर्द्धित करते हैं। तीन सवनोंवाले सोम की स्तुतियाँ स्तुति करती हैं।

असर्जि कलशाँ अभि मीळ्हे सप्ति र्न वाजयुः।
पुनानो वाचं जनयन्नसिष्यदत् ॥ १२ ॥

असर्जि । कलशान् । अभि । मीह्ले । सप्तिः । न । वाजऽयुः ।
पुनानः । वाचम् । जनयन् । असिस्यदत् ॥ १२ ॥

वाजयुः यजमानानामन्नमिच्छन् ससोमः कलशानभिलक्ष्य कलशेषु असर्जि सृज्यते । तत्र दृष्टान्तः—सप्तिर्न यथा अश्वोमीह्ले संग्रामनामैतत् संग्रामे सृज्यतेतद्वत् । ततः पुनानः पूयमानः सोमः वाचं शब्दं जनयन् उत्पादयन् असिष्यदत् पात्रेषु स्यन्दते ॥ १२ ॥

१२. जैसे अश्व युद्ध में प्रस्तुत किया जाता है, वैसे ही अन्नाभिलाषी सोम को कलश में बनाया जाता है। शोधित सोम शब्द करते हुए पात्रों में चूते हैं।

पवतेहर्यतोहरिरतिह्वरांसिरंह्या ।
अभ्यर्षन्स्तोतृभ्योवीरवद्यशः ॥ १३ ॥

पवते । हर्यतः । हरिः । अति । ह्वरांसि । रंह्या ।
अभिऽअर्षन् । स्तोतृऽभ्यः । वीरऽवत् । यशः ॥ १३ ॥

हर्यतः स्पृहणीयः हरिर्हरितवर्णः सोमः रंह्या तृतीयाया आकारः साधुवेगेनह्वरांसि कुटिलानि अनृजूनि पवित्राणि अतिपवते अतीत्यगच्छति । किंकुर्वन् स्तोतृभ्यो वीरवत् पुत्रयुक्तं यशः अभ्यर्षन् अभिगमयन् पवते ॥ १३ ॥

१३. श्लाघनीय और हरितवर्ण सोम साधु वेग से कुटिल पवित्र को लाँघकर जाते हैं। सोम स्तोताओं को पुत्र-युक्त यश दे रहे हैं।

अयापवस्वदेवयुर्मधोर्धारांअसृक्षत ।
रेभन्पवित्रंपर्येषिविश्वतः ॥ १४ ॥ ११ ॥

अया । पवस्व । देवऽयुः । मधोः । धाराः । असृक्षत । रेभन् ।
पवित्रम् । परि । एषि । विश्वतः ॥ १४ ॥ ११ ॥

हे सोम देवयुर्देवान् कामयमानस्त्वं अया अनया धारया पवस्व क्षर । ततः मधोर्मदकरस्य तव धाराआत्मीयाः असृक्षत सृज्यन्ते । अनन्तरं रेभन् शब्दायमानः पवित्रं विश्वतः पर्येषि सर्वतः परिगच्छसि ॥ १४ ॥

१४. सोम, देवाभिलाषी होकर तुम धारा से क्षरित होओ। तुम्हारी मदकरी धारायें बनाई जाती हैं। शब्दायमान सोम पवित्र की चारों ओर जाते हैं। ॥ इति सप्तमस्य पंचमे एकादशोवर्गः ॥ ११ ॥

परीतइति षड्विंशत्यृचंचतुर्थं सूक्तं । त्वंसोमासीत्यत्रउकाभरद्वाजकश्यपायाः सप्तर्षयः । आद्याबृहती द्वितीयासतोबृहती अयमेकः प्रगाथः परिस्रुवानइत्येषा तृतीया एकविंशत्यक्षरा भुरिक्विराट् द्विपदा नृभिर्येमानइति षोडशी विंशत्यक्षराद्विपदाविराट् चतुर्थ्यादिद्वौ प्रगाथौ दशम्यादित्रयः सप्तदश्यादिपंचप्रगाथाः पवमानसोमोदेवता । तथाचानुक्रम्यते—परितः षड्विंशतिः सप्तऋषयः प्रागाथं तृतीयाषोडश्यौ द्विपदे अष्टम्याद्येबृहत्याविति । गतः सूक्तविनियोगः ।

तत्र प्रथमा—

परीतोषिञ्चतासुतंसोमोयउत्तमंहविः ।
दधन्वाँयोनर्योअप्स्वन्तरासुषावसोममद्रिभिः ॥ १ ॥

परि । इतः । सिञ्चत । सुतम् । सोमः । यः । उत्ऽतमम् । हविः ।
दधन्वान् । यः । नर्यः । अप्ऽसु । अन्तः । आ । सुसाव ।
सोमम् । अद्रिऽभिः ॥ १ ॥

हेऋत्विजः सुतमभिषुतं सोमं इतः अस्मात्कर्मणऊर्ध्वं अथवा अस्माद् प्रदेशादूर्ध्वं परिषिंचत वसतीवरीभिः । इतोषिंचतेत्यत्र संहितायां छन्दसीति रोरुत्वं । यः सोमः देवानामुत्तमं प्रशस्यं हविर्भवति । आ अपिच नर्योमनुष्यहितोयश्चसोमः अप्सु वसतीवरीषु अन्तरिक्षेवा अन्तर्दधन्वान् गच्छन् भवति तं सोममद्रिभिर्ग्रावभिः अध्वर्युः सुषाव अभिषुतं चकार तं परिषिंचतेति समन्वयः ॥ १ ॥

१. जो सोम देवों की उत्तम हवि, मनुष्यों के हितैषी और अन्तरिक्ष में जानेवाले हैं, उन्हें पुरोहितों ने पत्थरों से अभिषुत किया। उन अभिषुत सोम को, ऋत्विको, तुम कर्म के अनन्तर जल से सींचो।

अथ द्वितीया—

नूनंपुनानोविभिःपरिस्रवादब्धःसुरभिर्मतिः ।
सुतेचित्त्वाप्सुमदामोअन्धसाश्रीणन्तोगोभिरुत्तरम् ॥ २ ॥

नूनम् । पुनानः । अविऽभिः । परि । स्रव । अदब्धः ।
सुरभिम्ऽमतिः । सुते । चित् । त्वा । अप्ऽसु । मदामः । अन्धसा ।
श्रीणन्तः । गोभिः । उत्ऽतरम् ॥ २ ॥

हे सोम अदब्धः कैश्चिदप्यहिंसितः सुरभिन्तरः अत्यन्तं सुगन्धिः त्वं नूनमिदानीं पुनानः पूयमानः सन् अविभिरविवालकृतैः पवित्रैः तेभ्यः परिस्रव परितः क्षर स्रुतेचिव अभिषुते सति अंधसा सक्तुलक्षणेनान्नेन गोभिर्गोविकारैःक्षीरादिभिः श्रीणन्तः मिश्रयन्तोवयं उत्तरमुत्तरतरं अप्सु वसतीवरीषु संस्थितं त्वां मदामः मंदामहे स्तुमः ॥ २ ॥

२. सोम, अहिंसनीय सुगन्धि और शोधित सोम, तुम मेषलोममय पवित्र से क्षरित होओ। अभिषव हो जाने पर दूध आदि और सत्तू में सोम को मिलाते हुए हम जल में स्थित तुम्हें भजते हैं।

परिसुवानश्चक्षसेदेवमादनःक्रतुरिन्दुर्विचक्षणः ॥ ३ ॥

परि । सुवानः । चक्षसे । देवऽमादनः । क्रतुः । इन्दुः ।
विऽचक्षणः ॥ ३ ॥

सुवानोभिषूयमाणः सोमः चक्षसे सर्वेषां दर्शनाय परिस्रवति । कीदृशः देवमादनः देवानां तर्पयिता क्रतुः कर्ता इन्दुः पात्रेषु क्षरणशीलः दीप्तोवा विचक्षणः सर्वस्य विद्रष्टा ॥ ३ ॥

३. अभिषुत देवों के तर्पक, कर्त्ता, पात्रों में क्षरणशील और सबके द्रष्टा सोम, सबके दर्शन के लिए, क्षरित होते हैं।

पुनानःसोमधारयापोवसानोअर्षसि ।
आरत्नधायोनिमृतस्यसीदस्युत्सोदेवहिरण्ययः ॥ ४॥

पुनानः । सोम । धारया । अपः । वसानः । अर्षसि । आ ।
रत्नऽधाः । योनिम् । ऋतस्य । सीदसि । उत्सः ।
देव । हिरण्ययः ॥ ४ ॥

हे सोम पुनानः पूयमानस्त्वं अपउदकानि वसतीवर्याख्यानि वसानः आच्छादयन् धारया अर्षसि पवित्रं गच्छसि । ततः रत्नधाः रत्नानां दाता त्वं ऋतस्य सत्यभूतस्य यज्ञस्य योनिं स्थानमासीदसि हे देव द्योतमान सोम उत्सः प्रस्यन्दनशीलस्त्वं हिरण्ययः हिरण्मयः हिरण्यस्योत्पत्तिस्थानं खलु यद्वा देवानां हितरमणीयोभवसि ॥ ४ ॥

४. सोम, शोधित होकर तुम वसतीवरी जल में मिलाकर धारा से क्षरित होते हो। रत्नदाता तुम सत्य-यज्ञ के स्थान में बैठते हो। दीप्त सोम, तुम स्पन्दनशील और हिरण्मय हो।

दुहानऊधर्दिव्यंमधुप्रियंप्रत्नंसधस्थमासदत् ।
आपृच्छ्यंधरुणंवाज्यर्षतिनृभिर्धूतोविचक्षणः ॥५॥१२॥

दुहानः । ऊधः । दिव्यम् । मधु । प्रियम् । प्रत्नम् । सधऽस्थम् ।
आ । असदत् । आऽपृच्छ्यम् । धरुणम् । वाजी । अर्षति ।
नृऽभिः । धूतः । विऽचक्षणः ॥ ५ ॥ १२ ॥

मधु मदकरं प्रियं प्रीणनकारि दिव्यं दिविभवं ऊधः सोमपल्लीलक्षणं दुहानः सोमः प्रत्नं पुरातनं सधस्थं सहतिष्ठन्तं स्थानमन्तरिक्षमासदत् आसीदति सदेर्लुङि रूपं । अतः आपृच्छ्यं कर्मण्यामष्टव्यं धरुणं कर्मणोधारयितारं यजमानं वाजी अन्नवान् सोमःअर्षति तस्मै अन्नं दातुमभिगच्छति । कीदृशः नृभिः कर्मनेतृभिः ऋत्विग्भिः धूतः अदाभ्यः ग्रहे परिशोधितः । तैरेनं चतुराधूनोति पंचकृत्वः सप्तकृत्वोवेति आपस्तंबेन सूत्रितं । विचक्षणः सर्वस्य विद्रष्टा ॥ ५ ॥

५. मदकर, प्रसन्नता-कारक और दिव्य गोस्तन को दूहनेवाले सोम प्राचीन स्थान अन्तरिक्ष में बैठते हैं। कर्मनिष्ठ ऋत्विकों के द्वारा गृहीत, शोधित और सबके द्रष्टा सोम द्रुतवेग से यज्ञ के अवलम्बन तथा यज्ञकर्त्ता यजमान को अन्न देने के लिए जाते हैं।

॥ इति सप्तमस्य पंचमे द्वादशोवर्गः ॥ १२ ॥

पुनानःसोमजागृविरव्योवारेपरिप्रियः ।
त्वंविप्रोअभवोङ्गिरस्तमोमध्वायज्ञंमिमिक्षनः ॥ ६ ॥

पुनानः । सोम । जागृविः । अव्यः । वारे । परि । प्रियः ।
त्वम् । विप्रः । अभवः । अङ्गिरःऽतमः । मध्वा ।
यज्ञम् । मिमिक्ष । नः ॥ ६ ॥ ॥

हे सोम जागृविर्जागरणशीलः प्रियः प्रीणयिता त्वं पुनानः पूयमानः सन् अव्यः अवेर्वारे वाले पवित्रे परिक्षरसि । किंच विप्रोमेधावी त्वं अंगिरस्तमः अंगिरसां वरिष्ठः पितॄणां नेता भवोभवसि सत्यं नोस्मदीयं यज्ञं मध्वा मधुना आत्मीयेन रसेन मिमिक्ष सिंच मिहेः सेचनार्थस्य सनि रूपं ॥ ६ ॥

६. सोम, जागरणशील, प्रिय और शोधित तुम मेषलोममय पवित्र में क्षरित होते हो। तुम मेधावी और पितरों के नेता हो। हमारे यज्ञ को तुम अपने मधुर रस से सींचो।

अथ सप्तमी—

सोमोमीढ्वान्पवतेगातुवित्तमऋषिर्विप्रोविचक्षणः ।
त्वंकविरभवोदेववीतमआसूर्यंरोहयोदिवि ॥ ७॥

सोमः । मीढ्वान् । पवते । गातुवित्ऽतमः । ऋषिः । विप्रः ।
विऽचक्षणः । त्वम् । कविः । अभवः । देवऽवीतमः । आ ।
सूर्यम् । रोहयः । दिवि ॥ ७ ॥

मीढ्वान् कामानां सेक्ता सोमोभवन् पवते क्षरति । कीदृशः गातुवित्तमः अत्यन्तं मार्गस्य लंभकः ऋषिः सर्वस्य प्रदर्शकः विप्रोमेधावी विचक्षणोविद्रष्टा । किंच कविः क्रान्तप्रज्ञस्त्वं देववीतमः अत्यन्तं देवकामो भवोभवसि । अपिच दिवि द्युलोके सूर्यमारोहयः प्रादुर्भावयसि ॥७॥

७. मार्गदर्शक, काम-सेचक, सबके प्रदर्शक, मेधावी और सूक्ष्म-दर्शक सोम क्षरित होते हैं। तुम क्रान्तप्रज्ञ और अतीव देवकामी हो। द्युलोक में सूर्य को प्रकट करते हो।

सोमउषुवाणःसोतृभिरधिष्णुभिरवीनाम् ।
अश्वयेवहरितायातिधारयामन्द्रयायातिधारया ॥ ८ ॥

सोमः । ऊँ इति । सुवानः । सोतृऽभिः । अधि । स्नुऽभिः । अवीनाम् ।
अश्वयाऽइव । हरिता । याति । धारया । मन्द्रया । याति । धारया ॥ ८ ॥

सोतृभिरभिषुण्वद्भिर्ऋत्विग्भिः सुवानोभिषूयमाणः सोमः अवीनां स्नुभिः । मांसपृत्स्नूनामुपसंख्यानमिति सानुशब्दस्य स्नुभावः समुच्छ्रितैर्वालैः पवित्रैरधियाति अधिकं गच्छति । उइति प्रसिद्धौ । अश्वयेव वडवयेव हरिता हरितवर्णया धारया याति मन्द्रया मदकारिण्या-धारया द्रोणकलशमधिगच्छति ॥ ८ ॥

८. ऋत्विकों के द्वारा अभिषुत होकर सोम उच्च और मेषलोममय पवित्र में जाते हैं। अपनी हरितवर्ण और मदकारिणी धारा से सोम द्रोण-कलश में जाते हैं। अथ नवमी–

अनूपेगोमान्गोभिरक्षाःसोमोदुग्धाभिरक्षाः ।
समुद्रंनसंवरणान्यग्मन्मन्दीमदायतोशते ॥ ९ ॥

अनूपे । गोऽमान् । गोभिः । अक्षारिति । सोमः । दुग्धाभिः ।
अक्षारिति । समुद्रम् । न । सम्ऽवरणानि । अग्मन् ।
मन्दी । मदाय । तोशते ॥ ९ ॥

गोमान् गोयुक्तः सोमः अनूपे निम्ने देशे कलशे गोभिर्गोविकारैः क्षीरादिभिः सह अक्षाः क्षरति । तदेवोच्यते ससोमः आत्मनोमिश्रणार्थं दुग्धाभिर्गोभिः सह अक्षाः क्षरति क्षर-

तेर्लुङि रूपं । किंच समुद्रं यथा समुद्रमुदकानि गच्छन्ति तद्वत्संवरणानि संभजनीयानि रस-रूपाण्यन्नानि द्रोणकलशमगमन् गच्छन्ति गमेर्लुङि चेर्लुकि रूपं । किंच मन्दी मदकरः सोमः मदाय मदार्थं तोशते हन्यते अभिषूयते तोशतिर्वधकर्मा ॥ ९ ॥

९. गोदुग्ध के साथ सोम निम्नस्थ कलश में क्षरित होते हैं । अपने भक्षण के लिए सोम दुग्धादि के साथ प्रवाहित होते हैं। जैसे जल समुद्र में जाता है, वैसे ही संभजनीय और रस-रूप अन्न द्रोण-कलश में जाता है। मदकर सोम, मद के लिए, अभिषुत किये जाते हैं।

आसोमसुवानोअद्रिभिस्तिरोवाराण्यव्यया ।
जनोनपुरिचम्वोर्विशद्धरिःसदोवनेषुदधिषे ॥१०॥१३॥

आ । सोम । सुवानः । अद्रिऽभिः । तिरः । वाराणि ।
अव्यया । जनः । न । पुरि । चम्वोः । विशत् । हरिः ।
सदः । वनेषु । दधिषे ॥ १० ॥ १३ ॥

हे सोम अद्रिभिर्ग्रावभिः सुवानोभिषूयमाणस्त्वं अव्यया अविमयानि वाराणि वालानि पवित्राणि तिरस्कुर्वन् व्यवधायकानि कुर्वाणः सन् आपवसे इतिशेषः। हरिर्हरितवर्णः ससोमः चम्वोरधिषवणफलकयोः उपरिस्थिते कलशे विशत् प्रविशति । तत्र दृष्टान्तः—जनोन यथाजनः पुरि पुरे प्रविशति । सत्यं वनेषु काष्ठनिर्मितेषु पात्रेषु सदः स्थानं दधिषे करोषि ॥ १० ॥

१०. पत्थरों से अभिषुत होकर तुम मेषलोममय पवित्र का व्यवधान करके क्षरित होते हो। हरित-वर्ण सोम अभिषवण फलकों के ऊपर स्थित कलश में वैसे ही पैठते हैं, जैसे मनुष्य नगर में पैठता है। काष्ठ-निर्मित पात्रों में तुम स्थान बनाते हो।

॥ इति सप्तमस्य पञ्चमे त्रयोदशोवर्गः ॥१३॥

समामृजेतिरोअण्वानिमेष्योमीह्लेसप्तिर्नवाजयुः ।
अनुमाद्यःपवमानोमनीषिभिःसोमोविप्रेभिर्ऋक्वभिः ॥११॥

सः । ममृजे । तिरः । अण्वानि । मेष्यः । मीह्ले । सप्तिः ।
न । वाजऽयुः । अनुऽमाद्यः । पवमानः । मनीषिऽभिः ।
सोमः । विप्रेभिः । ऋक्वऽभिः ॥ ११ ॥

वाजयुरन्नकामः अण्वानि अणूनि सूक्ष्माणि मेष्यः मेष्याः अवेः रोमाणि पवित्राणि तिरस्कुर्वन् व्यवधायकानि कुर्वाणः सन् आपवसे इतिशेषः। हरिर्हरितवर्णः ससोमः ममृजे परिशोध्यते अलंक्रियतेवा । तत्र दृष्टान्तः—सप्तिर्न यथा जयकामैः अश्वोमीह्ले संग्रामे अलंक्रियते ।

कीदृशः अनुमायः अनुमोदनीयः सर्वैः पवमानः मनीषिभिः ऋत्विग्भिः पूयमानः तथा ऋक्भिःछन्दसि वनिपाविति वनिप् स्तुतिमद्भिः विप्रैर्मेधाविभिः अभिष्टुतः मृज्यते ॥ ११ ॥

११. अन्नाभिलाषी सोम सूक्ष्म मेषलोमनय पवित्र का व्यवधान करके क्षरित होते हैं। अनुमोदन के योग्य, पुरोहितों के द्वारा शोधित, मेधावी के द्वारा अभिषुत और हरितवर्ण सोम वैसे ही शोधित किये जाते हैं, जैसे लोग जयाभिलाषी अश्व को युद्ध में विभूषित करते हैं।

प्रसोमदेववीतयेसिन्धुर्नपिप्येअर्णसा ।
अंशोःपयसामदिरोनजागृविरच्छाकोशंमधुश्चुतम् ॥१२॥

प्र । सोम । देवऽवीतये । सिन्धुः । न । पिप्ये । अर्णसा ।
अंशोः । पयसा । मदिरः । न । जागृविः । अच्छ ।
कोशम् । मधुऽश्चुतम् ॥ १२ ॥

हे सोम देववीतये देवानां पानाय तदर्थं अर्णसा वसतीवर्याख्येनोदकेन प्रपिप्ये प्रप्यायसे। तत्रदृष्टान्तः—सिन्धुर्न यथा सिन्धुरुदकेनप्रपिप्ये प्रप्यायते तद्वत्। प्यायतेर्लिटि लिट्यन्ङोश्चेति पीभावः। ततः सत्वं मदिरोन मदकरः सुरादिरिव जागृविर्जागरणशीलः यद्वा नः संमत्यर्थे इदानीं मदकरोजागरणशीलस्त्वं अंशोः लताखंडस्य पयसा रसेन मधुश्चुतं रसस्य क्षारयितारं कोशं द्रोणकलशं अच्छाभिगच्छसि ॥ १२ ॥

१२. सोम, देवों के पान के लिए तुम वैसे ही जल से पूरित किये जाते हो, जैसे जल से समुद्र पूर्ण किया जाता है। मदकर और जागरणशील तुम लता के रस से रस चुलानेवाले द्रोण-कलश में जाते हो।

आहर्यतोअर्जुनेअत्केअव्यतप्रियःसूनुर्नमर्ज्यः ।
तमींहिन्वन्त्यपसोयथारथंनदीष्वागभस्त्योः ॥ १३ ॥

आ । हर्यतः । अर्जुने । अत्के । अव्यत । प्रियः । सूनुः ।
न । मर्ज्यः । तम् । ईम् । हिन्वन्ति । अपसः । यथा । रथम् ।
नदीषु । आ । गभस्त्योः ॥ १३ ॥

हर्यतः स्पृहणीयः प्रियः प्रीणयितासूनुर्न सूनुरिव मर्ज्योमार्जनीयः सोमः अर्जुने अर्जुनवर्णे अत्के रूपे पवित्रे आव्यत आवृणोति तमीमेनं सोमं अंगुलयः नदीषु नदमानासु वसतीवरीषु गभस्त्योर्बाह्वोराभिमुख्येन हिन्वन्ति प्रेरयन्ति । तत्र दृष्टान्तः—अपसो यथा वेगवन्तोजना रथं संग्रामेषु प्रेरयन्ति तद्वत् ॥१३॥

१३. स्पृहणीय, प्रसन्नता-कारक और पुत्र के समान शोधनीय सोम शुक्लवर्ण पवित्र को ढकते हैं। जैसे वेगशाली मनुष्य युद्ध में रथ को प्रेरित करते हैं, वैसे ही जल में दोनों हाथों की अँगुलियाँ सोम को प्रेरित करती हैं। अथ चतुर्दशी—

अभिसोमासआयवःपवन्तेमद्यंमदम् ।
समुद्रस्याधिविष्टपिमनीषिणोमत्सरासःस्वर्विदः ॥ १४ ॥

अभि । सोमासः । आयवः । पवन्ते । मद्यम् । मदम् । समुद्रस्य । अधि । विष्टपि । मनीषिणः । मत्सरासः । स्वःऽविदः ॥ १४ ॥

आयवः गमनशीलाः सोमासः सोमाः मद्यं मदकरं मदंआत्मीयं रसं ग्रामेषु प्रेरयन्ति अभिपवन्ते अभितोनिर्गमयन्ति । कुत्रेत्युच्यते—समुद्रस्य अन्तरिक्षस्य अधि विष्टपि अधिकं समुच्छ्रिते पवित्रे यद्वा समुद्रस्य यस्मात्समुद्रवन्ति रसास्तस्य कलशस्य अधिउपरि विष्टपि स्थाने पवित्रे निर्गमयन्ति । कीदृशाः मनीषिणः मनसईशितारः मत्सरासः मदकराः स्वर्विदः सर्वस्य लंभकाः ॥ १४ ॥

१४. गमनशील सोम अपना मदकर रस चारों ओर प्रवाहित करते हैं। अन्तरिक्ष के अत्युच्च पवित्र में विद्वान् मदकर और सबके प्रापक सोम रस प्रवाहित करते हैं।

तरत्समुद्रंपवमानऊर्मिणाराजादेवऋतंबृहत् ।
अर्षन्मित्रस्यवरुणस्यधर्मणाप्रहिन्वानऋतंबृहत् ॥ १५॥ १४॥

तरत् । समुद्रम् । पवमानः । ऊर्मिणा । राजा । देवः ।
ऋतम् । बृहत् । अर्षन् । मित्रस्य । वरुणस्य । धर्मणा ।
प्र । हिन्वानः । ऋतम् । बृहत् ॥ १५ ॥ १४ ॥

पवमानः पूयमानः देवोद्योतमानः बृहत् अत्यन्तं ऋतं सत्यभूतं राजा सोमः समुद्रमन्तरिक्षं कलशंवा ऊर्मिणा धारया तरत् तरति । हिन्वानः प्रेर्यमाणः ऋतं बृहत् अत्यन्तं सत्यभूतः ससोमः मित्रस्य वरुणस्य मित्रावरुणयोः धर्मणा धारणार्थं प्रार्षन् प्रगच्छति ॥ १५ ॥

१५. शोधित, दिव्य और अतीव सत्य-राजा सोम कलश में, धारा से क्षरित होते हैं। प्रेरित और अत्यन्त सत्य सोम मित्र और वरुण के रक्षण के लिए जाते हैं।

॥ इति सप्तमस्य पंचमे चतुर्दशोवर्गः ॥ १४ ॥

नृभिर्येमानोहर्यतोविचक्षणोराजादेवःसमुद्रियः ॥ १६ ॥

नृऽभिः । येमानः । हर्यतः । विऽचक्षणः । राजा । देवः ।
समुद्रियः ॥ १६ ॥

नृभिः कर्मनेतृभिः येमानः नियम्यमानः हर्यतः स्पृहणीयः विचक्षणोविद्रष्टा देवोदीप्यमानः समुद्रियः अन्तरिक्षेभवः राजा सोमः इन्द्रार्थं पवतइत्युत्तरेण संबन्धः समुद्राभ्राद्वहति भावार्थे घप्रत्ययः ॥१६॥

१६. कर्मनिष्ठों के द्वारा नियत, स्पृहणीय, सूक्ष्मदर्शक, दिव्य, अन्तरिक्ष में उत्पन्न और राजा सोम इन्द्र के लिए क्षरित होते हैं।

इन्द्रायपवतेमदःसोमोमरुत्वतेसुतः ।
सहस्रधारोअत्यव्यमर्षतितमीमृजन्त्यायवः ॥ १७ ॥

इन्द्राय । पवते । मदः । सोमः । मरुत्वते । सुतः । सहस्रऽधारः ।
अति । अव्यम् । अर्षति । तम् । ईमिति । मृजन्ति ।
आयवः ॥ १७ ॥

मदोमादकः सुतोऽभिषुतः सोमः मरुत्वते मरुद्भिस्तद्वते इन्द्रायेन्द्रार्थं पवते क्षरति ततः सहस्रधारः बहुधारोपेतः सोमः अव्यं अविमयं पवित्रमत्यर्षति अतिगच्छति तं ईमिमं सोमं आयवोमनुष्याऋत्विजः मृजन्ति शोधयन्ति ॥ १७ ॥

१७. मदकर और अभिषुत सोम इन्द्र के लिए क्षरित होते हैं। अनेक धाराओंवाले सोम मेषलोममय पवित्र को लांघते हैं। पुरोहित लोग सोम का शोधन कर रहे हैं। अथाष्टादशी—

पुनानश्चमूजनयन्मतिंकविःसोमोदेवेषुरण्यति ।
अपोवसानःपरिगोभिरुत्तरःसीदन्वनेष्वव्यत ॥ १८ ॥

पुनानः । चमू इति । जनयन् । मतिम् । कविः । सोमः ।
देवेषु । रण्यति । अपः । वसानः । परि । गोभिः ।
उत्ऽतरः । सीदन् । वनेषु । अव्यत ॥ १८ ॥

चमू सप्तम्याः पूर्वसवर्णदीर्घः चम्वोरधिषवणफलकयोः पुनानः पूयमानः अभिषूयमाणः मतिं स्तुतिं जनयन् उत्पादयन् कविः क्रान्तप्रज्ञः एतादृशः सोमः देवेष्विन्द्रादिषु रण्यति । किंच अपोवसतीवरीर्वसानः आच्छादयन् वनेषु काष्ठेषु पात्रेषु सीदन् उत्तरः उत्कृष्टतरः सोमः गोभिर्गोविकारैः क्षीरादिभिः पर्यव्यत परिदीयते आच्छाद्यते ॥ १८ ॥

१८. अभिषवण-फलकों पर शोध्यमान, स्तुति के उत्पादक और श्रान्त-प्रज्ञ सोम इन्द्रादि के पास जाते हैं। जल में मिलकर और काष्ठ-पात्रों में बैठकर उत्कृष्टतर सोम दुग्ध आदि में मिलाये जाते हैं।

तवाहंसोमरारणसख्यइन्दोदिवेदिवे ।
पुरूणिबभ्रोनिचरन्तिमामवपरिधींरतिताँइहि ॥ १९ ॥

तव । अहम् । सोम । ररण । सख्ये । इन्दो इति । दिवेऽदिवे ।
पुरूणि । बभ्रो इति । नि । चरन्ति । माम् । अव ।
परिऽधीन् । अति । तान् । इहि ॥ १९ ॥

हे इन्दो हे सोम तव सख्ये सखिकर्मण्यहं दिवेदिवे अन्वहं रारण रमे रणेर्लिटउत्तमे णलि रूपं । हे बभ्रो बभ्रुवर्ण सोम पुरूणि बहूनि रक्षांसि मां तव सख्ये स्थितं न्यवचरन्ति नीचीनं चरन्ति बाधन्ते ये मां बाधन्ते तान परिधीन् राक्षसांस्त्वं अतीहि अतीत्य गच्छ जहीति यावत् ॥१९॥

१९. सोम, तुम्हारी मैत्री में मैं अनुदिन रमण करता हूँ। पिंगलवर्ण सोम, तुम्हारे मित्र मुझे अनेक राक्षस, बाधा देते हैं। उन्हें मारो।

उताहंनक्तमुतसोमतेदिवासख्यायबभ्रऊधनि ।
घृणातपन्तमतिसूर्यंपरःशकुनाइवपप्तिम ॥ २० ॥ १५ ॥

उत । अहम् । नक्तम् । उत । सोम । ते । दिवा । सख्याय ।
बभ्रो इति । ऊधनि । घृणा । तपन्तम् । अति । सूर्यम् ।
परः । शकुनाःऽइव । पप्तिम । २० ॥ १५ ॥

हे बभ्रो बभ्रुवर्ण हे सोम उतापि च नक्तं उतापि च दिवा अहोरात्रयोः सख्याय सख्यार्थं तव ऊधनि समीपे अहं रमइति शेषः । ते वयं घृणा दीप्त्या तपन्तं ज्वलन्तं परः परमस्थानस्थितं सूर्यं तदात्मकं त्वां प्राप्तुं अतिपप्तिम । कथमिव शकुनाइव यथा सुपर्णादयः पक्षिणः सूर्यं अतिगच्छन्ति तद्वत् पतृगतौ अस्माच्छान्दसे लिटि वनिपत्योश्छन्दसीत्युपधालोपः ॥ २० ॥

२०. पिंगलवर्ण सोम, तुम्हारी मैत्री के लिए मैं दिन-रात रमण करता हूँ। प्रदीप्त हम उज्ज्वल और परम स्थान में स्थित सूर्यरूप तुम्हें प्राप्त करने की चेष्टा करते हैं। जैसे चिड़ियाँ सूर्य का अतिक्रम करती हैं, वैसे ही हम तुम्हारे निकट जाने में व्यस्त हैं।

॥ इति सप्तमस्य पंचमे पंचदशोवर्गः ॥ १५ ॥

ग्रावस्तोत्रेभिरूपकरणे सोमेमृज्यामनेएकस्तृचः तत्र मृज्यमानइत्येषा तृतीया । सवितृत्वं— मृज्यमानःसुहस्त्यादशभिर्विवस्वतइति ।

सैषा सूक्ते एकविंशी–

मृज्यमानःसुहस्त्यसमुद्रेवाचमिन्वसि ।
रयिंपिशङ्गंबहुलंपुरुस्पृहंपवमानाभ्यर्षसि ॥ २१ ॥

मृज्यमानः । सुऽहस्त्य । समुद्रे । वाचम् । इन्वसि । रयिम् ।
पिशङ्गम् । बहुलम् । पुरुऽस्पृहम् । पवमान । अभि । अर्षसि ॥२१॥

हे सुहस्त्य हस्ते भवाहस्त्या अंगुलयः शोभनांगुलिक सोम मृज्यमानः शोध्यमानस्त्वं समुद्रेन्तरिक्षे कलशे वा वाचं शब्दमिन्वसि प्रेरयसि । किंच हे पवमान पूयमान सोम पिशंगं हिरण्यैः पिशंगवर्णं बहुलं प्रभूतं पुरुस्पृहं बहुभिः स्पृहणीयं रयिं धनं अभ्यर्षसि स्तोतॄणांअभिक्षरसि प्रयच्छसि ॥ २१ ॥

२१. शोभन अंगुलिवाले सोम, शोध्यमान तुम अन्तरिक्ष में (कलश में) शब्द भेजते हो। पवमान सोम, स्तोताओं को तुम पिङ्गलवर्ण और बहुतों के द्वारा स्पृहणीय धन दो।

मृजानोवारेपवमानोअव्ययेवृषावचक्रदोवने ।
देवानांसोमपवमाननिष्कृतंगोभिरञ्जानोअर्षसि ॥ २२ ॥

मृजानः । वारे । पवमानः । अव्यये । वृषा । अव । चक्रदः । वने ।
देवानाम् । सोम । पवमान । निःऽकृतम् । गोभिः ।
अञ्जानः । अर्षसि ॥ २२ ॥

हे सोम वृषा वर्षिता त्वं मृजानः वसतीवरीभिर्मृज्यमानः अलंक्रियमाणः अव्यये अविमये वारे वाले पवित्रे पवमानः पूयमानः सन् वने वननीये उदके काष्ठे कलशेवा अवचक्रदः अवक्रन्दसि शब्दायसे । ततो हे सोम-हे पवमान त्वं गोभिर्गव्यैः क्षीरादिभिः अंजानःअज्यमानः सन् निःकृतं संस्कृतं देवानां स्थानं अर्षसि गच्छसि ॥ २२ ॥

२२. सोम, वर्षक और जल में विभूषित तथा मेषलोम के पवित्र में शोधित सोम जल में या कलश में शब्द करते हैं। सोम, दुग्ध में मिश्रित होकर तुम संस्कृत स्थान में जाते हो।

पवस्वबाजसातयेभिविश्वानिकाव्या ।
त्वंसमुद्रंप्रथमोविधारयोदेवेभ्यःसोममत्सरः ॥ २३ ॥

पवस्व । वाजऽसातये । अभि । विश्वानि । काव्या । त्वम् ।
समुद्रम् । प्रथमः । वि । धारयः । देवेभ्यः । सोम । मत्सरः ॥ २३ ॥

हे सोम विश्वानि सर्वाणि काव्या कविकर्माणि स्तोत्राणि अभिलक्ष्य वाजसातये अन्नलाभाय पवस्व क्षर । हे सोम देवेभ्यः देवानां मत्सरोमदकरः प्रथमः सर्वदेवानां मुख्यः त्वं समुद्रं अन्तरिक्षं कलशं वा विधारयः विशेषेण धारयसि ॥ २३ ॥

२३. सोम, सारे स्तोत्रों को लक्ष्य करके अन्नलाभ के लिए क्षरित होओ। सोम, देवों के मदकर और उनमें मुख्य तुम कलश को धारण करते हो।

सतूपवस्वपरिपार्थिवंरजोदिव्याचसोमधर्मभिः ।
त्वांविप्रासोमतिभिर्विचक्षणशुभ्रंहिन्वन्तिधीतिभिः॥२४॥

सः । तु । पवस्व । परि । पार्थिवम् । रजः । दिव्या ।
च । सोम । धर्मऽभिः । त्वाम् । विप्रासः । मतिऽभिः । विऽचक्षण ।
शुभ्रम् । हिन्वन्ति । धीतिऽभिः ॥ २४ ॥

हे सोम सतादृशस्त्वं पार्थिवं रजोलोकं प्रति दिव्या दिव्यानि च रक्षकैः सह तुक्षिप्रं परिपवस्व परितः क्षर । हे विचक्षण विद्रष्टः सोम विप्रासोविप्रामेधाविनोमतिभिः स्तुतिभिः धीतिभिरंगुलीभिश्च शुभ्रं श्वेतवर्णं त्वां हिन्वन्ति प्रेरयन्ति ॥२४ ॥

२४. सोम, तुम मर्त्यलोक और दिव्यलोक के प्रति धारक पदार्थों के साथ क्षरित होओ। सूक्ष्मदर्शक सोम, मेधावी लोग स्तुतियों और अँगुलियों के द्वारा श्वेतवर्ण तुम्हें प्रेरित करते हैं।

पवमानाअसृक्षतपवित्रमतिधारया ।
मरुत्वन्तोमत्सराइन्द्रियाहयामेधामभिप्रयांसिच ॥२५॥

पवमानाः । असृक्षत । पवित्रम् । अति । धारया । मरुत्वन्तः ।
मत्सराः । इन्द्रियाः । हयाः । मेधाम् । अभि । प्रयांसि । च ॥२५॥

पवमानाः पूयमानाः सोमाः धारया आत्मीयया पवित्रं अतीत्यासृक्षत सृज्यन्ते । कीदृशामरुत्वन्तः मरुद्भिर्युक्तामत्सराः मदकराः इन्द्रियाः इन्द्रजुष्टाः मेधां स्तुतिं प्रयांस्यन्नानिच [illegible] श्रोतृभ्यउभयं कर्तुं वा हयाः गन्तारः एते सृज्यन्ते ॥ २५ ॥

२५. शोधित, मरुतों से युक्त, गमनशील, मदकर और इन्द्रिय-सेवित सोम स्तुति और अन्न को लक्ष्य करके तथा अपनी धारा से पवित्र को लाँघकर बनाये जाते हैं।

अथ षड्विंशी—

अपोवसानःपरिकोशमर्षतीन्दुर्हियानःसोतृभिः ।
जनयञ्ज्योतिर्मन्दनाअवीवशद्गाःकृण्वानोननिर्णिजम्॥२६॥१६॥

अपः । वसानः । परि । कोशम् । अर्षति । इन्दुः । हियानः ।
सोतृऽभिः । जनयन् । ज्योतिः । मन्दनाः । अवीवशत् । गाः ।
कृण्वानः । न । निःऽनिर्जम् ॥ २६ ॥ १६ ॥

अपोवसतीवरीर्वसानआच्छादयन् सोतृभिरभिषुण्वद्भिर्हियानः प्रेर्यमाणइन्दुः सोमः कोशं कलशं पर्यर्षति प्रतिगच्छति । किंच ज्योतिर्दीप्तिं जनयन् उत्पादयन् गाः गव्यानि क्षीरादीनि निर्णिजं आत्मानं रूपं कृण्वानः कुर्वन् मिश्रयन् सोयं सोमः नः संप्रत्यर्थे इदानीं मन्दानाः स्तुतीः अवीवशत् कामयते । वशकान्तौ लुङि चङि रूपं ॥ २६ ॥

२६. जल में मिलकर और अभिषवकर्त्ताओं के द्वारा प्रेरित सोम कलश में जाते हैं। दीप्ति का प्रकाश कर और क्षीर आदि को अपना रूप बनाकर सोम इस समय स्तुति की इच्छा करते हैं।

॥ इति सप्तमस्य पंचमे षोडशोवर्गः ॥ १६ ॥

पवस्वेति षोडशर्चं पंचमं सूक्तं । आद्यद्वचस्य गौरिवीतिर्नामशक्तिपुत्रऋषिः तृतीयायाः शक्तिर्नामवासिष्ठः ततः पंचानां द्वचानां ऊरुर्नामांगिरसः ऋजिश्वानाम भारद्वाजः ऊर्ध्वसद्मानामांगिरसः कृतयशानामकश्चित् सोप्यांगिरसः ऋणंचयोनामराजर्षिः इत्येते क्रमेण ऋषयः । एवं त्रयोदशगताः ।ततस्तिसृणां वासिष्ठः शक्तिः प्रथमातृतीयाद्ययुजः ककुभः द्वितीयाचतुर्थ्यायायुजः सतोबृहत्यः ।सप्तम्येयोवसूनामित्येषातु यवमध्या गायत्री । पवमानः सोमोदेवता । तथाचानुक्रम्यते—पवस्वषोळशगौरिवीति द्वचंशक्तिरेकामूरुर्ऋजिश्वोर्ध्वसद्माकृतयशाऋणंचयइत्यृषयोद्वचास्तिस्रः शक्तिः काकुभाः प्रगाथाः सप्तम्ये गायत्रीयवमध्येति । गतोविनियोगः ।

तत्र प्रथमा—

पवस्वमधुमत्तमइन्द्रायसोमक्रतुवित्तमोमदः । महिद्युक्षतमोमदः ॥१॥

पवस्व । मधुमत्ऽतमः । इन्द्राय । सोम । क्रतुवित्ऽतमः ।
मदः । महि । द्युक्षऽतमः । मदः ॥ १ ॥

हे सोम मधुमत्तमः अत्यन्तं माधुर्योपेतः त्वं इन्द्राय इन्द्रार्थं मदोमदकरः सन् पवस्व क्षर। कीदृशः क्रतुवित्तमः अत्यन्तं प्रज्ञायाः कर्मणोवा लंभकः महि महान् महनीयोवा द्युक्षतमः अत्यन्तं दीप्तः मदः मदहेतुः ॥ १ ॥

१. सोम, तुम अतीव मधुर और मदकर होकर इन्द्र के लिए क्षरित होओ। तुम अतीव पुत्रदाता, महान्, दीप्त और मदकारण हो।

यस्यतेपीत्वावृषभोवृषायतेस्वर्विदः।
ससुप्रकेतोअभ्यक्रमीदिषोच्छावाजंनैतशः ॥ २ ॥

यस्य। ते। पीत्वा। वृषभः। वृषऽयते। अस्य। पीता।
स्वःऽविदः। सः। सुऽप्रकेतः। अभि। अक्रमीत्। इषः।
अच्छ। वाजम्। न। एतशः ॥ २ ॥

वृषभः कामानां वर्षकइन्द्रः यस्य ते त्वां पीत्वा वृषायते वृषभइवाचरति। किंच स्वर्विदः सर्वस्य दर्शकस्यास्य ते तव पीता पानेसति सुप्रकेतः सुप्रज्ञः सइन्द्रः इषः शत्रूणामन्नानि अभ्यक्रमीत् अभिक्रामति। तत्र दृष्टान्तः—वाजं नैतशः एतशः इत्यश्वनाम यथाश्वोवाजं संग्रामं अभिगच्छति तद्वत् ॥ २ ॥

२. काम-वर्षक इन्द्र तुम्हें पीकर वृषभ के समान आचरण करते हैं। सबके दर्शक तुम्हारे पान से सुन्दर ज्ञानी होकर इन्द्र शत्रुओं के अन्न का उसी भाँति अतिक्रमण करते हैं, जिस भाँति अश्व युद्ध में जाता है।

त्वंह्य१ङ्गदैव्यापवमानजनिमानिद्युमत्तमः।
अमृतत्वायघोषयः ॥ ३ ॥

त्वम्। हि। अङ्ग। दैव्या। पवमान। जनिमानि। द्युमत्ऽतमः।
अमृतऽत्वाय। घोषयः ॥ ३ ॥

हे पवमान पूयमान सोम द्युमत्तमः अतिशयेन दीप्तिमान् त्वं हि त्वमेव दैव्या देवसंबन्धीनि जनिमानि जन्मानि देवानित्यर्थः तानभिलक्ष्य अमृतत्वाय तेषाममरणाय अंग क्षिप्रं घोषयः शब्दायसे। घुषिरविशब्दने ण्यन्तस्य लेटि रूपं हियोगादनिघातः ॥ ३ ॥

३. सोम, अतीव दीप्त देवों को लक्ष्य करके उनके अमर होने के लिए शीघ्र शब्द करते हो। अथ चतुर्थी—

येनानवंग्वोदध्यङ्ङपोर्णुतेयेनविप्रासआपिरे।
देवानांसुम्नेअमृतस्यचारुणोयेनश्रवांस्यानशुः ॥ ४ ॥

येन । नवऽग्वः । दध्यङ् । अपऽऊर्णुते । येन । विप्रासः ।
आपिरे । देवानाम् । सुम्ने । अमृतस्य । चारुणः । येन ।
श्रवांसि । आनशुः ॥ ४ ॥

नवग्वोनवनीयगतिः यद्वा नवभिर्मासैः सत्रस्यानुष्ठाता दध्यङ् एतन्नामकोंगिरा येन सोमेन पणिभिरपहृतानां गवां द्वारमपोर्णुते अपाच्छादयति विवृतमकार्षीत् विप्रासः तन्मुखाः सर्वे मेधाविनोंगिरसः येनवा सोमेनापिरे एतैरपहृतागाः आप्नुवन् । किंच देवानामिन्द्रादीनां सुम्ने सुखे यज्ञेन संजाते सति चारुणः कल्याणस्य अमृतस्योदकस्य संबन्धीनि श्रवांस्यन्नानि येन सोमेन यजमानाः आनशुः अन्नानिव्याप्नुवन् अलभन्त सत्वं देवानामृतत्वाय शब्दायसहति पूर्वेण समन्वयः ॥ ४ ॥

४. अभिनव मार्ग से यज्ञानुष्ठाता अङ्गिरा ने जिन सोम के द्वारा पणियों के द्वारा अपहृत गौओं का द्वार खोला था, जिन सोम के द्वारा सारे मेधावियों ने अपहृत गायों को प्राप्त किया था और जिन सोम के द्वारा इन्द्रादि के सुख में यज्ञारम्भ होने पर मङ्गलजनक अमृत-जल के अन्नों को यजमानों ने प्राप्त किया था, वही सोम देवों के अमर होने के लिए शब्द करते हैं। अथ पञ्चमी—

एषस्यधारयासुतोव्योवारेभिःपवतेमदिन्तमः ।
क्रीळन्नूर्मिरपामिव ॥ ५ ॥ १७ ॥

एषः । स्यः । धारया । सुतः । अव्यः । वारेभिः । पवते ।
मदिन्ऽतमः । क्रीळन् । ऊर्मिः । अपामऽइव ॥ ५ ॥ १७ ॥

स्यः सएषसुतोभिषुतः सोमः अव्यः अवेर्वारेभिर्वालैः तेभ्यः पवित्रेभ्यः धारया आत्मीयया पवते कलशमभिलक्ष्य क्षरति। कीदृशः मदिन्तमः मादयितृतमः अपामिव उदकानां ऊर्मिः संघातइव क्रीळन् इतस्ततः संक्रीडमानः पवते ॥ ५ ॥

५. मादकतम जल-संघात के समान क्रीड़ा करनेवाले और अभिषुत सोम मेषलोम के पवित्र से कलश में, अपनी धारा से, गिरते हैं।

॥ इति सप्तमस्य पञ्चमे सप्तदशोवर्गः ॥ १७ ॥

यउस्रियाअप्याअन्तरश्मनोनिर्गाअकृन्तदोजसा ।
अभिव्रजंतत्निषेगव्यमश्व्यंवर्मीवधृष्णवारुज ॥ ६ ॥

यः । उस्रियाः । अप्याः । अन्तः । अश्मनः । निः । गाः ।
अकृन्तत् । ओजसा । अभि । व्रजम् । तत्निषे । गव्यम् ।
अश्व्यम् । वर्मीऽइव । धृष्णो इति । आ । रुज ॥ ६ ॥

यः सोमः उस्रियाः उत्सरणशीलाः अप्याः अपइत्यन्तरिक्षनाम तस्माद्भवेश्छन्दसीति यत् अन्तरिक्षस्थाः अहिप्रभृतिभिरसुरैः अपहृत्य निहितागाः अपः अश्मनः मेघनामैतत् मेघादन्तः ओजसा बलेन निरकृंतत् निरच्छिनत् अन्तरिक्षाद्वृष्टिमकार्षीदित्यर्थः। सत्यं असुरैरपहृतं गव्यं गोसंबन्धिनं अश्व्यं अश्वेषु भवं व्रजं समूहं अभितन्निषे अभितोव्याप्नोषि तनुविस्तारे छान्दसे लिटि तनिपत्योश्छन्दसीत्युपधालोपः। किंच हे धृष्णो शत्रुधर्षणशील सोम सत्वं वर्गीव कवचीव शूरः आरुज असुरानाजहि ॥ ६ ॥

६. जिन सोम ने गमनशील अन्तरिक्ष में स्थित मेघ के भीतर से बलपूर्वक वृष्टि कराई थी, वही सोम गौओं और अश्वों के समूह को व्याप्त करते हैं। शत्रु-धर्षक सोम, कवचधारी शूर के समान असुरों को मारो।

आसोतापरिषिञ्चताश्वंनस्तोमंमसुरंरजस्तुरम्। वनक्रक्षमुदप्रुतम्॥७॥

आ। सोत। परि। सिञ्चत। अश्वम्। न। स्तोमम्। असुऽतुरम्। रजःऽतुरम्। वनऽक्रक्षम्। उदऽप्रुतम् ॥ ७ ॥

हे ऋत्विजः आसोत सोममभिषुणुत षुञ् अभिषवे लोटि छान्दसोविकरणस्य लुक् तप्तनप्तनथनाश्चेति तस्यतबादेशः। किंच परिषिंचत परितस्तं वसतीवर्यादिभिः सिंचत। कीदृशं अश्वंन अश्वमिव वेगिनं स्तोमं स्तव्यं असुरं अन्तरिक्षस्थितानामुदकानांप्रेरकं रजस्तुरं तेजसांच प्रेरकं वनक्रक्षं उदकानां वर्षकं यद्वा काष्ठेषु पात्रेषु विप्रकीर्णं उदप्रुतं उदके गच्छन्तं प्लवमानं सोममभिषुणुत अभिषिंचत ॥ ७ ॥

७. अश्व के समान वेगशाली, स्तुत्य, अन्तरिक्ष के जल प्रेरक, तेज के प्रेरक और जल-वर्षक सोम को ऋत्विको, अभिषुत करो और सींचो।

सहस्रधारंवृषभंपयोवृधंप्रियंदेवायजन्मने।
ऋतेनयऋतजातोविवावृधेराजादेवऋतंबृहत् ॥ ८ ॥

सहस्रऽधारम्। वृषभम्। पयःऽवृधम्। प्रियम्। देवाय। जन्मने। ऋतेन। यः। ऋतऽजातः। विऽववृधे। राजा। देवः। ऋतम्। बृहत् ॥ ८ ॥

सहस्रधारं बहुधारोपेतं वृषभं कामानां वर्षकं पयोवृधं उदकानां वर्धकं प्रियं प्रीणयितारं तं सोमं देवाय देवसंबन्धिने जन्मने देवेभ्यस्तदर्थं अभिषुणुत ऋतजातः उदकाज्जातोयोराजा सोमः ऋतेन वसतीवर्याख्येनोदकेन विववृधे विशेषेण वर्धते। कीदृशः देवोद्योतमानः स्तोतव्योवा ऋतं सत्यभूतः सन् बृहत् महान्तमासुनुतेति पूर्वेण समन्वयः ॥ ८ ॥

८. अनेक धाराओंवाले, काम-वर्षक, जलवर्द्धक और प्रिय सोम को, देवों के लिए, अभिषुत करो। जल से उत्पन्न, राजा, दिव्य, स्तुत्य और महान् सोम जल से बढ़ते हैं।

अभिद्युम्नंबृहद्यशइषस्पतेदिदीहिदेवदेवयुः। विकोशंमध्यमंयुव ॥९॥

अभि। द्युम्नम्। बृहत्। यशः। इषः। पते। दिदीहि।
देव। देवऽयुः। वि। कोशम्। मध्यम्। युव ॥ ९ ॥

हे इषस्पते अन्नस्य पते हे देव स्तोतव्य सोम देवयुः देवकामस्त्वं द्युम्नं द्योतमानं बृहत् प्रभूतं यशोन्नं अस्मभ्यमभिदीदिहि आभिमुख्येन प्रकाशय प्रयच्छेत्यर्थः। आमंत्रितस्याविद्यमानत्वेन पादादित्वादनिघातः। किंच मध्यमं अन्तरिक्षस्थितं कोशं मेघं वियुववृष्ट्यर्थंविगमय विश्लेषय ॥ ९ ॥

९. अन्नपति और स्तुत्य सोम, देवाभिलाषी होकर तुम दिव्य और प्रचुर अन्न हमें दो। अन्तरिक्षस्थ मेघ को, वर्षा के लिए, फाड़ो।

आवच्यस्वसुदक्षचम्वोःसुतोविशांवह्निर्नविश्पतिः।
वृष्टिंदिवःपवस्वरीतिमपांजिन्वागविष्टयेधियः॥१०॥१८॥

आ। वच्यस्व। सुऽदक्ष। चम्वोः। सुतः। विशाम्। वह्निः। न। विश्पतिः।
वृष्टिम्। दिवः। पवस्व। रीतिम्। अपाम्। जिन्व।
गोऽइष्टये। धियः ॥ १० ॥ १८ ॥

हे सुदक्ष सुबल सोम चम्वोरभिषवणफलकयोः सुतोभिषुतस्त्वं विशां प्रजानां वह्निर्वोढा विश्पतीराजेव सर्वासां प्रजानां वोढा त्वं आवच्यस्व आगच्छ कलशमापवस्व। वचेर्गत्यर्थस्य व्यत्ययेन श्यनि रूपं। किंच त्वं वृष्टिंवृष्यमाणामपामुदकानां रीतिं गतिं दिवोद्युलोकात् पवस्व कुरु। ततः गविष्टये गामात्मनइच्छते यजमानाय धियः कर्माणि जिन्व पूरय ॥ १० ॥

१०. सुन्दर बलवाले सोम, अभिषवण-फलकों पर अभिषुत होकर तुम राजा के समान सारी प्रजा के वाहक हो। पधारो। द्युलोक से जल का गमन करो। गवाभिलाषी यजमान के कर्मों को पूरण करो।

॥ इति सप्तमस्य पंचमेष्टादशोवर्गः ॥ १८ ॥

अथैकादशी—

एतमुत्यंमदच्युतंसहस्रधारंवृषभंदिवोदुहुः।
विश्वावसूंनिबिभ्रतम् ॥ ११ ॥

एतम् । ऊँ इति । त्यम् । मदऽच्युतम् । सहस्रऽधारम् । वृषभम् ।
दिवः । दुहुः । विश्वा । वसूनि । बिभ्रतम् ॥ ११ ॥

दिवः देवान् कामयमानाऋत्विजः एतं त्यं तमिमं सोममेव दुहुः दुदुहुः दुहन्ति । ग्रावाणोवत्साऋत्विजोदुहन्तीतिवैन्तिरीयकब्राह्मणं । कीदृशं सोमं मदच्युतं मदस्य प्रेरकं सहस्रधारं बहुधारं वृषभं कामानां वर्षकं विश्वा सर्वाणि वसूनि धनानि बिभ्रतं धारयन्तं सोमं दुहन्ति ॥ ११ ॥

११. मदकर, बहुधार, काम-वर्षक और सारे धनों के धारक सोम को देवाभिलाषी ऋत्विक् लोग दूहते हैं।

वृषाविजज्ञेजनयन्नमर्त्यःप्रतपञ्ज्योतिषातमः ।
ससुष्टुतःकविभिर्निर्णिजंदधेत्रिधात्वस्यदंससा ॥ १२ ॥

वृषा । वि । जज्ञे । जनयन् । अमर्त्यः । प्रऽतपन् । ज्योतिषा ।
तमः । सः । सुऽस्तुतः । कविऽभिः । निःऽनिजम् । दधे ।
त्रिऽधातु । अस्य । दंससा ॥ १२ ॥

वृषा कामानां वर्षकः अमर्त्योमनुष्यधर्मरहितः सोमः विजज्ञे विज्ञायते । किंकुर्वन् जनयन् शब्दं ज्योतिर्वा उत्पादयन् ज्योतिषा स्वीयेन तमः प्रतपन् प्रज्वलयन् विनाशयन् प्रादुर्भवति । ततः कविभिर्मेधाविभिः स्तोतृभिः सुष्टुतः ससोमः निर्निजं निर्मेजनहेतुं मिश्रणं गव्यं दधे धारयति । अथ त्रिधातु त्रिषु सवनेषु देवानां पोषकं यद्वा त्रयः सोमधारकाः द्रोणकलशादयः यस्मिन् तद्यज्ञार्थं कर्म अस्य सोमस्य दंससा कर्मणा ध्रियते खलु ॥ १२ ॥

१२. शब्द को उत्पन्न करनेवाले, अपने तेज से अन्धकार को दूर करनेवाले, काम-वर्षक और अमर सोम को जाना जाता है। मेधावियों के द्वारा स्तुत सोम मिलाये जाते हैं। तीनों सवनों में याज्ञिक कर्म सोम के द्वारा ही धृत होते हैं।

अथ त्रयोदशी—

ससुन्वेयोवसूनांयोरायामानेताइळानाम् । सोमोयःसुक्षितीनाम्॥१३॥

सः । सुन्वे । यः । वसूनाम् । यः । रायाम् । आऽनेता । यः ।
इळानाम् । सोमः । यः । सुऽक्षितीनाम् ॥ १३ ॥

---

१ तै० सं० ६. २. ११. ।

ससोमः सुन्वे अभिसुषुवे ऋत्विग्भिः । यः सोमः वसूनां धनानां आनेता यश्च रायां रांति प्रयच्छन्ति क्षीरादिकमिति रायोगावः तेषामानेता यश्च इळानामन्नानां च यश्च सोमः सुक्षितीनां सुनिवासानां शोभनमनुष्ययुक्तानां गृहाणां आनेता विद्यते सोऽभिषूतोऽभूदिति ॥ १३ ॥

१३. धनों, गायों, अन्नों और सुमनुष्ययुक्त गृहों के लानेवाले सोम ऋत्विकों-द्वारा अभिषुत होते हैं।

यस्य॑न॒इन्द्रः॑पिबा॒द्यस्य॑म॒रुतो॒यस्य॑वार्य॒मणा॒भगः॑ ।
आयेन॑मि॒त्रावरु॑णा॒करा॑महएन्द्र॒मव॑से॒महे॑ ॥ १४ ॥

यस्य॑ । नः॒ । इन्द्रः॑ । पिबा॑त् । यस्य॑ । म॒रुतः॑ । यस्य॑ । वा॒ ।
अ॒र्य॒मणा॑ । भगः॑ । आ । येन॑ । मि॒त्रावरु॑णा । करा॑महे ।
आ । इन्द्र॑म् । अव॑से । म॒हे ॥ १४ ॥

नोस्मदीयं यस्य यं सोमं इन्द्रः पिबात् पिबति । पा पाने लेट्यडागमः । यंच सोमं मरुतः पिबन्ति वा । अपिच अर्यमणा एतन्नामकेन देवेन सह भगोदेवोयं सोमं पिबति । येन सोमेन मित्रावरुणा मित्रावरुणौ वयमाकरामहे अभिमुखीकुर्महे । तथा महे महते अवसे रक्षणाय येन च सोमेन इन्द्रमभिमुखीकुर्महे ससोमोऽभिषूयते ॥ १४ ॥

१४. उन्हीं सोम का अभिषव किया जाता है, जिन्हें इन्द्र, मरुत्, अर्यमा और भग पीते हैं तथा जिनके द्वारा हम मित्र, वरुण और इन्द्र को अभिमुख करते हैं। अथ पंचदशी—

इन्द्रा॑यसोम॒पात॑वे॒नृभि॑र्य॒तःस्वा॑युधो॒मदि॑न्तमः ।
पव॑स्व॒मधु॑मत्तमः ॥ १५ ॥

इन्द्रा॑य । सो॒म॒ । पात॑वे । नृऽभिः॑ । य॒तः । सुऽआ॒यु॒धः ।
म॒दिन्ऽत॑मः । पव॑स्व । मधु॑मत्ऽतमः ॥ १५ ॥

हे सोम मधुमत्तमः अतिशयेन माधुर्योपेतस्त्वं इन्द्राय पातवे पानार्थं पवस्व कलशे क्षर । कीदृशः नृभिः कर्मनेतृभिर्ऋत्विग्भिः यतः संयतः स्वायुधः शोभनस्फ्यकपालाद्यायुधोपेतः मदिन्तमः मादयितृतमः ॥ १५॥

१५. सोम, ऋत्विकों के द्वारा संयत, सुन्दर आयुध से युक्त, अतीव मधुर और मदकर होकर तुम इन्द्र के पान के लिए बहो।

अथ षोडशी—

इन्द्र॑स्य॒हार्दि॑सोम॒धान॒माविशसमु॒द्रमि॑व॒सिन्ध॑वः ।
जुष्टो॑मि॒त्राय॒वरु॑णायवा॒यवे॑दि॒वोवि॑ष्टं॒भउ॑त्त॒मः ॥१६॥१९॥

इन्द्रस्य । हार्दि । सोमऽधानम् । आ । विश । समुद्रमऽइव ।
सिन्धवः । जुष्टः । मित्राय । वरुणाय । वायवे । दिवः ।
विष्टम्भः । उत्ऽतमः ॥ १६ ॥ १९ ॥

हे सोम त्वमिन्द्रस्य हार्दि हृदयंगमं हृदयभूतंवा सोमधानं सोमोनिधीयतेस्मिन्निति सोमधानः कलशः तमाविश प्रविश । तत्र दृष्टान्तः—समुद्रमिव यथा समुद्रं सिन्धवोनद्यः प्रविशन्ति तद्वत् । कीदृशः त्वं मित्राय वरुणाय वायवे तेभ्यो जुष्टः दिवोद्युलोकस्य विष्टंभः विष्टंभयिता स्थापयिता उत्तमः सर्वेषामुत्कृष्टतमः त्वं कलशमाविश ॥ १६ ॥

१६. सोम, जैसे समुद्र में नदियां पैठती हैं, वैसे ही मित्र, वरुण और वायु के लिए सेवित, द्युलोक के स्तम्भ, सर्वोत्तम और इन्द्र के हृदय-रूप तुम कलश में पैठो।

॥ इति सप्तमस्य पंचमे एकोनविंशोवर्गः ॥ १९ ॥

परिमेति द्वाविंशत्यृचं द्विपदं षष्ठं सूक्तं यज्ञे सदस्यवस्थितहोत्रीयादिधिष्ण्योपेताअग्नयोनामईश्वरपुत्राऋषयः विंशतिकाद्विपदाविराजः पवमानःसोमोदेवता । तथाचानुक्रान्तं—परिमद्व्यधिकाग्नयोधिष्ण्याऐश्वराद्विपदमिति । गतोविनियोगः ।

तत्र प्रथमा—

परिप्रधन्वेन्द्रायसोमस्वादुर्मित्रायपूष्णेभगाय ॥ १ ॥
परि । प्र । धन्व । इन्द्राय । सोम । स्वादुः । मित्राय ।
पूष्णे । भगाय ॥ १ ॥

हे सोम स्वादुः स्वादुरसः त्वं इन्द्राय मित्राय पूष्णे भगाय एतेभ्योदेवेभ्यः परिप्रधन्व परितः पात्रेषु क्षर ॥ १ ॥

१. सोम, तुम स्वादु हो। इन्द्र, मित्र, पूषा और भग के लिए क्षरित होओ।

इन्द्रस्तेसोमसुतस्यपेयाःक्रत्वेदक्षायविश्वेचदेवाः ॥ २ ॥
इन्द्रः । ते । सोम । सुतस्य । पेयाः । क्रत्वे । दक्षाय । विश्वे ।
च । देवाः ॥ २ ॥

हे सोम सुतस्याभिषुतस्य ते तव त्वं भागं इन्द्रः पेयाः पेयात् पिबतु पातेराशीर्लिङि रूपं पुरुषव्यत्ययः । किमर्थं क्रत्वे क्रतवे प्रज्ञानाय दक्षाय बलायच । किंच अमी सर्वे विश्वे देवाश्च त्वदीयमंशं पिबंतु ॥ २ ॥

२. प्रज्ञान और बल के लिए अभिषुत तुम्हारे भाग का पान इन्द्र करें। सारे देव तुम्हारा पान करें।

एवामृतायमहेक्षयायसशुक्रोअर्षदिव्यःपीयूषः ॥ ३ ॥

एव । अमृताय । महे । क्षयाय । सः । शुक्रः । अर्ष ।
दिव्यः । पीयूषः ॥ ३ ॥

हे सोम शुक्रोदीप्तः दिव्योदिविभवः पीयूषः देवैः पातव्यः सत्वं अमृताय अमरणाय महे महते क्षयाय निवासायच एवार्ष एवं पवस्व क्षर ॥ ३ ॥

३. सोम, तुम प्रदीप्त, दिव्य और देवों के पान के योग्य हो। अमरण और महान् निवास के लिए क्षरित होओ।

पवस्वसोममहान्त्समुद्रःपितादेवानांविश्वाभिधाम ॥ ४ ॥

पवस्व । सोम । महान् । समुद्रः । पिता । देवानाम् ।
विश्वा । अभि । धाम ॥ ४ ॥

हे सोम महान् देवेभ्योदीयमानत्वेन महत्त्वयुक्तः समुद्रः समुन्दनः यस्मात् समुद्रवन्ति रसास्तादृशः पिता सर्वेषां पालयिता त्वं देवानां विश्वा विश्वानि सर्वाणि धाम धामानि शरीराणि अभिलक्ष्य पवस्व ॥ ४ ॥

४. सोम, तुम महान् रसों के प्रवाहक और सबके पालक हो। देवों के शरीरों को लक्ष्य करके क्षरित होओ।

शुक्रःपवस्वदेवेभ्यःसोमदिवेपृथिव्यैशंचप्रजायै ॥ ५ ॥

शुक्रः । पवस्व । देवेभ्यः । सोम । दिवे । पृथिव्यै ।
शम् । च । प्रऽजायै ॥ ५ ॥

हे सोम शुक्रोदीप्तस्त्वं देवेभ्योदेवार्थं पवस्व क्षर। किंच दिवे पृथिव्यैच द्यावापृथिवीभ्यांच ततः प्रजायै प्रजाभ्यश्च शं सुखं च कुरु ॥ ५ ॥

५. सोम, दीप्त होकर देवों के लिए क्षरित होओ और द्यावापृथिवी तथा प्रजा को सुख दो।

अथ षष्ठी—

दिवोधर्तासिशुक्रःपीयूषःसत्येविधर्मन्वाजीपवस्व ॥ ६ ॥

दिवः । धर्ता । असि । शुक्रः । पीयूषः । सत्ये ।
विऽधर्मन् । वाजी । पवस्व ॥ ६ ॥

हे सोम शुक्रोदीप्तः पीयूषः पातव्यस्त्वं दिवोद्युलोकस्य धर्ता धारकोसि । वाजी बलवान् सत्वं सत्ये सत्यभूते विधर्मन् विधर्मणि विविधकर्माणः ऋत्विजोयस्मिन् यद्वा विविधसोमादिहविषां धारकेस्मिन्यज्ञे पवस्व क्षर ॥ ६ ॥

६. सोम, तुम दीप्त, पीने के योग्य (पातव्य) और द्युलोक के धारक हो। बली होकर सत्यभूत यज्ञ में क्षरित हो।

पवस्वसोमद्युम्नीसुधारोमहामवीनामनुपूर्व्यः ॥ ७ ॥

पवस्व । सोम । द्युम्नी । सुऽधारः । महाम् । अवीनाम् । अनु । पूर्व्यः ॥७॥

हेसोम द्युम्नी । द्युम्नं द्योततेर्यशोवान्नंवेतिर्यास्कः । अन्नवान् यशस्वी वा सुधारः शोभनधारायुक्तः पूर्व्यः पुरातनस्त्वं महां महांतं अवीनां रोम्णां रोमण्यः सकाशादनुक्रमेण पवस्व क्षर ॥ ७ ॥

७. सोम, तुम यशस्वी, शोभन धारावाले और प्राचीन हो। मेषलोमों से होकर बहो।

नृभिर्येमानोजज्ञानःपूतःक्षरद्विश्वानिमन्द्रःस्वर्वित् ॥ ८ ॥

नृऽभिः । येमानः । जज्ञानः । पूतः । क्षरत् । विश्वानि । मन्द्रः । स्वःऽवित् ॥ ८ ॥

नृभिः कर्मनेतृभिर्ऋत्विग्भिः येमानोनियम्यमानः जज्ञानः जायमानः पूतः पवित्रेण शोधितः मन्द्रोमोदमानः स्वर्वित् सर्वज्ञः एतादृशः सोमः विश्वानि सर्वाणि धनान्यस्मभ्यं क्षरतु क्षरतु ददातु ॥ ८ ॥

८. कर्मनिष्ठों के द्वारा नियत, जायमान, पूत, पवित्र से शोधित प्रसन्न और सर्वज्ञ सोम हमें सारे धन दें।

अथ नवमी—

इन्दुःपुनानःप्रजामुराणःकरद्विश्वानिद्रविणानिनः ॥ ९ ॥

इन्दुः । पुनानः । प्रऽजाम् । उराणः । करत् । विश्वानि । द्रविणानि । नः ॥ ९ ॥

---

१ नि० ५. ५.।

पुनानः पूयमानः। उराणः उरुकुर्वाणइतियास्कः। देवान् बहुकुर्वाणः इन्दुः सोमः नोस्माकं प्रजामपत्यादिकां विश्वानि व्याप्तानि द्रविणानि धनानि करत् करोतु। करोतेर्लङि रूपं ॥ ९ ॥

९. देवों के वृद्धि-कर्त्ता सोम हमें प्रजा और सारे धन दें।

पवस्वसोमक्रत्वेदक्षायाश्वोननिक्तोवाजीधनाय ॥ १० ॥ २० ॥

पवस्व। सोम। क्रत्वे। दक्षाय। अश्वः। न। निक्तः।
वाजी। धनाय ॥ १० ॥ २० ॥

हे सोम अश्वोन अश्वइव निक्तः वसतीवरीभिरद्भिः निक्तः वाजी वेगवांस्त्वं क्रत्वे क्रतवे प्रज्ञानाय दक्षाय बलाय धनाय धनार्थं च पवस्व क्षर ॥ १० ॥

१०. सोम घोड़ों के समान तुम्हारा मार्जन किया जाता है। वेगशाली तुम ज्ञान, बल और धन के लिए क्षरित होओ।

॥ इति सप्तमस्य पंचमे विंशोवर्गः ॥ २० ॥

अथैकादशी—

तंतेसोतारोरसंमदायपुनन्तिसोमंमहेद्युम्नाय ॥ ११ ॥

तम्। ते। सोतारः। रसम्। मदाय। पुनन्ति। सोमम्।
महे। द्युम्नाय ॥ ११ ॥

सोतारः अभिषोतारः ऋत्विजः हे सोम ते तव स्वभूतं रसं मदाय मदार्थं पुनन्ति। तदेवोच्यते—महे महते द्युम्नाय द्युम्नं द्योततेर्यशोवान्वा। अन्नाय यशसेवा सोमं पुनन्ति शोधयन्ति। यद्वा सोममभिषूयमाणं तं रसं पुनन्तीति एकवाक्यतया योजनीयं ॥ ११ ॥

११. अभिषवकर्त्ता लोग, मद के लिए, तुम्हारे रस को शोधित करते हैं। वे महान् अन्न के लिए सोम का शोधन करते हैं।

शिशुंजज्ञानंहरिंमृजन्तिपवित्रेसोमंदेवेभ्यइन्दुम् ॥ १२ ॥

शिशुम्। जज्ञानम्। हरिम्। मृजन्ति। पवित्रे।
सोमम्। देवेभ्यः। इन्दुम् ॥ १२ ॥

शिशुमपां पुत्रभूतं जज्ञानं जायमानं हरिं हरितवर्णं इन्दुं दीप्तं सोमं देवेभ्योदेवार्थं पवित्रे मृजन्ति ऋत्विजोमार्जयन्ति ॥ १२ ॥

१२. जल के पुत्र, जायमान, हरितवर्ण और दीप्त सोम को, देवों के लिए, ऋत्विक् लोग शोधित करते हैं।

---

१ नि० ६. १७.।

अथ त्रयोदशी—

इन्दुःपविष्टचारुर्मदायापामुपस्थेकविर्भगाय ॥ १३ ॥

इन्दुः । पविष्ट । चारुः । मदाय । अपाम् । उपऽस्थे ।
कविः । भगाय ॥ १३ ॥

चारुः कल्याणरूपः कविः क्रान्तप्रज्ञः इन्दुः अपामुदकानामुपस्थे उपस्थाने अन्तरिक्षे पवित्रे वा मदाय मदार्थं भगाय भजनीयधनार्थंच पविष्ट पवते ॥ १३ ॥

१३. कल्याणरूप और क्रान्तप्रज्ञ सोम जल के स्थान अन्तरिक्ष में, मद और भजनीय धन के लिए, क्षरित होते हैं।

बिभर्तिचार्विन्द्रस्यनामयेनविश्वानिवृत्राजघान ॥ १४ ॥

बिभर्ति । चारु । इन्द्रस्य । नाम । येन । विश्वानि ।
वृत्रा । जघान ॥ १४ ॥

ससोमः चारु कल्याणं इन्द्रस्य नाम शरीरं बिभर्ति धारयति पोषयति । तेन शरीरेण इन्द्रः विश्वानि सर्वाणि वृत्रा वृत्राणि पापरूपाणि रक्षांसि जघान हतवान् ॥ १४ ॥

१४. सोम इन्द्र के कल्याणकर शरीर का धारण करते हैं। उसी शरीर से इन्द्र ने सारे पापी राक्षसों को मारा।

पिबन्त्यस्यविश्वेदेवासोगोभिःश्रीतस्यनृभिःसुतस्य ॥ १५ ॥

पिबन्ति । अस्य । विश्वे । देवासः । गोभिः ।
श्रीतस्य । नृऽभिः । सुतस्य ॥ १५ ॥

विश्वे सर्वे देवासोदेवाः गोभिर्गोविकारैः श्रीतस्य मिश्रितं नृभिः कर्मनेतृभिर्ऋत्विग्भिः सुतस्याभिषुतस्यामुं सोमं पिबन्ति । द्वितीयार्थे षष्ठ्यः ॥ १५ ॥

१५. गोदुग्ध में मिश्रित और पुरोहितों के द्वारा अभिषुत सोम का पान सारे देवता करते हैं।

अथ षोडशी—

प्रसुवानोअक्षाःसहस्रधारस्तिरःपवित्रंविवारमव्यम् ॥ १६ ॥

प्र । सुवानः । अक्षारिति । सहस्रऽधारः । तिरः ।
पवित्रम् । वि । वारम् । अव्यम् ॥ १६ ॥

सुवानोभिषूयमाणः अतएव सहस्रधारः बहुधारायुक्तः सोमः अव्यं अविभवं वारं वालं पवित्रं तिरः व्यवधायकं कुर्वन् प्र अक्षाः विविधं प्रक्षरन्ति क्षरतेर्लुङि रूपं ॥ १६ ॥

१६. अभिषुत और बहुधारा से युक्त सोम नेपलोम के लिए पवित्र का व्यवधान करके चारों ओर क्षरित होते हैं।

सवाज्यक्षाःसहस्ररेताअद्भिर्मृजानोगोभिःश्रीणानः ॥ १७ ॥

सः । वाजी । अक्षारिति । सहस्रऽरेताः । अत्ऽभिः ।
मृजानः । गोभिः । श्रीणानः ॥ १७ ॥

वाजी वेगवान् बलवान् वा ससोमः अक्षाः क्षरति । कीदृशः सहस्ररेताः बहुरेतस्कः बहूदकः अद्भिर्वसतीवरीभिः मृजानोमृज्यमानोगोभिर्गोविकारैःक्षीरादिभिःश्रीणानःश्रीयमाणः ॥१७॥

१७. अनेक तेजों से युक्त, बली, जल से शोधित और गोदुग्ध में मिश्रित सोम चारों ओर क्षरित होते हैं।

प्रसोमयाहीन्द्रस्यकुक्षानृभिर्येमानोअद्रिभिःसुतः ॥ १८ ॥

प्र । सोम । याहि । इन्द्रस्य । कुक्षा । नृऽभिः ।
येमानः । अद्रिऽभिः । सुतः ॥ १८ ॥

हे सोम नृभिर्ऋत्विग्भिः येमानोनियम्यमानः अद्रिभिर्ग्रावभिः सुतोभिषुतस्त्वं इन्द्रस्य कुक्षा सप्तम्याडादेशः कुक्षौ उदरभूते कलशेवा प्रयाहि प्रकर्षेण गच्छ ॥ १८ ॥

१८. ऋत्विकों के द्वारा नियत और पात्रों के द्वारा अभिषुत सोम, तुम कलश में जाओ।

असर्जिवाजीतिरःपवित्रमिन्द्रायसोमःसहस्रधारः ॥ १९ ॥

असर्जि । वाजी । तिरः । पवित्रम् । इन्द्राय ।
सोमः । सहस्रऽधारः ॥ १९ ॥

वाजी बलवान् वेगवान्वा पवित्रं तिरः तिरस्कुर्वन् सहस्रधारोबहुधारः सोमः इन्द्रायेन्द्रार्थं असर्जि सृज्यते ॥ १९ ॥

१९. पवित्र का व्यवधान करके बली और अनेक धाराओं से युक्त सोम इन्द्र के लिए बनाये जाते हैं।

अथ विंशी—

अअन्त्येनंमध्वोरसेनेन्द्रायवृष्णइन्दुंमदाय ॥ २० ॥

अञ्जन्ति । एनम् । मध्वः । रसेन । इन्द्राय ।
वृष्णे । इन्दुम् । मदाय ॥ २० ॥

वृष्णे कामानां वर्षित्रे इन्द्राय इन्द्रस्य मदाय मदार्थं मध्वोमधुनोरसेन गव्येन एनमिन्दुं सोममृत्विजो अंजन्ति संयोजयन्ति ॥ २०॥

२०. कामवर्षक इन्द्र की मत्तता के लिए ऋत्विक् लोग सोम को मधुर रस (गोरस) के साथ मिलाते हैं।

देवेभ्यस्त्वा वृथा पाजसे पो वसानं हरिं मृजन्ति ॥ २१ ॥

देवेभ्यः । त्वा । वृथा । पाजसे । अपः ।
वसानम् । हरिम् । मृजन्ति ॥ २१ ॥

हे सोम अपः उदकानि वसानमाच्छादयन्तं हरिं हरितवर्णं त्वा त्वां वृथा अनायासेन ऋत्विजोमृजन्ति शोधयन्ति । किमर्थं देवेभ्यः देवानां पानार्थं पाजसे तेषां बलार्थं ॥ २१ ॥

२१. सोम, जल में मिले और हरितवर्ण तुम्हें, देवों के पान और बल के लिए, ऋत्विक् लोग शोधित कर रहे हैं।

इन्दुरिन्द्राय तोशते नि तोशते श्रीणन्नुग्रो रिणन्नप ... ॥ २१ ॥

इन्दुः । इन्द्राय । तोशते । नि । तोशते । श्रीणन् ।
उग्रः । रिणन् । अपः ॥ २२ ॥ २१ ॥

इन्दुः सोमः इन्द्रायेन्द्रार्थं तोशते हन्यते अभिषूयते नितोशते नितरामभिषूयते तोशतिर्वधकर्मा । कीदृशः श्रीणन् प्रेरयन् उग्रउद्गूर्णः सोमोभिषूयते ॥ २२ ॥

२२. इन्द्र के लिए यह प्रथम सोमरस प्रस्तुत (अभिषुत) किया जाता है। यह जल को हिलाते और उसके साथ मिलते हैं।

॥ इति सप्तमस्य पञ्चमे एकविंशोवर्गः ॥२१॥

पर्यूष्विति द्वादशर्चं सप्तमं सूक्तं त्र्यरुणत्रसदस्यू राजर्षी अस्यसूक्तस्य द्रष्टारौ आदितस्तिस्रः पिपीलिकमध्याअनुष्टुभः द्वादशकाष्टकद्वादशकवत्यः ततः षडूर्ध्वबृहत्यः द्वादशकत्रयवत्यः अथ दशम्याद्यास्तिस्रोविराजः पवमानः सोमोदेवता। तथाचानुक्रान्तं—पर्यूषु द्वादशत्र्यरुणत्रसदस्यू त्रिस्रोनुष्टुभः पिपीलिकमध्याः षडूर्ध्वबृहत्यस्तिस्रश्चविराजइति । गतोविनियोगः ।

तत्र प्रथमा—

पर्यूषुप्रधन्वावाजसातयेपरिवृत्राणिसक्षणिः ।
द्विषस्तरध्याऋणयानईयसे ॥ १ ॥

परि । ऊँ इति । सु । प्र । धन्व । वाजऽसातये । परि । वृत्राणि ।
सक्षणिः । द्विषः । तरध्यै । ऋणऽयाः । नः । ईयसे ॥ १ ॥

हे सोम सु सुष्ठु वाजसातये अस्मभ्यमन्नदानायैव परिप्रधन्व परितः प्रगच्छ । यद्वा वाजसातये अन्नलाभाय संग्रामं प्रगच्छ । किंच सक्षणिः सहनशीलस्त्वं वृत्राणि शत्रून्परिगच्छ । तदेवोच्यते—नोस्माकं ऋणयाः ऋणानां यापयिता त्वं द्विषः शत्रून् तरध्यै तरीतुं हन्तुं ईयसे परिगच्छसि ॥१॥

१. सोम, अन्न-लाभ के लिए युद्ध में जाओ। तुम सहनशील हो। शत्रुओं के पास जाओ। तुम हमारे ऋणों के परिशोषक हो। तुम शत्रुओं को मारने के लिए जाते हो।

अनुहित्वासुतंसोममदामसिमहेसमर्यराज्ये ।
वाजाँअभिपवमानप्रगाहसे ॥ २ ॥

अनु । हि । त्वा । सुतम् । सोम । मदामसि । महे । समर्यऽराज्ये ।
वाजान् । अभि । पवमान । प्र । गाहसे ॥ २ ॥

हे सोम सुतमभिषुतं त्वा त्वां वयमनुमदामसिहि अनुमदामः अनुक्रमेणाभिष्टुमः खलु । हे पवमानसोम सत्वं महे महति समर्यराज्ये महत् समनुष्यं त्वदीयं राज्यमनुपालयितुं वाजान् शत्रुबलान्यभिलक्ष्य प्रगाहसे प्रगच्छसि ॥ २ ॥

२. सोम, तुम अभिषुत हो। सोम, महान् मनुष्य-समूहवाले राज्य में हम क्रमशः तुम्हारा स्तोत्र करते हैं। अपने राज्य की रक्षा के लिए तुम शत्रुओं को लक्ष्य करके जाते हो।

अजीजनोहिपवमानसूर्यंविधारेशक्मनापयः ।
गोजीरयारंहमाणःपुरंध्या ॥ ३ ॥

अजीजनः । हि । पवमान । सूर्यम् । विऽधारे । शक्मना ।
पयः । गोऽजीरया । रंहमाणः । पुरंध्ऽया ॥ ३ ॥

हे पवमान सोम त्वं पयः पयसउदकस्य विधारे विधारके अन्तरिक्षे शक्मना समर्थेन बलेन सूर्यमजीजनोहि उत्पादितवान् भवसि खलु। कीदृशः गोजीरया स्तोतृभ्योगवां प्रेरकेण स्तोतॄणां प्रेरितपशुकेनेत्यर्थः। तादृशेन पुरंध्या बहुविधप्रज्ञानेन युक्तः रंहमाणः वेगं कुर्वाणस्त्वं सूर्यमजीजनः ॥ ३ ॥

३. सोम, तुमने जल-धारक अन्तरिक्ष में, समर्थ बल से, सूर्य को उत्पन्न किया है। तुम स्तोताओं को पशु देनेवाले हो। तुम्हारे पास अनेक प्रकार के ज्ञान हैं। तुम वेगशाली हो।

अजीजनोअमृतमर्त्येष्वाँऋतस्यधर्मन्नमृतस्यचारुणः।
सदासरोवाजमच्छासनिष्यदत् ॥ ४ ॥

अजीजनः। अमृत। मर्त्येषु। आ। ऋतस्य। धर्मन्। अमृतस्य। चारुणः। सदा। असरः। वाजम्। अच्छ। सनिस्यदत् ॥ ४ ॥

हे अमृत मरणधर्मरहित सोम त्वं ऋतस्य सत्यभूतस्य चारुणः कल्याणस्य अमृतस्योदकस्य धर्मन् धारके अन्तरिक्षे सूर्यमजीजनः किमर्थं मर्त्येष्वामनुष्येष्वभिमुखीभवनाय। किंच सनिष्यदत् संभजन् सत्वं वाजं अच्छ संग्राममभिलक्ष्य सदा असरः सरसि गच्छसि ॥ ४ ॥

४. अमर सोम, तुमने सत्य और कल्याणभूत जल के [illegible] क्ष में सूर्य को, मनुष्यों के सामने करने को, उत्पन्न किया है। भजनशील तुम संग्राम का लक्ष्य करके सदा जाया करते हो।

अभ्यभिहिश्रवसाततर्दिथोत्सन्नकञ्चिज्जनपानमक्षितम्।
शयाभिर्नभरमाणोगभस्त्योः ॥ ५ ॥

अभिऽअभि। हि। श्रवसा। ततर्दिथ। उत्सम्। न। कम्। चित्। जनऽपानम्। अक्षितम्। शयाभिः। न। भरमाणः। गभस्त्योः ॥ ५ ॥

हे सोम त्वं श्रवसान्नेन हेतुना अभ्यभि ततर्दिथ हि पवित्रमभितृणवानसि छिन्नवानसि। तत्र दृष्टान्तद्वयं—उत्सं न यथा कश्चित् जनपानं अस्मिन् जनाउदकं पिबन्ति तमक्षितं अक्षीणं कंचित् कंचन उत्सरणशीलं वाप्यादिकं अभितृणत्ति अथवा कश्चित् गभस्त्योर्बाह्वोः शयाभिरंगुलीभिर्भरमाणउदकं संभरन् कंचिदभितृणत्ति तद्वत् ॥ ५ ॥

५. सोम, जैसे कोई लोगों के जल पीने के लिए अक्षय्य जल से [illegible]तड़ाग खोदता है अथवा कोई दोनों हाथों की अञ्जलि से जल भरता है, वैसे ही तुम अन्न देने के लिए पवित्र को छेद कर जाते हो।

आदींकेचित्पश्यमानासआप्यंवसुरुचोदिव्याअभ्यनूषत ।
वारंनदेवःसविताव्यूर्णुते ॥ ६ ॥ २२ ॥

आत् । ईम् । के । चित् । पश्यमानासः । आप्यम् । वसुऽरुचः ।
दिव्याः । अभि । अनूषत । वारम् । न । देवः । सविता । वि । ऊर्णुते ॥६॥२२॥

आदनन्तरं पश्यमानास एनं पश्यन्तोदिव्याः दिविभवाः वसुरुचोनामकेचित् आप्यं बन्धुं साधुं ईमेनं सोमं अभ्यनूषत अभ्यस्तुवन् । कस्मादनन्तरमिति उच्यते देवोद्योतमानः सविता सर्वस्य प्रेरकः सूर्यः वारं आवरकं अंधकारं नव्यूर्णुते नापगमयति तदा एनमस्तुवन् सूर्योदयात् प्रागेवहि सोमं स्तुवन्ति खलु ॥ ६ ॥

६. दिव्य और सबके प्रेरक सूर्य ने अभी अन्धकार भी नहीं हटाया, तभी देखनेवाले और दिव्यलोकोत्पन्न "वसुरुच्" नाम के व्यक्तियों ने अपने बन्धु सोम की स्तुति की।

॥ इति सप्तमस्य पंचमे द्वाविंशोवर्गः ॥ २२ ॥

त्वेसोमप्रथमावृक्तबर्हिषोमहेवाजायश्रवसेधियंदधुः ।
सत्वंनोवीरवीर्यायचोदय ॥ ७ ॥

त्वे इति । सोम । प्रथमाः । वृक्तऽबर्हिषः । महे । वाजाय । श्रवसे ।
धियम् । दधुः । सः । त्वम् । नः । वीर । वीर्याय । चोदय ॥ ७ ॥

हे सोम प्रथमाः पुरातनाः यद्वा यज्ञत्वेन सर्वेषां जनानां मुख्याः वृक्तबर्हिषः वृक्तं छिन्नं बर्हिर्येषांयज्ञार्थमिति वृक्तबर्हिषोयजमानाः महे महते वाजाय बलाय श्रवसेन्नायच धियं बुद्धिं त्वे त्वयि दधुः निहितवन्तः । तस्मात् हे वीर समर्थ सोम सतादृशस्त्वं नोस्मानपि संग्रामे वीर्याय सामर्थ्याय चोदय प्रेरय यद्वा वीर्याय वीरपुत्रे भवाय सुखायास्मान् प्रेरय ॥ ७ ॥

७. सोम, मुख्य और कुश तोड़नेवाले यजमानों ने महान् बल और अन्न के लिए तुममें अपनी बुद्धि को रक्खा। समर्थ सोम, हमें भी, वीर्यप्राप्ति के लिए, युद्ध में भेजो।

दिवःपीयूषंपूर्व्यंयदुक्थ्यंमहोगाहाद्दिवआनिरधुक्षत ।
इन्द्रंमभिजायमानंसमस्वरन् ॥ ८ ॥

दिवः । पीयूषम् । पूर्व्यम् । यत् । उक्थ्यम् । महः । गाहात् । दिवः । आ ।
निः । अधुक्षत । इन्द्रम् । अभि । जायमानम् । सम् । अस्वरन् ॥८॥

दिवोद्युलोकात् तत्र स्थितैर्देवैः पीयूषं पातव्यं पूर्व्यं पूर्वं यत्सोमरूपमन्नं उक्थ्यं प्रशस्यमस्ति तं सोमं महो महतोगाहात् गहनात् दिवोद्युलोकात् आनिरधुक्षत आभिमुख्येन निर्दुहन्ति । ततः दुग्धमिन्द्रं अभिलक्ष्य जायमानं तं सोमं समस्वरन् स्तोतारः संस्तुवन्ति ॥ ८ ॥

८. द्युलोकस्थित देवों के पीने योग्य, प्राचीन, प्रशस्य और महान् द्युलोक से सोम को अपने सम्मुख लोग दूहते हैं। इन्द्र को लक्ष्य करके उत्पन्न सोम की, स्तोता लोग, स्तुति करते हैं।

अधयदिमेपवमानरोदसीइमाचविश्वाभुवनाभिमज्मना।
यूथेननिःष्ठावृषभोवितिष्ठसे ॥ ९ ॥

अध। यत्। इमे इति। पवमान। रोदसी इति। इमा। च। विश्वा। भुवना। अभि। मज्मना। यूथे। न। निःऽस्थाः। वृषभः। वि। तिष्ठसे॥९॥

हे पवमान सोम अध अथ अनन्तरं यद्यदा इमे रोदसी द्यावापृथिव्यौ इमा इमानि विश्वा विश्वानि भुवना भूतजातानिच मज्मना बलेन अभितिष्ठसि सत्यं तथाकुर्वन् भुवनेषु वितिष्ठसे। तत्र दृष्टान्तः—यूथे न यथाकश्चिद्वृषभः गवां यूथे वृन्दे निःष्ठाः निःष्ठितोवर्तते तद्वत् यूथस्थानीयेषु भूतजातेषु निःष्ठितोभवसि ॥ ९ ॥

९. सोम, जैसे वृषभ गोसमूह में आधिपत्य करता है, वैसे ही तुम अपने बल से द्युलोक, भूलोक और सारे प्राणियों पर राज्य करते हो।

सोमःपुनानोअव्ययेवारेशिशुर्नक्रीळन्पवमानोअक्षाः।
सहस्रधारःशतवाजइन्दुः ॥ १० ॥

सोमः। पुनानः। अव्ययें। वारें। शिशुः। न। क्रीळन्। पवमानः। अक्षारिति। सहस्रऽधारः। शतऽवाजः। इन्दुः ॥ १० ॥

पुनानः पूयमानः पवमानः पूतः सोमः अव्यये अविमये वारे वाले पवित्रे शिशुर्न शिशुरिव क्रीळन् इतस्ततः संक्रीडमानः सन् अक्षाः क्षरति। कीदृशः सहस्रधारः बहुधारायुक्तः शतवाजोबहुबलः इन्दुर्दीप्तः ॥ १० ॥

१०. अनेक धाराओंवाले, असीम सामर्थ्यवाले, दीप्त और क्षरणशील सोम मेषलोममय पवित्र पर, शिशु के समान, क्रीड़ा करते-करते क्षरित होते हैं। अथैकादशी—

एषपुनानोमधुमाँऋतावेन्द्रायेन्दुःपवतेस्वादुरूर्मिः।
वाजसनिर्वरिवोविद्वयोधाः ॥ ११ ॥

एषः। पुनानः। मधुऽमान्। ऋतऽवा। इन्द्राय। इन्दुः। पवते। स्वादुः। ऊर्मिः। वाजऽसनिः। वरिवःऽवित्। वयःऽधाः ॥ ११ ॥

पुनानः पूयमानः मधुमान् माधुर्योपेतः क्रतावा क्रतवान् यज्ञवान् इंदुः क्षरणशीलः स्वादुः स्वादुकरः ऊर्मिः एषरसधारासंघः इन्द्रायेन्द्रार्थं पवते क्षरति । कीदृशः वाजसातिः अन्नस्य दाता वरिवोवित् धनस्य लंभकः वयोधाः आयुषोदाता ॥ ११ ॥

११. शोधित, मधुरता-युक्त, यज्ञवान, क्षरणशील, स्वादुकर, रसधारा-संघ, अन्नदाता, धनप्रापक और आयुर्दाता सोम बहते हैं।

सपवस्वसहमानःपृतन्यून्त्सेधन्रक्षांस्यपदुर्गहाणि ।
स्वायुधःसासह्वान्त्सोमशत्रून् ॥ १२ ॥ २३ ॥

सः । पवस्व । सहमानः । पृतन्यून् । सेधन् । रक्षांसि । अप । दुःऽगहानि । सुऽआयुधः । ससह्वान् । सोम । शत्रून् ॥ १२ ॥ २३ ॥

हे सोम तादृशस्त्वं पवस्व किंकुर्वन् पृतन्यून् कव्यध्वरपृतनस्यर्चिलोपइति क्यचि परतोकारलोपः संग्रामकामान् शत्रून् सहमानोभिभवन् तथा दुर्गहाणि कैश्चिदपि दुर्गमानि रक्षांसि अपसेधन् अपगमयन् हिंसन् किंच स्वायुधः शोभनायुधः सन् शत्रून् सासह्वान् अभिभवन् अभितपन् पवस्व ॥ १२ ॥

१२. सोम, युद्धकामी शत्रुओं को हराते हुए, दुर्गम राक्षसों को मारते हुए और शोभन आयुधवाले होकर रिपुविनाश करते हुए बहो।

॥ इति सप्तमस्य पंचमे त्रयोविंशोवर्गः ॥ २३ ॥

अयारुचेति तृचमष्टमं सूक्तं परुच्छेपपुत्रस्य अनानताख्यस्यार्षं अत्यष्टिच्छन्दस्कं पवमानसोमदेवताकं । तथाचानुक्रम्यते—अयारुचातृचमनानतः पारुच्छेपिरात्यष्टमिति । गतोविनियोगः ।

तत्र प्रथमा—

अयारुचाहरिण्यापुनानोविश्वाद्वेषांसितर
तिस्वयुग्वभिःसूरोनस्वयुग्वभिः ।
धारासुतस्यरोचतेपुनानोअरुषोहरिः ।
विश्वायद्रूपापरियात्यृक्वभिःसप्तास्यैभिर्ऋक्वभिः ॥ १ ॥

अया । रुचा । हरिण्या । पुनानः । विश्वा । द्वेषांसि । तरति । स्वयुग्वऽभिः । सूरः । न । स्वयुग्वऽभिः ।

धारा । सुतस्य । रोचते । पुनानः । अरुषः । हरिः । विश्वा ।
यत् । रूपा । परिऽयाति । ऋक्वऽभिः । सप्तऽआस्येभिः । ऋक्वऽभिः ॥१॥

पुनानः पूयमानः सोमः हरिण्या हरितवर्णया अया अनया रुचा रोचमानया धारया विश्वा सर्वाणि द्वेषांसि द्वेष्टॄणि रक्षांसि तरति विनाशयति । तत्र दृष्टान्तः—सूरोन यथा सूर्यः स्वयुग्वभिः स्वयं युक्तैः रश्मिभिस्तमांसि हिनस्ति तद्वत् स्वयुग्वभिरिति द्विरुक्तिरादरार्था। यद्वा धारया युक्तः सोमः स्वीयैर्युक्तैस्तेजोभिः रक्षांसि तरति तस्य सुतस्याभिषुतस्य सोमस्य धारा रोचते दीप्यते । पुनानः पूयमानः हरिर्हरितवर्णः सोमः अरुषः आरोचमानोभवति यत् यः सोमः सप्तास्येभिः रसहरणशीलास्यैः ऋक्वभिः स्तुतिमद्भिः ऋक्वभिस्तेजोभिः विश्वा विश्वानि व्याप्तानि रूपा रूपाणि नक्षत्राणि परियाति गच्छति व्याप्नोति ॥ १ ॥

१. जैसे सूर्य अपनी किरणमाला से अन्धकार को नष्ट करते हैं, वैसे ही शोधित सोम हरितवर्ण और शोभन धारा से सारे राक्षसों को नष्ट करते हैं। अभिषुत सोम की धारा दीप्त होती है। शोधित और हरितवर्ण सोम रुचिकर होते हैं। सातों छन्दोंवाली तथा रस हरणशील स्तुतियों और तेजों से सोम सारे नक्षत्रों को व्याप्त करते हैं।

त्वंत्यत्पणीनांविदोवसुसंमातृभिर्मर्जय
सिस्वआदमंक्रतस्यधीतिभिर्दमे ।
परावतोनसामतद्यत्रारण्न्तिधीतयः ।
त्रिधातुभिररुषीभिर्वयोदधेरोचमानोवयोदधे ॥ २ ॥

त्वम् । त्यत् । पणीनाम् । विदः । वसु । सम् । मातृऽभिः ।
मर्जयसि । स्वे । आ । दमे । क्रतस्य । धीतिऽभिः । दमे । पराऽवतः ।
न । साम । तत् । यत्र । रण्न्ति । धीतयः । त्रिधातुऽभिः ।
अरुषीभिः । वयः । दधे । रोचमानः । वयः । दधे ॥ २ ॥

हे सोम त्वं त्यत्पणीनां वसु पणिभिरपहृतं गवात्मकं धनं विदः अलभथाः । आ अपिच क्रतस्य यज्ञस्य धीतिभिः धात्रीभिर्मातृभिः वसतीवरीभिः स्वे आत्मीये दमे गृहभूते दमे यज्ञे संमर्जयसि सम्यक् शुद्धोभवसि । परावतोन दूरस्थादेशात् यथा साम सामध्वनिः श्रूयते तथा तव तत्साम ध्वनिः सर्वैः श्रूयते । असौ सोमाभिषवाभिप्रायेणोक्तः । यत्र यस्मिन् शब्दे धीतयः कर्मणोधर्तारोयजमानाः रण्न्ति रमन्ते । रोचमानः सोमः त्रिधातुभिः त्रयाणां लोकानां

धारयित्रीभिः मातृभिः वसतीवरीभिः अरुषीभिः आरोचमानाभिर्दीप्तिभिः वयोन्नं दधे स्तोतृभ्यः प्रयच्छति पुनर्वयोदधइत्यादरार्थे ॥ २ ॥

२. सोम, तुमने पणियों के द्वारा अपहृत गो-धन को प्राप्त किया था। यज्ञ के धारक जल से यज्ञ-गृह में भली भांति शोधित होते हो। जैसे दूर देश से साम-ध्वनि सुनाई देती है, वैसे ही तुम्हारा शब्द सुना जाता है। सोम के शब्द में कर्मनिष्ठ यजमान रमण करते हैं। शोभन सोम तीनों लोकों के धारक जल और रुचिकर दीप्ति के साथ स्तोताओं को अन्न प्रदान करते हैं। अथ तृतीया—

पूर्वामनु प्रदिशं यात्येकित्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।
अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन् ।
वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥३॥२४॥

पूर्वाम् । अनु । प्रऽदिशम् । याति । चेकितत् । सम् । रश्मिऽभिः ।
यतते । दर्शतः । रथः । दैव्यः । दर्शतः । रथः । अग्मन् ।
उक्थानि । पौंस्या । इन्द्रम् । जैत्राय । हर्षयन् । वज्रः ।
च । यत् । भवथः । अनपऽच्युता । समत्ऽसु । अनपऽच्युता ॥३॥२४॥

चेकितत् जानानः सोमः पूर्वां प्राचीं प्रदिशं प्रकृष्टां दिशं अनुयाति अनुगच्छति । किंच दर्शतः सर्वैर्दर्शनीयः दैव्यः देवेषु भवः तव रथः सूर्यरश्मिभिः संयतते संगच्छते पुनर्दर्शतोरथइत्यादरार्थे। ततः पौंस्या पुंस्त्वावगमानि उक्थानि स्तोत्राण्यग्मन् इन्द्रं गच्छन्ति तथा जैत्राय जयार्थं तानि स्तोत्राणि इन्द्रं हर्षयन् हर्षयन्ति । तथा तस्य वज्रश्च तमिन्द्रं गच्छति । यद्यदा समत्सु संग्रामेषु अनपच्युता अनपच्युतौ शत्रुभिः अपराजितौ सोमश्च त्वंच इन्द्रश्च युवां सहभवथः तदा स्तोत्रागमनादीनि भवन्ति पुनरनपच्युतेत्यादरार्थो ॥ ३ ॥

३. ज्ञाता सोम पूर्व दिशा को जाते हैं। सोम, तुम्हारा सबके लिए दर्शनीय और दिव्य रथ सूर्य्य-किरणों में मिलता है। पुरुषों के उच्चारित स्तोत्र इन्द्र के पास जाते हैं। वे स्तोत्र विजय के लिए इन्द्र को प्रसन्न करते हैं। वज्र भी इन्द्र के पास जाता है। जिस समय युद्ध-क्षेत्र में सोम और इन्द्र शत्रुओं के द्वारा अजेय होते हैं, उस समय उनकी स्तुति की जाती है। ॥ इति सप्तमस्य पंचमे चतुर्विंशोवर्गः ॥ २४ ॥

नानानमिति चतुर्ऋचं नवमं सूक्तं आंगिरसस्य शिशुनाम्नआर्षं पंचपदापंक्तिश्छन्दः पवमानः सोमोदेवता । तथाचानुक्रान्तं—नानानं चतुष्कं शिशुः पांक्तंहीति । गतोविनियोगः ।

नानानंवाउनोधियोविव्रतानिजनानाम् ।
तक्षारिष्टंरुतंभिषग्ब्रह्मासुन्वन्तमिच्छतीन्द्रायेन्दोपरिस्रव ॥ १ ॥

नानानम् । वै । ऊँ इति । नः । धियः । वि । व्रतानि । जनानाम् ।
तक्षा । रिष्टम् । रुतम् । भिषक् । ब्रह्मा । सुन्वन्तम् ।
इच्छति । इन्द्राय । इन्दो इति । परि । स्रव ॥ १ ॥

ऋषिः एतदादिभिः त्रिभिः सूक्तैः अपरिस्रवतः सोमस्य जामित्वाय मनसोविनोदनं कुर्वन्नाह । हे सोम नोस्माकं धियः कर्माणि नानानं नानाजातीयकानि बहूनि भवन्ति वैशब्दः प्रसिद्धार्थद्योतनार्थः उइति पूरणः । तथा अन्येषामपि जनानां व्रतानि कर्माणि विविधानि भवंति तक्षा त्वष्टा रिष्टं दारुतक्षणमिच्छति तथा भिषक् वैद्यः चिकित्सकः रुतं रोगमिच्छति ब्रह्मा ब्राह्मणः सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानमिच्छति । तथा अहं त्वत्परिस्रवणं इच्छामि । तस्मात् हे इन्दो सोम इन्द्रायेन्द्रार्थं परिस्रव परितः क्षर ॥ १ ॥

१. हमारे कर्म अनेक प्रकार के हैं। दूसरों के कर्म भी अनेक प्रकार के हैं। शिल्पी काष्ठकार्य चाहता है, वैद्य रोग को चाहता है और ब्राह्मण सोमाभिषवकर्त्ता यजमान को चाहता है। मैं सोम का प्रवाह चाहता हूँ। सोम, इन्द्र के लिए क्षरित होओ।

जरतीभिरोषधीभिःपर्णेभिःशकुनानाम् ।
कामारोअश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दोपरिस्रव ॥२॥

जरतीभिः । ओषधीभिः । पर्णेभिः । शकुनानाम् । कामारः ।
अश्मऽभिः । द्युऽभिः । हिरण्यऽवन्तम् । इच्छति ।
इन्द्राय । इन्दो इति । परि । स्रव ॥ २ ॥

जरतीभिः जीर्णाभिः याभिरोषधीभिः इषवः क्रियन्ते । तथा शकुनानां पर्णेभिः इषूणां पक्षभूतैः पर्णैश्च क्रियन्ते । तथा द्युभिर्दीप्ताभिरिषूणां तेजनार्थाभिरश्मभिः शिलाभिश्च क्रियन्ते तपतैः कामारोयस्कारः हिरण्यवन्तं आढ्यं पुरुषमिच्छति तथाहं त्वत्परिस्रवणमिच्छामि । तस्मात् इन्दो इन्द्राय परिस्रव ॥ २ ॥

२. पुराने काठों, पक्षियों के पक्ष और (शान चढ़ाने के लिए) उज्ज्वल शिलाओं से बाण बनाये जाते हैं। शिल्पी, बाण बेचने के लिए, स्वर्णवाले धनी पुरुष को खोजते हैं। मैं सोम का क्षरण खोजता हूँ। फलतः, सोम, इन्द्र के लिए क्षरित होओ।

कारुरहंततोभिषगुपलप्रक्षिणीनना ।
नानाधियोवसूयवोनुगाइवतस्थिमेन्द्रायेन्दोपरिस्रव ॥ ३ ॥

कारुः । अहम् । ततः । भिषक् । उपलऽप्रक्षिणी । नना ।
नानाऽधियः । वसुऽयवः । अनु । गाःऽइव । तस्थिम ।
इन्द्राय । इन्दो इति । परि । स्रव ॥ ३ ॥

ऋषिः प्रवृत्तसोमयागः सन् दशापवित्रात् सोमे क्षरति तत्प्रतिबन्धकपापापनुत्तये पुरश्चरितानुकीर्तनपुरःसरं अध्येषणां चकार । तावदहं कारुः स्तोमानां कर्तास्मि ततइति सन्तानानाम । तन्यतेस्मादिति ततः पिता तन्यते साविति वा ततः पुत्रः भिषक् भेषजकृत् यज्ञस्य ब्रह्मेत्यर्थः । सर्वं तय्या विद्यया भिषज्यतीतिश्रुतेः । तथा उपलप्रक्षिणी उपलेषु वालुकासु प्रक्षिणोति यवान् हिनस्ति भृज्जतीति यद्वा दृषदादिषूपलेषु भृष्टान् यवान् हिनस्ति चूर्णयतीति । अथवा धानासक्तुकरंभादीनां कारिकावा असौ नना माता दुहिता वा नमनक्रियायोग्यत्वात् माता खलु अपत्यं प्रति स्तनपानादिना नमनशीला भवति दुहितावा शुश्रूषार्थं एवं सर्वेषां परिचरणेन नानाधियः नानाकर्माणः वसूयवोधनकामावयं अनुतस्थिम लोकमन्वास्थितास्मः । तत्र दृष्टान्तः—गाइव छान्दसोजसःशसादेशः गावोयथा गोष्ठमनुतिष्ठन्ति स्वपयःप्रदानेन परिचरन्तिवा एवं वयमपि परिचरामः । एतत् ज्ञात्वा हे इन्दो सोम इन्द्राय परिस्रव दशापवित्रात् क्षर एवमेषाध्येषणा सत्कारपूर्विका व्यापारणा । अत्र निरुक्तं—उपलप्रक्षिण्युपलेषु प्रक्षिणात्युपलप्रक्षेपिणीवाकारुरहमस्मिकर्तास्तोमानांततोभिषक्ततइतिसंतानानामपितुर्वापुत्रस्यवोपलप्रक्षिणीसक्तुकारिकाननानमतेर्मातावादुहितावानानाधियोनानाकर्माणोवसूयवोवसुकामाअन्वास्थितास्मोगावइवलोकमिति ॥ ३ ॥

३. मैं स्तोता हूँ, पुत्र भिषक् (वा ब्रह्मा) है और कन्या यव-भर्जनकारिणी है । हम सब भिन्न-भिन्न कर्म करते हैं । जैसे गायें गोष्ठ में विचरण करती हैं, वैसे ही हम भी, धनकामी होकर, तुम्हारी (सोम की) सेवा करते हैं । सोम, इन्द्र के लिए क्षरित होओ ।

अश्वोवोढ्वासुखंरथंहसनामुपमन्त्रिणः ।
शेपोरोमण्वन्तौभेदौवारिन्मण्डूकइच्छतीन्द्रायेन्दोपरिस्रव॥४॥२५॥

अश्वः । वोढ्वा । सुऽखम् । रथम् । हसनाम् । उपऽमंत्रिणः ।
शेपः । रोमण्ऽवन्तौ । भेदौ । वाः । इत् । मण्डूकः ।
इच्छति । इन्द्राय । इन्दो इति । परि । स्रव ॥ ४ ॥ २५ ॥

---

१ नि० ६. ५.।

योह्वा लक्षं देशं प्रापयन्नश्वः सुखं कल्याणं रथमिच्छति उपमंत्रिणः उपमंत्रवन्तो नर्मसचिवाः हसनां उपहसनां वाचमिच्छन्ति तथा शेपः। शेपोवैवसइतिपुंस्प्रजननस्येतियास्कः। यथा शेपः रोमण्वन्तौ भेदाविच्छति। मंडूकः वारिद इदवधारणे उदकमेवेच्छति तथा हं त्वत्परिस्रवणमिच्छामि तस्मादिन्द्रायेन्दोपरिस्रवेति ॥ ४ ॥

४. सुन्दर वहन करनेवाले और कल्याणकर रथ की इच्छा घोड़ा करता है, मन्त्र-सचिव (दरबारी) हास-परिहास की इच्छा करता है और पुरुषेन्द्रिय रोमोंवाला भेद (द्विधाभित्) की कामना करता है। मैं सोम-क्षरण चाहता हूँ। सोम, इन्द्र के लिए क्षरित होओ।

॥ इति सप्तमस्य पंचमे पंचविंशोवर्गः ॥ २५ ॥

शर्यणावतीत्येकादशर्चं दशमं सूक्तं गारीचस्य कश्यपस्यार्षं पूर्ववद्गीत्युक्तत्वात् इदमुत्तरं च पांक्तं पवमानसोमदेवताकं। तथाचानुक्रम्यते—शर्यणावत्येकादशकाश्यपइति। गतोविनियोगः।

शर्यणावति सोममिन्द्रः पिबतु वृत्रहा।
बलं दधान आत्मनि करिष्यन्वीर्यं महदिन्द्रायेन्दो परिस्रव ॥ १ ॥

शर्यणाऽवति। सोमम्। इन्द्रः। पिबतु। वृत्रऽहा। बलम्।
दधानः। आत्मनि। करिष्यन्। वीर्यम्। महत्।
इन्द्राय। इन्दो इति। परि। स्रव ॥ १ ॥

शर्यणावति शर्यणावन्नामकुरुक्षेत्रस्य जघनार्धे सरः तत्र स्थितं सोमं वृत्रहा इन्द्रः पिबतु। कीदृशः आत्मनि बलं दधानः बलं निदधानः अतएव महद्वीर्यं करिष्यन् शत्रून् प्रति तस्मादिन्द्रायेन्दो परिस्रव ॥ १ ॥

१. कुरुक्षेत्र के पासवाले शर्यणावत् तड़ाग में स्थित सोम को इन्द्र पियें, जिससे इन्द्र आत्मबली और महान् वीर्यवाले हों। इन्द्र के लिए, सोम, क्षरित होओ।

आ पवस्व दिशां पत आर्जीकात्सोम मीढ्वः।
ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परिस्रव ॥ २ ॥

आ। पवस्व। दिशाम्। पते। आर्जीकात्। सोम। मीढ्वः।
ऋतऽवाकेन। सत्येन। श्रद्धया। तपसा। सुतः। इन्द्राय।
इन्दो इति। परि। स्रव ॥ २ ॥

---

१. नि० ३. २१.।

हे दिशां पते प्राच्यादीनां दिशां प्रकाशकत्वेन स्वामिन् हे मीढ्वः कामानां सेक्तः हेसोम आर्जीकात् ऋजीकानामदूरभवः आर्जीकोजनपदः तस्मादापवस्व अस्मद्यज्ञं प्रत्यागच्छ। यद्वा आर्जीकात् ऋजोरकुटिलात् पवित्रात् क्षर। कीदृशः ऋतवाकेन ऋतस्य वचनेन सत्येन सत्यर्तयोरल्पोभेदोद्रष्टव्यः श्रद्धया तपसा युक्तैः दीक्षितैः सुतोभिषुतस्त्वं पवस्व ॥ २ ॥

२. काम-सेचक और दिशाओं के स्वामी सोम, आर्जीक देश (व्यास नदी के पास के प्रदेश) से आकर क्षरित होओ। पवित्र और सत्य स्तुति-वाक्यों तथा श्रद्धा और पुण्य-कर्म के साथ तुम्हें अभिषुत किया गया है। इन्द्र के लिए क्षरित होओ।

पर्जन्यवृद्धंमहिषंतंसूर्यस्यदुहिताभरत्।
तंगन्धर्वाःप्रत्यगृभ्णन्तंसोमेरसमादधुरिन्द्रायेन्दोपरिस्रव ॥ ३ ॥

पर्जन्यऽवृद्धम्। महिषम्। तम्। सूर्यस्य। दुहिता। आ। अभरत्। तम्। गन्धर्वाः। प्रति। अगृभ्णन्। तम्। सोमे। रसम्। आ। अदधुः। इन्द्राय। इन्दो इति। परि। स्रव ॥ ३ ॥

सूर्यस्य दुहिताश्रद्धावैसूर्यस्य दुहितेति वाजसनेयकं। सा पर्जन्यवृद्धं पर्जन्यवत्समर्थं यद्वा पर्जन्येन तत्कार्यत्वेनोदकेन प्रवृद्धं महिषं महान्तं पूज्यंवा तं सोममाभरत् आहरत् द्युलोकादाहृतवती तमाह्रियमाणं सोमं गंधर्वाः विश्वावसुप्रभृतयः प्रत्यगृभ्णन प्रत्यगृह्णन् प्रतिगृहीतवन्तः हव्यहोर्भः। ततः गंधर्वाः प्रतिगृहीतं रसं सोमे प्रत्यक्षमादधुः। दधातेर्लङि। तस्मात् परिस्रव ॥ ३ ॥

३. सूर्य-पुत्री (श्रद्धा) मेघ के जल से प्रवृद्ध और महान् सोम को स्वर्ग से ले आई। गन्धर्वों (वसु आदि) ने सोम को ग्रहण किया और सोम में रस दिया। सोम, इन्द्र के लिए क्षरित होओ।

अथ चतुर्थी—

ऋतंवदन्नृतद्युम्नसत्यंवदन्त्सत्यकर्मन्।
श्रद्धांवदन्त्सोमराजन्धात्रासोमपरिष्कृतइन्द्रायेन्दोपरिस्रव ॥ ४ ॥

ऋतम्। वदन्। ऋतऽद्युम्न। सत्यम्। वदन्। सत्यऽकर्मन्। श्रद्धाम्। वदन्। सोम। राजन्। धात्रा। सोम। परिऽकृतः। इन्द्राय। इन्दो इति। परि। स्रव ॥ ४ ॥

हे ऋतद्युम्न ऋतेन द्योतमान सत्ययशस्कवा सत्यकर्मन् हे सोम अभिषूयमाण राजन् सर्वेषां यज्ञनिष्पादकत्वेन स्वामिन् हे सोम ऋतं यज्ञं वदन् सत्यं वदन् उच्चारयन् श्रद्धां य-

जमानानां आत्मनोपेक्षितां वदन् धात्रा कर्मणा धारकेण देवानां पोषकेणवा यजमानेन परिष्कृतोऽलंकृतस्त्वं इन्द्राय परिस्रव । संपर्युपेभ्यइति भूषणार्थे करोतेः सुट् ॥ ४ ॥

४. सत्ययाचा सोम, अभिषूयमाण राजन्, यज्ञस्वामी, इन्दु, यज्ञ, सत्य और श्रद्धा का उच्चारण करते हुए और कर्मधारक यजमान से अलंकृत होकर तुम सोम, इन्द्र के लिए क्षरित होओ।

सत्यमुग्रस्यबृहतःसंस्रवन्तिसंस्रवाः ।
संयन्तिरसिनोरसाःपुनानोब्रह्मणाहरइन्द्रायेन्दोपरिस्रव ॥५॥२६॥

सत्यमऽउग्रस्य । बृहतः । सम् । स्रवन्ति । सम्ऽस्रवाः ।
सम् । यन्ति । रसिनः । रसाः । पुनानः । ब्रह्मणा । हरे ।
इन्द्राय । इन्दो इति । परि । स्रव ॥ ५ ॥ २६ ॥

सत्यमुग्रस्य संग्रामे सत्येन शत्रूणामुद्गारयितुः यद्वा उद्गूर्णसत्यस्य यद्वा यथार्थभूतमुद्गूर्णं बलं यस्य तस्य पृषोदरादित्वात् रूपसिद्धिः बृहतोमहतः सोमस्य तव संस्रवाः सम्यक् स्रवणशीलाः धाराः संस्रवन्ति सम्यक्गच्छन्ति । किंच रसिनोरसवतस्तव स्वभूतारसाः संयन्ति संगच्छन्ते तस्मात् हे हरे हरितवर्ण सोम ब्रह्मणा ब्राह्मणेन मंत्रेणवा पुनानः पूयमानः सत्वमिन्द्रार्थं परिस्रव ॥ ५ ॥

५. यथार्थ बली और महान् सोम की क्षरणशील धारा क्षरित हो रही है। रसवान् सोम का रस बह रहा है। हरितवर्ण सोम, ब्राह्मण के द्वारा शोधित होकर तुम इन्द्र के लिए क्षरित होओ।

॥ इति सप्तमस्य पंचमे षड्विंशोवर्गः ॥ २६॥

अथ षष्ठी—

यत्रब्रह्मापवमानछन्दस्यां३वाचंवदन् ।
ग्राव्णासोमेमहीयतेसोमेनानन्दंजनयन्निन्द्रायेन्दोपरिस्रव ॥ ६ ॥

यत्र । ब्रह्मा । पवमान । छन्दस्याम् । वाचम् । वदन् ।
ग्राव्णा । सोमे । महीयते । सोमेन । आऽनन्दम् । जनयन् ।
इन्द्राय । इन्दो इति । परि । स्रव ॥ ६ ॥

हे पवमान पूयमान सोम त्वदर्थं छन्दस्यां सप्तच्छन्दोभिः कृतां तेषु भवां वाचं स्तुतिं वदन् उच्चारयन् सोमे सोमाभिषवार्थं ग्राव्णाभिषवं कुर्वतायुक्तः तेनाभिषुतेन सोमेन देवाना-

मानन्दं सन्तोषं जनयन्नुत्पादयन् ब्रह्मा ब्राह्मणः यत्र यस्मिन्देशे महीयते देवैः पूज्यते तत्र हे सोम त्वं परिस्रव ॥ ६ ॥

६. शोध्यमान सोम, तुम्हारे लिए सातों छन्दों में बनाई स्तुति का उच्चारण करते हुए, पत्थर से तुम्हारा अभिषव करते हुए और उस अभिषव से देवों का आनन्द उत्पन्न करते हुए ब्राह्मण जहाँ पूजित होता है, वहाँ क्षरित होओ। अथ सप्तमी—

यत्रज्योतिरजस्रंयस्मिँल्लोकेस्वर्हितम् ।
तस्मिन्मांधेहिपवमानामृतेलोकेअक्षितइन्द्रायेन्दोपरिस्रव ॥ ७॥

यत्र । ज्योतिः । अजस्रम् । यस्मिन् । लोके । स्वः । हितम् ।
तस्मिन् । माम् । धेहि । पवमान । अमृते । लोके । अक्षिते ।
इन्द्राय । इन्दो इति । परि । स्रव ॥ ७ ॥

हे पवमान यत्र यस्मिन्लोके ज्योतिः सर्वं तेजः अजस्रं सर्वदा अविनश्वरं वर्तते । यस्मिंश्च लोके स्वरादित्याख्यं ज्योतिर्हितं निहितमस्ति तस्मिन् अमृते मरणधर्मरहिते अतएव अक्षिते अक्षीणलोके मां सोमाभिषवं कुर्वन्तं धेहि तस्मान्मामुत्तमलोकं प्रापयितुं त्वमिन्द्राय परिस्रव ॥ ७ ॥

७. सोम, जिस लोक में अखण्ड तेज है और जहाँ स्वर्गलोक है, उसी अमर और ह्रासशून्य लोक में मुझे ले चलो। इन्द्र के लिए क्षरित होओ।

यत्रराजावैवस्वतोयत्रावरोधनंदिवः ।
यत्रामूर्यह्वतीरापस्तत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव ॥ ८ ॥

यत्र । राजा । वैवस्वतः । यत्र । अवऽरोधनम् । दिवः ।
यत्र । अमूः । यह्वतीः । आपः । तत्र । माम् । अमृतम् ।
कृधि । इन्द्राय । इन्दो इति । परि । स्रव ॥ ८ ॥

यत्र यस्मिन्लोके वैवस्वतः विवस्वत्पुत्रोराजा भवति यत्रच लोके दिवआदित्यस्यावरोधनं भूतानां प्रवेशनं। किंच यत्र लोके यह्वतीर्महत्यः अमूरिमागंगाद्याः आपस्तिष्ठन्ति । तत्र तादृशे लोके मां अमृतं मरणधर्मरहितं कृधि कुरु मम देवत्वं प्रापयेत्यर्थः । ततः कारणात् परिस्रव ॥ ८ ॥ जिस लोक में वैवस्वत राजा हैं, जहाँ स्वर्ग का द्वार है और जहाँ मन्दाकिनी आदि नदियाँ बहती हैं, उस लोक में मुझे अमर करो। इन्द्र के लिए क्षरित होओ। ८.

यत्रानुकामंचरणंत्रिनाकेत्रिदिवेदिवः ।
लोकायत्रज्योतिष्मन्तस्तत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव ॥ ९ ॥

यत्र । अनुऽकामम् । चरणम् । त्रिऽनाके । त्रिऽदिवे । दिवः ।
लोकाः । यत्र । ज्योतिष्मन्तः । तत्र । माम् । अमृतम् ।
कृधि । इन्द्राय । इन्दो इति । परि । स्रव ॥ ९ ॥

यत्र त्रिदिवे तृतीयस्यां दिवि द्युलोके त्रिनाके तत्र अधरमध्यमोत्तमभावेन त्रीणिस्थानानि सन्ति । तत्र तृतीयेनाके उत्तमे स्थाने दिवआदित्यस्यानुकामं कामानुगुणं चरणमस्ति । किंच यत्र यस्मिन्लोके लोकाः ज्योतिष्मन्तः ज्योतिर्युक्तास्तिष्ठन्ति तत्र तादृशे लोके माममृतं कृधि यथामोत्तमलोकोभवति तथा त्वमिन्द्राय परिस्रव ॥ ९ ॥

९. जिस उत्तम लोक में (तीसरे लोक में) सूर्य की अभिलाषा के अनुरूप किरणें हैं और जहाँ ज्योतिवाले मनुष्य रहते हैं, उस लोक में मुझे अमर करो। इन्द्र के लिए क्षरित होओ।

यत्रकामानिकामाश्चयत्रब्रध्नस्यविष्टपम् ।
स्वधाचयत्रतृप्तिश्चतत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव ॥ १० ॥

यत्र । कामाः । निऽकामाः । च । यत्र । ब्रध्नस्य । विष्टपम् ।
स्वधा । च । यत्र । तृप्तिः । च । तत्र । माम् । अमृतम् ।
कृधि । इन्द्राय । इन्दो इति । परि । स्रव ॥ १० ॥

यत्र यस्मिन्लोके कामाः काम्यमानाः देवाः निकामानितरामवश्यं प्रार्थ्यमानाइन्द्रादयश्च विद्यन्ते यद्वा सूर्येण विना कर्माणि नघटन्ते इति सर्वेषां कर्मणां मूलभूतस्यादित्यस्य विष्टपं सहस्थानं विद्यते यत्र लोके स्वधान्नं स्वधाकारेण दत्तमन्नं तृप्तिस्तर्पणं यत्रविद्यते तत्र लोके माममृतं कृधि ॥ १० ॥

१०. जिस लोक में काम्यमान देवता और अवश्य प्रार्थनीय इन्द्रादि रहते हैं, जहाँ सारे कर्मों के मूल सूर्य का स्थान है और जहाँ "स्वधा" के साथ दिया गया अन्न तथा तृप्ति है, वहाँ मुझे अमर करो। इन्द्र के लिए क्षरित होओ।

अथैकादशी—

यत्रानन्दाश्चमोदाश्चमुदःप्रमुदआसते ।
कामस्ययत्राप्ताःकामास्तत्रमाममृतंकृधीन्द्रायेन्दोपरिस्रव॥११॥२७॥

यत्र । आऽनन्दाः । च । मोदाः । च । मुदः । प्रऽमुदः । आसते ।
कामस्य । यत्र । आप्ताः । कामाः । तत्र । माम् । अमृतम् ।
कृधि । इन्द्राय । इन्दो इति । परि । स्रव ॥ ११ ॥ २७ ॥

यत्र यस्मिन् लोके आनन्दादयआसते तेषामल्पोभेदोद्रष्टव्यः यत्र लोके कामस्य काम्यमानस्य देवस्य सर्वेकामाआप्ताः प्राप्ताभवन्ति तत्र मामगृतं कृधि एवन्तु त्वयाविना नघटतइति हे सोम त्वं परिस्रव ॥ ११ ॥

११. जिस लोक में आनन्द, आमोद, आह्लाद आदि हैं और जहाँ सारी कामनायें पूर्ण होती हैं, वहाँ मुझे अमर करो। इन्द्र के लिए क्षरित होओ।

॥ इति सप्तमस्य पंचमे सप्तविंशोवर्गः ॥ २७ ॥

यइन्दोइति चतुर्ऋचमेकादशं सूक्तं ऋष्याद्याः पूर्ववत्। तथाचानुक्रम्यते—यइन्दोश्चतुष्कमिति। गतः सूक्तविनियोगः।

यइन्दोःपवमानस्यानुधामान्यक्रमीत् ।
तमाहुःसुप्रजाइतियस्तेसोमाविधन्मनइन्द्रायेन्दोपरिस्रव ॥ १ ॥

यः । इन्दोः । पवमानस्य । अनु । धामानि । अक्रमीत् ।
तम् । आहुः । सुऽप्रजाः । इति । यः । ते । सोम । अविधत् ।
मनः । इन्द्राय । इन्दो इति । परि । स्रव ॥ १ ॥

पवमानस्य पूयमानस्य इन्दोः सोमस्य धामानि स्थानानि द्रोणकलशादीनि यद्वा धामानि तेजांसि योब्राह्मणः अन्वक्रमीत् अनुक्रामति अनुगच्छति तमनुजनं सुप्रजाः शोभनप्रजननः कल्याणपुत्रादिप्रजायुक्तइत्याहुः । नित्यमसिच्प्रजामेधयोरित्यसिच्समासान्तः । यः सोममभिपुणोति सपुत्रादियुक्तोभवतीत्यर्थः । किंच हे सोम योमनुष्यः ते त्वदर्थं मनः अविधत् करोति यद्वा ते त्वदीयं मनः अविधत् परिचरति विधतिः परिचरणकर्मा तमपि कल्याणजननमित्याहुः तस्मात् त्वं परिस्रव ॥ १ ॥

१. जिन शोध्यमान सोम के तेज का जो ब्राह्मण अनुगमन करता है, उस अमर व्यक्ति को कल्याणकर पुत्र आदि से युक्त कहा जाता है और जो सोम के मन के अनुकूल परिचर्या करता है, वह भी ऐसा ही सौभाग्यशाली कहा जाता है। इन्द्र के लिए क्षरित होओ।

कर्पेमंत्रकृतांस्तोमैःकश्यपोहुर्धयन्गिरः ।
सोमंनमस्यराजानंयोजज्ञेवीरुधांपतिरिन्द्रायेन्दोपरिस्रव ॥ २ ॥

ऋषे । मंत्रऽकृताम् । स्तोमैः । कश्यप । उत्ऽवर्धयन् । गिरः ।
सोमम् । नमस्य । राजानम् । यः । जज्ञे । वीरुधाम् ।
पतिः । इन्द्राय । इन्दो इति । परि । स्रव ॥ २ ॥

ऋषिः स्वात्मानं प्रत्याह हे ऋषे सूक्तद्रष्टः हे कश्यप आत्मन् त्वं मंत्रकृतामृषीणां स्तोमैः स्तोत्रैः गिरः स्तुतिरूपावाचः उद्वर्धयन्नुपर्युपरिवर्धन् राजानं सर्वेषां स्वामिनं तं सोमं नमस्य मनसा पूजय नमसः पूजायां नमोवरिवइति क्यच् । यः सोमः वीरुधां वनस्पतीनां पतिः पालकः सजज्ञे जातः तं नमस्य हे सोम यथा आत्मना सुतोभवसि तथा परिस्रव ॥ २ ॥

२. ऋषि (कश्यप), मन्त्र-रचयिताओं ने जिन स्तुति-वचनों की रचना की है, उनका आश्रय करके अपने वाक्य की वृद्धि करो और सोम राजा को प्रणाम करो। सोम वनस्पतियों के पालक हैं। इन्द्र के लिए क्षरित होओ। अथ तृतीया—

सप्तदिशोनानासूर्याःसप्तहोतारऋत्विजः ।
देवाआदित्यायेसप्ततेभिःसोमाभिरक्षनइन्द्रायेन्दोपरिस्रव ॥ ३ ॥

सप्त । दिशः । नानाऽसूर्याः । सप्त । होतारः । ऋ[illegible]
देवाः । आदित्याः । ये । सप्त । तेभिः । सोम । अभि ।
रक्ष । नः । इन्द्राय । इन्दो इति । परि । स्रव ॥ ३ ॥

सप्तदिशः सोमोयस्यां दिशि वर्तते तद्व्यतिरिक्ताः सप्तभवन्ति ताः नानासूर्याः नानाविधैः सूर्यैरधिष्ठिताऋतवोभवन्ति नानालिंगत्वादृतूनां नानासूर्यत्वमित्याम्नानात् । यद्वा नानासूर्याइति दिग्विशेषणं । तथा होतारः वषट्कर्तारोहोत्रादयः सप्तऋत्विजोभवन्ति किंच सप्तआदित्याः अदितेः पुत्राधात्रादयोमार्तंडवर्जिताः ये सप्तदेवाः सन्ति । एतत्तु—अष्टौ पुत्रासोअदितेः[1] । इत्यत्र प्रपंचयिष्यते । हे सोम तेभिस्तैः दिगादिभिः सर्वैर्नोस्मानभिरक्ष । एतत्तु त्वयां विना नघटतइति तस्मादिन्द्रायेन्दो परिस्रव ॥ ३ ॥

३. सूर्य के आश्रय-स्थल जो सात दिशायें हैं (सोमवाली दिशा को छोड़कर), जो होमकर्त्ता सात पुरोहित हैं और जो सात सूर्य हैं (मार्त्तण्ड को छोड़कर), उनके साथ हमारी रक्षा करो। इन्द्र के लिए क्षरित होओ।

उपाकरणोत्सर्जनयोर्मंडलाद्यन्तहोमे यत्तेराजन्नित्येषा । सूत्रितंच—यत्तेराजन्नितिद्वृचाः [illegible] आकूतिरित्येकेति ।

---

१ ऋ० सं०८. ३. १. ।

तत्र एषा सूक्ते चतुर्थी—

यत्ते॑राजञ्छृ॒तंह॒विस्तेनसोमा॒भिर॑क्षनः ।
अ॒रा॒ती॒वामान॑स्तारी॒न्मोच॑नः॒किंच॒नाम॑म॒दिन्द्रा॑येन्दो॒परि॑स्रव॥४॥२८॥

यत् । ते॒ । रा॒ज॒न् । शृ॒तम् । ह॒विः । तेन॑ । सो॒म॒ । अ॒भि । र॒क्ष॒ । नः॒ । अ॒रा॒ति॒ऽवा । मा । नः॒ । ता॒री॒त् । मो इति॑ । च॒ । नः॒ । किम् । च॒न । आ॒म॒म॒त् । इन्द्रा॑य । इ॒न्दो॒ इति॑ । परि॑ । स्र॒व॒ ॥ ४ ॥ २८ ॥

हे राजन् सर्वेषां कर्मसाधनत्वेन स्वामिन् हे सोम ते त्वदर्थं शृतं पक्वं यत् हविरस्ति शृतं। शृतं पाकेइति निष्ठायां निपातितः। तेन हविषा नोस्मानभिरक्ष अभिपालय। तस्मात् त्वदभिरक्षितानस्मान् अरातीवा अरातित्ववान् शत्रुः नोस्मान् मातारीत् मावधीत्। किंच नोस्माकं किंचन किंचिदपि धनादिकं शत्रुः मोआममत् माहिंसीत्। यदेतत् एतैः सूक्तैरुक्तं तद्यथास्माकं भवति तथा हे इन्दो इन्द्राय परिस्रव। एवं स्वादिष्ठयेत्यादिभिरेतदन्तैः सूक्तैर्बहुविधं सोममाहात्म्यं अभ्यधायि तस्मात् ऐहिकामुष्मिकफलसिद्धये सोमयागः करणीयइत्युक्तं भवति ॥ ४ ॥

४. राजा सोम, तुम्हारे लिए जिस हवनीय द्रव्य का पाक किया हुआ है, उससे हमारी रक्षा करो। शत्रु हमें न मारे और हमारे वस्त्र का अपहरण न करे। इन्द्र के लिए क्षरित होओ।

॥ इति सप्तमस्य पंचमेष्टाविंशोवर्गः ॥ २८ ॥

॥ इति नवमे मंडले सप्तमोनुवाकः ॥ ७ ॥

॥ इति पावमानसौम्यं नवमं मंडलं समाप्तं ॥

दशमे मंडले द्वादशानुवाकाः तत्र प्रथमानुवाके षोडशसूक्तानि तत्राग्नेबृहन्निति सप्तर्चं प्रथमं सूक्तं आप्त्यस्य त्रितस्यार्षं अनादेशपरिभाषया त्रिष्टुप् मंडलादिपरिभाषयाग्निर्देवता। तथाचानुक्रम्यते—अग्नेसप्तत्रितइति। प्रातरनुवाकाश्विनशस्त्रयोराग्नेयेक्रतौ त्रैष्टुभेछन्दसि इदमादीन्यष्टसूक्तानि अष्टमस्यांत्यास्त्रिस्तोवर्जयित्वा। सूत्र्यते हि—अनेनयोग्नेबृहन्नित्यष्टानामुत्तमादुत्तमास्त्रिस्तउद्धरेदितित्रैष्टुभमिति। प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्य सहस्रावसमोदेतोः शंसेदितिच होमार्थं प्रणीते आहवनीये प्राक्होमादुपशान्ते ज्योतिष्मद्गुणकाग्निदेवताका काचिदिष्टिस्तत्रापा याज्या। सूत्रितंच—इष्टिरग्निर्ज्योतिष्मान्वरुणउदग्नेशुचयस्तवाग्नेबृहन्नुपसामूर्ध्वोअस्थादिति। उपाकरणोत्सर्जनयोर्मंडलादिहोमेप्येषा सूत्रमुदाहृतं।

तत्र प्रथमा—

अग्नेबृहन्नुपसामूर्ध्वोअस्थान्निर्जगन्वान्तमसोज्योतिषागात्।
अग्निर्भानुनारुशतास्वङ्गआजातोविश्वासद्मान्यप्राः॥ १॥

अग्ने। बृहन्। उपसाम्। ऊर्ध्वः। अस्थात्। निःऽजगन्वान्। तमसः। ज्योतिषा। आ। अगात्। अग्निः। भानुना। रुशता। स्वऽअङ्गः। आ। जातः। विश्वा। सद्मानि। अप्राः॥ १॥

बृहन्महानेषोग्निः उपसामग्ने उपसामुपरि उषःकाले ऊर्ध्वः प्रज्वलितः सन् ज्वालारूपेण अस्थात् तिष्ठति ततस्तमसः रात्रितमसः रात्रेर्निर्जगन्वान् निर्गतः गमः क्वसाविडभावे रूपं निर्गतः निष्क्रान्तवान् सोग्निर्ज्योतिषा स्वीयेन तेजसा लक्षितः सन् आगात् गार्हपत्यात् विहियमाणआहवनीयं प्रत्यागच्छति। अनन्तरं स्वंगः शोभनज्वालावयवः जातः कर्मार्थं समुत्पन्नएषोग्निः रुशता रोचतेर्ज्वलतिकर्मणइदं रूपं आरोचमानेन यद्वा रुशतिर्हिंसार्थः तमसां हिंसकेन भानुना तेजसा विश्वा सद्मानि सर्वान् लोकान् यद्वा सदनानि यज्ञगृहाणि आप्राः आपूरयति। प्रापूरणे विङ्गतिङोभवन्तीति तिपः सिपादेशः। अत्र वाजसनेयकम्—अग्ने बृहन्नुपसामूर्ध्वोअस्थादित्यग्नेरेषबृहन्नुपसामूर्ध्वस्तिष्ठतिनिर्जगन्वान्तमसोज्योतिषागादितिनिर्जगन्वान्रात्रेस्तमसोज्योतिषेतिअग्निर्भानुनारुशतास्वंगइत्यग्निर्वाएषभानुनारुशतास्वंगआजातोविश्वासद्मान्यप्राइतिइमेवैलोकाविश्वासद्मानितानेषजातआपूरयतीति॥ १॥

१. महान् अग्नि उषःकाल में प्रज्वलित होकर ज्वाला-रूप से रहते हैं। अग्नि अन्धकार से निकलकर अपने तेज से आहवनीय रूप में आते हैं। शोभन ज्वालावाले और कर्म के लिए उत्पन्न अग्नि अपने हिंसक तेज से सारे यज्ञ-गृहों को पूर्ण करते हैं।

अथ द्वितीया—

सजातोगर्भोअसिरोदस्योरग्नेचारुर्विभृतओषधीषु ।
चित्रःशिशुःपरितमांस्यक्तून्प्रमातृभ्योअधिकनिक्रदद्गाः ॥ २ ॥

सः । जातः । गर्भः । असि । रोदस्योः । अग्ने । चारुः । विऽभृतः ।
ओषधीषु । चित्रः । शिशुः । परि । तमांसि । अक्तून् । प्र ।
मातृऽभ्यः । अधि । कनिक्रदत् । गाः ॥ २ ॥

हे अग्ने जातउत्पन्नः चारुः कल्याणरूपः ओषधीषु ओषधिविकारेष्वरणीषु विभृतः विशेषेण मथितः आहवनीयाद्यात्मना विविधं ह्रियमाणः ओषधीषु वर्तमानः सत्वं रोदस्योर्द्यावापृथिव्योर्गर्भोसि गर्भोभवसि अग्निरूपआदित्यरूपश्चेति । किंच चित्रश्चित्रवर्णः काली करालीचमनोजवेत्यादिसप्तजिह्वादिभिर्नानारूपः यद्वा चित्रश्चायनीयः शिशुः ओषधीनां शिशुः अग्निः तमांसि अक्तून् रात्रिवत् कृष्णान् शत्रूंश्च परिभवसि स्वतेजसा अभिभवसि सत्वं मातृभ्यः मातृरूपाभ्यः ओषधीभ्यः अधिः पंचम्यर्थद्योतकः ताभ्यः कनिक्रदत् पुनःपुनः शब्दंकुर्वन् प्रगाः प्रगच्छसि प्रजायसे ॥ २ ॥

२. अग्नि, प्रादुर्भूत, कल्याणरूप, अरणियों से भली भाँति मथित और ओषधियों में वर्तमान तुम द्यावापृथिवी के गर्भ हो। चित्रवर्ण और ओषधियों के शिशु अग्नि, तुम अपने तेज से काले शत्रुओं को पराजित करते हो। मातृ-रूप वनस्पतियों के लिए शब्द करते हुए तुम उत्पन्न होते हो।

अथ तृतीया—

विष्णुरित्थापरममस्यविद्वाञ्जातोबृहन्नभिपातितृतीयम् ।
आसायदस्यपयोअक्रतस्वंसचेतसोअभ्यर्चन्त्यत्र ॥ ३ ॥

विष्णुः । इत्था । परमम् । अस्य । विद्वान् । जातः । बृहन् । अभि ।
पाति । तृतीयम् । आसा । यत् । अस्य । पयः । अक्रत ।
स्वम् । सऽचेतसः । अभि । अर्चन्ति । अत्र ॥ ३ ॥

परमं उत्कृष्टं विद्वान् जानानः जातः प्रादुर्भूतोबृहन् महान् इत्था इत्थमनेन प्रकारेण विष्णुः व्यापनशीलः ज्ञानादिगुणयुक्तोग्निः अस्य इमे तृतीयं त्रयाणां पूरकं त्रितं मां अभिपाति अभिर-

क्षतु। एकतोद्वितस्त्रितइति त्रयोबभूवुरिति यास्केनोक्तं। किंच अस्याग्नेः स्वमात्मीयं पयउदकं आसा आस्येन यद्यदा अक्रत कुर्वन्ति यजमानायाचन्ते तदानीं अत्रास्मिन्लोके स्थिताः स्तोतारः सचेतसः समानमनस्काभूत्वा एनमभ्यर्चन्ति अभिष्टुवन्ति ॥ ३ ॥

३. उत्कृष्ट, विद्वान्, प्रादुर्भूत, महान् और व्यापक अग्नि मुझ त्रित (ऋषि) का रक्षण करें। अग्नि का जल मुख से करके अर्थात् अग्नि से जल की याचना करते-करते यज्ञकर्ता, समानमना होकर, अग्निपूजा करते हैं।

अथ चतुर्थी—

अतउत्वापितुभृतोजनित्रीरन्नावृधंप्रतिचरन्त्यन्नैः ।
ताईंप्रत्येषिपुनरन्यरूपाअसित्वंविक्षुमानुषीषुहोता ॥ ४ ॥

अतः । ऊँ इति । त्वा । पितुऽभृतः । जनित्रीः । अन्नऽवृधम् । प्रति । चरन्ति । अन्नैः । ताः । ईम् । प्रति । एषि । पुनः । अन्यऽरूपाः । असि । त्वम् । विक्षु । मानुषीषु । होता ॥ ४ ॥

हे अग्ने अतउइत्यवधारणे अस्मादेवकारणाद् पितुभृतः पितुनान्नेन सर्वस्य जगतोधारयित्र्यः पोषयित्र्योवा जनित्रीः जनयित्र्यः ओषधयः अन्नावृधं अन्नस्य वर्धकं त्वा त्वां अन्नैर्हेतुभिः प्रतिचरन्ति परिचरन्ति। अभिगच्छन्ति ततस्त्वं ईमेनास्ताओषधीः प्रत्येषि प्रतिगच्छसि। पुनरपि अन्यरूपाः जीर्णाः ओषधीः दावभूतस्त्वं गच्छसि। किंच मानुषीषु मनुष्यजातिषु विक्षु प्रजासु यद्वा विक्षु अग्निहोत्रादिक्रियास्वभिनिविशन्तीषु मानुषीषु मनुष्यजातिषु होता देवानामाह्वाता होमनिष्पादकोवा असि भवसि। मनुष्येषु स्थितइत्यर्थे ब्राह्मणम्—देवोह्येषमर्त्येष्विति ॥ ४ ॥

४. अग्नि, सारे संसार के धारक और उत्पादक वनस्पति अन्न-वर्धक तुम्हें, अन्न के लिए, सेवित करते हैं। तुम ओषधियों (वनस्पतियों) के प्रति—शुष्क वनस्पतियों के प्रति, दाव-रूप होकर जाते हो। तुम मनुष्यों और प्रजाओं में होम-निष्पादक हो:

आतिथ्यायां स्विष्टकृतोनुवाक्या होतारमित्येषा। सूत्रितंच—होतारं चित्ररथमध्वरस्य प्रपायमग्निर्भरतस्यशृण्वइति संयाज्येइति।

सैषा सूक्ते पञ्चमी—

होतारंचित्ररथमध्वरस्ययज्ञस्ययज्ञस्यकेतुंरुशन्तम् ।
प्रत्यर्धिदेवस्यदेवस्यमह्नाश्रियात्व१ग्निमतिथिंजनानाम् ॥ ५ ॥

---

१ नि० ४. ६.। २ तै० सं० ६. १. ४.।

होतारम् । चित्रऽरथम् । अध्वरस्य । यज्ञस्यऽयज्ञस्य । केतुम् ।
रुशन्तम् । प्रतिऽअर्धिम् । देवस्यऽदेवस्य । मह्ना । श्रिया ।
तु । अग्निम् । अतिथिम् । जनानाम् ॥ ५ ॥

अध्वरस्य यज्ञस्य होतारं एतन्नामानं ऋत्विजं यद्वा होतारं देवानामाह्वातारं चित्ररथं नानारूपरथं अध्वरस्य रक्षोभिरहिंसितस्य यज्ञस्ययज्ञस्य सर्वस्य यज्ञस्य केतुं प्रज्ञापकं पताकास्थानीयंवा रुशंतं श्वेतवर्णं मह्ना स्वमहत्वेन देवस्यदेवस्य सर्वेषां देवानां प्रत्यर्धिं इन्द्रं प्रति भवन्तं । यत् सर्वेषामार्धिमिन्द्रंप्रतीतिर्ब्राह्मणं । तादृशं जनानां यजमानानामतिथिं अतिथिवत्पूज्यं अग्निं तु क्षिप्रं श्रिया श्रियेर्थं वयं स्तुमः ॥ ५ ॥

५. देवों के आह्वाता, विविध रथवाले, सारे यज्ञों की पताका, श्वेत-वर्ण सारे देवों के अधिपति, इन्द्र के पास जानेवाले और यजमानों के पूज्य अग्नि का, सम्पत्ति-प्राप्ति के लिए, तुरत हम स्तोत्र करते हैं।

सतुवस्त्राण्यधपेशनानिवसानोअग्निर्नाभापृथिव्याः ।
अरुषोजातःपदइळायाःपुरोहितोराजन्यक्षिहदेवान् ॥ ६ ॥

सः । तु । वस्त्राणि । अध । पेशनानि । वसानः । अग्निः । नाभा ।
पृथिव्याः । अरुषः । जातः । पदे । इळायाः । पुरःऽहितः ।
राजन् । यक्षि । इह । देवान् ॥ ६ ॥

हे राजन् दीप्यमानाग्ने वस्त्राणि आच्छादकानि तेजांसि अध अपि च पेशनानि तेषां तेजसां कार्ष्ण्यशौक्ल्यादीनि रूपाणि यद्वा अधानन्तरं पेशनानि पेशइति हिरण्यनाम हिरण्यवत् हिरण्यसदृशानि भास्वराणि तेजांसि वसान आच्छादयन् पृथिव्यानाभा नाभौ नाभिस्थानीये इळायास्पदे उत्तरवेद्यां। एतद्वा इळायास्पदंयदुत्तरवेदीनाभिरित्याम्नानात्। तस्यां जातः समुत्पन्नः अरुषः आरोचमानोयोग्निः एवं विधोसि सत्वं पुरोहितः पुरतोनिहितः पूर्वस्यां दिशि आहवनीयायतने स्थापितः सन् इहास्मिन्यज्ञे देवान् इन्द्रादीन् यक्षि पूजय ॥ ६ ॥

६. दीप्यमान अग्नि, हिरण्य-सदृश तेजों और उनके शुक्ल आदि रूपों को धारण करके, पृथिवी की नाभि (उत्तर वेदी) पर उत्पन्न होकर शोभा धारण करके और आह्वनीय स्थान (पूर्व दिशा) में स्थापित होकर इस यज्ञ में इन्द्रादि की पूजा करो।

आहिद्यावापृथिवीअग्नउभेसदापुत्रोनमातरातत्तन्थ ।
प्रयाह्यच्छोशतोयविष्ठाथावहसहस्येहदेवान् ॥ ७ ॥ २९ ॥

---

१ तै० सं० ५. ४. ८. । २ ऐ० ब्रा० १. २८. ।

आ । हि । द्यावापृथिवी इति । अग्ने । उभे इति । सदा । पुत्रः ।
न । मातरा । ततन्थ । प्र । याहि । अच्छ । उशतः । यविष्ठ ।
अथ । आ । वह । सहस्य । इह । देवान् ॥ ७ ॥ २९ ॥

हे अग्ने त्वं उभे द्यावापृथिवी द्यावापृथिव्यौ सदा सर्वदा आततन्थ आतेनिथ स्वतेजोभिर्विस्तारयसि हिखलु । बभूथाततंथेति थलि निपातितः । तत्र दृष्टान्तः-पुत्रोन यथा पुत्रो-मातरा मातापितरौ क्षीणौ धनैस्तनोति तद्वत् । किंच हे यविष्ठ युवतमत्वं उशतः कामयमानानच्छाभिलक्ष्य प्रयाहि प्रकर्षेण गच्छ । अथानन्तरं हे सहस्य सहसोबलस्य पुत्र हे अग्ने त्वं इहास्मदीये यज्ञे देवानिन्द्रादीन् आवह प्रापय ॥ ७ ॥

७. अग्नि, तुम सदा वैसे ही द्यावापृथिवी का विस्तार करते हो, जैसे पुत्र माता-पिता का विस्तार करता है। तरुणतम अग्नि, तुम अभिलाषी व्यक्तियों को लक्ष्य करके जाओ। बल-पुत्र अग्नि, हमारे यज्ञ में इन्द्रादि को ले आओ। ॥ इति सप्तमस्य पंचमे एकोनत्रिंशोवर्गः ॥ २९ ॥

पिप्रीहीति सप्तर्चं द्वितीयं सूक्तं ऋष्याद्याः पूर्ववत् । पिप्रीहीत्यनुक्रान्तं । प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः । दर्शपूर्णमासयोराद्या स्विष्टकृतोनुवाक्या । सूत्रितंच— अथ स्विष्टकृतः पिप्रीहिदेवाँ उशतोयविष्ठेत्यनुवाक्येति ।

पिप्रीहिदेवाँउशतोयविष्ठविद्वाँऋतूँऋतुपतेयजेह ।
येदैव्याऋत्विजस्तेभिरग्नेत्वंहोतॄणामस्यायजिष्ठः ॥ १ ॥

पिप्रीहि । देवान् । उशतः । यविष्ठ । विद्वान् । ऋतून् । ऋतुऽपते ।
यज । इह । ये । दैव्याः । ऋत्विजः । तेभिः । अग्ने । त्वम् ।
होतॄणाम् । असि । आऽयजिष्ठः ॥ १ ॥

हे यविष्ठ युवतम अग्ने उशतः स्तुतीः श्रोतुं कामयमानान् देवान् पिप्रीहि हविर्भिः प्रीणय । हे ऋतुपते ऋतूनां देवयागकालानां स्वामिन् अग्ने ऋतून् यागकालान् विद्वान् जानानः त्वं इहास्मिन् यज्ञे तान् यज पूजय । किंच हे अग्ने दैव्याः देवेषु भवाः अग्निर्होताश्विनावध्वर्यूत्वष्टाग्नीन्मित्रउपवक्तेत्यत्रोक्ताये ऋत्विजः सन्ति तेभिस्तैः सह देवान्यज यद्वा दैव्याः देवेषु भवाऋत्विजः आश्वलायनेनोक्ताः चंद्रमाग्रहादित्योध्वर्युः पर्जन्यउद्गातेति । तैः सह यज । यस्मात्त्वं होतॄणां मध्ये आयजिष्ठः आभिमुख्येन देवानां यष्टृतमोसि भवसि ॥ १ ॥

१. युवतम अग्नि, स्तोत्राभिलाषी देवों को प्रसन्न करो। देव-यज्ञ-कालों के स्वामी अग्नि, यज्ञ-समयों को जान करके तुम इस यज्ञ में उनकी पूजा करो। अग्नि, देवों के पुरोहितों के साथ पूजन करो। तुम होताओं में श्रेष्ठ हो।

अथ द्वितीया—

वेषिहोत्रमुतपोत्रंजनानांमन्धातासिद्रविणोदाऋतावा ।
स्वाहावयंकृणवामाहवींषिदेवोदेवान्यजत्वग्निरर्हन् ॥ २ ॥

वेषि । होत्रम् । उत । पोत्रम् । जनानाम् । मन्धाता । असि ।
द्रविणःऽदाः । ऋतऽवा । स्वाहा । वयम् । कृणवाम । हवींषि ।
देवः । देवान् । यजतु । अग्निः । अर्हन् ॥ २ ॥

हे अग्ने जनानां यजमानार्थं होत्रं होतुः कर्म तेन क्रियमाणं स्तोत्रं वेषि कामयसे । उतापिच पोत्रं पोतुः कर्म तेन क्रियमाणां स्तुतिं कामयसे । किंच मन्धाता मेधावी ऋतावा सत्यवांस्त्वं द्रविणोदा असि धनस्य प्रदाता भवसि।अथ परोक्षः वयं देवेभ्यः हवींषि स्वाहाकृणवाम स्वाहाकरवाम प्रयच्छाम । ततोदेवोदीप्यमानः अर्हन् प्रशस्यः यजमानयोग्योवाग्निः देवान्यजतु तैर्हविर्भिः पूजयतु ॥ २ ॥

२. अग्नि, तुम होता, पोता, मेधावी, सत्यनिष्ठ और धनद हो। हम देवों को हवि दो। दीप्यमान और प्रशस्य अग्नि देव-पूजन करें।

दर्शपूर्णमासातिपत्यादौ निमित्ते पाथिकृतीष्टिः कर्तव्या । तत्र आदेवानामित्येषा याज्या । सूत्रितंच—वेत्थाहिवेधोअध्वनआदेवानामपिपन्थामगन्मेति । प्रायणीयायामप्येषैव याज्या उदयनीयायां सैवानुवाक्या। सूत्रितंच—अग्नेनयसुपथारायेअस्मानादेवानामपिपंथामगन्मेति विपरीताश्चयाज्यानुवाक्याइति ।

सैषा सूक्ते तृतीया—

आदेवानामपिपन्थामगन्मयच्छक्वामतदनुप्रवोळ्हुम् ।
अग्निर्विद्वान्त्सयजात्सेदुहोतासोअध्वरान्त्सऋतून्कल्पयाति ॥३॥

आ । देवानाम् । अपि । पन्थाम् । अगन्म । यत् ।
शक्नवाम । तत् । अनु । प्रऽवोळ्हुम् ।
अग्निः । विद्वान् । सः । यजात् । सः । इत् । ऊँ इति । होता ।
सः । अध्वरान् । सः । ऋतून् । कल्पयाति ॥ ३ ॥

देवानां देवलोकादिगमनसाधनं देवानां स्वभूतं पंथां पंथानं तमपि वैदिकमार्गं वयमागन्म आगतवन्तोभवेम । येन देवान् प्रामुमः तथा वयं यत्कर्मानुष्ठातुं शक्नुवाम शक्नुमः समर्थाभवामः तत्कर्म अनुक्रमेण प्रवोढुं प्रकर्षेण वोढुं समाप्तिं प्रापयितुं समर्थाभवामः अनन्तरं विद्वान् तं पंथानं जानानः सोग्निः यजात् देवान् यजतु सेत् उ सएव खलु होता मनुष्याणां होमनिष्पादकः ततः सएवाग्निः अध्वरान् यज्ञान् किंच सएव क्रतून् कालान् कल्पयाति कल्पयतु करोतु ॥ ३ ॥

३. हम देवों के वैदिक मार्ग पर जायें। हम जो कर्म कर सकें, उसको भली भाँति समाप्ति कर सकें। ज्ञानी अग्नि देव-पूजा करें। मनुष्यों के होम-सम्पादक अग्नि यज्ञों और उनके कालों को करें।

व्रतातिपत्तौ व्रातपतीष्टिः कर्तव्या तत्र यद्वोवयमित्येषा याज्या। सूत्रितंच—त्वमग्नेव्रतपाअसि यद्वोवयंप्रमिनामव्रतानीति ।

यद्वोवयंप्रमिनामव्रतानिविदुषांदेवाअविदुष्टरासः ।
अग्निष्टद्विश्वमापृणातिविद्वान्येभिर्देवाँक्रतुभिःकल्पयाति ॥४॥

यत् । वः । वयम् । प्रऽमिनाम । व्रतानि । विदुषाम् । देवाः ।
अविदुःऽतरासः । अग्निः । तत् । विश्वम् । आ । पृणाति ।
विद्वान् । येभिः । देवान् । क्रतुऽभिः । कल्पयाति ॥ ४ ॥

हे देवाः अविदुष्टरासः अविद्वत्तराः अत्यन्तमजानन्तोवयं वः युष्माकं यत् यत्किंचित् व्रतानि कर्माणि विदुषां भवतां जानतामेव प्रमिनाम प्रहिंसितवन्तः भवत्सु जानत्सु नित्यनैमित्तिककर्माणि विलोपितवन्तइत्यर्थः । विद्वान् एतत्सर्वं जानानः अग्निः तत् स्विष्टकृतं विश्वं सर्वं कर्मजातं आपृणाति आपूरयतु फलसहितं करोत्वित्यर्थः । केनापूरयतु तत्राह येभिर्क्रतुभिः यागयोग्यैः कालैः देवान् कल्पयाति कल्पयति कर्मांगभावाय समर्थयति तैरापूरयतु ॥४॥

४. देवो, हम अज्ञानी हैं। ज्ञानवान् आपके कर्मों को जानते हुए भी हमने विलुप्त कर दिया। यह सब जाननेवाले अग्नि सारे कर्मों को पूर्ण करें। यागयोग्य कालों से अग्निदेवों को कल्पित करते हैं।

यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्त्यासः ।
अग्निष्टद्होतांक्रतुविद्विजानन्यजिष्ठोदेवाँक्रतुशोयजाति॥५॥

यत् । पाकऽत्रा । मनसा । दीनऽदक्षाः । न । यज्ञस्य ।
मन्वते । मर्त्यासः । अग्निः । तत् । होता । क्रतुऽवित् ।
विऽजानन् । यजिष्ठः । देवान् । क्रतुऽशः । यजाति ॥ ५ ॥

दीनदक्षाः दीनबलाः दीनोत्साहावा मर्त्यासोमर्त्याः मनुष्याऋत्विजः पाकश्चा पाकेन बहुलग्रहणादस्मादपि तृतीयार्थे आप्रत्ययः। पाकेन पक्वत्वेन विशिष्टज्ञानरहितेन अल्पेन वा मनसा युक्ताः सन्तः यज्ञस्य यज्ञसंबन्धि यत्कर्म न मन्वते नविजानन्तः तदा होता देवानामाह्वाता होमनिष्पादकोवा क्रतुवित् कर्मवित् यजिष्ठः देवानामतिशयेन यष्टा अग्निः तत् तेन कर्मणा क्रतुशः क्रतावृतौ स्वेस्वे यागयोग्ये काले देवान् यजाति यजतु हविर्भिः पूजयतु ॥५॥

५. मनुष्य दुर्बल हैं—उनका मन विशिष्ट ज्ञान से शून्य है। वे जिस यज्ञ-कर्म को नहीं जानते, उसको जाननेवाले, होम-निष्पादक और अतिशय याज्ञिक अग्नि उस कर्म से यज्ञकालों में देव-यजन करें।

विश्वेषांह्यध्वराणामनीकंचित्रंकेतुंजनितात्वाजजान।
सआयजस्वनृवतीरनुक्षाःस्पार्हाइषःक्षुमतीर्विश्वजन्याः ॥ ६ ॥

विश्वेषाम्। हि। अध्वराणाम्। अनीकम्। चित्रम्। केतुम्। जनिता। त्वा। जजान। सः। आ। यजस्व। नृऽवतीः। अनु। क्षाः। स्पार्हाः। इषः। क्षुऽमतीः। विश्वऽजन्याः ॥ ६ ॥

हे अग्ने विश्वेषां सर्वेषां अध्वराणां यज्ञानां अनीकं मुखं प्रधानं चित्रं चायनीयं नानारूपं केतुं प्रज्ञापकं त्वा त्वां जनिता जनयिता प्रजापतिर्यजमानोवा जजान जनयामास। उत्पादितः सन्नं नृवतीः दासादियुक्ताः क्षाः पृथिवीनामैतत् क्षयंत्यत्रेति क्षा भूमिः अन्वायजस्व अनुप्रयच्छ। यद्वा नृवतीः नृभिः संस्कृतानि क्षां अनु पृथिवीं वेदिलक्षणां अनुगतानि वेद्यामासादितानि स्पार्हाः स्पृहणीयानि क्षुमतीः स्तुतिमंत्रलक्षणशब्दवन्ति विश्वजन्याः सर्वजनहितानि वृष्ट्यन्नहेतुत्वात्। तानि इषोन्नानि हविर्लक्षणानि आयजस्व देवेभ्यः प्रयच्छ ॥ ६ ॥

६. अग्नि सारे यज्ञों के प्रधान चित्र और पताका-स्वरूप तुम्हें ब्रह्मा ने उत्पन्न किया। तुम दासादि से युक्त भूमि दो। स्पृहणीय, स्तुति मन्त्रादि से युक्त और सर्वहितैषी अन्न देवों को दो।

अथ सप्तमी—

यंत्वाद्यावापृथिवीयंत्वापस्त्वष्टायंत्वासुजनिमाजजान।
पन्थामनुप्रविद्वान्पितृयाणंद्युमदग्नेसमिधानोविभाहि ॥७॥३०॥

यम्। त्वा। द्यावापृथिवी इति। यम्। त्वा। आपः। त्वष्टा। यम्। त्वा। सुऽजनिमा। जजान। पन्थाम्। अनु। प्रऽविद्वान्। पितृऽयानम्। द्युऽमत्। अग्ने। सम्ऽइधानः। वि। भाहि ॥७॥३०॥

हे अग्ने यं त्वा त्वां द्यावापृथिवी जनितवत्यौ आदित्यात्मना अध्यात्मना च तथायं त्वां आपः मेघोदरगताः विद्युदात्मना स्थितं जनितवत्यः यद्वा आपइत्यन्तरिक्षनाम द्यावापृथिवी अन्तरिक्षंच इमे त्रयोलोकाः यंत्वामजीजनन्। किंच सुजनिमाशोभनजननः त्वष्टा प्रजापतिः यं त्वां जजान जनयामास हे अग्ने पितृयानं पितरोयेन मार्गेण गच्छन्ति तं पंथां हविर्वहनमार्गं अनुप्रविद्वान् प्रजानंस्त्वं समिधानः समिध्यमानः सन् द्युमत् दीप्तियुक्तं यथा भवति तथा विभाहि विशेषेण दीप्यसे ॥ ७ ॥

७. अग्नि द्यावापृथिवी, अन्तरिक्ष—इन तीन लोकों ने तुम्हें पैदा किया—शोभनजन्मा प्रजापति ने तुम्हें पैदा किया। अग्नि, तुम पितृमार्ग के जानकार और समिध्यमान हो। दीप्तियुक्त होकर विराजते हो।

॥ इति सप्तमस्य पंचमे त्रिंशोवर्गः ॥ ३० ॥

इनइति सप्तर्चं तृतीयं सूक्तं कण्वाद्याः पूर्ववत् इनइत्यनुक्रान्तं प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

इनोराजन्नरतिःसमिद्धोरौद्रोदक्षायसुषुमाँअदर्शि।
चिकिद्विभातिभासाबृहतासिक्नीमेतिरुशतीमपाजन् ॥ १ ॥

इनः। राजन्। अरतिः। सम्ऽइद्धः। रौद्रः। दक्षाय। सुषुऽमान्। अदर्शि। चिकित्। वि। भाति। भासा। बृहता। असिक्नीम्। एति। रुशतीम्। अपऽअजन् ॥ १ ॥

हे राजन् दीप्यमानाग्ने त्वं इनः ईश्वरः सर्वस्य भवसि। अथपरोक्षः अरतिः हविरादाय देवान् प्रति गन्ता समिद्धः संदीप्तः रौद्रः शत्रूणां भयंकरः सुषुमान् ओषध्यात्मनास्थितोंशुः सुषुसूयते इतिसुषुः सोमः तेन तद्वान् शोभनप्रसवोवा सोमिः दक्षाय यजमानानां धनादिवृध्यर्थं वा अदर्शि सर्वैर्दृश्यते। किंच चिकित् सर्वं जानानोग्निर्विभाति विशेषेण दीप्यते तथा बृहता महता भासा तेजसा ज्वालालक्षणेन असिक्नीं रात्रिं एति सायं होमसिध्यर्थमेति गच्छति। किं कुर्वन् रुशतीं श्वेतवर्णां दीप्तिं अपाजन् अपगमयन् रात्रिं गच्छति सामर्थ्यात् रात्रिं परित्यजन् उषसं प्रातर्होमसिध्यर्थं गच्छतीत्यर्थोलभ्यते ॥ १ ॥

१. दीप्त अग्नि, तुम सबके स्वामी हो। हवि लेकर देवों के पास जानेवाले, संदीप्त, शत्रुओं के लिए भयंकर, वनस्पतियों में स्थित और शोभन प्रसववाले अग्नि, यजमानों की धन-वृद्धि के लिए सबके द्वारा देखे जाते हैं। सर्वज्ञ अग्नि विभासित होते हैं। महान् तेज के द्वारा सायंकाल, श्वेतवर्ण दीप्ति से अन्धकार दूर करके, जाते हैं।

कृष्णांयदेनींमभिवर्पसाभूज्जनयन्योषांबृहतःपितुर्जाम्।
ऊर्ध्वंभानुंसूर्यस्यस्तभायन्दिवोवसुभिररतिर्विभाति ॥ २ ॥

कृष्णाम् । यत् । एनीम् । अभि । वर्पसा । भूत् । जनयन् । योषाम् ।
बृहतः । पितुः । जाम् । ऊर्ध्वम् । भानुम् । सूर्यस्य । स्तभायन् ।
दिवः । वसुऽभिः । अरतिः । वि । भाति ॥ २ ॥

सोऽग्निर्यद्या कृष्णां कृष्णवर्णां एनीं गच्छन्तीं रात्रिं वर्पसा आत्मीयेन ज्वालालक्षणेन रूपेण अभिभूत अभिभवति । किंकुर्वन् बृहतोमहतः पितुः सर्वस्य जगतः पालयितुः पितृभूताद्वा आदित्यात् जां जायमानां योषां उषसं जनयन् अभिव्यंजयन् रात्रिमभ्यभूत् तदानीमरतिः गमनशीलोऽग्निः दिवोद्युलोकस्य वसुभिः वासयितृभिः आच्छादकैः संधुक्षणसमर्थैरात्मीयैः तेजोभिः सूर्यस्य भानुं दीप्तिं ऊर्ध्वमुपरिष्टात् स्तभायन् स्तंभयन् विभाति विशेषेण दीप्यते ॥ २ ॥ पितृरूप आदित्य से उत्पन्न उषा को प्रकट करते हुए अग्नि कृष्णवर्ण रात्रि को अपने तेज से अभिभूत करते हैं। गमनशील अग्नि द्युलोक के निवासदाता अपने तेज से सूर्य की दीप्ति को ऊपर रोककर शोभा पाते हैं। २.

अथ तृतीया—

भद्रोभद्रयासचमानआगात्स्वसारंजारोअभ्येतिपश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभिराममस्थात् ॥ ३ ॥

भद्रः । भद्रया । सचमानः । आ । अगात् । स्वसारम् । जारः । अभि ।
एति । पश्चात् । सुऽप्रकेतैः । द्युऽभिः । अग्निः । विऽतिष्ठन् ।
रुशत्ऽभिः । वर्णैः । अभि । रामम् । अस्थात् ॥ ३ ॥

भद्रोभजनीयः कल्याणः भद्रया भजनीयया दीप्त्या उषसावा सचमानः सेव्यमानः संगच्छमानोवाग्निः आगात् आजगाम गार्हपत्यादाहवनीयमागच्छति । ततः पश्चात् जारोजरयिता शत्रूणां सोऽग्निः स्वसारं स्वयंसारिणीं भगिनींवा आगतामुषसं अभ्येति अभिगच्छति । तथा सुप्रकेतैः सुप्रज्ञानैः द्युभिर्दीप्तैस्तेजोभिः सह वितिष्ठन् सर्वतोवर्तमानः सोऽग्निः रुशद्भिः श्वेतवर्णैः वर्णैः वारकैरात्मीयैस्तेजोभिः रामं कृष्णवर्णं शार्वरं तमः अभ्यस्थात् सायं होमकाले अभिभूय तिष्ठति ॥ ३ ॥

३. कल्याणरूप और भजनीय उषा के द्वारा सेव्यमान अग्नि आये। शत्रुओं के घातक अग्नि अपनी भगिनी उषा के पास जाते हैं। सुन्दर ज्ञान और दीप्त तेज के साथ वर्त्तमान अग्नि श्वेतवर्ण के अपने निवारक तेज के द्वारा कृष्णवर्ण अन्धकार को दूर कर रहते हैं।

अस्ययामासोबृहतोनवग्वानिन्धानाअग्नेःसख्युःशिवस्य ।
ईड्यस्यवृष्णोबृहतःस्वासोभामासोयामन्नक्तवश्चिकित्रे ॥ ४ ॥

अस्य । यामासः । बृहतः । न । वग्नून् । इन्धानाः । अग्नेः ।
सख्युः । शिवस्य । ईड्यस्य । वृष्णः । बृहतः । सुऽआसः ।
भामासः । यामन् । अक्तवः । चिकित्रे ॥ ४ ॥

बृहतोमहतोस्याग्नेः संबन्धिनइन्धानाः दीप्यमानायामासः यान्ति गच्छन्तीति यामारश्मयः वग्नून् स्तुतिकारिणोजनान् नबाधन्ते । किंच सख्युः स्तुत्यस्तोतृयष्टृयष्टव्यलक्षणेन सख्येन सखिभूतस्य शिवस्य कल्याणस्य भक्तानां सुखकरस्य ईड्यस्य स्तोतव्यस्य वृष्णः कामानां वर्षितुः बृहतोमहतः स्वासः शोभनास्याः अस्याग्नेः स्वभूताअक्तवः तमांसि अंजन्तः अपगमयन्तः आहुतिभिः संगतावा भामासः भामक्रोधे तीक्ष्णा अप्रसह्या रश्मयोयामन् याति देवान् प्रति तर्पणाय यांति देवाएतं प्रत्यंगभावायेति यामोयज्ञः तस्मिन् चिकित्रे सर्वतोजज्ञिरे प्रथिताअभूवन् ॥ ४ ॥

४. महान् अग्नि की दीप्त किरणें जा रही हैं। ये किरणें स्तोताओं को नहीं बाधा देतीं। मित्र, कल्याणरूप, भक्तों के सुखकर, स्तुत्य, कामवर्षक, महान् और शोभनमुख अग्नि की किरणें अन्धकार को नष्ट करते और तीक्ष्ण होकर, तर्पण के लिए देवों के पास जाती और प्रसिद्ध होती हैं।

स्वनानयस्यभामासःपवन्तेरोचमानस्यबृहतःसुदिवः ।
ज्येष्ठेभिर्यस्तेजिष्ठैःक्रीळुमद्भिर्वर्षिष्ठेभिर्भानुभिर्नक्षतिद्याम् ॥५॥

स्वनाः । न । यस्य । भामासः । पवन्ते । रोचमानस्य । बृहतः ।
सुऽदिवः । ज्येष्ठेभिः । यः । तेजिष्ठैः । क्रीळुमत्ऽभिः ।
वर्षिष्ठेभिः । भानुऽभिः । नक्षति । द्याम् ॥ ५ ॥

रोचमानस्य दीप्यमानस्य बृहतोमहतः सुदिवः शोभनदीप्तेर्वा यस्याग्नेः स्वभूताभामासः भादीप्ती दीप्तारश्मयः स्वनान स्वनन्तोमरुतइव पवन्ते सर्वतः शब्दंकुर्वंतोगच्छन्ति। किंच योभिः ज्येष्ठेभिः अत्यंतं प्रशस्तैः तेजिष्ठैः तेजस्वितमैः क्रीळुमद्भिः क्रीडनवद्भिः वर्षिष्ठेभिर्वृद्धतमैः भानुमद्भिः आत्मीयैस्तेजोभिः द्यां द्युलोकं नक्षति व्यामोतीति । सत्यं देवानावहेति उत्तरेण संबन्धः ॥ ५ ॥

५. दीप्यमान, महान् और शोभन-दीप्ति अग्नि की किरणें, शब्द करते हुए जाती हैं। अग्नि अतीव प्रशस्त, तेजस्वितम, क्रीड़ाकारी और वृद्धतम अपने तेज से द्युलोक को व्याप्त करते हैं।

अस्यशुष्मासोददृशानपवेर्जेहमानस्यस्वनयन्नियुद्भिः ।
प्रत्नेभिर्योरुशद्भिर्दे :तमोविरेभद्भिररतिर्भातिविभ्वा ॥ ६ ॥

अस्य । शुष्मासः । ददृशानऽपवेः । जेहमानस्य । स्वनयन् ।
नियुत्ऽभिः । प्रत्नेभिः । यः । रुशत्ऽभिः । देवऽतमः ।
वि । रेभत्ऽभिः । अरतिः । भाति । विऽभ्वा ॥ ६ ॥

ददृशानपवेः दर्शनीयज्वालाग्नेः यद्वा पविर्वज्रआयुधं दृश्यमानायुधस्य जेहमानस्य जेहतिर्गतिकर्मा हविरादाय देवान् प्रति गच्छतः अस्याग्नेः स्वभूताः शुष्मासः शोषकाः नियुद्भिर्नियुतो वायोरिति वायोरश्वानियुतः तद्युक्तैर्वायुभिः संयुक्तारश्मयः स्वनयन् शब्दायन्ते । किंच देवतमः देवानां मुख्यः अरतिः गन्ता विभ्वा विभवनशीलोमहान् योग्निः प्रत्नेभिः पुराणैः रुशद्भिः श्वेतवर्णैः रेभद्भिः शब्दायमानैस्तेजोभिः विभाति विविधं दीप्यते ॥ ६ ॥

६. दृश्यमान आयुधवाले और देवों के प्रति गमन करनेवाले अग्नि की शोषक और वायुयुक्त किरणें शब्द कर रही हैं। देवों में मुख्य, गन्ता, व्यापक और महान् अग्नि प्राचीन, श्वेतवर्ण और शब्दायमान तेज के द्वारा प्रदीप्त होते हैं। अथ सप्तमी—

सआवक्षिमहिनआचसत्सिदिवस्पृथिव्योरंरतिर्युवत्योः ।
अग्निःसुतुकःसुतुकेभिरश्वैरभस्वद्भीरभस्वाँइहगम्याः ॥ ७ ॥३१॥

सः । आ । वक्षि । महि । नः । आ । च । सत्सि । दिवःपृथिव्योः ।
अरतिः । युवत्योः । अग्निः । सुऽतुकः । सुऽतुकेभिः । अश्वैः ।
रभस्वत्ऽभिः । रभस्वान् । आ । इह । गम्याः ॥ ७ ॥ ३१ ॥

हे अग्ने सतादृशस्त्वं नोस्मदीये यज्ञे महि महान् देवान् आवक्षि आवह प्रापय । किंच युवत्योः परस्परं मिश्रितयोः तरुण्योर्वा दिवस्पृथिव्योर्द्यावापृथिव्योर्मध्ये अरतिः अग्निः सूर्यात्मनागन्ता त्वं आसत्सि अस्माकं यज्ञमासीद। तथा सुतुकः तुकिर्गत्यर्थः सुगमः स्तोतृभिर्यष्टृभिश्च सुखेन प्राप्तव्यः रभस्वान् वेगवान् अग्निः अंगनादिगुणयुक्तस्त्वं सुतुकेभिः सुगमैः रभस्वद्भिर्वेगवद्भिरश्वैरोहिदाख्यैः सह इहास्मदीये यज्ञे आगम्याः आगच्छ ॥ ७ ॥

७. अग्नि, हमारे यज्ञ में महान् देवों को ले आओ। परस्पर-मिलित द्यावापृथिवी के बीच में सूर्यरूप से आनेवाले अग्नि, हमारे यज्ञ में बैठो। स्तोताओं के द्वारा सरलता से पाने योग्य और वेगवान् अग्नि, शब्दायमान और वेगवान् घोड़ों के साथ हमारे यज्ञ में पधारो।

॥ इति सप्तमस्य पंचमे एकत्रिंशोवर्गः ॥ ३१ ॥

प्रवइति सप्तर्चं चतुर्थं सूक्तं ऋष्याद्याः पूर्ववत् । प्रवइत्यनुक्रान्तं । मातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

प्रतेयक्षिप्रतंइयर्मिमन्मभुवोयथावन्द्योनोहवेषु ।
धन्वन्निवप्रपाअसित्वमग्नइयक्षवेपूरवेप्रत्नराजन् ॥ १ ॥

प्र । ते । यक्षि । प्र । ते । इयर्मि । मन्म । भुवः । यथा । वन्द्यः ।
नः । हवेषु । धन्वन्ऽइव । प्रऽपा । असि । त्वम् । अग्ने ।
इयक्षवे । पूरवे । प्रत्न । राजन् ॥ १ ॥

हे अग्ने ते तुभ्यं हविः प्रयक्षि प्रयच्छामि यजिर्दानार्थः । तथा मन्म मननीयां स्तुतिं ते त्वदर्थं प्रेयर्मि प्रेरयामि । प्रोच्चारयामि वंद्यः सर्वैर्वंदनीयस्त्वं नोस्मदीयेषु हवेषु देवाह्वानेषु यथा त्वं सन्निहितोभुवोभवसि तथा हविः प्रयच्छामि स्तौमिच । हे प्रत्न पुराण राजन् सर्वस्य जगतः स्वामिन् हे अग्ने सत्यं इयक्षवे यष्टुमिच्छवे पूरवे पूरुरिति मनुष्यनाम मनुष्याय यजमानाय यद्वा पूरवे हविर्भिर्देवान् पूरयित्रे जनाय धन्वन् इव प्रपाअसि यथा । धन्वन् धन्वनि मरौ निरुदकप्रदेशे प्रपा प्रपिबंत्यत्रेति प्रपा सा यथा उदकप्रदानेन जनेभ्यः सुखदाभवति एवं त्वं धनदानेन तस्मै सुखदाता भवसि ॥ १ ॥

१. अग्नि, तुम्हारे लिए मैं हवि देता हूँ। तुम्हारे लिए मननीय स्तुति उच्चारित करता हूँ। तुम सबके वन्दनीय हो। हमारे देवाह्वान में तुम आते हो; इसलिए तुम्हें मैं हवि देता हूँ और स्तुति करता हूँ। प्राचीन राजा अग्नि, सारे संसार के स्वामी अग्नि, तुम यज्ञाभिलाषी मनुष्य के लिए वैसे ही धन दान करके सुखदाता हो, जैसे मरुस्थल में जलदाता तलैया सुखद है। अथ द्वितीया—

यंत्वाजनासोअभिसंचरंन्तिगावउष्णमिवव्रजंयविष्ठ ।
दूतोदेवानामसिमर्त्यानामन्तर्महाँश्चरसिरोचनेन ॥ २ ॥

यम् । त्वा । जनासः । अभि । सम्ऽचरन्ति । गावः ।
उष्णम्ऽइव । व्रजम् । यविष्ठ । दूतः । देवानाम् । असि ।
मर्त्यानाम् । अन्तः । महान् । चरसि । रोचनेन ॥ २ ॥

हे यविष्ठ युवतमाग्ने यं त्वा त्वां जनासोजनाः यजमानाः फलप्राप्त्यर्थं अभिसंचरन्ति अभितः परिचरन्ति सेवन्ते । तत्र दृष्टान्तः—गावउष्णमिव यथागावः शीतार्ताउष्णं शीतजनितदुःखापनोदनार्थं उष्णं व्रजं गोष्ठमभिगच्छंति । सत्यं देवानामिन्द्रादीनां मर्त्यानां मनुष्याणां च दूतोसि हविः प्रापणद्वारा । तवोमहांस्त्वं अन्तः द्यावापृथिव्योर्मध्ये हवींष्यादाय रोचनेनांतरिक्षेण लोकेन चरसि गच्छसि तं त्वां स्तुमइतिशेषः ॥ २ ॥

२. तरुणतम अग्नि, जैसे शीत से आर्त्त गायें उष्ण गोष्ठ को जाती हैं, वैसे ही फलप्राप्ति के लिए यजमान तुम्हारी सेवा करते हैं। तुम देवों

और मानवों के दूत हो। महान्, तुम द्यावापृथिवी के बीच में हवि लेकर अन्तरिक्ष लोक में संचरण करते हो।

शिशुंनत्वाजेन्यंवर्धयन्तीमाताबिभर्तिसचनस्यमाना।
धनोरधिप्रवतायासिहर्यञ्जिगीषसेपशुरिवावसृष्टः ॥ ३ ॥

शिशुम्। न। त्वा। जेन्यम्। वर्धयन्ती। माता। बिभर्ति।
सचनस्यमाना। धनोः। अधि। प्रऽवता। यासि।
हर्यन्। जिगीषसे। पशुःऽइव। अवऽसृष्टः ॥ ३ ॥

हे अग्ने जेन्यं जयशीलं त्वा त्वां शिशुं न पुत्रमिव वर्धयन्ती पोषयन्ती माता पृथिवी सचनस्यमाना संपर्कमिच्छन्ती सती बिभर्ति धारयति। सत्वं हर्यन् कामयमानः तस्मिन् लोके धनोरधि अधिःसप्तम्यर्थद्योतकः धनोः अन्तरिक्षात् प्रवता प्रवणेन मार्गेण यासि यज्ञं प्रत्यागच्छसि। किंच त्वं अवसृष्टो यष्टृभिः हविरादाय जिगीषसे देवान् प्रतिगन्तुमिच्छसि। कथमिव पशुरिव यथा विमुक्तः पशुः गोष्ठं प्रत्यागच्छति तद्वत् ॥ ३ ॥

३. अग्नि, पुत्र के समान जयशील तुम्हें माता पृथिवी, पोषण करके और सम्पर्क की इच्छा करके, धारण करती है। अभिलाषी तुम अन्तरिक्ष के प्रशस्त मार्ग से यज्ञ में जाते हो। याज्ञिकों से हवि लेकर तुम देवों के पास जाने की इच्छा वैसे ही करते हो, जैसे विमुक्त पशु गोष्ठ में जाने की इच्छा करता है। अथ चतुर्थी—

मूराअमूरनवयंचिकित्वोमहित्वमग्नेत्वमङ्गवित्से।
शयेवव्रिश्चरतिजिह्वयादन्नेरिह्यतेयुवतिंविश्पतिःसन् ॥ ४ ॥

मूराः। अमूर। न। वयम्। चिकित्वः। महिऽत्वम्। अग्ने।
त्वम्। अङ्ग। वित्से। शये। वव्रिः। चरति। जिह्वया।
अदन्। रेरिह्यते। युवतिम्। विश्पतिः। सन् ॥ ४ ॥

हे अमूर अमूढ अतएव चिकित्वः चेतनावन् हे अग्ने मूरामूढावयं तव माहात्म्यं नजानीमः। किंतु हे अग्ने त्वमंग अंगेतिनिपातएवार्थे त्वमेव तव महित्वं माहात्म्यं वित्से जानासि त्वत्तः कोन्योवेदितुमर्हति। किंच वव्रिः जीर्णओषधीसंगः शये शेते तिष्ठति। यद्वा वव्रिरिति रूपनाम सामर्थ्याच्चान्तर्णीतमत्वर्थं द्रष्टव्यं आहवनीयाख्येन रूपेण रूपवान् शये चरति। अथ जिह्वया जिह्वाज्वालाख्यया अदन् हवींषि भक्षयन् चरति वाक्यभेदादनिघातः। किंच विश्पतिः विशां स्वामीसन्नग्निर्युवतिं आत्मनोमिश्रयित्रीमाहुतिं दीर्घप्रसृतया ज्वालया जिह्वया

रेरिह्यते अत्यर्थं लेढि आस्वादयति । लिह आस्वादने यङि रूपं । यद्वा सोऽग्निर्युवतिं तरुणीं जीर्णौषधिकां पृथिवीं आस्वादयति ॥ ४ ॥

४. मूढ़ताशून्य और चेतनावान् अग्नि, हम मूर्ख हैं; इसलिए तुम्हारी महिमा को नहीं जानते। अग्नि, अपनी महिमा तुम्हीं जानते हो। अग्नि वनस्पति के साथ रहते हैं। अपनी जिह्वा के द्वारा हविर्भक्षण करते हुए अग्नि चरते हैं। अग्नि प्रजावर्ग के अधिपति होकर आहुति का आस्वादन करते हैं। अथ पंचमी—

कूचिज्जायतेसनयासुनव्योवनेतस्थौपलितोधूमकेतुः ।
अस्नातापोवृषभोनप्रवेतिसचेतसोयंमणयन्तमर्ताः ॥ ५ ॥

कूऽचित् । जायते । सनयासु । नव्यः । वने । तस्थौ ।
पलितः । धूमऽकेतुः । अस्नाता । आपः । वृषभः । न । प्र ।
वेति । सऽचेतसः । यम् । मऽनयन्त । मर्ताः ॥ ५ ॥

नव्योनवतरः स्तुत्योवाग्निः कूचिद् क्वचिद् प्रदेशे जायते कुत्र सनयासु पुराणीषु जीर्णास्वोषधीषु अरण्योः तथा पलितः पालपिताश्वेतवर्णोधूमकेतुः धूमप्रज्ञानोग्निः वने सर्वस्मिन्नरण्ये तस्थौ तिष्ठति । यद्वा वने उदके मेघगते विद्युदात्मना तिष्ठतिच अस्नाता स्नानमकुर्वन् अनपेक्षितस्नानः सर्वदा शुद्धः सोग्निः आपः सुब्व्यत्ययः अपउदकानि शात्यर्थं प्रवेति प्रगच्छति । तत्र दृष्टान्तः—वृषभोन यथावृषभः तृष्णोपशमनार्थमरण्यमध्यस्थान्युदकानि प्रगच्छति तद्वत् मर्ता मनुष्याऋत्विजः सचेतसः समानमनस्काः समानप्रज्ञानाः सन्तः यमग्निं मणयन्त हविर्भिः प्रीणयन्ति ॥ ५ ॥

५. नवीन अग्नि कहीं उत्पन्न होते हैं—वे पुराने वनस्पतियों के ऊपर रहते हैं। पालक, धूमकेतु और श्वेतवर्ण अग्नि विपिन में निवास करते हैं। स्नान के बिना शुद्ध अग्नि, प्यासे वृषभ के समान, अरण्य के जल के पास जाते हैं। मनुष्य लोग, समान-मना होकर, अग्नि को प्रसन्न करते हैं।

तनूत्यजेवतस्करावनर्गूरशनाभिर्दशभिरभ्यधीताम् ।
इयंतेअग्नेनव्यसीमनीषायुक्ष्वारथंनशुचयद्भिरद्भिः ॥ ६ ॥

तनूत्यजाऽइव । तस्करा । वनर्गू इति । रशनाभिः । दशऽभिः । अभि ।
अधीताम् । इयम् । ते । अग्ने । नव्यसी । मनीषा । युक्ष्व ।
रथम् । न । शुचयत्ऽभिः । अद्भिः ॥ ६ ॥

---

१ नि० ३. १४. ।

हे अग्ने वनर्गू वनगामिनौ तनूत्यजेव चौर्यं मर्तुं कृतनिश्चयो धृष्टौ तस्करा तस्करौ यथा पथिकं मोषणार्थं रज्ज्वा बध्वाकृष्यच क्वचित् प्रदेशे स्थापयतः तद्वत् । तथायास्कः—तनूत्यक्ततनूत्यक्तावनर्गूवनगामिनावग्निमंथनौबाहूतस्कराभ्यामुपमिमीतेइत्यादि । दशनाभिः दशभिरंगुलिभिः कृत्वा रज्जुभिः अभ्यधीतां अभ्यधायि । अधीतां दधातेर्लुङि सिचोलुकि छन्दस्युभयथेति तसआर्धधातुकत्वेन ङित्वाद्धुमास्थेतीकारः । ततः हे अग्ने ते त्वदर्थं नव्यसी नवतरा इयं मनीषा स्तुतिः मया क्रियते एतत् ज्ञात्वा शुचयद्भिः सर्वं प्रकाशयद्भिः आत्मीयैरंगैस्तेजोभि आत्मानं मदीयं यज्ञं प्रति युक्ष्व योजय । कथमिव रथंन यथारथमश्वैः संयोजयंति तद्वत् ॥ ६ ॥ अग्नि, जैसे वनगामी और धृष्ट दो चोर वन में पथिक को रज्जु से बांधकर खींचते हैं, वैसे ही, हमारे दोनों हाथ, दसों अंगुलियों से, यज्ञकाष्ठ से अग्नि को मथते हैं। तुम्हारे लिए मैं यह नई स्तुति करता हूँ। इसे जानकर सबका प्रकाश करनेवाले अपने तेज से अपने को यज्ञ में वैसे ही योजित करो, जैसे अश्वों से रथ को योजित किया जाता है। ६.

उखासंभरणीयेष्टौभिर्ब्रह्मण्वतीयाज्या ब्रह्मचतइत्येषा । सूत्रितंच—ब्रह्मचतेजातवेदोनमश्चपुरूण्यग्नेपुरुधात्वायेति ।

ब्रह्मचतेजातवेदोनमश्चेयंचगीःसदमिद्वर्धनीभूत् ।
रक्षाणोअग्नेतनयानितोकारक्षोतनस्तन्वोऽअप्रयुच्छन्॥७॥३२॥

ब्रह्म । च । ते । जातऽवेदः । नमः । च । इयम् । च । गीः ।
सदम् । इत् । वर्धनी । भूत् । रक्ष । नः । अग्ने । तनयानि ।
तोका । रक्ष । उत । नः । तन्वः । अप्रऽयुच्छन् ॥ ७ ॥ ३२ ॥

हे जातवेदः जातप्रज्ञाग्ने ते त्वदर्थं ब्रह्मास्माभिर्दीयमानं हवीरूपमद्भुतमन्नं वर्धनीभूत् भवतु । तथा नमोनमस्कारश्च । किंच इयमिदानींक्रियमाणा एषा स्तुतिः सदमिव सदैव वर्धयित्री भूत् भवतु । तस्मात् हे अग्ने नोस्माकं तनयानि पुत्रान् तोकापौत्रांश्च रक्ष पालय । उतापिच अप्रयुच्छन् अप्रमाद्यंस्त्वं नोस्माकं तन्वोंगानि रक्ष ॥ ७ ॥

७. ज्ञानी अग्नि, तुम्हारे लिए हमने यह यज्ञीय द्रव्य दिया और नमस्कार भी किया। यह स्तुति सदा वर्द्धमाना हो। अग्नि, हमारे पुत्र-पौत्रों की रक्षा करो। सावधान होकर हमारे अङ्गों की रक्षा करो। ॥ इति सप्तमस्य पञ्चमे द्वात्रिंशोवर्गः ॥ ३२ ॥

एकःसमुद्रइति सप्तर्चं पञ्चमं सूक्तं ऋष्याद्याः पूर्ववत् विनियोगश्च एकइत्यनुक्रान्तं ।

एकःसमुद्रोधरुणोरयीणामस्मद्ध्रुदोभूरिजन्माविचष्टे ।
सिषक्त्यूर्धर्निण्योरुपस्थउत्संस्यमध्येनिहितंपदंवेः ॥ १ ॥

एकः । समुद्रः । धरुणः । रयीणाम् । अस्मत् । ह्रदः ।
भूरिऽजन्मा । वि । चष्टे । सिसक्ति । ऊर्धः । निण्योः । उपऽस्थे ।
उत्सस्य । मध्ये । निऽहितम् । पदम् । वेरिति वेः ॥ १ ॥

समुद्रः यस्माद्वनान्युदकानि समुद्रवन्तीति तादृशः रयीणां धनानां धरुणोधारयिता एकः असहायः भूरिजन्मा बहुविधजननः नानायज्ञेष्वाहवनीयादिभावेन बहुजननः सोऽग्निः अस्मत् सुपांसुलुगिति षष्ठ्याल्लुक् अस्माकं ह्रदोहृदयान्यभिलषितानि विचष्टे विपश्यति जानाति । उक्तंच—मनोवैदेवामनुष्यस्यजानन्तीति। किंच निण्योः अन्तर्हितनामैतत् अन्तर्हितयोर्ज्योतिस्तमोभ्यामाच्छादितयोः प्रातःसायंकालयोः उपस्थे उपस्थाने समीपे वर्तमानमूर्धोरात्रिं सिषक्ति सेवते उपजीवति। यद्वा निण्योः अन्तर्हितस्यान्तरिक्षस्य समीपे वर्तमानमूर्धोमेघं सेवते। अथ प्रत्यक्षः हे अग्ने उत्सस्य उदकधारकस्य लोकस्य मध्ये पदमपां स्थानं निहितं तन्माध्यमिकां वाचं वेः गच्छ । यद्वा उत्सस्य मेघस्य मध्ये निहितं पदं विद्युदाख्यं तत् स्वात्मतया गच्छ । वेः वीगत्यादिषु लङि सिपि रूपं वाक्यभेदादनिघातः ॥ १ ॥

१. अद्वितीय, समुद्रवत् आधार-स्वरूप, धनों के धारक और अनेक प्रकार के जन्मवाले अग्नि हमारे अभिलषित हृदयों को जानते हैं। अग्नि अन्तरिक्ष के पास वर्त्तमान होकर मेघ का सेवन करते हैं। अग्नि मेघ में वर्त्तमान विद्युत् के पास जाओ।

अथ द्वितीया—

समानंनीळंवृषणोवसानाःसंजग्मिरेमहिषाअर्वतीभिः ।
ऋतस्यपदंकवयोनिपान्तिगुहानामानिदधिरेपराणि ॥ २ ॥

समानम् । नीळम् । वृषणम् । वसानाः । सम् । जग्मिरे ।
महिषाः । अर्वतीभिः । ऋतस्य । पदम् । कवयः । नि ।
पान्ति । गुहा । नामानि । दधिरे । पराणि ॥ २ ॥

वृषणः आहुतीनां सेक्तारः समानमेकं नीळंस्थानमग्निं वसानाः मंत्रतआच्छादयन्तोमहिषामहान्तोयजमानाः अर्वतीभिर्वडवाभिः संजग्मिरे समगच्छन्त । अश्ववन्तोभूवन् यद्वा अग्निमेव आत्मीययज्ञं प्रत्यागन्तुं रोहिदाख्याभिर्वडवाभिः संयोजितवन्तः तथा कवयोमेधाविनः ऋतस्योदकस्य पदमावासस्थानमग्निं निपान्ति नितरां रक्षन्ति हविर्भिः स्तुतिभिश्चाराधयंतीत्यर्थः । ततोगुहा गुहायामन्तरिक्षे स्थितानि पराणि दिव्यानि नामानि उदकानि दधिरे धारय-

न्ति। यद्वा गुहा गूढे संवृते हृदये पराणि प्रधानानि अग्निर्जातवेदावैश्वानरइत्यादीनि नामानि दधिरे कुर्वन्ति स्तुवन्तीत्यर्थः ॥ २ ॥

२. आहुतियों के सेवक यजमान समान रूप से नील अग्नि को मन्त्र से आच्छादित करते हुए बड़वाओं (घोड़ियों) वाले हुए। मेधावी लोग जल के वासस्थान अग्नि की रक्षा करते हैं—स्तुतियों से आराधना करते हैं। वे गूढ़ हृदय में अग्नि के प्रधान नामों की स्तुति करते हैं।

ऋतायिनीमायिनीसंदधातेमित्वाशिशुंजज्ञतुर्वर्धयन्ती ।
विश्वस्यनाभिंचरतोध्रुवस्यकवेश्चित्तन्तुंमनसावियन्तः ॥ ३ ॥

ऋतयिनीइत्यृतऽयिनी । मायिनी इति । सम् । दधाते इति ।
मित्वा । शिशुम् । जज्ञतुः । वर्धयन्ती इति । विश्वस्य । नाभिम् ।
चरतः । ध्रुवस्य । कवेः । चित् । तन्तुम् । मनसा । विऽयन्तः ॥ ३ ॥

ऋतायिनी ऋतवत्यौ सत्यवत्यौ अतएव मायिनी प्रज्ञावत्यौ कर्मयुक्तेवा द्यावापृथिव्यौ यज्ञसाधनभूते अरणी वा इममग्निं संदधाते सम्यक् धारयतः अग्निसूर्यात्मना केवलाध्यात्मनावा संदधाते। मित्वा कालपरिमाणं कृत्वा यद्वा संपरिच्छिद्यशिशुं शंसनीयं बालमग्निं जज्ञतुः जनयतः वर्धयन्ती वर्धन्त्यौ द्यावापृथिव्यौ लोके यथा परिच्छेदाय पुत्रं पितरौ जनयतः तद्वत्। ततः विश्वस्य सर्वस्य चरतोजंगमस्य ध्रुवस्य स्थावरस्यच जगतोनाभिं नाभिभूतं मध्यं प्रधानभूतं वा कवेर्मेधाविनोग्नेस्तन्तुं तनितारं वैश्वानराख्यमंशुं चित् मनसा वियन्तोविविधं गच्छन्तोमनुष्याः सुखेन युज्यन्ते इतिशेषः तं वयं यजामइतिवा ॥ ३ ॥

३. सत्य और कर्म से युक्त द्यावापृथिवी अग्नि को धारण करते हैं। द्यावापृथिवी काल-परिमाण करके प्रशस्य अग्नि को वैसे ही उत्पन्न करते हैं, जैसे माता-पिता पुत्र को उत्पन्न करते हैं। सारे स्थावर, जङ्गम के नाभिरूप, प्रधान और मेधावी अग्नि के विस्तारक वैश्वानर नामक अग्नि को मन से प्राप्त करते हुए हम यजन करते हैं।

ऋतस्यहिवर्तनयःसुजातमिषोवाजायप्रदिवःसचन्ते ।
अधीवासंरोदसीवावसानेघृतैरन्नैर्वावृधातेमधूनाम् ॥ ४ ॥

ऋतस्य । हि । वर्तनयः । सुऽजातम् । इषः । वाजाय । प्रऽदिवः ।
सचन्ते । अधीवासम् । रोदसी इति । ववसाने इति ।
घृतैः । अन्नैः । ववृधाते इति । मधूनाम् ॥ ४ ॥

ऋतस्य यज्ञस्य वर्तनयः प्रवर्तकाइषअभिलषितानीच्छन्तः प्रदिवः पुरातनाऋत्विग्यजमानाः सुजातमाधानकाले सुष्ठूत्पन्नमग्निं वाजाय बलार्थं अन्नार्थंवा सचन्तेहि सेवन्तेखलु। अपिच वावसाने सर्वस्य जगतआच्छादयित्र्यौ रोदसी द्यावापृथिव्यौ अधीवासं ओषधिनक्षत्रा-

यात्मना निवसन्तं यद्वा अधिरुपर्यर्थं त्रयाणां लोकानामुपरि अग्निविद्युदादित्यात्मनां निवसन्तमग्निं मधूनामुदकानां जन्यत्वेन संबन्धिभिर्घृतैरन्नैः पुरोडाशादिभिश्च वावृधते वर्धयांचक्रुः वर्धयतः तस्माद्वयमपि तमग्निमभिष्टुम इत्यभिप्रायः ॥ ४ ॥

४. यज्ञ के प्रवर्त्तक, कामनाभिलाषी और प्राचीन यजमान भली भांति उत्पन्न अग्नि को, बल के लिए, सेवा करते हैं। सारे संसार के आच्छादक द्यावापृथिवी ने तीनों लोकों में, अग्नि, विद्युत् और सूर्य के रूप से स्थित अग्नि को, मधु, घी, पुरोडाश आदि से, वर्द्धित किया।

सप्तस्वसॄररुषीर्वावशानोविद्वान्मध्वउज्जभारादृशेकम् ।
अन्तर्येमेअन्तरिक्षेपुराजाइच्छन्वव्रिमविदत्पूषणस्य ॥ ५ ॥

सप्त । स्वसॄः । अरुषीः । वावशानः । विद्वान् । मध्वः । उत् । जभार । दृशे । कम् । अन्तः । येमे । अन्तरिक्षे । पुराऽजाः । इच्छन् । वव्रिम् । अविदत् । पूषणस्य ॥ ५ ॥

वावशानः कामयमानः वाश्यमानः वेष्टयमानः स्तोतृभिः स्तूयमानोवा विद्वान् सर्वं जानानः सोमिः अरुषीरारोचमानाः सप्त सप्तसंख्याकाः स्वसृः स्वयंसारिणीः कालीकराळीचेत्यादिकाः सप्तजिह्वाः मध्वोमदकरायज्ञाय उज्जभार उज्जहार ऊर्ध्वं हृतवान् यज्ञे स्वतेजसा प्रादुर्भूतइत्यर्थः। किमर्थं कं सुखेन दृशे सर्वेषामेव पदार्थानां दर्शनार्थं। किंच पुराजाः पुराजातः सोमिः द्यावापृथिव्योरन्तर्मध्ये अन्तरिक्षे तस्मिन् ताजिह्वायेमे नियमितवान् सर्वत्र तेजोयुक्तोवर्तेतेइत्यर्थः। अपिच इच्छन् यजमानान् कामयमानोमिः पूषणस्य पूषेति पृथिवीनाम पार्थिवस्य लोकस्य वव्रिं रूपं पृश्निवर्णं अविदत् प्रायच्छत्। यद्वा मूर्धाभुवोभवतिनक्तमग्निस्ततःसूर्योजायतेप्रातरुदग्निरिति मंत्रान्तरे दर्शनादादित्यात्मनाग्निः स्तूयते। कामयमानः सूर्यात्मनाग्निः सप्त संख्याकान् स्वसृः रश्मीन् मध्वः समुद्रोदकादुद्धृतवान् प्राप्तः अन्तरिक्षे विद्युदात्मना स्थित्वा वृष्टिलक्षणं रूपं पृथिव्याः प्रायच्छति ॥ ५ ॥

५. स्तोताओं के द्वारा स्तुति किये जाते हुए और सबके जानकार अग्नि ने शोभन सात भगिनीरूप शिखाओं को, मदकर यज्ञ से सरलतापूर्वक सारे पदार्थों को देखने के लिए, ऊपर उठाया। प्राचीन समय में उत्पन्न अग्नि ने द्यावापृथिवी के बीच में उन शिखाओं को नियमित किया। यजमानों की इच्छा करनेवाले अग्नि ने पृथिवी को वृष्टि-स्वरूप रूप प्रदान किया।

सप्तमर्यादाःकवयस्ततक्षुस्तासामेकामिदभ्यंहुरोगात् ।
आयोर्हस्कम्भउपमस्यनीळेपथांविसर्गेधरुणेषुतस्थौ ॥ ६ ॥

---

१ ऋ० सं० ८. ४. ११.।

सप्त । मर्यादाः । कवयः । ततक्षुः । तासाम् । एकाम् । इत् ।
अभि । अंहुरः । गात् । आयोः । ह । स्कम्भः । उपऽमस्य ।
नीळे । पथाम् । विऽसर्गे । धरुणेषु । तस्थौ ॥ ६ ॥

कवयोमेधाविनऋषयः सप्तमर्यादाः कामजेभ्यः क्रोधजेभ्यश्चोत्थिताः । पानमक्षाःस्त्रियोमृगया दंडः पारुष्यमन्यदूषणमिति सप्तमर्यादाः । यद्वा स्तेयं गुरुतल्पारोहणं ब्रह्महत्यां सुरापानं दुष्कृतकर्मणः पुनःपुनः सेवां पातकेनृतोद्यमिति[1] निरुक्तेनिर्दिष्टाः । सप्तमर्यादाअवस्थिताः ततक्षुः तक्षतिः करोतिकर्मा सुष्ठु लंघनीयाश्चक्रुः त्यक्तवन्तइत्यर्थः । तासां मर्यादानां एकामिव एकामेव अंहुरः पापवान् पुरुषः अभिगात् अभिगच्छति यस्त्वेवं करोति सपापवान् भवतीत्यर्थः । किंच आयोः तस्य मनुष्यस्य स्कंभः स्कंभयिता निरोधकोग्निः उपमस्य समीपभूतस्य आयोर्नीळे स्थाने पथां आदित्यरूपस्य स्वस्य रश्मीनां विसर्गे विसर्जनस्थानेन्तरिक्षमध्ये वर्तमाने धरुणेषूदकेषु तस्थौ विद्युदात्मना तिष्ठति अनेन लोकत्रयवर्तित्वमिति ॥ ६॥

६. मेधावी लोगों ने सात मर्यादाओं (ब्रह्महत्या, सुरापान, चौर्य, गुरुपत्नीगमन, पुनः पुनः पापाचरण, पाप करके न कहना आदि) को छोड़ दिया है। इनमें से एक का करनेवाला भी पापी है। पाप से मनुष्य को रोकनेवाले अग्नि हैं। अग्नि समीपवर्त्ती मनुष्य के स्थान में आदित्य किरणों के विचरण मार्ग में और जल के बीच में रहते हैं।

अथ सप्तमी—

असच्चसच्चपरमेव्योमन्दक्षस्यजन्मन्नदितेरुपस्थे ।
अग्निर्हनःप्रथमजाऋतस्यपूर्वंआयुंनिवृषभश्चधेनुः ॥ ७ ॥ ३३ ॥

असत् । च । सत् । च । परमे । विऽओमन् । दक्षस्य । जन्मन् ।
अदितेः । उपऽस्थे । अग्निः । ह । नः । प्रथमऽजाः । ऋतस्य ।
पूर्वं । आयुंनि । वृषभः । च । धेनुः ॥ ७ ॥ ३३ ॥

असदव्याकृतं सच्चव्याकृतं असदेवेदमग्रआसीत् तत्सदासीत् तत्समभवदिति श्रुतेः । सदसदात्मकं जगत्सर्वं परमे उत्तमे ज्ञानसहिते व्योमन् व्योमनि कारणात्मनि जातमभूत्तदा अदितेः पृथिव्याउपस्थे उपस्थाने समीपे दक्षस्य प्रजापतेः यद्वा दक्षस्य सर्वेषामात्मानं विभजतादित्यंतृतीयंवायुंतृतीयमितिश्रुतेः । तृतीयस्य द्युलोकस्याधिष्ठातृत्वादादित्यस्य जन्मन् जन्मनि सतएवं सति मनुष्यस्य सृष्टिक्रमात् पूर्वं अग्निर्ह अग्निरेव ऋतस्य कर्मफलस्य भोक्तॄणां नोस्माकं प्रथमजाः

---

१ नि० ६. २७.।

प्रथमजातः समुत्पन्नः तेजोरसोनिरवर्ततामिरितिश्रवणात् । पश्चात्तत्प्रकरणे ततोमनुष्याअजायन्तेति प्रथमतएव मनुष्यसृष्टेरभिहितत्वात् अनन्तरं पूर्वे उत्तरसृष्टिमपेक्ष्य पूर्वत्वं आयुनि काले अयमग्निरेव वृषभश्चासीत् धेनुश्चाभवत् स्त्रीपुंसवत् स्त्रीपुंसात्मकोभवदित्यर्थः ॥ ७ ॥

७. अग्नि सृष्टि के पहले असत् (अव्यक्त) और सृष्टि होने पर सत् हैं, वे परमधाम (कारणात्मा) में हैं। वे आकाश पर सूर्यरूप से जन्मे हैं। अग्नि हमसे पहले उत्पन्न हुए हैं। वे यज्ञ के पहले अवस्थित थे। वे वृषभ भी हैं और गाय भी—स्त्री-पुरुष—दोनों हैं।

॥ इति सप्तमस्य पञ्चमे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसांम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके पंचमोध्यायः ॥ ५ ॥

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत् । निर्ममेतमहंवन्दे विद्यातीर्थमहेश्वरं ॥ १ ॥

सप्तमस्याष्टकस्येत्थं व्याकार्षीत्सायणसुधीः । सायणाह्वस्ततःषष्ठमध्यायंव्याचिकीर्षति ॥ २ ॥

दशमे मंडले प्रथमेनुवाके षोडश सूक्तानि तत्रायंसयस्येति सप्तर्चं षष्ठं सूक्तं आप्त्यस्य त्रितस्यार्षं त्रिष्टुभमाग्नेयं । अयमित्यनुक्रान्तं । प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्र प्रथमा—

ओम् अयंसयस्यशर्मन्नवोभिरग्नेरधतेजरिताभिष्टौ ।
ज्येष्ठेभिर्योभानुभिर्ऋषूणांपर्येतिपरिवीतोविभावा ॥ १ ॥

अयम् । सः । यस्य । शर्मन् । अवःऽभिः । अग्नेः । एधते । जरिता । अभिष्टौ । ज्येष्ठेभिः । यः । भानुऽभिः । ऋषूणाम् । परिऽएति । परिऽवीतः । विभाऽवा ॥ १ ॥

जरिता स्तोता अभिष्टौ यागे कृते यस्याग्नेरवोभिः पालनैः शर्मन् शर्मणि स्वगृहे एधते वर्धते । सोयमग्निर्यागार्थमस्माभिराहूतइतिशेषः । विभावा दीप्तिमान् योग्निःऋषूणां सूर्यरश्मीनां ज्येष्ठेभिः प्रशस्तैः भानुभिस्तेजोभिः परिवीतः परिवृतः पर्येति सर्वतोगच्छति । यत्रयत्र गंतव्यं तत्रतत्राप्रतिहतगतिर्गच्छतीत्यर्थः ॥ १ ॥

१. ये वे ही अग्नि हैं, यज्ञ के समय जिनके रक्षणों से स्तोता अपने गृह में बढ़ता है। दीप्तिमान् अग्नि सूर्य-किरणों से प्रशस्त तेज से युक्त होकर सर्वत्र जाते हैं।

अथ द्वितीया—

योभानुभिर्विभावाविभात्यग्निर्देवेभिर्ऋतावाजस्रः ।
आयोविवायसख्यासखिभ्योपरिह्वृतोअत्योनसप्तिः ॥ २ ॥

यः । भानुऽभिः । विभाऽवा । विऽभाति । अग्निः । देवेभिः । ऋतऽवा । अजस्रः । आ । यः । विवाय । सख्या । सखिऽभ्यः । अपरिऽह्वृतः । अत्यः । न । सप्तिः ॥ २ ॥

क्रतावा सत्यवान् यज्ञवान्वा अजस्रः अनुपक्षीणः अहिंसितोवा केनचिदनभिभूतइत्यर्थः। विभावा दीप्तिमान् योग्निः देवेभिर्देवैर्योतमानैः भानुभिस्तेजोभिर्विभाति विविधंदीप्यते। किंच योग्निः सख्या सख्यानि सखिभिः कर्तव्यानि कर्माणि हविरादीनि कर्तुमितिशेषः सखिभ्यः सखिभूतानां यजमानानामर्थाय अपरिह्वृतः अपरिहिंसितः अपरिश्रान्तइत्यर्थः आविवाय आभिमुख्येन गच्छति। तत्र दृष्टान्तः--सप्तिः सदासर्पणइत्यर्थः अत्योन यथा सततगमनसमर्थोश्वः अपरिश्रान्तोगच्छति तद्वत् सोयमग्निरस्माभिर्यागार्थमाहूतइति पूर्ववद् योज्यं ॥ २ ॥

२. जो दीप्त अग्नि देवों के तेज से दीप्त होते हैं, वे सत्यवान् और अहिंसित हैं। अग्नि मित्र यजमान के लिए मित्रजनोचित कार्य करने के लिए गमनशील घोड़े के समान अथक होकर यजमान के पास जाते हैं।

ईशेयोविश्वस्यादेववीतेरीशेविश्वायुरुषसोव्युष्टौ।
आयस्मिन्मनाहवींष्यग्नावरिष्टरथःस्कभ्नातिशूषैः ॥ ३ ॥

ईशे। यः। विश्वस्याः। देवऽवीतेः। ईशे। विश्वऽआयुः।
उषसः। विऽउष्टौ। आ। यस्मिन्। मना। हवींषि। अग्नौ।
अरिष्टऽरथः। स्कभ्नाति। शूषैः ॥ ३ ॥

योग्निर्विश्वस्य देववीतेः सर्वस्य यज्ञस्य ईशे ईष्टे। अपिच विश्वायुः सर्वत्राप्रतिहतगमनः उषसोव्युष्टौ दिवासने उदयकाले होमार्थं यजमानानामीशे ईष्टे। शूषैः शत्रुबलैः अरिष्टरथः अहिंसितयज्ञरथः सर्वत्र यजमानः यस्मिन्नग्नौ मना मननीयानि हवींषि आस्कभ्नाति आदरेण प्रतियभ्नाति प्रक्षिपति सोयमग्निरस्माभिर्यागार्थमाहूतइत्यर्थः ॥ ३ ॥

३. अग्नि सारे यज्ञ के प्रभु हैं। वे सर्वत्र जानेवाले हैं। उषा के उदयकाल से ही हवन के लिए यजमानों के प्रभु हैं। यजमान अग्नि में मन के अनुकूल हवि फेंकते हैं; इसलिए उनका रथ शत्रु-बल से अवध्य होता है।

अथ चतुर्थी—

शूषेभिर्वृधोजुषाणोअर्कैर्देवाँअच्छारघुपत्वाजिगाति।
मन्द्रोहोतासजुह्वा३यजिष्ठःसंमिश्लोअग्निराजिघर्तिदेवान् ॥४॥

शूषेभिः। वृधः। जुषाणः। अर्कैः। देवान्। अच्छ। रघुऽपत्वा।
जिगाति। मन्द्रः। होता। सः। जुह्वा। यजिष्ठः। सम्ऽमिश्लः।
अग्निः। आ। जिघर्ति। देवान् ॥ ४ ॥

वृधः वर्धितोऽग्निः शूषेभिर्हविर्लक्षणैर्बलैः बलनिमित्तैर्हविर्भिरित्यर्थः अर्कैः स्तोत्रैश्च जुषाणः सेव्यमानः सन् देवानिन्द्रादीनच्छाशुं रघुपत्वा लघुपतनः शीघ्रगामी जिगाति। गत्वाच मन्द्रः स्तुत्यः होता देवानामाह्वाता होमनिष्पादकोवा जुह्वा यजिष्ठः यष्टृतमः संमिश्लः सगुणैर्देवैर्वा संप्रयुक्तः सोऽग्निर्देवान्प्रति हविराजिघर्ति आहारयति देवेभ्योहविर्ददातीत्यर्थः ॥ ४ ॥

४. अग्नि बल से वर्द्धित और स्तुति से सेवित होकर शीघ्रता के साथ देवों के पास जाते हैं। अग्नि स्तुत्य, देवों को बुलानेवाले, प्रधान यज्ञकर्त्ता और देवों के द्वारा नियुक्त हैं। वे देवों को हवि देते हैं।

तमुस्रामिन्द्रंनरेजमानमग्निंगीर्भिर्नमोभिराकृणुध्वम्।
आयंविप्रासोमतिभिर्गृणन्तिजातवेदसंजुह्वंसहानाम् ॥ ५ ॥

तम्। उस्राम्। इन्द्रम्। न। रेजमानम्। अग्निम्। गीःऽभिः।
नमःऽभिः। आ। कृणुध्वम्। आ। यम्। विप्रासः। मतिऽभिः।
गृणन्ति। जातऽवेदसम्। जुह्वम्। सहानाम् ॥ ५ ॥

हे ऋत्विजोयूयं उस्रां भोगानामुत्स्राविणं दातारं रेजमानं ज्वालात्मना कंपमानं तमग्निं इन्द्रंन इन्द्रमिव गीर्भिः स्तुतिभिर्नमोभिर्हविर्भिश्च आकृणुध्वं अस्मदभिमुखं कुरुत। विप्रासो-मेधाविनः स्तोतारः सहानां शत्रुबलाद्यभिभवितॄणां देवानां जुह्वमाह्वातारं जातवेदसं जातधनं जातप्रज्ञंवा यमग्निं आगृणन्ति आदरेण स्तुवन्ति तमाकृणुध्वमिति पूर्वेण संबन्धः ॥ ५ ॥

५. ऋत्विको, तुम भोगों के दाता और कम्पनशील उन अग्नि को, इन्द्र के समान, स्तुतियों और हवियों से, हमारे सम्मुख करो, जो देवों के बुलानेवाले और ज्ञानी हैं और जिनका स्तोत्र मेधावी स्तोता लोग आदर के साथ करते हैं।

संयस्मिन्विश्वावसूनिजग्मुर्वाजेनाश्वाःसप्तीवन्तएवैः।
अस्मेऊतीरिन्द्रवाततमाअर्वाचीनाअग्नआकृणुष्व ॥ ६ ॥

सम्। यस्मिन्। विश्वा। वसूनि। जग्मुः। वाजे। न। अश्वाः।
सप्तिऽवन्तः। एवैः। अस्मे इति। ऊतीः। इन्द्रवाततमाः।
अर्वाचीनाः। अग्ने। आ। कृणुष्व ॥ ॥ ६ ॥

हे अग्ने यस्मिन् त्वयि विश्वा विश्वानि वसूनि धनानि संजग्मुः स्वत्वेन संगतानि भवन्ति। तत्र दृष्टान्तः—एवैर्गमनैः सप्तीवन्तः सर्पणवन्तः शीघ्रगमनशीलाः समर्थाः अश्वाः वाजे न यथा संग्रामे संगतास्तद्वत्। हेअग्ने सत्वं इन्द्रवाततमाः इन्द्रेणाभिगताः ऊतीः रक्षाः अस्मे अस्मासु अर्वाचीनाः अभिमुखीः आकृणुष्व आदरेण कुरु ॥ ६ ॥

६. अग्नि, जैसे युद्ध में शीघ्र गमनकारी अश्व जाते हैं, वैसे ही तुममें संसार के सारे धन मिलते हैं। अग्नि, इन्द्र की रक्षा हमारे अभिमुख करो।

अधा॒ह्यग्ने॒ मह्ना॒ निष॒द्यासद्यो॒ जज्ञा॒नो हव्यो॑ बभू॒थ ।
तं ते॑ दे॒वासो॒ अनु॒ केत॑माय॒न्नधा॑ वर्धन्त प्रथ॒मास॒ ऊमाः॑ ॥ ७ ॥ १ ॥

अध॑ । हि । अ॒ग्ने॒ । मह्ना॑ । निऽसद्य॑ । स॒द्यः । ज॒ज्ञा॒नः ।
हव्यः॑ । ब॒भू॒थ॒ । तम् । ते॒ । दे॒वासः॑ । अनु॑ । केत॑म् । आ॒य॒न् ।
अध॑ । व॒र्ध॒न्त॒ । प्र॒थ॒मासः॑ । ऊमाः॑ ॥ ७ ॥ १ ॥

अध अथानन्तरं हियस्मात् अग्ने त्वं मह्ना महत्वेन जज्ञानोजायमानः ज्वलन्निषद्य उपविश्य सद्यस्तस्मिन् प्रजननकालएव हव्योहवनार्हः आहुतिप्रक्षेपार्हः बभूथ भवसि। तस्मात् कारणात् देवासः हविषां दातारः ऋत्विग्यजमानाः ते तव स्वभूतं तं तादृशं केतं प्रज्ञानलक्षणं अन्वायन् अनुगच्छन्ति दीप्ते त्वयि हवींषि जुह्वतीत्यर्थः। अध अथानन्तरं ऋत्विगादयः प्रथमासः क्रियाभिजनविद्यागुणैरुत्कृष्टाः ऊमाः त्वयारक्षिताः सन्तः अवर्धन्त वर्धन्ते ॥ ७ ॥

७. अग्नि, तुमने जन्म के साथ ही महत्त्व लाभ किया और स्थान ग्रहण करने के साथ ही आहुति के योग्य हो गये। इसलिए तुम्हें देखने के साथ देवता लोग तुम्हारे पास गये वा तुम्हारे प्रदीप्त होने के साथ यजमान तुममें हवन करने लगे। उत्तम ऋत्विक् लोग तुमसे रक्षित होकर बढ़ने लगे।

॥ इति सप्तमस्य षष्ठे प्रथमोवर्गः ॥ १ ॥

स्वस्तिनइति सप्तर्चं सप्तमं सूक्तं ऋष्याद्याः पूर्ववत्। स्वस्तीत्यनुक्रान्तं। उक्तः सूक्तविनियोगः। स्वस्त्ययन्यां प्रधानस्य स्वस्तिनइत्येषानुवाक्या। सूत्रितंच—अग्निः स्वस्तिमान् स्वस्तिनोदिवोअग्नेपृथिव्याइति।

तत्र प्रथमा—

स्वस्ति॑ नो॒ दिवो॑ अग्ने पृथि॒व्या वि॒श्वायु॑र्धेहि यजथाय देव ।
सचे॑महि॒ तव॑ दस्म प्रके॒तैरु॑रुष्या॒णो उ॒रुभि॑र्देव॒ शंसैः॑ ॥ १ ॥

स्व॒स्ति । नः॒ । दि॒वः । अ॒ग्ने॒ । पृ॒थि॒व्याः । वि॒श्वऽआ॑युः ।
धे॒हि॒ । य॒ज॒था॑य । दे॒व॒ । सचे॑महि । तव॑ । द॒स्म॒ । प्र॒ऽके॒तैः ।
उ॒रु॒ष्य । नः॒ । उ॒रुऽभिः॑ । दे॒व॒ । शंसैः॑ ॥ १ ॥

हे देव दानादिगुणविशिष्टाग्ने त्वं दिवः पृथिव्याः द्यावापृथिव्योः सकाशात् नोस्मभ्यं विश्वायुः सर्वान्नं स्वस्ति पुत्रादि यजथाय देवयागार्थं धेहि प्रयच्छ सर्वोपद्रवरहिताः सर्वान्न-

पुत्रयुक्ताश्चसन्तोवयं यथा यज्वानोभवेम तथास्मान् कुर्विति वाक्यशेषः । अपिच वयं सचेमहि हे दस्म दर्शनीय देवाग्ने उरुभिर्बहुभिः शंसैः शंसनीयैस्तवसंबन्धिभिः प्रकेतैः पालनोपायप्रज्ञानैः नोस्मानुरुष्य रक्ष ॥ १ ॥

१. दिव्य अग्नि, तुम द्यावापृथिवी से हमारे लिए सब तरह का अन्न और कल्याण दो। दर्शनीय अग्नि, हम याज्ञिक हों। अपने अनेक प्रशंसनीय रक्षणों से हमारी रक्षा करो।

इमाअग्नेमतयस्तुभ्यंजातागोभिरश्वैरभिगृणन्तिराधः ।
यदातेमर्तोअनुभोगमानड्वसोदधानोमतिभिःसुजात ॥ २ ॥

इमाः । अग्ने । मतयः । तुभ्यम् । जाताः । गोभिः । अश्वैः ।
अभि । गृणन्ति । राधः । यदा । ते । मर्तः । अनु । भोगम् ।
आनट् । वसो इति । दधानः । मतिऽभिः । सुऽजात ॥ २ ॥

हे अग्ने इमा ईदृशयः मतयः स्तुतयः तुभ्यं त्वदर्थं जाताः अस्मदादिस्तोतृमुखात् उत्पन्ना उच्चारिताइत्यर्थः गोभिरश्वैश्च सहितं राधः त्वया दीयमानं हिरण्यादिकं धनं अभिगृणन्ति अभिष्टुवन्ति । अस्मत्स्तुत्यनुरूपान्नमस्मभ्यं त्वया दत्तमिति प्रशंसन्ति यदा मर्तोस्मदादिकोमनुष्यः ते त्वया दीयमानं भोगं भोगार्हं धनं अन्वानट् प्राप्नोति लभते तदा हे वसो प्रशस्य वसुमन् यद्वा स्वेन तेजसा सर्वस्याच्छादयितः हे सुजात शोभनकर्मार्थमुत्पन्नाग्ने त्वं दधानोस्मभ्यं धनं प्रयच्छन् मतिभिरस्मदीयाभिः स्तूयसे इतिशेषः ॥ २ ॥

२. अग्नि, तुम्हारे लिए ये स्तुतियाँ हमारे द्वारा कही गई हैं। गौओं और अश्वों के साथ तुमने हमारे लिए धन दिया है; इसलिए तुम्हारी प्रशंसा की जाती है। जब मनुष्य तुम्हारा दिया भोग्य धन प्राप्त करता है, तब अपने तेज के द्वारा सबका आच्छादन करनेवाले, शोभन कर्मों के लिए उत्पन्न होनेवाले और हमें धन देनेवाले अग्नि, तुम्हारी स्तुति की जाती है।

अग्निंमन्येपितरमग्निमापिमग्निंभ्रातरंसदमित्सखायम् ।
अग्नेरनीकंबृहतःसपर्यंदिविशुक्रंयजतंसूर्यस्य ॥ ३ ॥

अग्निम् । मन्ये । पितरम् । अग्निम् । आपिम् । अग्निम् ।
भ्रातरम् । सदम् । इत् । सखायम् । अग्नेः । अनीकम् । बृहतः ।
सपर्यन् । दिवि । शुक्रम् । यजतम् । सूर्यस्य ॥ ३ ॥

अहं स्तोता पितरं अग्निमेव मन्ये जाने आपिं बन्धुं अग्निमेव मन्ये भ्रातरमग्निमेव मन्ये सदमित् सदैव आवसंवादिनं सखायं अग्निमेव जानामि बृहतोमहतोग्नेः अनीकं आहवनीया-

ख्यं मुखं सपर्यं परिचरामि। तत्र लुप्तोपममेतत् दिवि द्युलोके स्थितं यजतं यष्टव्यं पूजनीयं सूर्यस्य संबन्धि शुक्रं दीप्तिमन्मंडलं यथा कश्चिदभिमेतार्थसिद्धये आराधयति तद्वत् ॥ ३ ॥

३. मैं अग्नि को ही पिता, बन्धु, भ्राता और चिर मित्र मानता हूँ। मैं महान् अग्नि के मुख का सेवन वैसे ही करता हूँ, जैसे द्युलोक-स्थित पूजनीय और प्रदीप्त सूर्यमण्डल का कोई सेवन करता है।

सिध्राअग्नेधियोअस्मेसनुत्रीर्यत्रायसेदमआनित्यहोता।
ऋतावासरोहिदश्वःपुरुक्षुर्द्युभिरस्माअहभिर्वाममस्तु ॥ ४ ॥

सिध्राः। अग्ने। धियः। अस्मे इति। सनुत्रीः। यम्।
त्रायसे। दमे। आ। नित्यऽहोता। ऋतऽवा। सः। रोहित्ऽअश्वः।
पुरुऽक्षुः। द्युऽभिः। अस्मै। अहऽभिः। वामम्। अस्तु ॥ ४ ॥

हे अग्ने सनुत्रीः संभक्त्रयः अस्मे अस्माकं संबन्धिन्यः धियः स्तुतयः सिध्राः सिद्धानिष्पन्नाः त्वदर्थमस्माभिः कृताइत्यर्थः दमआ अस्मद्यज्ञगृहे मर्यादतयावस्थितस्त्वं नित्यहोता सततं होमनिष्पादकोदेवानामाह्वातावासन् यंत्रायसे कर्मवैगुण्याव रक्षसि सोहं त्वत्प्रसादात् त्वत्सायुज्यं गतः सन् ऋतवा यज्ञवान् सत्यवान्वा स्यामितिशेषः। रोहिदश्वः रोहित्संज्ञकाश्वः पुरुक्षुः बहुन्नश्चस्यां। किंच अस्मै ईदृग्भूताय तुभ्यं द्युभिर्दीप्तिषु अहभिरहःसु दिवसेषु वामं वननीयं हविरस्तु ॥ ४ ॥

४. अग्नि, हमारी की हुई ये स्तुतियाँ निष्पन्न हुई हैं। नित्य होता, देवों के आह्वाता और हमारे यज्ञगृह में अवस्थित होकर तुम जिसकी (मेरी) रक्षा करते हो, वह (मैं) तुम्हारा सान्निध्य प्राप्त करके याज्ञिक बनें। मैं लोहितवर्ण अश्व और बहुत अन्न प्राप्त करूँ, ताकि प्रदीप्त दिनों में तुम्हें होमीय द्रव्य (हवि) प्राप्त हो सके।

द्युभिर्हितंमित्रमिवप्रयोगंप्रत्नमृत्विजंमध्वरस्यजारम्।
बाहुभ्यामग्निमायवोजनन्तविक्षुहोतारंन्यसादयन्त ॥ ५ ॥

द्युऽभिः। हितम्। मित्रम्ऽइव। प्रऽयोगम्। प्रत्नम्। ऋत्विजम्।
अध्वरस्य। जारम्। बाहुऽभ्याम्। अग्निम्। आयवः।
अजनन्त। विक्षु। होतारम्। नि। असादयन्त ॥ ५ ॥

द्युभिर्हितं दीप्तिराहितं मित्रमिवस्निग्धमिव प्रयोगं प्रयोक्तव्यं प्रत्नं पुराणं ऋत्विजं होतृसंज्ञकं। अग्निर्वैदेवानांहोतासीदितिश्रुतेः। अध्वरस्य यज्ञस्य जारं समापयितारं एवंभूतम-

१ ऐ० ब्रा० ३. १४.।

ग्निं आयवोयजमानाः मनुष्याः बाहुभ्यामजनन्त जनितवन्तः। किंच विक्षु विशोमनुष्याः तदाकारेषु देवेष्वित्यर्थः होतारं आह्वातारं न्यसादयन्त नियमेन सादितवन्तः देवानां यागार्थं निरूपितवन्तइत्यर्थः ॥ ५ ॥

५. दीप्ति-युक्त मित्र के समान प्रोजनीय, प्राचीन ऋत्विक् और यज्ञ-समापक अग्नि को यजमानों ने बाहुओं से उत्पन्न किया है। मनुष्यों ने देवों के आह्वान और यज्ञ के लिए अग्नि को ही निरूपित किया है।

स्वयंयजस्वदिविदेवदेवान्किंतेपाकःकृणवदप्रचेताः।
यथायजःक्रतुभिर्देवदेवानेवायजस्वतन्वंसुजात ॥ ६ ॥

स्वयम्। यजस्व। दिवि। देव। देवान्। किम्। ते। पाकः।
कृणवत्। अप्रऽचेताः। यथा। अयजः। क्रतुऽभिः। देव।
देवान्। एव। यजस्व। तन्वम्। सुऽजात ॥ ६ ॥

हे देव द्योतमानाग्ने त्वं दिवि द्युलोके स्थितान् देवानिन्द्रादीन् स्वयमात्मनैव यजस्व पाकः पक्तव्यमज्ञः अप्रचेताः अप्रकृष्टज्ञानोमनुष्यः ते तव किंकृणवत् किंकरोति त्वयानधिष्ठितः किंचिदपि नजानातीत्यर्थः। किंच हेदेव त्वं क्रतुभिः कालविशेषैः देवान् यथा अयजः इष्टवानसि एव एवं हेसुजात शोभनजन्मन्नग्ने तन्वं आत्मानमपि यजस्व ॥ ६ ॥

६. दिव्य अग्नि, द्युलोक में स्थित देवों का स्वयं यज्ञ करो। अपक्व और निर्बोध मनुष्य तुम्हारे बिना क्या करेंगे? सुजन्मा देव, जैसे तुमने समय-समय पर देवों का यजन किया है, वैसे ही अपना भी रोक।

भवानोअग्नेवितोतगोपाभवावयस्कृदुतनोवयोधाः।
रास्वाचनःसुमहोहव्यदातिंत्रास्वोतनस्तन्वोऽअप्रयुच्छन् ॥७॥२॥

भव। नः। अग्ने। अविता। उत। गोपाः। भव। वयःऽकृत्। उत।
नः। वयःऽधाः। रास्व। च। नः। सुऽमहः। हव्यऽदातिम्।
त्रास्व। उत। नः। तन्वः। अप्रऽयुच्छन् ॥ ७ ॥ २ ॥

हेअग्ने त्वं नोस्माकं अविताऽदृष्टभयेभ्यो रक्षको भव भूयाः। उतापिच गोपा अदृष्टभयेभ्योगोप्ता रक्षकोभव। उतापिच वयस्कृत् अन्नस्य कर्ता भव वयोधाः अन्नस्य दाता भव। हेसुमहः सुष्ठु पूजनीयाग्ने त्वं स्वभूतां हव्यदातिं हविषोदातिं नोस्मभ्यं रास्वच प्रयच्छ। उतापिच नोस्माकं स्वभूतास्तन्वः शरीराणि अप्रयुच्छन् अप्रमाद्यन् त्रास्व पालय ॥ ७ ॥

७. अग्नि, तुम हमें दृष्ट और अदृष्ट भयों से बचाओ। अन्न के कर्त्ता और दाता भी बनो। सुन्दर पूजनीय अग्नि, हवन करने की सामग्री हमें दो। हमारे शरीर की रक्षा करो। ॥ इति सप्तमस्य षष्ठे द्वितीयोवर्गः ॥ २ ॥

प्रकेतुनेतिनवर्चं अष्टमं सूक्तं त्रैष्टुभं त्वष्ट्रपुत्रत्रिशिरानामऋषिः आदितः षडाग्नेय्यः ततस्तिस्रः ऐन्द्र्यः। तथाचानुक्रान्तं—प्रकेतुनानवत्रिशिरास्त्वाष्ट्रस्तृचोन्त्य इन्द्रइति। आदितः षण्णां प्रातरनुवाकाश्विनशस्त्रयोराग्नेयक्रतावुक्तोविनियोगः।

तत्र प्रथमा—

प्रकेतुनाबृहतायात्यग्निरारोदसीवृषभोरोरवीति।
दिवश्चिदन्ताँउपमाँउदानळपामुपस्थेमहिषोववर्ध ॥ १ ॥

प्र। केतुना। बृहता। याति। अग्निः। आ। रोदसी इति। वृषभः।
रोरवीति। दिवः। चित्। अन्तान्। उपऽमान्। उत्।
आनट्। अपाम्। उपऽस्थे। महिषः। ववर्ध ॥ १ ॥

अग्निः बृहता महता केतुना प्रज्ञानेन युक्तः सन् आ इदानीं रोदसी द्यावापृथिव्यौ प्रयाति प्रकर्षेण गच्छति। किंच देवानामाह्वानकाले वृषभइव रोरवीति अत्यर्थं शब्दं करोति दिवश्चित् द्युलोकस्यापि अन्तानवसानान् उपमान् समीपांश्च प्रदेशान् ज्वलनात्मनादित्यात्मना वा स्थितः उदानट् ऊर्ध्वं व्याप्नोति अपां वृष्टिलक्षणानामुदकानामुपस्थे उपस्थानेन्तरिक्षे वैद्युतात्मना महिषो महान् ववर्ध वर्धते ॥ १ ॥

१. इस समय अग्नि बड़ी पताका लेकर द्यावापृथिवी में जाते हैं। देवों के बुलाने के समय अग्नि वृषभ के समान शब्द करते हैं। द्युलोक के अन्त वा समीप के प्रदेश में रहकर अग्नि व्याप्त करते हैं। जल-भण्डार अन्तरिक्ष में महान् विद्युत् होकर अग्नि बढ़ते हैं।

मुमोदगर्भोवृषभःककुद्मानस्रेमावत्सःशिमीवाँअरावीत्।
सदेवतात्युद्यतानिकृण्वन्त्स्वेषुक्षयेषुप्रथमोजिगाति ॥ २ ॥

मुमोद। गर्भः। वृषभः। ककुत्ऽमान्। अस्रेमा। वत्सः। शिमीऽवान्।
अरावीत्। सः। देवऽतांति। उत्ऽयतानि। कृण्वन्।
स्वेषु। क्षयेषु। प्रथमः। जिगाति ॥ २ ॥

गर्भः द्यावापृथिव्योरन्तर्गतः वृषभः कामानां वर्षिताग्निः ककुद्मान् उन्नततेजस्कः मुमोद मोदते। किंच अस्रेमा प्रशस्यनामैतत् प्रशस्तः वत्सः नक्तोषसोर्वत्सभूतः सायंप्रातराहुत्युपजीवनात् शिमीवान् हविर्वहनदेवाह्वानादिकर्मवान् अग्निः अरावीत् देवाह्वानादिशब्दं करोति

सोऽग्निः देववाति यज्ञे उपतानि उपमान्युत्साहानि कर्माणि कृण्वन् स्वेषु क्षयेषु आत्मीयेष्वाहवनीयादिस्थानेषु स्थितः प्रथमोदेवानां स्थानेषु मुख्यः जिगाति गच्छति ॥ २ ॥

२. द्यावापृथिवी के बीच कामों के वर्षक और उन्नत तेजवाले अग्नि प्रसन्न होते हैं। रात्रि और उषःकाल के वत्स और याज्ञिक कर्मवाले अग्नि शब्द करते हैं। अग्नि यज्ञ में उत्साह-कर्म करते हुए आह्वनीय आदि स्थानों में रहकर तथा देवों में मुख्य होकर आते हैं।

आयोमूर्धानंपित्रोररब्धन्यध्वरेदधिरेसूरोअर्णः ।
अस्यपत्मन्नरुषीरश्वबुध्नाऋतस्ययोनौतन्वोजुषन्त ॥ ३ ॥

आ । यः । मूर्धानम् । पित्रोः । अरब्ध । नि । अध्वरे । दधिरे ।
सूरः । अर्णः । अस्य । पत्मन् । अरुषीः । अश्वऽबुध्नाः ।
ऋतस्य । योनौ । तन्वः । जुषन्त ॥ ३ ॥

योऽग्निः पित्रोः मातापितृभूतयोर्द्यावापृथिव्योः मूर्धानं आरब्ध स्वतेजोभिरारभते यद्वा मातापितृभूतयोररण्योर्मूर्धानं शिरोवत् प्रधानभूतं मथनप्रदेशं आङीषदर्थे आरब्धईषद्भिनस्ति निर्मथनकालेपि दाहेन दग्धुं समर्थः सूरः सुवीर्यस्याग्नेः अर्णः गमनशीलं तेजः अध्वरे यज्ञे निदधिरे यष्टारोनियमेन धारयन्ति अस्याग्नेः पत्मन् पतने अरुषीरारोचमानाः ऋतस्य यज्ञस्य योनौ स्थाने अश्वबुध्नाः व्याप्तमूलाः अशनबन्धनावा हविराहारान्विताइत्यर्थः तन्वः त्वदीयास्तनूर्जुषन्त कवयः सेवन्ते ॥ ३ ॥

३. अग्नि मातृ-पितृ-रूप द्यावापृथिवी के मस्तक पर अपना तेज विस्तृत करते हैं। सुवीर्यवाले अग्नि के गतिपरायण तेज को याज्ञिक लोग यज्ञ में धारण करते हैं। अग्नि के पतन पर शोभायमान, यज्ञ के स्थान में व्याप्त और हवि आदि से युक्त तुम्हारे शरीर की सेवा कवि लोग करते हैं।

उषउषोहिवसोअग्रमेषित्वंयमयोरभवोविभावा ।
ऋतायसमदधिषेपदानिजनयन्मित्रंतन्वेस्वायै ॥ ४ ॥

उषःऽउषः । हि । वसो इति । अग्रं । एषि । त्वम् । यमयोः ।
अभवः । विभाऽइवा । ऋतायं । समदधिषे । पदानि ।
जनयन् । मित्रम् । तन्वे । स्वायै ॥ ४ ॥

हेवसो स्वेन तेजसा सर्वस्याच्छादयितः वसुमन्वा प्रशस्यवाग्ने त्वं उषउषः सर्वस्याएवोषसः अग्रं पूर्वं एषि प्राप्नोषि । अपिच यमयोर्युग्मयोः परस्परमवियुक्तयोः अहोरात्रयोः वि-

भावा दीप्तिमान् अभवः भवसि । तन्वे स्वाये आत्मीयात् शरीरात् मित्रमादित्यं जनयन् उत्पादयन् सप्तपदानि सप्तसंख्याकानि विष्ण्यादिस्थानानि ऋताय यज्ञार्थं दधिषे धारयसि ॥४॥

४. प्रशंसनीय अग्नि, तुम उषःकाल के पहले ही आ जाते हो। परस्पर मिले दिन और रात्रि के दीप्तिकर्त्ता हो। अपने शरीर से आदित्य को उत्पन्न करते हुए, यज्ञ के लिए, सात स्थानों में बैठते हो।

भुवश्चक्षुर्महऋतस्यगोपाभुवोवरुणोयदृतायवेषि ।
भुवोअपांनपाज्जातवेदोभुवोदूतोयस्यहव्यंजुजोषः ॥ ५ ॥ ३ ॥

भुवः । चक्षुः । महः । ऋतस्य । गोपाः । भुवः । वरुणः । यत् ।
ऋताय । वेषि । भुवः । अपाम् । नपात् । जातऽवेदः । भुवः ।
दूतः । यस्य । हव्यम् । जुजोषः ॥ ५ ॥ ३ ॥

महोमहतः ऋतस्य यज्ञस्य हेअग्ने त्वं चक्षुरिव प्रकाशकोभुवः भवसि गोपाः यज्ञस्य रक्षकस्त्वमेव भवसि यद्यदा ऋताय सोमरसलक्षणस्योदकस्यादानार्थं वरुणः आदित्यः वेषि गच्छसि तदा त्वमेव भुवोभवसि । हेजातवेदः जातप्रज्ञाग्ने अपां वृष्टिलक्षणानामुदकानां नपात् पौत्रः त्वमेव भुवोभवसि अद्योहि मेघोजायते मेघादग्निर्विद्युद्रूपोजायते इत्यपां पौत्रत्वमुच्यते यस्य यजमानस्य हव्यं हविः जुजोषः सेवसे तस्य दूतोभुवोभवसि ॥ ५ ॥

५. अग्नि यज्ञक तुम, चक्षु के समान, प्रकाशक हो। तुम यज्ञ के रक्षक हो। जिस समय तुम यज्ञ के लिए वरुण वा आदित्य होकर जाते हो, उस समय तुम्हीं रक्षक होते हो। ज्ञानी अग्नि, तुम जल के पौत्र हो। (जल से मेघ और मेघ से विद्युत् वा अग्नि उत्पन्न होते हैं) तुम जिस यजमान की हवि ग्रहण करते हो, उसके दूत होते हो।

॥ इति सप्तमस्य षष्ठे तृतीयोवर्गः ॥ ३ ॥

दर्शपूर्णमासयोराग्नेयस्य याज्या भुवोयज्ञस्येत्येषा । सूत्रितंच—तासांयाज्यानुवाक्या अग्निर्मूर्धाभुवोयज्ञस्येति । आग्नेयीकाचिदकाम्येष्टिः तस्यामेषैव याज्या । सूत्रितंच—आग्नेय्याउत्तरे नित्येमूर्धन्वतइति । सैषा सूक्ते षष्ठी—

भुवोयज्ञस्यरजसश्चनेतायत्रानियुद्भिःसचसेशिवाभिः ।
दिविमूर्धानंदधिषेस्वर्षांजिह्वामग्नेचकृषेहव्यवाहम् ॥ ६ ॥

भुवः । यज्ञस्य । रजसः । च । नेता । यत्र । नियुत्ऽभिः । सचसे ।
शिवाभिः । दिवि । मूर्धानम् । दधिषे । स्वःऽसाम् ।
जिह्वाम् । अग्ने । चकृषे । हव्यऽवाहम् ॥ ६ ॥

हे अग्ने त्वं यत्र यस्मिन्नन्तरिक्षे शिवाभिः कल्याणीभिर्नियुद्भिः नियुत्संज्ञकाभिरश्वपत्नीभिः संबद्धं वायुं सचसे संगच्छसे तस्मिन्नन्तरिक्षे यज्ञस्य रजसश्चोदकस्यच नेता प्रापयिता भवसि। अग्निर्वा इतोवृष्टिमुदीरयतीति श्रुतेः। किंच दिवि द्युलोके मूर्धानं शिरोवत्प्रधानभूतं स्वर्णं सर्वस्य संभक्तारमादित्यं दधिषे हविर्वहनद्वारेण धारयसि। हेअग्ने त्वं जिह्वां ज्वालां हव्यवाहं हविषोवोढ्रीं चक्रषे करोषि ॥ ६ ॥

६. अग्नि, तुम जिस अन्तरिक्ष में कल्याणकर अश्वोंवाले वायु के साथ मिलते हो, उसमें तुम यज्ञ और जल के नेता होते हो। तुम द्युलोक में प्रधान और सबके भक्ता सूर्य को धारण करते हो। अग्नि, तुम अपनी जिह्वा को हव्यवाहिका बनाते हो।

अस्यत्रितःक्रतुनावव्रेअन्तरिच्छन्धीतिंपितुरेवैःपरस्य ।
सचस्यमानःपित्रोरुपस्थेजामिब्रुवाणआयुधानिवेति ॥ ७ ॥

अस्य । त्रितः । क्रतुना । वव्रे । अन्तः । इच्छन् । धीतिम् । पितुः । एवैः । परस्य । सचस्यमानः । पित्रोः । उपऽस्थे । जामि । ब्रुवाणः । आयुधानि । वेति ॥ ७ ॥

अस्मिन्नृचे इन्द्रइममर्थं ब्रवीति। हे त्रित सर्वेषामायुधानि वेत्ता त्वं त्वष्टृपुत्रस्य त्रिशिरसोवधार्थं मम साहाय्यं कुर्वितीन्द्रेणैवं पृष्टस्त्रितः स्ववीर्यवृद्ध्यर्थं यज्ञभागं वव्रे। सचेन्द्रस्तस्मै पाणिप्रक्षालनार्थं जलं यज्ञभागंच दत्तवान् अनेन यज्ञभागेन वृद्धवीर्यस्त्रितः एतत्संज्ञकऋषिः एवैः आत्मनोरक्षणैर्युक्तः अन्तर्यज्ञस्य मध्ये धीतिं भागमिच्छन् परस्योत्कृष्टस्य पितुः सर्वस्य जगतः पालयितुरस्येन्द्रस्य क्रतुना त्रिशिरसोमम वधार्थं साहाय्यभूतेन कर्मणा निमित्तेन वव्रे सखायं वृतवान्। किंच पित्रोर्मातापितृभूतयोर्द्यावापृथिव्योः उपस्थे समीपस्थे यज्ञे सचस्यमानः ऋत्विग्भिः सेव्यमानस्त्रितः जामि योग्यं इन्द्रस्यानुरूपं स्तोत्रं ब्रुवाणइन्द्रस्य बलवृद्ध्यर्थमुच्चारयन् आयुधानि स्वभूतानि वेति त्वष्टृपुत्रस्य मम वधार्थं आगच्छति ॥ ७ ॥

७. यज्ञ करके त्रित ऋषि ने प्रार्थना की कि, मेरी इच्छा है कि, यज्ञ में पिता का ध्यान करके नाना विपत्तियों से रक्षा पाऊँ। प्रार्थना के कारण पिता-माता के पास सुन्दर वाक्य बोलकर त्रित युद्ध का अस्त्र ले गये।

अथाष्टमी—

सपित्र्याण्यायुधानिविद्वानिन्द्रेषितआप्त्योअभ्ययुध्यत् ।
त्रिशीर्षाणंसप्तरश्मिंजघन्वान्त्वाष्ट्रस्यचित्त्रिःसंसृजेत्रितोगाः॥८॥

---

१ तै० सं० २. ४. १०.।

सः । पित्र्याणि । आयुधानि । विद्वान् । इन्द्रेऽइषितः । आप्त्यः ।
अभि । अयुध्यत् । त्रिऽशीर्षाणम् । सप्तऽरश्मिम् । जघन्वान् ।
त्वाष्ट्रस्य । चित् । निः । ससृजे । त्रितः । गाः ॥ ८ ॥

आप्त्यः आप्त्यस्य पुत्रः अपां पुत्रोवा तकारोपजनश्छान्दसः सत्रितः पित्र्याणि स्वपितृसंबन्धीन्यायुधानि विद्वान् जानन् इन्द्रेषितः त्रिशिरसामयासह युद्धार्थमिन्द्रेण प्रेषितः सन् अभ्ययुध्यत् आभिमुख्येन युद्धवान् । तदनन्तरं सप्तरश्मिं शत्रुनियमनार्थं सप्तप्रग्रहहस्तं यद्वा सप्तरश्मिरादित्यः तत्सदृशं त्रिशीर्षाणं त्रिशिरस्कं मां जघन्वान् हतवान् मूर्छितं कृतवानित्यर्थः। किंच त्रितः त्वाष्ट्रस्य चित् त्वष्टृपुत्रस्य ममापि गाः पशून् निःससृजे विसृष्टवान् अपहृतवानित्यर्थः ॥ ८ ॥

८. आप्त्य के पुत्र त्रित ने इन्द्र के द्वारा प्रेरित होकर और अपने पिता के युद्धास्त्रों को लेकर युद्ध किया। सात रस्सियोंवाले "त्रिशिरा" का उन्होंने वध किया और त्वष्टा के पुत्र (विश्वरूप) की गायों का भी हरण कर लिया।

भूरीदिन्द्रउदिनक्षन्तमोजोवाभिनत्सत्पतिर्मन्यमानम् ।
त्वाष्ट्रस्यचिद्विश्वरूपस्यगोनामाचक्राणस्त्रीणिशीर्षापराव्रक् ॥ ९ ॥ ४ ॥

भूरि । इत् । इन्द्रः । उत्ऽइनक्षन्तम् । ओजः । अव । अभिनत् ।
सत्ऽपतिः । मन्यमानम् । त्वाष्ट्रस्य । चित् । विश्वऽरूपस्य । गोनाम् ।
आऽचक्राणः । त्रीणि । शीर्षा । परा । वर्गिति वर्क् ॥ ॥ ९ ॥ ४ ॥

सत्पतिः सतां पालकः इन्द्रः भूरीव बह्वेव पूर्वतुल्यमतिरिक्तंवा ओजोबलं उदिनक्षन्तं व्याप्नुवन्तं मन्यमानं शूरमित्यात्मानं चिंतयन्तं यद्वा मन्यतिर्दीप्तिकर्मा क्रोधकर्मावा दीप्यमानं क्रुध्यन्तंवा त्वष्टृपुत्रं मां अवाभिनत् वज्रेण विदारितवान् । विदार्यत्वाष्ट्रस्यचित् त्वष्टृपुत्रस्यापि गोनां गवां स्वामिनमितिशेषः विश्वरूपस्य मम त्रीणि शीर्षा शीर्षाणि आचक्राणः आसमन्तात् शब्दं कुर्वन् परावर्क् पराङ्मुखस्य वृक्णवान् छिन्नवानित्यर्थः । ईदृशं भाविवस्तु विश्वरूपः स्वप्नांते अनेन तृचेन दृष्टवान् ॥ ९ ॥

९. साधुओं के स्वामी इन्द्र ने अभिमानी और व्यापक तेजवाले त्वष्टा के पुत्र को विदीर्ण किया। उन्होंने गायों को बुलाते हुए त्वष्टा के पुत्र विश्वरूप के तीन सिरों को काट डाला।

॥ इति सप्तमस्य षष्ठे चतुर्थो वर्गः ॥ ४ ॥

आपोहिष्ठेति नवर्चं नवमं सूक्तं अंबरीषस्य राज्ञः पुत्रःसिंधुद्वीपः ऋषिः त्वष्टृपुत्रत्रिशिरावा इदमापइत्यादिकेद्वे अनुष्टुभौ ईशानाइति वर्धमाना आपः पृणीतेति प्रतिष्ठा शिष्टागायत्र्यः आपोदेवता । तथाचानुक्रान्तं—आपोहिसिन्धुद्वीपोवांबरीषआपं गायत्रं द्व्यनुष्टुवन्तं पंचमी वर्धमाना सप्तमी प्रतिष्ठेति । गतः सूक्तविनियोगः । आग्निमारुते आपोहिष्ठेत्याद्यास्तिस्रः । सूत्रितंच—आपोहिष्ठेति तिस्रोवियतमपउपस्पृशन्निति ।

तत्र प्रथमा—

आपो॒हिष्ठा॑मयो॒भुव॒स्तानऊ॒र्जेद॑धातन । म॒हेरणा॑य॒चक्ष॑से ॥ १ ॥

आपः॑ । हि । स्थ । म॒यः॒ऽभुवः॑ । ताः । नः॒ । ऊ॒र्जे । द॒धा॒त॒न॒ । म॒हे । रणा॑य । चक्ष॑से ॥ १ ॥

हियस्माद् कारणाद् आपः यायूयं मयोभुवः सुखस्य भावयित्र्यः स्थ भवथ तास्ताइत्योयूयं नोस्मान् ऊर्जे अन्नाय दधातन धत्त अन्नप्राप्तियोग्यानस्मान् कुरुत अन्नमस्मभ्यं दत्तेत्यर्थः । महे महते रणाय रमणीयाय चक्षसे दर्शनाय सम्यक् ज्ञानायच धत्त अस्मान् सम्यक्ज्ञानं प्रतियोग्यान् कुरुतेत्यर्थः ॥ १ ॥

१. जल, तुम सुख के आधार हो। अन्न-संचय कर दो। हमें भली भाँति ज्ञान दो। अथ द्वितीया—

योवः॑शि॒वत॑मो॒रस॒स्तस्य॑भाजयते॒हनः॑ । उ॒श॒तीरि॑वमा॒तरः॑ ॥ २ ॥

यः । वः॒ । शि॒वऽत॑मः । रसः॑ । तस्य॑ । भा॒ज॒य॒त॒ । इ॒ह । नः॒ । उ॒श॒तीःऽइ॑व । मा॒तरः॑ ॥ २ ॥

हेआपः वोयुष्माकं स्वभूतोयोरसः शिवतमः सुखतमः इहास्मिन् लोके तस्य तं रसं नोस्मान् भाजयत सेवयत उपयोजयतेत्यर्थः । तत्र दृष्टान्तः—उशतीरिव उशत्यइव पुत्रसमृद्धिं कामयमाना मातरः स्तन्यं रसं यथा भाजयन्ति प्रापयन्ति तद्वत् ॥ २ ॥

२. जल, जैसे मातायें बच्चों को दूध देती हैं, वैसे ही तुम अपना सुखकर रस हमें दो।

अथ तृतीया—

तस्मा॒अर॑ङ्गमामवो॒यस्य॒क्षया॑या॒जिन्व॑थ । आपो॑ज॒नय॑थाचनः॥३॥

तस्मै॑ । अर॑म् । ग॒मा॒म॒ । वः॒ । यस्य॑ । क्षया॑य । जिन्व॑थ । आपः॑ । ज॒नय॑थ । च॒ । नः॒ ॥ ३ ॥

हेआपोयूयं यस्य पापस्य क्षयाय विनाशाय अस्मान् जिन्वथ प्रीणयथ तस्मै तादृशाय पापक्षयाय अरं क्षिप्रं वोयुष्मान् गमाम गमयाम वयं शिरसि प्रक्षिपामेत्यर्थः। यद्वा यस्यान्नस्य क्षयाय निवासार्थं यूयमोषधीर्जिन्वथ तर्पयथ तस्मै तदन्नमुद्दिश्य वयं अरं अलं पर्याप्तं यथा भवति तथा वोयुष्मान् गमाम गच्छाम। किंच हे आपः नोस्मान् जनयथ च पुत्रपौत्रादिजनने प्रयोजयतेत्यर्थः ॥ ३ ॥

३. जल, तुम जिस पाप के विनाश के लिए हमें प्रसन्न करते हो, उसके विनाश की इच्छा से हम तुम्हें मस्तक पर चढ़ाते हैं। जल, हमारी वंशवृद्धि करो।

शंनोदेवीरभिष्टयआपोभवन्तुपीतये। शंयोरभिस्रवन्तुनः ॥ ४ ॥

शम्। नः। देवीः। अभिष्टये। आपः। भवन्तु। पीतये।
शम्। योः। अभि। स्रवन्तु। नः ॥ ४ ॥

नोस्माकं पापापनोदद्वारेण शं सुखं भवन्तु देवीर्दिव्यः आपः अभिष्टये अस्मद्यज्ञाय भवन्तु यज्ञांगभावायच भवन्तुइत्यर्थः। पीतये पानायच भवन्तु। तथा शं उत्पन्नानां रोगाणां शमनं योः यावनं अनुत्पन्नानां पृथक्करणं च कुर्वन्तु। अपिच नोस्माकं अभि उपरि स्रवन्तु शुध्यर्थं सिंचन्तु ॥ ४ ॥

४. दिव्य जल हमारे यज्ञ के लिए सुख-विधान करें। वे पानोपयोगी हुए। वे उत्पन्न रोगों की शान्ति और अनुत्पन्न रोगों को अलग करें। हमारे मस्तक के ऊपर क्षरित हों।

ईशानावार्याणांक्षयन्तीश्चर्षणीनाम्। अपोयाचामिभेषजम् ॥५॥

ईशानाः। वार्याणाम्। क्षयन्तीः। चर्षणीनाम्।
अपः। याचामि। भेषजम् ॥ ५ ॥

वार्याणां वारिप्रभवानां व्रीहियवादीनां यद्वा वरणीयानां धनानां ईशाना ईश्वराश्चर्षणीनां मनुष्याणां क्षयन्तीः निवासयित्रीः अपउदकानि भेषजं सुखनामैतत् पापापनोदनं सुखं याचामि अहं प्रार्थये ॥ ५ ॥

५. अभिलषित वस्तुओं के ईश्वर जल हैं। वे ही मनुष्यों को निवास देते हैं। हम जल से, भेषज के लिए, प्रार्थना करते हैं।

अथ षष्ठी—

अप्सुमेसोमोअब्रवीदन्तर्विश्वानिभेषजा। अग्निंचविश्वशम्भुवम्॥६॥

अप्ऽसु । मे । सोमः । अब्रवीत् । अन्तः । विश्वानि ।
भेषजा । अग्निम् । च । विश्वऽशम्भुवम् ॥ ६ ॥

आपःपृणीतभेषजंवरूथंतन्वेमम । ज्योक्चसूर्यंदृशे ॥ ७ ॥

आपः । पृणीत । भेषजम् । वरूथम् । तन्वे । मम ।
ज्योक् । च । सूर्यम् । दृशे ॥ ७ ॥

इदमापःप्रवहतयत्किञ्चदुरितंमयि ।
यद्वाहमभिदुद्रोहयद्वाशेपउतानृतम् ॥ ८ ॥

इदम् । आपः । प्र । वहत । यत् । किम् । च । दुःऽइतम् । मयि ।
यत् । वा । अहम् । अभिऽदुद्रोह । यत् । वा ।
शेपे । उत । अनृतम् ॥ ८ ॥

आपोअद्यान्वचारिषंरसेनसमगस्महि ।
पयस्वानग्नआगहितमासंसृजवर्चसा ॥ ९ ॥ ५ ॥

आपः । अद्य । अनु । अचारिषम् । रसेन । सम् । अगस्महि ।
पयस्वान् । अग्ने । आ । गहि । तम् । मा । सम् । सृज ।
वर्चसा ॥ ९ ॥ ५ ॥

अप्सुमे सोमोअब्रवीदित्यादिकाश्चतस्रऋचः प्रथमाष्टके द्वितीयाध्याये विनियोगपुरःसरं व्याख्याताः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

६. सोम कहते हैं कि, जल में औषध और संसार-सुखकर अग्नि भी हैं।

७. जल, हमारी देह की रक्षा करनेवाले औषध को पुष्ट करो, ताकि हम बहुत दिनों तक सूर्य को देख सकें।

८. जल, मेरा जो कुछ दुष्कृत्य है अथवा जो कुछ मैंने हिंसा का कार्य किया है वा अभिसंपात किया है वा झूठ बोला है, वह सब, दूर करो।

९. मैं आज जल में पैठा हूँ—इसके रस का पान किया है। अग्नि, तुम जल-युक्त होकर आओ। मुझे तेजस्वी बनाओ।

॥ इति सप्तमस्य षष्ठे पञ्चमोवर्गः ॥ ५ ॥

ओचिदितिचतुर्दशर्चं दशमं सूक्तं अत्रानुक्रम्यते—ओचित्पञ्चानांवैवस्वतयोर्यमयम्योः संवादः षष्ठ्यष्टमीभिर्यमीमिथुनार्थं यमंप्रोवाच स तां नवमीयुग्भिरनिच्छन् प्रत्याचष्टइति । ततः षष्ठ्यां प्रथमातृतीयाद्ययुक्षु विवस्वतः पुत्री यमी ऋषिः यमोदेवता । यस्ययाक्यं सऋषिः यातेनोच्यते सादेवतेति न्यायात् । तथा नवम्यां द्वितीयाचतुर्थीप्रभृतिषु युक्षु वैवस्वतोयमऋषिः यमी देवता । अनादेशपरिभाषयात्रिष्टुप्छन्दः गतोविनियोगः ।

तत्र प्रथमा—

ओचित्सखायंसख्यावृतृत्यांतिरःपुरूचिदर्णवंजगन्वान् ।
पितुर्नपातमादधीतवेधाअधिक्षमिप्रतरंदीध्यानः ॥ १ ॥

ओ इति । चित् । सखायम् । सख्या । वृतृत्याम् । तिरः ।
पुरु । चित् । अर्णवम् । जगन्वान् । पितुः । नपातम् । आ ।
दधीत । वेधाः । अधि । क्षमि । प्रऽतरम् । दीध्यानः ॥ १ ॥

अत्रास्मिन्सूक्ते वैवस्वतयोर्यमयम्योः संवादउच्यते—अस्याऋचि यमं प्रति यमीप्रोवाच । तिरः अन्तर्हितं अप्रकाशमानं निर्जनप्रदेशमित्यर्थः पुरुचित् बहुपि विस्तीर्णंच अर्णवं समुद्रैकदेशं अवान्तरद्वीपं जगन्वान् गतवती यमी चिदिति पूजार्थे पूजितमिष्टं श्रेष्ठमित्यर्थः सखायं गर्भवासादारभ्य सखिभूतं यमं सख्या सख्याय स्त्रीपुरुषसंपर्कजनितमित्रत्वाय ओववृत्यां आवर्तयामि आभिमुख्येन स्थित्वा लज्जां परित्यज्य त्वत्संभोगं करोमीत्यर्थः । धर्मस्य त्वरिता गतिरिति न्यायेन कामस्य त्वरितत्वात् । अपिच पितुः आवयोर्भविष्यतः पुत्रस्य पितृभूतस्य तवार्थाय अधिक्षमि अधि पृथिव्यां पृथिवीस्थानीये नभोदेशेइत्यर्थः प्रतरं प्रकृष्टं सर्वगुणोपेतमित्यर्थः । नपातं गर्भलक्षणमपत्यं वेधा विधाता प्रजापतिः दीध्यानः आवयोरनुरूपस्य पुत्रस्य जननार्थं आवां ध्यायन् आदधीत प्रजापतिः । धातागर्भंदधातुतइत्युक्तत्वात् ॥ १ ॥

१. (यम और यमी वा दिन वा रात्रि सहोदर हैं । यमी यम से कहती है—) विस्तृत समुद्र के मध्यद्वीप में आकर, इस निर्जन प्रदेश में, मैं तुम्हारा सहवास वा मिलन चाहती हूं; क्योंकि (माता की) गर्भावस्था से ही तुम मेरे साथी हो । विधाता ने मन ही मन समझा है कि, तुम्हारे द्वारा मेरे गर्भ से जो पुत्र उत्पन्न होगा, वह हमारे पिता का एक श्रेष्ठ नाती होगा ।

नतेसखांसख्यंवष्ट्येतत्सलक्ष्मायद्विषुरूपाभवाति ।
महस्पुत्रासोअसुरस्यवीरादिवोधर्तारउर्वियापरिख्यन् ॥ २ ॥

---

१ ऋ० सं० ८. ८. ४२. ।

न । ते । सखा । सख्यम् । वष्टि । एतत् । सऽलक्ष्मा । यत् ।
विषुऽरूपा । भवाति । महः । पुत्रासः । असुरस्य ।
वीराः । दिवः । धर्तारः । उर्विया । परि । ख्यन् ॥ २ ॥

यमः आत्मानं परोक्षीकृत्य यमीं प्रत्युवाच । हे यमि ते तव सखा गर्भवासलक्षणेन सखिभूतो-यमः एतदीदृशं त्वयोक्तं स्त्रीपुरुषलक्षणं सख्यं न वष्टि न कामयते । यद्यस्मात् कारणात् यमी सलक्ष्मा समानयोनित्वलक्षणा विषुरूपा भगिनीत्वात् विषमरूपा भवाति भवति तस्मान्न वष्टी-त्यर्थः । इदानीं तिरः पुरूचिदर्णवंजगन्वानित्यस्य प्रतिवचनमुच्यते । महोमहतः असुरस्य प्राणवतः प्रज्ञावतोवा प्रजापतेः पुत्रासः पुत्रभूताः वीराः । वीरोवीरयत्यमित्रान् वेतेर्वा स्याद्-तिकर्मणोवीरयतेर्वेतिनिरुक्तं । शत्रूणां विविधमीरयितारः धर्तारः धारयितारः दिवः द्युलोक-स्य प्रदर्शनमेतत् द्युप्रभृतीनां लोकानामित्यर्थः ॥ २ ॥

२. (यम का उत्तर)—यमी, तुम्हारा साथी यम तुम्हारे साथ ऐसा सम्पर्क नहीं चाहता; क्योंकि तुम सहोदरा भगिनी हो, अगन्तव्या हो। यह निर्जन प्रदेश नहीं है; क्योंकि महान् बली प्रजापति के द्युलोक का धारण करनेवाले वीर पुत्र (देवों के चर) सब देखते हैं।

उशन्तिघ ते अमृतासएतदेकस्यचित्त्यजसंमर्त्यस्य ।
नितेमनोमनसिधाय्यस्मेजन्युःपतिस्तन्वमाविविश्याः ॥ ३ ॥

उशन्ति । घ । ते । अमृतासः । एतत् । एकस्य । चित् । त्यजसम् ।
मर्त्यस्य । नि । ते । मनः । मनसि । धायि । अस्मे इति । जन्युः ।
पतिः । तन्वम् । आ । विविश्याः ॥ ३ ॥

पुनरपि यमी यमं प्रत्युवाच—घेति निपातोप्यर्थे हे यम ते प्रसिद्धाः अमृतासः प्रजापत्या-दयोदेवाएतदीदृशं शास्त्रेणागम्यत्वेनोक्तं त्यजसं त्यज्यते परस्मैप्रदीयतइति त्यजसं दुहितृभगि-न्यादिस्त्रीजातं उशन्ति कामयन्ते एकस्यचित् सर्वस्यजगतोमुख्यस्यापि प्रजापत्यादेः स्वदुहितृ-भगिन्यादिना संबन्धोस्तीति शेषः । अतः कारणात्ते तव मनश्चित्तं अस्मे अस्माकं मनेत्यर्थः । मनसि चित्ते निधायि निधीयतां अहं त्वां कामये त्वं मामपि कामयस्वेत्यर्थः । अपिच जन्यु-रिति लुप्तोपममेतत् जन्युरिव यथा जनयिता प्रजापतिः पतिर्भर्ता भूत्वा स्वदुहितुः शरीरं संभोगेनाविष्टवान् तथा त्वमपि मम पतिर्भूत्वा तन्वं मदीयं शरीरं आविविश्याः संभोगेनाविश योनौ प्रजननप्रक्षेपोपगूहचुंबनादिना मां संभुंक्ष्वेत्यर्थः ॥ ३ ॥

३. (यमी का वचन)—यद्यपि मनुष्य के लिए ऐसा संसर्ग निषिद्ध है; तो भी देवता लोग इच्छा-पूर्वक ऐसा संसर्ग करते हैं। इसलिए मेरी जैसी इच्छा होती है, वैसे ही तुम भी करो। पुत्रजन्मदाता पति के समान मेरे शरीर में पैठो—मेरा संभोग करो।

अथ चतुर्थी—

नयत्पुराचकृमाकद्धनूनमृतावदन्तोअनृतंरपेम ।
गन्धर्वोअप्स्वप्याचयोषासानोनाभिःपरमंजामितन्नौ ॥ ४ ॥

न । यत् । पुरा । चकृम । कत् । ह । नूनम् । ऋता । वदन्तः ।
अनृतम् । रपेम । गन्धर्वः । अप्ऽसु । अप्या । च । योषा ।
सा । नः । नाभिः । परमम् । जामि । तत् । नौ ॥ ४ ॥

यमः यमीं पुनर्ब्रूते—पुरा पूर्वं प्रजापतेः यदगम्यागमनं अपरिमितसामर्थ्योपेतत्वात् कृतं तथा वयं नचकृम नाकुर्म । वयं ऋता ऋतानि सत्यानि वदन्तोब्रुवन्तः अनृतमसत्यं कद्ध कदा खलु नूनं निश्चितं रपेम वदेम नकदाचिदपीत्यर्थः। अगम्यागमनं नकुर्मइति यावत्। अपिच अप्सु अन्तरिक्षनामैतत् अन्तरिक्षे स्थितः गन्धर्वः गवां रश्मीनामुदकानांवा धारयिता आदित्यः अप्या अन्तरिक्षस्था सा प्रसिद्धा योषा आदित्यस्य भार्या सरण्यूश्च नौ आवयोर्नाभिरुत्पत्तिस्थानं मातापितरावित्यर्थः तत्तस्मात्कारणात् नौ आवयोः जामि बांधवं परमं उत्कृष्टं एवं सति आवयोरगम्यागमनरूपत्वात् कर्तुमयुक्तं तस्मादेतन्नकरोमीत्यभिप्रायः ॥ ४ ॥

४. (यम का उत्तर)—हमने ऐसा कर्म कभी नहीं किया। हम सत्यवक्ता हैं। कभी मिथ्या कथन नहीं किया है। अन्तरिक्ष में स्थित गन्धर्व का जल के धारक आदित्य और अन्तरिक्ष में ही रहनेवाली योषा (सूर्य की स्त्री सरण्यू) हमारे माता-पिता हैं। इसलिए हम सहोदर बन्धु हैं। ऐसा सम्बन्ध उचित नहीं।

गर्भेनुनौजनितादंपतीकर्देवस्त्वष्टासविताविश्वरूपः ।
नकिरस्यप्रमिनन्तिव्रतानिवेदनावस्यपृथिवीउतद्यौः ॥ ५ ॥ ६ ॥

गर्भे । नु । नौ । जनिता । दम्पती इति दम्ऽपती । कः । देवः । त्वष्टा
सविता । विश्वऽरूपः । नकिः । अस्य । प्र । मिनंति । व्रतानि ।
वेद । नौ । अस्य । पृथिवी । उत । द्यौः ॥ ५ ॥ ६ ॥

त्वष्टा रूपाणां कर्ता सविता सर्वेषां शुभाशुभस्य प्रेरकः विश्वरूपः सर्वात्मकः देवोदानादिगुणयुक्तः जनिता जनयिता प्रजापतिः गर्भेनु गर्भावस्थायामेव नौ आवां दंपती कः कृतवान् एकोदरे सहवासित्वात् । अस्य प्रजापतेः व्रतानि कर्माणि नकिः प्रमिनन्ति नकेचित् प्रहिंसन्ति नलोपयन्तीत्यर्थः । अतः कारणात् गर्भावस्थायामेवावयोः प्रजापतिकृते दंपतित्वे सति

संभोगं कुरु इत्यर्थः। अपिच नौ आवयोः अस्येदं मातुरुदरे सहवासजनितं दंपतित्वं पृथिवी भूमिः वेद जानाति उतापिच द्यौर्द्युलोकोपि जानाति ॥ ५ ॥

५. (यमी की उक्ति)—रूपकर्त्ता, शुभाशुभ-प्रेरक, सर्वात्मक, दिव्य और जनक प्रजापति ने तो हमें गर्भावस्था में ही दम्पति बना दिया है। प्रजापति का कर्म कोई लुप्त नहीं कर सकता। हमारे इस सम्बन्ध को द्यावापृथिवी भी जानते हैं। ॥ इति सप्तमस्य षष्ठे षष्ठोवर्गः ॥ ६ ॥

कोअस्यवेदप्रथमस्याह्नःकईंददर्शकइहप्रवोचत्।
बृहन्मित्रस्यवरुणस्यधामकदुब्रवआहनोवीच्यानॄन् ॥ ६ ॥

कः। अस्य। वेद। प्रथमस्य। अह्नः। कः। ईम्। ददर्श। कः। इह। प्र। वोचत्। बृहत्। मित्रस्य। वरुणस्य। धाम। कत्। ऊँ इति। ब्रवः। आहनः। वीच्या। नॄन् ॥ ६ ॥

प्रथमस्याह्नः संबन्धि अस्येदं अन्योन्यं संगमनं कोवेद जानाति। प्रथमेहनि यत् क्रियते तदनुमानमाश्रित्य नकश्चिदपि ज्ञातुं शक्नोतीत्यर्थः। इहास्मिन् प्रदेशे प्रत्यक्षतः कईमिदं संगमनं ददर्श पश्यति कः प्रवोचत् प्रख्यापयति नकोपीत्यर्थः। मित्रस्य वरुणस्य मित्रावरुणयोः बृहत् महत् धाम स्थानं अहोरात्रं यदस्ति तत्र नॄन् मनुष्यान् वीच्या नरकेण हे आहनः आहन्तः मर्यादयाहिंसितः स्वकृतशुभाशुभकर्मापेक्षया मनुष्यादिप्राणिनां नरकपातेन स्वर्गप्रापणेन निग्रहानुग्रहयोः कर्तरित्यर्थः एवंभूत हेयम त्वं कदुब्रवः किंवा ब्रवीषि ॥ ६ ॥

६. (यमी की उक्ति)—प्रथम दिन की (संगमन की) बात कौन जानता है? किसने उसे देखा है? किसने उसका प्रकाश किया है? मित्र और वरुण का यह जो महान् धाम (अहोरात्र) है, उसके बारे में, हे मोक्षबन्धन-कर्त्ता यम, तुम क्या कहते हो?

यमस्यमायम्यंकामआगन्त्समानेयोनौसहशेय्याय।
जायेवपत्येतन्वंरिरिच्यांविचिद्वृहेवरथ्येवचक्रा ॥ ७ ॥

यमस्य। मा। यम्यम्। कामः। आ। अगन्। समाने। योनौ। सहऽशेय्याय। जायाऽइव। पत्ये। तन्वम्। रिरिच्याम्। वि। चित्। वृहेव। रथ्याऽइव। चक्रा ॥ ७ ॥

यमस्य तव कामोभिलाषः यम्यं यमीं मा मां प्रति आगन् आगच्छतु ममोपरि तव यमस्य संभोगेच्छा जायतामित्यर्थः। किमर्थं समाने योनौ एकस्मिन् स्थाने शय्याख्ये सह शेय्याय सहशयनार्थं तदनन्तरं पूर्णमनोरथासती जायेव पत्ये यथा भार्या पत्युरर्थाय परया प्रीत्या विश्वस्ता सती रतिकामा स्वशरीरं प्रकाशयति एवं तन्वं आत्मीयं शरीरं रिरिच्यां विविच्यां त्वदर्थं प्रकाशयेयमित्यर्थः। किंच चिदिति पूरणः विवृहेव बृहउद्यमे धर्मार्थकामान् विविधमुद्यच्छावः। तत्र दृष्टान्तः—रथ्येव चक्रा रथस्यावयवभूते चक्रे यथा रथं उद्यच्छतः तद्वत् ॥ ७ ॥

७. जैसे एक शय्या पर पत्नी पति के पास अपनी देह का उद्घाटन करती है, वैसे ही तुम्हारे पास, यम, मैं अपने शरीर को प्रकाशित कर देती हूँ। तुम मेरी अभिलाषा करो। आओ, एक स्थान पर दोनों शयन करें। रथ के दोनों चक्कों के समान हम एक कार्य में प्रवृत्त हों।

नतिष्ठन्तिननिमिषन्त्येतेदेवानांस्पशइहयेचरन्ति।
अन्येनमदाहनोयाहितूर्यंतेनविवृहरथ्येवचक्रा ॥ ८ ॥

न। तिष्ठन्ति। न। निमिषन्ति। एते। देवानाम्। स्पशः। इह।
ये। चरन्ति। अन्येन। मत्। आहनः। याहि। तूर्यम्।
तेन। वि। वृह। रथ्याऽइव। चक्रा ॥ ८ ॥

यम्या प्रत्युवाचयमः पुनराह—इहास्मिन् लोके देवानां संबन्धिनोये स्पशः अहोरात्रादयश्चाराश्चरन्ति सर्वेषां शुभाशुभलक्षणकर्मप्रत्यवेक्षणार्थं परिभ्रमन्ति एतेचाराः क्षणमात्रमपि चरणव्यापाररहिताः नतिष्ठन्ति ननिमिषन्ति मेषणंनकुर्वन्ति शुभमशुभंवा यः करोति तं निरीक्षन्ते चेत्यर्थः। हेआहनः ममापहंत्रि असह्यभाषणेन दुःखयित्रि त्वं मत् मत्तः अन्येन त्वत्सदृशेनसह तूर्यं क्षिप्रं याहि संगच्छ। गत्वाच तेन विवृह धर्मार्थकामानुद्यच्छ। तत्र दृष्टान्तः—रथ्येव चक्रा यथा रथावयवभूते चक्रे रथमुद्यच्छतः तद्वत् ॥ ८ ॥

८. (यम की उक्ति)—देवों के जो गुप्तचर हैं, वे दिन-रात विचरण करते हैं—उनकी आँखें कभी बन्द नहीं होतीं। दुःखदायिनी यमी, शीघ्र दूसरे के पास जाओ और रथ के चक्कों के समान उसके साथ एक कार्य करो।

अथ नवमी—

रात्रीभिरस्माअहभिर्दशस्येत्सूर्यस्यचक्षुर्मुहुरुन्मिमीयात्।
दिवापृथिव्यामिथुनासबन्धूयमीर्यमस्यंबिभृयादजामि ॥ ९ ॥

रात्रीभिः । अस्मै । अहऽभिः । दशस्येत् । सूर्यस्य । चक्षुः । मुहुः । उत् । मिमीयात् । दिवा । पृथिव्या । मिथुना । सबन्धू इति सऽबन्धू । यमीः । यमस्य । बिभृयात् । अजामि ॥ ९ ॥

रात्रीभिः रात्रिभिः अहभिः अहोरात्रयोः अस्मै यमाय कल्पितं भागं सर्वे यजमानाः दशस्येत् प्रयच्छन्तु सूर्यस्य संबन्धि चक्षुस्तेजः मुहुर्मुहुः अस्मै यमाय उन्मिमीयात् उदेतु दिवा पृथिव्या द्यावापृथिवीभ्यां सह मिथुना मिथुनौ सबन्धू समानबन्धू अहोरात्रे अस्मै यमाय एतत् ज्ञात्वा इयं यमीः यमस्य अजामि भ्रातरं बिभृयात् धारयतु यत्नेन परिगृह्णात्वित्यर्थः ॥९॥

९. दिन-रात में यम के लिए जो कल्पित भाग है, उसे यजमान दें, सूर्य का तेज यम के लिए उदित हो। परस्पर संबद्ध दिन द्युलोक और भूलोक यम के बन्धु हैं। यमी यम, भ्राता के अतिरिक्त, अन्य पुरुष को धारण करे।

आघातागच्छानुत्तरायुगानियत्रजामयःकृणवन्नजामि ।
उपबर्बृहिवृषभायबाहुमन्यमिच्छस्वसुभगेपतिमत् ॥ १० ॥ ७ ॥

आ । घ । ता । गच्छान् । उत्ऽतरा । युगानि । यत्र । जामयः । कृणवन् । अजामि । उप । बर्बृहि । वृषभाय । बाहुम् । अन्यम् । इच्छस्व । सुऽभगे । पतिम् । मत् ॥ १० ॥ ७ ॥

यत्र येषु कालेषु जामयोभगिन्यः अजामि अभ्रातरं पतिं कृणवन् करिष्यन्ति ता तानि उत्तराणि युगानि कालविशेषाः आगच्छान् आगमिष्यन्ति । घेतिपूरणः । यस्मादेवं तस्मात् हे सुभगे त्वं इदानीं मत् मत्तः अन्यं पतिं भर्तारं इच्छस्व कामयस्व । तदनन्तरं वृषभाय तव योनौ रेतः सेक्त्रे पुरुषाय आत्मीयं बाहुं उपबर्बृहि शयनकाले उपबर्हणं कुरु ॥ १० ॥

१०. भविष्य में ऐसा युग आयगा, जिसमें भगिनियाँ अपने बन्धुत्व-विहीन भ्राता को पति बनावेंगी। सुन्दरी, मुझे छोड़कर दूसरे को पति बनाओ। वह जिस समय वीर्य-सिंचन करेगा, उस समय उसे बाहुओं में आलिङ्गित करना। ॥ इति सप्तमस्य षष्ठे सप्तमोवर्गः ॥ ७ ॥

अथैकादशी—

किंभ्रातासद्यदनाथंभवातिकिमुस्वसायंनिर्ऋतिर्निगच्छात् ।
काममूताबह्वेतद्रपामितन्वामेतन्वंसंपिपृग्धि ॥ ११ ॥

किम् । भ्राता । असत् । यत् । अनाथम् । भवाति । किम् । ऊँ इति । स्वसा । यत् । निःऽऋतिः । निऽगच्छात् । कामऽभूता । बहु । एतत् । रपामि । तन्वा । मे । तन्वम् । सम् । पिपृग्धि ॥ ११ ॥

यमी यमेन प्रत्याख्याता पुनराह—यत् यस्मिन् भ्रातरि सति स्वसादिकं अनाथं नाथरहितं भवाति भवति सभ्राता किमसत् किं भवति नभवतीत्यर्थः। किंच यत् यस्यां भगिन्यां सत्यां भ्रातरं निर्ऋतिर्दुःखं निगच्छात् नियमेन गच्छति प्राप्नोति सा स्वसा किमु किंवा भवति भ्रातृभगिन्योश्च परस्परं प्रीतिर्येन केनचित् उपायेनावश्यं कार्येत्यभिप्रायः। साहं कामभूता कामेन मूर्छिता सती बहु नानाप्रकारं एतदीदृशमुक्तं वक्ष्यमाणं च रपामि प्रलपामि एतत् ज्ञात्वा मे मम तन्वा शरीरेण तन्वं च शरीरं संपिपृग्धि संपर्चय संभोगेन संश्लेषय मां सम्यक् भुंक्ष्वेत्यर्थः ॥ ११ ॥

११. (यमी की उक्ति)—वह कैसा भ्राता है, जिसके रहते भगिनी अनाथा हो जाय और वह भगिनी ही क्या है, जिसके रहते भ्राता का दुःख दूर न हो? मैं काम-मूर्छिता होकर नाना प्रकार से बोल रही हूँ, यह विचार करके मुझे भली भाँति भोगो।

नवाउतेतन्वातन्वं१संपपृच्यांपापमाहुर्यःस्वसारंनिगच्छात्।
अन्येनमत्प्रमुदःकल्पयस्वनतेभ्रातासुभगेवष्ट्येतत् ॥ १२ ॥

न । वै । ऊँ इति । ते । तन्वा । तन्वम् । सम् । पपृच्याम् । पापम् । आहुः । यः । स्वसारम् । निऽगच्छात् । अन्येन । मत् । प्रऽमुदः । कल्पयस्व । न । ते । भ्राता । सुऽभगे । वष्टि । एतत् ॥ १२ ॥

यमः यमीं प्रत्युक्तवान् हे यमि ते तव तन्वा शरीरेण तन्वमात्मीयं शरीरं नवै संपपृच्यां नैव संपर्चयामि नैवाहं त्वां संभोक्तुमिच्छामीत्यर्थः। योभ्राता स्वसारं भगिनीं निगच्छात् नियमेनोपगच्छति संभुंक्तइत्यर्थः तं पापं पापकारिणं आहुः शिष्टावदन्ति एतत् ज्ञात्वा हेसुभगे सुष्ठु भजनीये हे यमि त्वं मत् मत्तः अन्येन त्वद्योग्येन पुरुषेण सह प्रमुदः संभोगलक्षणान् प्रहर्षान् कल्पयस्व समर्थय। ते तव भ्राता यमः एतदीदृशं त्वया सह मैथुनं कर्तुं नवष्टि नकामयते नेच्छति ॥ १२ ॥

१२. (यम की उक्ति)—यमी, मैं तुम्हारे शरीर से अपने शरीर को मिलाना नहीं चाहता। जो भ्राता भगिनी का संभोग करता है, उसे लोग पापी कहते हैं। सुन्दरि, मुझे छोड़कर अन्य पुरुष के साथ आमोद-आह्लाद करो। तुम्हारा भ्राता तुम्हारे साथ मैथुन करना नहीं चाहता।

वतोबतासियमनैवतेमनोहृदयंचाविदाम ।
अन्याकिलत्वांकक्ष्येवयुक्तंपरिष्वजातेलिबुजेववृक्षम् ॥ १३ ॥

बतः । बत । असि । यम । न । एव । ते । मनः । हृदयम् । च ।
अविदाम । अन्या । किल । त्वाम् । कक्ष्याऽइव । युक्तम् ।
परि । स्वजाते । लिबुजाऽइव । वृक्षम् ॥ १३ ॥

यमी प्रत्युवाच—हेयम त्वं बतोदुर्बलोसि । बतेति निपातः खेदानुकंपयोः । अनुकंप्यश्चासि ते त्वदीयं मनः मनोगतं संकल्पं हृदयंच बुद्धिगतमध्यवसायंच नैवाविदाम वयं नजानीम एवं मत्तोन्या काचित् स्त्री त्वां परिष्वजातेकिल । तत्र दृष्टान्तद्वयमुच्यते—कक्ष्येवयुक्तं यथाकक्ष्या-रज्जुः युक्तं आत्मना संबद्धं अश्वं परिष्वजते तद्वत् लिबुजेव वृक्षं यथा लिबुजा वल्लिः गाढं वृक्षं परिष्वजाते तद्वच्च अन्यस्यां स्त्रियां आसक्तस्त्वं मां परिष्वक्तुं नेच्छसीत्यर्थः ॥ १३ ॥

१३. (यमी का कथन)—हाय यम, तुम दुर्बल हो। तुम्हारे मन और हृदय को मैं कुछ नहीं समझ सकती। जैसे रस्सी घोड़े को बांधती है और जैसे लता वृक्ष का आलिङ्गन करती है, वैसे ही अन्य स्त्री तुम्हें अनायास आलिङ्गित करती है; परन्तु मुझे तुम नहीं चाहते हो।

अन्यमूषुत्वंयम्यन्यउत्वांपरिष्वजातेलिबुजेववृक्षम् ।
तस्यवात्वंमनइच्छासवातवाधाकृणुष्वसंविदंसुभद्राम्॥ १४ ॥८॥

अन्यम् । ऊँ इति । सु । त्वम् । यमि । अन्यः । ऊँ इति । त्वाम् । परि ।
स्वजाते । लिबुजाऽइव । वृक्षम् । तस्य । वा । त्वम् । मनः । इच्छ ।
सः । वा । तव । अध । कृणुष्व । सम्ऽविदम् । सुऽभद्राम् ॥ १४॥८॥

यमः पुनरप्याह—हेयमि त्वं अन्यमु अन्यं पुरुषमेव सु सुष्ठु परिष्वज अन्यउ अन्योपि पुरुषः त्वां परिष्वजाते । तत्र दृष्टान्तः—लिबुजेव वृक्षं यथा वल्ली गाढं वृक्षं परिष्वजते तद्वत् । तथासति वाशब्दः समुच्चये । त्वं तस्यच पुरुषस्य मनः इच्छ कामय । तस्य त्वं वशवर्तिनी भवेत्यर्थः । सच पुरुषः तव मनइच्छतु। अध अथ परस्परवशवर्तित्वानन्तरं त्वं तेनसह सुभद्रां सुकल्याणीं संविदं परस्परसंभोगसुखसंविदिं कृणुष्व कुरुष्व ॥ १४ ॥

१४. (यम का वचन)—यमी, तुम भी अन्य पुरुष का ही भली भाँति आलिङ्गन करो। जैसे लता वृक्ष को वेष्टन करती है, वैसे ही अन्य पुरुष तुम्हें आलिङ्गित करें। उसी का मन तुम हरण करो; वह भी तुम्हारे मन का हरण करे। अपने सहवास का प्रबन्ध उसी के साथ करो—इसी में मंगल होगा। ॥ इति सप्तमस्य षष्ठेष्टमोवर्गः ॥ ८ ॥

वृषेतिनवर्चमेकादशं सूक्तं आंगेर्हविर्धानस्यार्षं आग्नेयं सप्तम्याद्यास्तिस्रः त्रिष्टुभः शिष्टा-जगत्यः तथाचानुक्रान्तं—वृषानवांगिर्हविर्धानआग्नेयंतु त्रिष्टुबन्तमिति । गतः सूक्तविनियोगः ।

तत्र प्रथमा—

वृषा॒वृष्णे॑दुदुहे॒दोह॑सादि॒वःपयां॑सियह्वो॒अदि॑ते॒रदा॑भ्यः ।
विश्वं॒सवे॑द॒वरु॑णो॒यथा॑धि॒यासय॒ज्ञियो॑यजतुय॒ज्ञियाँ॑ऋ॒तून् ॥ १ ॥

वृषा । वृष्णे । दुदुहे । दोहसा । दिवः । पयांसि । यह्वः । अदितेः ।
अदाभ्यः । विश्वम् । सः । वेद । वरुणः । यथा । धिया ।
सः । यज्ञियः । यजतु । यज्ञियान् । ऋतून् ॥ १ ॥

वृषा आहुतिद्वारेण वृष्टेः वर्षिता यह्वो महान् अदाभ्यः केनाप्यहिंस्योग्निः अदितेरक्षीणयागक्रियस्य वृष्णेः यज्ञद्वारेण स्तुतीनां हविषां वा वर्षितुर्यजमानस्यार्थाय दोहसा दोहनेन महता प्रक्षारणेन दिवः सकाशात् पयांसि वृष्टिलक्षणान्युदकानि दुदुहे दोग्धि प्रक्षारयति । किंच यथा वरुणआदित्यः धिया आत्मानुरूपया प्रज्ञया विश्वं सर्वं वेद जानाति तथासोऽग्निर्जानातीत्यर्थः । यज्ञियोयज्ञार्हः सोग्निः यज्ञियान् यज्ञार्हान् ऋतून् यजतु पूजयतु ॥ १ ॥

१. वर्षक, महान् और अहिंसनीय अग्नि ने वर्षक यजमान के लिए महान् दोहन के द्वारा आकाश से जल को दूहा। आदित्य अपनी बुद्धि से सारे संसार को जानते हैं। यज्ञीय अग्नि यज्ञ-योग्य ऋतुओं (कालों) का पूजन करें।

रप॑द्गन्ध॒र्वीरप्या॑च॒योष॑णान॒दस्य॑ना॒देपरि॑पातुमे॒मनः॑ ।
इ॒ष्टस्य॒मध्ये॒अदि॑ति॒र्निधा॑तुनो॒भ्राता॑नोज्ये॒ष्ठःप्र॑थ॒मोविवो॑चति॥२॥

रपत् । ग॒न्ध॒र्वीः । अप्या॑ । च॒ । योष॑णा । न॒दस्य॑ । ना॒दे । परि॑ ।
पा॒तु॒ । मे॒ । मनः॑ । इ॒ष्टस्य॑ । मध्ये॑ । अदि॑तिः । नि । धा॒तु॒ । नः॒ ।
भ्राता॑ । नः॒ । ज्ये॒ष्ठः । प्र॒थ॒मः । वि । वो॒च॒ति॒ ॥ २ ॥

रपत् रपितवती अग्निगुणानुक्तवती गंधर्वी गंधर्वस्य स्त्री अप्या अद्भिः संस्कृतयोषणा आहुतिलक्षणा स्त्री च अग्निं वर्षितवतीति शेषः । नदस्य स्तोतृनामैतत् स्तोतुर्मे मम स्वभूतं मनः नादे स्तुतिलक्षणे शब्दं परिपातु अग्निः सम्यग्रक्षतु अहं समाहितमनाभूत्वा सम्यक् स्तुतिं करोमीत्यर्थः। किंच अदितिरखंडनीयोग्निः नोस्मान् इष्टस्य यागस्य मध्ये निधातु निदधातु नितरां

स्थापयतु। प्रथमः सर्वेषां यजमानानां मुख्यः नोस्माकं ज्येष्ठोभ्राता विवोचति विशेषेण ब्रवीति स्तौतीत्यर्थः। नाहमेव केवलोयजनशीलः किन्तु सर्वएवास्मत्कुलीनोदेवयागप्रियइत्यर्थः ॥२॥

२. अग्नि के गुणों को कहनेवाली गन्धर्व की स्त्री और जल से संस्कृत आहुतिरूपिणी स्त्री ने अग्नि को तृप्त किया। मैं ध्यानावस्थित होकर भली भाँति स्तुति करता हूँ। अखण्डनीय अग्नि हमें यज्ञ के बीच बैठावें। सारे यजमानों में मुख्य हमारे ज्येष्ठ भ्राता स्तुति करते हैं।

सोचि॒न्नु भ॒द्राक्षु॒मती॒यश॑स्वत्यु॒षाउ॑वास॒मन॑वे॒स्व॑र्वती।
यदी॑मु॒शन्त॑मुश॒तामनु॒क्रतु॑म॒ग्निंहोता॑रंवि॒दथा॑य॒जीज॑नन् ॥ ३ ॥

सो इति। चित्। नु। भद्रा। क्षुऽमती। यशस्वती। उषाः। उवास। मनवे। स्वःऽवती। यत्। ईम्। उशन्तम्। उशताम्। अनु। क्रतुम्। अग्निम्। होतारम्। विदथाय। जीजनन् ॥ ३ ॥

भद्रा भजनीया क्षुमती शब्दवती यशस्वती अन्नवती कीर्तिमती वा सोचित् सैव प्रसिद्धा उषाः मनवे मनुष्याय यजमानाय स्वर्वती आदित्यवती सती नु क्षिप्रं उवास उषितवती उदितवतीत्यर्थः। कदोदितवती उच्यते—यद्यदा उशन्तं स्तुतिं हविश्च कामयमानं उशतां यष्टुं कामयमानानां संबन्धिनं होतारं देवानामाह्वातारं होमनिष्पादकं वा ईमेनमग्निं अनुक्रतुं स्तुतिकर्मणः पश्चात् विदथाय यजनीयाय यज्ञार्थं जीजनन् ऋत्विग्यजमानाः जनयन्तीत्यर्थः। तदोदितवतीतिसंबन्धः ॥ ३ ॥

३. भजनीय, शब्दवाली और कीर्तिवाली उषा यजमान के लिए, आदित्यवाली होकर, तुरत निकलीं। उसी समय, यज्ञ के लिए, अग्नि को उत्पन्न किया गया। जो यज्ञाभिलाषी हैं, उन्हीं के प्रति अग्नि प्रसन्न होते हैं। अग्नि देवों को बुलाते हैं। अथ चतुर्थी—

अध॒त्यंद्र॒प्संवि॒भ्वंविचक्ष॒णंविराभ॑रदिषि॒तःश्ये॒नोअ॑ध्व॒रे।
यदी॒विशोवृ॒णतेद॒स्ममार्याअ॒ग्निंहोता॑रम॒धधीर॑जायत ॥ ४ ॥

अध। त्यम्। द्रप्सम्। विऽभ्वम्। विऽचक्षणम्। विः। आ। अभरत्। इषितः। श्येनः। अध्वरे। यदि। विशः। वृणते। दस्मम्। आर्याः। अग्निम्। होतारम्। अध। धीः। अजायत ॥४॥

अध अथानंतरं श्येनः श्येनाख्यः विः पक्षी अध्वरेयागे इषितः अग्निप्रेषितः विभ्वं महान्तं विचक्षणं सर्वस्य विशेषेण द्रष्टारं त्यं तं प्रसिद्धं द्रप्सं नात्यल्पं नातिबहुलं सोमं आभरत् आहृतवान्। अपिच्च यदि यदा आर्या अग्निगमनीयं तं व्रजन्तोविशोयजमानामनुष्यादस्मं दर्शं-

नीयं शत्रूणामुपक्षपयितारं वा होतारं अग्निं वृणते प्रार्थयन्ते। अध अथ तदाधीः यागादि-क्रिया अजायत यज्वभिः प्रतायतइत्यर्थः ॥ ४ ॥

४. श्येनपक्षी अग्नि-प्रेरित होकर महान्, सूक्ष्मदर्शक, न अधिक कम, न अधिक अधिक सोम को ले आया। जिस समय आर्य लोग सामने जाने योग्य, वर्णनीय और देवाह्वान-कर्त्ता अग्नि की प्रार्थना करते हैं, उस समय यज्ञ-क्रिया उत्पन्न होती है।

सदांसिरण्वोयवसेवपुष्यतिहोत्राभिरग्नेमनुषःस्वध्वरः।
विप्रस्यवायच्छशमानउक्थ्यं१वाजंससवाँउपयासिभूरिभिः ॥५॥९॥

सदा। असि। रण्वः। यवसाऽइव। पुष्यते। होत्राभिः। अग्ने।
मनुषः। सुऽअध्वरः। विप्रस्य। वा। यत्। शशमानः। उक्थ्यम्।
वाजम्। ससऽवान्। उपऽयासि। भूरिऽभिः ॥ ५ ॥ ९ ॥

हे अग्ने त्वं सदा सततं रण्वोसि रमणीयोभवसि। तत्र दृष्टान्तः—युवसे वपुष्यते यथा यवसानि तृणानि स्वपुष्टिं कुर्वते हस्त्यश्वगोमहिषादिचतुष्पदाय सर्वदा रमणीयानि भवन्ति तद्वत्। अपिच हे अग्ने मनुषोमनुष्यस्य स्वभूतैः होत्राभिः होत्रेति यज्ञनामैतत् यज्ञैः स्वध्वरः शोभनयज्ञोभवेति शेषः विप्रस्य वा स्तोतुर्वा यत् यस्य यजमानस्य वा स्वभूत उक्थ्यं स्तोत्रं शशमानः प्रशंसन् वाजं हविर्लक्षणमन्नं ससवान् संभजमानश्च भूरिभिर्बहुभिःदेवैः सह उपयासि उपगच्छसि ॥ ५ ॥

५. पशुओं के लिए जैसे घास रुचिकर होती है, वैसे ही तुम सदा रमणीय हो। अग्नि, मनुष्यों के हवन से तुम भली भांति यज्ञ सम्पन्न करो। स्तोता का स्तोत्र सुनकर और हवीरूप अन्न को प्राप्त करके तुम अनेक देवों के साथ जाते हो।

॥ इति सप्तमस्य षष्ठे नवमोवर्गः ॥ ९ ॥

उदीरयपितराजारआभगमियक्षतिहर्यतोहुत्तइष्यति।
विवक्तिवह्निःस्वपस्यतेमखस्तविष्यतेअसुरोवेपतेमती ॥ ६ ॥

उत्। ईरय। पितरा। जारः। आ। भगम्। इयक्षति।
हर्यतः। हुत्तः। इष्यति। विवक्ति। वह्निः। सुऽअपस्यते।
मखः। तविष्यते। असुरः। वेपते। मती ॥ ६ ॥

हे अग्ने त्वदीयं ज्योतिः पितरा पितरौ सर्वप्राणिनां मातापितृभूते द्यावापृथिव्यौ प्रति उदीरय उद्गमय। तत्र दृष्टान्तः—आकारउपमार्थे रात्रेर्नक्षत्रादिदीप्तीनां च जरयितृत्वाज्जारआ-

दित्यः सयथा द्यावापृथिव्यौ प्रति भगं भजनीयं स्वयं ज्योतिः उद्गमयति तद्वत् हर्यतः यागं कामयमानान् प्रति इयक्षति यजमानोयष्टुमिच्छति हृत्तः हृदयेनेव इष्यति इषिरयं गत्यर्थः शुद्धोप्युपसर्गपूर्वोद्रष्टव्यः अधीष्यति देवान् यष्टुमधिगच्छति विवक्ति विवक्षति शास्त्रलक्षणाः स्तुतीर्वक्तुमिच्छति च वह्निर्वोढा स्तुतीनां देवान् प्रति प्रापयिता होता च स्वपस्यते शोभनमात्मीयं कर्म कर्तुमिच्छति। मखः यज्ञनामैतत् अत्र तत् प्रयोक्ताध्वर्युरुच्यते सच तविष्यते तविषिर्वृध्यर्थः सचात्रान्तर्णीतसनर्थश्चद्रष्टव्यः तुतुविषति स्तोतृलक्षणाः स्तुतीः वर्धयितुमिच्छतीत्यर्थः। असुरः प्राणवान् प्रज्ञावान्वा ब्रह्मेति शेषः मती मत्या बुध्या वेपते कर्मवैगुण्यात् विभ्यत् कंपते। हे अग्ने यतोयजमानः सर्वर्त्विजश्च स्वकर्मकर्तुं त्वामागच्छन्ति अतस्त्वं शीघ्रमुद्गमयेत्यर्थः ॥ ६ ॥ ६. अग्नि, अपनी ज्वाला को मातृ-पितृ-रूप द्यावापृथिवी की ओर वैसे ही प्रेरित करो, जैसे नक्षत्र आदि को जीर्ण करनेवाले आदित्य अपना तेज द्युलोक और भूलोक की ओर प्रेरित करते हैं। यज्ञाभिलाषी देवों के लिए यज्ञकर्ता यजमान यज्ञ करने को तैयार है। वह हृदय से व्यग्र है। अग्नि स्तुति को वर्धित करने की इच्छा करते हैं। प्रधान पुरोहित (ब्रह्मा) भली भाँति कर्म सम्पन्न करने के लिए उत्सुक हैं। वे स्तोत्र को बढ़ाते हैं। ब्रह्मा नामक प्रधान पुरोहित मन ही मन आशंका करते हैं कि, कदाचित् कोई दोष घट जाय।

यस्तेअग्नेसुमतिंमर्तोअक्षत्सहसःसूनोअतिसप्रशृण्वे।
इषंदधानोवहमानोअश्वैरासद्युमाँअमवान्भूषतिद्यून् ॥ ७ ॥

यः। ते। अग्ने। सुऽमतिम्। मर्तः। अक्षत्। सहसः। सूनो इति। अति। सः। प्र। शृण्वे। इषम्। दधानः। वहमानः। अश्वैः। आ। सः। द्युऽमान्। अमऽवान्। भूषति। द्यून् ॥ ७ ॥

हे सहसः सूनो बलस्य पुत्राग्ने ते त्वदीयां सुमतिं शोभनामनुग्राहिकां बुद्धिं मर्तोमनुष्योयजमानः अक्षत् अश्नुते अनुग्रहशीलं त्वां स्तुतिभिर्हविर्भिश्च परिचरतीत्यर्थः। सयजमानः अतिसप्रशृण्वे सर्वान् लोकानतीत्यप्रकर्षेण श्रूयते प्रख्यातोभवतीत्यर्थः। कीदृशः इषमन्नं दधानः आर्थिभ्यः प्रयच्छन् अश्वैर्वहमानः। किंच सएव द्युमान् दीप्तिमान् शरीरपतनानन्तरं द्युस्थानवान्वा अमवान् बलवान् आयून् द्युरित्यहर्नाम कालाध्वनोरत्यन्तसंयोगइत्येषा द्वितीया आदित्यकर्तृकाण्यहानि आचन्द्रार्कमित्यर्थः भूषति भवति ॥ ७ ॥

७. बल के पुत्र अग्नि, अनुग्रहशील तुम्हें यजमान स्तोत्रों और हवियों से सेवित करता है। वह यजमान प्रसिद्ध होता है। वह अन्न देता है, घोड़े उसका वहन करते हैं। वह दीप्तिशाली और बली है। वह अनुदिन सुखी होता है।

महाव्रते संस्थिते मरुत्वतीये यदग्नएषेत्यनया चतुर्गृहीतमाज्यं जुहुयात्। तथैवपञ्चमारण्यके सूत्रितं—यदग्नएषासमितिर्भवतीति।

अथाष्टमी–

यदग्नएषासमितिर्भवातिदेवीदेवेषुयजतायजत्र ।
रत्नांचयद्विभजासिस्वधावोभागंनोअत्रवसुमन्तंवीतात् ॥ ८ ॥

यत् । अग्ने । एषा । सम्ऽइतिः । भवाति । देवी । देवेषु ।
यजता । यजत्र । रत्ना । च । यत् । विऽभजासि । स्वधाऽवः ।
भागम् । नः । अत्र । वसुऽमन्तम् । वीतात् ॥ ८ ॥

हे यजत्र यष्टव्याग्ने यद्यदा एषा समितिः अस्मत्कर्तृका स्तुतिः संहतिश्च यजता यजतेषु यष्टव्येषु देवेषु मध्ये देवी द्योतमाना भवाति यष्टव्यादेवाः अस्माभिः स्तूयन्ते इज्यन्ते चेत्यर्थः।हे स्वधावः हविर्लक्षणान्नवन्नग्ने त्वं यद्यदा रत्ना च रत्नानि रमणीयानि धनानि स्तोतृभ्योयष्टृभ्यश्च विभजासि विभजसि अत्र तदानीं तथा नोस्मान् प्रति वसुमन्तं धनवन्तं नानाधनावयवभूतं भागमंशं वीताद् वी गत्यादिषु तुहोस्ताङाशिष्यन्यतरस्यामिति हेः स्थाने तातङ्अन्तर्णीतण्यर्थश्चात्र द्रष्टव्यः वयय आगमय अस्मभ्यं प्रयच्छेत्यर्थः ॥ ८ ॥

८. यजनीय अग्नि, जिस समय हम ढेर की ढेर स्तुतियाँ देवों के लिए करते हैं उस समय रमणीय वस्तुएँ हमें दो। यज्ञीय द्रव्य को ग्रहण करनेवाले अग्नि, हम इससे धन का भाग प्राप्त करें।

श्रुधीनोअग्नेसदनेसधस्थेयुक्ष्वारथंममृतस्यद्रविन्नुम् ।
आनोवहरोदसीदेवपुत्रेमाकिर्देवानामपभूरिहस्याः ॥ ९ ॥ १० ॥

श्रुधि । नः । अग्ने । सदने । सधऽस्थे । युक्ष्व । रथम् ।
अमृतस्य । द्रविन्नुम् । आ । नः । वह । रोदसी इति । देवपुत्रे इति
देवऽपुत्रे । माकिः । देवानाम् । अप । भूः । इह । स्याः ॥ ९ ॥१०॥

हे अग्ने सधस्थे सहस्थाने सर्वदेवतासाधारणे सदने यज्ञगृहे स्थितः सन् नोस्मदीयं वचनं श्रुधि शृणु।किंतद्वचनं उच्यते अमृतस्यदेवपानस्य मधुनः द्रविन्नुं द्रावकं रथमात्मीयं युक्ष्व आह्वानार्थं देवान्प्रति गमनाय अश्वैः संयुक्ष्व।संयुक्तेन रथेन गत्वा नोस्माकं यज्ञं प्रति देवपुत्रे देवस्य प्रजापतेर्दुहितरौ यद्वा देवाः पुत्रा ययोस्ते रोदसी द्यावापृथिव्यौ। आवह प्रापय

देवानां मध्ये कश्चिद्देवः अपभूः अपभविता अस्मद्यज्ञमपगन्ता माकिः स्यात् त्वं च इहास्मिन्यज्ञे स्याः सन्निहितोभव ॥ ९ ॥

९. अग्नि, सारे देवों के यज्ञगृह में रहकर तुम हमारे वचन को सुनो। अमर बरसानेवाले रथ को योजित करो। देवों के माता-पिता द्यावा-पृथिवी को हमारे पास ले आओ। तुम यहीं रहो। देवों के पास से नहीं जाना। ॥ इति सप्तमस्य षष्ठे दशमोवर्गः ॥ १० ॥

द्यावेति नवर्चं द्वादशं सूक्तं अग्निर्हविर्धानस्यार्षं त्रैष्टुभमाग्नेयं। द्यावेत्यनुक्रान्तं। गतो-विनियोगः। तत्र प्रथमा—

द्यावा॑ह॒क्षामा॑प्रथ॒मेक्र॒तेना॑भिश्रा॒वेभ॑वतःसत्य॒वाचा॑।
दे॒वोयन्मर्ता॑न्य॒जथा॑यकृ॒ण्वन्त्सीद॒द्धोता॑प्र॒त्यङ्स्वमसु॑यन् ॥ १ ॥

द्यावा॑। ह॒। क्षामा॑। प्र॒थ॒मे इति॑। क्र॒तेन॑। अ॒भि॒श्रा॒वे। भ॒व॒तः॒। स॒त्य॒ऽवाचा॑। दे॒वः। यत्। मर्ता॑न्। य॒जथा॑य। कृ॒ण्वन्। सीद॑त्। होता॑। प्र॒त्यङ्। स्वम्। असु॑म्। यन् ॥ १ ॥

सत्यवाचा सत्यवाचौ सत्यवादिन्यौ प्रधानभूते द्यावाक्षामा द्युक्षामे द्यावापृथिव्यौ क्रतेन सत्यभूतेन देवयजनेन सह अभिश्रावे आभिमुख्येन श्रूयते इत्यभिश्रावआह्वानं तस्मिन्नस्मद्यज्ञनिमित्ते अग्नेः संबन्धिनि आह्वाने भवतः लोडर्थे लट् भवतां यद्यदा देवो-द्योतमानोग्निः यजथाय यज्ञाय मर्तान् मनुष्यान् कृण्वन् प्रेरयन् प्रत्यङ् आह्वानार्थं देवा-नां प्रत्यंचितास्वमसुं आत्मीयं ज्वालालक्षणं प्राणं यन् प्राप्नुवन् होता देवानामाह्वाता सीदत् वे-द्यां निषीदति तदास्मद्यागकाले द्यावापृथिवी प्रमुखोग्निराह्वयतीत्यर्थः ॥ १ ॥

१. प्रधान भूत द्यावापृथिवी, यज्ञ के समय सबके पहले, अग्नि का आह्वान करें। अग्नि, यज्ञ के लिए, मनुष्यों को प्रेरित करके और अपनी ज्वाला को धारण करके, देवों को बुलाने के लिए बैठें।

अथ द्वितीया—

दे॒वोदे॒वान्प॑रि॒भूर्क्र॒तेन॒वहा॑नोह॒व्यंप्र॑थ॒मश्चि॑कि॒त्वान्।
धू॒मके॑तुःस॒मिधा॒भाऋ॑जीकोम॒न्द्रोहोता॒नित्योवा॒चायजी॑यान् ॥ २ ॥

दे॒वः। दे॒वान्। प॒रि॒ऽभूः। क्र॒तेन॑। वह॑। नः॒। ह॒व्यम्। प्र॒थ॒मः। चि॒कि॒त्वान्। धू॒मऽके॑तुः। स॒म्ऽइधा॑। भाः॒ऽऋ॑जीकः। म॒न्द्रः। होता॑। नित्यः॑। वा॒चा। यजी॑यान् ॥ २ ॥

देवोद्योतमानोऽग्निस्त्वं देवानिन्द्रादीन् परिभूः आह्वानहविर्नयनद्वारेण परिभूः परिगृह्णन् क्रतेन यज्ञेन सह नोस्माकं हव्यं हविः वह प्रापय। कीदृशस्त्वं प्रथमोदेवानां मुख्यः चिकित्वान् सर्वं जानन् धूमकेतुः धूमस्य कर्ता वा धूमध्वजोवा धूमप्रज्ञानोवा समिधा समिंधनेन संदीपनेन भारुजीकः ऋजुदीप्तिरूर्ध्वज्वलनइत्यर्थः मन्द्रः स्तुत्यः होता आह्वाता नित्योध्रुवः वाघा यजोयान् अतिशयेन यष्टा च ॥ २ ॥

२. अग्नि दिव्य हैं। ये इन्द्रादि देवों के पास जाते हुए यज्ञ के साथ हवि को ले आवें। अग्नि, देवों में मुख्य, सर्वज्ञ, धूमध्वज, समिधा के द्वारा ऊर्ध्वज्वलन, स्तुत्य, आह्वाता, नित्य और यजमानों के यज्ञ-कर्त्ता हैं।

स्वार्ट्ग्देवस्यामृतंयदीगोरतोजातासोधारयन्तउर्वी ।
विश्वेदेवाअनुतत्तेयजुर्गुर्दुहेयदेनींदिव्यंघृतंवाः ॥ ३ ॥

स्वार्ट्क् । देवस्य । अमृतम् । यदि । गोः । अतः । जातासः ।
धारयन्ते । उर्वी इति । विश्वे । देवाः । अनु । तत् । ते । यजुः ।
गुः । दुहे । यत् । एनीं । दिव्यम् । घृतम् । वारितिवाः ॥ ३ ॥

देवस्याग्नेः स्वार्ट्क् स्वार्जनं अमृतमुदकं स्वतेजसः सकाशाद्यदि यदा उत्पद्यते तदा अतोस्माद् गोरुदकाज्जातासउत्पन्नाओषधयः उर्वी द्यावापृथिव्यौ धारयन्ते विश्वेदेवाः सर्वे स्तोतारः ते तव संबन्धि तद्यजुः उदकस्य तद्दानं अनुगुः अनुगायन्ति एनी श्वेता दीप्तिः दिव्यं दिविभवं घृतं क्षरत् यद्वा वृष्टिलक्षणं यदुदकं दुहे दोग्धि ॥३॥

३. अग्निदेव स्वयं जो जल उत्पन्न करते हैं, उससे उद्भिज्ज उत्पन्न होकर पृथिवी का रक्षण करते हैं। सारे देवता तुम्हारे जल-दान की प्रशंसा करते हैं। तुम्हारी श्वेत ज्वाला स्वर्ग के घृतरूप वृष्टि-वारि का दोहन करते हैं। अथ चतुर्थी—

अर्चामिवांवर्धायापोघृतस्नूद्यावाभूमीशृणुतंरोदसीमे ।
अहायद्यावोसुनीतिमयन्मध्वानोअत्रपितरांशिशीताम् ॥ ४ ॥

अर्चामि । वाम् । वर्धाय । अपः । घृतस्नू इति घृतऽस्नू ।
द्यावाभूमी इति । शृणुतम् । रोदसी इति । मे । अहा । यत् ।
द्यावः । असुऽनीतिम् । अयन् । मध्वा । नः । अत्र ।
पितरा । शिशीताम् ॥ ४ ॥

हे अग्ने त्वं अपः मदीयं यज्ञरूपं कर्म वर्धाय प्रोत्सर्पिते सति हे घृतस्नू वृष्ट्युदकस्य प्रसवित्र्यौ हे द्यावापृथिव्यौ वां युवां अर्चामि ऋचस्तुतौ स्तौमि । हे रोदसी द्यावापृथिव्यौ युवां मे मदीयं स्तोत्रं शृणुतं यद्यस्मिन् अहा अहःशब्दः सामर्थ्यादहोरात्रसाध्यं कर्मोच्यते सुपांसुलुगिति सप्तम्येकवचनस्याजादेशः अहनि अहोरात्रस्य साध्यकर्मणि द्यावः स्तोतारः असुनीतिं असुः प्रज्ञा तया नीयतेऽत्यसुनीतिः स्तुतिः तां अयन् गच्छन्ति अत्रास्मिन् कर्मणि पितरा सर्वस्य मातापितृभूते द्यावापृथिव्यौ नोस्मान् मध्वा वृष्ट्युदकेन शिशीतां स्नानपानादिना संस्कुरुतां ॥ ४ ॥

४. अग्नि, हमारे यज्ञ रूप कर्म को बढ़ाओ। वृष्टि-जल का वर्षण करनेवाले द्यावापृथिवी, मैं तुम्हारी पूजा और स्तुति करता हूँ। द्यावापृथिवी, मेरा स्तोत्र सुनो। जिस समय स्तोता लोग, यज्ञ के समय, स्तुति करते हैं, उस समय वृष्टि-जल का वर्षण करके हमारी मलिनता को दूर करो। अथ पंचमी—

किंस्वि॑न्नो॒राजा॑जगृहे॒कद॒स्यात॑व्र॒तंच॑कृमा॒कोविवे॑द ।
मि॒त्रश्चि॒द्धिष्मा॑जुहु॒राणो॑दे॒वाञ्छ्लोको॒नया॒तामपि॒वाजो॒अस्ति॑॥५॥११॥

किम् । स्वि॒त् । नः॒ । राजा॑ । ज॒गृ॒हे॒ । कत् । अ॒स्य॒ । अति॑ ।
व्र॒तम् । च॒कृ॒म॒ । कः । वि । वे॒द॒ । मि॒त्रः । चि॒त् । हि । स्म॒ ।
जु॒हु॒रा॒णः । दे॒वान् । श्लोकः॑ । न । या॒ताम् । अपि॑ ।
वाजः॑ । अस्ति॑ ॥ ५ ॥ ११ ॥

किंस्विच्छब्दोवितर्कार्थे किंवा राजा दीप्यमानोग्निः नोस्माकं स्वभूतानि हवींषि स्तुतीश्च जगृहे परिगृह्णीयात् कत किंवाअस्याग्नेः अतिव्रतं अतिपूजितं व्रतं परिचरणाख्यं कर्म चकृम वयं क्रियास्म कर्मवैगुण्यात् भीतस्य पूर्वार्धे एतद्वचनमुक्तं उत्तरार्धे इदानीं तन्निराक्रियते। हिस्मेतीमौ पूरणौ चिदित्युपमार्थे जुहुराणः स्निग्धमाह्वयमानः मित्रः स्निग्धोयथा आगच्छेत तथा नेति संप्रत्यर्थे श्लोकः अस्मदीया स्तुतिलक्षणा वाक्देवानिन्द्रादीन् यातां गच्छतु। अपि वाजः हविराख्यं चान्नं यदस्ति तदपि देवान् प्रति गच्छतु देवाः स्तुतिं हविश्च प्रतिगृह्णन्वित्यर्थः ॥ ५ ॥

५. प्रदीप्त अग्नि ने क्या हमारी स्तुति और हवि को ग्रहण किया है? क्या हमने उपयुक्त पूजन किया है? कौन जानता है? जैसे मित्र को बुलाने पर वह आता है, वैसे ही अग्नि भी आ सकते हैं। हमारी यह स्तुति देवों के पास जाय। जो कुछ खाद्य है, वह भी देवता के पास जाय। ॥ इति सप्तमस्य षष्ठे एकादशोवर्गः ॥ ११ ॥

दुर्मन्त्वत्रामृतस्यनामसलक्ष्मायद्विषुरूपाभवाति ।
यमस्ययोमनवतेसुमन्त्वग्नेतमृष्वपाह्यग्रयुच्छन् ॥ ६ ॥

दुःऽमन्तु । अत्र । अमृतस्य । नाम । सऽलक्ष्मा । यत् । विषुऽरूपा ।
भवाति । यमस्य । यः । मनवते । सुऽमन्तु । अग्ने । तम् ।
ऋष्व । पाहि । अग्रऽयुच्छन् ॥ ६ ॥

यत् यस्य अमृतस्य मरणधर्मरहितस्य सूर्यस्य अस्य मरणधर्मराहित्यंतु—सूर्येविषमास-जामीत्यमृस्याचि प्रसिद्धं । तादृशस्य संबन्धिनाम नामकमुदकं अत्र अस्यां पृथिव्यां विषुरूपा नानारूपं भवाति भवति।उदकस्य नानारूपत्वं—याआपोदिव्याइतिमंत्रे स्फुटमुक्तं।कीदृशं तत् दुर्मन्तु निरपराधं मह्यस्वभावत्वात् । पुनः कीदृशं सलक्ष्मा मधुररसलक्षणोपेतं । किंच यः सूर्यः यमस्य संयमिनीपतेः सुमन्तु सुतरामपराधं मातृताडनरूपं मनवते अवबुध्यते यद्वा धातूनामने-कार्थत्वात् क्षमतइत्यर्थः । तं तादृशं जलजनकं सर्वज्ञं क्षमाशीलं सूर्यं हे ऋष्व महन्नग्ने अग्रयु-च्छन्नग्रमायन् त्वं पाहि आहुतिप्रदानेन रक्षणद्वारा आत्मरक्षणं प्रार्थयते ऋषिः ॥ ६ ॥

६. अमर सूर्य का अपराधशून्य और मधुर रसवाला जल पृथिवी पर नाना रूप का होता है। सूर्य यम के अपराध को क्षमा करते हैं। महान् अग्नि, क्षमाशील सूर्य की रक्षा करो।

यस्मिन्देवाविदथेमादयन्तेविवस्वतःसदनेधारयन्ते ।
सूर्येज्योतिरदधुर्मास्यक्तून्परिद्योतनिंचरतोअजस्रा ॥ ७ ॥

यस्मिन् । देवाः । विदथे । मादयन्ते । विवस्वतः । सदने ।
धारयन्ते । सूर्ये । ज्योतिः । अदधुः । मासि । अक्तून् ।
परि । द्योतनिम् । चरतः । अजस्रा ॥ ७ ॥

यस्मिन्नग्नौ यज्ञस्य प्रधानांशे सति देवाइन्द्रादयोविदथे यज्ञे मादयन्ते । हविषात्मानं तर्पयन्ति तृप्यन्तिवा । अपिच विवस्वतोमनुष्यस्य यजमानस्य स्वभूते सदने वेद्याख्ये स्थाने धारयन्ते आत्मानं स्थापयन्तिच।किंच सूर्ये ज्योतिरहराख्यं तेजः अदधुः स्थापितवन्तः।मासि चन्द्रमसि अक्तून् रात्रीः स्थापितवन्तः। तदनंतरं अजस्रा अनुपक्षीणौ सूर्याचन्द्रमसौ द्योतनिं दीप्तिं परिचरतः परिगच्छतः सर्वत्र प्राप्नुतः ॥ ७ ॥

७. अग्नि के उपस्थित रहने पर यज्ञ में देवता लोग प्रसन्न होते और यजमान के वेदीरूप स्थान में अपने को स्थापित करते हैं। देवों ने सूर्य में तेज (दिनों को) स्थापित किया और चन्द्रमा में रातों को स्थापित किया। वर्द्धमान सूर्य और चन्द्र दीप्ति प्राप्त करते हैं।

---

१ ऋ० सं० २. ५. १५.। २ ऋ० सं० ५. ४. १६.।

यस्मिन्देवामन्मनिसंचरन्त्यपीच्येऽनवयमस्यविद्म।
मित्रोनोअत्रादितिरनागान्त्सवितादेवोवरुणायवोचत् ॥ ८ ॥

यस्मिन् । देवाः । मन्मनि । सम्ऽचरन्ति । अपीच्ये । न । वयम् ।
अस्य । विद्म । मित्रः । नः । अत्र । अदितिः । अनागान् ।
सविता । देवः । वरुणाय । वोचत् ॥ ८ ॥

देवाइन्द्रादयः यस्मिन्नग्नौ मन्मनि ज्ञानभूते ज्ञानवत्सर्वप्रकाशके सति संचरन्ति स्वाधिकारे संप्रवर्तन्ते । अपीच्येन्तर्हिते स्थितमस्याग्नेः स्वरूपं वयं नविद्म तत्वतोनजानीमः अत्रास्मिन्यज्ञे अंगभावाय वर्तमानोमित्रः वरुणाय सर्वेषां पापानां निवारयित्रे अग्नये नोस्मान् अनागानपापान् वोचत् ब्रवीतु । तथा अदितिर्देवमाता सविता सर्वस्य प्रेरकोदेवश्च ब्रवीतु ॥ ८ ॥

८. जिन ज्ञानरूप अग्नि के उपस्थित रहने पर देवता लोग अपना कार्य सम्पादित करते हैं, उनका स्वरूप हम नहीं समझते। इस यज्ञ में मित्र, अदिति और सूर्य पाप-नाशक अग्नि के पास हमें पाप-शून्य कहें।

श्रुधीनोअग्नेसदनेसधस्थेयुक्ष्वारथंममृतस्यद्रवित्नुम् ।
आनोवहरोदसीदेवपुत्रेमाकिर्देवानामपभूरिहस्याः ॥ ९ ॥ १२ ॥

श्रुधि । नः । अग्ने । सदने । सधऽस्थे । युक्ष्व । रथम् । अमृतस्य ।
द्रवित्नुम् । आ । नः । वह । रोदसी इति । देवपुत्रे इति देवऽपुत्रे ।
माकिः । देवानाम् । अप । भूः । इह । स्याः ॥ ९ ॥ १२ ॥

श्रुधीनइत्येषा नवमी पूर्वसूक्ते व्याख्याता ॥ ९ ॥

९. अग्नि, सारे देवों के यज्ञ-गृह में रहकर तुम हमारे वचन को सुनो। अमृत बरसानेवाले रथ को योजित करो। देवों के माता-पिता द्यावा-पृथिवी को हमारे पास ले आओ। तुम यहीं रहो। देवों के पास से नहीं जाना।

॥ इति सप्तमस्य षष्ठे द्वादशोवर्गः ॥ १२॥

युजेवामिति पंचर्चं त्रयोदशं सूक्तं अदितेः पुत्रस्य विवस्वतआर्षं हविर्धानाख्ये ये द्वे शकटे तद्दैवत्यमिदं अन्त्या जगती शिष्टास्त्रिष्टुभः । तथाचानुक्रान्तं— युजेपंचविवस्वानादित्यो-हविर्धानंजगत्यन्तमिति । गतः सूक्तविनियोगः । हविर्धानप्रवर्तने युजेवामित्येका । सूत्रितंच— अन्तरावर्त्मपादयोर्युजेवांब्रह्मपूर्व्यंनमोभिरिति ।

तत्र प्रथमा—

युजेवां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ १ ॥

युजे । वाम् । ब्रह्म । पूर्व्यम् । नमःऽभिः । वि । श्लोकः । एतु ।
पथ्याऽइव । सूरेः । शृण्वन्तु । विश्वे । अमृतस्य । पुत्राः । आ ।
ये । धामानि । दिव्यानि । तस्थुः ॥ १ ॥

हेहविर्धान शकटे वां युवां अहं पूर्व्यं पूर्वस्मिन्काले भवं अनादिकालप्रवृत्तमित्यर्थः एवंभूतं ब्रह्म मंत्रमुच्चार्येतिशेषः नमोभिः सोमादिहविर्लक्षणैरन्नैर्युजे युनज्मि युवयोरुपरिसोमादिकमारोप्य पत्नीशालांते हविर्धानंप्रति युवांनयामीत्यर्थः । एवंभूतयोर्युवयोः श्लोकः शब्दः व्येतु विश्वान् देवान् प्रति विविधं गच्छतु । तत्र दृष्टान्तः— पथ्येव सूरेः यथा स्तोतुः स्वभूता पथ्या परिणामसुखावहाहुतिः विश्वान् देवान् प्रति विविधं गच्छति तद्वत् अमृतस्यामरणधर्मणः प्रजापतेः पुत्राविश्वेदेवाः एवंभूतं शब्दं शृण्वन्तु । ये देवाः दिव्यानि दिविभवानि धामानि स्थानानि आतस्थुः अधिष्ठितवन्तः ते शृण्वन्त्वित्यर्थः॥ १ ॥

१. शकटद्वय, प्राचीन समय में उत्पन्न मंत्र का उच्चारण करके और सोमादि को लादकर पत्नीशाला के अन्त में तुम दोनों को ले जाता हूँ। स्तोता की आहुति के समान मेरा स्तोत्रवाक्य देवों के पास जाय। जो देवता व अमर पुत्र दिव्य धाम में रहते हैं, वे सब सुनें।

अत्रैव हविर्धानप्रवर्तने यमेइवेत्येषा । सूत्रितंच—यमेइवयतमानेयदैतमधिद्वयोरदधाउक्थ्यंवचइत्यर्धर्चेआरमेदिति ।

तत्रैषा द्वितीया—

यमेइवयतमाने यदैतं प्रवां भरन्मानुषा देवयन्तः ।
आसीदतं स्वमु लोकं विदाने स्वासस्थे भवतमिन्दवे नः ॥ २ ॥

यमेइवेति यमेऽइव । यतमाने इति । यत् । ऐतम् । प्र । वाम् । भरन् ।
मानुषाः । देवऽयन्तः । आ । सीदतम् । स्वम् । ऊँ इति । लोकम् ।
विदाने इति । स्वासस्थे इति सुऽआसस्थे । भवतम् । इन्दवे । नः ॥२॥

यमे इव यथा सहोत्पन्ने अपत्ये संचरतः तथा यतमाने गमनहविर्धारणादिस्वाधिकारकर्मणि प्रवर्तमाने हविर्धानशकटे युवां यद्यदा एतं हविर्धानस्थानं प्रतिगच्छतः । तथा देवय-

न्तोदेवकामाः मानुषायजमानाः वां युवां प्रभरन् प्रभरन्ति । किंच युवां स्वमु लोकं आत्मीयमेव हविर्धानाख्यं स्थानं विदाने जानती आसीदतं ततः नोस्माकं इन्दवे सोमार्थं स्वासस्थे शोभननिवासस्थाने भवतं ॥ २ ॥

२. जब तुम जुड़वें के समान जाते हो, तब वेद-पूजक मनुष्य तुम्हारे ऊपर भरपूर होमद्रव्य लादते हैं। तुम लोग अपने स्थान पर जाकर रहो। हमारे सोम के लिए शोभन स्थान ग्रहण करो।

पञ्चपदानिरुपोअन्वरोहञ्चतुष्पदीमन्वेमिव्रतेन।
अक्षरेणप्रतिमिमएतामृतस्यनाभावधिसंपुनामि ॥ ३ ॥

पञ्च । पदानि । रुपः । अनु । अरोहम् । चतुःऽपदीम् । अनु । एमि । व्रतेन । अक्षरेण । प्रति । मिमे । एताम् । ऋतस्य । नाभौ । अधि । सम् । पुनामि ॥ ३ ॥

रुपः यष्टॄणां स्वर्गमारोपयितुर्यज्ञस्यांगत्वेन संबन्धीनि पंचसंख्याकानि धानासोमपशुपुरोडाशाज्याख्यानि पदानि वृत्तिहेतुत्वेन देवान् प्रति गन्तॄणि हवींषि अन्वरोहं अनुरोहामि शकटे युवयोः स्थापनवहनानन्तरं करणे करोमीत्यर्थः। किंच चतुष्पदीं चतुर्भिः पदैर्युक्तां त्रिष्टुबादिछन्दसं क्रियां व्रतेन प्रयोगकर्मणा अन्वेमि अनुगच्छामि यथाकालं प्रयुनज्मीत्यर्थः। अक्षरेण प्रणवाख्येन एतामुपस्थितां प्रतिगरक्रियां प्रतिमिमे निर्ममे । अपिच ऋतस्य यज्ञस्य अधीति सप्तम्यर्थानुवादी नाभौ नाभिभूते वेद्याख्ये स्थाने संपुनामि संशोधयामि दशापवित्रेण सोमं संस्करोमीत्यर्थः ॥ ३ ॥

३. यज्ञ के जो पाँच (धाना, सोम, पशु, पुरोडाश और घृत) उपकरण हैं, यथायोग्य उनको मैं रखता हूँ। यथानियम चार त्रिष्टुबादि छन्दों का प्रयोग करता हूँ। ओङ्कार का उच्चारण करके वर्त्तमान कार्य को सम्पन्न करता हूँ। यज्ञ की नाभि-स्वरूप वेदी पर मैं सोम का संशोधन करता हूँ।

अथ चतुर्थी—

देवेभ्यःकमवृणीतमृत्युंप्रजायैकममृतंनावृणीत।
बृहस्पतिंयज्ञमकृण्वतऋषिंप्रियांयमस्तन्वंप्रारिरेचीत् ॥ ४ ॥

देवेभ्यः । कम् । अवृणीत । मृत्युम् । प्रऽजायै । कम् । अमृतम् । न । अवृणीत । बृहस्पतिम् । यज्ञम् । अकृण्वत । ऋषिम् । प्रियाम् । यमः । तन्वम् । प्र । अरिरेचीत् ॥ ४ ॥

देवेभ्योदेवानां मृत्युं मारयितारं कं स्वपुरुषं आवृणीत प्रार्थयते प्रयुंक्ते। किंच प्रजायै देवव्यतिरिक्तायामनुष्यादिकायाः प्रजायाः अमृतममारकं अविनाशकं वा स्वपुरुषं नावृणीत नप्रयुंक्ते हविर्धारणीक्रियायां प्रवृत्तायां सत्यां पूर्वोक्तानां सर्वेषां स्थितेरवश्यंभावित्वात् न कंचिदपि विनाशकं स्वपुरुषं यमोनिरूपयतीत्यर्थः। अपिच बृहस्पतिं बृहतां देवानां हविर्धारणे पालकं बृहतां मंत्राणां स्वामिनं वा ऋषिं सर्वस्य दृष्टादृष्टफलस्य द्रष्टारं यज्ञं अकृण्वत ऋत्विग्यजमानाः कुर्वन्ति। अपिच यमः पित्रां तन्वं अस्मदीयमिष्टं शरीरं प्रारिरेचीत् धातूनामनेकार्थत्वात् रिचिरत्र परिहारार्थे वर्तते प्रेरयति मृत्योः सकाशात्परिहरति कर्मवैगुण्यजनितदोषाभावादस्माकं जीवितं नापहरतीत्यर्थः ॥ ४ ॥

४. देवों में से किसे मृत्यु-भवन में भेजा जाय? प्रजा में से किसे अमर किया जाय? यज्ञकर्त्ता लोग मंत्र-पूत यज्ञ का अनुष्ठान करते हैं, जिससे यम हमारे (यजमानों के) शरीर को मृत्यु-मुख में नहीं भेजते।

सप्तक्षरन्तिशिशवेमरुत्वतेपित्रेपुत्रासोअप्यवीवतन्नृतम्।
उभेइदस्योभयस्यराजतउभेयतेतेउभयस्यपुष्यतः ॥ ५ ॥ १३॥

सप्त। क्षरन्ति। शिशवे। मरुत्वते। पित्रे। पुत्रासः। अपि। अवीवतन्। ऋतम्। उभे इति। इत्। अस्य। उभयस्य। राजतः। उभे इति। यतेते इति। उभयस्य। पुष्यतः ॥ ५ ॥ १३ ॥

मरुत्वते मरुतः स्तोतारः स्तुतिद्वारेण तद्वते पित्रे ऋत्विजां पितृभूताय शिशवे शंसनीयाय हविर्धानशकटयोः सुखासीनभूताय सोमाय सप्तच्छन्दांसि क्षरंति स्तुतित्वेन गच्छन्ति। अपिच पुत्रासोपि सोमस्य पुत्रभूताः ऋत्विजोपि ऋतं सत्यभूतं स्तोत्रं अप्यवीवतन् संगमयन्ति सद्गुणग्राहिणीं स्तुतिं कुर्वन्तीत्यर्थः। उभेइत् द्वेएव हविर्धानशकटे अस्योभयस्य देवजातस्य मनुष्यजातस्य च राजतः ईशाने उभे एव शकटे यतेते कर्मानुष्ठाने प्रयत्नं कुरुतः उभयस्य देवजातस्य मनुष्यजातस्यच पुष्यतः हविर्धारणद्वारेण पुष्टिं कुरुतइत्यर्थः ॥ ५ ॥

५. स्तोता लोग पितृ-स्वरूप और प्रशंसनीय सोम के लिए सातों छन्दों का उच्चारण करते हैं। पुत्र-स्वरूप पुरोहित लोग स्तुति करते हैं। दोनों शकट, देव और मनुष्य, दोनों के लिए दीप्ति पाते हैं, कार्य करते हैं और देवों तथा मनुष्यों का पोषण करते हैं।

॥ इति सप्तमस्य षष्ठे त्रयोदशोवर्गः ॥ १३ ॥

परेयिवांसमितिषोडशर्चं चतुर्दशं सूक्तं विवस्वतः पुत्रस्य यमस्यार्षं अंगिरसोनःपितरोनवग्वाइति षष्ठ्याअंगिरःपित्रथर्वभृगुलक्षणालिंगोक्तदेवताः मेहीत्याद्यास्तिस्रोलिंगोक्तदेवताकाः पितृदेवताकाया अतिद्रवसारमेयावित्यादिकस्तृचः सरमापुत्रौ यौ श्वानौ परलोकमार्गमभितःस्थि-

तौ तद्देवताकः शिष्टायमदेवत्याः यमायसोममिति त्रयोदश्याद्याअनुष्टुभः यमायमधुमत्तममित्येषा बृहती आदितोद्वादशत्रिष्टुभः । तथाचानुक्रान्तं—परेयिवांसंषोडशयमोयामं षष्ठी लिंगोक्तदेवता पराश्वतिस्रः पित्र्याया तृचःश्वक्ष्यां पराअनुष्टुभोबृहत्युपान्त्येति।गतः सूक्तविनियोगः। महापितृयज्ञे यमयागाख्यायाज्या।सूत्रितंच—इमंयमप्रस्तरमाहिसीदेतिद्वेपरेयिवांसंप्रवतोमहीरन्विति।

तत्र प्रथमा—

परेयिवांसंप्रवतोमहीरनुबहुभ्यःपन्थामनुपस्पशानम् ।
वैवस्वतंसंगमनंजनानांयमंराजानंहविषादुवस्य ॥ १ ॥

परेयिऽवांसम् । प्रऽवतः । महीः । अनु । बहुऽभ्यः । पन्थाम् ।
अनुऽपस्पशानम् । वैवस्वतम् । सम्ऽगमनम् । जनानाम् ।
यमम् । राजानम् । हविषा । दुवस्य ॥ १ ॥

हे मदीयान्तरात्मन् यजमान वा त्वं राजानं पितॄणां स्वामिनं यमं हविषा पुरोडाशादिना दुवस्य परिचर । कीदृशं प्रवतः प्रकृष्टकर्मवतोभूलोकवर्तिभोगसाधनं पुण्यमनुष्ठितवतः पुरुषान्महीः तत्तद्भोगोचितभूप्रदेशविशेषान् अनुपरेयिवांसं क्रमेण मरणादूर्ध्वं प्रापितवन्तं तथाबहुभ्यः स्वर्गार्थिभ्यः पुण्यकृद्भ्यः पुण्यकृतार्थे पंथां स्वर्गस्योचितमार्गं अनुपस्पशानं अबाधमानं पापिनएव पुरुषान् स्वर्गमार्गबाधेन नरकं प्रापयन्ति नतु पुण्यकृतइत्यर्थः वैवस्वतं विवस्वतः सूर्यस्य पुत्रं जनानां पापिनांसंगमनं गन्तव्यस्थानरूपं ॥ १ ॥

१. अन्तःकरण व यजमान, तुम पितरों के स्वामी यम की, पुरोडाश आदि के द्वारा, परिचर्या करो। यम सत्कर्मानुष्ठाताओं को सुख के देश में ले जाते हैं, वे अनेकों का मार्ग परिष्कृत करते हैं और उनके पास ही सारा मानव-समुदाय जाता है।

अथ द्वितीया—

यमोनोगातुंप्रथमोविवेदनैषागव्यूतिरपभर्तवाउ ।
यत्रानःपूर्वेपितरःपरेयुरेनाजज्ञानाःपथ्याऽअनुस्वाः ॥ २ ॥

यमः । नः । गातुम् । प्रथमः । विवेद । न । एषा । गव्यूतिः ।
अपऽभर्तवै । ऊँ इति । यत्र । नः । पूर्वे । पितरः । पराऽईयुः ।
एना । जज्ञानाः । पथ्याः । अनु । स्वाः ॥ २ ॥

प्रथमः सर्वेषां मुख्योयमः नोस्माकं प्रजानां गातुं शुभाशुभनिमित्तं विवेद जानाति । एषा गव्यूतिः नापभर्तवा उ अतिशयज्ञानयोगाद्यमस्य एषा गव्यूतिः अयं मार्गः नकेनचिदपहर्तुमपनेतुं शक्यतइत्यर्थः । यत्र यस्मिन्मार्गेनोस्माकं पूर्वे पितरः परेयुः एतानेन मार्गेण गच्छन्तः जज्ञानाः जाताः सर्वे स्वाः स्वभूताः पथ्याः स्वकर्ममार्गभूतागतीः अनुगच्छन्ति ॥ २ ॥

२. सबमें मुख्य यम हमारे शुभाशुभ को जानते हैं। यम के मार्ग का कोई विनाश नहीं कर सकता। जिस पथ से हमारे पूर्वज गये हैं, उसी मार्ग से अपने-अपने कर्मानुसार सारे जीव जायेंगे।

आग्निमारुते मातलीकव्यैरित्येषा धाय्या । सूत्रितंच—इमंयममप्तस्तरमाहिसीदमातलीकव्यैर्यमोअंगिरोभिरुदीरतामवरउत्परासइति ।

मातलीकव्यैर्यमोअङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
याँश्चदेवावावृधुर्येचदेवान्त्स्वाहान्येस्वधयान्येमदन्ति ॥ ३ ॥

मातली । कव्यैः । यमः । अङ्गिरःऽभिः । बृहस्पतिः । ऋक्वऽभिः ।
ववृधानः । यान् । च । देवाः । ववृधुः । ये । च । देवान् ।
स्वाहा । अन्ये । स्वधया । अन्ये । मदन्ति ॥ ३ ॥

मातली मातलिरिन्द्रस्य सारथिः तद्वानिन्द्रोमातली सच कव्यैः कव्यभाग्भिः पितृभिः सह ववृधानोवर्धमानोभवति यमश्चांगिरोभिः पितृविशेषैः सह वर्धमानोभवति । तथा बृहस्पतिः ऋक्वभिः पितृविशेषैः सह वर्धमानोभवति तत्र देवाइन्द्रादयो यांश्च कव्यभागादीन् पितॄन् ववृधुर्वर्धयन्ति येच कव्यभागादयः पितरः देवानिन्द्रादीन् वर्धयन्ति तेषां मध्ये अन्ये इन्द्रादयः स्वाहामदन्ति स्वाहाकारेण हव्यन्ति अन्ये पितरः स्वधया स्वधाकारेण हव्यान्त ॥ ३ ॥

३. अपने सारथि (मातली) के प्रभु इन्द्र कव्यवाले पितरों की सहायता से बढ़ते हैं। यम अङ्गिरा नामक पितरों की सहायता से बढ़ते हैं। और बृहस्पति ऋक्व नामक पितरों की सहायता से बढ़ते हैं। जो देवों की संवर्द्धना करते हैं और जिनकी संवर्द्धना देवता करते हैं, सो सब बढ़ते हैं। कोई स्वाहा के द्वारा और कोई स्वधा के द्वारा प्रसन्न होते हैं।

महापितृयज्ञे यमस्य इमंयमेत्यादिके द्वे अनुवाक्ये इमंयमेत्येषा आग्निमारुतेपि धाय्या । सूत्रंतुपूर्वमेवोदाहृतं ।

सैषा सूक्ते चतुर्थी—

इमंयमप्तस्तरमाहिसीदाङ्गिरोभिःपितृभिःसंविदानः ।
आत्वामत्राःकविशस्तावहन्त्वेनाराजन्हविषामादयस्व ॥ ४ ॥

इमम् । यम । प्रऽस्तरम् । आ । हि । सीद । अंगिरःऽभिः ।
पितृऽभिः । सम्ऽविदानः । आ । त्वा । मन्त्राः । कविऽशस्ताः ।
वहन्तु । एना । राजन् । हविषा । मादयस्व ॥ ४ ॥

हे यमांगिरोभिः एतन्नामकैः पितृभिः संविदानः ऐकमत्यं गतस्त्वं इमं प्रस्तरं विस्तीर्णं यज्ञविशेषं आसीद आगत्योपविश । हि यस्मादेवं तस्माद् कविशस्ताः विद्वद्भिः ऋत्विग्भिः प्रयुक्तामंत्राः त्वा त्वां आवहन्तु।हेराजन् एना एतेन हविषा तुष्टोमादयस्व यजमानं हर्षय ॥४॥

४. यम, अङ्गिरा नामक पितरों के साथ इस विस्तृत यज्ञविशेष में आकर बैठो। ऋत्विकों के मंत्र तुम्हें बुलावें। राजन्, इस हवि से संतुष्ट होकर यजमान को प्रसन्न करो।

अङ्गिरोभिरागहियज्ञियेभिर्यमवैरूपैरिहमादयस्व ।
विवस्वन्तंहुवेयःपितातेस्मिन्यज्ञेबर्हिष्यानिषद्य ॥ ५ ॥ १४ ॥

अङ्गिरःऽभिः । आ । गहि । यज्ञियेभिः । यम । वैरूपैः ।
इह । मादयस्व । विवस्वन्तम् । हुवे । यः । पिता । ते ।
अस्मिन् । यज्ञे । बर्हिषि । आ । निऽसद्य ॥ ५ ॥ १४ ॥

हे यम वैरूपैः विविधरूपयुक्तैः वैरूपसामप्रियैर्वा यज्ञियेभिः यज्ञयोग्यैः अंगिरोभिः सहागहि आगच्छ । आगत्य च इहास्मिन् यज्ञे मादयस्व यजमानं हर्षय योविवस्वान् ते तव पितास्ति अस्मिन् यज्ञे तं विवस्वन्तं हुवे आह्वयामि सचास्तीर्णे बर्हिषि आनिषद्योपविश्य यजमानं हर्षयतु ॥ ५ ॥

५. यम, नाना रूपोंवाले याज्ञिक अङ्गिरा लोगों के साथ पधारो और इस यज्ञ में यजमान को प्रसन्न करो। तुम्हारे विवस्वान् नामक पिता को मैं इस यज्ञ में बुलाता हूँ। वह कुशों पर बैठकर यजमान को प्रसन्न करें।

॥ इति सप्तमस्य षष्ठे चतुर्दशोवर्गः ॥ १४ ॥

अथ षष्ठी—

आङ्गिरसोनःपितरोनवग्वाअथर्वाणोभृगवःसोम्यासः ।
तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ॥ ६ ॥

आङ्गिरसः । नः । पितरः । नवऽग्वाः । अथर्वाणः । भृगवः ।
सोम्यासः । तेषाम् । वयम् । सुऽमतौ । यज्ञियानाम् ।
अपि । भद्रे । सौमनसे । स्याम ॥ ६ ॥

अंगिरसः अंगिरोनामकाः अथर्वाणःअथर्वनामकाः भृगवोभृगुनामकाश्च नोस्माकं पितरो-नवग्वाः अभिनवगमनयुक्ताः सदा नूतनवत् प्रीतिजनकाइत्यर्थः ते च सोम्यासः सोमभर्हन्ती-ति सोम्याः यज्ञियानां यज्ञार्हाणां तेषां सुमतौ अनुग्रहयुक्तायां बुद्धौ वयं स्याम सर्वदा तिष्ठेम। अपिच सौमनसे भद्रे सौमनस्य कारणे कल्याणे फले स्याम सर्वदा तिष्ठेम ॥ ६ ॥

६. अङ्गिरा, अथर्वा और भृगु नामक पितृगण अभी-अभी पधारे हैं। वे सोम के अधिकारी हैं। यज्ञ-योग्य उन पितरों की अनुग्रह-बुद्धि में हम रहें। हम उनकी प्रसन्नता प्राप्त कर कल्याण-मार्गी बनें।

सत्रमध्ये दीक्षितस्य मरणे प्रेहिप्रेहीत्याद्याः पञ्चर्चस्तृतीयावर्जिता होत्राशंसनीयाः सूत्रितंच—प्रेहिप्रेहिपथिभिः पूर्व्येभिरितिपञ्चानां तृतीयामुद्धरेदिति।

प्रेहिप्रेहिपथिभिःपूर्व्येभिर्यत्रानःपूर्वेपितरःपरेयुः।
उभाराजानास्वधयामदन्तायमंपश्यासिवरुणंचदेवम् ॥ ७ ॥

प्र। इहि। प्र। इहि। पथिऽभिः पूर्व्येभिः। यत्र। नः। पूर्वे।
पितरः। पराऽईयुः। उभा। राजाना। स्वधया। मदन्ता।
यमम्। पश्यासि। वरुणम्। च। देवम् ॥ ७ ॥

यत्र यस्मिन् स्थाने नोस्माकं पूर्वे पुरातनाः पितरः पितामहादयः परेयुः पूर्व्येभिः पूर्वस्मिन् काले भवैः अनादिकालप्रवृत्तैरित्यर्थः पथिभिर्मार्गैः हे मत्पितः तत्स्थानं प्रेहिप्रेहि प्रगच्छ। गत्वा च स्वधया अमृतान्नेन मदन्ता मदन्तौ तृप्यन्तौ राजाना राजानौ उभा उभौ यमं देवं द्योतमानं वरुणं पश्यासि पश्य ॥ ७ ॥

७. जहाँ हमारे प्राचीन पितामह आदि गये हैं, उसी प्राचीन मार्ग से, हे (मृत) पितः, जाओ। स्वधा (अमृतान्न) से प्रहृष्ट-मना राजा यम तथा वरुणदेव को देखो। अथाष्टमी—

संगच्छस्वपितृभिःसंयमेनेष्टापूर्तेनपरमेव्योमन्।
हित्वायावद्यंपुनरस्तमेहिसंगच्छस्वतन्वासुवर्चाः ॥ ८ ॥

सम्। गच्छस्व। पितृऽभिः। सम्। यमेन। इष्टापूर्तेन। परमे।
विऽओमन्। हित्वाय। अवद्यम्। पुनः। अस्तम्। आ।
इहि। सम्। गच्छस्व। तन्वा। सुऽवर्चाः ॥ ८ ॥

हे मदीयपितः अतस्त्वं परमे उत्कृष्टे व्योमन् व्योमनि स्वर्गाख्ये स्थाने स्वभूतैः पितृभिः सह संगच्छस्व इष्टापूर्तेन श्रौतस्मार्तदानफलेन संगच्छस्व। ततइष्टापूर्तेन सहागम्य अवद्यं पा-

पं हित्वाय हित्वा परित्यज्य अस्तं त्रियमानाख्यं गृहं एहि आगच्छ। ततः सुवर्चाः तृतीयार्थे प्रथमा सुवर्चसा शोभनदीप्तियुक्तेन तन्वा स्वशरीरेण संगच्छस्व ॥ ८ ॥

८. पितः, उत्कृष्ट स्वर्ग में अपने पितरों के साथ मिलो। साथ ही अपने धर्मानुष्ठान के फल से भी मिलो। पाप को छोड़कर अस्त (त्रियमान) नामक गृह में पैठो और उज्ज्वल शरीर से मिलो।

पैतृमेधिक कर्मणि श्मशानायतनं प्रोक्षत्यपेतवीतेति। सूत्रितंच—गर्तोदकेन शमीशाखया त्रिः प्रसव्यमायतनं परिव्रजन् प्रोक्षत्यपेतवीतविचसर्पतातेति।

अपेतवीतविचसर्पतातोस्माएतंपितरोलोकमक्रन्।
अहोभिरद्भिरक्तुभिर्व्यक्तंयमोददात्यवसानमस्मै ॥ ९ ॥

अप। इत। वि। इत। वि। च। सर्पत। अतः। अस्मै। एतम्। पितरः। लोकम्। अक्रन्। अहःऽभिः। अत्ऽभिः। अक्तुऽभिः। विऽअक्तम्। यमः। ददाति। अवऽसानम्। अस्मै ॥ ९ ॥

श्मशाने पूर्वं स्थिताः हे पिशाचादयः अतोस्मात् मृतयजमानदहनस्थानात् अपेत अपगच्छत विशेषेणगच्छत विसर्पत च इदं स्थानं परित्यज्य नानाभावेन दूरतरं देशं गच्छतेत्यर्थः। पितरः अस्मै मृतयजमानस्यार्थाय एतं लोकं इदं दहनस्थानं अक्रन् परित्यज्य नानाभावेन यमस्याज्ञया अन्वकुर्वन् यमोपि अहोभिर्दिवसैः अद्भिः अभ्युक्षणोदकैः अक्तुभीराविभिः व्यक्तं संगतं शुद्धिनिमित्तैः कालोदकादिभिः शोधितमित्यर्थः अवसानं दहनस्थानं अस्मै मृतयजमानस्यार्थाय ददाति दत्तवान् ॥ ९ ॥

९. श्मशानघाट पर स्थित पिशाचादिको, इस स्थान से चले जाओ, हट जाओ, दूर होओ। पितरों ने इस मृत यजमान के लिए इस स्थान को बनाया है। यह स्थान दिवसों, जल-द्वारा और रात्रि के द्वारा शोभित है। यम ने इस स्थान को मृत व्यक्ति को दिया है।

अनुस्तरण्यावृक्षौ पार्श्वयोरात्रफलाकृती तावुद्धृत्य प्रेतस्यहस्तयोर्निदधात्यतिद्रवसारमेया विति द्वाभ्यां। सूत्रितंच—वृक्षावुद्धृत्यपाण्योरादध्यादतिद्रवसारमेयौश्वानाविति।

तत्रैषा दशमी—

अतिद्रवसारमेयौश्वानौचतुरक्षौशबलौसाधुनापथा।
अथापितॄन्त्सुविदत्राँउपेहियमेनयेसधमादंमदन्ति ॥ १० ॥१५॥

अति। द्रव। सारमेयौ। श्वानौ। चतुःऽअक्षौ। शबलौ। साधुना। पथा। अथ। पितॄन्। सुऽविदत्रान्। उप। इहि। यमेन। ये। सधऽमादम्। मदन्ति ॥ १० ॥ १५ ॥

हे अग्ने साधुना पथा समीचीनेन मार्गेण उभौ सारमेयौ श्वानौ अतिद्रव श्वानावुभौ अतिद्रव अतिक्रम्यगच्छ। यमसंबन्धिनौ यौ श्वानौ प्रेतस्य बाधकौ तौ परित्यज्य समीचीनेन मार्गेण प्रेतं नयेत्यर्थः। कीदृशौ श्वानौ सारमेयौ सरमानाम काचित्प्रसिद्धा देवशुनी तस्याः पुत्रौ चतुरक्षौ उपरिभागे पुनरप्यक्षिद्वयं ययोस्तादृशौ शबलौ कर्बुरवर्णौ। अथ शोभनमार्गेण गमनानन्तरं ये पितरोयमेन सधमादं सहर्षं मदन्ति प्राप्नुवन्ति तान् सुविदत्रान् सुष्ठु अभिज्ञान् पितॄन् उपेहि उपगच्छ ॥ १० ॥

१०. मृत पितः, चार आँखों और विचित्र वर्णवाले ये जो दो कुक्कुर हैं, इनके पास से शीघ्र चले जाओ। जो सुविज्ञ पितर यम के साथ सदा आमोद के साथ रहते हैं, उत्तम मार्ग से उन्हीं के पास जाओ।

॥ इति सप्तमस्य षष्ठे पंचदशोवर्गः ॥ १५ ॥

यौते॒श्वानौ॑यमरक्षि॒तारौ॑चतुरक्षौ॒पथि॒रक्षी॑नृ॒चक्ष॑सौ ।
ताभ्या॑मेनं॒परि॑देहिराजन्स्व॒स्तिचा॑स्माअनमी॒वंच॑धेहि ॥ ११ ॥

यौ । ते॒ । श्वानौ॑ । य॒म॒ । र॒क्षि॒तारौ॑ । च॒तुः॒ऽअ॒क्षौ ।
प॒थि॒रक्षी॒ इति॑ प॒थि॒ऽरक्षी॑ । नृ॒ऽचक्ष॑सौ । ताभ्या॑म् । ए॒न॒म् । परि॑ । दे॒हि॒ ।
रा॒ज॒न् । स्व॒स्ति । च॒ । अ॒स्मै॒ । अ॒न॒मी॒वम् । च॒ । धे॒हि॒ ॥ ११ ॥

हे राजन् हे यम ते त्वदीयौ यौ श्वानौ विद्येते ताभ्यां श्वभ्यां हे राजन् यम एनं प्रेतं परिदेहि रक्षार्थं प्रयच्छ। कीदृशौ श्वानौ रक्षितारौ यमगृहस्य रक्षकौ चतुरक्षौ अक्षिचतुष्टययुक्तौ पथिरक्षी मार्गस्य रक्षकौ नृचक्षसौ मनुष्यैः ख्याप्यमानौ श्रुतिस्मृतिपुराणाभिज्ञाः पुरुषास्तौ प्रख्यापयन्ति ताभ्यां श्वभ्यां दत्वा अस्मै प्रेताय स्वस्ति च क्षेममपि अनमीवं च रोगाभावमपि धेहि संपादय ॥ ११ ॥

११. यम, तुम्हारे गृह के रक्षक, चार आँखोंवाले, मार्ग के रक्षक और मनुष्यों के द्वारा प्रशंसनीय जो दो कुक्कुर हैं, उनसे इस मृत व्यक्ति की रक्षा करो। राजन्, इसे कल्याणभागी और नीरोगी करो।

अथ द्वादशी—

उरू॒णसा॑वसु॒तृपा॑उदुंब॒लौय॒मस्य॑दू॒तौच॑रतो॒जना॒ँअनु॑ ।
ताव॒स्मभ्य॑दृ॒शये॒सूर्या॑य॒पुन॑र्दाता॒मसु॑म॒द्येहभ॒द्रम् ॥ १२ ॥

उरु॑ऽनसौ । अ॒सु॒ऽतृपौ॑ । उ॒दु॒ंब॒लौ । य॒मस्य॑ । दू॒तौ । च॒र॒तः॒ ।
जना॑न् । अनु॑ । तौ । अ॒स्मभ्य॑म् । दृ॒शये॑ । सूर्या॑य । पुनः॑ ।
दा॒ता॒म् । असु॑म् । अ॒द्य । इ॒ह । भ॒द्रम् ॥ १२ ॥

यमस्य संबन्धिनौ दूतौ श्वानौ जनाननु प्राणिनौ लक्षीकृत्य सर्वस्य चरतः। कीदृशौ उरूणसौ दीर्घनासिकायुक्तौ असुतृपौ परकीयान् प्राणान् स्वीकृत्य तैस्तृप्यन्तौ उदुंबलौ उरुबलौ विस्तीर्णबलौ तावुभौ दूतौ सूर्याय दृशये सूर्यस्यदर्शनार्थं अद्य दिने इह कर्मणि भद्रमद्य सम्यक्चीनं प्राणं पुनरस्मभ्यं दातां अदत्तां ॥ १२ ॥

१२. लम्बी नाकोंवाले, दूसरों का प्राण-भक्षण करके तृप्त होनेवाले, मनुष्यों को लक्ष्य करके विचरण करनेवाले और विस्तृत बलवाले जो दो यम-दूत (कुक्कुर) हैं, वे आज यहां हमें, सूर्य के दर्शन के लिए, समीचीन प्राण दें।

यमायसोमंसुनुतयमायजुहुताहविः।
यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः॥ १३ ॥

यमाय। सोमम्। सुनुत। यमाय। जुहुत। हविः। यमम्।
ह। यज्ञः। गच्छति। अग्निऽदूतः। अरम्ऽकृतः॥ १३ ॥

हे ऋत्विजोयमाय यमदेवार्थं सोमं सुनुत लतात्मकं सोममभिषुणुत। तथा यमाय यमार्थं हविर्जुहुत अग्निदूतः अस्मिन्यज्ञे सोमोयमग्निदूतः। अग्नेर्दूतत्वमन्यत्राम्नातं—अग्निर्देवानांदूतआसीदिति। अरंकृतः बहुभिर्द्रव्यैरलंकाररूपैर्युक्तः तादृशोयज्ञोयमं ह यममेव गच्छति॥ १३ ॥

१३. ऋत्विको, यम के लिए सोम प्रस्तुत करो। यम के लिए हवि का हवन करो। जिस यज्ञ के दूत अग्नि हैं और जिसे नाना द्रव्यों से समन्वित किया गया है, वह यज्ञ यम की ओर जाता है।

अथ चतुर्दशी—

यमायघृतवद्धविर्जुहोतप्रचनिष्ठत।
सनोदेवेष्वायमद्दीर्घमायुःप्रजीवसे॥ १४ ॥

यमाय। घृतऽवत्। हविः। जुहोत। प्र। च। निष्ठत। सः। नः।
देवेषु। आ। यमत्। दीर्घम्। आयुः। प्र। जीवसे॥ १४ ॥

हे ऋत्विजोयूयं यमाय घृतवदाज्येन संयुक्तं हविः पुरोडाशादिकं जुहोत जुहुत प्रतिष्ठत च यमं यूयमुपतिष्ठध्वं च देवेषु मध्ये सयमोदेवः प्रजीवसे प्रकृष्टजीवनार्थं नोस्माकं दीर्घमायुः आयमत् प्रयच्छतु॥ १४ ॥

---

१ तै० सं० २.५.८.।

१४. ऋत्विको, तुम यम के लिए घृत से युक्त हवि का हवन करो और यम की सेवा करो। देवों के बीच यम, हमारे दीर्घ जीवन के लिए, लम्बी आयु दें।

यमायमधुमत्तमंराज्ञेहव्यंजुहोतन ।
इदंनमऋषिभ्यःपूर्वजेभ्यःपूर्वेभ्यःपथिकृद्भ्यः ॥ १५ ॥

यमाय । मधुमत्ऽतमम् । राज्ञे । हव्यम् । जुहोतन । इदम् । नमः । ऋषिऽभ्यः । पूर्वऽजेभ्यः । पूर्वेभ्यः । पथिकृत्ऽभ्यः ॥ १५ ॥

हे ऋत्विजोयमाय राज्ञे मधुमत्तमं अतिशयेन मधुरं हव्यं पुरोडाशादिकं हविर्जुहोतन जुहुत । पूर्वजेभ्यः सृष्ट्यादावुत्पन्नेभ्यः अतएव पूर्वेभ्यः अस्मत्तः पूर्वभाविभ्यः पथिकृद्भ्यः शोभनमार्गकारिभ्यः ऋषिभ्यः यइदं प्रत्यक्षं यथा भवति तथा नमोस्तु ॥ १५ ॥

१५. ऋत्विको, राजा यम के लिए अत्यन्त मिष्ट हवि का हवन करो। हमसे पहले शोभन मार्ग बनानेवाले ऋत्विकों के लिए यह नमस्कार है।

त्रिकद्रुकेभिःपतति शळुर्वीरेकमिद्बृहत् ।
त्रिष्टुब्गायत्रीछन्दांसिसर्वातायमआहिता ॥ १६ ॥ १६ ॥

त्रिऽकद्रुकेभिः । पतति । षट् । उर्वीः । एकम् । इत् । बृहत् । त्रिऽस्तुप् । गायत्री । छन्दांसि । सर्वा । ता । यमे । आऽहिता ॥ १६ ॥ १६ ॥

त्रिकद्रुकेभिः द्वितीयार्थे तृतीयैषा त्रिकद्रुकान् ज्योतिर्गौरायुरिति त्रयोयागविशेषाउच्यन्ते तान् प्रत्यंगभावाय संरक्षणार्थं च पतति यमस्तान् प्राप्नोति षट्संख्याकाः उर्वीः भूमीः कृताकृतप्रत्यवेक्षणाय प्राप्नोति । ताश्चोर्व्यः शाखान्तरमंत्रेण समाम्नातः—षण्मोर्वीरंहसस्पान्तुद्यौश्चपृथिवीचापश्चोषधयश्चोर्वर्चसूनृताचेति । एकमिद् एकमेव बृहद् महद् जगद्यमश्च प्रतिपादनीयः प्राप्नोति । किंच यानि त्रिष्टुप्गायत्र्यादीनि छन्दांसि सन्ति सर्वा ता सर्वाणि तानि छन्दांसि यमे आहिता आहितानि ऋत्विग्भिः स्तुतित्वेनावस्थितानि ॥ १६ ॥

१६. यमराज त्रिकद्रुक (ज्योति, गौ और आयु) नामक यज्ञ के अधिकारी हैं। यम छः स्थानों (द्युलोक, भूलोक, जल, उद्भिज्ज, उर्क और सूनृत) में रहते हैं। वे विराट् संसार में विचरण करते हैं। त्रिष्टुप्, गायत्री आदि छन्दों में यम की स्तुति की जाती है।

॥ इति सप्तमस्य षष्ठे षोडशोवर्गः ॥ १६ ॥

उदीरतामिति चतुर्दशर्चं पंचदशं सूक्तम् । अत्रानुक्रम्यते—उदीरतां षळूना शंखः पित्र्यं जगत्येकादशीति । यामायनाः परे पंचेति वचनात् यमपुत्रः शंखाख्यऋषिः अग्निष्वात्ताइत्ये-

कादशी जगती शिष्टास्त्रिष्टुभः पितरोदेवता । गतः सूक्तविनियोगः। अष्टकायां उदीरतामवरइत्याद्याअष्टर्चहोमार्थाः । सूत्रितंच—उदीरतामवरउत्परासइत्यष्टाभिर्हुत्वेति महापितृयज्ञे पितरः सोमयः तइत्यस्यानुवाक्या उदीरतामित्येषा । सूत्रितंच—पितरोग्निष्वात्तायमउदीरतामवरउत्परासइति । आग्निमारुतेप्येषा धाय्या । सूत्रितंच—मावलीकव्यैर्यमोअंगिरोभिरुदीरतामवरउत्परासइति । तत्र प्रथमा—

उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः ।
असुंयईयुरवृकाऋतज्ञास्तेनोवन्तुपितरोहवेषु ॥ १ ॥

उत् । ईरताम् । अवरे । उत् । परासः । उत् । मध्यमाः । पितरः ।
सोम्यासः । असुम् । ये । ईयुः । अवृकाः । ऋतज्ञाः ।
ते । नः । अवन्तु । पितरः । हवेषु ॥ १ ॥

त्रिविधाः पितरः उत्तमामध्यमाअधमाश्चेति यथाविधं श्रौतं कर्मानुष्ठाय पितृत्वं प्राप्ताउत्तमाः स्मार्तकर्ममात्रपरामध्यमाः अत्रापिकैश्चित् संस्कारैः विकलाअधमाः एतदेवाभिप्रेत्य ये अग्निदग्धायेअनग्निदग्धाइत्यादिमंत्रे समाम्नाताः।तेष्ववरे निकृष्टाः उदीरतां उत्तमं हविः प्राप्नुवन्तु । परासः उत्तमाः पितरः उदीरतां मध्यमाः पितरः उदीरतां ते सर्वेप्यस्मद्विषये सोम्यासः सोम्याअनुग्रहपराः सन्तु । ये पितरः अवृकाः वृकवदरण्यश्वावदस्मासु हिंसामकुर्वंतः ऋतज्ञाः अस्मदनुष्ठितं यज्ञं जानन्तः असुमस्मत्प्राणमीयुः रक्षितुं प्राप्तास्ते पितरः हवेष्वस्मदीयेष्वाह्वानेषु नोस्मानवन्तु रक्षन्तु ॥ १ ॥

१. उत्तम, मध्यम और अधम आदि तीन श्रेणियों के पितर लोग हमारे प्रति अनुग्रहयुक्त होकर होमीय द्रव्य का ग्रहण करें। जो पितर अहिंसक होकर और हमारे धर्मानुष्ठान के प्रति दृष्टि रखकर हमारी प्राण-रक्षा करने के लिए आये हैं, वे, यज्ञ-काल में, हमारी रक्षा करें।

महापितृयज्ञे पितरोबर्हिषदइत्यस्येदंपितृभ्यइति द्वितीयानुवाक्या । सूत्रंतु पूर्वमेवोदाहृतं। आग्निमारुते इदंपितृभ्यइत्येषा धाय्या । सूत्रितंच—आहंपितृन्त्सुविदत्राँअवित्सीदंपितृभ्योनमोअस्त्वग्नस्वादुष्किलायमितिचतस्रइति । महापितृयज्ञे पितरोबर्हिषदइत्यस्य द्वितीयानुवाक्या । सूत्रंतु पूर्वमुदाहृतं ।

---

२ ऋ० सं० ७. ६. १९ ।

तत्रैषा द्वितीया—

इदंपितृभ्योनमोअस्त्वद्यये पूर्वासोयउपरासईयुः ।
येपार्थिवेरजस्यानिषत्तायेवानूनंसुवृजनासुविक्षु ॥ २ ॥

इदम् । पितृऽभ्यः । नमः । अस्तु । अद्य । ये । पूर्वासः । ये ।
उपरासः । ईयुः । ये । पार्थिवे । रजसि । आ । निऽसत्ताः ।
ये । वा । नूनम् । सुऽवृजनासु । विक्षु ॥ २ ॥

पूर्वासः यजमानोत्पत्तेः पूर्वमुत्पन्नाः ज्येष्ठभ्रातृपितामहादयोये ईयुः पितृलोकं प्राप्ताः येचान्ये उपरासो यजमान जन्मनउपर्युत्पन्नाः कनिष्ठभ्रातृस्वपुत्रादयः ईयुः पितृलोकं प्राप्ताः येप्यन्ये पार्थिवे पृथिवीसंबन्धिनि रजसि रजोगुणकार्येस्मिन्कर्मणि आनिषत्ताः हविः स्वीकर्तुमागत्योपविष्टाः ये वा केचिदन्ये बन्धुवर्गरूपाः पितरः विक्षु बन्धुरूपासु नूनं निश्चयेन आनिषत्ताः श्राद्धादिस्वीकारायागत्योपविष्टाः । कीदृशीषु विक्षु सुवृजनासु वृज्यते परित्यज्यते दारिद्र्यमनेनेति वृजनं धनं शोभनं वृजनं यासां ताः सुवृजनाः तादृशीषु धनसमृध्या श्राद्धादिकर्मपरास्वित्यर्थः। सर्वेभ्यउक्तेभ्यः पितृभ्यः अद्यास्मिन् कर्मणीदं नमोस्तु अयमाहुतिप्रदानपूर्वकोनमस्कारो भवतु ॥ २ ॥

२. जो पितर (पितामहादि) आगे और जो (कनिष्ठ भ्राता आदि) पीछे मरे हैं, जो पृथिवी पर आये हैं, अथवा जो भाग्यशाली लोगों के बीच हैं, उन सबको आज यह नमस्कार है।

सैषा तृतीया—

आहंपितॄन्त्सुविदत्राँअवित्सिनपातंचविक्रमणंचविष्णोः ।
बर्हिषदोयेस्वधयासुतस्यभजन्तपित्वस्तइहागमिष्ठाः ॥ ३ ॥

आ । अहम् । पितॄन् । सुऽविदत्रान् । अवित्सि । नपातम् । च ।
विऽक्रमणम् । च । विष्णोः । बर्हिऽसदः । ये । स्वधया ।
सुतस्य । भजन्त । पित्वः । ते । इह । आऽगमिष्ठाः ॥ ३ ॥

अहं यजमानः सुविदत्रान् मदीयां भक्तिं सुष्ठु जानतः पितॄन् आअवित्सि आभिमुख्येन लब्धवानस्मि । विष्णोर्व्यापिनोयज्ञस्य नपातं च विनाशाभावं च विक्रमणं विशेषेणप्रवृत्तिं च लब्धवानस्मि ये पितरोबर्हिषदः बर्हिषि सीदन्ति ते इहास्मिन्कर्मणि आगमिष्ठाः अतिशयेना-

गताः आदरपूर्वं समागत्य स्वधया पुरोडाशाद्यन्नेन सह सुतस्याभिषुतस्य सोमलक्षणस्य पित्वः पितोरन्नस्य भागं भजन्त सेवन्ते उपयुंजते ॥ ३ ॥

३. पितर लोग भली भाँति परिचित हैं, मैंने उनको पाया है, इस यज्ञ के सम्पादन का उपाय भी मैंने पाया है। जो पितर कुशों पर बैठकर हव्य के साथ सोमरस का ग्रहण करते हैं, वे सब पधारे हैं।

बर्हिषदः पितरऊत्य१र्वागिमावोहव्याचकृमाजुषध्वम् ।
तआगतावसाशंतमेनाथानःशंयोररपोदधात ॥ ४ ॥

बर्हिऽसदः । पितरः । ऊती । अर्वाक् । इमा । वः । हव्या ।
चकृम । जुषध्वम् । ते । आ । गत । अवसा । शम्ऽतमेन ।
अथ । नः । शम् । योः । अरपः । दधात ॥ ४ ॥

हे बर्हिषदः बर्हिषि यज्ञे सीदन्तीति बर्हिषदः अद्यापि ये वैयज्ञानस्तेपितरोबर्हिषदइत्यत्र श्रुतत्वात् । यागं कृत्वा प्रेत्य पितृलोकं प्राप्ताः बर्हिषदः तादृशा हे पितरः अर्वागर्वाचीनानामस्माकमूती रक्षा भवद्भिः कर्तव्येति शेषः । वोयुष्मदर्थं इमा हव्या एतानि हवींषि चकृम अतस्तानि जुषध्वं ते हविर्जुष्टवन्तोयूयं शंतमेन सुखतमेन अवसा रक्षणेन निमित्तभूतेन आगत आभिमुख्येनास्मान् प्राप्नुत । अथानन्तरं नोस्मभ्यं शं सुखं योः दुःखवियोगं अरपः पापरहितं च दधात दत्त ॥ ४ ॥

४. कुशों पर बैठनेवाले पितरो, इस समय हमें आश्रय दो। तुम लोगों के लिए ये सारे द्रव्य प्रस्तुत हैं, इनका भोग करो। इस समय आओ। हमारी रक्षा करो और हमारा उत्तम मङ्गल करो। हमें कल्याणभागी करो। हमें अकल्याण और पाप से दूर करो।

महापितृयज्ञे पितरः सोमवन्तइत्यस्य याज्या उपहूताः पितरइत्येषा । सूत्रितंच—उपहूताः पितरः सोम्यासस्त्वंसोमप्रचिकितोमनीषेति ।

सैषा सूक्ते पंचमी—

उपहूताःपितरःसोम्यासोबर्हिष्येषुनिधिषुप्रियेषु ।
तआगमन्तुतइहश्रुवन्त्वधिब्रुवन्तुतेवन्त्वस्मान् ॥ ५ ॥ १७ ॥

उपऽहूताः । पितरः । सोम्यासः । बर्हिष्येषु । निऽधिषु ।
प्रियेषु । ते । आ । गमन्तु । ते । इह । श्रुवन्तु । अधि ।
ब्रुवन्तु । ते । अवन्तु । अस्मान् ॥ ५ ॥ १७ ॥

सोम्यासः सोम्याः अस्मदनुग्रहपराः सोमसंपादिनोवा पितरः बर्हिष्येषु यागार्हेषु प्रियेषु तृप्तिकरेषु निधिषु निधिसदृशेषु हविःषु निमित्तभूतेषु सत्सु उपहूताअस्माभिराहूतास्ते पितरः आगमन्तु आगच्छंतु आगत्य च इहास्मिन्कर्मणि अस्माभिः प्रयुक्ताः स्तुतीः श्रुवन्तु शृण्वन्तु। श्रुत्वा च अधिब्रुवन्तु साधुरयं यजमानइत्यादरेण कथयन्तु ते तादृशाः पितरः अस्मानवन्तु रक्षन्तु ॥ ५ ॥

५. कुशों के ऊपर ये सारे मनोहर द्रव्य रक्खे हुए हैं। इनका और सोमरस का भोग करने के लिए पितर लोग बुलाये गये हैं। वे पधारें, हमारी स्तुति को ग्रहण करें, आह्लाद प्रकट करें और हमारी रक्षा करें।

॥ इति सप्तमस्य षष्ठे सप्तदशोवर्गः ॥ १७ ॥

आच्याजानुदक्षिणतोनिषद्येमंयज्ञमभिगृणीतविश्वे ।
माहिंसिष्टपितरःकेनचिन्नोयद्वआगःपुरुषताकराम ॥ ६ ॥

आऽअच्य्य । जानु । दक्षिणतः । निऽसद्य । इमम् । यज्ञम् । अभि । गृणीत । विश्वे । मा । हिंसिष्ट । पितरः । केन । चित् । नः । यत् । वः । आगः । पुरुषता । कराम ॥ ६ ॥

पितृणामयं स्वाभाविकोधर्मः अथैनं पितरः प्राचीनावीतिनः सव्यं जान्वाच्येति वचनात्। हे पितरः विश्वे सर्वे यूयं जानु आच्य भूमौ निपात्य दक्षिणतः दक्षिणपार्श्वे निषद्योपविश्य इममस्मदीयं यज्ञं अभिगृणीत अभिष्टुत विशिष्टतृप्तियोगात्परया प्रीत्या सगुणोयं यज्ञइति च शंसतेत्यर्थः। अपिच वोयुष्माकं यत्किंचित्कर्मवैगुण्यजनितं आगः अपराधं पुरुषता मनुष्यत्वेन हेतुना कराम वयं कृतवन्तः हे पितरः तेन केनचिदप्यपराधेन नोस्मान् माहिंसिष्ट ॥ ६ ॥

६. पितरो, तुम लोग दक्षिण तरफ़ घुटने टेककर पृथिवी पर बैठते हुए इस यज्ञ की प्रशंसा करो। हम मनुष्य हैं; इसलिए हमसे अपराध होना संभव है। परन्तु उसके लिए हमारी हिंसा नहीं करना।

अथ सप्तमी—

आसीनासोअरुणीनामुपस्थेरयिंधत्तदाशुषेमर्त्याय ।
पुत्रेभ्यःपितरस्तस्यवस्वःप्रयच्छततइहोर्जंदधात ॥ ७ ॥

आसीनासः । अरुणीनाम् । उपऽस्थे । रयिम् । धत्त । दाशुषे । मर्त्याय । पुत्रेभ्यः । पितरः । तस्य । वस्वः । प्र । यच्छत । ते । इह । ऊर्जम् । दधात ॥ ७ ॥

अरुणीनामारोचमानानां ज्वालानां वा देवतानां वा उपस्थे समीपस्थाने वेद्याख्ये आसीनासः उपविष्टाः पितरोयूयं दाशुषे हविर्दत्तवते मर्त्याय मनुष्याय यजमानाय रयिं धनं धत्त दत्त हे पितरोयूयं तस्य यजमानस्य पुत्रेभ्यः वस्वोवसु धनं प्रयच्छत ते तादृशायूयं इहास्मिन्नस्मदीये कर्मणि ऊर्जं धनं दधात निधत्त ॥ ७ ॥

७. लोहित शिखा के पास बैठनेवाले इन दाताओं को धन दो। पितरो, हमके पितरों को धन दो—उन्हें इस यज्ञ में उत्साहित करो।

येनःपूर्वेपितरःसोम्यासोनूहिरेसोमपीथंवसिष्ठाः ।
तेभिर्यमःसंरराणोहवींष्युशन्नुशद्भिःप्रतिकाममत्तु ॥ ८ ॥

ये । नः । पूर्वे । पितरः । सोम्यासः । अनुऽऊहिरे । सोमऽपीथम् ।
वसिष्ठाः । तेभिः । यमः । सम्ऽरराणः । हवींषि । उशन् ।
उशत्ऽभिः । प्रतिऽकामम् । अत्तु ॥ ८ ॥

सोम्यासः सोमसंपादिनोवसिष्ठाः वस्तृतमाः कृताच्छादनाः धनवत्तमावा नोस्माकं ये पूर्वे पितरः सोमपीथं सोमपानं अनूहिरे आनुपूर्व्येण देवेभ्यश्च पितृभ्यश्च प्रामुवन्तः दत्तवन्तइत्यर्थः। उशन् पितृभिः सहसंभोगं कामयमानोयमः पितृपतिः उशद्भिर्यमेन सह संभोगं कामयमानैस्तेभिस्तैरस्मदीयैः पितृभिः सह रराणोरममाणः हवींषि अस्माभिर्दत्तानि प्रतिकामं कामं प्रति अत्तु यानियानि हवींषि कामयते तानितानि भक्षयत्वित्यर्थः ॥ ८ ॥

८. जिन सोमपायी प्राचीन पितरों ने उत्तम परिच्छद का धारण करके, यथानियम, सोम पान किया था, वे भी हवि की अभिलाषा करते हैं—यम भी कामना करते हैं। उनके साथ यम सुखी होकर इन होमीय द्रव्यों का यथेच्छ भोजन करते हैं।

महापितृयज्ञे अग्नेः कव्यवाहनस्य येतातृपुरित्येषा प्रथमानुवाक्या । सूत्रितंच—येतातृपुर्देवत्राजेहमानास्त्वदग्नेकाव्यात्वन्मनीषाइति ।

सैषा सूक्ते नवमी—

येतातृषुर्देवत्राजेहमानाहोत्राविदःस्तोमतष्टासोअर्कैः ।
आग्नेयाहिसुविदत्रेभिरर्वाङ्सत्यैःकव्यैःपितृभिर्घर्मसद्भिः ॥ ९ ॥

ये । ततृषुः । देवऽत्रा । जेहमानाः । होत्राऽविदः । स्तोमऽतष्टासः ।
अर्कैः । आ । अग्ने । याहि । सुऽविदत्रेभिः । अर्वाङ् ।
सत्यैः । कव्यैः । पितृऽभिः । घर्मसत्ऽभिः ॥ ९ ॥

देवत्रा देवान् जेहमानाः क्रमेण गच्छन्तः क्रमेण देवत्वं प्राप्ताइत्यर्थः। होत्राविदः यज्ञान् सम्यक्कर्तुं वेदितारः अर्कैरर्चनीयैः स्तोत्रैः स्तोमतष्टासः स्तोमानां च सम्यक्कर्तारः ये पितरः तातृषुः तृष्यन्ति हे अग्ने त्वं तैः पितृभिः आ अर्वाङ् अस्मदभिमुखः आयाहि आगच्छ। कीदृशैः सुविदत्रेभिः सुविदत्रैः सत्यैरविसंवादिभिः कव्यैः कव्यं नाम पितृदेवत्यं हविः तत्संबन्धिभिः यद्वा कव्यैः कविभिर्मेधाविभिः स्वार्थिकोयत् घर्मसद्भिः यज्ञसादिभिः ॥ ९ ॥

९. अग्नि, जो पितर हवन करना जानते थे और अनेक ऋचाओं की रचना करके स्तोत्र प्रस्तुत करते थे और जो, अपने कर्म के प्रभाव से, इस समय, देवत्व की प्राप्ति कर चुके हैं, यदि वे क्षुधा-तृष्णावाले हों, तो उन्हें लेकर हमारे पास आओ। वे विशेष परिचित हैं। वे यज्ञ में बैठते हैं। उन पितरों के लिए यह उत्कृष्ट हवि है।

येस॒त्यासो॑हवि॒रदो॑हवि॒ष्पाइन्द्रे॑णदे॒वैःस॒रथं॒दधा॑नाः।
आग्ने॑याहिस॒हस्रं॑देवव॒न्दैःपरै॒ःपूर्वै॑ःपि॒तृभि॑र्घर्म॒सद्भिः॑ ॥ १० ॥१८॥

ये। स॒त्यासः॑। ह॒विः॒ऽअदः॑। ह॒विः॒ऽपाः। इन्द्रे॑ण। दे॒वैः। स॒ऽरथ॑म्। दधा॑नाः। आ। अ॒ग्ने॒। या॒हि॒। स॒हस्र॑म्। दे॒व॒ऽव॒न्दैः। परैः॑। पूर्वैः॑। पि॒तृऽभिः॑। घ॒र्म॒सत्ऽभिः॑ ॥ १० ॥ १८ ॥

सत्यासः सत्याय पितरः हविरदः भक्षणयोग्यस्य हविषः अत्तारोभक्षयितारः हविष्पाः पानयोग्यस्य हविषः पातारः इन्द्रेण देवैः सरथं समानमेकं तुल्यं रथं दधानाः लडर्थे शानच् गमनाय सदा धारयन्ति हे अग्ने तैः पितृभिः सह आयाह्यागच्छ। कीदृशः सहस्रं तृतीयार्थे प्रथमा सहस्रेण बहुभिरित्यर्थः देववन्दैः देवसंबन्धिभिः स्तोत्रैर्युक्ताः परैः परकालीनैः पूर्वैः पूर्वकालीनैः घर्मसद्भिः यज्ञसादिभिः महावीरसादिभिः आदित्यसादिभिर्वा ॥ १० ॥

१०. हे अग्नि! जो साधु-स्वभाव पितर लोग देवों के साथ, एकत्र होकर, हवि का भक्षण और पान करते हैं और इन्द्र के साथ एक रथ पर चढ़ते हैं, उन सब देवाराधक, यज्ञ के अनुष्ठाता, प्राचीन तथा आधुनिक पितरों के साथ आओ। ॥ इति सप्तमस्य षष्ठेष्टादशोवर्गः ॥ १८ ॥

महापितृयज्ञे पितरोग्निष्वात्ताइत्यस्य अग्निष्वात्ताः पितरइत्येषा प्रथमानुवाक्या। सूत्रितंच—अग्निष्वात्ताःपितरएहगच्छत येचेहपितरोयेचनेहेति।

तत्रैकादशी—

अग्नि॑ष्वात्ताःपितर॒एह॒गच्छ॒तसदः॑सद॒ःसदत॒सुप्रणीतयः।
अ॒त्ताह॒वींषि॒प्रय॑तानिब॒र्हिष्यथा॑र॒यिंसर्व॑वीरंदधातन ॥ ११ ॥

अग्निऽस्वात्ताः । पितरः । आ । इह । गच्छत । सदःऽसदः ।
सदत । सुऽप्रनीतयः । अत्त । हवींषि । प्रऽयतानि । बर्हिषि ।
अथ । रयिम् । सर्वऽवीरम् । दधातन ॥ ११ ॥

अग्निष्वात्ताः अग्निनास्वादिताः एतन्नामकाः पितरः यूयं इहास्मिन् पितृकर्मणि आगच्छत । आगत्य च हे सुप्रणीतयः अभिपूजितप्रणयनायूयं सदःसदः स्वस्वस्थानं सदत सीदत तत्रतत्र स्थाने यथेष्टमुपविशतेत्यर्थः । उपविश्य च बर्हिष्यासादितानि प्रयतानि शुचीनि हवींषि अत्त भक्षयत । अथानन्तरं सर्ववीरं सर्वैर्वीरैः पुत्रपौत्रैरुपेतं रयिं धनं दधातन अस्मभ्यंदत्त ॥ ११ ॥

११. अग्नि के द्वारा स्वादित (अग्निष्वात्त नामक) पितरो, यहाँ आओ और एक-एक कर सब लोग अपने-अपने आसन पर बैठो। अभिपूजित पितरो, कुशों पर परसे हुए शुद्ध हवि का भक्षण करो। अनन्तर पुत्र-पौत्र आदि से युक्त धन हमें दो।

महापितृयज्ञे वषट्कारक्रियायां त्वमग्नईळितइत्येषा स्विष्टकृतोयाज्या । सूत्रितंच—योग्निःकव्यवाहनस्त्वमग्नईळितोजातवेदइतिसंयाज्येति ।

त्वमग्नईळितोजातवेदोवाड्हव्यानिसुरभीणिकृत्वी ।
प्रादाःपितृभ्यःस्वधयातेअक्षन्नद्धित्वंदेवप्रयताहवींषि ॥ १२ ॥

त्वम् । अग्ने । ईळितः । जातऽवेदः । अवाट् । हव्यानि ।
सुरभीणि । कृत्वी । प्र । अदाः । पितृऽभ्यः । स्वधया । ते ।
अक्षन् । अद्धि । त्वम् । देव । प्रऽयता । हवींषि ॥ १२ ॥

हे जातवेदः जातं सर्वं जगद्वेत्तीति जातवेदाः तथाविध हे अग्ने ईळितः अस्माभिः स्तुतस्त्वं हव्यानि अस्मदीयानि हवींषि सुरभीणि सुगन्धीनि कृत्वी कृत्वा अवाट् हवनं कृतवानसि । कृत्वाच पितृभ्यः प्रादाः । ते च पितरः स्वधया स्वधाकारेण दत्तं हविः अक्षन् अदन्तु हे देव त्वमपि प्रयता प्रयत्नसंपादितानि हवींषि अद्धि भक्षय ॥ १२ ॥

१२. समस्त संसार के ज्ञाता अग्नि, हमने तुम्हारी स्तुति की है। तुमने हवि को सुगन्धि करके पितरों को दे दिया है। पितर लोग "स्वधा" के साथ दिये गये हवि का भक्षण करें। देव, तुम भी परिश्रम से प्रस्तुत किये गये हवि का भक्षण करो।

महापितृयज्ञे येचेहेतिद्वितीयानुवाक्या । सूत्रमुक्तं ।

सैषा त्रयोदशी—

येचेहपितरोयेचनेहयांश्चविद्मयाँउचनप्रविद्म ।
त्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञंसुकृतंजुषस्व ॥ १३ ॥

ये । च । इह । पितरः । ये । च । न । इह । यान् । च । विद्म ।
यान् । ऊँ इति । च । न । प्रऽविद्म । त्वम् । वेत्थ । यति । ते ।
जातऽवेदः । स्वधाभिः । यज्ञम् । सुऽकृतम् । जुषस्व ॥ १३ ॥

ये च पितरः इहास्मत्समीपे वर्तन्ते येच इह न सन्ति याँश्च पितॄन् विद्म सन्निकृष्टत्वाज्जानीम यान् उचन अपिच न प्रविद्म विप्रकृष्टत्वात् वयं न विजानीमः यति ते यावन्तस्ते भवन्ति तान् सर्वान् यथोक्तान् हे जातवेदः उत्पन्नसर्ववस्तुविषयज्ञानाग्ने त्वं वेत्थ जानासि स्वधाभिर्हविर्लक्षणैरन्नैः सुकृतं साधुकृतं यज्ञं जुषस्व प्रीत्या गृहाण ॥ १३ ॥

१३. ज्ञानी अग्नि, यहाँ जो पितर आये हैं और जो नहीं आये हैं, जिन पितरों को हम जानते हैं और जिन्हें हम नहीं जानते हैं, उन सबको तुम जानते हो। पितरो, स्वधा के साथ इस सुसम्पन्न यज्ञ का भोग करो।

पूर्वोक्तएव यागे येअग्निदग्धा इत्येषा याज्या। सूत्रितंच—येअग्निदग्धायेअनग्निदग्धा इमंयममस्वरमाहिसीदेवि द्वे इति।

सैषा सूक्ते चतुर्दशी—

येअग्निदग्धायेअनग्निदग्धामध्येदिवःस्वधयामादयन्ते ।
तेभिःस्वराळसुनीतिमेतांयथावशंतन्वंकल्पयस्व ॥ १४ ॥ १९ ॥

ये । अग्निऽदग्धाः । ये । अनग्निऽदग्धाः । मध्ये । दिवः । स्वधया ।
मादयन्ते । तेभिः । स्वऽराट् । असुऽनीतिम् । एताम् ।
यथाऽवशम् । तन्वम् कल्पयस्व ॥ १४ ॥ १९ ॥

ये पितरः अग्निदग्धाः अग्निना भस्मीकृताः श्मशानं प्राप्ताइत्यर्थः ये च पितरः अनग्निदग्धाः श्मशानकर्म न प्राप्ताः मध्येदिवः द्युलोकस्य मध्ये स्वधया हविर्लक्षणेनान्नेन मादयन्ते तृप्यन्ति हे अग्ने स्वराट् स्वकर्मोपभोगेन दीप्यमानः तेभिस्तैः पितृभिः सहितः सन् असुनीतिं

माणानां विषयेषु नेतारं अस्मत्पितृन्तरात्मानं एतां तन्वं एतद्देवताशरीरं यथावशं यथाकामं कल्पयस्व समर्थयस्व ग्रासमेत्यर्थः ॥ १४ ॥

१४. स्वयं प्रकाश अग्नि, जो पितर अग्नि से जलाये गये हैं और जो नहीं जलाये गये हैं, वे सब स्वर्ग में स्वधा (हवीरूप अन्न) के साथ आनन्द करते हैं। उनके साथ एकत्र होकर तुम हमारे पितरों के प्राणाधार शरीर को, यथाभिलाष, देव-शरीर बनाओ।

॥ इति सप्तमस्य षष्ठे एकोनविंशोवर्गः ॥ १९ ॥

मैनमिति चतुर्दशर्चं षोडशं सूक्तं यमपुत्रस्य दमनस्यार्षं आदितोदश त्रिष्टुभः ततश्चतस्रोनुष्टुभः अग्निर्देवता। तथाचानुक्रान्तं—मैनं दमनआग्नेयं चतुरनुष्टुबन्तमिति। दीक्षितमरणे आद्याः षळृचः शंसनीयाः। सूत्रितंच— मैनमग्नेविदहोमाभिशोचइति षट् पूषात्वेतश्च्यावयतुप्रविद्वानिति। दशमानस्यमेतस्योपस्थानेप्येताः शंसनीयाः।

मैनमग्नेविदहोमाभिशोचोमास्यत्वचंचिक्षिपोमाशरीरम्।
यदाशृतंकृणवोजातवेदोथेमेनंप्रहिणुतात्पितृभ्यः ॥ १ ॥

मा। एनम्। अग्ने। वि। दहः। मा। अभि। शोचः। मा। अस्य। त्वचम्। चिक्षिपः। मा। शरीरम्। यदा। शृतम्। कृणवः। जातऽवेदः। अथ। ईम्। एनम्। प्र। हिणुतात्। पितृऽभ्यः ॥ १ ॥

हे अग्ने एनं मेतं माविदहः विशेषेण दग्धं भस्मीभूतं माकुरु माभिशोचः अभितः शोकेन संतापेन युक्तं माकुरु। अस्य त्वचं माचिक्षिपः इतस्ततोविक्षिप्तां माकुरु शरीरमपि विक्षिप्तं माकुरु। हे जातवेदः अग्ने यदा त्वं शृतं पक्वं सुदग्धं कृणवः करिष्यसि अथ तदानीं ईमेनं प्रेतं पितृभ्यः प्रहिणुतात् पितृसमीपे प्रेरय ॥ १ ॥

१. अग्नि, मृत को सर्वांशतः नहीं भस्म करना। इसे क्लेश नहीं देना। इसके शरीर (वा चर्म) को छिन्न-भिन्न नहीं करना। ज्ञानी अग्नि, जिस समय तुम्हारी ज्वाला से इसका शरीर, भली भांति, पकता है, उसी समय इसे पितरों के पास भेज देना।

शृतंयदाकरसिजातवेदोथेमेनंपरिदत्तात्पितृभ्यः।
यदागच्छात्यसुनीतिमेतामथदेवानांवशनीर्भवाति ॥ २ ॥

शृतम्। यदा। करसि। जातऽवेदः। अथ। ईम्। एनम्। परि। दत्तात्। पितृऽभ्यः। यदा। गच्छाति। असुऽनीतिम्। एताम्। अथ। देवानाम्। वशऽनीः। भवाति ॥ २ ॥

हे जातवेदः यदा प्रेतशरीरं श्रृतं पक्वं करसि करिष्यसि अथ ईतदानीमेव एनं प्रेतं पितृभ्यः परिदत्तात् प्रयच्छ यदा अयं प्रेतः एतामग्निना कृतामसुनीतिं प्राणस्य नयनं प्राणप्रेरणं गच्छाति गच्छति प्राप्नोति अथ तदानीमेव देवानां वाशानी देवानां वशं प्रापितोभवति भवति ॥२॥

२. अग्नि, जिस समय इसके शरीर को भली भाँति जलाना, उसी समय पितरों के पास इसे भेजना। यह अब दोबारा सजीवता प्राप्त करेगा, तब देवों के वश में रहेगा।

सूर्यंचक्षुर्गच्छतुवातमात्माद्यांचगच्छपृथिवींचधर्मणा ।
अपोवागच्छयदितत्रतेहितमोषधीषुप्रतितिष्ठाशरीरैः ॥ ३ ॥

सूर्यम् । चक्षुः । गच्छतु । वातम् । आत्मा । द्याम् । च । गच्छ । पृथिवीम् । च । धर्मणा । अपः । वा । गच्छ । यदि । तत्र । ते । हितम् । ओषधीषु । प्रति । तिष्ठ । शरीरैः ॥ ३ ॥

हे प्रेत ते त्वदीयं चक्षुरिन्द्रियं सूर्यं गच्छतु प्राप्नोतु आत्मा प्राणः वातं बाह्यं वायुं गच्छतु अपिच त्वमपि धर्मणा सुकृतेन तत्फलं भोक्तुं द्यां च अत्र च शब्दोविकल्पार्थे द्युलोकं वा पृथिवीं च पृथिवीं वा गच्छ प्राप्नुहि अपोवान्तरिक्षलोकं गच्छ प्राप्नुहि यदि तत्रान्तरिक्षे हितं स्थापितं ते तव कर्मफलं ओषधीषु शरीरैः शरीरावयवैः प्रतितिष्ठ प्रतितिष्ठति ॥ ३ ॥

३. मृत व्यक्ति, तुम्हारा नेत्र सूर्य के पास जाय और श्वास वायु में। तुम अपने पुण्य-फल से आकाश और पृथिवी पर जाओ। यदि जल में जाना चाहते हो, तो जल में ही जाओ। तुम्हारे शरीर के अवयव वनस्पतियों में रहें।

अजोभागस्तपसातंतपस्वतंतेशोचिस्तपतुतंतेअर्चिः ।
यास्तेशिवास्तन्वोजातवेदस्ताभिर्वहैनंसुकृतामुलोकम् ॥ ४ ॥

अजः । भागः । तपसा । तम् । तपस्व । तम् । ते । शोचिः । तपतु । तम् । ते । अर्चिः । याः । ते । शिवाः तन्वः । जातऽवेदः । ताभिः । वह । एनम् । सुऽकृताम् । ऊँ इति । लोकम् ॥ ४ ॥

अजः जननरहितः शरीरेन्द्रियादिभागव्यतिरिक्तः अन्तरपुरुषलक्षणोयोभागोस्ति हे अग्ने ते त्वदीयेन तपसा तापनेन तं तादृशं भागं तपस्व तप्तं कुरु तथा ते तव शोचिः शोकहेतुज्वालाविशेषः तं भागं तपतु संस्करोतु। अपिच ते तवार्चिर्भासकः ज्वालाविशेषः तं भागं तपतु। तपः—

शोचिरर्चिःशब्दानां सन्तापतारतम्येनभेदः। जातवेदः ते तव यास्तन्वोमूर्तयः शिवाः सुखहेतवः नतु तापप्रदाः ताभिरेनं तनूभिः प्रेतं सुकृतां शोभनकर्मकारिणां लोकं स्थानं वह प्रापय। उशब्दः पूरणः ॥ ४ ॥

४. इस व्यक्ति का जो अंश जन्म-रहित है, सदा रहनेवाला है, अग्नि, तुम उसी अंश को अपने ताप से उत्तप्त करो। तुम्हारी उज्ज्वलता, तुम्हारी ज्वाला, उसे उत्तप्त करे। ज्ञानी अग्नि, तुम्हारी जो मंगलमयी मूर्तियाँ हैं, उनके द्वारा इस व्यक्ति को पुण्यवान् लोगों के देश में ले आओ।

अवसृजपुनरग्नेपितृभ्योयस्तआहुतश्चरतिस्वधाभिः।
आयुर्वसानउपवेतुशेषःसंगच्छतांतन्वाजातवेदः ॥ ५ ॥ २० ॥

अव। सृज। पुनः। अग्ने। पितृऽभ्यः। यः। ते। आऽहुतः। चरति।
स्वधाभिः। आयुः। वसानः। उप। वेतु। शेषः।
सम्। गच्छताम्। तन्वा। जातऽवेदः ॥ ५ ॥ २० ॥

हे अग्ने यः प्रेतः पुमान् ते तुभ्यं आहुतः चितौ मंत्रेण समर्पितः सन् स्वधाभिः स्वधाकारसमर्पितैरुदकादिभिः सह चरति तं प्रेतं पितृभ्यः पितृप्राप्त्यर्थं पुनरवसृज भूयः प्रेरय। अयं प्रेतआयुर्जीवनं वसानआच्छादयन् आयुषा युक्तइत्यर्थः। शेषः शिष्यमाणमस्थिलक्षणं यजनीयं शरीरं उपवेतु उपगच्छतु। हे जातवेदः तव प्रसादात् तन्वा शरीरेण संगच्छतां संगतोभवतु ॥ ५ ॥

५. अग्नि, जो तुम्हारा आहुति-स्वरूप होकर यज्ञीय द्रव्य का भोजन करता है, उसे पितरों के पास भेजो। इसका जो भाग अवशिष्ट है, वह जीवन पाकर उठ जाय। ज्ञानी अग्नि, वह फिर शरीर प्राप्त करे।

॥ इति सप्तमस्य षष्ठे विंशोवर्गः ॥ २० ॥

अथ षष्ठी—

यत्तेकृष्णःशकुनआतुतोदपिपीलःसर्पउतवाश्वापदः।
अग्निष्टद्विश्वादगदंकृणोतुसोमश्चयोब्राह्मणाँआविवेश ॥ ६ ॥

यत्। ते। कृष्णः। शकुनः। आऽतुतोद। पिपीलः। सर्पः।
उत। वा। श्वापदः। अग्निः। तत्। विश्वऽअत्। अगदम्।
कृणोतु। सोमः। च। यः। ब्राह्मणान्। आऽविवेश ॥ ६ ॥

हे मृतशरीर ते तव संबन्धि यदंगं कृष्णः शकुनः काकाख्यः आतुतोद आङीषदर्थे ईषत्तुन्नवान् तथा पिपीलः पिपीलिका वा सर्पोवा उतवा अपिवा श्वापदः श्वश्रृगालादिः एतेषामन्यतमोयदि तुन्नवानित्यर्थः विश्वात् सर्वस्यात्ता अग्निः तत्तादृशमंगं अगदं कृणोतुदोषरहितं करोतु संस्करोत्वित्यर्थः। तथा सोमश्च देवतारूपः ओषधिरूपोवा संस्करोतु यः सोमः ब्राह्मणान् ऋत्विगादीन् आविवेश प्रविष्टवान् ॥ ६ ॥

६. मृत व्यक्ति, तुम्हारे शरीर के जिस अंश को काक (कौये) ने पीड़ा पहुँचाई है अथवा चींटी, सांप या हिंस्र जीव ने जिस अंश को व्यथा दी है, उसे सर्वभुक् अग्नि नीरोग (व्यथाशून्य) करें। तुम्हारे शरीर में पैठ जानेवाले सोम भी उसे नीरोग करें।

अनुस्तरण्यावपया प्रेतस्य मुखमग्नेर्वर्मेत्यनया प्रोर्णुयात्। सूत्रितंच—अनुस्तरण्यावपाभुत्विदस्य शिरोमुखं प्रच्छादयेदग्नेर्वर्मपरिगोभिर्व्ययस्वेतीति।

अग्नेर्वर्मपरिगोभिर्व्ययस्वसंप्रोर्णुष्वपीवसामेदसाच।
नेत्त्वाधृष्णुर्हरसाजर्हृषाणोदधृग्विधक्ष्यन्पर्यङ्खयाते ॥ ७ ॥

अग्नेः। वर्म। परि। गोभिः। व्ययस्व। सम्। प्र। ऊर्णुष्व। पीवसा। मेदसा। च। न। इत्। त्वा। धृष्णुः। हरसा। जर्हृषाणः। दधृक्। विऽधक्ष्यन्। परिऽअङ्खयाते ॥ ७ ॥

हे प्रेत अग्नेः स्वभूतं वर्म ज्वालालक्षणं कवचं गोभिः अनुस्तरणीगोचर्मणा परिव्ययस्व परितः संवृणु। किंच पीवसा स्थूलेन मेदसा मांसेन च संसम्यक् प्रोर्णुष्व आच्छादय। एवंकृते सति हरसा तेजसा धृष्णुर्धर्षणशीलः जर्हृषाणः अत्यर्थं हृष्यन् दधृक् धृष्टः प्रगल्भः। ऋत्विगित्यादिनादधृक्शब्दोनिपातितः। विधक्ष्यन् विविधं भस्मीकरिष्यन् एवंभूतोग्निः त्वा त्वां नेत्पर्यङ्खयाते नैव सर्वतोविस्तारयति। अङ्खेर्गत्यर्थाल्लेटयडागमः ॥ ७ ॥

७. मृत, तुम गोचर्म के साथ अग्नि-शिखा-स्वरूप कवच को धारण करो। तुम अपने मेद और मांस से आच्छादित होओ। ऐसा होने पर बल-पूर्वक और अहंकार के साथ तुम्हें जलाने को तैयार हुए दुर्द्धर्ष अग्नि तुम्हारे सर्वांश में नहीं व्याप्त हो सकते।

इममग्नेचमसमित्यनया प्रणीताप्रणयनमनुमंत्रयते। सूत्रितंच—इममग्नेचमसंमाविजिह्वरइति प्रणीताप्रणयनमनुमंत्रयतइति।

सैषाष्टमी—

इममग्नेचमसंमाविजिह्वरःप्रियोदेवानामुतसोम्यानाम्।
एषयश्चमसोदेवपानस्तस्मिन्देवाअमृतामादयन्ते ॥ ८ ॥

इमम् । अग्ने । चमसम् । मा । वि । जिह्वरः । प्रियः । देवानाम् ।
उत । सोम्यानाम् । एषः । यः । चमसः । देवऽपानः ।
तस्मिन् । देवाः । अमृताः । मादयन्ते ॥ ८ ॥

हे अग्ने इमं चमसं प्रणीताप्रणयनं माविजिह्वरः माविचालीः । यश्चमसः देवानामिन्द्रादीनां प्रियः उतापिच सोम्यानां सोमार्हाणां पितॄणां प्रियः । किंच यएषचमसः देवपानः देवाः पिबंत्यस्मिन्निति देवपानस्थानीयोभवति तस्मिंश्चमसे अमृताः मरणवर्जितादेवाः पितरश्च मादयन्ते हव्यैः कव्यैश्च हृष्टाभवन्ति ॥ ८ ॥

८. अग्नि, इस चमस को विचलित नहीं करना। यह सोमपायी देवों को प्रसन्न करता है। देवों के पान करने के लिए जो चमस है, उसे देखकर अमर देवता हृष्ट होते हैं।

क्रव्यादमग्निंप्रहिणोमिदूरंयमराज्ञोगच्छतुरिप्रवाहः ।
इहैवायमितरोजातवेदादेवेभ्योहव्यंवहतुप्रजानन् ॥ ९ ॥

क्रव्यऽअदम् । अग्निम् । प्र । हिणोमि । दूरम् । यमऽराज्ञः ।
गच्छतु । रिप्रऽवाहः । इह । एव । अयम् । इतरः । जातऽवेदाः ।
देवेभ्यः । हव्यम् । वहतु । प्रऽजानन् ॥ ९ ॥

आहिताग्निमरणेएतदादिद्वेऋचावौपासनोद्धासने विनियुक्ते। तत्र प्रथमायाः पूर्वार्धेन दक्षिणस्यां दिशि चतुष्पथादावौपासनाग्निं निरस्यति उत्तरेण शांतिकर्मार्थमादत्ते । क्रव्यादं क्रव्यमामिषं तस्याद्यारं तीव्रमग्निं दूरं विप्रकृष्टदेशे प्रहिणोमि प्रगमयामि। हि गतौ स्वादिः ।रिप्रवाहः रिप्रं पापं तस्यवोढा सोग्निः यमराज्ञः यमोराजा येषां तान् यमराजकान् अन्यप्रदेशान् गच्छतु प्राप्नोतु । अथ शांति कर्मार्थमुपासनः इतरः क्रव्यादादन्योजातवेदाः जातानां वेदिता जातधनोवा प्रजानन् सर्वैर्विज्ञायमानोयमग्निः इहैव देशे देवेभ्योदेवार्थं हव्यं हवनयोग्यं हविः वहतु प्रापयतु ॥ ९ ॥

९. मांस भोजनकर्त्ता (तीव्र) अग्नि को मैं दूर करता हूँ। यह अश्रद्धेय वस्तु का वहन करनेवाले हैं। जिन लोगों के राजा यम हैं, उन्हीं के पास अग्नि जायें। यहाँ भी एक अग्नि हैं। यही विचार के साथ देवों के पास हवि ले जायें। अथ दशमी—

योअग्निःक्रव्यात्प्रविवेशवोगृहमिमंपश्यन्नितरंजातवेदसम् ।
तंहरामिपितृयज्ञायदेवंसधर्मामिन्वात्परमेसधस्थे ॥१०॥२१॥

यः । अग्निः । क्रव्यऽअत् । प्रऽविवेश । वः । गृहम् । इमम् । पश्यन् ।
इतरम् । जातऽवेदसम् । तम् । हरामि । पितृऽयज्ञाय । देवम् ।
सः । घर्मम् । इन्वात् । परमे । सधऽस्थे ॥ १० ॥ २१ ॥

यः क्रव्यादोग्निः वोयुष्माकं गृहिणां गृहं प्रविवेश प्रविष्टवान् तं क्रव्यादं देवं हरामि गृहाद्बहिर्निष्क्रमयामीत्यर्थः। किमर्थं पितृयज्ञाय तदर्थं । किंकुर्वन् इममितरं तस्मादन्यं हव्यवाहं जातवेदसं पश्यन् पर्यालोचयन् तथासति क्रव्यात् क्रव्यादात्परोग्निः परमे उत्कृष्टे सधस्थे सहस्थाने घर्मं यज्ञमिन्वात् प्राप्नोतु पितृभिर्घर्मपैः सहेतिशेषः ॥ १० ॥

१०. मांसभोजनकर्त्ता और चितावाले अग्नि तुम्हारे घर में पैठे हैं, उन्हें मैं दूर करता हूँ। दूसरे ज्ञानी अग्नि को मैं, पितरों को यज्ञ देने के लिए, ग्रहण करता हूँ। ये ही यज्ञ को लेकर परम धाम में गमन करें।

॥ इति सप्तमस्य षष्ठे एकविंशोवर्गः ॥ २१॥

महापितृयज्ञे वषट्कारक्रियायां योअग्निःक्रव्यवाहनइत्येषा स्विष्टकृतोयाज्या । सूत्रितंच— योअग्निः क्रव्यवाहनस्त्वमग्नईळिवइति संयाज्ये इति ।

योअग्निःक्रव्यवाहनःपितॄन्यक्षदृतावृधः ।
प्रेदुहव्यानिवोचतिदेवेभ्यश्चपितृभ्यआ ॥ ११ ॥

यः । अग्निः । क्रव्यऽवाहनः । पितॄन् । यक्षत् । ऋतऽवृधः ।
प्र । इत् । ऊँ इति । हव्यानि । वोचति । देवेभ्यः ।
च । पितृऽभ्यः । आ ॥ ११ ॥

क्रव्यवाहनः क्रव्यस्य हविषोवोढायोग्निः पितॄन् ऋतावृधः ऋतस्य यज्ञस्योदकस्य वा वर्धयितॄन् सत्येन वृद्धान्वा देवान् एतत्पितृविशेषणं वा स्तुतान् यक्षत् यजति यजेर्लेटि सिप् अडागमः । सोग्निः हव्यानि हवींषि प्रवोचतु पितृयज्ञे प्रब्रवीतु युष्मदर्थं मयानीतानीति । इदू पूरणौ केभ्यः देवेभ्यश्च पितृभ्यश्च । आकारः समुच्चये ॥ ११ ॥

११. जो अग्नि श्राद्ध के द्रव्य का वहन करते और यज्ञ की उन्नति करते हैं, वे देवों और पितरों की आराधना करते और उनके पास होमीय द्रव्य ले जाते हैं।

महापितृयज्ञे उशन्तस्त्वेत्येषा सामिधेनी । सूत्र्यतेहि—उशन्तस्त्वानिधीमहीत्येतां त्रिरनूचानंताः सामिधेन्यइति ।

सैषा द्वादशी—

उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि ।
उशन्नुशतआवहपितॄन्हविषेअत्तवे ॥ १२ ॥

उशन्तः । त्वा । नि । धीमहि । उशन्तः । सम् । इधीमहि । उशन् ।
उशतः । आ । वह । पितॄन् । हविषे । अत्तवे ॥ १२ ॥

हे अग्ने उशन्तः कामयमानाः वयं त्वा त्वां निधीमहि कर्मार्थं स्थापितवन्तः । उशंतोवयं समिधीमहि संदीपयामः । त्वमपि उशन् कामयमानोहविरादिकं उशतः आगन्तुकामान् पितॄन् अस्मिन्यज्ञे आवह हविषे अस्माभिः प्रत्तं हविः अत्तवे अत्तुं । अदेस्तुमर्थे तवेन प्रत्ययः क्रियाग्रहणंकर्तव्यमितिकर्मणः संप्रदानसंज्ञा ॥ १२ ॥

१२. अग्नि, मैं तुम्हें यत्न-पूर्वक स्थापित करता हूँ और यत्न-पूर्वक ही तुम्हें प्रज्वलित करता हूँ। यज्ञाभिलाषी देवों और पितरों के पास तुम यत्न-पूर्वक, भक्षण के लिए, होमीय द्रव्य ले जाते हो।

यंत्वमग्नेसमदहस्तमुनिर्वापयापुनः ।
कियांबत्रोहतुपाकदूर्वाव्यल्कशा ॥ १३ ॥

यम् । त्वम् । अग्ने । सम्ऽअदहः । तम् । ऊँ इति । निः । वापय । पुनरिति । कियाम्बु । अत्र । रोहतु । पाकऽदूर्वा । विऽअल्कशा॥ १३॥

हे अग्ने त्वं पितृदहनकाले यं देशं समदहः पुरा सम्यक्दग्धवानसि । तिङ्चोदात्तवतीति समोनिघातः । तमु तमेव पुनर्निर्वापय अत्रास्मिन्देशे कियांबु कियत्प्रमाणमुदकं यस्मिन् तत्पुष्करिण्यादि रोहतु उत्पद्यतां । किंच व्यल्कशा विविधशाखा पाकदूर्वा परिपक्वदूर्वा च उत्पद्यतां ॥ १३ ॥

१३. अग्नि, तुमने जिसे जलाया है, उसे बुझाओ। यहाँ कुछ जल हो और शाखा-प्रशाखाओंवाली दूब उत्पन्न हो।

अस्थिसंचयने क्षीरोदकेन शमीशाखया त्रिः प्रसव्यं श्मशानायतनं प्रोक्षति शीतिकेशीतिकावतीत्यनया। सूत्रितंच—क्षीरोदकेनशमीशाखयात्रिःप्रसव्यंपरिव्रजन्प्रोक्षतिशीतिकेशीतिकावतीतीति ।

सैषा चतुर्दशी—

शीतिकेशीतिकावतिह्लादिकेह्लादिकावति ।
मण्डूक्या३सुसंगमइमंस्व१ग्निर्हर्षय ॥ १४ ॥ २२ ॥

शीतिके । शीतिकाऽवति । ह्लादिके । ह्लादिकाऽवति । मण्डूक्या । सु । सम् । गमः । इमम् । सु । अग्निम् । हर्षय ॥ १४ ॥ २२ ॥

हे शीतिके शैत्ययुक्ते हे शीतिकावति शीतिकाः शैत्ययुक्ताओषधयस्ताभिस्तद्वति हे ह्लादिके आह्लादयित्रि हे आह्लादिकावति आह्लादकफलयुक्तैर्वृक्षैस्तद्वति हे पृथिवि मंडूक्या मंडूकस्त्रिया वृष्टिप्रियया सु सुष्ठु संगमः संगच्छस्व । गमेर्लुङि व्यत्ययेन परस्मैपदं ततइममग्निं सु सुष्ठु हर्षय ॥ १४ ॥

१४. पृथिवी, तुम शीतल हो। तुम पर कितने ही शीतल वनस्पति हैं। तुम आह्लाविका हो। तुम पर अनेक आह्लादक वनस्पति हैं। भेकी (मेढ़क की स्त्री) जिससे सन्तुष्ट हो—ऐसी वर्षा ले आओ। अग्नि को सन्तुष्ट करो।

॥ इति सप्तमस्य षष्ठे द्वाविंशोवर्गः ॥ २२ ॥

॥ इति दशमे मंडले प्रथमोनुवाकः ॥ १ ॥

द्वितीयेनुवाके त्रयोदशसूक्तानि तत्र त्वष्टादुहित्रइत्येतच्चतुर्दशर्चं प्रथमं सूक्तं यमपुत्रोदेवश्रवानाम ऋषिः आदितोद्वादश त्रिष्टुभः त्रयोदशीचतुर्दश्यावनुष्टुभौ यद्वा त्रयोदशी पुरस्ताद्बृहती आदितोद्वयोः सरण्यूर्देवता पूषात्वेतइत्याद्याश्चतस्रः पूषदेवत्याः सरस्वतीं देवयन्तइत्याद्यास्तिस्रः सरस्वतीदेवताकाः आपोअस्मानित्याद्याः पंचर्चोब्दिदेवताकाः तत्र द्रप्सश्चस्कंदेत्याद्यास्तिस्रः सोमदेवत्यावा । तथाचानुक्रान्तं—त्वष्टादेवश्रवा द्वे सरण्यू देवते पौष्ण्यश्चतस्रः सारस्वत्यस्तिस्रः पंचाप्योद्रप्सस्तिस्रः सौम्योवांत्ये अनुष्टुभावुपान्त्यापुरस्ताद्बृहतीवेति । गतः सूक्तविनियोगः । अत्रेतिहासमाचक्षते—त्वष्टृनामकस्य देवस्य सरण्यूस्त्रिशिराश्चेति स्त्रीपुंसात्मकमपत्यद्वयमभूत् ततस्त्वष्टा सरण्यूनामिकां पुत्रीं विवस्वते प्रायच्छत् ततस्तस्यां विवस्वतः सकाशात् यमयम्यौ विजज्ञाते ततः कदाचिदात्मसदृश्यादेवजनितायाः स्त्रियः समीपे तदपत्यद्वयं निधाय स्वयमाश्वं रूपं कृत्वा उत्तरान् कुरून् प्रति जगाम । अथ विवस्वानेतां स्त्रियं सरण्यूमिति मन्वानामरंसीत् तस्यां मनुर्नाम राजर्षिरजायत । ततोविवस्वानेषा सरण्यूर्न भवतीति विज्ञाय स्वयमप्यश्वोभूत्वा तामश्वरूपिणीं प्रायासीत् ततः संक्रीडमानयोस्तयोः स्वभूतं रेतः पृथिव्यां पपात । अथ सागर्भाकामनया तत्पतितं रेतः आजघ्रौ ततः तस्याः सकाशात् नासत्योदस्रश्चेत्युभावश्विनावजायेतामिति ।

तत्र प्रथमा—

त्वष्टादुहित्रेवहतुंकृणोतीतीदंविश्वंभुवनंसमेति ।
यमस्यमातापर्युह्यमानामहोजायाविवस्वतोननाश ॥१॥

त्वष्टा । दुहित्रे । वहतुम् । कृणोति । इति । इदम् । विश्वम् ।
भुवनम् । सम् । एति । यमस्य । माता । परिऽउह्यमाना ।
महः । जाया । विवस्वतः । ननाश ॥ १ ॥

त्वष्टा एतन्नामकोदेवः दुहित्रे षष्ठ्यर्थे चतुर्थी दुहितुः सरण्यूनामिकायाः वहतुं वहनं विवाहं एधिवह्योश्चतुरिति वहेश्चतुप्रत्ययः तं कृणोति करोतीति एतेन हेतुना इदं विश्वं सर्वं भुवनं भूतजातं समेति सं विवाहं समागमत् पर्युह्यमाना विवस्वता उद्वोढव्या यमस्य यम्याश्च माता महोमहतः विवस्वतोजाया भार्या सरण्यूः ननाश उत्तरान् कुरून् प्रतिनष्टा अगच्छदित्यर्थः ॥ १ ॥

१. त्वष्टा नाम के देव अपनी कन्या सरण्यू का विवाह करनेवाले हैं; इस उपलक्ष्य में सारा संसार आगया है। जिस समय यम की माता का विवाह हुआ, उस समय महान् विवस्वान् की स्त्री अदृष्ट हुई।

अपागूहन्नमृतांमर्त्येभ्यःकृत्वीसवर्णामददुर्विवस्वते ।
उताश्विनावभरद्यत्तदासीदजहादुद्वामिथुनासरण्यूः ॥२॥

अप । अगूहन् । अमृताम् । मर्त्येभ्यः । कृत्वी । सऽवर्णाम् । अददुः ।
विवस्वते । उत । अश्विनौ । अभरत् । यत् । तत् । आसीत् ।
अजहात् । ऊँ इति । द्वा । मिथुना । सरण्यूः ॥ २ ॥

अमृतां मरणधर्मरहितां एतां सरण्यूं मर्त्येभ्योमनुष्येभ्यः तदुत्पत्यर्थं अपागूहन् अपगूहितवन्तः संवृतवन्तः देवाउपनीतवन्तइत्यर्थः । किंच सवर्णां सरण्यूसदृशां अन्यां स्त्रियं कृत्वी कृत्वा तस्मै विवस्वते देवाअददुः प्रायच्छन् । उतापिच सा अश्वरूपिणी सरण्यूः तदाश्विनावभरत् स्वोदरे गर्भभूतौ धारितवती यद्यदा तत् जायापतिभ्यां अश्वरूपात्मना संभोगकाले रेतः पतितमासीत् तदा अश्विनौ जनयामासेत्यर्थः । तथा सरण्यूः सरणवती एतन्नामिका द्वा मिथुना द्वौ मिथुनौ यमयम्यौ अजहात् त्यक्तवती जनितवतीत्यर्थः । यद्वा सरण्यूः एतन्नामिका मध्यस्थाना देवता मध्यममग्निं माध्यमिकां वाचं च उत्पादितवती ॥ २ ॥

२. अमर सरण्यू को मनुष्यों के पास छिपाया गया। सरण्यू के सदृश एक स्त्री का निर्माण करके विवस्वान् को उसे दिया गया। उस समय अश्वरूपिणी सरण्यू ने अश्विद्वय को गर्भ में धारण किया और यमज सन्तान को उत्पन्न किया।

दीक्षितमरणे पूषात्वेतइत्याद्याश्चतस्रः शंसनीयाः । सूत्रितंच— पूषात्वेतश्चयावयतुपविद्वानिति चतस्रइति ।

सैषा सूक्तेतृतीया—

पूषात्वेतश्च्यावयतुप्रविद्वाननष्टपशुर्भुवनस्यगोपाः ।
सत्वैतेभ्यःपरिददत्पितृभ्योग्निर्देवेभ्यःसुविदत्रियेभ्यः ॥ ३ ॥

पूषा । त्वा । इतः । च्यवयतु । प्र । विद्वान् । अनष्टऽपशुः ।
भुवनस्य । गोपाः । सः । त्वा । एतेभ्यः । परि । ददत् ।
पितृऽभ्यः । अग्निः । देवेभ्यः । सुऽविदत्रियेभ्यः ॥ ३ ॥

पूषा पोषयिता एतन्नामकोदेवः त्वा त्वां इतोस्माद्देशात् लोकात् प्रच्यावयतु प्रकर्षेणोत्तमलोकं गमयतु । कीदृशः विद्वान् अस्मद्भक्तां विजानानः अनष्टपशुः अविनश्वरपशुयुक्तः यस्मिन् सर्वेपशवस्तिष्ठन्ति नतु नश्यन्तीत्यर्थः भुवनस्य भूतजातस्य गोपाः गोपायिता । किंच प्रकृष्टपूषा एतेभ्यः पितृभ्यः त्वा त्वां परिददत् परिप्रयच्छतु । तथा अग्निश्च सुविदत्रियेभ्यः सुविदत्रं ज्ञानं धनं वा तदर्हाः सुविदत्रियाः छान्दसोघप्रत्ययः शोभनज्ञानेभ्यः सुधनेभ्योवा देवेभ्यः त्वां प्रयच्छतु तेषां लोके स्थापयत्वित्यर्थः ॥ ३ ॥

३. ज्ञानी, संसार के रक्षक और अविनष्ट-पशु पूषा तुम्हें यहाँ से उत्तम लोक में ले जायें। अग्निदेव तुम्हें धनद देवों और पितरों के पास ले जायें।

अथ चतुर्थी—

आयुर्विश्वायुःपरिपासतित्वापूषात्वापातुप्रपथेपुरस्तात् ।
यत्रासतेसुकृतोयत्रतेययुस्तत्रत्वादेवःसवितादधातु ॥ ४ ॥

आयुः । विश्वऽआयुः । परि । पासति । त्वा । पूषा । त्वा । पातु ।
प्रऽपथे । पुरस्तात् । यत्र । आसते । सुऽकृतः । यत्र । ते ।
ययुः । तत्र । त्वा । देवः । सविता । दधातु ॥ ४ ॥

विश्वायुः सर्वान्नः सर्वत्रगमनशीलोवा आयुः वकारलोपश्छान्दसः वायुः यद्वा छन्दसीणइति उणप्रत्यये वृद्धौ च कृतायां रूपं । गन्ता वायुः त्वा त्वां परिपासति परिपातु पूषानुज्ञया परितोरक्षतु । पा रक्षणे लेटि सिप्यडागमः । प्रपथे प्रकृष्टे मार्गे स्वर्गे पुरस्ताद् सर्वेषां प्रथममेव वर्तमानः पूषा स्वयमेव त्वा त्वां प्रमितं यजमानं पातु रक्षतु । सुकृतः पुण्यकर्माणः यत्र य-

स्मिन्देशे आसते तिष्ठन्ति यत्र वा ते सुकृतः ययुः प्राप्ताः तत्र तस्मिन् स्थाने देवोदीप्यमानः सविता सर्वस्य स्वस्वकर्मणि प्रेरकः एतन्नामकोदेवः त्वा त्वां दधातु निदधातु ॥ ४ ॥

४. सारे संसार के जीवन पूषा तुम्हारे जीवन की रक्षा करें। वे तुम्हारे गन्तव्य स्थान के अग्र भाग में हैं। वे तुम्हारी रक्षा करें। जहां पुण्यवान् हैं, जहां वे गये हैं, उसी स्थान पर सविता (पूषा) तुम्हें ले जायें।

एकादशिनस्य पौष्णस्य पशोर्हविषः पूषेमाइत्यनुवाक्या। पूषेमाआशाअनुवेदसर्वाः शुक्रं-तेअन्यद्यजतमितिहि सूत्रितं।

पूषेमाआशाअनुवेदसर्वाःसोअस्माँअभयतमेननेषत्।
स्वस्तिदाआघृणिःसर्ववीरोप्रयुच्छन्पुरएतुप्रजानन् ॥ ५ ॥२३॥

पूषा। इमाः। आशाः। अनु। वेद। सर्वाः। सः। अस्मान्।
अभयऽतमेन। नेषत्। स्वस्तिऽदाः। आघृणिः। सर्वऽवीरः।
अप्रऽयुच्छन्। पुरः। एतु। प्रऽजानन् ॥ ५ ॥ २३ ॥

पूषा देवः इमाः सर्वाआशाः प्राच्याद्यादिशः अनुवेद आनुपूर्व्येण जानाति इमाः सुखेन गंतव्याः असुखेनेति वा एवमनुक्रमेण जानातीत्यर्थः।एवं सति अस्मान्प्रमिते यजमानोब्रवीति पुत्रमुखेन याजकमुखेन वा सपूषा अस्मान् अभयतमेन अत्यन्तं भयरहितेन मार्गेण नेषत् नयतु। कथं स्वस्तिदाः कल्याणस्य दाता आघृणिः आगतदीप्तियुक्तः सर्ववीरः सर्वैःवीरैः कर्मणि समर्थैः ऋत्विग्भिरुपेतः अप्रयुच्छन् अप्रमाद्यन् प्रजानन् अस्माकं फलाफले विजानानः सन् पुरएतु अस्माकं पुरस्ताद्गच्छतु यथा अस्माकं भयं न भवति तथा गच्छत्वित्यर्थः ॥ ५ ॥

५. पूषा सारी दिशायें जानते हैं। वे हमें उसी मार्ग से ले जायें, जिसमें कोई भय नहीं है। वे कल्याणदाता हैं। उनकी मूर्त्ति आलोकवेष्टित है। उनके साथ सारे वीर पुरुष हैं। वे हमें जानते हैं। सावधान होकर वे हमारे सामने आवें।

॥ इति सप्तमस्य षष्ठे त्रयोविंशोवर्गः ॥ २३ ॥

एकादशिनस्य पौष्णस्य पशोः पुरोडाशस्य प्रपथेपथामिति याज्या। सूत्रितंच—प्रपथेपथामजनिष्टपूषा पथस्पथःपरिपतिंवचस्येति।

सैषा षष्ठी—

प्रपथेपथामजनिष्टपूषाप्रपथेदिवःप्रपथेपृथिव्याः।
उभेअभिप्रियतमेसधस्थेआचपराचचरतिप्रजानन् ॥ ६ ॥

प्रऽपथे । पथाम् । अजनिष्ट । पूषा । प्रऽपथे । दिवः । प्रऽपथे ।
पृथिव्याः । उभे इति । अभि । प्रियतमे इति प्रियऽतमे ।
सधस्थे इति सधऽस्थे । आ । च । परा । च । चरति । प्रऽजानन्॥६॥

पथां अन्तरिक्षगमनहेतुभूतानां मार्गाणां मध्ये प्रपथे यः प्रकृष्टः पंथाअस्ति तत्र पूषा अजनिष्ट प्रादुरभूत् पुण्यकर्मणां सुगतिप्रापणार्थमवस्थितइतिभावः । तथा दिवोद्युलोकस्य च मार्गाणां मध्ये प्रपथे प्रकृष्टे मार्गे जातः तथा पृथिव्याः प्रपथे प्रकृष्टे मार्गे मनुष्याणां तत्तत्कर्मणि प्रवर्तनार्थं प्रादुर्भूतइत्यर्थः । सोयं पूषा प्रियतमे सर्वस्येष्टतमे सधस्थे सर्वेषां सहावस्थानभूते उभे द्यावापृथिव्यावभिलक्ष्य आचरति आभिमुख्येन चरति सुकृतिनां सुकृतफलप्रदर्शनायानुकूलं चरतीत्यर्थः । तथा पराचरति दुष्कर्मणां प्रतिकूलं गच्छति । किं कुर्वन् प्रजानन् अनेनेदं कर्म कृतं अस्य कर्मणइदं फलमिति अविशेषेण जानानः ॥ ६ ॥

६. सारे मार्गों से श्रेष्ठ मार्ग में पूषा ने दर्शन दिया है। उन्होंने स्वर्ग और मर्त्य के श्रेष्ठ पथ में दर्शन दिया है। पूषा की जो दो प्रेयसियाँ (द्यावापृथिवी) हैं और जो एक साथ रहती हैं, उनको पूषादेव, विशेष समझ करके, अभोरंजन करते हैं।

व्यूह्लस्य दशरात्रस्य तृतीये छन्दोमे प्रउगे सारस्वतृचस्य सरस्वतींदेवयन्तइत्येषा आद्या । सूत्र्यतेहि—प्रत्रह्माणोअंगिरसोनक्षंत सरस्वतींदेवयन्तोहवन्तइति ।

सरस्वतींदेवयन्तोहवन्तेसरस्वतीमध्वरेतायमाने ।
सरस्वतींसुकृतोअह्वयन्तसरस्वतीदाशुषेवार्यंदात् ॥ ७ ॥

सरस्वतीम् । देवऽयन्तः । हवन्ते । सरस्वतीम् । अध्वरे ।
तायमाने । सरस्वतीम् । सुऽकृतः । अह्वयन्त ।
सरस्वती । दाशुषे । वार्यम् । दात् ॥ ७ ॥

देवयन्तः देवान् यष्टुं स्तोतुं च कामयमानायजमानाः सरस्वतीं एतन्नामिकां मध्यमस्थानदेवतां हवन्ते कर्मावयवत्वायाह्वयन्ति । तथा तायमाने स्तुतिभिर्हविर्भिश्च विस्तार्यमाणे अध्वरे यज्ञे सरस्वतीं यजन्तीति शेषः । सुकृतः पुण्यकर्माणः सरस्वतीं अह्वयन्त फलप्रदानायाह्वयन्ते यतएवमतः कारणात् सरस्वती देवी दाशुषे हवींषि दत्तवते यजमानाय वार्यं वरणीयं कर्मफलं दात् प्रयच्छतु ॥ ७ ॥

७. जो देवों के उद्देश्य से यज्ञ करते हैं, वे सरस्वती की पूजा के लिए आह्वान करते हैं। जिस समय देवता का, विस्तार के साथ, यज्ञ प्रारम्भ हुआ, उस समय पुण्यात्माओं ने सरस्वती को बुलाया। सरस्वती दाता की अभिलाषा पूरी करें।

सरस्वतियासरथंययाथस्वधाभिर्देविपितृभिर्मदन्ती ।
आसद्यास्मिन्बर्हिषिमादयस्वानमीवाइषआधेह्यस्मे ॥ ८ ॥

सरस्वति । या । सऽरथम् । ययाथ । स्वधाभिः । देवि । पितृऽभिः ।
मदन्ती । आऽसद्य । अस्मिन् । बर्हिषि । मादयस्व ।
अनमीवाः । इषः । आ । धेहि । अस्मे इति ॥ ८ ॥

हे सरस्वति हे देवि या त्वं सरथं पितृभिः सह समानेन रथेनयुक्तं यथा भवति तथा ययाथ अस्मदीयं यज्ञं प्राप्तासि । किंकुर्वती पितृभिः सह स्वधाभिर्हविर्लक्षणैरन्नैः मदन्तीमाद्यन्ती यज्ञं गच्छसीति संबन्धः । सा त्वं बर्हिषि अस्मिन् वेदिस्तरणे यज्ञे आसद्य उपविश्य मादयस्व हविर्भिस्तृप्ता भव आत्मानं तर्पय वा । ततस्तृप्ता सती त्वं अनमीवाः अमीवा रोगः तद्वर्जितानि आरोग्यजननानि इषोन्नानि अस्मे अस्मभ्यमाधेहि पर्याप्तं प्रयच्छ ॥ ८ ॥

८. सरस्वती, तुम पितरों के साथ एक रथ पर जाओ। तुम उनके साथ, आह्लाद-पूर्वक, सारे यज्ञीय द्रव्य का भोग करो। आओ, इस यज्ञ में आनन्द करो। हमें नीरोग और अन्न-दान करो।

सरस्वतींयांपितरोहवन्तेदक्षिणायज्ञमभिनक्षमाणाः ।
सहस्रार्घमिळोअत्रभागंरायस्पोषंयजमानेषुधेहि ॥ ९ ॥

सरस्वतीम् । याम् । पितरः । हवन्ते । दक्षिणा । यज्ञम् ।
अभिऽनक्षमाणाः । सहस्रऽअर्घम् । इळः । अत्र । भागम् ।
रायः । पोषम् । यजमानेषु । धेहि ॥ ९ ॥

यां त्वां सरस्वतीं पितरोहवन्ते आह्वयन्ति । कीदृशाः दक्षिणा । दक्षिणादाजितिआच् प्रत्ययः । दक्षिणतआगत्य यज्ञमभिनक्षमाणाः अभितोगच्छन्तोव्याप्नुवन्तः अत्रास्मिन् यज्ञे सहस्रार्घं बहुभिः पूजनीयं उपयोज्यं इळोन्नस्य भागं रायोधनस्य पोषं पुष्टिं च यजमानेषु त्वं धेहि स्थापय ॥ ॥ ९ ॥

९. सरस्वती, पितर लोग दक्षिण पार्श्व में आकर और यज्ञस्थान में विस्तीर्ण होकर तुम्हें बुलाते हैं। तुम यज्ञकर्त्ता के लिए बहुमूल्य और विलक्षण अन्नराशि तथा प्रचुर अन्न उत्पन्न कर दो।

अवभृथस्थाने आपोअस्मानित्येषा । सूत्रितंच—ततआचम्याप्लवन्तआपोअस्मान्मातरः शुंधयन्त्विति । दशमेहनि वपामार्जनेप्येषा । सूत्रितंच— इदमापःप्रवहतेत्येतस्याःस्थानेआपोअस्मान्मातरः शुंधयंत्विति ।

सैषा दशमी—

आपोअस्मान्मातरःशुन्धयन्तुघृतेनंनोघृतप्वःपुनन्तु ।
विश्वंहिरिप्रंप्रवहन्तिदेवीरुदिदाभ्यःशुचिरापूतएमि ॥१०॥२४॥

आपः । अस्मान् । मातरः । शुन्धयन्तु । घृतेन । नः । घृतऽप्वः ।
पुनन्तु । विश्वम् । हि । रिप्रम् । प्रऽवहन्ति । देवीः । उत् ।
इत् । आभ्यः । शुचिः । आ । पूतः । एमि ॥ १० ॥ २४ ॥

मातरः जगतोमातृस्थानीयाआपः अस्मान् शुंधयन्तु प्रोक्षणेन शोधयन्तु । तथा घृतप्वः घृतमुदकं तेनास्मान् पुनन्तीति तास्तथोक्ताआपः यद्वा घृतप्वः घृतं गव्यं तेन पुनन्ति । तथा ब्राह्मणं घृतेननोघृतप्वः पुनन्तीति । तद्वैसुपूतंयद्घृतेनपूयतेइति । ताआपः घृतेन प्रत्यक्षेणोदकेन नोस्मान् पुनन्तु हि यस्माद् देवीर्दिव्यः देवनशीलाआपः विश्वं सर्वं रिप्रं पापं प्रवहन्ति पुरुषसकाशाद् प्रगमयन्ति अपनयन्तीति यावद् । इद् अनन्तरं आभ्यः अद्भ्यः आपूतः आभिमुख्येन शुद्धः सन् स्तोता अहं उदैमि उद्गच्छामि ऊर्ध्वं स्वर्गं गच्छामीत्यर्थः ॥ १० ॥

१०. जल मातृ-स्वरूप है। वह हमारा शोधन करे। जल घृत-प्रवाह से प्रवाहित हो रहा है। उसी घृत के द्वारा वह हमारे मल को दूर करे। जल-रूपी देवी सारे पापों को अपने स्रोत में बहा ले जायें। जल में से हम स्वच्छ और पवित्र होकर आते हैं।

॥ इति सप्तमस्य षष्ठे चतुर्विंशोवर्गः ॥ २४ ॥

सुत्येहनि द्रप्सश्चस्कन्देत्यादिके द्वे विप्रुड्होमार्थे । सूत्रितंच—द्रप्सश्चस्कन्देति द्वाभ्यां विप्रुड्होमौ हुत्वेति । स्कन्नहविरभिमर्शनेपि द्रप्सइत्येषा । आहुतिर्बर्हिष्परिधि यदिस्कन्देत्तदा आग्नीध्रः अनया जुहुयाद् । स्कन्नमभिमृशेदितिप्रकृत्य सूत्रितं—द्रप्सश्चस्कन्देत्याहुतिश्चेद्बर्हिष्परिध्याग्नीध्रएनां जुहुयादिति ।

सैषा एकादशी—

द्रप्सश्चस्कन्दप्रथमाँअनुद्यूनिमंचयोनिमनुयश्चपूर्वः ।
समानंयोनिमनुसंचरन्तंद्रप्संजुहोम्यनुसप्तहोत्राः ॥ ११ ॥

द्रप्सः । चस्कन्द । प्रथमान् । अनु । द्यून् । इमम् । च । योनिम् ।
अनु । यः । च । पूर्वः । समानम् । योनिम् । अनु । सम्ऽचरन्तम् ।
द्रप्सम् । जुहोमि । अनु । सप्त । होत्राः ॥ ११ ॥

द्रप्सः अभिषूयमाणस्य सोमस्य रसः प्रथमान् पूर्वभाविनः पार्थिवान् लोकान् द्यून् दीप्यमानान् द्युलोकांश्च अनुलक्षीकृत्य चस्कन्द स्कन्नवान् गतवान्। तदेवाह इमं परिदृश्यमानं योनिं स्थानभूतं लोकं च यश्च अस्मात्पूर्वोस्ति तमनुगतवान् समानं साधारणं योनिं द्यावापृथिवीलक्षणं स्थानमनुसंचरन्तं सम्यग्गच्छन्तं द्रप्सं सोमरसं विपुलक्षणं सप्तहोत्राः सप्तसंख्याकाः विपुद्धोमस्य कर्तारः होतृप्रभृतयोवयं अनु आनुपूर्व्येण जुहोमि जुहुमः। यद्वा होत्राः सप्तहोतृभिः क्रियमाणायागक्रिया होत्रास्ता अनु पश्चात् अध्वर्युरहं जुहोमि। यद्वा द्रप्सः द्रुतगामित्वात् द्रप्सआदित्यउच्यते सआदित्यः पृथिवीं च दिवं च गच्छति समानं योनिमन्तरिक्षं लक्षीकृत्य सम्यक् चरन्तं द्रप्समादित्यमुद्दिश्य सप्तहोत्राः सप्तसंख्याकादिशः यस्यां दिशिसूर्योवर्तते तद्व्यतिरिक्ताः सप्तसंख्याकादिशः सप्त अनु पश्चाज्जुहोमि यत्रयत्र वर्तते तां तां दिशं द्रव्यत्वेन प्रयच्छामि प्रतिष्ठापयामीत्यर्थः। अत्र वाजसनेयकं—असौवाआदित्योद्रप्सः सदिवंचपृथिवींच स्कन्दतीमंचयोनिमनुयश्चपूर्वइति। इमंचलोकममुंचेत्येतत् समानं योनिमनुसंचरन्तमिति। समानं होषएतंयोनिमनुसंचरन्ति। द्रप्सं जुहोम्यनुसप्तहोत्राइत्यसौवाआदित्योद्रप्सोदिशः सप्तहोत्राअमुं तदादित्यं दिक्षुप्रतिष्ठापयतीति॥ ११॥

११. द्रव्य-रूप सोमरस अतीव सुन्दर और दीप्ति-शील अंशु से क्षरित होते हैं। इस स्थान पर और इसके पूर्वतन स्थान पर अर्थात् आधार पर सोम क्षरित होते हैं। हम सात हवन-कर्ता समान-रूप से आधार के बीच में विहार करनेवाले उन द्रव्य-रूप सोम का हवन करते हैं।

यस्तेद्रप्सःस्कन्दतियस्तेअंशुर्बाहुच्युतोधिषणायाउपस्थात्।
अध्वर्योर्वापरिवायःपवित्रात्तंतेजुहोमिमनसावषट्कृतम्॥१२॥

यः। ते। द्रप्सः। स्कन्दति। यः। ते। अंशुः। बाहुऽच्युतः। धिषणायाः। उपऽस्थात्। अध्वर्योः। वा। परि। वा। यः। पवित्रात्। तम्। ते। जुहोमि। मनसा। वषट्ऽकृतम्॥ १२॥

हे सोम ते त्वदीयोयोद्रप्सोरसः स्कन्दति अधिषवणचर्मणोन्यत्र गच्छति यश्च ते त्वदीयः अंशुः रसादितरः सन् स्कन्दति बाहुच्युतः अध्वर्योर्बाहुभ्यां प्रच्युतः सन् स्कन्दति यद्वा बाहुवत् साधनभूताग्रावाणः तैः प्रच्युतोभिषुतः सन् धिषणायाः धिषणेत्यधिषवणफलकनाम प्रत्येकविवक्षयैकवचनं अधिषवणफलकयोरुपस्थात् समीपस्थात् प्रदेशादन्यत्र गच्छति। तथा अध्वर्योर्वा अभिषुण्वतोध्वर्योर्हस्तात् स्कन्दति वापिवा योरसः पवित्राद्दशापवित्रात् परिस्कन्दति तं सर्वं द्रप्सं ते त्वदीयं रसं मनसा अन्तःकरणेन स्तोत्रेण वा सह वषट्कृतं वषट्कारेण स्वाहाकारेण कृतं जुहोमि अग्नौ प्रक्षिपामि॥ १२॥

१२. सोम, तुम्हारा जो द्रव्यात्मक रस क्षरित होता है अथवा तुम्हारा जो अंशु (ख़ाल) पुरोहित के हाथ से प्रस्तर-फलक के पास गिरता है

अथवा जो पवित्र के ऊपर स्थापित हुआ है, उन सबका मन ही मन नमस्कार करते हुए हम हवन करते हैं।

यस्तेद्रप्सःस्कन्नोयस्तेअंशुरवश्चयःपरःस्रुचा ।
अयंदेवोबृहस्पतिःसंतंसिञ्चतुराधसे ॥ १३ ॥

यः । ते । द्रप्सः । स्कन्नः । यः । ते । अंशुः । अवः । च ।
यः । परः । स्रुचा । अयम् । देवः । बृहस्पतिः ।
सम् । तम् । सिञ्चतु । राधसे ॥ १३ ॥

हे सोम ते त्वदीयोयोद्रप्सोरसोन्यत्र स्कन्नोगतः यश्च ते त्वदीयः तव कारणभूतोंशुः लताखंडः रसादितरोभवति स्रुचा पात्रविशेषेण गृहीतः सोमः अवः अवस्तात् स्कन्दते परः परस्ताद्वा अतिरिक्तोभवति तमिमं सोमं अयं बृहस्पतिरेतन्नामकोदेवः संसिंचतु सम्यक् प्रक्षारयतु। किमर्थं राधसे अस्माकं धनार्थं स्कन्नेहि सोमे प्रजापश्वादिकमपस्कन्नं भवति खलु॥१३॥

१३. तुम्हारा जो रस बाहर हुआ है और जो तुम्हारा अंशु स्रुक् नामक पात्र के नीचे गिरा है, सोमों का बृहस्पतिदेव सेचन करें। इससे हमें धन मिलेगा।

पयस्वतीरोषधयःपयस्वन्मामकंवचः ।
अपांपयस्वदित्पयस्तेनमासहशुन्धत ॥ १४ ॥ २५ ॥

पयस्वतीः । ओषधयः । पयस्वत् । मामकम् । वचः । अपाम् ।
पयस्वत् । इत् । पयः । तेन । मा । सह । शुन्धत ॥ १४ ॥ २५ ॥

इयं प्रत्यक्षकृता हे आपः ओषधयः पयस्वत्यः वृष्टिलक्षणेनोदकेन सारवत्योभवन्ति मामकं मदीयं वचः वचनं वृष्टिप्रार्थनवचनं पयस्वत् सारवत् भवति किं बहुना यच्चेह किंचिदपामुदकानां पयः क्षीरवत् सारभूतंयदस्ति तत्सर्वं पयस्वत् सारवदेव तेनोदकसारेण सह मा मां शुंधत यूयं शोधयत । आपोअद्यान्वचारिषंरसेनसमगस्महीतिनिगमान्तरं ॥ १४ ॥

१४. वनस्पति दुग्ध के समान रस से परिपूर्ण हैं। हमारा स्तोत्र—वचन रसमय दुग्ध के सार रस से पूर्ण है। इन सारे पदार्थों से हमारा संस्कार करो।

॥ इति सप्तमस्य षष्ठे पञ्चविंशोवर्गः ॥ २५ ॥

परंमृत्योइति चतुर्दशर्चं द्वितीयं सूक्तं यमपुत्रस्य संकुसुकस्यार्षं एकादशी प्रस्तारपंक्तिः आद्यौ जागतौ ततो द्वौ गायत्रौ प्रस्तारपंक्तिःपुरतइति । त्रयोदशी जगती चतु-

१ ऋ० सं० १. २. १२. ।

र्दशी अनुष्टुप् शिष्टास्त्रिष्टुभः। तत्रादौ चतस्रोमृत्युदेवत्याः पञ्चमी धातृदेवताका षष्ठी त्वष्टृदेवत्या सप्तम्याद्याः शिष्टाःपितृमेधाभिधायिन्यः अतस्तद्देवताकाः अन्त्या तु अनिरुक्तत्वाद् प्राजापत्या वा। तथाचानुक्रान्तं—परंमृत्योः संकुसुकश्चतस्रोमृत्युदेवताः पराधात्री परा त्वाष्ट्री पराः पितृमेधाएकादशी प्रस्तारपंक्तिर्जगत्युपान्त्यान्त्यानुष्टुप्प्राजापत्यावासानिरुक्तेति।

तत्र प्रथमा—

परंमृत्योअनुपरेहिपन्थांयस्तेस्वइतरोदेवयानात्।
चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजांरीरिषोमोतवीरान्॥१॥

परम्। मृत्यो इति। अनु। परा। इहि। पन्थाम्। यः। ते।
स्वऽइतरः। देवऽयानात्। चक्षुष्मते। शृण्वते। ते। ब्रवीमि।
मा। नः। प्रऽजाम्। रिरिषः। मा। उत। वीरान्॥ १॥

हे मृत्यो सर्वेषां मारक एतन्नामक देव परमन्यं पंथां पंथानं अनु आनुपूर्व्येण परेहि पराङ्मुखोगच्छायजमानादितिशेषः। कोसौ पंथाः ते तव स्वः स्वभूतः देवयानात् देवाअनेन मार्गेण गच्छन्तीति देवयानोदेवमार्गः तस्मादितरोयः पंथाः तं प्रगच्छ। न केवलं मत्तः परागच्छ अपितु चक्षुष्मते दर्शनवते शृण्वते सर्वं अप्रतिहतसर्वेंद्रियविज्ञानायेत्यर्थः। ते तुभ्यं ब्रवीमि कथयामि नोस्माकं प्रजां दुहितृदौहित्रात्मिकां मा रिरिषः माहिंसीः। उतापिच वीरान् पुत्रपौत्रादीन् माहिंसीः मत्परागमनेन रक्षेत्यर्थः॥ १॥

१. मृत्युदेव, तुम उस मार्ग से जाओ, जो देवयान-मार्ग से दूसरा है। तुम नेत्रवाले हो और सब कुछ जानते हो। मैं तुम्हारे लिए कहता हूँ। हमारे पुत्र, पौत्र आदि को नहीं मारना। वीरों को भी नहीं मारना।

अथ द्वितीया—

मृत्योःपदंयोपयन्तोयदैतद्राघीयआयुःप्रतरंदधानाः।
आप्यायमानाःप्रजयाधनेनशुद्धाःपूताभवतयज्ञियासः॥२॥

मृत्योः। पदम्। योपयन्तः। यत्। ऐत। द्राघीयः। आयुः।
प्रऽतरम्। दधानाः। आऽप्यायमानाः। प्रऽजया। धनेन।
शुद्धाः। पूताः। भवत। यज्ञियासः॥ २॥

हे मृतस्य ज्ञातयः मृत्योः परागच्छतस्तस्य पदं पद्यतेऽस्मिन् इति पदं पितृयागः तं योषयन्तः विमोहयन्तः परिवर्जयन्तः यद्यस्मात् एतदेव यानीयपथागतवन्तस्तस्मात् द्राघीयः दीर्घतरं आयुर्जीवनं प्रतरं प्रकृष्टतरमत्यर्थं दधानाः धारयन्तोभवथ। किंच हे यज्ञियासः यज्ञार्हा यज्ञसंपादिनोयजमानाः प्रजया पुत्रपौत्रादिकया धनेन गवाश्वादिकेन च आप्यायमानाः वर्तमानाः सन्तः शुद्धाः जन्मान्तरसंचितदुरितक्षयाद् शुद्धाभवत पूताः वर्तमानजन्मोपचितदुरितक्षयाच्च पूताभवत ॥ २ ॥

२. मृत व्यक्ति के सम्बन्धियो, पितृयान (मृत्यु-मार्ग) को छोड़ो। इससे दीर्घ जीवन प्राप्त होगा। यज्ञानुष्ठाता यजमानो, तुम पुत्र, पौत्र, गौ आदि से युक्त होकर इस जन्म और पूर्व जन्म के पापों से शून्य होकर पवित्र बनो।

पैतृमेधिकेकर्मणि अमात्याःइमेजीवाविमृतैरितिसव्यावृतोव्रजन्ति । सूत्रितंच—इमेजीवा-विमृतैरिविसव्यावृतोव्रजन्तीति ।

इमेजीवाविमृतैरावव्रत्रन्नभूद्भद्रादेवहूतिर्नोअद्य ।
प्राञ्चोअगामनृतयेहसायद्राघीयआयुःप्रतरंदधानाः ॥ ३ ॥

इमे । जीवाः । वि । मृतैः । आ । अववृत्रन् । अभूत् । भद्रा ।
देवऽहूतिः । नः । अद्य । प्राञ्चः । अगाम । नृतये । हसाय ।
द्राघीयः । आयुः । प्रऽतरम् । दधानाः ॥ ३ ॥

इमे जीवाः जीवन्तः पुरुषाः मृतैः पित्रादिभिस्तेभ्यइत्यर्थः व्यावव्रत्रन् व्यावृत्ताभवन्तु एते नम्रियन्तामितिभावः । किंच अद्यास्मिन् दिने नोस्माकं अशौचे विसृष्टे देवहूतिः देवानामाह्वानं यत्र सदेवहूतिः पितृमेधाख्योयज्ञः भद्रा कल्याणोभूद्भवतु । ततउत्तरं वयं प्राञ्चः प्राङ्मुखांचनाः अयाम गच्छेम प्रत्यंचइतिभावः नृतये नर्तनाय कर्मणि गात्रविक्षेपाय स्वकर्मानुष्ठानायेतिभावः हसाय हसनाय पुत्रादिभिः सहक्रीडनाय । कीदृशावयं द्राघीयआयुः प्रतरं दधानाः ॥ ३ ॥

३. जीवित मनुष्य मृत व्यक्तियों के पास लौट आवें। आज हमारा पितृमेध-यज्ञ कल्याणकर हो। हम उत्तम रीत से नर्त्तन और क्रीड़न के लिए समर्थ हों। हम दीर्घ आयु पावें।

इमंजीवेभ्यःपरिधिंदधामिमैषांनुगादपरोअर्थमेतम् ।
शतंजीवन्तुशरदःपुरूचीरन्तर्मृत्युंदधतांपर्वतेन ॥ ४ ॥

इ॒मम् । जी॒वेभ्यः॑ । प॒रि॒ऽधिम् । द॒धा॒मि॒ । मा । ए॒षा॒म् । नु । गा॒त् । अप॑रः । अर्थ॑म् । ए॒तम् । श॒तम् । जी॒व॒न्तु॒ । श॒रदः॑ । पु॒रू॒चीः । अ॒न्तः । मृ॒त्युम् । द॒धा॒ता॒म् । पर्व॑तेन ॥ ४ ॥

अनया जीवरक्षार्थं पाषाणं परिधिरूपेण स्थापयन्ति । जीवेभ्यः जीवद्भ्यः पुत्रपौत्रादिभ्यः तेषां रक्षणार्थं इमं परिधिं मृत्योः परिधानभूतं पाषाणं दधामि निदधामि ततएषां जीवतां मध्ये अपरोन्यः एनमिमं अर्थं अर्तेरिदं रूपं गन्तव्यं मरणाख्यंमार्गं नु क्षिप्रं मागात् मागच्छतु एतदर्थं परिधिं स्थापयामीतिसंबन्धः । किंच पुरूचीः बहूंचनाः बहुगमनाः शतं शरदः एतत्संख्याकान् वर्षान् जीवन्तु स्वस्वप्राणान् धारयन्तु ; तथा पर्वतेन शिलोच्चयेन मृत्युं सर्वेषां मारकमेतन्नामाकं अन्तर्दधतां अन्तर्हितं कुर्वन्तु यथा नागच्छति तथा कुर्वतामित्यर्थः ॥ ४ ॥

४. पुत्र, पौत्र आदि की रक्षा के लिए, मृत्यु के सामने, रोकने के लिए, पाषाण का मैं व्यवधान करता हूँ, ताकि मरणमार्ग शीघ्र न आने पावे। ये सैकड़ों वर्ष जीवित रहें। शिला-खण्ड से मृत्यु को दूर करो।

यथाहा॑न्यनुपू॒र्वंभव॑न्ती॒यथ॑ऋ॒तव॑ऋ॒तुभि॒र्यन्ति॑साधु ।
यथा॒नपू॒र्वमप॑रोजहा॒त्येवाधा॑त॒रायूं॑षिकल्पयै॒षाम् ॥ ५ ॥ २६ ॥

यथा॑ । अहा॑नि । अ॒नु॒ऽपू॒र्वम् । भव॑न्ति । यथा॑ । ऋ॒तवः॑ । ऋ॒तुऽभिः॑ । यन्ति॑ । सा॒धु॒ । यथा॑ । न । पू॒र्वम् । अप॑रः । जहा॑ति । ए॒व । धा॒तः॒ । आयूं॑षि । क॒ल्प॒य॒ । ए॒षाम् ॥ ५ ॥ २६ ॥

यथा येन प्रकारेण अहानि अहोरात्रात्मकानि दिनानि अनुपूर्वं पूर्वमनुक्रमेण भवन्ति परिवर्तन्ते यथा च ऋतवोवसन्तादयऋतुभिः सह साधु शोभनं अविपर्यासेन यन्ति गच्छन्ति यथा च पूर्वं पूर्वकालीनं पितरं अपरः अर्वाक्कालीनः पुत्रोन जहाति न परित्यजति पूर्वमरणेन एव एवं तेनैवोक्तप्रकारेण हे धातः सर्वेषां धारयितरेतन्नामक देव एषामस्मत्कुलीनानां जीवानां आयूंषि जीवनानि कल्पय समर्थय कुर्वित्यर्थः ॥ ५ ॥

५. जैसे दिन पर दिन बीतते हैं, ऋतु के पश्चात् ऋतु बीतती है और पूर्वकालीन पितरों के रहते आधुनिक पुत्र आदि नहीं मरते, वैसे ही हे धाता, हमारे वंशजों की आयु स्थिर रक्खो--अकाल मृत्यु न होने पावे।

॥ इति सप्तमस्य षष्ठे षड्विंशोवर्गः ॥ २६ ॥

आरोहतायुर्जरसंवृणानाअनुपूर्वंयतमानायतिष्ठ ।
इहत्वष्टासुजनिमासजोषादीर्घमायुःकरतिजीवसेवः ॥ ६ ॥

आ । रोहत । आयुः । जरसम् । वृणानाः । अनुऽपूर्वम् । यतमानाः ।
यति । स्थ । इह । त्वष्टा । सुऽजनिम । सऽजोषाः ।
दीर्घम् । आयुः । करति । जीवसे । वः ॥ ६ ॥

हे मृतस्य स्वजनाः पुत्रपौत्रादयः जरसं जरां वृणानाः संभजमानायूयं आयुर्जीवनमारोहत अधितिष्ठत अनुपूर्वं आनुपूर्व्येण अव्ययीभावः पूर्वोज्येष्ठः ज्येष्ठानुपूर्व्या यतमानाः प्रयत्नं कुर्वन्तोयूयं यतिस्थ यत्संख्याकाभवथ यच्छब्दाच्छान्दसोडतिः सुजनिमा शोभनजननः त्वष्टा एतन्नामकोदेवः सजोषाभवद्भिः संगतः सन् इहास्मिन् कर्मणि प्रवृत्तानां वोयुष्माकं जीवसे जीवनाय दीर्घं प्रभूतमायुः करति करोतु ॥ ६ ॥

६. मृत व्यक्ति के पुत्रादिको, वार्द्धक्य प्राप्त करते हुए, आयु में अधिष्ठित रहो। ज्येष्ठ के पश्चात् कनिष्ठ के क्रम से तुम लोग कार्य में व्यवस्थित रहो। शोभन-जन्मा त्वष्टादेव, तुम लोगों के साथ, इस कर्म में प्रवृत्त हुए तुम लोगों की आयु लम्बी करें।

इमानारीरविधवाःसुपत्नीराञ्जनेनसर्पिषासंविशन्तु ।
अनश्रवोनमीवाःसुरत्नाआरोहन्तुजनयोयोनिमग्रे ॥ ७ ॥

इमाः । नारीः । अविधवाः । सुऽपत्नीः । आऽअञ्जनेन । सर्पिषा ।
सम् । विशन्तु । अनश्रवः । अनमीवाः । सुऽरत्नाः ।
आ । रोहन्तु । जनयः । योनिम् । अग्रे ॥ ७ ॥

अविधवाः धवः पतिः अविगतपतिकाः जीवद्भर्तृकाइत्यर्थः सुपत्नीः शोभनपतिकाः इमानारीः नार्यः आंजनेन सर्वतोंजनसाधनेन सर्पिषा घृतेन अक्तनेत्राः सत्यः संविशन्तु स्वगृहान् प्रविशन्तु । तथा अनश्रवः अश्रुवर्जिताः अरुदत्यः अनमीवाः अमीवारोगस्तद्वर्जिताः मानसदुःखवर्जिताइत्यर्थः सुरत्नाः शोभनधनसहिताः जनयः जनयन्त्यपत्यमितिजनयोभार्याः ताअग्रे सर्वेषां प्रथमतएव योनिं गृहं आरोहन्तु आगच्छन्तु ॥ ७ ॥

७. ये सधवा और शोभन पतिवाली स्त्रियाँ घृताञ्जन के साथ अपने घरों को जायें। अश्रु-शून्य, मानस-रोग-रहित और शोभन धनवाली होकर ये स्त्रियाँ सबसे आगे घरों में जायें।

देवरादिकः प्रेतपत्नीमुदीर्ष्वनारीत्यनयाभर्तृसकाशादुत्थापयेत् । सूत्रितंच—तामुत्थापयेद्देवरःपतिस्थानीयोन्तेवासीजरद्वासोवोदीर्ष्वनार्यभिजीवलोकमिति ।

सैषाष्टमी—

उदीर्ष्वनार्यभिजीवलोकंगतासुमेतमुपशेषएहि ।
हस्तग्राभस्यदिधिषोस्तवेदंपत्युर्जनित्वमभिसंबभूथ ॥ ८ ॥

उत् । ईर्ष्व । नारि । अभि । जीवऽलोकम् । गतऽअसुम् । एतम् ।
उप । शेष । आ । इहि । हस्तऽग्राभस्य । दिधिषोः । तव ।
इदम् । पत्युः । जनिऽत्वम् । अभि । सम् । बभूथ ॥ ८ ॥

हे नारि मृतस्य पत्नि जीवलोकं जीवानां पुत्रपौत्रादीनां लोकं स्थानं गृहमभिलक्ष्य उदीर्ष्व अस्मात् स्थानादुत्तिष्ठ । ईर गतौ आदादिकः । गतासुं अपक्रान्तप्राणं एतं पतिं उपशेषे तस्य समीपे स्वपिषि तस्मात् त्वं एहि आगच्छ । यस्मात् त्वं हस्तग्राभस्य पाणिग्राहं कुर्वतः दिधिषोः गर्भस्यनिधातुः तवास्य पत्युः संबन्धादागतं इदं जनित्वं जायात्वं अभिलक्ष्य संबभूथ संभूतासि असुसरणनिश्चयं अकार्षीः तस्मादागच्छ ॥ ८ ॥

८. मृत व्यक्ति की पत्नी, पुत्रादि के गृह का विचार करके, यहाँ से उठो। यह तुम्हारा पति मरा हुआ है। इसके पास तुम (व्यर्थ) सोई हुई हो। चलो; क्योंकि पाणिग्रहण और गर्भ धारण करानेवाले पति के साथ तुम स्त्री-कर्तव्य कर चुकी हो। तुमने इसके प्राण-गमन का निश्चय कर लिया है; इसलिए घर लौट चलो।

क्षत्रियस्य धनुर्हस्तादित्यनया धनुःप्रहरेत् । सूत्रितंच—धनुर्हस्तादाददानोमृतस्येविधनुरिति ।

सैषा नवमी—

धनुर्हस्तादाददानोमृतस्यास्मेक्षत्रायवर्चसेबलाय ।
अत्रैवत्वमिहवयंसुवीराविश्वास्पृधोअभिमातीर्जयेम ॥ ९ ॥

धनुः । हस्तात् । आऽददानः । मृतस्य । अस्मे इति । क्षत्राय ।
वर्चसे । बलाय । अत्र । एव । त्वम् । इह । वयम् । सुऽवीराः ।
विश्वाः । स्पृधः । अभिऽमातीः । जयेम ॥ ९ ॥

मृतस्य क्षत्रियस्य हस्ताद् धनुराददानः किमर्थं अस्मै अस्माकं क्षत्राय प्रजापालनसमर्थाय बलाय वर्चसे तेजसे बलाय सेनालक्षणाय च धनुराददानोहं ब्रवीमीति शेषः किमिति त्वं अत्रैवास्मिन् स्थाने एव भव । वयं च इहास्मिन् लोके सुवीराः सुपुत्रयुक्ताभवन्तः विश्वाः सर्वान् अभिमातीः अभिमन्यमानान् स्पृधः संघर्षयित्रीन् बाधकान् शत्रून् जयेम सहेमहि ॥ ९ ॥

९. अपनी प्रजा के रक्षण, तेज और बल के लिए मैं मृत व्यक्ति के हाथ से धनु लेकर बोलता हूँ। मृत, तुम यहीं रहो। हम वीर पुत्रोंवाले हों। हम सारे अभिमानी शत्रुओं को जीतें।

दीक्षितमरणे उपसर्पमातरमित्याद्याश्चतस्रः शंसनीयाः । सूत्रितंच—उपसर्पमातरंभूमिमेतामितिचतस्रः सोमएकेभ्यइति । उपसर्पेत्यनया संचितान्यस्थीनिगर्तेनिदध्युः ।

उप॑सर्प मा॒तर॑ं भूमि॑मे॒तामु॑रु॒व्यचं॑सं पृथि॒वीं सु॒शेवा॑म् ।
ऊर्ण॑म्रदा युव॒तिर्द॑क्षि॒णावत ए॒षा त्वा॑ पातु॒ निर्ऋ॑तेरु॒पस्था॑त् ॥ १० ॥ २७ ॥

उप॑ । स॒र्प॒ । मा॒तर॑म् । भूमि॑म् । ए॒ताम् । उ॒रु॒ऽव्यच॑सम् । पृ॒थि॒वीम् ।
सु॒ऽशेवा॑म् । ऊर्ण॑ऽम्रदाः । यु॒व॒तिः । द॒क्षि॒णाऽवते ।
ए॒षा । त्वा॒ । पा॒तु॒ । निःऽऋ॑तेः । उ॒पऽस्था॑त् ॥ १० ॥ २७ ॥

मातरं मातृभूतां भूमिं अस्माभिर्भूमौ निधीयमानस्त्वं उपसर्प उपगच्छ अनुप्रविशेत्यर्थः। कीदृशीं उरुव्यचसं बहुव्यापिकां पृथिवीं विस्तीर्णां सुशेवां सुसुखां सर्वेषां सुखदात्रीमित्यर्थः तामुपगच्छ । युवतिः यौवनान्विता स्त्रिरूपा इयं भूमिः दक्षिणावते ऋत्विग्भ्योदेयत्वेन धनवते यजमानाय ऊर्णम्रदाः ऊर्णेव ऊर्णास्तुकइव मृद्वी भवति सुकुमारा भवति न बाधयित्रीमित्यर्थः। सैषा पृथिवी निर्ऋतेः मृत्युदेवतायाः उपस्थात् समीपस्थानात् त्वा त्वां अस्थिरूपं यजमानं पातु रक्षतु ॥ १० ॥

१०. मृत, मातृ-स्वरूपिणी, विस्तीर्ण, सर्वव्यापिनी और सुखदात्री पृथिवी के पास जाओ। यह यौवन से युक्त स्त्री के समान तुम्हारे लिए राशीकृत मेषलोम के सदृश कोमल-स्पर्शा है। तुमने दक्षिणा दी है या यज्ञ किया है। यह पृथिवी मृत्यु के पास से अस्थि-रूप तुम्हारी रक्षा करें।

॥ इति सप्तमस्य षष्ठे सप्तविंशोवर्गः ॥ २७ ॥

सैषैकादशी—

उच्छ्वं॑चस्व पृथिवि॒ मानि॑ बाधथाः सूपाय॒नास्मै॑ भव सूपवञ्च॒ना ।
मा॒ता पु॒त्रं यथा॑ सि॒चाभ्ये॑नं भूम ऊर्णुहि ॥ ११ ॥

उत् । श्वञ्चस्व । पृथिवि । मा । नि । बाधथाः । सुऽउपायना ।
अस्मै । भव । सुऽउपवञ्चना । माता । पुत्रम् । यथा ।
सिचा । अभि । एनम् । भूमे । ऊर्णुहि ॥ ११ ॥

हे पृथिवि उच्छ्वंचस्व ऊर्ध्वं गतोच्छ्वासमेनं कुरु अधस्तान्माकृथाइत्यर्थः । किंच मा-निबाधथाः मा संपीडय । तथा अस्मै यजमानार्थं सूपायना शोभनोपगमना सूपचारिकाभवे-त्यर्थः । सूपवंचना उपवंचनं प्रलंभनं शोभनप्रलंभा सुप्रतिष्ठा भव । अपिच माता पुत्रमात्मीयं बालकं सिचा वस्त्रांतेन यथा आच्छादयति तद्वत् हे भूमे एनं अस्थिरूपं यजमानं अभ्यू-र्णुहि आभिमुख्येनाच्छादय ॥ ११ ॥

११. पृथिवी, तुम इस मृत को उन्नत करके रक्खो। इसे पीड़ा नहीं देना। इसके लिए सुपरिचारिका और सुप्रतिष्ठा होओ। जैसे माता पुत्र को अञ्चल से ढँकती है, वैसे ही, हे भूमि, इस अस्थिरूप मृत को आच्छा-दित करो। अथ द्वादशी—

उच्छ्वञ्चमानापृथिवीसुतिष्ठतुसहस्रंमितउपहिश्रयन्ताम् ।
तेगृहासोघृतश्चुतोभवन्तुविश्वाहास्मैशरणाःसन्त्वत्र ॥ १२ ॥

उत्ऽश्वञ्चमाना । पृथिवी । सु । तिष्ठतु । सहस्रम् । मितः । उप ।
हि । श्रयन्ताम् । ते । गृहासः । घृतऽश्चुतः । भवन्तु ।
विश्वाहा । अस्मै । शरणाः । सन्तु । अत्र ॥ १२ ॥

पांसुभिः प्रच्छाद्य एतां पठन्ति उच्छ्वंचमानाअस्थिकुंभमवष्टभ्य ऊर्ध्वं गच्छन्ती पृथि-वी सुतिष्ठतु प्रतिष्ठिता भवतु । किंच सहस्रं सहस्रसंख्याकाः मितः प्रक्षिप्ताः मिनोतेरौणादिके कर्मणि क्तिपि तुगागमः ततोजस् यद्वा सहस्रं तृतीयार्थे प्रथमा मितइतिनिष्ठान्तं रूपं व्यत्य-येन बहुवचनस्य एकवचनं स्वरोवृषादिवाद्रष्टव्यः सहस्रेण संमिताः बहुसंख्याकाः पार्थिवाः पांसवः उपश्रयन्तां एनमुपसेवन्तां संपरिवार्यतिष्ठन्त्वित्यर्थः । हिरवधारणे । तथा ते पांसवः अस्मै गृहासः गृहाभवन्तः घृतश्चुतः घृतस्योदकस्य सर्पिषोवा क्षारयितारोभवन्तु । अत्रास्मि-न् लोके विश्वाहा सर्वेष्वहःसु सर्वदास्मै अस्य शरणाः सन्तु आश्रयभूताभवन्तु ॥ १२ ॥

१२. इसके ऊपर स्तूपाकार होकर पृथिवी भली भाँति अवस्थित हों। सहस्र धूलियाँ इसके ऊपर अवस्थित करें। वे इसके लिए घृतपूर्ण गृह के समान हों। प्रतिदिन वे इसके आश्रय हों।

उत्तेस्तभ्नामीति कपालेनास्थीन्यपिदध्याद् । सूत्रितंच—उत्तेस्तभ्नामीतिकपालेनापिधायेति ।

सैषा त्रयोदशी–

उत्तेंस्तभ्नामिपृथिवींत्वत्परीमंलोगंनिदधन्मोअहंरिषम् ।
एतांस्थूणांपितरोधारयन्तुतेत्रांयमःसादंनातेमिनोतु ॥ १३ ॥

उत् । ते । स्तभ्नामि । पृथिवीम् । त्वत् । परि । इमम् । लोगम् ।
निऽदधत् । मो इति । अहम् । रिषम् । एताम् । स्थूणाम् । पितरः ।
धारयन्तु । ते । अत्र । यमः । सदना । ते । मिनोतु ॥ १३ ॥

हे अस्थिकुंभ त्वत्परि परिशब्दयोगे पंचमी तवोपरि ते त्वदीयेन कपालेन पृथिवीमुत् स्तभ्नामि प्रतिबध्नामि यथा पृथिवी तवोपरिमागच्छति तथापिदधामीत्यर्थः । इमं लोगं कपाललक्षणं लोष्टं निदधत् उपरिस्थापयन्नहं मोरिषं माहिंसिषं । किंच एतां मया निहितां स्थूणां ते त्वदीयां पृथिव्याधारयित्रीं कपाललक्षणां पितरोधारयन्तु निश्चलां कुर्वन्तु । ततः ते त्वदीये अत्र अस्मिन् स्थाने यमः पितृपतिः सदना सदनानि स्थानानि मिनोतु परिच्छिनत्तु करोत्वित्यर्थः ॥ १३ ॥

१३. अस्थित-कुम्भ, तुम्हारे ऊपर पृथिवी को उत्तम्भित करके रखता हूँ। तुम्हारे ऊपर में लोष्ट्र अर्पण करता हूँ, ताकि तुम्हारे ऊपर मिट्टी जाकर तुम्हें नष्ट न कर सके। इस स्थूणा (खूंटी) को पितर लोग धारण करें। पितृपति यम यहाँ तुम्हारा वासस्थान कर दें।

अथ चतुर्दशी–

प्रतीचीनेमामहनीष्वाःपर्णमिवादधुः ।
प्रतीचींजग्रभावाचमश्वंरशनयायथा ॥ १४ ॥ २८ ॥

प्रतीचीने । माम् । अहनि । इष्वाः । पर्णम्ऽइव । आ । दधुः ।
प्रतीचीम् । जग्रभ । वाचम् । अश्वम् । रशनया । यथा ॥ १४॥२८॥

अनया प्रजापतिः प्रार्थ्यते हे प्रजापते प्रतीचीने प्रतिपूज्ये अहनि तदुपलक्षिते संवत्स- [illegible] संकुसुकमृषिं आदधुः निहितवन्तः सर्वे देवाः । किमिव इष्वाः बाणस्य पर्णमिव पक्षमिव पक्षं यथा बाणस्य मूले स्थापयन्ति तद्वत् जगन्मूले त्वयि मां स्थापितवन्तः अतोम-

दीपां प्रतीचीं पूज्यां वाचं स्तुतिरूपां जगृभ गृहाण। कथमित्युच्यते अश्वं आशुगामिनं हयं रशनया रज्ज्वा यथा गृह्णन्ति तद्वत् कर्णाभ्यां मत्कृतां स्तुतिं गृहाणेत्यर्थः ॥ १४ ॥

१४. प्रजापति, जैसे बाण के मूल में पर्ण (पक्ष) लगाते हैं, वैसे ही प्रतिपूज्य संवत्सर-रूप दिन में मुझ संकुसुक ऋषि को सारे देवों ने रक्खा है। जैसे शीघ्रगामी अश्व को रस्सी से रोका जाता है, वैसे ही मेरी पूज्य स्तुति को रक्खो।

॥ इति सप्तमस्य षष्ठेष्टाविंशोवर्गः ॥ २८ ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके षष्ठोध्यायः ॥ ६ ॥

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितं वेदा योवेदेभ्योखिलं जगत् । निर्ममे तमहं वंदेविद्यातीर्थमहेश्वरं ॥ १ ॥

अष्टके सप्तमेपष्ठं व्याख्याय श्रुतिकोविदः । सायणार्यस्ततोध्यायं सप्तमं व्याचिकीर्षति ॥ २ ॥

अथ द्वादशानुवाकात्मकस्य दशममंडलस्य द्वितीयेनुवाके त्रयोदशसूक्तानि तत्र निवर्तध्वमित्यष्टर्चं तृतीयं सूक्तं अस्य यमपुत्रोमथिताख्यऋषिः वरुणपुत्रोभृगुर्वाथवा भार्गवश्च्यवनः षष्ठी गायत्री शिष्टाअनुष्टुभः इदं अब्देवताकं गोदेवताकं वा अग्नीषोमापुनर्वसू इत्यर्धर्चोग्नीषोमदेवताकः । तथाचानुक्रान्तं—निवर्तध्वमष्टौ मथितोभृगुर्वारुणिर्भार्गवश्च्यवनोवापं गव्यं वानुष्टुभमग्नीषोमीयोद्वितीयोर्धर्चः षष्ठी गायत्री । गतोविनियोगः ।

तत्र प्रथमा—

ओम् निवर्तध्वंमानुगातास्मान्त्सिषक्तरेवतीः ।
अग्नीषोमापुनर्वसूअस्मेधारयतंरयिम् ॥ १ ॥

नि । वर्तध्वम् । मा । अनु । गात । अस्मान् । सिसक्त । रेवतीः ।
अग्नीषोमा । पुनर्वसू इति पुनःऽवसू । अस्मे इति ।
धारयतम् । रयिम् ॥ १ ॥

हे गावः हे आपोवा यूयं निवर्तध्वं अस्मान् प्रतिआगच्छत मानुगात अस्मद्व्यतिरिक्तं यजमानं मानुगच्छत । आगत्य च हेरेवतीः रेवत्योधनवत्यः यूयं अस्मान् सिषक्त सेचयत अवगाहत गोदोहनस्नानपानादिद्वारेण सेवध्वमित्यर्थः । हे पुनर्वसू पुनःपुनर्वस्तारौ स्तोतॄणां यष्टॄणामाच्छादयितारौ अग्नीषोमा अग्नीषोमौ एतन्नामकौ देवौ युवां अस्मे अस्मासु रयिं वीरादिलक्षणं धनं धारयतं स्थापयतं ॥ १ ॥

१. गायो, तुम लोग हमारे पास आओ। हमारे सिवा दूसरे के पास मत जाओ। धनवती गायो, हमें दुग्ध दान करके सेवित करो। बार-बार धन देनेवाले अग्नि और सोम, तुम लोग हमें धन दो।

अथ द्वितीया—

पुनरेनानिवर्तयपुनरेनान्याकुरु । इन्द्रएणानिपच्छत्वग्निरेनाउपाजतु॥२

पुनः । एनाः । नि । वर्तय । पुनः । एनाः । नि । आ । कुरु ।
इन्द्रः । एनाः । नि । यच्छतु । अग्निः । एनाः । उपऽअजतु ॥ २॥

अत्र मंत्रद्रष्टा स्वात्मानं प्रति ब्रूते हे मदीयात्मन् त्वं एनाः एताः अन्यतोभिगंत्रीः गाआपोवा पुनर्निवर्तय पुनःपुनर्मदभिमुखीकुरु । तदनंतरं एनाः एताः पुनः भूयोभूयः निआकुरु नियताः आत्मायत्ताः कुरु । किंच इन्द्रोपि तव सहायभूतः सन् एनाएताः नियच्छतु त्वदायत्ताः करोतु। अग्निश्च एनाएताः गाः आपोवा उपाजतु उपगमयतु उपक्षिपतुवा उपयोग्याः करोत्वित्यर्थः ॥२॥

२. इन गायों को बार-बार हमारे सामने करो। इन्हें अपने वश में करो। इन्द्र भी इन्हें तुम्हारे वश में करें। अग्नि इन्हें उपयोगिनी करें।

पुनरेतानिवर्तन्तामस्मिन्पुष्यन्तुगोपतौ ।
इहैवाग्नेनिधारयेहतिष्ठतुयारयिः ॥ ३ ॥

पुनः । एताः । नि । वर्तन्ताम् । अस्मिन् । पुष्यन्तु । गोऽपतौ ।
इह । एव । अग्ने । नि । धारय । इह । तिष्ठतु । या । रयिः ॥ ३ ॥

एनाएताःईदृश्योगावः आपोवा पुनर्निवर्तन्तां भूयोभूयोमां प्रत्यागच्छंतु आगत्य । च गोपतौ सास्नादिमतीनां धेनूनां वृष्टिलक्षणानामपां च पालके अस्मिन्नीदृशे मयि पुष्यन्तु आत्मायत्तत्वेन स्थित्वा पुष्टाभवन्तु । पुष्टाः सतीस्ताः हे अग्ने त्वं इहैव अस्मिन्नेव मयि निधारय नियमेन स्थापय । या रयिः यदपि व्रीह्यादिकं धनमस्ति तदपि धनं गोसहितं इहास्मिन्नेव गोपतौ मयि तिष्ठतु निवसतु ॥ ३ ॥

३. ये गायें बार-बार मेरे पास आवें। ये मेरे वश में होकर पुष्ट हों। अग्नि, इन्हें मेरे पास रक्खो। यह गोधन मेरे पास रहे।

अथ चतुर्थी–

यन्नियानंन्यर्यनंसंज्ञानंयत्परार्यणम् ।
आवर्तनंनिवर्तनंयोगोपाअपितंहुवे ॥ ४ ॥

यत् । निऽयानम् । निऽअर्यनम् । सम्ऽज्ञानम् । यत् । पराऽअर्यनम् ।
आऽवर्तनम् । निऽवर्तनम् । यः । गोपाः । अपि । तम् । हुवे ॥ ४ ॥

नियानं अधिकरणे ल्युट् नियमेन यान्त्यागच्छन्ति गावोत्रेति नियानं गोष्ठाख्यं स्थानं यदस्तीति शेषः । यच्छब्दयोगात्तच्छब्दोध्याहर्तव्यः हुवइति क्रियापदं सर्वत्रानुषज्यते तत्स्थानं

हुवे आह्वयामि । आह्वानमभिमुखीकरणं तेन चात्र तत्पूर्विका प्रार्थना लक्ष्यते । गोसहितं गोष्ठं प्रार्थयइत्यर्थः । व्ययनं भावे ल्युट् नियमेन गृहं प्रति प्राप्तिलक्षणं गमनं यदस्ति तदपि प्रार्थये संज्ञानं गोभिः सह ऐकमत्यं यदस्ति तदपि प्रार्थये परायणं परागमनं वनं प्रति गवां चरणाय गमनं यदस्ति तदपि प्रार्थये आवर्तनं वनचारिणीभिर्गोभिः सह प्रवर्तनं यदस्ति तदपि प्रार्थये निवर्तनं वने चरित्वा गृहं प्रति यदागमनमस्ति तदपि प्रार्थये योपि गोपाः गवां पालको स्ति तमपि हुवे प्रार्थये सर्वगुणोपेतागाः प्रार्थयइत्यर्थः ॥ ४ ॥

४. मैं गोसहित गोष्ठ की प्रार्थना करता हूँ । गौओं के गृह आने की प्रार्थना करता हूँ । गोसम्मेलन की भी प्रार्थना करता हूँ । गोचरण की भी प्रार्थना करता हूँ । चरकर उनके घर आने की भी प्रार्थना करता हूँ । गोपाल की भी प्रार्थना करता हूँ ।

यउदानड्व्यर्यनंयउदानट्परायणम् ।
आवर्तनंनिवर्तनमपिगोपानिवर्तताम् ॥ ५ ॥

यः । उत्ऽआनट् । विऽअर्यनम् । यः । उत्ऽआनट् । पराऽअर्यनम् । आऽवर्तनम् । निऽवर्तनम् । अपि । गोपाः । नि । वर्तताम् ॥ ५ ॥

योगोपाः गोपालः व्ययनं नष्टानां गवां अन्वेषणार्थं विविधगमनं उदानट् व्याप्नोति अनुभवति यः परायणं परागमनं उदानट् व्याप्नोति वनं प्रति गवां चरणाय गमनमित्यर्थः यश्च आवर्तनं वनचारिणीभिर्गोभिः सह प्रवर्तनमनुभवति योपि गोपाः निवर्तनं गोभिः सह वनात् गृहं प्रति गमनमनुभवति सोपि गोपालः निवर्ततां गोभिः सह वनात् गृहं प्रति क्षेमेणागच्छतु ॥ ५ ॥

५. जो गोपाल (गायें चरानेवाला) चारों ओर गायों की खोज करता है, जो गायों को घर पर ले आता है और जो गायें चराता है, वह कुशलपूर्वक घर पर लौट आवे ।

आनिवर्तनिवर्तयपुनर्नइन्द्रगादेहि । जीवाभिर्भुनजामहै ॥ ६ ॥

आ । निऽवर्त । नि । वर्तय । पुनः । नः । इन्द्र । गाः । देहि । जीवाभिः । भुनजामहै ॥ ६ ॥

हे इन्द्र त्वं आनिवर्त आनिवर्तस्व अस्मदभिमुखोभव । ततः अन्यतोगच्छतीर्गाः निवर्तय अस्मदभिमुखीकुरु । एवं कृत्वा च हे इन्द्र त्वं पुनः पश्चात् नोस्मभ्यं गाः देहि प्रयच्छ । त्वया दत्ताभिः जीवाभिः चिरंजीवतीभिः सर्वस्य जीवयित्रीभिर्वा गोभिः भुनजामहै वयं भुंजीमहि । यद्वा भुजिरत्रान्तर्भावितण्यर्थः देवपितॄन् संभोजयेमहि ॥ ६ ॥

६. इन्द्र, तुम हमारी ओर होओ। गायों को हमारी ओर करो। हमें गायें दो। हम चिरञ्जीविनी गायों का दुग्ध भोगें।

परिवोविश्वतोदधउर्जाघृतेनपयसा।
येदेवाःकेचयज्ञियास्तेरय्यामंसृजन्तुनः ॥ ७ ॥

परि। वः। विश्वतः। दधे। ऊर्जा। घृतेन। पयसा। ये। देवाः।
के। च। यज्ञियाः। ते। रय्या। सम्। सृजन्तु। नः ॥ ७ ॥

हे देवाः विश्वतः सर्वतः स्थितान् वोयुष्मान् ऊर्जागोसंबन्धिना दधिलक्षणेनान्नेन घृतेनाज्येन च पयसा क्षीरेण च परिदधे संधारयामि युष्मभ्यं हविर्द्वारेण प्रयच्छामि न केवलमात्मानं पुष्णामीत्यर्थः। एतत् ज्ञात्वा ये के च देवाः यज्ञियायज्ञार्हाः सन्ति ते देवाः नोस्मान् रय्या गोलक्षणेन धनेन संसृजंतु संयोजयन्तु ॥ ७ ॥

७. देवो, मैं तुम लोगों को प्रचुर अन्न, घृत और दुग्ध आदि निवेदित कर देता हूँ। फलतः जो यज्ञ-योग्य देवता हैं, वे हमें गोधन दें।

आनिवर्तनिवर्तयनिनिवर्तनिवर्तय।
भूम्याश्चतस्रःप्रदिशस्ताभ्यएनानिवर्तय ॥ ८ ॥ १ ॥

आ। निऽवर्तन। वर्तय। नि। निऽवर्तन। वर्तय। भूम्याः। चतस्रः।
प्रऽदिशः। ताभ्यः। एनाः। नि। वर्तय ॥ ८ ॥ १ ॥

मंत्रद्रष्टा ऋषिः स्वात्मानं गाश्च संबोध्याह हे मदीयात्मन् त्वं गाः आवर्तय आकारोप्यनेनापि संबध्यते मदभिमुखीं कुरु स्तुत्या यागेन च ताः प्रसाद्योपनमयेत्यर्थः। हे गावोयूयमपि प्रसाद्यमानाआनिवर्तन आनिवर्तध्वं आभिमुख्येनागच्छत। पुनरप्याह हे मदीयात्मन् त्वं निवर्तय गोसंचरणस्थानादपगच्छन्तीर्गाः इतोभिगंत्रीः कुरु। यूयमपि हे गावः निवर्त्यमानाः सत्यः निवर्तन निवर्तध्वं। इदानीं स्वात्मागावश्च ऋषिं प्रति ब्रुवते हे ऋषे अहं कुतोगानिवर्तयामीति कुतोवयं निवर्तामहइत्यात्मना गोभिश्च पृष्टः सन्नाह—भूम्याः पृथिव्याः चतस्रः प्रदिशः चतुःसंख्यायुक्ताः प्रकृष्टायादिशः सन्ति ताभ्योदिग्भ्यः एनागाः निवर्तय हे आत्मन् मदभिमुखीः कुरु। हे गावोयूयमपि ताभ्योदिग्भ्योनिवर्तध्वमिति सामर्थ्याल्लब्धं। मन्त्रा अन्ये बहुपक्षेपि सूक्तार्थो यथाघटते तथा योजना कर्तव्या ॥ ८ ॥

८. चरवाहो, गायों को मेरे पास ले आओ। गायो, तुम भी आओ। चरवाहो, गायों को लौटाओ। गायो, लौट आओ। सूक्तकर्त्ता ऋषि, मैं कहाँ से लौटाऊँ? हम कहाँ से लौटें? (उत्तर—) चारों दिशाओं से गायों को लौटाओ। गायो, तुम भी इन दिशाओं से लौट आओ।

॥ इति सप्तमस्य सप्तमे प्रथमोवर्गः ॥ १ ॥

भद्रमिति दशर्चं चतुर्थं सूक्तं आद्याएकपदा दशाक्षरा विराट् अग्निमीळेभुजामित्येषा अनुष्टुप् नवमीविराट् दशमीत्रिष्टुप् मध्येषड्गायत्र्यः इदमादीनां सप्तसुक्तानामिन्द्रपुत्रः प्रजापतिपुत्रोवा विमदऋषिः वसुक्रपुत्रोवसुक्रदाख्योवा। इदमुत्तरं चाग्नेयं। तथाचानुक्रान्तं—सप्तोत्तराण्यैन्द्रोविमदः प्राजापत्योवा वासुक्रोवसुक्रद्वा। भद्रं दशाग्नेयंतुगायत्रमाद्यैकपदा पादएव वा शांत्यर्थः परानुष्टुबंत्येविराट्त्रिष्टुभाविति। गतोविनियोगः।

तत्र प्रथमा—

भद्रंनोअपिवातयमनः ॥ १ ॥

भद्रंनोअपिवातयमनः ॥ १ ॥

हे अग्ने त्वं नोस्माकं मनः भद्रं शुभयुक्तं अपिवातय अपिरत्रधात्वर्थानुवादी आगमय त्वत्संबन्धिस्तोत्रकरणे प्रेरयेत्यर्थः ॥ १ ॥

१. अग्नि, हमारे मन को शुभ करो—अपने स्तोत्र के योग्य करो।

अथ द्वितीया—

अग्निमीळेभुजांयविष्ठंशासामित्रंदुर्धरीतुम्।
यस्यधर्मन्त्स्व१रेनीःसपर्यन्तिमातुरूधः ॥ २ ॥

अग्निम्। ईळे। भुजाम्। यविष्ठम्। शासा। मित्रम्। दुःऽधरीतुम्। यस्य। धर्मन्। स्वः। एनीः। सपर्यन्ति। मातुः। ऊधः ॥ २ ॥

भुजां हविर्भुजां देवानां मध्ये यविष्ठं अहन्यहनि अग्निहोत्रादिकर्मार्थं जायमानत्वादतिशयेन युवानं शासा अनुशासनेन मित्रं यस्मादिदं कर्तव्यं इदं न कर्तव्यमिति सर्वमनुशास्ति तस्माद् सर्वस्य मित्रभूतमित्यर्थः। दुर्धरीतुं दुर्धरणीयं संग्रामे शत्रुभिर्दुर्निवारणीयं एवंभूतमग्निं ईळे स्तौमि। अपिच यस्याग्नेः धर्मन् धर्मणि अग्निहोत्रादिके कर्मणि स्वः द्युलोकमादित्यं सर्वं देवजातं वा एनीः एन्यः प्रतिगंत्र्यः आहुतयः स्तुतयश्च सपर्यन्ति परिचरन्ति सेवन्ते। यद्वा स्वः सपर्यन्तीत्यनयोः सामानाधिकरण्यं अत्र स्वरित्ययं सर्वशब्दोनिपातः स्वः सर्वे देवाः एनीः आत्मनः प्रतिगंत्रीः आहुतीः स्तुतीश्च सपर्यन्ति सेवन्ते उपजीवन्तीत्यर्थः। तत्रदृष्टान्तः—लुप्तोपममेतद् मातुः गोरूधः क्षीरोपसंहारस्थानं प्रति यथा वत्साउपजीवन्ति तद्वत् तमग्निमीळइति पूर्वेण संबन्धः ॥ २ ॥

२. हवि का भोग करनेवाले देवों में कनिष्ठ, अतीव युवक, सबके मित्र और दुर्द्धर्ष अग्नि की मैं स्तुति म करता हूँ। बछड़े गोस्तन का आश्रय करके प्राण धारण करते हैं।

अथ तृतीया—

यमासाकृपनीळंभासाकेतुंवर्धयन्ति ।
भ्राजंतेश्रेणिदन् ॥ ३ ॥

यम् । आसा । कृपऽनीळम् । भासाऽकेतुम् ।
वर्धयन्ति । भ्राजंते । श्रेणिऽदन् ॥ ३ ॥

स्तोतारोयष्टारश्च आसा स्तुतिहविर्लक्षणेनोपासनेन यमग्निं वर्धयन्ति कीदृशं कृपनीळं कर्मस्थानं कर्माधारमित्यर्थः भासाकेतुं ज्वालालक्षणज्ञापकं दीप्तेः कर्तारं यच्छब्दश्रुतेः तच्छब्दोध्याहार्यः सोग्निः श्रेणिदन् श्रोतृभ्योयष्टृभ्यः अभीष्टफलसमूहप्रदः शत्रुभ्योज्वालापंक्तिप्रदोवा एवंभूतः सन् भ्राजते भासते ॥ ३ ॥

३. कर्माधार और ज्वाला-रूप अग्नि को स्तोता लोग वर्द्धित करते हैं। अग्नि स्तोताओं को अभीष्ट फल देनेवाले हैं।

अर्योविशांगातुरेतिप्रयदानड्दिवोअन्तान् ।
कविरभ्रंदीद्यानः ॥ ४ ॥

अर्यः । विशाम् । गातुः । एति । प्र । यत् । आनट् । दिवः ।
अन्तान् । कविः । अभ्रम् । दीद्यानः ॥ ४ ॥

विशां यजमानमनुष्याणांअर्योगन्तव्यः गातुर्गमनशीलोग्निर्दीद्यानोदीप्यमानः यद्यदा एति ऊर्ध्वं गच्छति तदा दिवोद्युलोकस्य अन्तान् पर्यन्तान् कविर्मेधावी सोग्निः प्रानट् प्रकर्षेण व्याप्नोति अभ्रं मेघोपलक्षितमन्तरिक्षं च व्याप्नोति ॥ ४ ॥

४. अग्नि यजमानों के लिए आश्रयणीय हैं। जिस समय अग्नि दीप्त होकर ऊपर उठते हैं, उस समय मेधावी अग्नि द्युलोक तक व्याप्त कर लेते हैं—मेघ को भी व्याप्त कर लेते हैं।

अथ पंचमी—

जुषद्धव्यामानुषस्योर्ध्वस्तस्थावृभ्वायज्ञे ।
मिन्वन्त्सद्मपुरएति ॥ ५ ॥

जुषत् । हव्या । मानुषस्य । ऊर्ध्वः । तस्थौ । ऋभ्वा । यज्ञे ।
मिन्वन् । सद्म । पुरः । एति ॥ ५ ॥

मानुषस्य यजमानस्य यज्ञे यजनीये यागे हव्या हव्यानि हवींषि जुषत सेवमानोऽग्निः क्रत्वा उरुभूतः बहुज्वालोपेतऊर्ध्वः तस्थौ उत्तिष्ठति ऊर्ध्वं ज्वलतीत्यर्थः। अपिच योऽग्निः पुरः पाग्वंशादारभ्य सद्म सदनं सौमिकीं वेदिं मिन्वन् पुरः पुरस्ताद् उत्तरवेदिशालामुखीयाद् प्रणीयमानः सन् एति गच्छति ॥ ५ ॥

५. यजमान के यज्ञ में हवि का सेवन करनेवाले अग्नि, अनेक ज्वालाओं से युक्त होकर ऊपर उठते हैं। अग्नि उत्तर वेदी को मापते हुए सामने आते हैं। अथ षष्ठी—

सहि क्षेमो हविर्यज्ञः श्रुष्टीदस्य गातुरेति।
अग्निं देवा वाशीमन्तम् ॥ ६ ॥ २ ॥

सः। हि। क्षेमः। हविः। यज्ञः। श्रुष्टी। इत्। अस्य। गातुः।
एति। अग्निम्। देवाः। वाशीऽमन्तम् ॥ ६ ॥ २ ॥

यउक्तलक्षणविशिष्टोऽग्निः हीत्येतदवधारणे सएवाग्निः क्षेमः कुशलहेतुः सर्वस्य परिपालनहेतुरित्यर्थः हविः पुरोडाशादिकं च सएव हविषः तन्निमित्तत्वाद् यज्ञः यागोपिसएव तस्यापि तद्धेतुत्वाद्। किंच श्रुष्टीद् क्षिप्रमेव अस्याग्नेः गातुर्गमनशीलः अधिष्ठात्रात्मा एति देवानामाह्वानार्थं गच्छति। गत्वा च प्रत्यागच्छन्तं वाशीमन्तं स्तुतिलक्षणया वाचोपेतं अग्निं प्रतिदेवाः अपिगच्छन्तीतिशेषः ॥ ६ ॥

६. वे ही अग्नि सबके पालन के कारण हैं, यज्ञ भी वे ही हैं, पुरोडाश आदि भी हैं। अग्नि देवों को बुलाने के लिए जाते हैं।

॥ इति सप्तमस्य सप्तमे द्वितीयोवर्गः ॥ २ ॥

अथ सप्तमी—

यज्ञासाहं दुवइषेग्निं पूर्वस्याशेवस्य। अद्रेः सूनुमायुमाहुः ॥ ७ ॥

यज्ञऽसहम्। दुवः। इषे। अग्निम्। पूर्वस्य। शेवस्य।
अद्रेः। सूनुम्। आयुम्। आहुः ॥ ७ ॥

अत्रैकवाक्यतायै यत्तच्छब्दावध्याहार्यौ। अपरोर्धर्चः पूर्वं व्याख्येयः आयुं देवानामाह्वानार्थं दूत्येन गन्तारं यमग्निं अद्रेः सूनुं अश्मनः पुत्रं आहुः। त्वमद्र्यस्त्वमश्मनस्परीत्येवमादयोमंत्राः वदन्ति। यज्ञसहं यागस्यवोढारं धारयितारमित्यर्थः तमग्निं अभिलक्ष्य दुवः प-

१ ऋ० सं० २. ५. १६.।

रिचरणं हये इच्छामि। किमर्थं पूर्वस्य अत्र पूर्वशब्दउत्कृष्टवाची उत्कृष्टस्य शेवस्य स्वर्गापवर्ग-लक्षणसुखस्य प्राप्त्यर्थमिति शेषः ॥ ७ ॥

७. जो अग्नि देवों को बुलानेवाले हैं, जिन्हें लोग पत्थर का पुत्र कहते हैं और जो यज्ञ के धारक हैं, उत्कृष्ट सुख की प्राप्ति के लिए उन्हीं अग्नि की सेवा करने की मैं अभिलाषा करता हूँ।

नरो॒येकेचा॒स्मदाविश्वेत्तेवा॒मआस्यु॑ः। अ॒ग्निंह॒विषा॒वर्धन्तः ॥ ८ ॥

नरः। ये। के। च॒। अ॒स्मत्। आ। विश्वा॑। इत्। ते। वा॒मे।
आ। स्यु॒रिति॑ स्युः। अ॒ग्निम्। ह॒विषा॑। वर्धन्तः ॥ ८ ॥

नरोनेतारः ये के च ये केचित् पुत्रपौत्रादयः अस्मदस्माकं सन्ति आकारः पूरकः ते पुत्रपौत्रादयः वामे वननीये संभजनीये विश्वेत् विश्वस्मिन्नेव पश्वादिधने आस्युः आसमन्ता-द्भवेयुः उपविशेयुरित्याशास्महे। किंकुर्वन्तः अग्निं अंगनादिगुणविशिष्टं देवं हविषा पुरोडाशा-दिकेन वर्धन्तः वर्धयन्तः ॥ ८ ॥

८. पुरोडाश आदि के द्वारा अग्नि का संवर्द्धन करनेवाले जो हमारे पुत्र, पौत्रादि हैं, वे संभोग-योग्य पशु आदि धन में बैठेंगे, ऐसी हम आशा करते हैं।

कृ॒ष्णःश्वे॒तोरु॒षोयामोअस्यब्र॒ध्नक्रु॒ज्रउ॒तशोणो॒यशस्वान्।
हिर॑ण्यरूपं॒जनि॑ताजजान ॥ ९ ॥
कृ॒ष्णः। श्वे॒तः। अ॒रु॒षः। यामः॑। अ॒स्य। ब्र॒ध्नः। क्रु॒ज्रः। उ॒त।
शोणः॑। यश॑स्वान्। हिर॑ण्यऽरूपम्। जनि॑ता। ज॒जा॒न॒ ॥ ९ ॥

अत्र यच्छब्दमध्याहृत्य योज्यं यामः याति गच्छत्यस्मिन्निति यामोरथः प्रजापतिना निर्मितः कीदृशः कृष्णः असितवर्णः श्वेतः सितवर्णः अरुषः आरोचमानः ब्रध्नोमहान् क्रुज्रः ऋजुगामी उतापिच शोणोरक्तवर्णः यशस्वान् कीर्तिमान् यद्वा यशइति धननाम हविर्लक्षणे-न धनेन युक्तः हिरण्यरूपं सुवर्णसदृशं तं रथं अस्याग्नेरर्थाय जनिता सर्वस्य जगतोजनयि-ता प्रजापतिः जजान जनयामास अस्मै दत्तवानित्यर्थः। कथमेकस्यैव रथस्य कृष्णादिनाना-रूपत्वं संभवतीति चेत् अग्नेः सामर्थ्यातिशयेन संभवतीत्यर्थः। यद्वा हिरण्यरूपमिति रथवा-चिना शब्देन सह सामानाधिकरण्यात् कृष्णादिशब्दाः द्वितीयान्तत्वेन योज्याः अत्र सर्वगु-णोक्तरथवत्तयाग्निः स्तूयतइत्यर्थः ॥ ९ ॥

९. अग्नि के आने के लिए जो बृहत् रथ है, वह कृष्ण-वर्ण, शुभ्रवर्ण, सरल-गन्ता, रक्तवर्ण और बहुमूल्य वा कीर्तिशाली है। सुवर्ण के सदृश उज्ज्वल करके विधाता ने उसे बनाया है।

अथ दशमी—

एवातेअग्नेविमदोमनीषामूर्जोनपादमृतेभिःसजोषाः ।
गिरआवक्षत्सुमतीरियानइषमूर्जंसुक्षितिंविश्वमाभाः ॥ १०॥३॥

एव । ते । अग्ने । विऽमदः । मनीषाम् । ऊर्जः । नपात् । अमृतेभिः ।
सऽजोषाः । गिरः । आ । वक्षत् । सुऽमतीः । इयानः । इषम् ।
ऊर्जम् । सुऽक्षितिम् । विश्वम् । आ । अभारित्यभाः ॥ १० ॥ ३ ॥

एव एवमुक्तप्रकारेण हे ऊर्जोनपात् ओषधिवनस्पतिपितृभूतस्यान्नस्य पौत्र हे अग्ने अमृतेभिः अमृतैर्हविर्लक्षणैरन्नैः सजोषाः संगतोविमदोनाम ऋषिः मनीषां प्रकृष्टां बुद्धिं कामयमानः सन् ते तुभ्यं गिरः स्तुतिलक्षणा वाचः आवक्षत् आभिमुख्येनोक्तवान् वक्तेश्छन्दसि लेटि रूपं ततस्त्वं एतत् ज्ञात्वा सुमतीरियानः शोभनलक्षणाबुद्धीस्संगमयन् इषमन्नं ऊर्जं क्षीरादिकं रसं च सुक्षितिं शोभननिवासं यद्वा क्षितयोमनुष्याः शोभनपुत्रपौत्रादिकं यत्किंचिद्देयमस्ति तद्विश्वं धनं च आभाः तस्मै विमदाय आहर देहि ॥ १० ॥

१०. अग्नि, बल वा वनस्पति के पुत्र हो। तुम अमर धन से युक्त हो। अपनी प्रकृष्ट बुद्धि की इच्छा करनेवाले विमद नाम के ऋषि ने तुम्हारे लिए ये स्तोत्र कहे हैं। तुम इन उत्कृष्ट स्तुतियों को प्राप्त करके विमद को, अन्न, बल, शोभन निवास और जो कुछ देने योग्य है, सो सब धन दो। ॥ इति सप्तमस्य सप्तमे तृतीयेवर्गः ॥ ३ ॥

आग्निनइत्यष्टर्चं पंचमं सूक्तं आस्तारपंक्तिच्छन्दस्कं आद्यौ द्वौ गायत्रौ पादौ ततो द्वौ जागतौ सा आस्तारपंक्तिः ऋषिदेवते पूर्ववत् । तथाचानुक्रान्तं—आग्निनाष्टावास्तारपांक्तमिति । पृष्ठ्यस्य चतुर्थेहनि आग्निनस्ववृक्तिभिरित्याज्यमिति । महाव्रते आग्निमारुते यावतीस्वृक्षु इत्यां दं साम स्तुवीरन् तदानोमादितस्तावत्यऋचोनुरूपार्थाः सूत्रितंच—यदिलांदं भूयसीषु चेत्र स्तुवीरन्नाग्निनस्ववृक्तिभिरितितावतीरनुरूपइति ।

तत्र प्रथमा—

आग्निनस्ववृक्तिभिर्होतारंत्वावृणीमहे ।
यज्ञायस्तीर्णबर्हिषेविवोमदेशीरंपावकशोचिषंविवक्षसे ॥ १ ॥

आ । अग्निम् । न । स्वऽवृक्तिऽभिः । होतारम् । त्वा । वृणीमहे ।
यज्ञाय । स्तीर्णऽबर्हिषे । वि । वः । मदे । शीरम् ।
पावकऽशोचिषम् । विवक्षसे ॥ १ ॥

हे अग्ने वः तव स्वभूते विमदे एतदाख्ये क्रतौ मयि इयं स्तुतिः प्रवृत्तास्ति नेति संप्रत्यर्थे अतोवयमिदानीं स्ववृक्तिभिः स्वयं कृताभिः दोषवर्जिताभिः स्तुतिभिः होतारं देवानामाह्वातारं होमनिष्पादकं वा अग्निं त्वा त्वां आवृणीमहे आभिमुख्येन संभजामहे । किमर्थं स्तीर्णबर्हिषे यज्ञाय तादर्थ्ये चतुर्थी यज्ञार्थं कीदृशं शीरं ओषध्यादिषु सर्वत्रानुशायिनं पावकशोचिषं शोधकदीप्तिं विवक्षसे महन्नामैतत् हे अग्ने त्वमपि महान् भवसि यद्वा विमदे यज्ञस्य संबन्धिनः सोमस्य पानजन्यविविधमदार्थं त्वामावृणीमहइति योज्यं ॥ १ ॥

१. अपनी बनाई स्तुतियों से देवाह्वाता अग्नि को, विस्तृत कुशवाले यज्ञ के लिए, हम वरण करते हैं। अग्नि, तुम म[illegible] हो। वनस्पतियों में रहनेवाले और शोधक-दीप्ति ज्वाला को विमद [illegible] प्रेरित करो।

त्वामुतेस्वाभुवःशुंभन्त्यश्वंराधसः ।
वेतित्वामुपसेचनीविवोमदऋजीतिरग्नआहुतिर्विवक्षसे ॥ २ ॥

त्वाम् । ऊँ इति । ते । सुऽआभुवः । शुम्भन्ति । अश्वंऽराधसः । वेति ।
त्वाम् । उपऽसेचनी । वि । वः । मदे । ऋजीतिः ।
अग्ने । आऽहुतिः । विवक्षसे ॥ २ ॥

स्वाभुवः स्वप्रकाशेन दीप्यमानाः अश्वराधसोव्याप्तधनाः ते यजमानाः हे अग्ने त्वामु त्वामेव शुंभन्ति शोभयन्ति यज्ञेहविर्भिर्दीपयन्तीत्यर्थः । किंच उपसेचनी तवोपरिक्षरणशीला ऋजीतिः ऋजुगामिनी हूयमाना आहुतिःहे अग्ने त्वां वेति गच्छति । किमर्थं वस्तव विमदे मदनिमित्ते तृप्त्यर्थमित्यर्थः । किंच त्वमपि विवक्षसे महान् भवसि ॥ २ ॥

२. अग्नि, दीप्त और व्याप्त-धन यजमान तुम्हें सुशोभित करते हैं। क्षरणशील और सरलगति आहुति, अग्निदेव, तुम्हारे पास तृप्ति के लिए जाती है। तुम महान् हो।

अथ तृतीया—

त्वेधर्माणआसतेजुहूभिःसिञ्चतीरिव ।
कृष्णारूपाण्यर्जुनाविवोमदेविश्वाअधिश्रियोधिषेविवक्षसे ॥३॥

त्वे इति । धर्माणः । आसते । जुहूभिः । सिञ्चतीःऽइव । कृष्णा ।
रूपाणि । अर्जुना । वि । वः । मदे । विश्वाः । अधि ।
श्रियः । धिषे । विवक्षसे ॥ ३ ॥

धर्माणोयज्ञस्य धारयितारऋत्विजः जुहूभिः संपूर्णाहुतिभिर्होमपात्रैः त्वे त्वामेव आसते सेवन्ते। तत्रदृष्टान्तः—सिंचतीरिव वृष्टिलक्षणाः पृथिवीं सिंचंत्यआपः अग्नीन् यथा स्वपितृत्वेन सेवन्ते तद्वत्। अग्नेरापइतिश्रुतेः। तस्यापां पितृत्वं। यद्वा जुहूभिः सिंचतीरिव सिंच्यमानाआहुतयइव धर्मणः त्वया धार्यमाणारश्मयः त्वे त्वयि आसते निवसन्ति। हे अग्ने त्वं कृष्णा कृष्णवर्णानि अर्जुना अर्जुनानि श्वेतवर्णानिज्वालान्तर्गतरूपाणि च विश्वाः सर्वाः श्रियः शोभाअधिधिषे अधिकं यथा भवति तथा धारयसि किमर्थं वोयुष्माकं सर्वेषां देवानां विमदे विविधसोमपानजन्यमदार्थं यतएवमतः विवक्षसे त्वं महान् भवसि ॥ ३ ॥

३. यज्ञ के धारक ऋत्विक् लोग होम-पात्रों से वैसे ही तुम्हारी सेवा करते हैं, जैसे जल पृथिवी को सींचता है। अग्नि, देवों के मद के लिए तुम कृष्णवर्ण ज्वालारूपी और सारी शोभा को धारण करते हो। तुम महान् हो।

अथ चतुर्थी—

यमग्नेमन्यसेरयिंसहसावन्नमर्त्य ।
तमानोवाजसातयेविवोमदेयज्ञेषुचित्रमाभरराविवक्षसे ॥ ४ ॥

यम् । अग्ने । मन्यसे । रयिम् । सहसाऽवन् । अमर्त्य ।
तम् आ । नः । वाजऽसातये । वि । वः । मदे । यज्ञेषु ।
चित्रम् । आ । भर । विवक्षसे ॥ ४ ॥

हे अमर्त्य अमरणधर्मन् सहसावन् बलवन् एवंभूत हे अग्ने त्वं यं रयिं मन्यसे सर्वेषु धनेषु यद्धनं वरिष्ठमिति जानासि चित्रं चायनीयं रयिं नोस्माकं। वाजसातये अन्नलाभाय आभर आहर प्रयच्छ। किमर्थं वोयुष्माकं सर्वेषां देवानां यज्ञेषु विमदे विविधसोमादिहविर्जन्यमदनिमित्ते यागेषु नानाप्रकारैर्हविर्भिर्युष्माकं तर्पणायेत्यर्थः। त्वमपि विवक्षसे महान् भवसि ॥ ४ ॥ अमर और बली अग्नि, तुम जिस धन को श्रेष्ठ समझते हो, उस विचित्र धन को, अन्न-लाभ के लिए, हमारे निमित्त ले आओ। तुम समस्त देवों की तृप्ति के लिए धन ले आओ। तुम महान् हो। ४.

अथ पञ्चमी—

अग्निर्जातोअथर्वणाविदद्विश्वानिकाव्या ।
भुवद्दूतोविवस्वतोविवोमदेप्रियोयमस्यकाम्योविवक्षसे ॥ ५ ॥४॥

अग्निः । जातः । अथर्वणा । विदत् । विश्वानि । काव्या ।
भुवत् । दूतः । विवस्वतः । वि । वः । मदे । प्रियः ।
यमस्य । काम्यः । विवक्षसे ॥ ५ ॥ ४ ॥

अथर्वणा एतन्नाम्ना ऋषिणा जातोजनितोग्निः कथमवगम्यते । त्वामग्नेपुष्करादध्यथर्वा-निरमन्थतेतिमंत्रान्तरात् । विश्वानि समस्तानि काव्या काव्यानि स्तोतृकर्माणि विदत् वेत्ति विवस्वतोयजमानस्य दूतः देवानामाह्वानार्थं भुवत् भवति । किंच यमस्य संयन्तुः यजमानस्य प्रियः इष्टः सन् काम्यः कमनीयः प्रार्थनीयोभवतीत्यर्थः । शिष्टं स्पष्टं ॥ ५ ॥

५. अथर्वा ऋषि ने अग्नि को उत्पन्न किया था। अग्नि सब प्रकार के स्तोत्रों को जानते हैं। अग्नि, तुम देवाह्वान के लिए यजमान के दूत हो। अग्नि यजमान के प्रिय हैं। अग्नि, तुम कमनीय और महान् हो।

॥ इति सप्तमस्य सप्तमे चतुर्थोवर्गः ॥ ४ ॥

अथ षष्ठी—

त्वांयज्ञेष्वीळतेग्नेप्रयत्यध्वरे ।
त्वंवसूनिकाम्याविवोमदेविश्वादधासिदाशुषेविवक्षसे ॥ ६ ॥

त्वाम् । यज्ञेषु । ईळते । अग्ने । प्रऽयति । अध्वरे ।
त्वम् । वसूनि । काम्या । वि । वः । मदे । विश्वा ।
दधासि । दाशुषे । विवक्षसे ॥ ६ ॥

हे अग्ने त्वां प्रयति प्रकर्षेण गच्छति वर्तमाने अध्वरे यागे यज्ञेषु यजनीयेषु हविःषु आसन्नेषु सत्सु ईळते ऋत्विग्यजमानाः स्तुवन्ति । अपिच हे अग्ने त्वं विश्वा विश्वानि काम्या काम्यानि कमनीयानि वसूनि धनानि दाशुषे हविर्दत्तवते यजमानाय विमदे सोमादिहविर्जन्यतृप्तौ सत्यां दधासि प्रयच्छसि अतः कारणाद्विवक्षसे त्वं महान् भवसि ॥ ६ ॥

६. अग्नि, यज्ञ का आरम्भ होने पर ऋत्विक् और यजमान तुम्हारी स्तुति करते हैं। अग्नि, तुम हविर्दाता विमद के लिए सब प्रकार के धन देते हो। इसलिए तुम महान् हो।

त्वांयज्ञेष्वृत्विजंचारुमग्नेनिषेदिरे ।
घृतप्रतीकंमनुषोविवोमदेशुक्रंचोतिष्ठमक्षभिर्विवक्षसे ॥ ७ ॥

---

१ ऋ० सं० ४. ५. २३. ।

त्वाम् । यज्ञेषु । ऋत्विजम् । चारुम् । अग्ने । नि । सेदिरे ।
घृतऽप्रतीकम् । मनुषः । वि । वः । मदे । शुक्रम् ।
चेतिष्ठम् । अक्षऽभिः । विवक्षसे ॥ ७ ॥

हे अग्ने त्वां मनुषोमनुष्याः यजमानायज्ञेषु यागेषु निषेदिरे नियमेन स्थापयन्ति । कीदृशं ऋत्विजं होतृनामकं चारुं रमणीयं घृतप्रतीकं आज्याहुतिपूर्णमुखं शुक्रं ज्वलन्तं अक्षभिर्व्याप्तैः तेजोभिः चेतिष्ठं अतिशयेन ज्ञातारं । किमर्थं विवोमदे तव सोमादिहविर्जन्यविविधतृप्त्यर्थं यस्मादेवं तस्माद्विवक्षसे महान् भवसि ॥ ७ ॥

७. अग्नि, तृप्ति के लिए होता, रमणीय, आहुत से पूर्ण मुखवाले, आज्वल्यमान और व्यापक तेज के कारण ज्ञानी तुम्हें यजमान लोग यज्ञ में नियमतः स्थापित करते हैं। तुम महान् हो।

अग्नेशुक्रेणशोचिषोरुप्रथयसेबृहत् ।
अभिक्रन्दन्वृषायसेविवोमदेगर्भंदधासिजामिषुविवक्षसे ॥८॥५॥

अग्ने । शुक्रेण । शोचिषा । उरु । प्रथयसे । बृहत् ।
अभिऽक्रन्दन् । वृषऽयसे । वि । वः । मदे । गर्भम् ।
दधासि । जामिषु । विवक्षसे ॥ ८ ॥ ५ ॥

हे अग्ने बृहत् महांस्त्वं शुक्रेण दीप्तेन शोचिषा तेजसा उरु प्रथयसे विस्तीर्णं यथा भवति तथा प्रख्यातोभवसि । किंच अभिक्रन्दन् आभिमुख्येन युद्धार्थं शत्रूनाह्वयन् वृषायसे वृषइवाचरसि युद्धकाले दर्पितवृषइव रोरुवद्भवसीत्यर्थः । त्वं माध्यमिकः सन् जामिषु भगिनीभूतास्वोषधीषु गर्भं बीजलक्षणं दधासि वृष्टिद्वारेण धारयसि । एकस्माद् प्रजापतेः सकाशात् उद्भूतत्वादन्योषध्योर्जामित्वं उपचर्यते । कस्मिन् सति विवोमदे तव विविधसोमादिहविर्जन्यमदे संजाते सति । यस्माद् एवं कृतवानसि तस्माद् त्वं विवक्षसे महान्भवसि विवक्षसइति महन्नाम वक्तेर्वा सन्नन्तस्यरूपं इति ॥ ८ ॥

८. अग्नि, तुम महान् हो। प्रदीप्त तेज से तुम प्रसिद्ध होते हो। तुम समर-समय में दर्पित वृष के समान शब्द करते हो। तुम भगिनी-सदृश ओषधियों में बीज धारण करते हो। सोमादि का मद उत्पन्न होने पर तुम महान् होते हो।

॥ इति सप्तमस्य सप्तमे पञ्चमोवर्गः ॥ ५ ॥

कुहेति पञ्चदशर्चं षष्ठं सूक्तं ऐन्द्रं पञ्चदशी त्रिष्टुप् पञ्चमीसप्तमीनवम्यस्तिस्रोऽनुष्टुभः शिष्टाः पुरस्ताद्बृहत्यः आद्यद्वादशन्यष्टकवतीपुरस्ताद्बृहती पूर्ववदृषिः । तथाचानुक्रान्तं—कुहर्पंचो-

ना पुरस्ताद्वार्हतं त्रिष्टुवन्तं त्वंत्याचिदानस्त्वंनोनुष्टुभइति । चतुर्थेहनि निष्केवल्ये एतत्सूक्तं । सूत्रितंच—कुहश्रुतइन्द्रोयुष्मस्यतइति निष्केवल्यमिति ।

कुहश्रुतइन्द्रःकस्मिन्नद्यजनेमित्रोनश्रूयते ।
ऋषीणांवायःक्षयेगुहावाचर्कृषेगिरा ॥ १ ॥

कुह । श्रुतः । इन्द्रः । कस्मिन् । अद्य । जने । मित्रः । न । श्रूयते ।
ऋषीणाम् । वा । यः । क्षये । गुहा । वा । चर्कृषे । गिरा ॥ १ ॥

अद्यास्मिन् दिने इन्द्रः कुह कुत्र स्थाने श्रुतो विश्रुतः प्रख्यातः कस्मिन् जने यजमाने इज्यत्वेन स्तुत्यत्वेनावस्थितः श्रूयते प्रख्यायते । तत्रदृष्टान्तः—मित्रोन सूर्यइव सखेव वा तद्वत् । यइन्द्रऋषीणां भृग्वादीनां क्षये निवासे आश्रमे गुहावा गुहायामरण्ये वा गिरा स्तुतिलक्षणया वाचा चर्कृषे अत्यर्थमाकृष्यते अत्यर्थं स्तूयतइत्यर्थः । सइन्द्रः कुह श्रुतइति पूर्वेण संबन्धः ॥ १ ॥

१. इन्द्र आज कहां प्रख्यात हैं ? आज वे, मित्र के समान, किस व्यक्ति के पास हैं ? इन्द्र क्या ऋषियों के आश्रम वा किसी गुहा में स्तुत किये जाते हैं ? अथ द्वितीया—

इहश्रुतइन्द्रोअस्मेअद्यस्तवेवज्र्यृचीषमः ।
मित्रोनयोजनेष्वायशश्चक्रेअसाम्या ॥ २ ॥

इह । श्रुतः । इन्द्रः । अस्मे इति । अद्य । स्तवे । वज्री । ऋचीषमः ।
मित्रः । न । यः । जनेषु । आ । यशः । चक्रे । असामि । आ ॥ २ ॥

इहास्मिन् यज्ञे इन्द्रः श्रुतः प्रख्यातः अद्यास्मिन् दिवसे अस्मे अस्माभिः स्तवे स्तूयते । कीदृशः वज्री वज्रवान् ऋचीषमः । यद्यावइन्द्रतेशतंशतंभूमीरुतस्युः नत्वावज्रिन्नित्यादिकया स्तुत्या समानगुणइत्यर्थः । यइन्द्रः मित्रोन सूर्यइव स्निग्धइव वा जनेषु स्तोतृषु जनेषु यशः अन्नं कीर्तिं च वा चक्रे करोति । कीदृशं असामि असाधारणं सइन्द्रः अस्माभिः स्तूयतइति पूर्वेण संबन्धः ॥ २ ॥

२. आज इस यज्ञ में इन्द्र प्रख्यात हैं। आज हम उनकी स्तुति करते हैं। इन्द्र वज्रधर और स्तुत्य हैं। इन्द्र स्तोताओं में मित्र के समान, असाधारण रूप से, कीर्त्ति करनेवाले हैं।

---

१ ऋ० सं० ६. ५. ८ ।

अथ तृतीया—

महोयस्पतिःशवसोअसाम्याम्होनृम्णस्यतूतुजिः ।
भर्तावज्रस्यधृष्णोःपितापुत्रमिवप्रियम् ॥ ३ ॥

महः । यः । पतिः । शवसः । असामि । आ । महः ।
नृम्णस्य । तूतुजिः । भर्ता । वज्रस्य । धृष्णोः ।
पिता । पुत्रम्ऽइव । प्रियम् ॥ ३ ॥

यइन्द्रः महोमहतः शवसोबलस्य पतिः ईश्वरः असाम्या आङ् मर्यादायां आसमाप्तेः अनन्तगुणइत्यर्थः महोमहतोनृम्णस्य धनस्य च तूतुजिः स्तोतृभ्यः प्रेरकः । किंच धृष्णोः शत्रूणां धर्षकस्य वज्रस्य स्वकीयस्यायुधस्य भर्ता यइन्द्रोधारयिता सइन्द्रोस्मान्पात्विति शेषः। तत्रदृष्टान्तः—पिता पुत्रमिव प्रियं यथा पिता प्रियं ईप्सितं सुतं पाति तद्वत् ॥ ३॥

३. जो इन्द्र बल-पति, अनन्तगुण और स्तोताओं के लिए महान् अन्न के दाता हैं, वे शत्रुओं को रगड़नेवाले वज्र के धारक हैं। जैसे पिता प्रिय पुत्र की रक्षा करता है, वैसे ही इन्द्र हमारी रक्षा करें।

युजानोअश्वावातस्यधुनीदेवोदेवस्यवज्रिव ।
स्यन्तापथाविरुक्मतासृजानस्तोष्यध्वनः ॥ ४ ॥

युजानः । अश्वा । वातस्य । धुनी इति । देवः । देवस्य । वज्रिऽइवः ।
स्यन्ता । पथा । विरुक्मता । सृजानः । स्तोषि । अध्वनः ॥ ४ ॥

हे वज्रिवः वज्रवन्निन्द्र एकोमत्वर्थीयोनुवादकः देवोद्योतमानस्त्वं देवस्य द्योतमानस्य वातस्य वायोः धुनी प्रेरकौ वायोरपिशीघ्रगामिनावित्यर्थः अश्वा अश्वौ त्वदीयौ हरिनामकौ युजानःस्वरथे संयोजयन् । कीदृशौ विरुक्मता विरोचनवता पथा मार्गेण स्यन्ता स्यन्तौ गच्छन्तौ अध्वनः युद्धे गमनमार्गान् सृजानः उत्पादयन् स्तोषि सततं स्तूयसे ॥४॥

४. वज्रधर इन्द्र, तुम द्योतमान हो वायुवेग से भी शीघ्र जानेवाले और उचित मार्ग से जानेवाले अपने हरि नामक अश्वों को रथ में जोतकर और युद्ध-पथ को उत्पन्न करके सदा स्तुत होते हो।

अथ पंचमी—

त्वंत्याचिद्वातस्याश्वागाकृज्जात्मनावहंध्यै ।
ययोर्देवोनमर्त्योयन्तानकिर्विदाय्यः ॥ ५ ॥ ६ ॥

त्वम् । त्या । चित् । वातस्य । अश्वा । आ । अगाः । ऋज्रा ।
त्मना । वहध्यै । ययोः । देवः । न । मर्त्यः । यन्ता ।
नकिः । विदाव्यः ॥ ५ ॥ ६ ॥

यच्छब्दसंबन्धादुत्तरतोर्धर्चः पूर्वं व्याख्यायते—ययोस्त्वदीययोरश्वयोर्यन्ता नियन्ता निवारयिता देवोन देवानां मध्ये कश्चिदपि देवोनास्ति । नकिर्न कश्चिदपि विदाव्यः वेत्ता जवस्य बलस्येति वा शेषः । हे इन्द्र त्वं वातस्य वायोर्जवेन बलेन च युक्तौ ऋज्रा ऋजुगामिनौ त्या चित् तावपि अश्वात्वदीयावश्वौ त्मना आत्मनैव सारथिनिरपेक्षेणेत्यर्थः वहध्यै वहनार्थं अभिप्रेतदेशप्रापणायेत्यर्थः आगाः आभिमुख्येन गच्छसि ॥ ५ ॥

५. इन्द्र, तुम स्वयं उन वायु-वेग-तुल्य और सरल-गामी अश्वों को चलाकर हमारे अभिमुख आते हो। देवों में से कोई भी ऐसा नहीं है, जो तुम्हारे इन दोनों घोड़ों का संचालन कर सके और इनके बल को जान सके।

अधग्मन्तोशनापृच्छतेवांकदर्थानआगृहम् ।
आजग्मथुःपराकाद्दिवश्चग्मश्चमर्त्यम् ॥ ६ ॥

अध । ग्मन्ता । उशना । पृच्छते । वाम् । कत्ऽअर्था ।
नः । आ । गृहम् । आ । जग्मथुः । पराकात् । दिवः ।
च । ग्मः । च । मर्त्यम् ॥ ६ ॥

अधाथ यज्ञसमाप्त्यनन्तरं उशना भार्गवऋषिः हे इन्द्राग्नी ग्मन्ता स्वस्थानं प्रतिगच्छन्तौ वांयुवां सर्वोयजमानः पृच्छते पृच्छतिस्म। यद्वा उशनेति विभक्तिव्यत्ययः उशनसं इन्द्रस्य सखिभूतं भार्गवं इन्द्रं च युवां सर्वोयजमानः पृच्छति । किं पृष्टवानिति उच्यते—युवां कदर्था कदर्थौ किंप्रयोजनवन्तौ सन्तौ नोस्मदीयं आकारः प्रतीत्यस्यार्थे गृहं प्रति पराकात् दूरनामैतत् दूरादाजग्मथुः आगतवन्तौ स्थः । तदेवोक्तं दिवश्च द्युलोकाच्च ग्मश्च भूलोकाच्च मर्त्यं मनुष्यं मां प्रत्यागतवन्तौ युवयोः कृतार्थत्वादत्रगमनमस्मदनुग्रहार्थमेव न स्वार्थमिति ब्रुवन्नुपजतीत्यर्थः ॥ ६ ॥

६. इन्द्र और अग्नि, जिस समय तुम अपने स्थानों को जाने लगे, उस समय भार्गव उशना ने तुमसे सम्भाषण किया—तुम लोग किस प्रयोजन से, इतनी दूर से हमारे यहाँ आये हो ? (मेरे विचार से) तुम लोग द्युलोक और भूलोक से जो मेरे यहाँ आये हो, यह केवल तुम लोगों का अनुग्रह है।

आनइन्द्रपृक्षसेस्माकंब्रह्मोद्यतम् ।
तत्त्वायाचामहेवःशुष्णंयद्धन्नमानुषम् ॥ ७ ॥

आ । नः । इन्द्र । पृक्षसे । अस्माकम् । ब्रह्म । उत्ऽद्यतम् । तत् ।
त्वा । याचामहे । अवः । शुष्णम् । यत् । हन् । अमानुषम् ॥ ७ ॥

हे इन्द्र त्वं नइति तृतीयार्थे षष्ठी नोस्माभिः उद्यतं उत्क्षिप्तं दत्तमित्यर्थः । अस्माकमस्मदीयं ब्रह्म हविर्लक्षणमन्नं आङ्मर्यादायां आवृत्तेरित्यर्थः पृक्षसे आत्मना संपर्चय । पृची-संपर्के इति धातोरूपं आभक्षयेत्यर्थः । किंच वयमपि त्वा एवंभूतं त्वां तव यदुत्कृष्टमस्तीति शेषः तत्तादृशमन्नं अवः तद्रक्षणं च याचामहे प्रार्थयामहे यथा यच्छुष्णंबलं अमानुषं मनुष्यादन्यं राक्षसादिकं हन् हन्ति तदुत्कृष्टं बलंच याचामहे । यद्वा हे इन्द्र त्वं शुष्णं एतन्नामानं अमानुषं मनुष्यव्यतिरिक्तमसुरं हन् हतवानसि । हत्वा यत् येन रक्षणेन त्रैलोक्यं पालयितवानसि तदवः पालनमस्माकमपि भवेदिति त्वां याचामहइति वाक्यार्थः ॥ ७ ॥

७. इन्द्र हमने इस यज्ञ की सामग्री प्रस्तुत की है। तुम जब तक तृप्त नहीं होओ, तब तक उसका भक्षण करो। हम तुमसे अन्न और उसका रक्षण चाहते हैं। तुमसे हम वैसा बल भी चाहते हैं, जिससे राक्षसों का विनाश हो सके।

अकर्मादस्युरभिनोअमन्तुरन्यव्रतोअमानुषः ।
त्वंतस्यामित्रहन्वधर्दासस्यदम्भय ॥ ८ ॥

अकर्मा । दस्युः । अभि । नः । अमन्तुः । अन्यऽव्रतः । अमानुषः ।
त्वम् । तस्य । अमित्रऽहन् । वधः । दासस्य । दम्भय ॥ ८ ॥

अकर्मा अविद्यमानयागादिकर्मा दस्युः उपक्षपयिता अभि आभिमुख्येन स्वरूपतोनोस्मान् अमन्तुः अज्ञाता यद्वा अत्रावेत्युपसर्गस्य वकारलोपोद्रष्टव्यः अवमन्तुः अवमन्ता अभिभविता अन्यव्रतः श्रुतिस्मृतिव्यतिरिक्तकर्मा अमानुषः मनुष्यसंव्यवहाराद्बाह्यः असुरप्रकृतिरित्यर्थः एवंभूतोयोस्ति हे अमित्रहन् शत्रूणां हन्तरिन्द्र त्वं दासस्य उपक्षपयितव्यस्य तस्य वधः हन्ता सन् दंभय तं शत्रुं भिन्धि ॥ ८ ॥

८. हमारी चारों ओर यज्ञ-शून्य दस्युदल हैं। वह कुछ नहीं मानता, श्रुत्यादि कर्मों से शून्य हैं और उसकी प्रकृति आसुरी है। शत्रु-नाशक इन्द्र, इस दस्यु-जाति का विनाश करो।

त्वंनइन्द्रशूरशूरैरुतत्वोतासोवर्हणां ।
पुरुत्रातेविपूर्तयोनवन्तक्षोणयोयथा ॥ ९ ॥

त्वम् । नः । इन्द्र । शूर । शूरैः । उत । त्वाऽऊतासः । बर्हणा ।
पुरुऽत्रा । ते । वि । पूर्तयः । नवन्त । क्षोणयः । यथा ॥ ९ ॥

हे शूर विक्रान्तेन्द्र त्वं शूरैः भटैः मरुद्भिः सहितः सन् नोस्मान् पाहीति शेषः उत अपि च त्वोतासः त्वया रक्षितावयं बर्हणा परिबर्हणायां शत्रूणां हिंसायां समर्थाभवेम । किंच ते त्वदीया पूर्तयः कामानां पूरणानि ईप्सितार्थप्रदानानि पुरुत्रा बहून् स्तोतॄन् विनवन्त विविधं व्याप्नुवन्ति क्षोणयः मनुष्यनामैतत् मनुष्याः स्वकीयं स्वामिनं सेवार्थं यथा व्याप्नुवन्ति तद्वत्॥९॥

९. विक्रान्त इन्द्र, तुम शूर मरुतों के साथ हमारी रक्षा करो। तुमसे रक्षित होकर हम शत्रु-विनाश में समर्थ हों। जैसे मनुष्य अपने स्वामी की सेवा के लिए उसे वेष्टित करते हैं, वैसे ही तुम्हारे लिये प्रचुर पदार्थ स्तोताओं को वेष्टित करते हैं।

त्वंतान्वृत्रहत्येचोदयोनॄन्कार्पाणेशूरवज्रिवः ।
गुहायदीकवीनांविशांनक्षत्रशवसाम् ॥ १० ॥ ७ ॥

त्वम् । तान् । वृत्रऽहत्ये । चोदयः । नॄन् । कार्पाणे । शूर ।
वज्रिऽवः । गुहा । यदि । कवीनाम् । विशाम् ।
नक्षत्रऽशवसाम् ॥ १० ॥ ७ ॥

हे वज्रिवः वज्रधर शूरेन्द्र त्वं कार्पाणे असिः कृपाणः तेन कार्यं युद्धं कार्पाणं तस्मिन्वृत्रहत्ये शत्रुहननार्थं नॄन् नरान् तान् प्रसिद्धान् मरुद्गणान् चोदयः चोदयसि प्रेरयसि यदि यदा त्वं कवीनां मेधाविनां नक्षत्रशवसां देवान् प्रतिगच्छत् स्तोत्रबलानां विशां स्तोतृजनानां संबन्धीनि गुहा गुहानि गूढानि गुणैः संवृतानि स्तोत्राणि शृणोषीति शेषः तदा प्रेरयसीति पूर्वेणान्वयः ॥ १० ॥

१०. वज्रधर इन्द्र, वृत्र-वध के लिए तुम प्रसिद्ध मरुतों को उस समय प्रेरित करते हो, जिस समय तुम स्तोता कवियों का, नक्षत्रवाली देवों के प्रति, सुन्दर स्तोत्र सुनते हो।

॥ इति सप्तमस्य सप्तमे सप्तमोवर्गः ॥ ७ ॥

अथैकादशी—

मक्षूतानइन्द्रदानामंसआक्षाणेशूरवज्रिवः ।
यद्वशुष्णस्यदम्भयोजातंविश्वंसयावभिः ॥ ११ ॥

मक्षु । ता । ते । इन्द्र । दानऽअंमसः । आक्षाणं । शूर । वज्रिऽवः । यत् । ह । शुष्णस्य । दम्भयः । जातम् । विश्वम् । सयावऽभिः ॥ ११ ॥

हे शूर विक्रान्त वज्रिवः वज्रोपेतेन्द्र दानामसः दानकर्मणः स्तोतृभ्यः सततमभीष्टफलप्रदस्येत्यर्थः ते तव स्वभूतानि मक्षु क्षिप्राणि अविलंबितानि क्षिप्रकारणयुक्तानीत्यर्थः आक्षाणे योद्धृभिर्व्याप्यमाने त्वय्यवस्थितानि ता तानि कर्माणि स्तोतारः स्तुवन्तीति शेषः सयावभिः सह यातृभिर्मरुद्भिः सहितस्त्वं यद्ध यस्य प्रसिद्धस्य शुष्णस्यासुरस्य विश्वं जातं सर्वमपत्यजातं दंभयः अदंभयः हिंसितवानसि यद्वा एवमादीनि यानि खलु कर्माणि सन्ति तानि स्तुवन्तीति पूर्वेण संबन्धः ॥ ११ ॥

११. शूर और वज्रधर इन्द्र, दान करना ही तुम्हारा कर्म है। युद्धक्षेत्र में बहुत शीघ्र तुम्हारा कर्म होता है। तुमने मरुतों के साथ शुष्ण के सारे वंश का विनाश कर डाला है।

माकुध्र्यगिन्द्रशूरवस्वीरस्मेभूवन्नभिष्टयः ।
वयंवयन्तआसांसुम्नेस्यामवज्रिवः ॥ १२ ॥

मा । अकुध्र्यक् । इन्द्र । शूर । वस्वीः । अस्मे इति । भूवन् । अभिष्टयः । वयम्ऽवयम् । ते । आसाम् । सुम्ने । स्याम । वज्रिऽवः ॥ १२ ॥

हे शूर विक्रान्तेन्द्र अस्मे अस्माकं स्वभूताः वस्वीर्महत्यः अभिष्टयः आभिमुख्येष्टयः इच्छाः यद्वा आभिमुख्येच्छा अभीप्सितप्रार्थनाः कुध्र्यक् कुत्सिताः विफलाइत्यर्थः माभूवन् । किं तर्हि हे वज्रिवः वज्रिन्निन्द्र ते तव प्रसादात् वयंवयमृत्विग्यजमानाः द्विर्वचनमतित्वरामदर्शनार्थं आसामिच्छानां वा संबन्धिनि सुम्ने सुखे अवस्थिताः स्याम भवेम वयमभिष्टिजन्येन दृष्टादृष्टसुखेन युक्ताः शीघ्रं भवेमेत्याशास्महे इत्यर्थः ॥ १२ ॥

१२. शूर इन्द्र, हमारी ये महती वासनायें वृथा न होने पावें। वज्रधर इन्द्र, हमारी सारी लालसाएँ फलवती होकर सुखकरी हों।

अथ त्रयोदशी—

अस्मेतातइन्द्रसन्तुसत्याहिंसन्तीरुपस्पृशः ।
विद्यामयासांभुजोधेनूनांनवज्रिवः ॥ १३ ॥

अस्मे इति । ता । ते । इन्द्र । सन्तु । सत्या । अहिंसन्तीः । उपऽस्पृशः । विद्याम । यासाम् । भुजः । धेनूनाम् । न । वज्रिऽवः ॥ १३ ॥

हे इन्द्र अस्मे अस्माकं स्वभूताः ता सत्या इत्युभयत्र प्रथमाबहुवचनस्यछान्दसआकारः सनि निर्देशस्याविशेषणत्वात् तास्तादृश्यः उपस्पृशः त्वामुपगम्य स्पृशन्तीत्युपस्पृशः स्तुतयः ते तव प्रसादात् सत्या सत्याः सन्तु यथार्थाभवन्तु तव सद्गुणग्राहिण्यइत्यर्थः। अपिच अहिंसन्तीः त्वां अहिंसंत्यश्च भवन्तु सतिस्तुतित्यादनुद्वेजयन्त्यश्च भवन्त्वित्यर्थः। हे वज्रिव इन्द्र यासां स्तुतीनां संबन्धेन भुजोदृष्टादृष्टान् भोगान् विद्याम वयं लभेमहि। तत्र दृष्टान्तः—धेनूनां न गवां क्षीरादिभोगान् यथा गोस्वामी लभते तद्वत्। ताः सत्याभवन्त्विति पूर्वेणान्वयः ॥ १३ ॥

१३. हमारे लिए तुम्हारा अनुग्रह हो ताकि हमारी हिंसा न हो। जैसे लोग गाय के दूध आदि का भोग करते हैं, वैसे ही हम तुम्हारे प्रसाद का फल भोगें।

अहस्तायदपदीवर्धतक्षाःशचीभिर्वेद्यानाम्।
शुष्णंपरिप्रदक्षिणिद्विश्वायवेनिशिश्नथः ॥ १४ ॥

अहस्ता। यत्। अपदी। वर्धत। क्षाः। शचीभिः। वेद्यानाम्।
शुष्णम्। परि। प्रऽदक्षिणित्। विश्वऽआयवे। नि। शिश्नथः ॥ १४॥

हे इन्द्र यद्यदा क्षाः भूमिः अहस्ता पाणिरहिता अपदी चरणवर्जिता च अमनुष्यकर्मकेत्यर्थः वेद्यानां स्तोत्रयोग्यानां त्वत्प्रभृतीनां देवानां संबन्धिभिः शचीभिः कर्मभिर्वर्धत अवर्धत धनधान्यादिभिः समृद्धेत्यर्थः। तदा त्वं परिप्रदक्षिणित् एवंभूतां पृथिवीं परिवेष्ट्य प्रदक्षिणं यथा भवति तथा स्थितं शुष्णमसुरं विश्वायवे तादर्थ्ये चतुर्थी सर्वत्राप्रतिहतगामिनः एतदाख्यस्य और्वशेयराज्ञोर्थाय विशिश्नथः नितरां ताडितवानसि। यद्वा यदा शुष्णस्याच्छादनार्थं हस्तपादवर्जिता काचित् पृथिवी वेदितव्यानामसुराणां मायारूपैः कर्मभिः शुष्णं असुरं वेष्ट्य प्रदक्षिणं यथा भवति तथावस्थितावर्धत तदानीं तां मायोत्पादितां पृथिवीं विश्वायवे सर्वव्यापकस्य मरुद्गणस्य प्रवेशनार्थं निशिश्नथः नितरां हतवानसि ॥ १४ ॥

१४. देवों की क्रिया के द्वारा यह पृथिवी हस्त-पाद-शून्या होकर चारों ओर बढ़ी है। पृथिवी की प्रदक्षिणा करके और चारों ओर गमन करके तुमने शुष्ण नामक असुर की हिंसा की है।

अथ पंचदशी—

पिबापिबेदिन्द्रशूरसोमंमारिषण्योवसवानवसुःसन्।
उतत्रायस्वगृणतोमघोनोमहश्चरायोरेवतस्कधीनः ॥ १५ ॥ ८ ॥

पिबाऽपिब । इत् । इन्द्र । शूर । सोमम् । मा । रिषण्यः ।
वसवान । वसुः । सन् । उत । त्रायस्व । गृणतः । मघोनः ।
महः । च । रायः । रेवतः । कृधि । नः ॥ १५ ॥ ८ ॥

पिबपिबेति वीप्सा अतित्वरामदर्शनार्थं हे शूर वीरेन्द्र त्वं अभिषुतं सोमं शीघ्रं पिब यागकालातिपातोयावन्न भवति तावच्छीघ्रं सोमं पिबेत्यर्थः । इदितिपूरणः । हे वसवान वसूनां धनानामानेतस्त्वं वसुः प्रशस्तः सन् मारिषण्यः यागकालातिक्रमजातेन दोषेण अस्मान्माहिंसीः प्रशस्तस्य तव कर्मवैगुण्येन हिंसितुमयुक्तमित्यर्थः । उतापि च हे इन्द्र त्वं गृणतस्त्वां स्तुवतः स्तोतॄन् मघोनः हविर्लक्षणधनवतोयजमानांश्च त्रायस्व प्रमादजनितकर्मवैगुण्यदोषात् पालयस्व । किंच महश्चरायइत्युभयत्र तृतीयार्थे षष्ठी महोमहता रायोधनेन च नोस्मान् रेवतः कृधि धनवतः कुरु ॥ १५ ॥

१५. शूर इन्द्र, सोम का शीघ्र पान करो। इन्द्र, तुम धनी हो। प्रशस्त होकर तुम हमारी हिंसा नहीं करना। तुम स्तोता यजमान की रक्षा करना। हमें प्रचुर धन से धनी बनाओ।

॥ इति सप्तमस्य सप्तमेष्टमोवर्गः ॥ ८ ॥

यजामहइति सप्तर्चं सप्तमं सूक्तं प्रथमासप्तम्यौ त्रिष्टुभौ पंचम्यभिसारिणी द्विर्दशकवती द्विर्द्वादशकवतीत्यभिसारिणीत्युच्यते शिष्टाश्चतस्रोजगत्यः पूर्ववदृषिदेवते । तथाचानुक्रान्तं—यजामहेसप्तमाद्यन्त्येत्रिष्टुभौ पंचम्यभिसारिणीति । चतुर्थेहनि माध्यन्दिनसवने तृतीयापंचम्योरावर्तनेन त्रीन् तृचान् होत्रकाएकैकं तृचमावपेरन् । सूत्रितंच—यजामहइन्द्रंवज्रदक्षिणमिति द्वितीयानेवमेवेति ।

तत्र प्रथमा—

यजामहइन्द्रंवज्रदक्षिणंहरीणांरथ्यांविव्रतानाम् ।
प्रश्मश्रुदोधुवदूर्ध्वथाभूद्विसेनाभिर्दयमानोविराधसा ॥ १ ॥

यजामहे । इन्द्रम् । वज्रऽदक्षिणम् । हरीणाम् । रथ्यम् ।
विऽव्रतानाम् । प्र । श्मश्रु । दोधुवत् । ऊर्ध्वऽथा । भूत् । वि ।
सेनाभिः । दयमानः । वि । राधसा ॥ १ ॥

वयमिन्द्रं यजामहे सोमलक्षणैर्हविर्भिः पूजयामः। कीदृशं वज्रदक्षिणं शत्रुवधाय सततं वज्रोदक्षिणहस्ते यस्य तं विप्रतानां रथवहनादिविविधकर्मणां हरीणां एतत्संज्ञकानामश्वानां रथ्यं आनेतारं सइन्द्रः सोमपानानन्तरं श्मश्रु स्वकीयानि श्मश्रूणि दोधुवत् पुनः पुनर्धुन्वानः सन् ऊर्ध्वथा ऊर्ध्वं प्रभूत् प्रादुरभूत्। किंच सेनाभिः मरुदादिस्वकीयैः सैन्यैः विदयमानः विविधं शत्रून् हिंसन् राधसा द्वितीयार्थेतृतीया राधोधनं वीत्युपसर्गश्रुतेर्योग्यक्रियाध्याहारः विविधं स्तोतृभ्योददाति ॥ १ ॥

१. जो इन्द्र विविध कर्म-कुशल और हरितवर्ण अश्वों को रथ में जोतते हैं और जिनके दाहिने हाथ में वज्र है, हम उनकी पूजा करते हैं। सोमपान के अनन्तर इन्द्र अपने श्मश्रु (मूंछ, दाढ़ी) को हिलाकर और विस्तृत सेना तथा अन्न लेकर विपक्षियों का संहार करने के लिए ऊपर गये या प्रकट हुए।

हरीन्वस्ययावनेविदेवस्विन्द्रोमघैर्मघवावृत्रहाभुवत्।
ऋभुर्वाजऋभुक्षाःपत्यतेशवोवक्ष्णौमिदासस्यनामचित् ॥ २ ॥

हरी इति। नु। अस्य। या। वने। विदे। वसु। इन्द्रः। मघैः।
मघऽवा। वृत्रऽहा। भुवत्। ऋभुः। वाजः। ऋभुक्षाः।
पत्यते। शवः। अव। क्ष्णौमि। दासस्य। नाम। चित्॥ २ ॥

अस्येन्द्रस्य संबन्धिनौ या यौ हरी अश्वौ वने वन्यन्ते संभज्यन्तेस्मिन् देवाइति वनं यज्ञः अरण्यं वा तस्मिन् वसु ऋजीकलक्षणं धनं यवसलक्षणं वा नु क्षिप्रं विदे विन्देते लभेते। यद्वा यौ हरी अस्येन्द्रस्य वने संभजनार्थं वसु वसुनोलाभाय क्षिप्रं भवतइतिशेषः ताभ्यां हरिभ्यां मघैः धनैः मघवाधनवानिन्द्रः वृत्रहा वृत्राख्यासुरस्य मेघस्य वा हन्ता भुवत् भवति। अपिच ऋभुः दीप्तः वाजोबलवान् ऋभुक्षाः महानिन्द्रः शवः शवसोबलस्य धनस्य वा पत्यते ईष्टे। यद्वा शत्रूणां बलं प्रतिपत्यते पद्यतेगच्छति अहमपि तस्य प्रसादाद् दासस्य उपक्षेपयितव्यस्य शत्रोः नामचित् नम्यतेऽनेनेतिनाम शिरः तदपि अवक्ष्णौमि अवहन्मि किमुतान्यदंगं अथवा नामधेयमपि नाशयामि किमुत शत्रुं ॥ २ ॥

२. इन्द्र के हरितवर्ण दो अश्वों ने वन में बढ़िया घास खाई है। इन दोनों को लेकर और प्रचुर धन से धनी होकर इन्द्र ने वृत्र को नष्ट किया। इन्द्र विराट्-मूर्ति, बली, दीप्तिशाली और धन के अधिपति हैं। मैं दस्यु-जाति का नाम तक नष्ट कर देना चाहता हूँ।

यदावज्रंहिरण्यमिदथारथंहरीयमस्यवहतोविसूरिभिः।
आतिष्ठतिमघवासनश्रुतइन्द्रोवाजस्यदीर्घश्रवसस्पतिः ॥ ३ ॥

यदा । वज्रम् । हिरण्यम् । इत् । अर्थ । रथम् । हरी इति ।
यम् । अस्य । वहतः । वि । सूरिऽभिः । आ । तिष्ठति ।
मघऽवा । सनऽश्रुतः । इन्द्रः । वाजस्य । दीर्घऽश्रवसः । पतिः ॥ ३॥

यदा इन्द्रोहिरण्यं हितरमणीयं वज्रं स्वकीयमायुधं शत्रुहननायगृह्णातीतिशेषः । इदिति पूरणः । अथ तदानीं अस्येन्द्रस्य हरी अश्वौ यं रथं विवहतः गन्तृप्रदेशं विशेषेण प्रापयतः मघवा धनवानिन्द्रः सूरिभिः स्तोतृभिः कुत्सादिभिः सह तं रथमातिष्ठति आरोहति ।कीदृशः सनश्रुतः चिरप्रख्यातः जगति स्वभावतएव विख्यातइत्यर्थः। दीर्घश्रवसः बहुकीर्तेः वाजस्यान्नस्य पतिः स्वामी एवंभूतइन्द्रस्ते रथमारोहतीत्यर्थः ॥ ३ ॥

३. जिस समय इन्द्र सुवर्णमय वज्र का धारण करते हैं, उस समय वह उसी रथ पर, विद्वानों के साथ, चढ़ते हैं, जो रथ हरितवर्णवाले दो अश्वों के साथ जाता है। इन्द्र चिरप्रसिद्ध धनी और सर्वजन-विदित अन्नराशि के स्वामी हैं। अथ चतुर्थी—

सोचिन्नुवृष्टिर्यूथ्या३ स्वासचाँइन्द्रःश्मश्रूणिहरिताभिप्रुष्णुते ।
अवैतिसुक्षयंसुतेमधूदिद्धूनोतिवातोयथावनम् ॥ ४ ॥

सो इति । चित् । नु । वृष्टिः । यूथ्या । स्वा । सचा । इन्द्रः ।
श्मश्रूणि । हरिता । अभि । प्रुष्णुते । अव । वेति । सुऽक्षयम् ।
सुते । मधु । उत् । इत् । धूनोति । वातः । यथा । वनम् ॥ ४ ॥

तच्छब्दश्रुतेर्यच्छब्दोध्याहर्तव्यः या महती वृष्टिरस्ति सो सा वृष्टिः नु क्षिप्रं चिदित्युपमार्थे यथा सर्वं सिंचति तथा इन्द्रः स्वा स्वानि यूथ्या यूथ्यानि मरुदादिगणलक्षणानि सचा सह स्वानि श्मश्रूणि च हरिता हरिद्वर्णेन सोमेन च अभिप्रुष्णुते। प्रुषप्रुष स्नेहनसेचनपूरणेष्विति धातुः आभिमुख्येनस्थित्वा क्षिप्रं सिंचति सोमं पाययति पिबति चेत्यर्थः। अपिच सुक्षयं शोभनं यज्ञगृहं अववेति अभिगच्छति गत्वा च सुते सोमेभिषुते सति मधु मधुररसोमेतं सोमं पीत्वा मत्तः सन्निविशेषः उदिद्धूनोति स्वशरीरमुत्कंपयति । तत्र दृष्टान्तः—वातोवायुः यथा वनं वृक्षसमूहं उत्कंपयति तद्वत् ॥ ४ ॥

४. जैसे वृष्टि पशु-समूह को भिगोती है, वैसे ही इन्द्र हरितवर्ण सोमरस के द्वारा अपनी मूँछ-दाढ़ी को भिगोते हैं। अनन्तर वह शोभन यज्ञ-गृह में जाते हैं और वहाँ जो मधुर सोमरस प्रस्तुत रहता है, उसे पीकर अपनी मूँछ-दाढ़ी को उसी प्रकार हिलाते हैं, जिस प्रकार वायु वन को हिलाती है।

योवाचाविवाचोमृधवाचःपुरूसहस्राशेवाजघान ।
तत्तदिदस्यपौंस्यंगृणीमसिपितेवयस्तविषींवावृधेशवः ॥ ५ ॥

यः । वाचा । विऽवाचः । मृधऽवाचः । पुरु । सहस्रा । अशिवा ।
जघान । ततऽतत् । इत् । अस्य । पौंस्यम् । गृणीमसि ।
पिताऽइव । यः । तविषीम् । वृधे । शवः ॥ ५ ॥

यइन्द्रः वाचा वाङ्मात्रेणैव विवाचः विविधवाचः स्वशत्रून् मृधवाचः हिंसितवाचः कृत्वे-तिशेषः पुरु पुरूणि बहूनि अशिवा अशिवान्यसुखकराणि दुःखकराणीत्यर्थः सहस्रा शत्रूणां सहस्राणि जघान हन्ति अपिच यश्चेन्द्रः पितेव यथापिता पुत्रस्य तविषीं बलं अन्नप्रदानैर्वृ-धे वर्धयति तथा वृष्टिद्वारेण सर्वस्य जगतः शवोबलं ववृधे वर्धयति । अस्येन्द्रस्य तत्तदिद् तत्तदेव पौंस्यं बलं गृणीमसि वयं स्तुमः । इन्द्रोयेन येन बलेन शत्रून् हन्ति तस्य तत्तद्बलं वयं स्तुमइत्यर्थः ॥ ५ ॥

५. शत्रु लोग नाना प्रकार के वचन बोल रहे थे। इन्द्र ने अपने वचन से उन्हें चुप करके शतसहस्र शत्रुओं का संहार कर डाला। जैसे पिता, अन्न देकर, पुत्र को बलिष्ठ करता है, वैसे ही वह मनुष्यों को बलिष्ठ करते हैं। हम इन्द्र की इन शक्तियों का बखान करते हैं।

स्तोमंतइन्द्रविमदाअजीजनन्नपूर्व्यंपुरुतमंसुदानवे ।
विद्माह्यस्यभोजनमिनस्ययदापशुंनगोपाःकरामहे ॥ ६ ॥

स्तोमम् । ते । इन्द्र । विऽमदाः । अजीजन् । अपूर्व्यम् ।
पुरुऽतमम् । सुऽदानवे । विद्म । हि । अस्य । भोजनम् ।
इनस्य । यत् । आ । पशुम् । न । गोपाः । करामहे ॥ ६ ॥

हे इन्द्र ते तुभ्यं सुदानवे शोभनदानस्यार्थाय विमदा विमदनामानोवयं स्तोमं स्तोत्र-विशेषं अजीजनन् जनितवन्तः कृतवन्तइत्यर्थः। अत्रपूर्वोत्तरयोरेकवाक्ययोःपुरुषव्यत्ययः। कीदृशं अपूर्व्यं अपूर्वं अन्यैः पूर्वमकृतं उत्कृष्टमित्यर्थः। पुरुतमं बहुतमं नानाप्रकारोपेतमित्यर्थः। हि यस्मात्कारणाद् हे इन्द्र इनस्येश्वरस्य अस्य ईदृशस्य तव यद्भोजनं धनमस्ति तद् विद्म वयं जानीमः। तस्मात्कारणात्त्वदीयं तद्धनं आकरामहे वयं अस्मदभिमुखं कुर्महे। तत्र दृष्टान्तः— पशुं न गोपाः यथा गोपालः धेनुमाह्वयन् स्वस्याभिमुखीं करोति तद्वत् ॥ ६ ॥

६. इन्द्र, विमदवंशीयों ने तुम्हें अतीव प्रतिष्ठित जानकर तुम्हारे लिए अतीव विलक्षण और अतीव विस्तृत स्तुति बनाई है। हम जानते हैं कि राजा इन्द्र की तृप्ति का साधन क्या है। जैसे चरवाहा गौ को खाने का लोभ दिखाकर उसे अपने पास बुलाता है, वैसे ही हम भी इन्द्र को बुलाते हैं।

माकिर्नएनासख्याविदौषुस्तवचेन्द्रविमदस्यचक्रपैः ।
विद्माहितेप्रमतिंदेवजामिवदस्मेतेसन्तुसख्याशिवानि ॥ ७ ॥९॥

माकिः । नः । एना । सख्या । वि । यौषुः । तव । च । इन्द्र ।
विऽमदस्य । च । ऋषेः । विद्म । हि । ते । प्रऽमतिम् । देव ।
जामिऽइवत् । अस्मे इति । ते । सन्तु । सख्या । शिवानि ॥७॥९॥

हे इन्द्र ते तव च विमदस्य ऋषेर्मम च नः अस्मदोर्द्वयोश्चेतिद्वयोर्बहुवचनं आवयोः एना एनानि सख्या सख्यानि स्तुत्यस्तोतृत्वेन यष्टव्ययष्टृत्वेन च सखिकर्माणि माकिर्वियौषुः केचिदपि न विश्लथयेयुः । अपिच हि यस्मात्कारणाद् हे देव द्योतमानेन्द्र ते तव प्रमतिं प्रकृष्टांमतिं अनुग्राहिकां बुद्धिं विद्म जानीमः । तत्र दृष्टान्तः—जामिवत् यथा भ्राता स्वभगिन्या स्नेहयुक्तां मतिं जानाति तद्वत् तस्मात्कारणाद् अस्मे अस्माकं ते तव च सख्या सख्यानि शिवानि सन्तु मंगलानि भवन्तु अनपायानीत्यर्थः ॥ ७ ॥

७. इन्द्र, तुम्हारे और विमद ऋषि के साथ जो सब मैत्री का बन्धन है, वह शिथिल न होने पावे। देव, जैसे भ्राता और भगिनी में मन की एकता है, वैसे ही तुम्हारे मन का ऐक्य हम जानते हैं। हमारे साथ तुम्हारा कल्याणकर बन्धुत्व स्थिर रहे।

॥ इति सप्तमस्य सप्तमे नवमोवर्गः ॥ ९ ॥

इन्द्रसोममिति षळृचमष्टमं सूक्तं चतुर्थ्याद्यास्तिस्रोनुष्टुभोश्विदेवत्याः आदितस्तिस्रऐन्द्र्यः आस्तारपंक्तिच्छन्दकाः । आदितोद्वौ गायत्रौ ततोद्वौ जागतौ सा आस्तारपंक्तिः । ऋषिः पूर्ववत् । तथाचानुक्रान्तं—इन्द्रसोमंषळास्तारपांक्तंत्वाश्विन्योन्त्यास्तिस्रोनुष्टुभइति । गतोविनियोगः ।

तत्र प्रथमा—

इन्द्रसोममिमंपिबमधुमन्तंचमूसुतम् ।
अस्मेरयिंनिधारयविवोमदेसहस्रिणंपुरूवसोविवक्षसे ॥ १ ॥

इन्द्र । सोमम् । इमम् । पिब । मधुऽमन्तम् । चमू इति । सुतम् ।
अस्मे इति । रयिम् । नि । धारय । वि । वः । मदे । सहस्रिणम् ।
पुरुवसो इति । पुरुऽवसो । विवक्षसे ॥ १ ॥

हे इंद्र त्वं इममीदृशं सोमं पिब । कीदृशं मधुमन्तं मधुररसोपेतं चमू चम्वोः अधिषवणफलकयोः सुतमभिषुतं तदनंतरं पुरुवसो बहुधन हे इंद्र वः तव विमदे विशेषेण सोमजन्यमदे सति अस्मे अस्माकं रयिं धनं निधारय नितरां स्थापय । कीदृशं सहस्रिणं सहस्रसं-

स्थायुक्तं प्रभूतमित्यर्थः। त्वया दत्तेन धनेन यस्माद्वयं पुनरपि त्वदर्थं यागं कुर्मः तस्मादस्मासु धनं निधेहीत्यर्थः। अतः कारणाद्विवक्षसे महन्नामैतत् त्वं महान् भवसि ॥ १ ॥

१. इन्द्र, प्रस्तर-फलकों के ऊपर रगड़ाजाकर यह मधुर सोमरस, तुम्हारे लिए, तैयार है। पियो। प्रचुर धनवाले इन्द्र, हमें सहस्र-संख्यक प्रचुर धन दो। विमद के लिए तुम महान् हो।

त्वांयज्ञेभिरुक्थैरुपहव्येभिरीमहे।
शचीपतेशचीनांविवोमदेश्रेष्ठंनोधेहिवार्यंविवक्षसे ॥ २ ॥

त्वाम्। यज्ञेभिः। उक्थैः। उप। हव्येभिः। ईमहे। शचीऽपते।
शचीनाम्। वि। वः। मदे। श्रेष्ठम्। नः।
धेहि। वार्यम्। विवक्षसे ॥ २ ॥

हे इन्द्र वयं यज्ञेभिर्यज्ञैः सोमयागादिभिः उक्थैः शस्त्रलक्षणैः स्तोत्रैः हव्येभिर्हव्यैः पुरोडाशादिभिश्च उपेत्युपसर्गश्रुतेर्योग्यपदाध्याहारः त्वामुपेत्य ईमहे अभिलषितं धनं याचामहे। अतः हे शचीपते कर्मणां पालक यतः त्वं केषांचित्कर्मणां पालकोभवसि इति न किंतु शचीनां सर्वेषां कर्मणां पालकोभवसीत्यर्थः। एवं याचितस्त्वं नोस्मभ्यं वार्यं वरणीयं श्रेष्ठं प्रशस्यतमं पश्वादिधनं धेहि देहि। शिष्टं स्पष्टं ॥ २ ॥

२. इन्द्र, यज्ञीय सामग्री, स्तुति और होमीय वस्तु के द्वारा हम तुम्हारी आराधना करते हैं। तुम सारे कर्मों के प्रभु हो। सारे कर्म सफल करते हो। अतीव उत्तम और अभिलषित वस्तु हमें दो। विमद के लिए तुम महान् हो।

अथ तृतीया—

यस्पतिर्वार्याणामसिरध्रस्यचोदिता।
इन्द्रस्तोतॄणामविताविवोमदेद्विषोनःपाह्यंहसोविवक्षसे ॥ ३ ॥

यः। पतिः। वार्याणाम्। असि। रध्रस्य। चोदिता।
इन्द्र। स्तोतॄणाम्। अविता। वि। वः। मदे। द्विषः।
नः। पाहि। अंहसः। विवक्षसे ॥ ३ ॥

हे इन्द्र यस्त्वं वार्याणां वरणीयानां धनानां पतिरसि स्वामी भवसि। रध्रस्य राधकस्य स्तोतुश्चोदिता धनदानेन कर्मसु नियोक्ता च भवसि। किंच हे इंद्र यस्त्वं स्तोतॄणां अविता रक्षकोसि सत्वं विवोमदे तव विविधे सोमजन्यमदे सति द्विषोद्वेष्टुः सकाशात् नोस्मान् पाहि रक्ष अंहसः पापाच्च रक्ष। कस्मादेवमुच्यसे यस्मात्त्वं विवक्षसे महान् भवसि ॥ ३ ॥

३. तुम विविध अभिलषित वस्तुओं के स्वामी हो। तुम उपासक को उपासना-कार्य में प्रेरित करते हो। तुम स्तोताओं के रक्षक हो। तुम हमें शत्रु के हाथों से और पाप से बचाओ।

युवंशक्रामायाविनासमीचीनिरमन्थतम्।
विमदेनयदीळितानासत्यानिरमन्थतम् ॥ ४ ॥

युवम्। शक्रा। मायाविना। समीची इति सम्ऽईची। निः।
अमन्थतम्। विऽमदेन। यत्। ईळिता।
नासत्या। निःऽअमन्थतम् ॥ ४ ॥

हे शक्रा शक्तौ शत्रुवधादिकर्मसु समर्थौ हे अश्विनौ मायाविना मायाविनौ प्रज्ञावंतौ शत्रुवंचनकुशलौ वा युवं युवां समीची परस्परं संगतौ निरमन्थतं अग्निं निरमथ्नीतं। अश्विनावध्वर्यूइतिब्राह्मणोक्तेत्याव। अग्निमंथनमप्यश्विनोरुपपन्नमिति। कदाश्विनौ निर्मथितवंतौ उच्यते--यद्यदा नासत्या नासत्यौ युवां विमदेन मया ईळिता ईळितौ स्तुतौ निरमंथतं निरमथ्नीतं तदानीं युवां परस्परं संगतौ निर्मथितवन्तौ स्थइत्यर्थः॥ ४ ॥

४. कर्म-निष्ठ अश्विद्वय, तुम्हारा कार्य अद्भुत है। तुम सत्यरूप हो। जिस समय विमद ने तुम्हारी स्तुति की थी, उस समय काठों में घर्षण करके और दोनों ने एकत्र होकर अग्नि-मन्थन किया था—पृथक्-पृथक् नहीं।

विश्वेदेवाअकृपन्तसमीच्योर्निष्पतन्त्योः।
नासत्यावब्रुवन्देवाःपुनरावहतादिति ॥ ५ ॥

विश्वे। देवाः। अकृपन्त। सम्ऽईच्योः। निःऽपतन्त्योः। नासत्यौ।
अब्रुवन्। देवाः। पुनः। आ। वहतात्। इति ॥ ५ ॥

हे अश्विनौ युवाभ्यां अग्निमंथनकाले प्रेर्यमाणयोः समीच्योः परस्परेण संयुक्तयोररण्योर्निष्पतन्त्योः विस्फुलिंगान्निर्गमयन्त्योः सत्योः विश्वे सर्वे इन्द्रादयोदेवाः अकृपंत युवामस्तुवन्। किंच देवाः नासत्यावश्विनौ युवामब्रुवन् अवोचन्। किमिति पुनरावहतादिति पुनः पुनः ईदृशानि जगत्स्थितिहेतुभूतानि कर्माणि युवामाभिमुख्येन स्थित्वावहतां यद्वा युवाभ्यामुत्पाद्यमानः पुनश्चायमग्निः अस्मदीयानि हवींषि आवहत्विति देवानासत्यावब्रुवन्॥ ५॥

५. अश्विद्वय, जिस समय दोनों अरणि (अग्नि-मन्थन-काष्ठ), तुम्हारे हाथों से संचालित होकर, इकट्ठे हुए और अग्नि स्फुलिंग बाहर करने लगे, उस समय सारे देवता तुम्हारी प्रशंसा करने लगे। देवता लोग अश्विद्वय को बोलने लगे, "फिर ऐसा करना।"

---

१ ऐ० ब्रा० १. १७.।

अथ षष्ठी—

मधुमन्मेपरायणंमधुमत्पुनरायनम् ।
तानोदेवादेवतयायुवंमधुमतस्कृतम् ॥ ६ ॥ १० ॥

मधुऽमत् । मे । पराऽअयनम् । मधुऽमत् । पुनः । आऽअयनम् ।
ता । नः । देवा । देवतया । युवम् । मधुऽमतः । कृतम् ॥ ६ ॥ १० ॥

हे अश्विनौ मे मदीयं परायणं गृहात्परागमनं मधुमत् अत्र रसविशेषवाचिना मधुशब्देन तद्गता प्रीतिर्लक्ष्यते युवयोः प्रसादात्प्रीतियुक्तं भवत्वितिशेषः । पुनः आयनं गृहं प्रत्यागमनं मधुमत्प्रीतियुक्तं भवतु । अपिच हे देवा देवौ द्योतमानौ ता तौ युवं युवां नोस्मान् मधुमतः प्रीतियुक्तान् कृतं कुरुतं । केनेति उच्यते—देवतया देवत्वेन अणिमादिदेवतैश्वर्ययोगेनेत्यर्थः ॥ ६ ॥

६. अश्विद्वय, मेरा बाहर जाना प्रीतिकर हो। मेरा पुनरागमन भी वैसा ही मधुर हो—मैं जब जहाँ जाऊँ, प्रीति प्राप्त करूँ। दोनों देव, अपनी दिव्यशक्ति के बल से हमें सभी विषयों में सन्तुष्ट करो।

॥ इति सप्तमस्य सप्तमे दशमोवर्गः ॥ १० ॥

भद्रमित्येकादशर्चं नवमं सूक्तं तुह्यादिपरिभाषयेदमप्यास्तारपाङ्क्तं सोमदेवताकं ऋषिश्चान्यस्मादितिपरिभाषया प्राजापत्यऐन्द्रोवा विमदोवा वसुक्रोवसुरुद्वा ऋषिः । तथाचानुक्रान्तम्—भद्रमेकादशसौम्यमिति । गतोविनियोगः ।

तत्र प्रथमा—

भद्रंनोअपिवातयमनोदक्षमुतक्रतुम् ।
अधातेसख्येअन्धसोविवोमदेरणन्गावोनयवसेविवक्षसे ॥ १ ॥

भद्रम् । नः । अपि । वातय । मनः । दक्षम् । उत ।
क्रतुम् । अध । ते । सख्ये । अंधसः । वि । वः । मदे ।
रणन् । गावः । न । यवसे । विवक्षसे ॥ १ ॥

हे सोम त्वं नोस्मदीयं मनः भद्रं कल्याणं तय गमय अस्माकं मनः शुभसंकल्पं कुर्वित्यर्थः । तथा दक्षमुत दक्षमपि दक्षवृद्धौ वृद्धं सर्वव्यापिनं अन्तरात्मानमपि भद्रं शुभकारिलक्षणं प्रापय अस्माकमन्तरात्मानं शुभकारिणं कुर्वित्यर्थः । उत अपिच क्रतुं प्रज्ञानं भद्रं

शुभाध्यवसायलक्षणं प्रापय शुभाध्यवसायिनं कुर्वित्यर्थः ।अध अथ स्तोतारः ते तव सख्ये स्तुत्यस्तोतृत्वेज्ययष्टृत्वलक्षणे सखिकर्मणि रणन् रमंतां । तत्र दृष्टांतः—गावोन यवसे । यथा धेनवोघासे रमंते प्रीतिं कुर्वंति तद्वत् । कस्मिन् सति अन्धसः सोमाख्यस्यान्नस्य संबंधिनि वः तव विमदे विविधसोमजन्यमदनिमित्ते सति । कस्मादेवं यस्माद्विवक्षसे महान् भवसि ॥१॥

१. सोम, हमारे मन को इस प्रकार उत्तम रूप से प्रेरित करो कि, वह निपुण और कर्मनिष्ठ हो। जैसे गायें घास में रत होती हैं, वैसे ही स्तोता लोग अन्न के प्रति रत होते हैं। विमद के लिए तुम महान् हो।

हृदिस्पृशस्तआसतेविश्वेषुसोमधामसु ।
अधाकामाइमेममविवोमदेवितिष्ठन्तेवसूयवोविवक्षसे ॥ २ ॥

हृदिऽस्पृशः । ते । आसते । विश्वेषु । सोम । धामऽसु ।
अध । कामाः । इमे । मम । वि । वः । मदे ।
वि । तिष्ठन्ते । वसुऽयवः । विवक्षसे ॥ २ ॥

हे सोम ते तव हृदिस्पृशः स्तुतिभिः हृदयं स्पृशंतऋत्विजः विश्वेषु धामसु सर्वेषु स्थानेषु आसते त्वां स्तुवंतस्तिष्ठन्ति । अध अथ इमे ईदृग्भूताः कामाः अभिलाषाः विवोमदे तव सोमपानजन्यविविधे मदनिमित्ते सति सोमयागार्थमित्यर्थः । वसूयवोवसुकामाः धनमिच्छन्तः मम हृदयादिविशेषः वितिष्ठन्ते उत्तिष्ठन्ति । कस्मादेवं यस्माद्विवक्षसे महान् भवसि ॥ २ ॥

२. सोम, पुरोहित लोग स्तुति के द्वारा तुम्हारे चित्त का हरण करके चारों ओर बैठते हैं। धन-प्राप्ति के लिए मेरे मन में नाना प्रकार की कामनायें उत्पन्न होती हैं। विमद के लिए तुम महान् हो।

अथ तृतीया—

उतव्रतानिसोमतेप्राहंमिनामिपाक्या ।
अधापितेवसूनवोविवोमदेमृळानोअभिचिद्वधाद्विवक्षसे ॥ ३ ॥

उत । व्रतानि । सोम । ते । प्र । अहम् । मिनामि । पाक्या ।
अध । पिताऽइव । सूनवे । वि । वः । मदे । मृळ ।
नः । अभि । चित् । वधात् । विवक्षसे ॥ ३ ॥

उतापि च हे सोम अहं ते तुभ्यं व्रतानि यागादिकर्माणि पाक्या परिपक्वया सर्वार्थदर्शिन्या प्रज्ञया । यद्वा पाक्येति व्रतविशेषणमेतत् पाक्यानि परिपक्वानि परिनिष्ठितानीत्यर्थः । प्रमिनामि प्रहिनस्मि प्रकर्षेण करोमीत्यर्थः । अथाथ यागानंतरं विवोमदे तव विविधे मदे सति नोस्मान् मृळ सुखय अभिचिद्वधात् आभिमुख्येन स्थित्वा शत्रादिवधाच्च अस्मान् पालयेतिशेषः । तत्र दृष्टांतः—पिते वसूनवे । यथा पिता पुत्रार्थं सुखयति सर्वस्मात् पुत्रमेव पालयति तद्वत् । यस्मात्सुख्यमानः पाल्यमानश्चाहं युष्मदर्थं पुनःपुनः सोमयागं करोमि तस्मान्मां सुखय पालय चेत्यर्थः । कस्मादेवमुच्यसे यस्मात्त्वं विवक्षसे महान् भवसि महान्तश्च भक्तान् सुखयन्ति पालयन्ति चेति यावत् ॥ ३ ॥

३. सोम, अपनी इस परिणत बुद्धि के द्वारा मैं तुम्हारे कार्य का परिमाण करके देखता हूँ। जैसे पिता पुत्र के प्रति अनुकूल होता है, वैसे ही तुम हमारे लिए होओ; शत्रु-संहार करके हमें सुखी करो। विमद के लिए महान् हो।

समुप्रयन्तिधीतयःसर्गासोवताँइव ।
क्रतुंनःसोमजीवसेविवोमदेधारयाचमसाँइवविवक्षसे ॥ ४ ॥

सम् । ऊँ इति । प्र । यन्ति । धीतयः । सर्गासः । अवतान्ऽइव ।
क्रतुम् । नः । सोम । जीवसे । वि । वः । मदे ।
धारय । चमसान्ऽइव । विवक्षसे ॥ ४ ॥

हे सोम धीतयः देवतागुणान् दधति गृह्णन्तीति धीतयः स्तुतयः अस्मदीयाः समु संभूयैव प्रयन्ति । प्रकृष्टया गत्या त्वां गच्छन्ति तत्र दृष्टान्तः—सर्गासोवतानिव विसृज्यन्ते उदकपानार्थमिति सर्गासोसंघाः यन्त्रस्थाघटसंघावा ते यथा उदकपानार्थमादानार्थं वा अवतान् कूपनामैतत् कूपान् प्रतिगच्छन्ति तद्वत् त्वमप्येतत् ज्ञात्वा क्रतुं यागादिकं कर्म प्रज्ञां वा नोस्माकं जीवसे चिरंजीवनाय धारय महतादरेण स्थापय । तत्र दृष्टान्तः—चमसानिव यथा वस्तव विमदे विविधसोमजन्यमदेकर्तव्यत्वेन निमित्तभूते सति अध्वर्युर्हविर्धाने महता यत्नेन चमसान् सोमपात्राणिस्थापयति तद्वत् कस्मादेवमुच्यसे यस्मात्त्वं विवक्षसे महान् भवसि । यद्वा-धीतयः अंगुलिनामैतत् धयन्ति पिबन्त्याभिरिति धीतयोङ्गुलयः हे सोम त्वां समुप्रयन्ति सहैव प्रकर्षेण त्वां प्राप्नुवन्ति । किमिव अवतानिव जलोद्धरणार्थं विसृज्यन्तइति सर्गाः रज्जवः यथा कूपान्प्रति गच्छन्ति तद्वत् । ततस्त्वं नोस्माकं जीवसे चिरं जीवनाय क्रतुं कर्म धारय यथा संपूर्णं भवति तथा पूरय । किमिव यथा चमसान् स्वयं पूरयसि तद्वत् ॥ ४ ॥

४. सोम, जैसे कलश जल निकालने के लिए कुएँ के भीतर जाता है, वैसे ही हमारे सारे स्तोत्र तुम्हारे लिए जाते हैं। हमारी प्राण-रक्षा के लिए इस यज्ञ को सुसम्पन्न करो। जैसे जल-पिपासु तौर के पास पान-पात्र धारण करता है, वैसे ही तुम धारण करो। तुम महान् हो।

अथ पञ्चमी—

तवत्येसोमशक्तिभिर्निकामासोव्यृण्विरे ।
गृत्सस्यधीरास्तवसेविवोमदेव्रजंगोमन्तमश्विनंविवक्षसे॥५॥११॥

तव । त्ये । सोम । शक्तिऽभिः । निऽकामासः । वि । ऋण्विरे ।
गृत्सस्य । धीराः । तवसः । वि । वः । मदे । व्रजम् ।
गोऽमन्तम् । अश्विनम् । विवक्षसे ॥ ५ ॥ ११ ॥

निकामासः दृष्टादृष्टफले नियतकामाः त्ये ते प्रसिद्धाधीरा मेधाविनऋत्विजः शक्तिभिर्यागादिकर्मभिः सह हे सोम गृत्सस्य मेधाविनः तवसः महतस्तव व्यृण्विरे विविधाः स्तुतीर्गमयन्ति प्रापयन्ति कुर्वन्तीत्यर्थः । अतः कारणाद् विवोमदे तव सोमपानजन्यविविधमदनिमित्तभूते सति अस्मभ्यं गोमंतं गोसहितं अश्विनं अश्वसहितं व्रजं गोष्ठं सामर्थ्यान्मन्दुरा लभ्यते मन्दुरां च देहीतिशेषः । कस्मादेवमुच्यसे यस्माद्विवक्षसे महान् भवसि ॥ ५ ॥

५. विविध-फलाभिलाषी सारे धीर व्यक्तियों ने अनेक प्रकार के कार्य करके तुम्हारा परितोष किया है; क्योंकि तुम महान् और मेधावी हो। फलतः तुम गौ और अश्व से युक्त पशुशाला हमें दो। तुम महान् हो।

॥ इति सप्तमस्य सप्तमे एकादशोवर्गः ॥ ११ ॥

अथ षष्ठी—

पशुंनःसोमरक्षसिपुरुत्राविष्ठितंजगत् ।
समाकृणोषिजीवसेविवोमदेविश्वासंपश्यन्भुवनाविवक्षसे ॥ ६ ॥

पशुम् । नः । सोम । रक्षसि । पुरुऽत्रा । विऽस्थितम् । जगत् ।
सम्ऽआकृणोषि । जीवसे । वि । वः । मदे । विश्वा ।
सम्ऽपश्यन् । भुवना । विवक्षसे ॥ ६ ॥

हे सोम त्वं नोस्मदीयं पशुं देवयागार्थमुपाकृतं रक्षसि पालयसि न केवलं पशुं किंतु पुरुत्रा बहुधा विष्ठितं सुरनरतिर्यग्योन्यादिभावेनावस्थितं जगच्च रक्षसि। किंच सत्वं समाकृणोषि जगतोवृत्तिं सम्यगाकरोषीत्यर्थ । किमर्थं जीवसे जीवनार्थं । किं कुर्वन् विश्वा भुवना विश्वानि भुवनानि भूतजातानि संपश्यन् । किमर्थमेतदादिकं सर्वं करोषि । उच्यते—विवो मदे युष्माकंसर्वेषां देवानां विविधहविर्जन्यतृप्त्यर्थं । उक्तंहि-- इतःप्रदानमुतदेवाउपजीव-

न्यमुतः प्रदानंमनुष्याउपजीवन्तीति। अतएव त्वं विवक्षसे महान् भवसि महतामेतत्सर्वमुचितमित्यर्थः ॥ ६ ॥

६. सोम, हमारे पशुओं की रक्षा करो और नाना मूर्त्तियों में स्थित विशाल भुवनों की रक्षा करो। हमारे प्राण-धारण के लिए सारे भुवनों का अन्वेषण करके जीवनोपाय ले आ देते हो। विमद के लिए तुम महान् हो।

त्वंनःसोमविश्वतोगोपाअदाभ्योभव।
सेधराजन्नपस्त्रिधोविवोमदेमानोदुःशंसईशताविवक्षसे ॥ ७ ॥

त्वम्। नः। सोम। विश्वतः। गोपाः। अदाभ्यः। भव। सेध। राजन्। अप। स्त्रिधः। वि। वः। मदे। मा। नः। दुःऽशंसः। ईशत। विवक्षसे ॥ ७ ॥

हे सोम अदाभ्यः केनाप्यहिंस्यस्त्वं विश्वतः सर्वतः नोस्माकं गोपाः रक्षिता भव। अपिच हे राजन् राजमान सोम त्वं स्त्रिधः अस्माकमुपक्षपयितॄन् अपसेध अस्मत्तः अपगमय अपजहि च नोस्माकं दुःशंसः विद्यमानानां अविद्यमानानां कर्मणां शंसिता प्रख्यापयिता माईशत ईशिता माभूत् तव प्रसादादस्माकमपवक्ता कश्चिदपि माभूदित्यर्थः। किमर्थमेतत्सर्वमार्थ्यसे विवोमदे तव विविधसोमादिहविर्जन्यतृप्त्यर्थं। अतोविवक्षसे त्वं महान् भवसि ॥ ७ ॥

७. सोम, तुम सब प्रकार से हमारे लिए रक्षक होओ; क्योंकि तुम दुर्द्धर्ष हो। राजा सोम, शत्रुओं को दूर कर दो। हमारा निन्दक हमारा कुछ न करने पावे। विमद के लिए तुम महान् हो।

त्वंनःसोमसुक्रतुर्वयोधेयायजागृहि।
क्षेत्रवित्तरोमनुषोविवोमदेद्रुहोनःपाह्यंहसोविवक्षसे ॥ ८ ॥

त्वम्। नः। सोम। सुऽक्रतुः। वयःऽधेयाय। जागृहि। क्षेत्रवित्ऽतरः। मनुषः। वि। वः। मदे। द्रुहः। नः। पाहि। अंहसः। विवक्षसे ॥ ८ ॥

हे सोम सुक्रतुः शोभनप्रज्ञः क्षेत्रवित्तरः क्षेत्रस्यातिशयेन लंभकः त्वं नोस्माकं वयोधेयाय अन्नदानाय जागृहि। किंच द्रुहः द्रोग्धुः मनुषोमनुष्याच्छत्रोः सकाशान्नोस्मान्पाहि रक्ष अंहसः पापाच्च नोस्मान्पाहि। किमर्थं विवोमदे तव सोमादिहविर्जन्यतृप्त्यर्थमित्यर्थः। विवक्षसे त्वं महान् भवसि ॥ ८ ॥

८. सोम, तुम्हारा कार्य अतीव सुन्दर है। तुम हमें अन्न देने के लिए सतर्क रहते हो। हमें भूमि देने के लिए तुम्हारे सदृश कोई नहीं है। अनिष्ट-कर्त्ताओं के हाथ से हमारी रक्षा करो। पाप से भी बचाओ। तुम महान् हो।

त्वंनोवृत्रहन्तमेन्द्रस्येन्दोशिवःसखा।
यत्सींहवन्तेसमिथेविवोमदेयुध्यमानास्तोकसातौविवक्षसे ॥ ९ ॥

त्वम्। नः। वृत्रहन्ऽतम। इन्द्रस्य। इन्दो इति। शिवः। सखा।
यत्। सीम्। हवन्ते। सम्ऽइथे। वि। वः। मदे। युध्यमानाः।
तोकऽसातौ। विवक्षसे ॥ ९ ॥

हे वृत्रहन्तम शत्रूणामतिशयेन हंतः हे इन्दो हे सोम यस्त्वं इन्द्रस्य शिवः सुखकरः सखा मित्रभूतोसि सत्यं नोस्मान्पाहीतिशेषः। कदेति उच्यते—तोकसातौ तोकइत्यपत्यनाम सातिः षणुदाने इत्यस्माद्धातोरूपं दीयतेस्मिन्नपत्यमितितोकसातिः संग्रामविशेषणं तस्मिन् अतिमहतीत्यर्थः समिथे संग्रामे युद्धमानाः युद्धं कुर्वाणाः शत्रुजनाः सीं सर्वतः यद्यदा हवन्ते युद्धार्थमस्मानाह्वयन्ति तदास्माकं रक्षिताभवेत्यर्थः। कस्मिन्निमित्ते वियोमदे तव विविधहर्षनिमित्ते। विवक्षसे त्वं महान् भवसि महतां हि पालनं युक्तमेवेति ॥ ९ ॥

९. जिस समय भयंकर युद्ध उपस्थित होता है और अपनी सन्तानों का उसमें बलिदान करना पड़ता है और जिस समय योद्धा शत्रु चारों ओर से हमें, युद्ध के लिए बुलाते हैं, उस समय, हे सोम, तुम इन्द्र के सहायक होते हो, उन्हें विपदों से बचाते हो; क्योंकि तुम्हारे समान शत्रु-संहारक कोई नहीं है। विभव के लिए महान् हो।

अयंघसतुरोमदइन्द्रस्यवर्धतप्रियः।
अयंकक्षीवंतोमहोविवोमदेमतिंविप्रस्यवर्धयद्विवक्षसे ॥ १० ॥

अयम्। घ। सः। तुरः। मदः। इन्द्रस्य। वर्धत। प्रियः।
अयम्। कक्षीवतः। महः। वि। वः। मदे। मतिम्।
विप्रस्य। वर्धयत्। विवक्षसे ॥ १० ॥

अयं घ ईदृशः खलु सप्तसिद्धोस्माभिरभिषुतः सोमः तुरः सर्वकार्येषु त्वरणशीलः मदोमदकरः प्रियः इन्द्रस्य तर्पयिता वर्धत अस्मदीयां मतिं अवर्धयत्। अयं सोमः कक्षीवतः एतदाख्यस्य ऋषेः कीदृशस्य महोमहतः विप्रस्य मेधाविनः मतिं प्रज्ञां वर्धयत् अवर्धयत्। यद्वदस्माकमपि मतिमवर्धयदित्यर्थः। शिष्टं गतं ॥ १० ॥

१०. सोम सारे कार्यों में क्षिप्रकारी हैं। वह मदकर और इन्द्र के तर्पक हैं। सोम ने महामेधावी कक्षीवान् ऋषि की बुद्धि को बढ़ाया था। विमद के लिए तुम महान् हो।

अयंविप्रायदाशुषेवाजाँइयर्तिगोमतः।
अयंसप्तभ्यआवरंविवोमदेप्रान्धंश्रोणंचतारिषद्विवक्षसे॥११॥१२॥

अयम्। विप्राय। दाशुषे। वाजान्। इयर्ति। गोऽमतः।
अयम्। सप्तऽभ्यः। आ। वरम्। वि। वः। मदे। प्र। अन्धम्।
श्रोणम्। च। तारिषत्। विवक्षसे॥ ११॥ १२॥

अयं सोमः विप्राय मेधाविने दाशुषे हविर्दत्तवते यजमानाय गोमतः पशुयुक्तानि वाजान् अन्नानि इयर्ति प्रेरयति प्रयच्छतीत्यर्थः। किंच अयमेव सोमः सप्तभ्यः होत्राभ्यः वरं वरणीयं धनं आप्रयच्छति अन्धं नेत्रहीनं दीर्घतमसमृषिं चक्षुःप्रदानेन श्रोणं च पंगुं परावृजमृषिं चरणप्रदानेन एवमुभावृषी प्रतारिषत् प्रकर्षेण वर्धितवान् शिष्टं स्पष्टम्॥ ११॥

११. सोम मेधावी और हविर्दाता यजमान को पशु-युक्त अन्न देते हैं। यही सोम सातों होताओं को श्रेष्ठ धन देते हैं। सोम ने अंधे दीर्घतमा ऋषि को नेत्र और लँगड़े परावृज ऋषि को पैर दिये थे। विमद के लिए महान् हो। ॥ इति सप्तमस्य सप्तमे द्वादशोवर्गः॥ १२॥

प्रहीति नवर्चं दशमं सूक्तं आनुष्टुभं पूषदेवताकं आद्याचतुर्थ्यौ तृष्णिहौ ऋषिः पूर्ववत् तथाचानुक्रान्तम्—प्रहिनवपौष्णमानुष्टुभमाद्याचतुर्थ्याउष्णिहाविति। गतोविनियोगः।

प्रह्यच्छामनीषाःस्पार्हायन्तिनियुतः।
प्रदस्रानियुद्रथःपूषाअविष्टुमाहिनः॥ १॥

प्र। हि। अच्छ। मनीषाः। स्पार्हाः। यन्ति। निऽयुतः।
प्र। दस्रा। नियुत्ऽरथः। पूषा। अविष्टु। माहिनः॥ १॥

हि यस्मात्कारणात् मनीषाः अस्मदीयाः स्तुतिलक्षणावाचः अच्छ गुणग्रहणद्वारेण पूषणमभिप्राप्तुं प्रयन्ति प्रकर्षेण गच्छन्ति। कीदृश्यः स्पार्हाः सर्वगुणोपेतत्वात् स्पृहणीयाः नियुतः नियमनाद्वा नियोजनाद्वेत्येतद्रूपं अस्माभिर्नियमितावानियुतावा उच्चारिताइत्यर्थः एतत् ज्ञात्वा उपकारस्य प्रत्युपकारं कर्तुं दस्रा दर्शनीयः नियुद्रथः गमनाय सर्वदानियुतरथोनियुक्तरथोवा माहिनः महान् पूषा देवः माविष्टु अस्मान्प्रकर्षेणरक्षतु। यद्वा दस्रा दंसयितारौ कर्मणामुपक्षपयितारौ परिसमापयितारावित्यर्थः एवं भूतौ पत्नीयजमानौ पूषा रक्षत्विति योज्यम्॥१॥

१. अतीव उत्कृष्ट स्तोत्र प्रस्तुत किये गये हैं। उन सबका पूषादेव के प्रति प्रयोग किया जाता है। वे श्रेष्ठ देव सदा रथ को जोतनेवाले हैं। वे आकर यजमान और उसकी पत्नी की रक्षा करें।

यस्यत्यन्महित्वंवाताप्यंमयंजनः।
विप्रआवंसद्धीतिभिश्चिकेतसुष्टुतीनाम् ॥ २ ॥

यस्य। त्यत्। महिऽत्वम्। वाताप्यम्। अयम्। जनः।
विप्रः। आ। वंसत्। धीतिऽभिः। चिकेत। सुऽस्तुतीनाम् ॥ २ ॥

विप्रोमेधावी अयं यजमानजनः यस्य पूष्णः संबंधि त्यत्तत् प्रसिद्धं महित्वं महत्वं वाताप्यं मण्डले संभृतं परिपक्वमुदकंधीतिभिः यागादिकर्मभिः आवंसत् संभजते सदेवः सुष्टुतीनां तदीयाः शोभनाः स्तुतीः चिकेत जानातु ॥ २ ॥

२. मेधावी यजमान पूषा (सूर्य) के मण्डल में जो जल का भाण्डार है, उसे, यज्ञ के द्वारा, पृथिवी पर ले आवें। पूषादेव यजमान का स्तोत्र सुनते हैं।

सवेदसुष्टुतीनामिन्दुर्नपूषावृषा।
अभिप्स्युरःप्रुषायतिव्रजंनआप्रुषायति ॥ ३ ॥

सः। वेद। सुऽस्तुतीनाम्। इन्दुः। न। पूषा। वृषा।
अभि। प्स्युरः। प्रुषायति। व्रजम्। नः। आ। प्रुषायति ॥ ३ ॥

यउक्तगुणः सपूषा सुष्टुतीनां शोभनस्तोत्राणां स्वरूपमितिशेषः वेद जानाति अपिच इन्दुर्न सोमइव तथा अयं पूषा वृषा कामानां वर्षिता भवति। प्स्युरः रूपवान् सन् अभि अस्मानभिलक्ष्य प्रुषायति सिंचति। तथा नोस्माकं व्रजं गोष्ठं च आप्रुषायति आभिमुख्येन सिंचति अस्मभ्यं हिरण्यपश्वादिकं ददातीत्यर्थः ॥ ३ ॥

३. पूषादेव सोम के समान रस का सेचन करनेवाले हैं। वे उत्तम स्तोत्र सुनते हैं। सुशोभित पूषा जल का सिंचन करते हैं। हमारे गोष्ठ में भी जल का सिंचन करते हैं।

अथ चतुर्थी—

मंसीमहित्वावयमस्माकंदेवपूषन्।
मतीनांचसाधनंविप्राणांचाधवम् ॥ ४ ॥

मंसीमहि। त्वा। वयम्। अस्माकम्। देव। पूषन्।
मतीनाम्। च। साधनम्। विप्राणाम्। च। आऽधवम् ॥ ४ ॥

हेदेव द्योतमान पूषन् वयं स्तोतारः त्वा त्वां मंसीमहि स्तुमः। कीदृशं अस्माकं अस्मदीयानां मतीनां च अभिलषितानां च साधनं साधयितारं विप्राणां च मेधाविनामपि आधर्षं परिचर्याद्वारेण कंपयितारं ॥ ४ ॥

४. पूषादेव, हम मन ही मन तुम्हारा ध्यान करते हैं। तुम हमारे स्तोत्र की स्फूर्ति कर दो। तुम्हारी सेवा के लिए पुरोहित लोग व्यस्त रहते हैं।

प्रत्यर्धिर्यज्ञानामश्वहयोरथानाम्।
ऋषिःसयोमनुर्हितोविप्रस्ययावयत्सखः ॥ ५ ॥ १३ ॥

प्रतिऽअर्धिः। यज्ञानाम्। अश्वऽहयः। रथानाम्।
ऋषिः। सः। यः। मनुःऽहितः। विप्रस्य। यवयत्ऽसखः ॥५॥१३॥

ऋषिः सर्वस्य द्रष्टा सपूषा यज्ञानां प्रत्यर्धिः अर्धभाक् रथानां संबंधिभिः अश्वहयः हयतिर्गतिकर्मा अश्वैर्गमनशीलोभवति अश्वयुक्तेन रथेन सदागन्तेत्यर्थः। मनुर्हितः मनुष्यहितोयः विप्रस्य मेधाविनः स्तोतुः यावयत्सखः शत्रूणां पृथक्कर्ता सखा भवसि सइति पूर्वेण संबंधः ॥ ५ ॥

५. पूषा यज्ञ के अर्द्धांश के भागी हैं। वे रथ में घोड़े जोतकर जाते हैं। वे मनुष्यों के परम हितैषी हैं। वे बुद्धिशाली के बन्धु हैं। वे उसके शत्रुओं को दूर कर देते हैं।

॥ इति सप्तमस्य सप्तमे त्रयोदशोवर्गः ॥ १३ ॥

आधीषमाणायाःपतिःशुचायाश्चशुचस्यच।
वासोवायोवीनामावासांसिमर्मृजत् ॥ ६ ॥

आऽधीषमाणायाः। पतिः। शुचायाः। च। शुचस्य। च।
वासःऽवायः। अवीनाम्। आ। वासांसि। मर्मृजत् ॥ ६ ॥

आधीषमाणायाआत्मार्थं धीयमानायाः शुचायाश्च दीप्तायाः अजायाश्च पतिः स्वामी न केवलं स्त्रीमात्रस्य किंतु शुचस्य दीप्तस्य पुंपशोश्च पतिरित्यर्थः एवंभूतः पूषा देवः अवीनामूरणानां संबंधिरोमभिः वासोवायः दशापवित्रादीनि वस्त्राणि प्रेरयन् वासांसि रजकशोध्यानि तानि वस्त्राणि आमर्मृजत् आसमंतात्प्रकाशोष्णाभ्यां शोधयन् भवति ॥ ६ ॥

६. गर्भाधान करने में समर्थ और सुन्दर मूर्त्ति छागी और छाग आदि पशुओं के प्रभु पूषा हैं। वे ही मेषलोम का वस्त्र (कम्बल) बुनते हैं और वे ही वस्त्र धो देते हैं।

अथ सप्तमी—

इनोवाजानांपतिरिनःपुष्टीनांसखा ।
प्रश्मश्रुहर्यतोदूधोद्विवृथायोअदाभ्यः ॥ ७ ॥

इनः । वाजानाम् । पतिः । इनः । पुष्टीनाम् । सखा । प्र । श्मश्रु ।
हर्यतः । दूधोत् । वि । वृथा । यः । अदाभ्यः ॥ ७ ॥

इनईश्वरः पूषा वाजानां हविरादीनां सर्वेषामन्नानां पतिः स्वामी इनः प्रभुः पुष्टीनां सर्वेषां प्राणिनां स्वभूतानां पोषकाणां करणे सखा मित्रभूतः सर्वस्योपकारित्वात् । किञ्च हर्यतः कामयमानस्य यजमानस्य स्वभूतं सोमं पिबन्निति शेषः । श्मश्रु श्मश्रूणि वृथा अनायासेन प्रयत्नेन प्रविदूधोत् प्रकर्षेण विविधं कंपयति । यः पूषा अदाभ्यः शत्रुभिरहिंस्यः सइति पूर्वेण संबंधः ॥ ७ ॥

७. प्रभु पूषा अन्न के अधिपति हैं—प्रभु पूषा सबके लिए पुष्टिकर हैं। वे ही सौम्यमूर्त्ति और दुर्द्धर्ष पूषा क्रीड़ास्थल में अपनी मूंछ-दाढ़ी को कँपाने लगे। अथाष्टमी—

आतेरथस्यपूषन्नजाधुरंववृत्युः ।
विश्वस्यार्थिनःसखासनोजाअनपच्युतः ॥ ८ ॥

आ । ते । रथस्य । पूषन् । अजाः । धुरम् । ववृत्युः । विश्वस्य ।
अर्थिनः । सखा । सनःऽजाः । अनपऽच्युतः ॥ ८ ॥

हे पूषन् देव ते त्वदीयस्य रथस्य धुरं अजावाहनत्वेन आववृत्युः आवर्तयन्ति आवहन्तीत्यर्थः । यस्त्वं विश्वस्य सर्वस्यार्थिनोयाचकस्य अभिलषितार्थप्रदातृत्वात् सखा सखिभूतः सनोजाः चिरजातः अनपच्युतः स्वाधिकारादनपगतः तस्य ते रथमिति संबंधः ॥ ८ ॥

८. पूषादेव, छाग तुम्हारे रथ की धुरी का वहन करने लगे। तुम अनेक समय पहले जनमे थे। तुम कभी भी अपने अधिकार से वंचित नहीं हुए। सारे याचकों की मनःकामना पूर्ण करते हो।

अस्माकमूर्जारथंपूषाअविष्टुमाहिनः ।
भुवद्वाजानांवृधइमंनःशृणवद्धवम् ॥ ९ ॥ १४ ॥

अस्माकम् । ऊर्जा । रथम् । पूषा । अविष्टु । माहिनः । भुवत् ।
वाजानाम् । वृधः । इमम् । नः । शृणवत् । हवम् ॥ ९ ॥ १४ ॥

माहिनोमहान् पूषा अस्माकं स्वभूतं रथं ऊर्जा बलेनान्नेन वा अविष्टु अवतु रक्षतु। किंच वाजानामन्नानां वृधोवर्धकोभुवत् भवतु नोस्मदीयं इममीदृग्भूतं हवमाह्वानं शृणवत् शृणोतु ॥ ९ ॥

९. वे ही महीयान् पूषादेव अपने बल के द्वारा हमारे रथ की रक्षा करें। वे अन्न-वृद्धि करें। वे हमारे इस निमंत्रण के प्रति कर्णपात करें।

इति सप्तमस्य सप्तमे चतुर्दशोवर्गः ॥ १४ ॥

असत्सुमइति चतुर्विंशत्यृचमेकादशं सूक्तं इन्द्रपुत्रस्य वसुक्रस्यार्षं त्रैष्टुभमैन्द्रं तथा चानुक्रान्तं—असत्सुचतुर्विंशतिरैन्द्रोवसुक्रइति। महाव्रते मरुत्वतीयशस्त्रे एतत्सूक्तम्। तथैव-पञ्चमारण्यके सूत्रितञ्च—असत्सुमेजरितःसाभिवेगःपिबासोममभियमुग्रतर्दइति।

असत्सुमेजरितःसाभिवेगोयत्सुन्वतेयजमानायशिक्षम्।
अनाशीर्दामहमस्मिप्रहन्तासत्यध्वृतंवृजिनायन्तमाभुम् ॥ १ ॥

असत्। सु। मे। जरितरिति। सः। अभिऽवेगः। यत्। सुन्वते। यजमानाय। शिक्षम्। अनाशीःऽदाम्। अहम्। अस्मि। प्रऽहन्ता। सत्यऽध्वृतम्। वृजिनऽयन्तम्। आभुम् ॥ १ ॥

वासुक्रेषु सूक्तेषु बाहुल्येनेन्द्रः स्तूयते इदानीमिन्द्रोवसुक्रं स्तोतुमुद्यतं पुत्रं संबोध्य स्वसामर्थ्यं कथयति। येन विज्ञातदेवतारूपःसन् सुखेन स्तोष्यतीति यद्वा कार्यकारणयोरेकत्वोपचारात्। आत्मावैपुत्रनामासीतिवचनात्। इन्द्ररूपेणावस्थितोवसुक्रआत्मानं स्तौति क्वचित् क्वचिदिन्द्रं चेति। हे जरितः स्तोतः मे मम सुशोभनः सतादृशः अभिवेगः अभिगमनं मनसोवृत्तिविशेषः असत् अस्ति विद्यते यत् येनाभिवेगेन सुन्वते मदर्थं सोमाभिषवं कुर्वते यजमानाय यज्वने शिक्षं अभिलषितमर्थं ददामि। किंच अहं अनाशीर्दां आशीरन्यत्र प्रार्थना इह सामर्थ्यात्प्रार्थ्यमानं हविरुच्यते तत् मह्यं अददतं जनं यद्वा आशीरिति सोमाश्रयणं दध्युच्यते तस्यादातारं असोमयाजिनमित्यर्थः। प्रहन्तास्मि प्रकर्षेण हिंसिता भवामि। कीदृशं सत्यध्वृतं सत्यस्य हिंसकं अनृतवादिनं चेत्यर्थः वृजिनायन्तं पापं कर्तुमिच्छन्तं आभुं व्याप्तवन्तम् ॥१॥

१. (इन्द्र की उक्ति)—भक्त स्तोता, मेरा यह स्वभाव है कि, सोमयज्ञ के अनुष्ठाता यजमान को मैं अभिलषित फल देता हूँ। जो मुझे हौमीय द्रव्य नहीं देता, वह सत्य को नष्ट करता है। जो चारों ओर पाप करता फिरता है, उसका मैं सर्वनाश करता हूँ।

---

१ आश्वलायनगृह्यसूत्रे अ० १।

अथ द्वितीया—

यदीदहंयुधयेसन्नयान्यदेवयून्तन्वा३शूशुजानान् ।
अमातेतुग्रंवृषभंपचानितीव्रंसुतंपञ्चदशंनिषिञ्चम् ॥ २ ॥

यदि । इत् । अहम् । युधये । सम्ऽनयानि । अदेवऽयून् । तन्वा । शूशुजानान् । अमा । ते । तुग्रम् । वृषभम् । पचानि । तीव्रम् । सुतम् । पञ्चऽदशम् । नि । सिञ्चम् ॥ २ ॥

यद्यदाहमित् अहमेव युधये युद्धार्थं अदेवयून् नदेवान्यष्टुमिच्छतः अयज्वनः संनयानि संगमयानि । कीदृशान् तन्वा स्वशरीरेण शूशुजानान् आत्मंभरित्वात् पुष्टिलक्षणया दीप्त्या युक्तान् पुष्टानित्यर्थः तदा हे इन्द्र अहं अमा ऋत्विगादिभिः सहितः ते तुभ्यं तुग्रं प्रेरकं बलिनं पीवानमित्यर्थः वृषभं सेचनसमर्थं पुंपशुं पचानि । किंच तीव्रं मदकरं रसं सुतं अभिषुतं पञ्चदशं प्रतिपत्प्रभृतिपञ्चदशसंख्याकासु तिथिषु शुक्लपक्षेऽपोत्तरवृद्ध्यापूर्णानि जायन्ते कृष्णपक्षेतु बद्धन्निहीयन्ते एवंभूतत्वात् पञ्चदशः सोमउच्यते तं यद्वा त्रिवृत्पञ्चदशस्तोमोपेतं माध्यंदिनसवनिकमित्यर्थः निषिंचं दशापवित्रेद्रोणकलशे चमसपात्रे अग्नौ च सिंचामि प्रक्षिपामीत्यर्थः ॥२॥

२. (ऋषि का कथन)—जो लोग देवानुष्ठान नहीं करते और केवल अपने उदर का पोषण करते हैं—जिस समय ऐसे लोगों के साथ मैं युद्ध करने जाता हूँ, उस समय, इन्द्र, तुम्हारे लिए, पुरोहितों के साथ, स्थूलकाय वृषभ का पाक करता हूँ। मैं पन्द्रह तिथियों में से प्रत्येक तिथि को (अथवा त्रिवृत्पञ्चदशस्तोत्रों से युक्त माध्यन्दिन सवन को) सोमरस प्रस्तुत करता हूँ।

नाहंतंवेदयइतिब्रवीत्यदेवयून्त्समरणेजघन्वान् ।
यदावाख्यत्समरणमृघावदादिद्धमेवृषभाप्रब्रुवन्ति ॥ ३ ॥

न । अहम् । तम् । वेद । यः । इति । ब्रवीति । अदेवऽयून् । सम्ऽअरणे । जघन्वान् । यदा । अवऽअख्यत् । सम्ऽअरणम् । ऋघाऽवत् । आत् । इत् । ह । मे । वृषभा । प्र । ब्रुवन्ति ॥ ३ ॥

योजनः अदेवयून् देवान्कामयमानान् देवद्विषोराक्षसादीन् समरणे संग्रामे जघन्वान् अहं हतवानिति ब्रवीति वदति तं तादृशं मद्व्यतिरिक्तं जनं अहं न वेद न जानामि । मत्तोन्यः संग्रामे शत्रूणां हन्ता नास्तीत्यर्थः । किञ्च यदा यस्मिन् काले समरणं संग्रामं अवाख्यत् अवाख्यत् न्यकृतमहं पश्यामि । कीदृशं ऋघावत् ऋघावन्तं परस्परं हिंसायुक्तं अ-

त्यंतक्रूरमित्यर्थः। आव तदानीं मे मम स्वभूतानि वृषभा वृषभकर्माणि दर्पतोवृषभस्येव विक्रांतकर्माणि प्रब्रुवन्ति विद्वज्जनाइतिशेषः इन्द्रेतीमौ पदपूरणौ ॥ ३ ॥

३. (इन्द्र की उक्ति)—मैंने ऐसा किसी को भी नहीं देखा, जो यह कहे कि, मैंने देवशून्य और देवकर्मशून्य व्यक्तियों को संग्राम में मारा है। जिस समय युद्ध में जाकर मैं उनका संहार करता हूँ, उस समय सब उस वीरत्व का, विस्तारित रूप से, वर्णन करते हैं।

यदज्ञातेषुवृजनेष्वासंविश्वेसतोमघवानोमआसन्।
जिनामिवेत्क्षेमआसन्तमाभुंप्रतंक्षिणांपर्वतेपादगृह्य ॥ ४ ॥

यत्। अज्ञातेषु। वृजनेषु। आसम्। विश्वे। सतः। मघऽवानः। मे। आसन्। जिनामि। वा। इत्। क्षेमे। आ। सन्तम्। आभुम्। प्र। तम्। क्षिणाम्। पर्वते। पादऽगृह्य ॥ ४ ॥

यद्यदा अज्ञातेषु शरीरवस्त्रास्त्रबलादिभिः अपरिज्ञातेषु वृजनेषु संग्रामेषु आसं अहं युद्धार्थमुपविशामि तदा विश्वे सर्वे मघवानो हविर्लक्षणतपोलक्षणधनवन्तऋषयः सतः एवं वर्तमानस्य मे ममेन्द्रस्य समीपे आसन् उपविशन्ति मम वीर्यवृद्ध्यर्थं मां स्तुवन्तस्तिष्ठन्तीत्यर्थः। अपिच क्षेमे जगत्पालने निमित्ते आसंतं आकारोभीत्यस्यार्थे वर्तते सर्वमभितः संतं आभुं महान्तं शत्रुं जिनामि वा विनाशयाम्येव नात्र विनाशे संशयः इदितिपूरणः। तं महान्तं शत्रुं पादगृह्य पादौ गृहीत्वा पर्वते गिरौ प्रदक्षिणां प्रहितवानस्मि प्रक्षिपामि ॥ ४ ॥

४. जिस समय मैं अनजानते सहसा युद्ध में प्रवृत्त होता हूँ, उस समय सारे ऋषि मुझे घेर लेते हैं। प्रजा के मंगल के लिए मैं सर्वत्र विहार करनेवाले शत्रु का पराभव करता हूँ—उसके पैर पकड़कर उसे पत्थर के ऊपर फेंक देता हूँ। अथ पञ्चमी—

नवाउमांवृजनेवारयन्तेनपर्वतासोयदहंमनस्ये।
मर्मस्वनात्क्रंधुकर्णोभयातएवेदनुद्यून्किरणःसमेजात् ॥ ५ ॥१५॥

न। वै। उँ इति। माम्। वृजने। वारयन्ते। न। पर्वतासः। यत्। अहम्। मनस्ये। मर्म। स्वनात्। क्रंधुऽकर्णः। भयाते। एव। इत्। अनु। द्यून्। किरणः। सम्। एजात् ॥ ५ ॥ १५ ॥

वैउ इत्येतैव वृजने संग्रामे मां युद्धार्थमुपस्थितं संतं न वारयन्ते केचिन्निवारयितुं समर्था न भवन्ति अहं यत्कर्म मनस्ये मनसा कर्तुमिच्छामि पर्वतासः अतितरणक्षमाहिमवदादयोगिरयः तत्कर्म मनसा सोढुं न शक्नुवन्तीत्यर्थः। किञ्च ममेन्द्रस्य स्वनात् शब्दादेव क्रंधुक-

र्णोनामासुरः यद्वा क्षुधुकर्णोह्रस्वकर्णः मंदश्रवणेन्द्रियोबधिरः स्थावरपिपीलिकादिरपि भयाते बिभेति। अपिच एवेत एवमेव क्षुधुकर्णवत् अनुद्यून् प्रतिदिनमित्यर्थः किरणः अन्तर्णीतम-त्वर्थमेतत् किरणवान्रश्मिवानादित्यः समेजात् सम्यक् कंपते चलति नियमेन प्रयातीत्यर्थः ॥५॥

५. युद्ध में मुझे निरुद्ध करनेवाला कोई नहीं है। यदि मैं चाहूँ, तो पर्वत भी मेरा निरोध नहीं कर सकें। जिस समय मैं शब्द करता हूँ, उस समय जिसका कान बधिर है, वह भी डर जाय अर्थात् उसके भी कर्ण-कुहर में वह शब्द पहुँच जाय। और तो और, किरणमाली सूर्य तक प्रतिदिन कांपते हैं। ॥ इति सप्तमस्य सप्तमे पञ्चदशोवर्गः ॥ १५ ॥

दर्शन्वत्रंशृतपाँअनिन्द्रान्बाहुक्षदःशरवेपत्यमानान्।
घृषुंवायेनिनिदुःसखायमध्यून्वेषुपवयोववृत्युः ॥ ६ ॥

दर्शन्। नु। अत्र। शृतऽपान्। अनिन्द्रान्। बाहुऽक्षदः।
शरवे। पत्यमानान्। घृषुम्। वा। ये। निनिदुः। सखायम्।
अधि। ऊँ इति। नु। एषु। पवयः। ववृत्युः ॥ ६ ॥

अत्रास्मिन्जगति शृतपान् शृतानि पक्वानि सोमादिहवींष्यपहृत्य पिबतः अनिन्द्रान् इ-न्द्रेण मया वर्जितान् बाहुक्षदः बाहुभिर्भजमानान् शकलीकुर्वतः शरवे हिंसार्थं पत्यमानान् अभिपततोऽसुरादीन् नु क्षिप्रं दर्शं अहमिन्द्रः पश्यामि एवं भूतेष्वेषु अधि उपरि पवयोमदी-यान्यायुधानि ववृत्युः वर्तन्ते। वाशब्दः समुच्चये। घृषुं महान्तं च सखायं सखिवत्प्रियं हितस्य कर्तारं मां ये निनिदुः निंदंति उइति समुच्चये एषु चोपरिमदीयान्यायुधानि नु क्षिप्रं वर्तन्ते ॥६॥

६. मैं इन्द्र हूँ। मुझे जो लोग नहीं मानते, जो लोग देवों के लिए प्रस्तुत सोमरस बलपूर्वक पी डालते हैं और जो बाहें भांजते हुए, हिंसा करने के लिए, आते हैं, उनको मैं तुरन्त देख लेता हूँ। मैं महान् हूँ; मैं सबका मित्र हूँ। जो लोग मेरी निन्दा करते हैं, उनके लिए मेरे वज्र का प्रहार होता है। अथ षष्ठी—

अभूर्वौक्षीर्व्युऽआयुरानट्दर्षन्नुपूर्वोअपरोनुदर्षत्।
द्वेपवस्तेपरितंनभूतोयोअस्यपारेरजसोविवेष ॥ ७ ॥

अभूः। ऊँ इति। औक्षीः। वि। ऊँ इति। आयुः। आनट्।
दर्षत्। नु। पूर्वः। अपरः। नु। दर्षत्। द्वे इति। पवस्ते इति।
परि। तम्। न। भूतः। यः। अस्य। पारे। रजसः। विवेष ॥७॥

अत्र मध्यमपुरुषेणेन्द्रस्योच्यमानत्वात् वसुक्रइन्द्रं स्तौति । उइत्यवधारणे । हे इन्द्र अभूः त्वमेव प्रादुर्भवसि औक्षीः कालेकाले त्वमेव पृथिवीं सिञ्चसि नान्यइत्यर्थः आनडित्यादौ सर्वत्र परोक्षनिर्देशे प्रत्यक्षीकरणार्थं मध्यमपुरुषेण प्रकृतत्वादेकवाक्यतायै युष्मच्छब्दसमानार्थोभवच्छब्दोध्याहर्तव्यः विइति वैविध्ये । उ इति वार्थे । आयुर्जीवितमुच्यते । इन्द्रोभवान्विविधमायुश्च आनट् व्याप्नोति आभूतसंप्लवाज्जीवतीत्यर्थः । किंच पूर्वः पुरातनोभवानिन्द्रः नु क्षिप्रं दर्षत् दृविदारणे सिब्बहुलं लेटि वज्रेण शत्रून् विदारयति अपरोन्यः शत्रुर्नुदर्षत् नु इति निषेधार्थेभवन्तमिन्द्रं नविदारयति भवानेव सर्वं शत्रुजातं हिनस्तीत्यर्थः । अपिच योभवानिन्द्रः अस्येदृशस्य रजसोलोकस्य त्रैलोक्यस्येत्यर्थः पारे परतः परमसूक्ष्मवायुरूपेण सृष्टिकारणात्मना स्थित्येत्यर्थः विवेप सर्वतोव्याप्नोति तमिन्द्रं द्वेइति सामर्थ्याद् द्यावापृथिव्यौ न परिभूतः नपरिभवतः अभिभवितुं न शक्नुवइत्यर्थः । कीदृश्यौ पवस्ते पवतिर्गतिकर्मा अस्मादौणादिकोस्तप्रत्ययः अतः अजाद्यतष्टाविति टापि कृते प्रथमाद्विवचने चैतद्रूपं भवति महत्त्वेन सर्वस्याभिभवनाय गच्छ्यौ यद्वा सर्वस्य प्रकर्षेणाच्छादयित्र्यौ रेफलोपश्छान्दसः ॥ ७ ॥

७. (ऋषि का कथन)—इन्द्र, तुमने दर्शन दिया; वृष्टि भी बरसाई। तुमने सुदीर्घ आयु प्राप्त की है। तुमने पहले भी शत्रु-विनाश किया था; पश्चात् भी किया था। इन्द्र सारे विश्व के अपर पार में हैं; सर्वव्यापक द्यावापृथिवी उनको नहीं माप सकते।

गावोयवंप्रयुताअर्योअक्षन्ताअपश्यंसहगोपाश्चरन्तीः ।
हवाइदर्योअभितःसमायन्कियदासुःस्वपतिश्छन्दयाते ॥ ८ ॥

गावः । यवम् । प्रऽयुताः । अर्यः । अक्षन् । ताः । अपश्यम् ।
सहऽगोपाः । चरन्तीः । हवाः । इत् । अर्यः । अभितः । सम् ।
आयन् । कियत् । आसु । स्वऽपतिः । छन्दयाते ॥ ८ ॥

गावोधेनवः प्रयुताः प्रकर्षेण मिश्रिताः परस्परेण सहभूताः यवं मद्वृष्टिजनितयवादि घासं अक्षन् अदंति भक्षयन्ति अर्यः सर्वस्य स्वाम्यहं ताः गाः अपश्यं पश्यामि । कीदृशीः सहगोपाः पशुपालकेन सहिताः चरन्तीः घासं भक्षयन्तीः एवंभूतास्ताः परया प्रीत्या पश्यामीत्यर्थः। किञ्च हवाः वाहनदोहनार्थमाह्वानार्हाः गावः अर्यः द्वितीयार्थे प्रथमा अर्यं स्वामिनं प्रति अभितः सर्वतः समायन् समित्येकीभावे एकीभूय आगच्छन्ति । इदितिपूरणः । आगतास्वासु गोषु स्वपतिः स्वानां गवां स्वामी कियत् क्षीरं छन्दयाते दोग्धुं कामयते मदर्थं दोग्धीरित्यर्थः। गावआशिरं दुहे इतिवचनात् ॥ ८ ॥

८. (इन्द्र की उक्ति)—अनेक गायें इकट्ठी होकर यव (जौ) खा रही हैं। मैं इन्द्र हूँ; स्वामी के समान मैं गायों की देख-भाल करता हूँ। मैं देखता

हूँ कि, वह चरवाहों के साथ चर रही हैं। बुलाने के साथ ही वह गायें अपने स्वामी के पास पहुँच गईं। स्वामी ने गायों से प्रचुर दूध का दोहन कर लिया है। अथ नवमी—

संयद्वयंयवसादोजनानामहंयवादउर्वज्रेअन्तः।
अत्रायुक्तोवसातारमिच्छादथोअयुक्तंयुनजद्ववन्वान् ॥ ९ ॥

सम्। यत्। वयम्। यवसऽअदः। जनानाम्। अहम्। यवऽअदः। उरुऽअज्रे। अन्तरिति। अत्र। युक्तः। अवऽसातारम्। इच्छात्। अथो इति। अयुक्तम्। युनजत्। ववन्वान् ॥ ९ ॥

अनया ऋषिरिन्द्रप्रसादलब्धं स्वस्य सार्वात्म्यं प्रकाशयति। जनानां लोकानां मध्ये ये यवसादः तृणस्यात्तारः पशवः ते वयमिति संसम्यक् जानीहि उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। ये च यवादः यवोपलक्षितस्यान्नस्यात्तारोमनुष्यास्तेपि वयमिति संजानीहि। वस्तुतस्तु उर्वज्रे विस्तीर्णे अजिरेंगणे हार्दाकाशरूपे यत् अंतः अंतर्यामिरूपं ब्रह्म तदहमस्मि अत्रास्मिन् हार्दाकाशे युक्तः समाहितोभवानिन्द्रः अवसातारं आत्मनः संभक्तारं इच्छात् इच्छति आत्मसाक्षात्कर्तुं। अथो अपिच अयुक्तं अयोगिनं ववन्वान् द्वितीयार्थे प्रथमा ववन्वतं अतिशयेन विषयान् सेवमानं पुरुषं युनजत् युनक्ति संसारे शापानुग्रहसमर्थोभवद्रूपोहमेवास्मीति भावः ॥ ९ ॥

९. (ऋषि की व्यापक अनुभूति)—संसार में जो तृण खानेवाले हैं, वह हम ही हैं। जो अन्न व यव खानेवाले मनुष्य हैं, वह भी हम ही हैं। विस्तृत हृदयाकाश में जो अन्तर्यामी ब्रह्म है, वह मैं ही हूँ। हृदयाकाश में रहनेवाले इन्द्र अपने सेवक को चाहते हैं। योग-शून्य और अतीव विषयी पुरुष को इन्द्र सन्मार्ग में लगाते हैं।

अत्रदुमेमंससेसत्यमुक्तंद्विपाच्चयच्चतुष्पात्संसृजानि।
स्त्रीभिर्योअत्रवृषणंपृतन्यादयुद्धोअस्यविभजानिवेदः॥१०॥१६॥

अत्र। इत्। ऊँ इति। मे। मंससे। सत्यम्। उक्तम्। द्विऽपात्। च। यत्। चतुःऽपात्। सम्ऽसृजानि। स्त्रीभिः। यः। अत्र। वृषणम्। पृतन्यात्। अयुद्धः। अस्य। वि। भजानि। वेदः॥१०॥१६॥

मे मम अत्रास्मिन्स्तोत्रे उक्तं मया कथितं सत्यमिव यथा भूतमेव मंससे त्वं जानीहि अर्थवादरूपेणनैतदध्यारोपितमित्यर्थः। उइति पूरणः। किञ्च द्विपाच्च मनुष्यादिकं च चतुष्पाच्च पश्वादिकं च यत्स्थावरजंगमात्मकं जगत्संसृजानि अहमुत्पादयामीति अत्रास्मिञ्जगति

स्त्रीभिः स्त्रीसदृशैर्बलादिहीनैः पुरुषैः सह यः शूरंमन्योजनः वृषणंअभिलषितस्य वर्षितारं मां परित्यज्येति शेषः। पृतन्याव युद्धं कर्तुमिच्छति अहं अस्येदृशस्य स्वभूतं वेदोधनं अयुद्धः तेन पुरुषेणायोद्धासन् बलादपहृत्य विभजामि स्तोतृभ्योयद्वृभ्यश्च ददामीत्यर्थः ॥१०॥

१०. (इन्द्र का कथन)—मैं यहाँ जो कहता हूँ, वह सत्य है—निश्चय जानो। द्विपद (मनुष्य) और चतुष्पद (पशु)—सबकी सृष्टि मैं करता हूँ। जो व्यक्ति स्त्रियों के साथ पुरुष को युद्ध करने को भेजता है, उसका धन, बिना युद्ध के ही, हर कर मैं भक्तों को दे देता हूँ।

॥ इति सप्तमस्य सप्तमे षोडशोवर्गः ॥ १६ ॥

यस्यानक्षादुहिताजात्वासकस्तांविद्वाँअभिमन्यातेअन्धाम् ।
कतरोमेनिंप्रतितंमुचातेयईंवहातेयईंवावरेयात् ॥ ११ ॥

यस्य । अनक्षा । दुहिता । जातु । आस । कः । ताम् । विद्वान् । अभि । मन्याते । अन्धाम् । कतरः । मेनिम् । प्रति । तम् । मुचाते । यः । ईम् । वहाते । यः । ईम् । वा । वरेऽयात् ॥ ११ ॥

यस्येन्द्रस्य मम कारणरूपेणावस्थितस्य अनक्षा अक्षिवर्जिता दर्शनहीना अचेतनेत्यर्थः दुहिता प्रकृत्याख्या जातु कदाचित् आस असतेर्गत्यर्थस्य लिटि रूपं सामर्थ्यात् महाप्रलये मय्येव लीना सती सर्वत्र वर्तते। तां प्रकृतिं विद्वान् मय्येव लीनां जानन् मत्तोन्योदेवः कोभवति न कोपीत्यर्थः। अपिच अंधां दर्शनहीनामचेतनां तां अभिमन्याते आत्मन्याश्रयप्रदानेन कोदेवोभिपूजयति यद्वा क्षीरोदकवत् घटाकाशवच्च मया सहैकीभूतां तां आभिमुख्येन कोजानाति अहमेव सर्वज्ञः स्वात्मन्याश्रयप्रदानेनाभिपूजयामि मया सहैकीभूतां तां तत्वतोहमेव जानामि नान्यइति। किञ्च कतरोदेवः मेनिं वज्रं तं प्रसिद्धं वृत्रादिशत्रुं प्रतिमुचाते मुंचति स्वयमेव प्रश्नमुत्थाप्येदानीं प्रतिब्रूते योदेवईमेनं शत्रुं वहाते वहति अपिवा यईमेनं वरेयात् वारयितुमिच्छति सचाहमेव नान्योमत्सदृशोस्तीत्यर्थः ॥ ११ ॥

११. जिस-किसी की भी अन्धी कन्या को कौन बुद्धिमान् आश्रय देगा? जो उसका वहन करता है और जो उसका वरण करता है, उसकी हिंसा कौन करेगा?

अथ द्वादशी—

कियतीयोषामर्यतोवधूयोःपरिप्रीतापन्यसावार्येण ।
भद्रावधूर्भवतियत्सुपेशाःस्वयंसामित्रंवनुतेजनेचित् ॥ १२ ॥

कियती । योषा । मर्यतः । वधूऽयोः । परिऽप्रीता । पन्यसा ।
वार्येण । भद्रा । वधूः । भवति । यत् । सुऽपेशाः । स्वयं । सा ।
मित्रम् । वनुते । जने । चित् ॥ १२ ॥

कियती किं परिमाणा योषा स्त्रीजातिः मर्यतोमनुष्यसंबंधिनोभोगानाचरतः वधूयोः स्त्रीकामस्य सर्वात्मकस्यान्तर्यामिरूपेणावस्थितस्येन्द्रस्य परिप्रीता अनुरक्ता वशवर्तिनीत्यर्थः। कीदृशस्य वार्येण वरणीयेन पन्यसा स्तोत्रेण स्तुतस्य सतइतिशेषः।अपिच यत् या वधूः भद्रा कल्याणी सुपेशाः शोभनरूपा च भवति सा द्रौपदीदमयन्त्यादिका वधूः स्वयमात्मनैव जने चित् जनमध्येवस्थितमपि मित्रं प्रियमर्जुननलादिकं पतिं वनुते याचते स्वयंवरधर्मेण प्रार्थयते सच प्रीयमाणोवरजनोहमेवेत्यभिप्रायः । रूपंरूपंप्रतिरूपोबभूवेतिमंत्रलिंगात्सर्वात्मकत्वादिति ॥ १२ ॥

१२. कितनी ऐसी स्त्रियाँ हैं, जो केवल द्रव्य से ही प्रसन्न होकर स्त्री चाहनेवाले पुरुष के ऊपर आसक्त होती हैं। जो स्त्री भद्र व सभ्य है, जिसका शरीर सुसंगठित है, वह अनेक पुरुषों में से अपने मन के अनुकूल प्रिय पात्र को पति स्वीकृत करती है।

पत्तोजगारप्रत्यञ्चमत्तिशीर्ष्णाशिरःप्रतिदधौवरूथम् ।
आसीनऊर्ध्वामुपसिक्षिणातिन्यङ्ङुत्तानामन्वेतिभूमिम् ॥ १३ ॥

पत्तः । जगार । प्रत्यञ्चम् । अत्ति । शीर्ष्णा । शिरः । प्रति ।
दधौ । वरूथम् । आसीनः । ऊर्ध्वाम् । उपसि । क्षिणाति ।
न्यङ् । उत्तानाम् । अनु । एति । भूमिम् ॥ १३ ॥

अत्रादित्यात्मनेन्द्रः स्तूयतेतदंशत्वात् आदित्यरूपीन्द्रः पत्तः रश्म्याख्यैः पादैः जगार वृष्टिलक्षणमुदकं गिरति गृह्णातिवा ।गृहीत्वा च प्रत्यञ्चं आत्मानं प्रतिगतमुदकमत्ति भक्षयति मंडले अवस्थापयतीत्यर्थः। तदनंतरं वरूथं वरणीयं वृष्टिलक्षणमुदकं शीर्ष्णा शिरःस्थानीयेन रश्मिजालेन शिरः सर्वस्य लोकस्य मस्तकं प्रतिदधौ दधाति प्रतिक्षिपतीत्यर्थः। किञ्च उपसि उपस्थे स्वसमीपस्थाने मण्डले आसीनउपविष्टः सन् ऊर्ध्वामुद्गतां स्वदीप्तिं क्षिणाति हिनस्ति आलोककरणाय प्रक्षिपतीत्यर्थः न्यङ् रश्मिसमूहरूपेण नीचैरञ्चिता गन्ता सन् उत्तानां विस्तृतां भूमिं अन्वेति अनुगच्छति ॥ १३ ॥

१३. सूर्यदेव किरण के द्वारा प्रकाश का उद्गिरण करते हैं, अपने मंडल में स्थित प्रकाश का ग्रास करते हैं और अपने मस्तक को ढकनेवाली किरणों को लोगों के मस्तकों पर फेंकते हैं। ऊपर स्थित होकर वह अपने

१ ऋ० सं० ४. ७. ३३.।
२ प्रत्यञ्चं प्रतिकूलगन्तारमुदकसंघमत्तीति तस्यैव विशदीकरणं वरूथं तापनिवारकं तत्।

पास में प्रकाश फेंकते हैं और नीचे पृथिवी पर आलोक का विस्तार करते हैं।

बृहन्नच्छायोअपलाशोअर्वातस्थौमातावितोअत्तिगर्भः ।
अन्यस्यावत्सरिहतीमिमायकयाभुवानिदधेधेनुरूधः ॥ १४ ॥

बृहन् । अच्छायः । अपलाशः । अर्वा । तस्थौ । माता ।
वितोसितः । अत्ति । गर्भः । अन्यस्याः । वत्सम् । रिहती ।
मिमाय । कया । भुवा । नि । दधे । धेनुः । ऊधः ॥ १४ ॥

वसुक्रः अनयादित्यात्मानमिन्द्रं स्तौति । बृहन्महानादित्यः अच्छायः छायावर्जितः तमोरहितइत्यर्थः अपलाशः पर्णरहितः पराशदनवर्जितोविनाशरहितइत्यर्थः । अर्वा सततगामी तस्थौ तिष्ठति । किञ्च माता वृष्टिप्रदानद्वारेण सर्वस्य जगतोनिर्माता वितोविमुक्तः निरालंबनइत्यर्थः गर्भः त्रैलोक्यस्य गर्भभूतः आदित्यात्मेन्द्रः अत्ति हवींषि भक्षयति । यद्वा अनेन विनाशः लक्ष्यते पापानि नाशयति किं अन्यस्याः अदितिरूपायादेवमातुः वत्समपत्यभूतं आदित्यं रिहती आस्वादयन्ती उपजीवन्ती वर्धयन्ती मिमाय निर्मिमीते पूर्वस्यां दिश्यहन्यहनि उत्पादयतीत्यर्थः । कया भुवा केन भावेनाभिप्रायेण भक्त्या भयेन चेत्यर्थः धेनुर्द्यौः तं उदकस्याधारत्वात् क्षरितृत्वाच्च ऊधःस्थानीयमादित्यं निदधे स्थापयति यद्वा धेनुर्गौः ऊधोयथा तद्वदादित्यं द्यौर्धारयति ॥ १४ ॥

१४. जैसे पत्र-हीन वृक्ष की छाया नहीं रहती, वैसे ही इन प्रकाण्ड और विचरणशील सूर्य की छाया नहीं है। द्युलोकस्वरूप माता स्थिर होकर बोली—"सूर्यस्वरूप गर्भस्थ शिशु पृथक् होकर दुग्ध का पान करते हैं। यह (द्युलोक-रूपिणी) गाय दूसरी गाय (अदिति) के बछड़े को, प्रेम के साथ, चाटकर स्थापित करती है। इस गाय ने अपने स्तन को रखने का स्थान कहाँ पाया?

सप्तवीरासोअधरादुदायन्नष्टोत्तरात्तात्समजग्मिरन्ते ।
नवपश्चातांस्थिविमन्तआयन्दशप्राक्सानुविरिरन्त्यश्नः॥१५॥१७॥

सप्त । वीरासः । अधरात् । उत् । आयन् । अष्ट । उत्तरात्तात् ।
सम् । अजग्मिरन् । ते । नव । पश्चतात् । स्थिविमन्तः ।
आयन् । दश । प्राक् । सानु । वि । तिरन्ति । अश्नः ॥ १५ ॥ १७ ॥

अनयेन्द्रः प्रजापतिरूपेण स्तूयते सप्त सप्तसंख्याकाः वीरासः प्रजापतेः पुत्राविश्वामित्रादयः अधरात् प्रजापतेरधः कायादुदायन् उत्पन्नायभूयुः अष्ट अष्टसंख्याकास्ते प्रसिद्धाः वालखिल्यादयः उत्तरात्तात् उत्तरात्कायप्रदेशात् समजग्मिरन् संजज्ञिरे । स्थविमन्तः स्थानवन्तः नव नवसंख्याकाभृगवः पश्चात्तात् पृष्ठतः आयन् आगताउत्पन्नाइत्यर्थः । तथा दश दशसंख्याकाअङ्गिरसः प्राक् अग्रतउत्पन्नाः सन्तः अश्नः अशनवतोद्युलोकस्य सानु उन्नतप्रदेशं वितिरन्ति वर्धयन्ति । अपरआह सप्तसंख्योपेतावीरामरुतः अधरात् इन्द्रस्य दक्षिणभागात् उदगमन् अष्टसंख्याकास्ते मरुतः उत्तरभागात्संगच्छन्ते स्थानवन्तो नवसंख्याकास्ते मरुतः पृष्ठभागादागच्छन्ति दशसंख्याकास्ते अश्नः अशनवन्तइन्द्रस्य प्राक्प्रदेशस्थिताः समुच्छ्रितमुदकं तेजोवा वितरन्ति मरुतः प्रतिदिशमवस्थाय इन्द्रस्य सहायं कुर्वन्तीत्यर्थः ॥ १५ ॥

१५. इन्द्र-रूप प्रजापति के शरीर से विश्वामित्र आदि सात ऋषि उत्पन्न हुए। उनके उत्तरी शरीर से बालखिल्य आदि आठ उत्पन्न हुए। पीछे से भृगु आदि नौ उत्पन्न हुए। अङ्गिरा आदि दस आगे से उत्पन्न हुए। ये भोजन (यज्ञांश का भक्षण) करनेवाले द्युलोक के उन्नत प्रदेश की संवर्द्धना करने लगे। ॥ इति सप्तमस्य सप्तमे सप्तदशोवर्गः ॥ १७ ॥

दशानामेकंकपिलंसमानंतंहिन्वन्तिक्रतवेपार्याय ।
गर्भंमातासुधितंवक्षणास्वेनन्तंतुषयन्तीबिभर्ति ॥ १६ ॥

दशानाम् । एकम् । कपिलम् । समानम् । तम् । हिन्वन्ति । क्रतवे । पार्याय । गर्भम् । माता । सुऽधितम् । वक्षणासु । अवेनन्तम् । तुषयन्ती । बिभर्ति ॥ १६ ॥

दशानां दशसंख्याकानां पूर्वोक्तानामेवाङ्गिरसां मध्ये एकं मुख्यं कपिलं एतन्नामानं तं प्रसिद्धमृषिं कीदृशं समानं सदृशं केन सामर्थ्यात्प्रजापतिना हिन्वन्ति अवशिष्टाअङ्गिरसः प्रेरयन्ति । किमर्थं क्रतवे यज्ञादिजगत्प्रवर्तनकर्मणे यद्वा सम्यक् ज्ञानलक्षणप्रज्ञानाय । कीदृशाय पार्याय परिसमापयितव्याय प्रणेतव्याय वा यज्ञादिकर्मणोपदेशनायेत्यर्थः माता प्रकृत्याख्या च वक्षणासु वक्षणाइति नद्यउच्यन्ते ताभिश्चात्रापोलक्ष्यन्ते प्रकृतिस्थासु सूक्ष्मास्वप्सु सुधितं सुहितं प्रजापतिना स्थापितमित्यर्थः अवेनन्तं वेनतिः कान्तिकर्मा गतिनिवासप्रकाशयमानं तादृशं प्रजापतेः गर्भं तुषयन्ती तुष्यंती सम्यक् ज्ञानान्युपदेष्टुं योग्योयमिति प्रीता सती बिभर्ति प्रजापतेर्नियोगाद्धारयति ॥ १६ ॥

१६. दस अङ्गिरा लोगों में एक पिङ्गलवर्णवाले (कपिल) हैं। उन्हें यज्ञ की साधना के लिए प्रेरित किया गया। सन्तुष्ट होकर माता ने जल में गर्भाधान किया।

पीवानंमेषमंपचन्तवीरान्युप्ताअक्षाअनुंदीवआसन् ।
द्वाधनुंबृहतींमप्स्व१न्तःपवित्रंवन्ताचरतःपुनन्ता ॥ १७ ॥

पीवानम् । मेषम् । अपचन्त । वीराः । निऽउप्ताः । अक्षाः । अनु । दीवे । आसन् । द्वा । धनुम् । बृहतीम् । अप्ऽसु । अन्तरिति । पवित्रंऽवन्ता । चरतः । पुनन्ता ॥ १७ ॥

वीराः प्रजापतेः पुत्राः अङ्गिरसः पीवानं स्थूलं मेदोमांसादियुक्तमित्यर्थः मेषं अजं अपचन्त प्रजापतिरूपस्येन्द्रस्यार्थाय पक्तवन्तोभवन् पशुयागं कुर्वन्तइत्यर्थः ।किञ्च लुप्तोपममेतत् । यथा देवानां अक्षाः दीवे देवने रमणस्थाने न्युप्ताः निक्षिप्ताः सन्तः अन्वासन् संक्रीडमानयोर्द्वयोरेकतरस्यानुगताभवन्ति तथा सर्वेङ्गिरसः प्रजापतेरनुगताभवन्ति । द्वा अङ्गिरसां मध्ये द्वावङ्गिरसौ धनुं धनुशब्दोत्र धनुःशब्दपर्यायोधनपर्यायोवा धनुर्यथा वधसाधनं तथा अज्ञानादिवधसाधनं धनवत् प्रीतिकरं वा कपिलमित्यर्थः बृहतीं प्रजापतेराज्ञयावर्धयित्रीं प्रकृतिं अप्सु अन्तः प्रकृतिस्थानां सूक्ष्माणामुदकानां मध्ये चरतः प्रजापत्यादेशादाराधयतः । कीदृशौ पवित्रवन्ता पवित्रवन्तौ मन्त्रः पवित्रमुच्यते ध्यानसाधनप्रणवमन्त्रवन्तौ पुनंता पुनन्तौ शुद्धौ प्रणवध्यानेनात्मानं संस्कुर्वंतावित्यर्थः ॥ १७ ॥

१७. प्रजापति के पुत्र अङ्गिरा लोगों ने मोटे-मोटे मेष (अज) को पाया। पाशा-क्रीड़ा-स्थान में पाश फेंके गये। इनमें से दो प्रकाण्ड धनु लेकर, मंत्रोच्चारण के द्वारा, अपने शरीर को शुद्ध करते-करते, जल के बीच विचरण करने लगे।

अथाष्टादशी—

विक्रोशनासोविष्वंचआयन्पचांतिनेमोंनहिपक्षंदर्धः ।
अयंमेदेवःसवितातदाहद्वन्नइद्वनवत्सर्पिरन्नः ॥ १८ ॥

वि । क्रोशनासः । विष्वञ्चः । आयन् । पचांति । नेमः । नहि । पक्षत् । अर्धः । अयम् । मे । देवः । सविता । तत् । आह । द्वऽअन्नः । इत् । वनवत् । सर्पिःऽअन्नः ॥ १८ ॥

विक्रोशनासः विविधं प्रजापतिंपितरमाह्वयन्तः विष्वञ्चः नानागतयोनानापूजनाया सर्वेऽङ्गिरसआयन् आगच्छन् प्रजापतेः सकाशादुत्पन्नाइत्यर्थः। उत्पद्यमानो नेमः अर्धः अङ्गिरसां मध्ये एकोभागः पचति प्रजापत्यर्थं हवींषि पचति अर्धः अपरोभागः नहि पक्षत् नहि पचति। एतत्सर्वं कथमज्ञायि उच्यते—अयमीदृशोदेवः द्योतमानः सविता सर्वस्य प्रेरकः आदित्योवा प्रजापतिर्वा मे मह्यं तत्सर्वं यथोक्तमाह। किञ्च सर्पिरन्नः घृतौदनः द्रुन्नः इव दार्वोदनोऽग्निरपि वनवत् हविर्द्वारेण प्रजापतिं वनति संभजते॥ १८॥

१८. चीत्कार करनेवाले और नाना गति अङ्गिरा लोग प्रजापति से उत्पन्न हुए। उनमें आधे लोग, प्रजापति के लिए, हवि का पाक करते हैं और आधे नहीं। इन बातों को सूर्यदेव ने मुझसे कहा है। काष्ठान्न और घृतौदन अग्नि प्रजापति का भजन करते हैं।

अपश्यंग्रामंवहमानमारादचक्रयास्वधयावर्तमानम्।
सिषक्त्यर्यःप्रयुगाजनानांसद्यःशिश्नाप्रमिनानोनवीयान्॥ १९॥

अपश्यम्। ग्रामम्। वहमानम्। आरात्। अचक्रया। स्वधया।
वर्तमानम्। सिसक्ति। अर्यः। प्र। युगा। जनानाम्।
सद्यः। शिश्ना। प्रऽमिनानः। नवीयान्॥ १९॥

अपश्यं वसुकोहं प्रजापतिरूपमिन्द्रं सम्यक् ज्ञानेन दृष्टवानस्मि। कीदृशं ग्रामं भूतसंघं वहमानं वाहयन्तं सृजन्तमित्यर्थः। कुतः आराद् दूराद् उपादानकारणात् प्रकृतितइत्यर्थः अचक्रया चक्रवर्जितया रथहीनया स्वधया स्वयमात्मानं धारयन्त्या सेनया वर्तमानमागच्छन्तं एवंभूतमपश्यमित्यर्थः। किञ्च अर्यः सर्वस्य स्वामीन्द्रः जनानां यजमानानां कार्यत्वेन संबंधिनः युगा युग्मानि यज्ञकालविशेषान् प्रसिषक्ति प्रकर्षेण सेवते। कीदृशः सद्यस्तदानीमेव शिश्ना शिश्नानि शिश्नं श्रथतेरितिनिर्वचनात् श्रथितॄणि ताडयितॄणि राक्षसादिवृन्दानि प्रमिनानः प्रकर्षेण हिंसन् नवीयान् शरीरेण च बलपौरुषनयनादिभिश्च नवतरः॥ १९॥

१९. देखा, अनेक लोग दूर से आते हैं। वे स्वयंसिद्ध आहार के द्वारा प्राण को धारण करते हैं। उनके प्रभु दो-दो व्यक्तियों को योजित करते हैं। उनकी अवस्था नई है। वे तुरंत शत्रु-संहार करते हैं।

अथ विंशो—

एतौमेगावौप्रमरस्ययुक्तौमोषुप्रसेधीर्मुहुरिन्ममन्धि।
आपश्चिदस्यविनशन्त्यर्थंसूरश्चमर्कउपरोबभूवान्॥ २०॥ १८॥

---

१ नि० ४. १९.।

एतौ । मे । गावौ । प्रऽमरस्य । युक्तौ । मो इति । सु । प्र । सेधीः ।
मुहुः । इत् । मम्न्धि । आपः । चित् । अस्य । वि । नशन्ति ।
अर्थम् । सूरः । च । मर्कः । उपरः । बभूवान् ॥ २० ॥ १८ ॥

कार्यकारणयोरुपचारात् आत्मावैपुत्रनामासीतिवचनात् चेन्द्ररूपेणावस्थितस्य प्रमरस्य प्रकर्षेण शत्रूणां मारयितुः मे मम स्वभूतौ एतावेतादृशौ युक्तौ सुष्ठुपूजितौ गावौ शत्रून् यज्ञांश्च प्रतिगन्तारौ हरी मोप्रसेधीः स्तुत्युपसंहारकरणेन अस्मद्यज्ञात् मागमय । किं तर्हि मुहुरित् मुहुर्मुहुः ममन्धि पुनःपुनः स्तुहि ममात्मन्नित्यर्थः । आपश्चिद्वृष्टिलक्षणान्युदकान्यपि अस्येन्द्रस्यार्थं गतिं विनशन्ति विनशतिर्व्याप्तिकर्मा व्यामुवन्ति । तथा सूरश्च सूर्यश्च व्यामोति । कीदृशः मर्कः मार्जयिता सर्वस्य शोधयिता उपरः मेघसदृशः बभूवान् भवन् मेघवच्छीघ्रगतिः सन्नित्यर्थः ॥ २० ॥

२०. मेरा नाम प्रमर या मारक है । मेरे ये दो वृषभ योजित हुए हैं । इनको ताड़ना मत करो । इन्हें बार-बार सान्त्वना दो । इनका धन जल में नष्ट होता है । जो वीर गायों का शोधन करना जानता है, वह ऊपर उठता है । ॥ इति सप्तमस्य सप्तमेष्टादशोवर्गः ॥ १८ ॥

अयंयोवज्रःपुरुधाविवृत्तोवःसूर्यस्यबृहतःपुरीषात् ।
श्रवइदेनापरोअन्यदस्तितदव्यथीजरिमाणस्तरन्ति ॥ २१ ॥

अयम् । यः । वज्रः । पुरुधा । विऽवृत्तः । अवः । सूर्यस्य । बृहतः ।
पुरीषात् । श्रवः । इत् । एना । परः । अन्यत् । अस्ति ।
तत् । अव्यथीः । जरिमाणः । तरन्ति ॥ २१ ॥

योयं वज्रइन्द्रस्य स्वभूतः सूर्यस्यादित्यस्य बृहतोमहतःपुरीषात् पूरकात् मण्डलात् अवः अवस्तात् अधोभागे स्थितेषु पुरुधा बहुप्रकारेण विवृत्तः वृष्ट्यर्थं प्रवृत्तः पतितः इच्छब्दोप्यर्थे तच्छब्दश्रुतेर्यच्छब्दोध्याहार्यः परः परस्तात् अन्तरिक्षलोकस्योपरिस्थिते सूर्यमण्डले स्थितं एना एनत् श्रवइत्यन्ननाम तद्धेतुत्वात् उदकं श्रवइत्युच्यते यद्यप्युदकं मेघोदरगतादुदकादन्यदप्यस्ति अव्यथी व्यथारहिताः जरिमाणः स्तोतारोमरुदादयः तत्तादृशमुदकं तरन्ति अन्तरिक्षलोकं प्रत्यवतारयन्ति ॥ २१ ॥

२१. यह वज्र प्रकाण्ड सूर्य-मंडल के नीचे, घोर वेग से, नीचे गिरता है । इसके अनन्तर और भी स्थान है । जो स्तोता हैं, वे अनायास उस स्थान का पार पा जाते हैं ।

अथ द्वाविंशी—

वृक्षेवृक्षेनियतामीमयद्गौःततोवयःप्रपतान्पूरुषादः ।
अथेदंविश्वंभुवनंभयातइन्द्रायसुन्वदृषयेचशिक्षत् ॥ २२ ॥

वृक्षेऽवृक्षे । निऽयता । मीमयत् । गौः । ततः । वयः । प्र । पतान् ।
पुरुषऽअदः । अथ । इदम् । विश्वम् । भुवनम् । भयाते ।
इन्द्राय । सुन्वत् । ऋषये । च । शिक्षत् ॥ २२ ॥

वृक्षेवृक्षे सर्वस्मिन्वृक्षमये धनुषि नियता संबद्धा गौः गोसंबंधिनी स्नायुमती मौर्वी मीमयत् मीमयतिः शब्दकर्मा आकृष्यमाणा सती शब्दं करोति । ततस्तस्माद्धनुषः पुरुषादः शत्रुजनानामत्तारोमारयितारइत्यर्थः वयः पक्षिसदृशाः गन्तारोबाणाः प्रपतान् शत्रूनभि प्रपतन्ति । अथ तदानीं इन्द्रायेन्द्रार्थं सुन्वत् सोमयागं कुर्वत् ऋषये च शिक्षत् कर्मणां द्रष्ट्रेऋत्विजे च संपूर्णां दक्षिणां ददद्पि इदमीदृशं विश्वं समस्तं भुवनं भूतजातं भयाते इन्द्राद्बिभेति अन्यत्किमतेत्यर्थः ॥ २२ ॥

२२. प्रत्येक वृक्ष (काष्ठ-निर्मित धनुष) के ऊपर गौ अर्थात् गाय के स्नायु से निर्मित प्रत्यञ्चा शब्द करती है । शत्रु-भक्षण-करी बाण निकलते हैं । इससे सारा संसार डरता है । सब लोग इन्द्र को सोम देते हैं । ऋषि भी उसकी शिक्षा प्राप्त करते हैं ।

अथ त्रयोविंशी—

देवानांमानेंप्रथमाअतिष्ठन्कृन्तत्रादेषामुपराउदायन् ।
त्रयस्तपन्तिपृथिवीमनूपाद्वाबृबूकंवहतःपुरीषम् ॥ २३ ॥

देवानाम् । माने । प्रथमाः । अतिष्ठन् । कृन्तत्रात् । एषाम् ।
उपराः । उत् । आयन् । त्रयः । तपन्ति । पृथिवीम् ।
अनूपाः । द्वा । बृबूकम् । वहतः । पुरीषम् ॥ २३ ॥

देवानां सर्वेषां माने निर्माणे सृष्टिकाले इत्यर्थः जगत्स्थितिहेतुभूतरसानुपदानकर्मणि सहव्यत्वेन प्रथमा अतिष्ठन् इन्द्रादेशादेते पूर्वे स्थिताः कथते मेघाः कुतएतदवगम्यते परस्मिन्नादे तेषामनुकथनात् । उक्तंहि—मेघाएवमाध्यमिकादेवगणाइति । एषामेवं भूतानां मेघानां

छेदनाद् छेदनाद् उपराः मेघनामैतद् तत्रस्था आपउच्यन्ते मेघस्थाआपः उदायन् उत्पन्नाः वृष्टिभावेन भूमौ निपातिताइत्यर्थः। पातितास्वप्सु इन्द्रस्याज्ञया पर्जन्योवायुरादित्यइत्येते त्रयोदेवाः पृथिवीं भूमिं तत्रस्थाओषधीरित्यर्थः तपन्ति वृष्टिशीतोष्णैः सन्तापयन्ति पाचयन्तीत्यर्थः। कीदृशाः अनूपाः वर्षादीनामानुपूर्व्येण व्यापारः प्रभावयितारः प्रक्षेप्तारइत्यर्थः द्वा द्वौ वाय्वादित्यौ पाचितास्वोषधीषु स्थितं पुरीषं सर्वस्य पालयितृ प्रीणयितृ वा बृबूकं उदकं आदित्यमण्डलं प्रति वहत वायुः शोषयन् आदित्योरश्मिभिराददानइत्यर्थः ॥ २३ ॥

२३. देवों के सृष्टि-काल में प्रथम मेघ देखे गये। इन्द्र ने मेघ का छेदन किया, जिससे जल निकला। पर्जन्य, वायु और सूर्य—ये तीन उद्भिज्जों का परिपाक करते हैं। वायु और सूर्य प्रीतिकर जल का वहन करते हैं।

अथ चतुर्विंशी—

सानेजीवातुरुततस्यविद्धिमास्मैतादृगपगूहःसमर्ये।
आविःस्वःकृणुतेगूहतेबुसंसपादुरस्यनिर्णिजोनमुच्यते॥२४॥१९॥

सा। ने। जीवातुः। उत। तस्य। विद्धि। मा। स्म। एतादृक्।
अप। गूहः। सऽमर्ये। आविः। स्व१रितिस्वः। कृणुते। गूहते।
बुसम्। सः। पादुः। अस्य। निःऽनिजः। न। मुच्यते ॥ २४ ॥१९॥

अत्रान्तरात्मनेन्द्रः स्तूयते। हे अन्तरात्मन् ते तव सा तादृशी आदित्यात्मिका देवता जीवातुः जीविका जीवनहेतुः उतापि च तस्यादित्यस्य च एतादृक् ईदृशं स्वरूपं समर्ये संग्रामवाची समर्यशब्दोअत्र यज्ञवाची यज्ञे विद्धि जानीहि स्तुत्यत्वेनेतिशेषः। मास्मापगूहः मा खल्वपवृणोः। किञ्च निर्णिजः सर्वस्य शोधयितुरस्यादित्यस्य सपादुः तच्च पादनं गमनं रश्मिद्वारेण गत्वा स्वः सर्वं त्रैलोक्यं आविष्कृणुते प्रकाशीकरोति। बुसमुदकं गूहते संवृणोति आदत्ते इत्यर्थः। अस्मै प्रयोजनद्वयायादित्येन निर्वेदनाद् श्रमेणवा गमनं न मुच्यते नकदाचित्परित्यज्यतइत्यर्थः ॥ २४ ॥

२४. सूर्य ही तुम्हारे (ऋषि के) प्राणाधार हैं। यज्ञ के समय सूर्य के उस प्रभाव का वर्णन और स्तवन करना। सूर्य ने स्वर्ग का प्रकाश किया है। सूर्य शोषण करते हैं। वे परिष्कारक हैं। वे अपनी गति का कभी त्याग नहीं करते।

॥ इति सप्तमस्य सप्तमे एकोनविंशोवर्गः ॥ १९ ॥

विश्वोहीति द्वादशर्चं द्वादशं सूक्तं त्रैष्टुभं इन्द्रवसुकयोः पितापुत्रयोः संवादोत्रक्रियते। पुरा वसुके यज्ञं कुर्वाणे सति इन्द्रः प्रच्छन्नरूपआजगाम तं वसुकपत्नीन्द्रागमनकांक्षिणी विप्रकृष्टमिवाधया अस्तौत्। अतस्तस्याः साऋषिरिन्द्रोदेवता। अथ तस्याः प्रीत्यै वसु-

क्रेण सहेन्द्रः संवादमकरोद् द्वितीयादियुजः चतुर्थीरहिताः पञ्चर्चइन्द्रवाक्यानि । अतस्तासां सऋषिः । यद्यप्यासु वसुक्रः संबोध्यत्वाद्देवता तथापि ताऋचः ऐन्द्रे कर्मणि विनियोक्तव्याः इन्द्रलिंगसद्भावात् । चतुर्थीसहिताः शिष्टाः तृतीयाद्यावसुक्रवाक्यानि । अतः सऋषिः तासामिन्द्रोदेवता । तथाचानुक्रान्तम्—विश्वोहिद्वादशेन्द्रवसुक्रयोः संवादऐन्द्रः सूक्तस्य प्रथमयेन्द्रस्य स्तुपा परोक्षवदिन्द्रमाहेन्द्रस्य युजः शेषाऋषेश्चतुर्थीति । गतोविनियोगः ।

तत्र प्रथमा—

विश्वोह्यन्योअरिराजगाममममेदहःश्वशुरोनाजगाम ।
जक्षीयाद्धानाउतसोमंपपीयात्स्वाशितःपुनरस्तंजगायात् ॥ १ ॥

विश्वः । हि । अन्यः । अरिः । आऽजगाम । मम । इत् । अह । श्वशुरः । न । आ । जगाम । जक्षीयात् । धानाः । उत । सोमम् । पपीयात् । सुऽआशितः । पुनः । अस्तम् । जगायात् ॥ १ ॥

अनया वसुक्रपत्नीन्द्रं स्तौति—अन्यइन्द्रव्यतिरिक्तः अरिः अर्यः ईश्वरः विश्वोहि सर्वएव देवगणआजगाम अस्मद्यज्ञं प्रत्याययौ । इदित्यवधारणे अहेत्यद्भुते । सर्वदेवगणे आगते सति ममैव श्वशुरः इन्द्रोनाजगाम सइन्द्रोयद्यागच्छेत्तर्हि धानाः भृष्टयवान् जक्षीयाद् भक्षयेद् । उतापिच सोममभिषुतं पपीयाद् ततः स्वाशितः सुष्ठु भुक्तः तृप्तः सन् पुनर्भूयः अस्तं स्वगृहं प्रति जगायाद् गच्छेद् ॥ १ ॥

१. (इन्द्र के पुत्र वसुक्र की स्त्री कहती है)—इन्द्र के अतिरिक्त सारे देवता हमारे यज्ञ में आये हैं । केवल मेरे श्वशुर इन्द्र नहीं आये । यदि वे आये रहते, तो भुना हुआ जौ खाते और सोम पीते । आहारादि करके पुनः अपने घर लौट आते ।

अथ द्वितीया—

सरोरुवद्वृषभस्तिग्मशृङ्गोवर्ष्मन्तस्थौवरिमन्नापृथिव्याः ।
विश्वेष्वेनंवृजनेषुपामियोमेकुक्षीसुतसोमःपृणाति ॥ २ ॥

सः । रोरुवत् । वृषभः । तिग्मऽशृङ्गः । वर्ष्मन् । तस्थौ । वरिमन् । आ । पृथिव्याः । विश्वेषु । एनम् । वृजनेषु । पामि । यः । मे । कुक्षी इति । सुतऽसोमः । पृणाति ॥ २ ॥

वृषभः कामानां वर्षिता तिग्मशृंगः तीक्ष्णरश्मिः सइन्द्रोहं पृथिव्याअन्तरिक्षस्य वर्ष्मन् वर्ष्मनि वर्ष्मनशब्दउन्नतवचनः स्थिरवचनोवा एवंभूते वरिमन विस्तीर्णे प्रदेशे रोरुवत् भृशं शब्दायमानः सन् आतस्थौ आतिष्ठामि । एवंभूतोहं विश्वेषु सर्वेषु वृजनेषु संग्रामेषु एनमीदृशं वसुकं यजमानं पामि रक्षामि योयजमानः सुतसोमः अभिषुतसोमः मे मम कुक्षी उभौ पार्श्वौ पृणाति सोमरसपुरोडाशादिहविर्भिः पूरयति ईदृशं रक्षामीति संबंधः ॥ २ ॥

२. (इन्द्र का कथन)—तीखी सींगवाले वृषभ के समान शब्द करते-करते मैं पृथिवी के उन्नत और विस्तीर्ण प्रदेश में रहता हूँ। जो मुझे भर पेट सोम पीने को देता है, मैं उसकी रक्षा करता हूँ।

अद्रिणातेमन्दिनइन्द्रतूयान्त्सुन्वन्तिसोमान्पिबसित्वमेषाम् ।
पचन्तितेवृषभाँअत्सितेषांपृक्षेणयन्मघवन्हूयमानः ॥ ३ ॥

अद्रिणा । ते । मन्दिनः । इन्द्र । तूयान् । सुन्वन्ति । सोमान् ।
पिबसि । त्वम् । एषाम् । पचन्ति । ते । वृषभान् । अत्सि ।
तेषाम् । पृक्षेण । यत् । मघऽवन् । हूयमानः ॥ ३ ॥

हे इन्द्र ते त्वदर्थं मन्दिनः मादयितॄन् तूयान् अविलंबितान् सोमान् अद्रिणा अभिषवग्राव्णा सुन्वन्ति यजमानाअभिषुण्वन्ति । एषामस्मदादियजमानानां संबंधीन् सोमान् त्वं पिबसि । किञ्च ते त्वदर्थं वृषभान् पशून् ये यजमानाः पचन्ति तेषां संबंधि हविर्भूतान् अत्सि भक्षयसि । हे मघवन् धनवन्निन्द्र त्वं यत् यदा पृक्षेण हविर्भूतेनान्नेन निर्मितेन हूयमानः यजमानैर्हूयसे तदेति पूर्वेण संबंधः ॥ ३ ॥

३. इन्द्र, अन्न-कामना से जिस समय तुम्हारे लिए हवन किया जाता है, उस समय यजमान शीघ्र-शीघ्र प्रस्तर-फलकों पर मथकर सोम प्रस्तुत करते हैं। उसका तुम पान करते हो। यजमान वृषभ पकाते हैं; तुम उनका भक्षण करते हो।

अथ चतुर्थी—

इदंसुमेजरितराचिकिद्धिप्रतीपंशापंनद्योवहन्ति ।
लोपाशःसिंहंप्रत्यञ्चमत्साःक्रोष्टावराहंनिरतक्तकक्षात् ॥ ४ ॥

इदम् । सु । मे । जरितः । आ । चिकिद्धि । प्रतिऽईपम् । शापम् ।
नद्यः । वहन्ति । लोपाशः । सिंहम् । प्रत्यञ्चम् । अत्साः ।
क्रोष्टा । वराहम् । निः । अतक्ता । कक्षात् ॥ ४ ॥

हे जरितः शत्रूणां जरयितरिन्द्र त्वं मे मम सुशोभनमपि इदमीदृशं रूपं सामर्थ्यं आचिकिद्धि आसमंताज्जानीहि । कीदृशं नद्योगंगायाः सरितः प्रतीपं प्रतिकूलं शापं उदकं वहन्ति । अपिच लोपाशः लुप्यमानं तृणमश्नातीति लोपाशोमृगः मया प्रेषितः सन् प्रत्यञ्चं आत्मानं प्रतिगच्छन्तं सिंहं अत्साः अत्सात् आभिमुख्येन गच्छति । तथा क्रोष्टा शृगालः वराहं बलवन्तमपि सूकरं कक्षात् अभिगहनदेशान्निरतक्त निर्गमयति एतदपि सर्वं सामर्थ्यं त्वत्पुत्रे मयि त्वत्प्रसादाल्लब्धमपि जानीहीत्यर्थः ॥ ४ ॥

४. इन्द्र, तुम मेरी ऐसी सामर्थ्य कर दो कि, मेरी इच्छा होने पर नदी का जल विपरीत दिशा में बहने लगे, तिनका खानेवाला हरिण सिंह को पराङ्मुख करके उसके पीछे-पीछे दौड़े और शृगाल वराह को वन से भगा दे ।

अथ पंचमी—

कथा ते एतदहमा चिकेतं गृत्समस्य पाकस्तवसो मनीषाम् ।
त्वं नो विद्वाँ ऋतुथा वि वोचो यमर्धं ते मघवन्क्षेम्या धूः ॥ ५ ॥

कथा । ते । एतत् । अहम् । आ । चिकेतम् । गृत्समस्य । पाकः ।
तवसः । मनीषाम् । त्वम् । नः । विद्वान् । ऋतुऽथा । वि ।
वोचः । यम् । अर्धम् । ते । मघऽवन् । क्षेम्या । धूः ॥ ५ ॥

हे इन्द्र पाकः पक्वप्रज्ञोहं गृत्समस्य मेधाविनस्तवसोवृद्धस्य ते तव मनीषां स्तुतिं कर्तुमिति शेषः एतदीदृशं त्वदीयं सामर्थ्यं कथा कथं केन प्रकारेण आचिकेतं आसमंताज्जानामि । त्वदुपदेशं विना न जानामीत्यर्थः । तस्मात्कारणात् विद्वान्सर्वज्ञस्त्वमेव नोस्मभ्यं ऋतुथा काले विवोचः विशेषेण ब्रूहि । हे मघवन् धनवन्निन्द्र ते तव अर्धं यं स्तुत्यवयवं वयं कुर्मः सा स्तुतिः क्षेम्या क्षेमेभवा क्लेशरहिता वोढुं शक्या धूरस्ति यस्मात् अतः स्तुत्यवयवमेव वयमक्लेशेन कर्तुं न शक्नुमः अस्माकं मंदबुद्धित्वात् । तस्मात्त्वमेवास्मभ्यं स्वसामर्थ्यं स्तुतिप्रकारं च पुनरपि कथयेत्यर्थः ॥ ५ ॥

५. मैं अपरिपक्व-बुद्धि हूँ । तुम प्राचीन और बुद्धिमान् हो । मेरी शक्ति कहाँ कि, मैं तुम्हारा स्तोत्र कर सकूँ । किन्तु समय-समय पर तुम हमें उपदेश देते हो; इसलिए तुम्हारा स्तोत्र कुछ-कुछ कर सकते हैं ।

अथ षष्ठी—

एवा हि मान्तवसं वर्धयन्ति दिवश्चिन्मेदृहतो उत्तरा धूः ।
पुरू सहस्रा निशिशामि साकं शत्रुं हि माजनिता जजान ॥ ६ ॥ २० ॥

एव । हि । माम् । तवसम् । वर्धयन्ति । दिवः । चित् । मे ।
बृहतः । उत्ऽतरा । धूः । पुरु । सहस्रा । नि । शिशामि ।
साकम् । अशत्रुम् । हि । मा । जनिता । जजान ॥ ६ ॥ २० ॥

हि यस्मात्कारणाद् एव एवमुक्तप्रकारेण तवसं प्रवृद्धं मां स्तोतारः स्तुतिभिः स्तुवन्तः वीर्येण वर्धयन्ति तस्मात्कारणाद् बृहतोमहतो मे ममेन्द्रस्य दिवश्चिद् द्युलोकादपि धूः स्तुतिः उत्तरा उद्गततरा अधिकतरा । किञ्च पुरु पुरूणि बहूनि मे सहस्रा शत्रूणां सहस्राणि साकं युगपद् निशिशामि तनूकरोमि हिनस्मीत्यर्थः । हि यस्मात्कारणाद् जनिता सर्वस्य जनयिता प्रजापतिः मा मां इन्द्रं अशत्रुं अविद्यमानशत्रुं जजान जनितवान् ॥ ६ ॥

६. (इन्द्र की उक्ति)—मैं प्राचीन हूँ । स्तोता लोग मेरी इस प्रकार की स्तुति करते हैं कि, मेरा कार्य-भार स्वर्ग से भी बड़ा है । मैं एक ही साथ सहस्राधिक शत्रुओं को दुर्बल कर डालता हूँ । मेरे जन्मदाता ने मेरा जन्म ही ऐसा किया है कि, मेरा शत्रु कोई नहीं टिक सकता ।

॥ इति सप्तमस्य सप्तमे विंशोवर्गः ॥ २० ॥

एवाहिमांतवसंजज्ञुरुग्रंकर्मन्कर्मन्वृषणमिन्द्रदेवाः ।
वधींवृत्रंवज्रेणमन्दसानोपव्रजंमहिनादाशुषेवम् ॥ ७ ॥

एव । हि । माम् । तवसम् । जज्ञुः । उग्रम् । कर्मन्ऽकर्मन् ।
वृषणम् । इन्द्र । देवाः । वधीम् । वृत्रम् । वज्रेण । मन्दसानः ।
अप । व्रजम् । महिना । दाशुषे । वम् ॥ ७ ॥

हि यस्मात्कारणात् एव एवमनेनोक्तप्रकारेण हे इन्द्र देवाः मरुदादयः ऋत्विग्यजमानाश्च तवसं महान्तं त्वत्पुत्रं त्वद्रूपनिरूपणावस्थितं संतं वसुकं मां कर्मन्कर्मन् वृत्रवधाग्निहोत्रादौ सर्वस्मिन्कर्मणि उग्रं शूरमसहं वा वृषणं वर्षितारं हविषां दातारं जज्ञुः जानन्ति । अतः मन्दसानोमोदमानोहं वज्रेणायुधेन वृत्रं मेघमसुरं वावधीं अवधिषं । किञ्च दाशुषे हविर्दत्तवते यजमानाय वृष्टिप्रदानार्थं महिना महत्त्वेन व्रजं मेघसमूहं अपवं अपावं अपावृणोमि ॥ ७ ॥

७. इन्द्र, देवता लोग मुझे तुम्हारे ही समान प्राचीन, प्रत्येक कर्म में शूर और अभीष्ट फल के दाता समझते हैं । आह्लाद के साथ मैंने वज्र के द्वारा वृत्र (असुर) का वध किया है । मैंने अपनी महिमा से दाता को गोधन दिया है ।

देवासआयन्परशूँरबिभ्रन्वनाव्रश्चन्तोअभिविड्भिरायन् ।
निसुद्र्वंदधतोवक्षणासुयत्राकपीटमनुतद्दहन्ति ॥ ८ ॥

देवासः । आयन् । परशून् । अबिभ्रन् । वना । वृश्चन्तः ।
अभि । विट्ऽभिः । आयन् । नि । सुऽद्वम् । दधतः । वक्षणासु ।
यत्र । रुपीटम् । अनु । तत् । दहन्ति ॥ ८ ॥

देवासोदेवाः इन्द्रेण चोदिताः सन्तः आयन् गच्छन्ति मेघवधार्थं परशून् वज्रान् अबिभ्रन् धारयन्ति तदनंतरं विड्भिः मरुदादिप्रजाभिः सहितावृश्चन्तः मेघान् छिन्दन्तः वना वनानि वृष्टिलक्षणान्युदकानि अभ्यायन् आभिमुख्येन गच्छन्ति। ततः सुद्वं शोभनद्रवणं वृष्ट्युदकं वक्षणासु नदीषु निदधतः नियमेन स्थापयन्तः यत्र यस्मिन्मेघजाते रुपीटं उदकनामैतत् निगूढमुदकं तिष्ठति तद्देवाः तन्मेघजातं अनुलक्षीकृत्य दहन्ति उदकनिर्गमनार्थं शोषयन्ति ॥८॥

८. देवता लोग जाते हैं। मेघ वध के लिए वज्र धारण करते हैं। जल गिराते हैं। मनुष्यों के लिए जल बरसाते हैं। नदियों में उस सुन्दर जल को रखते हैं। वे जहां मेघ में जल देखते हैं, उसे जलाकर जल निकाल देते हैं। अथ नवमी—

शशःक्षुरंप्रत्यञ्चंजगारादिंलोगेनव्यभेदमारात् ।
बृहन्तंचिद्दहतेरन्धयानिवर्यद्वत्सोवृषभंशूशुवानः ॥ ९ ॥

शशः । क्षुरम् । प्रत्यञ्चम् । जगार । अद्रिम् । लोगेन । वि ।
अभेदम् । आरात् । बृहन्तम् । चित् । ऋहते । रन्धयानि ।
वर्यत् । वत्सः । वृषभम् । शूशुवानः ॥ ९ ॥

वसुकइन्द्रंप्रति ब्रूते—शशः एतत्संज्ञितोमया प्रेरितोमृगविशेषः प्रत्यञ्चं वधायात्मानं प्रतिगच्छन्तं क्षुरं क्षुरवन्तं दृढदीर्घतीक्ष्णनखं सिंहव्याघ्रादिकं बलवत्क्रूरमृगमित्यर्थः जगार गिरति गृह्णाति वा। किञ्च लोगेन लोष्टेन अद्रिं हिमवदादिकं पर्वतं आराद्दूरस्थितमपि व्यभेदं अहं भिनद्मि। बृहन्तं चित् महान्तमपि हस्त्यादिकं ऋहते ह्रस्वकाय अल्पाय शशकादिकाय रन्धयानि वशंगमयानि। शूशुवानः वीर्येण वर्धमानोवत्सः वृषभं महोक्षं वयत् युद्धाय गच्छति। हे इन्द्र एतदपि सर्वं त्वत्प्रसादादहं करोमीत्यर्थः ॥ ९ ॥

९. इन्द्र के चाहने पर शशक भी आते हुए सिंह आदि का सामना करता है और दूर से एक लोष्ट्र (ढेला) फेंककर मैं पर्वत को भी तोड़ सकता हूँ। क्षुद्र के वश में महान् भी आ जाता है और बछड़ा भी, बढ़कर, महोक्ष (सांड़) के साथ लड़ने को जाता है।

सुपर्णइत्थानखमासिषायावरुद्धःपरिपदंनसिंहः ।
निरुद्धश्चिन्महिषस्तर्ष्यावान्गोधातस्माअयथंकर्पदेतत् ॥ १० ॥

सुऽपर्णः । इत्था । नखम् । आ । सिसाय । अवऽरुद्धः । परिऽपदम् ।
न । सिंहः । निऽरुद्धः । चित् । महिषः । तर्ष्याऽवान् ।
गोधा । तस्मै । अयथम् । कर्षत् । एतत् ॥ १० ॥

सुपर्णः पक्षिरूपा गायत्री इत्था अमुत्र द्युलोके नखमात्मीयं आसिषाय सोमाहरणकाले इन्द्रार्थमाबबन्ध इन्द्रस्य प्रसादाद् दिवि पदं न्यस्तवतीत्यर्थः । तत्रदृष्टान्तः—अवरुद्धः पंजरेणावृतः परिवेष्टितः सिंहः परिपदं न यथा कररयोपरि सर्वतः पादमवबध्नाति । किञ्च चिदित्युपमार्थे यथा केनापि बद्धपादोनिरुद्धोमहिषः तर्ष्यावान् उदकाभावे तृषावान्भवति एवमिन्द्रः सोमाहरणात्पूर्वं सोमाभावे तृषितवानितिशेषः । तस्मै तादर्थ्ये चतुर्थी तादृशस्य तृषितस्येन्द्रस्यार्थं गोधा गमयतिवर्णानिति गौर्वाक् तत्र निधीयमानत्वाद्गायत्री गोधा । यद्वा गुधिर्निष्कर्षणार्थः निष्कृष्यसोमाहरणाद् गोधा गायत्री अयथं अयत्नेन लीलयेत्यर्थः एतत्सोमजातं कर्षत् आकृष्टवती दिवः सकाशादाहृतवतीत्यर्थः ॥ १० ॥

१०. जैसे पिंजड़े में बँधा सिंह चारों ओर अपना पैर रगड़ता है, वैसे ही श्येन पक्षी अपना नख रगड़ने लगा । इन्द्र की इच्छा होने पर यदि महिष तृषातुर होता है, तो उसके लिए गोधा (गोह) भी पानी ले आता है ।

तेभ्योगोधाअयथंकर्षदेतद्येब्रह्मणःप्रतिपीयन्त्यन्नैः ।
सिमउक्ष्णोवसृष्टाँअदन्तिस्वयंबलानितन्वःशृणानाः ॥ ११ ॥

तेभ्यः । गोधाः । अयथम् । कर्षत् । एतत् । ये । ब्रह्मणः ।
प्रतिऽपीयन्ति । अन्नैः । सिमः । उक्ष्णः । अवऽसृष्टान् ।
अदन्ति । स्वयम् । बलानि । तन्वः । शृणानाः ॥ ११ ॥

ये मरुदादिदेवगणाः ब्रह्मणः परिवृढस्येन्द्रस्य स्वभूतैरन्नैः सोमाख्यैः तृप्ताः सन्तः इति शेषः प्रतिपीयन्ति । पीयतिर्हिंसाकर्मा इन्द्रादेशाद्धिंसकान्प्रतिहिंसन्ति । तेभ्यः तेषां देवगणानामर्थाय गोधाः पूर्वोक्ता गायत्री अयथं अनायासेन एतत्सोमजातं कर्षदाकृष्टवती । किञ्च सिमः सिमान् श्रेष्ठान् यद्वा सिमशब्दः सर्वशब्दपर्यायः सर्वानुक्ष्णः सिञ्चतः अवसृष्टान् इन्द्रेण निसृष्टान् अनुज्ञातान् हविर्भूतान् सोमान् यज्ञेष्वदन्ति । किंकुर्वन्तः स्वयमात्मनैव बलानि शत्रूणां सैन्यानि तन्वः शरीराणि च शृणानाः हिंसन्तः गायत्रीन्द्रादेशाद्देवेभ्यः सोममाहृतवतीत्यर्थः ॥ ११ ॥

११. जो यज्ञीय अन्न के द्वारा अपना पोषण करते हैं, उनके लिए गोधा अनायास जल ले आ देता है । वे सब प्रकार के रस से युक्त सोम को पीते और शत्रुओं की देह तथा बल का विध्वंस कर देते हैं ।

अथ द्वादशी—

एतेशमीभिःसुशमीअभूवन्येहिन्विरेतन्वः सोमउक्थैः ।
नृवद्वदन्नुपनोमाहिवाजान्दिविश्रवोदधिषेनामवीरः ॥१२॥२१॥

एते । शमीभिः । सुऽशमी । अभूवन् । ये । हिन्विरे । तन्वः । सोमे ।
उक्थैः । नृऽवत् । वदन् । उप । नः । माहि । वाजान् ।
दिवि । श्रवः । दधिषे । नाम । वीरः ॥ १२ ॥ २१ ॥

ये देवर्ष्यादयः तन्वः शरीराणि सोमे सोमयागे उक्थैः शस्त्रैः हिन्विरे वर्धयन्ति । एते देवादयः इन्द्रादेशात्सोमे आहृते सति शमीभिः सोमयागकर्मभिः सुशमी सुकर्माणः अभूवन् । नृवत् मनुष्यवद्वदन् इदं युष्मभ्यं मया दत्तमिति व्यक्तां वाचमुच्चारयन् नोस्मभ्यमुपमाहि उपगम्य वाजानन्नानि बलानि वा हे इन्द्र त्वं देहीतिशेषः । अतःकारणाद् वीरः दानशूरस्त्वं दिवि द्युलोके श्रवः दानपतिरितिकीर्तितं नाम नामधेयं दधिषे धारयसि ॥ १२ ॥

१२. जिन्होंने सोमरस का यज्ञ करके अपनी देह को पुष्ट किया है, वे "उत्तम कर्म के कर्त्ता" कहे जाकर सुकर्म से युक्त होते हैं । इन्द्र, तुम मनुष्यों के समान स्पष्ट वाक्य का उच्चारण करके हमारे लिए, अन्न ले आते हो; क्योंकि दिव्य धाम में तुम्हारा "दानवीर" नाम प्रसिद्ध है ।

॥ इति सप्तमस्य सप्तमे एकविंशोवर्गः ॥ २१ ॥

वनेवेत्यष्टर्चं त्रयोदशं सूक्तं वसुकस्यार्षं त्रैष्टुभमैन्द्रं अनुक्रान्तंच—वनेनाष्टाविति । चतुर्थेहनि स्तोमवृद्धौ ब्राह्मणाच्छंसिनएतत्सूक्तमावापार्थं । सूत्रितञ्च—स्तोमेवर्धमानेकोअधनर्योवनेनवायइति । महाव्रते निष्केवल्येप्येतत्सूक्तं । सूत्रितंच—प्रवोमहेमन्दमानायांधसइतिनिविद्धानंवनेनवायोन्यधायिचाकन्निति ।

तत्र प्रथमा—

वनेनवायोन्यधायिचाकञ्छुचिर्वीस्तोमोभुरणावजीगः ।
यस्येदिन्द्रःपुरुदिनेषुहोतानॄणांनर्योनृतमःक्षपावान् ॥ १ ॥

वने । न । वा । यः । नि । अधायि । चाकन् । शुचिः । वाम् ।
स्तोमः । भुरणौ । अजीगरिति । यस्य । इत् । इन्द्रः । पुरुऽदिनेषु ।
होता । नॄणाम् । नर्यः । नृऽतमः । क्षपाऽवान् ॥ १ ॥

वनेनवायोन्यधायीति वने नवनइव वृक्ष इव शकुनिः स्वे नीडे वायमात्मीयं पुत्रं न्यधायि निदधाति शकुनिमजातपक्षं सयथा तत्र निहितः चाकन् भयाद्दिशोनिरीक्षमाणआसीत्। अथवा कामयमानस्तदुत्सुकमनाआसीत् एवमयमस्मासु वृक्षस्यनीडभूतेषु शकुनिपुत्रभूतः शुचिर्व्यपगतसर्वदोषः वां युवयोः स्वभूतः स्तोमः हे भुरणौ भर्तारावश्विनौ शीघ्रौ वा भुरण्युरिति क्षिप्रनामेति। किञ्च यस्य स्तोमस्य पुरुदिनेषु बहुष्वहःसु इन्द्रो होता इन्द्रोप्याह्वाता भवति ममायं स्तोमः स्यादिति। किंलक्षणः पुनरिंद्रआह्वाता योनृणां मनुष्याणां नृतमः मनुष्याणामपि मनुष्यतमः शूराणामपि मध्ये शूरतमइत्यर्थः। नर्यश्च नृभ्योहितोयः क्षपावांश्च रात्रिपर्यायेषु सोमभागः एवं गुणयुक्तेन यः स्तोमः इन्द्रेणापि प्रार्थ्यतेस्मासु वर्तमानः सयुवां प्रत्यजीगः नित्यकालमेव गच्छतीत्यर्थः। एवं तावदेताभृचमाश्विनीमितिकृत्वा व्याचक्षते। तदसाधु। ऐन्द्रेहि सूक्ते प्रथमैवेयं भवति तच्च पुनः पृष्ठ्यस्य षष्ठेहनि स्तोमे वर्धमाने माध्यन्दिनसवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुज्यते। हे भुरणौ भर्तारौ देवानां पती यएषस्तोमोस्मासु निहितः शुचिर्व्यपगतदोषः शकुनिपुत्रइव वने वनावयवे वृक्षे चाकन्पश्यन्निव कामयमानइव वा इन्द्रमास्ते यस्य स्तोमः। किमिति यस्येन्द्रः पुरुदिनेषु बहुष्वहःसु आह्वाताभूत्। अपिनाम मामनेन स्तोमेन स्तुयुरिति। किंलक्षणः पुनराह्वाता यस्येदिन्द्रइति नृणां नृतमः नर्यश्च क्षपावांश्च समानमेतत्पूर्वेणार्थेन। यमेवं इन्द्रः प्रार्थयते सएषस्तोमः तं प्रत्यजीगः गच्छतीत्यर्थः। अथवा सएषः स्तोमोस्माभिरुदीर्यमाणस्तस्येन्द्रस्य गुणान् गृह्णातीति स्यात् जिगर्तिर्गृह्णातिकर्मेतिह्युक्तं एवमत्र चाकन्नित्यस्य पश्यन्निति वा कामयमानइतिवेत्येतौ विपरिणामौ उपपद्येते शब्दसारूप्यादर्थाविरोधाच्च। एतस्मिन्निगमे पदविभागगतः कश्चिद्विचारोस्ति तमाह भाष्यकारः—वेति च यइतिच। चकारशाकल्यइति वा इति यइति च पदे चकारशाकल्यः पदकारः। तदेतद्विचार्यमाणं न साधु भवति। किं कारणं उदात्तंत्वेवमाख्यातमभविष्यत् एवमेतस्मिन्पदद्वये सति यदेतदाख्यातमधायीतिपदं उदात्तमभविष्यत् यद्वृत्तात्परस्य नित्यमाख्यातस्य निघातोन भवतीति लक्षणविदोमन्यन्ते। नचेदमुदात्तं तस्माद्यइति नेदं यद्वृत्तं किंतर्हि वायइत्येकमेवपदं। किञ्च असुसमाप्तश्च अर्थः अपुष्कलः एवमेतस्मिन्पदद्वये सति मन्त्रस्यार्थः असुसमाप्तो भवति ॥ १ ॥

१. शीघ्रगामी अश्विद्वय, यह अतिशय निर्मल स्तोत्र तुम्हारे लिए जाता है। जैसे पक्षी, भय के साथ, चारों ओर देखते-देखते अपने बच्चे को वृक्ष के घोंसले में रखता है, वैसे ही मैंने यत्नपूर्वक इस स्तोत्र में प्रस्तुत किया है। कितने ही दिन मैं इसी स्तोत्र से बुलाता हूँ और वे आकर यज्ञ सम्पन्न करते हैं। वे नेताओं के भी नेता हैं। वे मनुष्य के हितैषी हैं। वे रात्रि में सोम का भाग ग्रहण करते हैं।

प्रतेअस्याउषसःप्रापरस्यानृतौस्यामनृतमस्यनृणाम्।
अनुत्रिशोकःशतमावहन्नृन्कुत्सेनरथोयोअसत्ससवान् ॥ २ ॥

प्र । ते । अस्याः । उषसः । प्र । अपरस्याः । नृतौ । स्याम ।
नृऽतमस्य । नृणाम् । अनु । त्रिऽशोकः । शतम् । आ । अवहत् ।
नॄन् । कुत्सेन । रथः । यः । असत् । ससऽवान् ॥ २ ॥

अस्यावर्तमानायाः ईदृश्याउषसः नृतौ नृनये नयने प्रापणे उदयकाले इत्यर्थः नृणां नेतृणां मध्ये नृतमस्य अतिशयेन नेतुस्ते तवेन्द्रस्य स्तुत्या यागेन च प्रस्याम वयं प्रकृष्टाभवेम। तथा हे इन्द्र अपरस्याआगामिन्याश्चोषसः नृतौ प्रापणे तव स्तुत्या यागेन च वयं प्रकृष्टाभवेमेत्याशास्महे। किञ्च त्रिशोकोनामऋषिः हे इन्द्र त्वामाराध्य त्वत्प्रसादात् शतं बहून् अनु अनुचरभूतान् नॄन् मनुष्यानावहत् प्रापितवान् लब्धवानित्यर्थः। तथा तव कुत्सस्य च ससवान् सनिता युगपदेव संभक्ता योरथः असत् अस्ति तं रथं कुत्सो लब्धवानितिशेषः। तथाच मंत्रान्तरे श्रूयते—यासिकुत्सेनसरथमवस्युरिति। यस्मादेवं तस्मात् त्वत्प्रसादाद्वयं प्रकृष्टाभवेमेत्यर्थः ॥ २ ॥

९. इन्द्र, तुम नेताओं के भी नेता हो। आज प्रातःकाल और अन्यान्य प्रातःकालों में हम तुम्हारी स्तुति कर उत्तम बनें। तुम्हारा स्तोत्र करके त्रिशोक नामक ऋषि ने सौ मनुष्यों की सहायता पाई थी और कुत्स नामक ऋषि तुम्हारे साथ एक रथ पर चढ़े थे।

अथ तृतीया—

कस्तेमदइन्द्ररन्त्योभूद्दुरोगिरोअभ्यु[1]ग्रोविधाव ।
कदाहोअर्वागुपमामनीषाआत्वाशक्यामुपमंराधोअन्नैः ॥ ३ ॥

कः । ते । मदः । इन्द्र । रन्त्यः । भूत् । दुरः । गिरः । अभि । उग्रः ।
वि । धाव । कत् । वाहः । अर्वाक् । उप । मा । मनीषा । आ ।
त्वा । शक्याम् । उपऽमम् । राधः । अन्नैः ॥ ३ ॥

हे इन्द्र ते तव ईदृग्मध्यमोत्तमानां सोमजन्यानां मदानां मध्ये कोमदः रन्त्योरमयिता प्रीतिकरोभूत् भवति त्वत्प्रीतिकरमदयोग्यसोमदानाभिप्रायेणायं प्रश्नः। उग्रः ओजस्वी त्वं दुरः यज्ञगृहद्वाराणि गिरः स्तुतिलक्षणावाचश्च अभिविधाव अभ्यागच्छ। किञ्च कत् कदा वाहः इन्द्रं प्रत्युद्यतइति वाहः सोमउच्यते एवं भूतः अर्वाक् त्वत्प्रसादात्फलदानायास्मदभिमुखोभवि-

---

१ ऋ० सं० ३. ५. १९.।

प्रतीतिशेषः। अपिच कदा मनीषा सर्वार्थदर्शनाप्रज्ञा सर्वगुणग्राहिणीस्तुतिर्वा मा मां त्वत्सा-दादुपगमिष्यतीतिशेषः। कदा हे इन्द्र त्वा त्वां आइत्युपसर्गश्रुतेर्योग्यपदाध्याहारः आराध्य व-यं अन्नैः सह राधोधनं उपमं मत्समीपं शक्यां शकिरत्र गत्यर्थोन्तर्भावितण्यर्थः संगमयेयं॥३॥

३. इन्द्र किस प्रकार की मत्तता तुम्हें अतिशय प्रसन्नता-कारक है? हमारा स्तोत्र सुनकर महावेग से तुम यज्ञ-गृह के द्वार की ओर आओ। मैं कब उत्तम वाहन पाऊँगा? तुम्हारी स्तुति से कब मैं अन्न और अर्थ अपनी ओर खींच सकूँगा?

कदुद्युम्नमिन्द्रत्वावतोनॄन्कयाधियाकरसेकन्नआगन्।
मित्रोनसत्यउरुगायभृत्याअन्नैसमस्ययदसन्मनीषाः॥ ४॥

कत्। ऊँ इति। द्युम्नम्। इन्द्र। त्वाऽवतः। नॄन्। कया। धिया। करसे। कत्। नः। आ। अगन्। मित्रः। न। सत्यः। उरुऽगाय। भृत्यै। अन्नै। समस्य। यत्। असन्। मनीषाः॥ ४॥

हे इन्द्र त्वं कदु कदा वा द्युम्नं हविर्लक्षणमस्मदीयमन्नं भुक्त्वेतिशेषः कया धिया केन कर्मणा नॄन् नेतॄनस्मान् त्वावतः त्वत्सदृशान्करसे करिष्यसि। कत् कदा नोस्मान्प्रति आगन् आगमिष्यसि। सत्यः अनवद्यइत्यर्थः मित्रोन सखेव तथा हे उरुगाय बहुकीर्ते इन्द्र त्वं भृत्यै भरणाय पोषणाय भवसीति शेषः। यद्यदा समस्य अस्मदादिकस्य सर्वस्य जगतःअन्ने जग-त्स्थितिनिमित्ते आहारे मनीषाः अत्राभिलषणाबुद्धयः असन् भवेयुः तदा सर्वस्य पोषणाय त्वं भवसीत्यर्थः॥ ४॥

४. इन्द्र, कब धन होगा? किस स्तोत्र का पाठ करने पर तुम मनुष्यों को अपने समान करोगे? कब आओगे? कीर्त्तिशाली इन्द्र, तुम यथार्थ बन्धु के समान सबका भरण-पोषण करते हो। स्तव करने से ही तुम भरण-पोषण करते हो।

प्रेरयसूरोअर्थनपारंयेअस्यकामंजनिधाइवग्मन्।
गिरश्चयेतेतुविजातपूर्वीर्नरइन्द्रप्रतिशिक्षन्त्यन्नैः॥ ५॥ २२॥

प्र। ईरय। सूरः। अर्थम्। न। पारम्। ये। अस्य। कामम्। जनिधाःऽइव। ग्मन्। गिरः। च। ये। ते। तुविऽजात। पूर्वीः। नरः। इन्द्र। प्रतिऽशिक्षन्ति। अन्नैः॥ ५॥ २२॥

सूरः सूर्यः अर्थेन यथा अर्तारं गन्तारं योगिनमनुगृह्णन् पारं संसारस्यान्तमपवर्गं गमयति तथा हे इन्द्र त्वं यजमानान् संसारस्यान्तं प्रेरय गमय ये अस्मदादयोयजमानाः अस्य सोमेन्द्रस्य कामं सोमपानेच्छां ग्मन् गमिरत्र विपूर्वोन्तर्भावितण्यर्थश्च द्रष्टव्यः विगमयन्ति महता सोमपानेनापनयन्ति । तत्र दृष्टान्तः—जनिधाइव जनीनां जायानां संभोगकाले शय्यासु धारयितारः पतयोयथा प्रभूतसंभोगप्रदानेन मैथुनेच्छामपनयन्ति तद्वत् । किञ्च नरोनेतारोस्मदादयोये यजमानाः हे तुविजात बहुरूप रूपंरूपंप्रतिरूपोबभूवेति वचनात् । सर्वात्मन्निन्द्र ते तुभ्यं पूर्वीः अनादिकालप्रवृत्तागिरश्च स्तुतिलक्षणावाचश्च अन्नैः पुरोडाशादिहविर्भिः सह प्रतिशिक्षन्ति प्रतिकालं प्रयच्छन्ति तानस्मदादीन्यजमानान् पारं गमयेति पूर्वेण संबंधः ॥५॥

५. जैसे पति अपनी पत्नी की कामना पूर्ण करता है, वैसे ही जो तुम्हारी कामना पूर्ण करता है (इच्छानुरूप यज्ञ करता है), उन्हें यथेष्ट धन दो। क्योंकि तुम सूर्य के समान दाता हो। हे अनेक रूप-धारी, जो लोग चिरप्रचलित स्तुति-वचनों का तुम्हारे लिए पाठ करते और अन्न देते हैं, उन्हें धन दो। ॥ इति सप्तमस्य सप्तमे द्वाविंशोवर्गः ॥२२॥

मात्रेनुतेसुमितेइन्द्रपूर्वीद्यौर्मज्मनापृथिवीकाव्येन ।
वरायतेघृतवन्तःसुतासःस्वाद्मन्भवन्तुपीतयेमधूनि ॥ ६ ॥

मात्रे इति । नु । ते । सुमिते इति सुऽमिते । इन्द्र । पूर्वी इति । द्यौः । मज्मना । पृथिवी । काव्येन । वराय । ते । घृतऽवन्तः । सुतासः । स्वाद्मन् । भवन्तु । पीतये । मधूनि ॥ ६ ॥

हे इन्द्र ते तव स्वभूतेन मज्मना शत्रूणां मज्जकेन काव्येन कर्मणा द्यौः पृथिवी द्यावापृथिव्यौ नु क्षिप्रं सुमिते निर्मिते । कीदृश्यौ मात्रे निर्मात्र्यौ पूर्वी पूर्व्यौ महत्यौ । यस्मादीदृशेन महत्त्वेन युक्तः तस्मात् घृतवन्तः अभिमुखत्वात् त्वां क्षरंतः दीप्तिमन्तोवा सुसंस्कृतत्वात् । यद्वा आज्यसंयुक्तावा सुतासः अभिषुताः सोमाः वराय श्रेष्ठाय ते तुभ्यमिन्द्राय स्वाद्मन् स्वाद्मानः स्वादिष्ठाः भवन्तु अस्माभिर्दत्ताः सन्तु । किमर्थं पीतये पानाय मधूनि मधुररसात्मकानि पुरोडाशादीन्यन्नानि हवींषि भक्षणार्थं दत्तानि भवन्तु ॥ ६॥

६. इन्द्र, प्राचीन समय में अतीव सुन्दर सृष्टि-प्रक्रिया के द्वारा विरचित यह जो द्यावापृथिवी हैं, वे तुम्हारी माता के सदृश हैं। जो घृतयुक्त सोमरस प्रस्तुत किया गया है, उसे पीकर प्रसन्न होओ। मधुर [illegible] युक्त अन्न तुम्हारे लिए सुस्वादु हो।

---

१ ऋ० सं ४. ५. ३३.।

अथ सप्तमी—

आमध्वोअस्माअसिचन्नमंत्रमिन्द्रायपूर्णंसहिसत्यराधाः ।
सवावृधेवरिमन्नापृथिव्याअभिक्रत्वानर्यःपौंस्यैश्च ॥ ७ ॥

आ । मध्वः । अस्मै । असिचन् । अमंत्रम् । इन्द्राय । पूर्णम् ।
सः । हि । सत्यऽराधाः । सः । ववृधे । वरिमन् । आ । पृथिव्याः ।
अभि । क्रत्वा । नर्यः । पौंस्यैः । च ॥ ७ ॥

अस्मै इन्द्राय अस्येन्द्रार्थं मध्वोमधुररसस्य सोमस्य पूर्णं अमत्रं ग्रहचमसादिकं पात्रं आअसिचन् असिञ्चन् आभिमुख्येन स्थित्वा परयाभक्त्या अस्मदीयाऋत्विजः सिक्तवन्तः अग्नौ प्रक्षिप्तवन्तः । हि यस्मात्कारणात्सइन्द्रः सत्यराधाः सत्यधनः यजमानेभ्योदातव्येनाविसंवादिधनइत्यर्थः । तस्मादसिञ्चन्निति संबंधः । अग्नावासिक्तेन तेन पात्रेण तृप्तः सइन्द्रः पृथिव्याः अन्तरिक्षस्य वरिमन्नतिशयेन विस्तीर्णस्थाने आगत्य अभिववृधे अभिवर्धते । कीदृशइन्द्रः नर्यः नृभ्योहितः क्रत्वा वृत्रवधादिकर्मणा प्रज्ञानेनवा पौंस्यैश्च युक्तइतिशेषः ॥ ७ ॥

७. इन्द्र वस्तुतः धनदाता हैं; इसलिए इन्द्र के लिए पात्र पूर्ण करके मधुर सोमरस दो । इन्द्र पृथ्वी से भी बड़े हैं । वे मनुष्यों के हितैषी हैं । उनका कार्य और पौरुष विस्मयकर है ।

अथाष्टमी—

व्यानळिन्द्रःपृतनास्वोजाआस्मैयतन्तेसख्यायपूर्वीः ।
आस्मारथंनपृतनासुतिष्ठयंभद्रयासुमत्याचोदयासे ॥ ८ ॥२३॥

वि । आनट् । इन्द्रः । पृतनाः । सुऽओजाः । आ । अस्मै । यतन्ते ।
सख्याय । पूर्वीः । आ । स्म । रथम् । न । पृतनासु । तिष्ठ ।
यम् । भद्रया । सुऽमत्या । चोदयासे ॥ ८ ॥ २३ ॥

स्वोजाः शोभनबलः इन्द्रः पृतनाः शत्रुसेनाः व्यानट् व्याप्नोति इन्द्रः संग्रामेषु केनाप्यप्रतिहन्यमानः सन् शत्रून् जयतीत्यर्थः । किञ्च पूर्वीः अत्र पूर्वशब्दउत्कृष्टवाची उत्कृष्टाः शत्रुसेनाः अप्रभवन्त्यः सत्यः अस्मै अस्येन्द्रस्य सख्याय संबंधित्वलक्षणाय सखित्वाय आयतंते संधिं कर्तुमिच्छन्तीत्यर्थः । अपरोर्धर्चः प्रत्यक्षकृतत्वाद् भिन्नं वाक्यं । हे इन्द्र त्वं यं स्वी-

यं रथं भद्रया कल्याण्या सुमत्या शोभनया परानुग्रहयाबुद्ध्या चोदयासे चोदयसे यज्ञान् प्रति प्रेरयसि। तं रथमस्मद्यज्ञं प्रत्यागन्तुं महतादरेणातिष्ठ आरोह। तत्रदृष्टान्तः—पृतनासु संग्रामेषु रथं न यथा स्वरथं महतादरेणातिष्ठसि तद्वत्। स्मेति पादपूरणः ॥ ८ ॥

८. शोभन बलवाले इन्द्र ने शत्रु-सेना को घेर डाला। उत्कृष्ट शत्रु सैनिक इन्द्र से मैत्री करने की चेष्टा करते हैं। इन्द्र, जैसे संसार के कल्याण के लिए, बुद्धिमान् व्यक्ति के समान, तुम युद्ध के लिए रथ पर चढ़ा करते हो, वैसे ही इस समय भी रथपर चढ़ो।

॥ इति सप्तमस्य सप्तमे त्रयोविंशोवर्गः ॥ २३ ॥

॥ इति दशमे मण्डले द्वितीयोनुवाकः ॥ २ ॥

तृतीयेनुवाके त्रयोदशसूक्तानि तत्र प्रदेवत्रेति पञ्चदशर्चं प्रथमं सूक्तं इलूषपुत्रस्य कवषस्यार्षं त्रैष्टुभमब्देवत्यं अपान्नपाद्देवताकं वा। तथाचानुक्रान्तं—प्रदेवत्रापञ्चोना कवषऐलूषआपमपोनप्त्रीयं वेति। अपइष्यहोतरित्युक्तः सन् होता प्रदेवत्रेत्याद्यानवर्चोनुब्रूयात्। सूत्रितञ्च—प्रदेवत्राब्रह्मणेगातुरेत्विति नव हिनोतानोअध्वरंदेवयज्येति दशमीमिति।

प्रदेवत्राब्रह्मणेगातुरेत्वपोअच्छामनसोनप्रयुक्ति।
महींमित्रस्यवरुणस्यधासिंपृथुज्रयसेरीरधासुवृक्तिम् ॥ १ ॥

प्र। देवऽत्रा। ब्रह्मणे। गातुः। एतु। अपः। अच्छ। मनसः।
न। प्रऽयुक्ति। महीम्। मित्रस्य। वरुणस्य। धासिम्।
पृथुऽज्रयसे। रीरध। सुऽवृक्तिम् ॥ १ ॥

ब्रह्मणे तृतीयार्थे चतुर्थी ब्रह्मणा स्तोत्रेण स्तूयमानइतिशेषः गातुर्देवानपोवाप्रति गमनशीलः सोमः देवत्रा देवीर्द्योतमानाः अपः वसतीवर्येकधनालक्षणान्युदकानि अच्छाभिमैतु प्रकर्षेण गच्छतु। तत्र दृष्टान्तः— मनसोनप्रयुक्ति यथा मनसः प्रयुक्ति प्रयोगउद्योगः शीघ्रं गच्छति तद्वत्। एवं सोमे अपःप्रति गते सति हे मदीयात्मन् अध्वर्यो वा महीं धासिं महत्सोमलक्षणमन्नं मित्रस्य वरुणस्य चार्थाय पृथुज्रयसे विस्तीर्णजवाय महतइन्द्रस्य वार्थायेत्यर्थः रीरध संसाधय संस्कुरु दानयोग्यं कुरु। सुवृक्तिं सुष्ठु दोषैर्वर्जितां स्तुतिं च कुरु ॥१॥

१. मन के समान शीघ्र गति से सोमरस, यज्ञ-काल में देवों के लिए जल की ओर जायें। मेरे अन्तःकरण, मित्र और वरुण के लिए विस्तृत अन्न (सोम-रूप) का पाक या संशोधन करो और तीव्र वेगवाले उस इन्द्र के लिए सुन्दर रचनावाली स्तुति करो।

अथ द्वितीया—

अध्वर्यवो हविष्मन्तो हि भूताच्छापइतोशतीरुशन्तः ।
अवयाश्चष्टे अरुणः सुपर्णस्तमास्यध्वमूर्मिमद्यासुहस्ताः ॥ २ ॥

अध्वर्यवः । हविष्मन्तः । हि । भूत । अच्छ । अपः । इत । उशतीः । उशन्तः । अव । याः । चष्टे । अरुणः । सुऽपर्णः । तम् । आ । अस्यध्वम् । ऊर्मिम् । अद्य । सुऽहस्ताः ॥ २ ॥

हे अध्वर्यवः यूयं हविष्मन्तो हि अभिषोतव्येन सोमलक्षणेन हविषा युक्ताः खलु भूत भवत । किञ्च हे उशन्तः सोमाभिषवं कर्तुं कामयमानाः अध्वर्यवो यूयं उशतीः सोमाभिषवांगभावमभिलषन्तीः एकधनालक्षणाअपः अच्छाभिमुख्येन इत गच्छत । अरुणः रक्तवर्णः सुपर्णः सुपतनः सोमः अवाधस्तात् अन्तरिक्षे याः मेघान्तरगताः अपः चष्टे पश्यति । हे सुहस्ताः सोमाभिषवादिशोभनकर्मकारित्वात्सुवर्णमयपवित्राद्यलंकृताः । यद्वा शोभनहस्ताहे अध्वर्यवो यूयं अद्येदानीं तं तादृशं ऊर्मिं सोमसंघातं ताभिरद्भिः सह आ अस्यध्वं आभिमुख्येन स्थित्वा महतादरेण दशापवित्रे शोधनार्थं प्रक्षिपत ॥ २ ॥

२. पुरोहितो, होमीय द्रव्य (हवि) का आयोजन करो । तुम्हारे लिए जल स्नेह-युक्त हो । जल की ओर तत्परता के साथ जाओ । लोहित-वर्ण पक्षी के समान यह जो सोम नीचे गिरता है, हे सुन्दर हाथोंवाले, उसे तरंग के रूप में यज्ञ स्थान फेंको ।

अथ तृतीया—

अध्वर्यवोपइतासमुद्रमपांनपातंहविषायजध्वम् ।
सवोददद्ऊर्मिमद्यासुपूतंतस्मैसोमंमधुमन्तंसुनोत ॥ ३ ॥

अध्वर्यवः । अपः । इत । समुद्रम् । अपाम् । नपातम् । हविषा । यजध्वम् । सः । वः । ददत् । ऊर्मिम् । अद्य । सुऽपूतम् । तस्मै । सोमम् । मधुऽमन्तम् । सुनोत ॥ ३ ॥

हे अध्वर्यवोयूयं अपः एकधनलक्षणान्युदकान्याहर्तुमितिशेषः समुद्रं उदधिस्थानीयं जलाशयं इत गच्छत । इदानीं उत्तरोर्धर्चोव्याख्यायते—पश्चाद्द्वितीयः पादः आर्थिकोयं क्रमः

---

१ अच्छाभिलक्ष्य इत ताआनेतुं गच्छत यतः अरुणवर्णः शोभनपतनः सोमः अवयाः त्वमाभिकामाअपः ।

अद्येदानीं सोपान्नपात् वः जलाशयं प्रति गतेभ्योयुष्मभ्यं सुपूतं सुशुद्धं ऊर्मिं जलसमूहं ददत् ददातु यूयमपि तेन समूहेन तस्मै अपांनपाते मधुमन्तं मधुरस्वादूपेतं सोमं सुनोत अभिषुणुत अभिषुतेन सोमाख्येन हविषा अपांनपातं वृष्टिकर्मण्यधिकृतं देवं यजध्वं ॥ ३ ॥

३. पुरोहितो, जल के समुद्र में जाओ। "आपांनपात्" देवता को होमीय द्रव्य के द्वारा पूजित करो। आज वे तुम्हें स्वच्छ जल की तरंग प्रदान करें। उनके लिए मधुर सोम प्रस्तुत करो।

योअनिध्मोदीदयदप्स्वन्तर्यंविप्रासईळतेअध्वरेषु ।
अपांन्नपान्मधुमतीरपोदायाभिरिन्द्रोवावृधेवीर्याय ॥ ४ ॥

यः । अनिध्मः । दीदयत् । अप्ऽसु । अन्तः । यम् । विप्रासः ।
ईळते । अध्वरेषु । अपाम् । नपात् । मधुऽमतीः । अपः ।
दाः । याभिः । इन्द्रः । ववृधे । वीर्याय ॥ ४ ॥

उत्तरार्धस्य प्रत्यक्षकृतत्वादेकवाक्यतायै युष्मच्छब्देन समानार्थोभवच्छब्दः प्रथमार्धे आहार्यः योभवानपान्नपात् अप्सु अन्तः अपां मध्ये मेघस्थाने अनिध्मः काष्ठवर्जितः सन् दीदयत् दीप्यते विप्रासोमेधाविनऋत्विग्यजमानाअध्वरेषु यागेषु यं भवन्तं ईळते स्तुवन्ति । हे अपान्नपात् त्वं मधुमतीः मधुररसयुक्ताः अपोवृष्टिलक्षणादाः अस्मभ्यं देहि याभिर्वसतीवर्येकधनारूपाभिः सोमेन श्रृताभिरद्भिः इन्द्रः वीर्याय वृत्रवधादिशूरकर्मणे ववृधे वर्धते ताअपोदेहीति संबंधः ॥ ४ ॥

४. जो काष्ठ-जल के भीतर जलते हैं और यज्ञ-काल में विप्र लोग जिसकी स्तुति करते हैं, वे ही आपांनपात् देवता ऐसा सुरस जल दें, जिसका पान करके इन्द्र बलशाली होकर वीरता प्रकट करें।

अथ पञ्चमी—

याभिःसोमोमोदतेहर्षतेचकल्याणीभिर्युवतिभिर्नमर्यः ।
ताअध्वर्योअपोअच्छापरेहियदोसिञ्चाओषधीभिःपुनीतात्॥५॥२४॥

याभिः । सोमः । मोदते । हर्षते । च । कल्याणीभिः । युवतिऽभिः ।
न । मर्यः । ताः । अध्वर्यो इति । अपः । अच्छ । परा । इहि ।
यत् । आऽसिञ्चाः । ओषधीभिः । पुनीतात् ॥ ५ ॥ २४ ॥

अभिषुतः सोमः याभिर्वसतीवर्येकधनाख्याभिरद्भिः सह मोदते मुदितोभवति हर्षते च पुनरुक्तिरादरार्था अत्यर्थं हृष्यतीत्यर्थः । तत्र दृष्टान्तः—कल्याणीभिः कमनीयाभिर्युवतिभिस्तरुणीभिः सह मर्योन यथा मनुष्योमोदते तद्वत् । हे अध्वर्यो त्वं तास्तादृशीरपः अच्छाभिप्राप्तुं

परेहि जलाशयं प्रति गच्छ। किञ्च यद्वा आहताभिस्ताभिः आसिंचाः आसमन्तात्सोमान्सिञ्चसि तदा ओषधीभिः सोमैः सह अपश्च पुनीतात् दशापवित्रेण पुनीहि ॥ ५ ॥

५. जिन जलों में मिलकर सोम अतीव विस्मयकर हो जाते हैं, जैसे पुरुष सुन्दरी युवतियों से मिलने पर आनन्दित होते हैं, वैसे ही उन जलों के साथ मिलने पर सोम आनन्दित होते हैं। पुरोहितो, ऐसे ही जल लाने को जाओ। जल लाकर सेचन करने पर सोम-लता शोधित होती है।

॥ इति सप्तमस्य सप्तमे चतुर्विंशोवर्गः ॥ २४ ॥

एवेद्यूनेयुवतयोनमन्तयदीमुशन्नुशतीरेत्यच्छ।
संजानतेमनसासंचिकित्रेध्वर्यवोधिषणापश्चदेवीः ॥ ६ ॥

एव। इत्। यूने। युवतयः। नमन्त। यत्। ईम्। उशन्।
उशतीः। एति। अच्छ। सम्। जानते। मनसा। सम्। चिकित्रे।
अध्वर्यवः। धिषणा। आपः। च। देवीः ॥ ६ ॥

युवतयस्तरुण्यः स्त्रियः यूने तरुणाय नमंत यथा प्रह्वीभवन्ति एव एवं वसतीवर्येकधनाख्याआपः सोमाय प्रह्वीभवन्ति। यद्वा युवतयः सोमेन सह मिश्रयित्र्यः आपः यूने अभिषवादिकर्मणा आत्मना सह मिश्रयित्रे कर्त्रे अध्वर्यवे नमन्त प्रह्वीभवन्त्येव। इदितिपूरणः। कदा यद्यदा उशन् अभिषवार्थं वसतीवरीः कामयमानः सोमः सोमाभिषवं कर्तुं कामयमानोध्वर्युर्वा उशतीः सोमेन सह मिश्रीभावमभिषवादिकर्मांगभावं च कामयमानाः ईमेनाअपः अच्छ प्राप्तुं एति गच्छति तदा उपनमन्ते अध्वर्यवः धिषणा तदीया स्तुतिलक्षणा वाक्च देवीर्दिव्यः अपः आपश्च मनसा विशिष्टया बुद्ध्या संजानते सम्यक् जानन्ति संचिकित्रे स्वं स्वमधिकारं परस्परोपकारं च चक्षुषा सम्यक् पश्यन्ति ॥ ६ ॥

६. जिस समय कोई युवा पुरुष, प्रेम के साथ, प्रेम से पूर्ण युवतियों की ओर जाते हैं, उस समय जैसे युवतियाँ उस युवा के प्रति अनुकूल होती हैं, वैसे ही जल सोम के प्रति अनुकूल होते हैं। पुरोहितों और उनके स्तोत्रों से जलस्वरूप देवों का विशेष परिचय है। दोनों अपने-अपने कार्यों की ओर दृष्टि रखते हैं।

योवोवृताभ्योअकृणोदुलोकंयोवोमह्याअभिशस्तेरमुञ्चत्।
तस्माइन्द्रायमधुमन्तमूर्मिंदेवमादनंप्रहिणोतनापः ॥ ७ ॥

यः। वः। वृताभ्यः। अकृणोत्। ऊँ इति। लोकम्। यः। वः।
मह्याः। अभिऽशस्तेः। अमुञ्चत्। तस्मै। इंद्राय। मधुऽमन्तम्।
ऊर्मिम्। देवऽमादनम्। प्र। हिणोतन। आपः ॥ ७ ॥

यश्चन्द्रः वृताभ्यः मेघैरावृताभ्यः परिवेष्टिताभ्यः वोयुष्मभ्यं अद्भ्यः लोकं मेघोदरान्निर्गमनमार्गं अकृणोदकरोत्। उइतिपूरणः। किञ्च यः वोयुष्मान् महा महत्याः अभिशस्तेर्मेघपरिवेष्टनाभिर्हिंसनात् अमुंचत् मोचितवान्। हे आपः यूयं तस्मै तादृशायेन्द्राय मधुमन्तं मधुरस्वादयुक्तं देवमादनं इन्द्रादिदेवानां सोमेन सह मिश्रीभूय तर्पयितारं ऊर्मिं अप्संघातं प्रहिणोतन अस्मद्यज्ञं प्रतिगमयत सोमाभिषवकर्मणिभायाय प्रस्थापयत ॥ ७ ॥

७. जलगण, तुम्हारे रोके जाने पर जो तुम्हें निकलने के लिए मार्ग देते हैं और जो तुम्हें विषम निरोध से छुड़ाते हैं, उन्हीं इन्द्र के प्रति मधु-पूर्ण और देवों के लिए मत्तता-जनक तरंग प्रेरित करो।

प्रास्मैहिनोतमधुमन्तमूर्मिंगर्भोयोवःसिन्धवोमध्वउत्सः।
घृतपृष्ठमीड्यमध्वरेष्वापोरेवतीःशृणुताहवंमे ॥ ८ ॥

प्र। अस्मै। हिनोत। मधुऽमन्तम्। ऊर्मिम्। गर्भः। यः। वः।
सिन्धवः। मध्वः। उत्सः। घृतऽपृष्ठम्। ईड्यम्। अध्वरेषु।
आपः। रेवतीः। शृणुत। हवम्। मे ॥ ८ ॥

अत्र यच्छब्दसंबंधात् द्वितीयः पादः पूर्वं व्याख्येयः हे सिन्धवः स्यन्दनशीलाः आपः वोयुष्माकं योगर्भः मध्वोमधुररसस्य उत्सउत्स्यन्दनः प्रस्रवणः यच्छब्दयोगात्तच्छब्दोध्याहार्यः तं मधुमन्तं मधुररसोपेतं ऊर्मिमप्संघातं सारमित्यर्थः अस्मै अस्येन्द्रस्यार्थाय प्रहिनोत प्रहिणुत प्रगमयत। कीदृशं अध्वरेषु यज्ञेषु घृतपृष्ठं घृतमाज्यं पृष्ठे यस्य तं पश्चाद्घृतपातिनमित्यर्थः। ईड्यं स्तुत्यं। किञ्च हे आपः यूयं रेवतीः रेवत्यः अस्मभ्यं यानि धनानि दातव्यानि तैर्धनवत्यः मे मदीयं हवमाह्वानं शृणुत ॥ ८ ॥

८. क्षरणशील जल, तुम्हारे लिए गर्भस्वरूप और मधुर रस से युक्त जो प्रस्रवण है, उसकी मधुर तरंग को इन्द्र के पास प्रेरित करो। धनशाली जल मेरा आह्वान सुनो। मेरे आह्वान में यज्ञ के लिए घृतवान किया जाता है और तुम्हारा स्तोत्र किया जाता है।

तंसिन्धवोमत्सरमिन्द्रपानमूर्मिंप्रहेतयउभेइयर्ति।
मदच्युतमौशानंनभोजांपरिंत्रितंतुंविचरन्तमुत्सम् ॥ ९ ॥

तम्। सिन्धवः। मत्सरम्। इन्द्रऽपानम्। उर्मिम्। प्र। हेतयः।
उभे इति। इयर्ति। मदऽच्युतम्। औशानम्। नभःऽजाम्।
परि। त्रिऽतन्तुम्। विऽचरन्तम्। उत्सम् ॥ ९ ॥

हे सिन्धवः स्यन्दनशीलाआपः योयुष्मदीयः सारभूतः समूहः उभे अस्मभ्यं दृष्टादृष्टफले दाता सन् इयर्ति कर्मांगभावं प्रतिपद्यते मत्सरं मादयितारं इन्द्रादिदेवानां तर्पयितारं इन्द्रपानं देवानां प्रमुखेनेन्द्रेण पानीयं तादृशं ऊर्मिमुदकसमूहं प्रहेत प्रगमयत अस्मद्यज्ञं प्रति प्रेरयत । कीदृशं मदच्युतं मदस्य च्यावकं औशानं सोमेन सह मिश्रीभावं कामयमानं नभोजां नभस्यन्तरिक्षे वृष्टिरूपेण जातं परि सर्वतः वितंतुं त्रयाणां लोकानां तनितारं विस्तारयितारं विचरन्तं यज्ञपात्रेषु गच्छन्तं उत्सं उत्स्यन्दनं तर्पयितारं देवान्प्रतिऊर्ध्वं गन्तारमित्यर्थः ॥ ९ ॥

९. जल, तुम्हारी जो तरंग इस लोक और परलोक के लिए हितकर होती है, उसी मदकारक तरंग को इन्द्र के पान के लिए प्रेरित करो। ऐसी तरंग भेजो, जो मद करण करे, जो कामना बढ़ावे, जिसकी उत्पत्ति आकाश में है और जो तीनों लोकों में विचरण करते हुए ऊपर उठ जाती है।

अपोनप्त्रीये एकधनास्वावृत्तासु आवर्वृततीरित्येषा । सूत्रितश्च—आवर्वृततीरधनुद्विधाराइत्यावृत्तास्वेकधनास्विति । तत्रैव हिनोतानइत्येषा । सूत्रंपूर्वमुदाहृतं ।

आवर्वृततीरधनुद्विधारागोषुयुधोनर्नियवंचरन्तीः ।
ऋषेजनित्रीर्भुवनस्यपत्नीरपोवन्दस्वसृदृधःसयोनीः ॥ १० ॥२५॥

आऽवर्वृततीः । अध । नु । द्विऽधाराः । गोषुऽयुधः । न ।
निऽयवम् । चरन्तीः । ऋषे । जनित्रीः । भुवनस्य । पत्नीः ।
अपः । वन्दस्व । सऽदृधः । सऽयोनीः ॥ १० ॥ २५ ॥

अधाथानन्तरं गोषु युधोन गोषु निमित्तभूतासु मेघैः सह युध्यतइति गोषुयुदिन्द्रः तस्य यथा वृष्टिलक्षणाआपः द्विधाराः द्विशब्दोनेकत्ववाची अनेकधाराः अपर्यन्तधाराइत्यर्थः अस्माकमप्येवं स्थिताः आवर्वृततीः आवृत्ताः नियवं सोमं प्रतिनियतं यवं मिश्रीभावं चरन्तीः गच्छन्तीः भुवनस्य लोकस्य जनित्रीः जनयित्रीः पत्नीः पालयित्रीश्च सदृधः सह सोमस्य वर्धयित्रीः सयोनीः सोमेन सह समानस्थानाः हे ऋषे मदीयान्तरात्मन् अध्वर्यो वा त्वं एवंभूताअपः नु क्षिप्रं वन्दस्व स्तुहीत्यर्थः ॥ १० ॥

१०. जो इन्द्र जल के लिए युद्ध करते हैं, उनकी आज्ञा से जल नाना धाराओं में बार-बार गिरकर सोम के साथ मिलता है। जल संसार की माता के सदृश और संसार की रक्षिका के समान है। वह सोम के साथ मिलता है, वह आत्मीय है। ऋषि, ऐसे जल की वन्दना करो।

॥ इति सप्तमस्य सप्तमे पञ्चविंशोवर्गः ॥ २५ ॥

अथैकादशी—

हिनोतानोअध्वरंदेवयज्याहिनोतब्रह्मसनयेधनानाम् ।
ऋतस्ययोगेविष्यध्वमूधःश्रुष्टीवरीर्भूतनास्मभ्यमापः ॥ ११ ॥

हिनोत । नः । अध्वरम् । देवऽयज्या । हिनोत । ब्रह्म । सनये ।
धनानाम् । ऋतस्य । योगे । वि । स्यध्वम् । ऊधः ।
श्रुष्टीऽवरीः । भूतन । अस्मभ्यम् । आपः ॥ ११ ॥

हे ऋत्विजः हिनोत प्रहिणुत प्रगमयत प्रोत्सर्पयत नोस्माकं एतमध्वरं यज्ञं देवयज्या देवयज्यायै देवयजनार्थं। किञ्च प्रहिणुतब्रह्मस्तुत्याख्यं यथाशास्त्रक्रमेण सनये लब्धयेस्माकं धनानां किञ्च ऋतस्य यज्ञस्य योगे संयोगे यदेतदूधरिव सोमपूर्णमधिषवणचर्म वर्तते। अथवा सोमसंबद्धशकटं योगः तद्धि तर्हि युज्यते तेनाधिषवणचर्मोधसोधस्तादवस्थितेनेति मन्यमानोनिरुक्तकारोब्रवीति यज्ञेशकटेइति। यदेतद्यज्ञशकटस्याधस्तादुपरिवाधिषवणचर्मैतद्विस्यध्वं विमुंचध्वं प्रहचमसस्थाल्यादिषु योनिषेकः सोमस्य एतद्विमोचनमधिषवणचर्मोधसः तद्धिसोमउत्सिच्यमाने श्लथीभवति। यथेतरं गोरूधोदुह्यमानायां गवि एवमृत्विजउक्त्वाधुनैषसोमसंमिश्राअपोब्रवीति यूयमपि हे आपः एभिर्मत्विग्भिरुत्सिच्यमानाः श्रुष्टीवरीः सुखवत्योभूतन भवतास्मभ्यम्। एवमत्र प्रशब्देनार्थस्य सुतरां प्रकटनाभवतीति भाष्यकारेण प्रशब्दोध्याहृतः प्रहिणुतेति अध्वरमित्यनेनसंबंधाद हिनोतेर्गत्यर्थत्वमुपपद्यते । एतस्याऋचोव्याख्यानं निरुक्तटीकायाउद्धृतं ॥ ११ ॥

११. जल, देवों के यज्ञ के लिए हमारे यज्ञ-कार्य में सहायता करो। धन-प्राप्ति के लिए हमारे पास पवित्रता प्रेरित करो। यज्ञानुष्ठान के समय अपने दुग्ध-स्थान का द्वार खोलो। हमारे लिए सुखकर होओ।

प्रातरनुवाकस्यापोरेवतीरित्येषा प्रतिपत्। सूत्रितंच—आपोरेवतीःक्षयथाहिवस्व उपप्रयन्तइतिसूक्ते इति।

तत्रैषा द्वादशी—

आपोरेवतीःक्षयथाहिवस्वःक्रतुंचभद्रंबिभृथामृतंच ।
रायश्चस्थस्वपत्यस्यपत्नीःसरस्वतीतद्गृणतेवयोधात् ॥ १२ ॥

---

१ नि० ६. २२.।

आपः । रेवतीः । क्षयथ । हि । वस्वः । क्रतुम् । च । भद्रम् ।
बिभृथ । अमृतम् । च । रायः । च । स्थ । सुऽअपत्यस्य ।
पत्नीः । सरस्वती । तत् । गृणते । वयः । धात् ॥ १२ ॥

हे आपः रेवतीः रेवत्योधनवत्योयूयं वस्वः वसुनोधनस्य क्षयथ हि ईशिध्वे खलु। किञ्च भद्रं भजनीयं क्रतुं च सोमयागादिलक्षणं कर्म च अमृतं च अमृतममरणरूपं तज्जन्यफलं च बिभृथ धारयथ पुष्णीथ वा। तथा रायश्च धनस्य च स्वपत्यस्य शोभनपुत्रस्य च पत्नीः पत्न्यः पालयित्र्यः स्थ भवथ। तथा सरस्वती तदभिमानिनी देवता गृणते स्तुवते मह्यं तदिदं सर्वं वयोन्नलक्षणं धनं धात् दधातु ॥ १२ ॥

१२. जल तुम धन के प्रभु-स्वरूप इस कल्याणमय यज्ञ को सम्पन्न करो और अमृत ले आओ। धन और उत्तम सन्तानों के रक्षक होओ। स्तोता को सरस्वती धन दें।

अपोनप्त्रीये प्रतियदापइत्येषा। सूत्रितंच—प्रतियदापोअदृश्रमायतीरितिप्रतिदृश्यमानास्त्विति।

प्रतियदापोअदृश्रमायतीर्घृतंपयांसिबिभ्रतीर्मधूनि ।
अध्वर्युभिर्मनसासंविदानाइन्द्रायसोमंसुषुतंभरन्तीः ॥ १३ ॥

प्रति । यत् । आपः । अदृश्रम् । आऽइयतीः । घृतम् । पयांसि ।
बिभ्रतीः । मधूनि । अध्वर्युऽभिः । मनसा । सम्ऽविदानाः ।
इन्द्राय । सोमम् । सुऽसुतम् । भरन्तीः ॥ १३ ॥

हे आपः आयतीः अस्मद्यज्ञं प्रत्यागच्छन्तीः यत् सुपांसुलुगितिविभक्तेर्लुक् याः युष्मान् प्रत्यदृश्रं प्रतिपश्यामि घृतं सोमसंसृष्टमाज्यं मधूनि मधुसदृशानि मृष्टरसानि पयांस्युदकानि संभूय बिभ्रतीः यागकाले धारयन्तीः तथा अध्वर्युभिः मनसा अन्तःकरणेन संविदानाः संभाषमाणाः। किञ्च इन्द्रायेन्द्रार्थं सुषुतं सुष्ठु सुतं सोमं भरन्तीः धारयन्तीः एवं भूतास्ताः युष्मान्स्तौमीतिशेषः ॥ १३ ॥

१३. मैं देखता था कि, जल, तुम आते समय घृत, दुग्ध और मधु ले आते थे। पुरोहित लोग स्तुति के द्वारा तुमसे संभाषण करते थे। उत्तम रूप से प्रस्तुत सोम को तुम इन्द्र को देते थे।

अपोनप्त्रीये एमाअग्मन्निति द्वे। सूत्रितंच—एमाअग्मन्नेवतीर्जीवधन्याइति द्वे सन्नासूत्तरयापरिधायेति।

सैषा चतुर्दशी—

एमाअग्मन्रेवतीर्जीवधन्याअध्वर्यवःसादयतासखायः ।
निबर्हिषिधत्तनसोम्यासोपांनप्त्रासंविदानासएनाः ॥ १४ ॥

आ । इमाः । अग्मन् । रेवतीः । जीवऽधन्याः । अध्वर्यवः ।
सादयत । सखायः । नि । बर्हिषि । धत्तन । सोम्यासः ।
अपाम् । नप्त्रा । सम्ऽविदानासः । एनाः ॥ १४ ॥

रेवतीरेवत्योधनवत्यः जीवधन्याः जीवानां पापयित्र्यः प्रीणयित्र्योवा इमाईदृग्भूताआपः आग्मन् अस्मद्यज्ञं प्रत्यागच्छन् एतज्ज्ञात्वा हे सखायः सखिभूताहे अध्वर्यवः यूयं अपांनप्त्रा वृष्टिकर्मस्वधिष्ठितेन देवेन सह संविदानासः संविदानाः संगच्छमाणाः एनाः एताअपः सादयत स्थापयत । कुत्र सादयामीति उच्यते—सोम्यासः सोमसंपादिनः अध्वर्यवोयूयं बर्हिषि वेद्यामास्तीर्णे कुशमये निधत्तन नियमेन स्थापयत ॥ १४ ॥

१४. सब प्रकार का जल आ रहा है। यह धन का आधार और जीव के लिए हितप्रद है। पुरोहित बन्धुओ, जल की स्थापना करो। जल वृष्टि के अधिष्ठाता देवता के चिरपरिचित है। यह सोमरस के अनुकूल है। जल को कुश के ऊपर स्थापित करो।

अथ पंचदशी—

आग्मन्नापउशतीर्बर्हिरेदंन्यध्वरेअसदन्देवयन्तीः ।
अध्वर्यवःसुनुतेन्द्रायसोममभूदुवःसुशकादेवयज्या ॥ १५ ॥२६॥

आ । अग्मन् । आपः । उशतीः । बर्हिः । आ । इदम् । नि ।
अध्वरे । असदन् । देवऽयन्तीः । अध्वर्यवः । सुनुत । इन्द्राय ।
सोमम् । अभूत् । ऊँ इति । वः । सुऽशका । देवऽयज्या ॥ १५ ॥२६॥

आपः वसतीवर्यैकधनाख्याः इदं ईदृशं बर्हिर्वेदिस्तरणं उशतीरुशत्यः कामयमाना आग्मन् आआगच्छन् अस्मद्यज्ञं प्रति आगत्य च अध्वरे अस्मदीये यज्ञे देवयन्तीः देवान्कामयमानाः तर्पयितुमिच्छन्त्यइत्यर्थः न्यसदन् निषीदन् एतज्ज्ञात्वा हे अध्वर्यवः यूयं इन्द्रायेन्द्रार्थं

सोमं सुनुत अभिषुणुत इदानीमपां प्रसादाद् वोयुष्माकं देवयज्या देवानिन्द्रादीनुद्दिश्य क्रियमाणा यागक्रिया सुशका सुष्ठु कर्तुं शक्या अभूदासीदेव ॥ १५ ॥

१५. तत्परता के साथ जल कुश की ओर आता है। देखो, जल देवों के पास जाने के लिए यज्ञ-स्थान में बैठता है। पुरोहितो, इन्द्र के लिए सोम प्रस्तुत करो। इस समय जल आने पर तुम्हारी देव-पूजा सुसाध्य हुई है।

॥ इति सप्तमस्य सप्तमे षड्विंशोवर्गः ॥ २६ ॥

आनइत्येकादशर्चं द्वितीयं सूक्तं कवषस्यार्षं त्रैष्टुभं वैश्वदेवं अनुक्रान्तश्च—आनएकादशंवैश्वदेवमिति गतः सूक्तविनियोगः। एकादशिनस्य वैश्वदेवस्य पशोः पुरोडाशस्यानइत्येषानुवाक्या सूत्रितश्च—विश्वेअद्यमरुतोविश्वऊत्यानोदेवानामुपवेतुशंसइति।

आनोदेवानामुपवेतुशंसोविश्वेभिस्तुरैरवसेयजत्रः।
तेभिर्वयंसुषखायोभवेमतरन्तोविश्वादुरितास्याम ॥ १ ॥

आ। नः। देवानाम्। उप। वेतु। शंसः। विश्वेभिः। तुरैः।
अवसे। यजत्रः। तेभिः। वयम्। सुऽसखायः। भवेम।
तरन्तः। विश्वा। दुःऽइता। स्याम ॥ १ ॥

देवानां स्तोतॄणां नोस्माकं शंसः स्तोतव्यः यजत्रोयष्टव्यः एवंभूतः इन्द्रः तुरैः त्वरणशीलैः विश्वेभिः सर्वैर्मरुद्भिः सह अवसे अस्मद्यज्ञरक्षणार्थं आउपवेतु उपागच्छतु। वयमपि तेभिस्तैः सह सुसखायः शोभनसखायः स्याम भवेम। किञ्च विश्वा दुरिता विश्वानि दुरितानि पापानि तरन्तः स्याम ॥ १ ॥

१. हमारा स्तोत्र देवों के पास जाय। यज्ञ-देवता सारे शत्रुओं से हमें बचावें। उन देवों के साथ हमारी मैत्री हो। हम सारे पापों से छूटें।

अथ द्वितीया—

परिचिन्मर्तोद्रविणंममन्यादृतस्यपथानमसाविवासेत्।
उतस्वेनक्रतुनासंवदेतश्रेयांसंदक्षंमनसाजगृभ्यात् ॥ २ ॥

परि। चित्। मर्तः। द्रविणम्। ममन्यात्। ऋतस्य। पथा। नमसा।
आ। विवासेत्। उत। स्वेन। क्रतुना। सम्। वदेत।
श्रेयांसम्। दक्षम्। मनसा। जगृभ्यात् ॥ २ ॥

मर्तोमनुष्योयजमानः परिचित्सर्वतः द्रविणं विश्वेषां देवानां यागार्थं धनं ममन्यात् मन्यात् मन्यतिः कान्तिकर्मा कामयेत लब्धुमिच्छेत् धनं लब्ध्वा च ऋतस्य यज्ञस्य पथा मार्गेण नमसा हविराख्येनान्नेन आविवासेत् परिचरेत्। उतापिच स्वेनात्मीयेन क्रतुना प्रज्ञानेन मनसेत्यर्थः संवदेत संवादोत्र सम्यग्ध्यानमुच्यते हविर्गृहीत्वा वषट्करिष्यन् विश्वान्देवान्मनसा ध्यायेदित्यर्थः। विश्वेषां देवानां यागानन्तरं च तत्प्रसादात् श्रेयांसमतिशयेन प्रशस्यमात्मानं दक्षं प्रवृद्धं सर्वव्यापिनं मनसा ध्यानसाधनेनान्तःकरणेन जगृभ्यात् गृह्णीयात् ॥ २ ॥

२. मनुष्य सब प्रकार के धन की कामना करे, सत्य-मार्ग से पुण्यानुष्ठान में प्रवृत्त हो, अपने कर्म से कल्याणभागी बनें और मन में सुख प्राप्त करे।

अथ तृतीया—

अधायि धीतिरसंसृग्रमंशास्तीर्थेनदस्ममुपयन्त्यूमाः।
अभ्यानश्मसुवितस्यशूषंनवेदसोअमृतानामभूम ॥ ३ ॥

अधायि। धीतिः। असंसृग्रम्। अंशाः। तीर्थे। न। दस्मम्।
उप। यन्ति। ऊमाः। अभि। आनश्म। सुवितस्य।
शूषम्। नवेदसः। अमृतानाम्। अभूम ॥ ३ ॥

धीतिः देवयागक्रिया अधायि निहिता स्थापिता अस्माभिः प्रवर्तितेत्यर्थः तदनन्तरं ऊमाः अवितारः तर्पयितारः अंशाः अस्माभिर्दत्ताः हविर्भागाः दस्मं दर्शनीयं शत्रूणामुपक्षपयितारं वा असंसृग्रं असमानसृष्टिं उग्रजन्मानमित्यर्थः एवंभूतं देवसंघं उपयन्ति उपगच्छन्तु। तत्र दृष्टान्तः—तीर्थे न यथा गंगादितीर्थे तर्पणमुखेन विसृष्टाअपामंशादेवसंघमुपगच्छन्ति तद्वत्। तदनन्तरं वयं सुवितस्य सुइतस्य सुष्ठु प्राप्तस्य स्वर्गादिकस्य शूषं सुखं अभ्यानश्म अभिप्राप्नु[illegible] च वयं अमृतानां देवानां नवेदसोनवेदेत्येतस्मिन्नर्थे नवेदः शब्दोनञ्ज्ञाननञ्नवेदाइति निपातितः न न वेत्तारः वेत्तारएव स्वरूपतोज्ञातारएवेत्यर्थः अभूम भवेमेत्याशास्महे ॥ ३ ॥

३. यज्ञ-कार्य का प्रारम्भ किया गया है। सारे यज्ञीय द्रव्य, आवश्यकतानुसार छोटे-बड़े करके, रक्खे गये हैं। वे द्रव्य सुदृश्य और रक्षण के साधन हैं। अभियुत सोम का आस्वादन हमने किया है। देवता लोग स्वरूप से ही यह सब जाननेवाले हैं।

नित्यंश्वाकन्यात्स्वपतिर्दमूनायस्माउदेवःसविताजजान।
भगोवागोभिरर्यमेमनज्यात्सोअस्मैचारुश्छदयदुतस्यात् ॥ ४ ॥

नित्यः । चाकन्यात् । स्वऽपतिः । दमूनाः । यस्मै । ऊँ इति । देवः ।
सविता । जजान । भगः । त्वा । गोभिः । अर्यमा । ईम् ।
अनज्यात् । सः । अस्मै । चारुः । छदयत् । उत । स्यात् ॥ ४ ॥

नित्यः कल्पावस्थायी प्रजापतिः चाकन्यात् तस्मै दृष्टादृष्टफलं चाकनतु कामयतां । कीदृशः स्वपतिः स्वीयानां प्रजानां स्वामी धनपतिर्वा दमूनाः दानमनाः । कस्मै काममतामिति उच्यते । उ अपिच यस्मै यजमानाय मह्यं सविता सर्वस्य प्रेरकोदेवः जजान जनितवान् दृष्टादृष्टफलं दत्तवानित्यर्थः । वाशब्दः समुच्चये । तथा भगोदेवश्च गोभिरस्मदीयाभिः स्तुतिरूपाभिर्वाग्भिः अर्यमादेवश्च ईमीदृग्भूतं दृष्टादृष्टफलं अनज्यात् व्यक्तीकुर्यात् दद्यादित्यर्थः । उतापिच स्यात् अन्योपि योदेवगणोस्ति चारुः रमणीयः सोपिदेवगणः अस्मै यजमानाय मह्यं छदयत् दृष्टादृष्टफलं दातुं कामयतामित्येतदाशास्महे ॥ ४ ॥

४. अविनाशी प्रजापति दाता का अन्तःकरण धारण करके कृपा करें। यज्ञकर्त्ता को सविता-देव शुभ फल दें। भग और अर्यमा स्तुति के द्वारा प्रसन्न होकर स्नेह-युक्त हों। शेष सुन्दर मूर्त्ति सारे देवता यजमान के लिए अनुकूल हों।

इयंसाभूयाउषसामिवक्षायद्ध्क्षुमन्तःशवसासमायन् ।
अस्यस्तुतिंजरितुर्भिक्षमाणाआनःशग्मासउपयन्तुवाजाः॥५॥२७॥

इयम् । सा । भूयाः । उषसाम्ऽइव । क्षाः । यत् । ह । क्षुऽमन्तः ।
शवसा । सम्ऽआयन् । अस्य । स्तुतिम् । जरितुः । भिक्षमाणाः ।
आ । नः । शग्मासः । उप । यन्तु । वाजाः ॥ ५ ॥ २७ ॥

क्षुमन्तः क्षुशब्दोन्नवाची शब्दवाची वा अन्नवन्तः स्तुतिमन्तः कीर्तिमन्तोवेत्यर्थः एवंभूताः देवाः शवसा बलेन यत् यामस्मदीयां स्तुतिं प्रतिसमायन् समागच्छन्संप्राप्ताः सेयं स्तुतिर्देवानां प्राप्याभूयाः भूयात् भवतु उषसामिवक्षाः यथा पृथिवी उषसां व्याप्ता सर्वेषां प्राप्या भवति तद्वत्। किञ्च जरितुः स्तोतुरस्य मम स्तुतिं भिक्षमाणाः याचमानाः शग्मासः शग्ममिति सुखनाम सुखाः सुखकराः वाजाः सुधन्वनः पुत्राः त्रयोप्यृभुर्विभ्वावाजइत्येते नोस्मानाभिमुख्येन उपयन्तु उपगच्छन्तु ॥ ५ ॥

५. स्तोता के पास स्तोत्र पाने की कामना से जिस समय देवता लोग, कोलाहल करके, महावेग के साथ, आते हैं, उस समय, प्रातःकाल के समान हमारे लिए पृथिवी आलोकमयी हुई। सुखदाता नानाविध अन्न हमारे पास आवें। ॥ इति सप्तमस्य सप्तमे सप्तविंशोवर्गः ॥ २७ ॥

---

१ ऋ० सं० ३. ७. ३.

अस्येदेषासुमतिःपप्रथानाभवत्पूर्व्याभूर्मनागौः ।
अस्यसनीळाअसुरस्ययोनौसमानआभरणेबिभ्रमाणाः ॥ ६ ॥

अस्य । इत् । एषा । सुऽमतिः । पप्रथाना । अभवत् । पूर्व्या ।
भूर्मना । गौः । अस्य । सऽनीळाः । असुरस्य । योनौ ।
समाने । आ । भरणे । बिभ्रमाणाः ॥ ६ ॥

इत् इदानीं अस्य देवगणस्य संबंधिनी एषा सुमतिः सुष्टु स्तुतिः पप्रथाना भवत् विस्तीर्यमाणाभूत् अस्माभिः क्रियमाणाइत्यर्थः । कीदृशी पूर्व्या पूर्वकालीना भूमना भूम्ना बहुत्वेन युक्तेतिशेषः सर्वदेवसंबंधित्वात् भृशं जातेत्यर्थः गौः देवान्प्रति गन्त्री एतज्ज्ञात्वा सर्वे देवाअसुरस्य प्रजारूपबलवतः अस्य मम संबंधिनि समाने सर्वदेवसाधारणे भरणे सर्वेषां देवानां पुष्टिकरणे योनौ यज्ञाख्ये स्थाने सनीळाः समानस्थानाः बिभ्रमाणाः अस्मदर्थं दृष्टादृष्टफलं धारयन्तः आगच्छन्त्विति शेषः ॥ ६ ॥

६. हमारा स्तोत्र इस समय चिरपरिचित विशाल भाव धारण करके सारे देवों के पास जाने के लिए विस्तृत होता है। हमारे इस यज्ञ में समस्त देवता समान स्थान पर अधिकार करके नानाविध शुभ फल देने के लिए आवें। इससे मैं बलशाली बनूँगा।

किंस्विद्वनंकउसवृक्षआसयतोद्यावापृथिवीनिष्टतक्षुः ।
संतस्थानेअजरेइतऊतीअहानिपूर्वीरुषसोजरन्त ॥ ७ ॥

किम् । स्वित् । वनम् । कः । ऊँ इति । सः । वृक्षः । आस । यतः ।
द्यावापृथिवी इति । निःऽततक्षुः । सन्तस्थाने इति सम्ऽतस्थाने ।
अजरे इति । इतऊती इतीतःऽऊती । अहानि ।
पूर्वीः । उषसः । जरन्त ॥ ७ ॥

यतः यस्माद्वृक्षाद् द्यावापृथिवी द्यावापृथिव्यौ निष्टतक्षुः देवाः निःशेषेण कृतवन्तः सदृशोवृक्षः कउ आस कीदृग्वा बभूव तदुत्पादकं वनमरण्यं किंस्विद् सन्तस्थाने सम्यक् तिष्ठन्त्यौ अजरे जरावर्जिते इतऊती इतः एतेभ्योदेवेभ्योरक्षणं ययोस्ते । किञ्च अहानि सर्वाणि दिनानि पूर्वीर्बह्वीरुषसश्च देवाः निष्टतक्षुः एवंभूतान्देवान् जरन्तः स्तोतारः स्तुवन्ति ॥ ७ ॥

७. वह कौन वन और वह कौन वृक्ष है, जिससे उपादान लेकर इस द्युलोक और भूलोक का निर्माण किया गया है ? प्राचीन दिन और उषा जीर्ण हो गये हैं; परन्तु द्यावापृथिवी परस्पर संयुक्त हैं, एक भाव में स्थित हैं, न जीर्ण हैं, न पुरातन।

अथाष्टमी—

नैतावदेनापरोअन्यदस्त्युक्षासद्यावापृथिवीबिभर्ति ।
त्वचंपवित्रंकृणुतस्वधावान्यदींसूर्यंनहरितोवहन्ति ॥ ८ ॥

न । एतावत् । एना । परः । अन्यत् । अस्ति । उक्षासः ।
द्यावापृथिवी इति । बिभर्ति । त्वचम् । पवित्रम् । कृणुत ।
स्वधाऽवान् । यत् । ईम् । सूर्यम् । न । हरितः । वहन्ति ॥ ८ ॥

द्यावापृथिव्योः निर्माणरूपं एतावद्देवजातं सामर्थ्येन युक्तं इति न अपितु एना एतेभ्योदेवेभ्यः परः उत्कृष्टः अन्यदन्योहिरण्यगर्भोस्ति उक्षा सेक्ता प्रजानां स्रष्टेत्यर्थः हिरण्यगर्भः परमसूक्ष्मोवायुरूपोलिङ्गात्मापः प्रविश्य द्यावापृथिवी द्यावापृथिव्यौ बिभर्ति धारयति । किञ्च स्वधावान् बलवान् अन्नवान्वा सहिरण्यगर्भः पवित्रं पवित्रमयं त्वचं आत्मीयं शरीरं दीप्तं मयं वा कृणुत करोति । कदेति उच्यते—यद्यदा ईमिमां त्वचं हरितोश्वाः सूर्यं न वहन्ति न प्रापयन्ति तदेति सृष्टेः प्रागित्यर्थः ॥ ८ ॥

८. द्युलोक और भूलोक ही अन्तम नहीं हैं; इनके ऊपर भी और कुछ है । वह (ईश्वर) प्रजा का बनानेवाला और द्यावापृथिवी का धारण करनेवाला है । वह अन्न का प्रभु है । जिस समय सूर्य के घोड़ों ने सूर्य का वहन करना प्रारम्भ नहीं किया था, उसी समय उसने अपने शरीर का निर्माण किया था । अथ नवमी—

स्तेगोनक्षामत्येतिपृथ्वींमिहंनवातोविहवातिभूमं ।
मित्रोयत्रवरुणोअज्यमानोग्निर्वनेनव्यसृष्टशोकम् ॥ ९ ॥

स्तेगः । न । क्षाम् । अति । एति । पृथ्वीम् । मिहम् । न । वातः ।
वि । हवाति । भूमं । मित्रः । यत्र । वरुणः । अज्यमानः ।
अग्निः । वने । न । वि । असृष्ट । शोकम् ॥ ९ ॥

स्तेगः स्त्यै ष्ट्यै शब्दसंघातयोः रश्मिसंघातोआदित्यः पृथ्वीं विस्तीर्णां क्षां भूमिं तेजसा नात्येति नातिगच्छति मर्यादया तिष्ठतीत्येवमादित्यः स्तूयते वातोवायुरपि खलु भूम भूमिं मिहं वृष्टिं न विवाति समर्थोपि सन् विविधं न गमयति भूमिं प्रति सावशेषमेव वर्षतीति वातः स्तूयते यत्र यस्मिन्प्रजापतौ मित्रोदेवः अज्यमानोव्यज्यमानः व्यक्तीभवन्नुत्पाद्यमानइत्यर्थः शोकं स्वदीप्तिं व्यसृष्ट विसृजति सर्वतोविक्षिपति । तथा वरुणश्च व्यक्तीभवन्स्वदीप्तिं विक्षिपति । तत्र

दृष्टान्तः—अग्निर्दवानलः वने न यथा वृक्षसंघाते स्वदीप्तिं सर्वतोविसृजति तद्वत् तादृशं प्रजापतिं स्तौमीति शेषः ॥ ९ ॥

९. किरणधारी सूर्यदेव पृथिवी का अतिक्रम नहीं करते और वायु वृष्टि को अतीव छिन्न-भिन्न नहीं करते। मित्र तथा वरुण, प्रकट होकर, वन के बीच उत्पन्न अग्नि के समान चारों ओर प्रकाश को विस्तारित करते हैं। अथ दशमी—

स्तरीर्यत्सूतसद्योअज्यमानाव्यथिरव्यथीःकृणुतस्वगोपा ।
पुत्रोयत्पूर्वःपित्रोर्जनिष्टशम्यांगौर्जगारयद्ध पृच्छान् ॥ १० ॥

स्तरीः । यत् । सूत । सद्यः । अज्यमाना । व्यथिः । अव्यथीः । कृणुत । स्वऽगोपा । पुत्रः । यत् । पूर्वः । पित्रोः । जनिष्ट । शम्याम् । गौः । जगार । यत् । ह । पृच्छान् ॥ १० ॥

अरण्याकारभूतां शमीं गोत्वेन निरूपयति स्तरीर्निवृत्तप्रसवागौः सद्यः शीघ्रं अज्यमाना निपिष्यमानेरतस्कासती यद्यदा सूत वत्सं प्रसूते तदा व्यथिर्दुःखानां बाधयित्री स्वगोपा स्वायत्तगोप्तृका स्वभूतरक्षणा वा सती सा गौः अव्यथीः व्यथारहिताः प्रजाः कृणुत करोति । यदा शमी पुत्रस्थानीयमश्वत्थं प्रसूते तदानीमरण्याहरणाय तादृशमश्वत्थमन्विष्यतामृत्विजां अश्वत्थस्य जनयित्री शमी सुखहेतुर्भवतीत्यर्थः । शमीगर्भादश्वत्थादरणीआहर्तव्ये । श्रूयतेहि—शमीगर्भादग्निं मथ्नन्तीति । अपिच पूर्वः पुरातनः पुत्रः पुन्नाम्नोनरकाच्चाता यद्वा पुत्रस्थानीयोग्निः पित्रोर्जनयित्र्योररण्योः सकाशाद्यद्यदा जनिष्टमन्थनेन प्रादुर्भवति तदानीं गौः पृथिवीतयोररण्योर्मातृभूतां शम्यां अश्वत्थगर्भां तां शमीं सुपांसुलुगितिसुपोडचादेशः जगार उद्गिरति यद्ध यां खलु शमीं पृच्छान् ऋत्विजः पृच्छन्ति ईप्सन्ति गवेषयन्ति ॥ १० ॥

१०. रेतःसेक पाकर जैसे बूढ़ा गाय प्रसव करती है, वैसे ही अरणि (अग्निमन्थन काष्ठ) अग्नि को उत्पन्न करती है। अरणि संसार का क्लेश दूर करती है। जो अरणि की रक्षा करते हैं, उनको कष्ट नहीं होता। अग्नि दोनों अरणियों के पुत्र हैं—उन्होंने प्राचीन समय में अरणि-स्वरूप माता-पिता से जन्म ग्रहण किया था। यह जो अरणि-स्वरूप गाय है, वह शमी वृक्ष (शमी पर उत्पन्न अश्वत्थ वृक्ष) पर जन्म ग्रहण करती है। उसकी खोज की जाती है।

उतकण्वंनृषदःपुत्रमाहुरुतश्यावोधनमादत्तवाजी ।
प्रकृष्णायरुशदपिन्वतोधर्कृतमत्रनाकिरस्माअपीपेत् ॥ ११ ॥ २८ ॥

उत । कण्वम् । नृऽसदः । पुत्रम् । आहुः । उत । श्यावः । धनम् ।

आ । अदत्त । वाजी । प्र । कृष्णाय । रुशत् । अपिन्वत् ।
ऊर्धः । ऋतम् । अग्ने । नकिः । अस्मै । अपीपेत् ॥ ११ ॥ २८ ॥

उतापिच कण्वऋषिं नृषदः पुत्रमाहुः वेदवादिनोवदन्ति । उतापिच वाजी हविर्लक्षणान्नवान्कण्वः श्यामः श्यामवर्णः सन्नस्मादग्नेः सकाशाद् धनमादत्त अगृह्णाद् । कृष्णाय श्यामवर्णाय नार्षदाय कण्वाय अग्निरूधः रुशद् रोचमानं रूपं प्रापिन्वत् प्रासिञ्चद् । अग्नेरूर्ध्वं अग्निव्यतिरिक्तः कश्चिदपि देवः अस्मै कण्वाय ऋतं यज्ञं नकिरपीपेत् नावर्धत । युवं श्यावायरुशती मदत्तमित्युक्तं ॥ ११ ॥

११. कण्व ऋषि को नृसद का पुत्र कहा गया है । अन्न-युक्त और श्यामवर्ण कण्व ने धन ग्रहण किया था । उन्हीं श्यामवर्ण कण्व के लिए अग्नि ने अपने रोचक रूप को प्रकट किया था । अग्नि के लिए कण्व के अतिरिक्त किसी ने भी वैसा यज्ञ नहीं किया था ।

॥ इति सप्तमस्य सप्तमेष्टाविंशोवर्गः ॥ २८ ॥

प्रसुग्मन्तेति नवर्चं तृतीयं सूक्तं आदितः पञ्चजगत्यः चतस्रस्त्रिष्टुभः पूर्ववदग्निदेवते । तथाचानुक्रान्तम्—प्रसुग्मन्तानव पञ्चाद्याजगत्यइति । गतोविनियोगः ।

प्रसुग्मन्तांधियसानस्यसक्षणिंवरेभिर्वरांअभिषुप्रसीदतः ।
अस्माकमिन्द्रउभयंजुजोषतियत्सोम्यस्यान्धसोबुबोधति ॥ १ ॥

प्र । सु । ग्मन्ता । धियसानस्य । सक्षणि । वरेभिः । वरान् । अभि ।
सु । प्रऽसीदतः । अस्माकम् । इन्द्रः । उभयम् । जुजोषति ।
यत् । सोम्यस्य । अन्धसः । बुबोधति ॥ १ ॥

इन्द्रः स्वभूतौ हरी धियसानस्य इन्द्रागमनं चिन्तयतोयजमानस्य मनः संबंधिनिसक्षणि सेवायां मदुणके सेव्ये यज्ञेनिमित्तेग्मन्ता आगच्छन्तौ सु सुष्ठु प्रेरयति ततः सइन्द्रः वरेभिर्वरणीयैर्मार्गैः प्रसीदतः हविरासादयतोयजमानस्य परानुत्कृष्टान् हविर्विशेषान्स्तुतिविशेषांश्चाभिउक्षीकृत्य सुष्ठु आगच्छतु सइन्द्रआगतः सन् अस्माकं स्वभूतं उभयं हविश्च स्तुतिश्चैतद्द्वयं जुजोषति सेवतां भक्षयतु शृणोतु चेत्यर्थः । यद्यदा सोम्यस्य सोमसंपादिनोमम अन्धसः अन्नरूपस्य सोमस्य रसमितिशेषः बुबोधति बुध्यते जिह्वया विजानाति सोमं पिबतीत्यर्थः तदा जुजोषतीति पूर्वेण संबंधः ॥ १ ॥

१. यज्ञ-कर्ता इन्द्र का ध्यान करता है । उसकी सेवा ग्रहण करने के लिए इन्द्र अपने अश्वों को यज्ञ की ओर प्रेरित करते हैं । हरि नाम के दोनों अश्व विचित्र गति से आ रहे हैं । प्रसन्न मन से यजमान उत्तमोत्तम सामग्री देता है—इन्द्र भी उत्तम-उत्तम वर लेकर आ रहे हैं । जिस समय इन्द्र सोमरस और आहारीय द्रव्य का आस्वादन पाते हैं, उस समय हमारे स्तोत्र और होमीय द्रव्य (हवि आदि) का ग्रहण करते हैं ।

---

१ ऋ० सं० १. ८. १४. ।

वीन्द्रयासिदिव्यानिरोचनाविपार्थिवानिरजसापुरुष्टुत ।
येत्वावहन्तिमुहुरध्वराँउपतेसुवन्वन्तुवग्वनाँअराधसः ॥ २ ॥

वि । इन्द्र । यासि । दिव्यानि । रोचना । वि । पार्थिवानि । रजसा ।
पुरुऽस्तुत । ये । त्वा । वहन्ति । मुहुः । अध्वरान् । उप ।
ते । सु । वन्वन्तु । वग्वनान् । अराधसः ॥ २ ॥

हे इन्द्र दिव्यानि दिविभवानि रोचना रोचनानिदीप्तिस्वभावकानि ज्योतींषि यद्वा दिव्यान् लोकान्वियासि व्याप्नोषि हेपुरुष्टुत बहुभिः स्तुतेन्द्र पार्थिवानि पृथिव्यां भवानि रजसा आत्मीयेन ज्योतिषा विद्युल्लक्षणेन यद्वा रजःशब्दाच्छसआकारः पार्थिवान् लोकान् व्याप्नोषि येत्वदीयाअश्वाः मुहुः पुनःपुनः अध्वरानस्मदीयान्यज्ञान्प्रति त्वा त्वां उपावहन्ति समीपे प्रापयन्ति । तेश्वाः वग्वनान् वचनेन स्तुत्या संभजमानान् अराधसः धनरहितानस्मान् सुष्ठु वन्वंतु धनप्रदानार्थं संभजंतां ॥ २ ॥

२. बहुतों के द्वारा स्तुत इन्द्र, तुम प्रकाश विस्तार करते-करते विभिन्न स्वर्गीय धामों में विचरण करते हो। तुम ज्योति लेकर पृथिवी पर आगमन किया करते हो। तुम्हारे दो घोड़े तुम्हें जो यज्ञ में ढो ले आते हैं, वे हमें धनी करें; क्योंकि हमारे पास धन नहीं है। धन के लिए ही हम यह सब प्रार्थना-वचन उच्चारित करते हैं।

तदिन्मेछन्त्सद्वपुषोवपुष्टरंपुत्रोयज्जानंपित्रोरधीयति ।
जायापतिंवहतिवग्नुनासुमत्पुंसइन्द्रद्रोवहतुःपरिष्कृतः ॥ ३ ॥

तत् । इत् । मे । छन्त्सत् । वपुषः । वपुःऽतरम् । पुत्रः । यत् ।
जानम् । पित्रोः । अधिऽइयति । जाया । पतिम् । वहति ।
वग्नुना । सुऽमत् । पुंसः । इत् । भद्रः । वहतुः । परिऽकृतः ॥ ३ ॥

वपुषः वपूरूपं तद्वान् छन्त्सत् इन्द्रः कामयतां यदा पुत्रः जानं जन्म आत्मनउत्पत्तिं पित्रोर्मातापित्रोः सकाशादधीयति संकीर्तनद्वारेणाधिगच्छति सुब्रह्मण्याह्वानकाले अमुकशर्मणः पुत्रोयजतइत्यात्मनोजन्मसंकीर्तयति यद्वा यज्जननादागतं धनं पित्रोः सकाशात्पुत्रःअधिगच्छति तदेव महमिच्छतु जाया पत्नी पतिं यजमानं सुमत् कल्याणेन वग्नुना वाग्रूपेण शब्देन वहति आत्मसमीपं प्रापयति भद्रोभजनीयः परिष्कृतः संस्कृतः पुंसइत् पुंसः पत्युरेवार्थं वहतुर्जायायै प्रदातव्यः । तदुक्तं सुभद्रमर्यभोजनंबिभार्षीइति । यद्वा पुंसः अतिशूरस्येन्द्रस्यार्थाय भद्रः भजनीयः वहतुर्वहनशीलोदेवान्प्रति ससोमः परिष्कृतः संस्कृतोभवति तदेन्द्रः कामयतामित्यर्थः ॥ ३ ॥

---

१ ऋ० सं० ५. ७. १६. ।

३. जन्म ग्रहण करके पुत्र पिता से जो धन प्राप्त करता है, वह अतीव चमत्कारी धन है। इन्द्र मुझे देने की कामना करें। मीठे वचनों से पत्नी स्वामी को अपने पास बुलाती है। भली भाँति प्रस्तुत होकर सोमरस उस पुरुषार्थ-युक्त के पास जाता है।

तदित्सधस्थमभिचारुदीधयुर्गावोयच्छासन्वहतुंनधेनवः।
मातायन्मन्तुर्यूथस्यपूर्व्याभिवाणस्यसप्तधातुरिज्जनः॥ ४॥

तत्। इत्। सधऽस्थम्। अभि। चारु। दीधयुः। गावः।
यत्। शासन्। वहतुम्। न। धेनवः। माता। यत्। मन्तुः। यूथस्य।
पूर्व्या। अभि। वाणस्य। सप्तऽधातुः। इत्। जनः॥ ४॥

तदित् तदेव सधस्थं सहतिष्ठन्त्यत्रेति सधस्थं स्थानं यज्ञाख्यं चारु शोभनं अभिदीधय हे इन्द्र अभितो दीप्यस्व यद्यत्र गावः स्तुतिलक्षणावाचः इन्द्र आगच्छ हरिव आगच्छेत्येवमाद्याः शासन् अस्मद्यज्ञंप्रति त्वदागमनमाशासते। तत्र दृष्टान्तः—वहतुंन यथा धेनवो नवप्रसूतागावः प्रापणसाधनं गृहं आशासते तद्वत्। यतः आगत्य प्रकाशयेत्यत्र कारणमाह—यद्यस्मात् मन्तुः मन्यतिरर्चतिकर्मा अर्चकस्य मम स्वभूता माता देवतागणानां निष्पादयित्री स्तुतिर्यूथस्य यज्ञस्तोतृगणस्य पूर्व्या प्रथमभागिनी खलु यस्माच्चसप्तधातुः धार्यन्ते क्रियन्ते कर्माण्येभिरिति धातवश्छन्दांसि ऋतवो वा सप्तछन्दस्कः सप्तर्तुकः सप्तहोत्रात्मकोवायं जनः वाणस्यस्तुतिशब्दस्य अभिकर्ता खलु तस्माच्छीघ्रमागच्छेति भावः। यद्वा यत्कल्याणं तदेव स्थानमस्माकमभिधारय प्रयच्छ यस्मिन्स्थाने धेनवः पयः पदानेन प्रीणयित्र्योगावः वहतुं उह्यते पुरुषोनेनेति वहतुरन्नं पयोघृतादि तत्तु शासति नः संप्रत्यर्थे इदानीं प्रयच्छन्ति तथा यस्मिन्मन्तुः मन्तव्यापूजनीयापुत्रसमूहस्य माताभिगच्छति वाणस्य वाद्यस्य सप्तधातुः निषादादिसप्तस्वरोपेतो जनः अभिगच्छति तद्वत् तद्गुणोपेतं प्रयच्छेति भावः॥ ४॥

४. स्तुति-रूपिणी गायें जिस स्थान पर मिलती हैं, उस स्थान को, अपनी उज्ज्वल प्रभा के द्वारा, आलोकमय करो। स्तोत्रों की प्राचीन और पूजनीय जो माता (गायत्री) है, उसके सात छन्द (सात महाव्याहृतियाँ) उसी स्थान पर हैं।

प्रवोच्छारिरिचेदेवयुष्पदमेकोरुद्रेभिर्यातितुर्वणिः।
जरावायेष्वमृतेषुदावनेपरिवऊमेभ्यःसिञ्चतामधु॥ ५॥ २९॥

प्र। वः। अच्छ। रिरिचे। देवऽयुः। पदम्। एकः। रुद्रेभिः।
याति। तुर्वणिः। जरा। वा। येषु। अमृतेषु। दावने।
परि। वः। ऊमेभ्यः। सिञ्चत। मधु॥ ५॥ २९॥

हे यजमानाः देवयुः देवान्कामयमानो होता वो युष्माकं पदमच्छस्थानं प्रति प्ररिरिचे अतिरिक्तोभूत् अन्यहोतृभ्यःसकाशात् एकः मुख्यः इन्द्रः रुद्रेभिः रुद्रपुत्रैर्मरुद्भिः सह तुर्वणिः क्षिप्रगामीसन् याति गच्छति युष्मदीयं यज्ञं जरावा वाशब्दोप्यर्थे स्तुतिरपि एष्वमृतेषु मरणधर्मरहितेषु देवेषु दावने धनप्रदानाय समर्थो भवति तस्मात् वो यूयं छान्दसोवसादेशः ऊमेभ्यो रक्षितृभ्यो देवेभ्यः मधु मदकरं सोमं अद्भिः परिषिञ्चत ॥ ५ ॥

५. देवों के पास जो अग्नि जाते हैं, वे तुम्हारी भलाई के लिए दिखाई देते हैं। वे अकेले ही यज्ञों के साथ शीघ्र अपने स्थान पर जाते हैं। अमर देवतागण के बल का ह्रास होता है; इसलिए बन्धु-बान्धवों से युक्त होकर इन्द्र के लिए यज्ञीय मधु (सोम) डाल दो। तब ये लोग वर देंगे। ॥ इति सप्तमस्य सप्तमे एकोनत्रिंशोवर्गः ॥ २९ ॥

निधीयमानमपगूह्लमप्सुप्रमेदेवानांव्रतपाउवाच ।
इन्द्रोविद्वाँअनुहित्वाचचक्षतेनाहमग्नेअनुशिष्टआगाम् ॥ ६ ॥

निऽधीयमानम् । अपऽगूह्लम् । अपूऽसु । प्र । मे । देवानाम् ।
व्रतऽपाः । उवाच । इन्द्रः । विद्वान् । अनु । हि । त्वा ।
चचक्ष । तेन । अहम् । अग्ने । अनुऽशिष्टः । आ । अगाम् ॥ ६ ॥

कुरुश्रवणस्य यज्ञे निधीयमानोग्निरभिधीयते निधीयमानं अध्वर्युणा हवनीयेग्नौ अप्सु मातृभूतासु अपगूह्लं अन्तर्हितं देवानां व्रतपाः कर्मणोरक्षकः इन्द्रः मे मह्यं प्रोवाच प्रावादीत् हे अग्ने विद्वान् जानानइन्द्रः स्वाधिकारंमस्मद्भक्तां वा त्वा त्वां अनुहि चचक्ष अनुगतः पश्चाद्दर्शं तेनेन्द्रेणानुशिष्टोहं अनेन पथा त्वया स्वर्गोगन्तव्यइत्येवमुपदिष्टः सन् आगां आभिमुख्येन स्वर्गं गच्छेयं ॥ ६ ॥

६. देवों के लिए जो पुण्यानुष्ठान होता है, विद्वान् इन्द्र उसकी रक्षा करते हैं। इन्द्र ने कहा है कि, अग्नि जल में निगूढ़-रूप से हैं। अग्नि, उसी उपदेश के अनुसार मैं तुम्हारे पास आया हूँ।

अथ सप्तमी—

अक्षेत्रवित्क्षेत्रविदंह्यप्राट्सप्रैतिक्षेत्रविदानुशिष्टः ।
एतद्वैभद्रमनुशासनस्योतश्रुतंविन्दत्यञ्जसीनाम् ॥ ७ ॥

अक्षेत्रऽवित् । क्षेत्रऽविदम् । हि । अप्राट् । सः । प्र । एति ।
क्षेत्रऽविदा । अनुऽशिष्टः । एतत् । वै । भद्रम् । अनुऽशासनस्य ।
उत । श्रुतिम् । विन्दति । अञ्जसीनाम् ॥ ७ ॥

सेयमनुशासनस्तुतिः प्रासंगिकी अक्षेत्रविद् क्षिनिवासगत्योः क्षीयते गम्यतेनेनेति क्षेत्रं पंथाः पंथानमजानन्पुरुषः क्षेत्रविदं क्षेत्रज्ञं पुरुषं अप्राट् पृष्टवान् सक्षेत्रविदा पथिज्ञेन तेनानुशिष्टः प्रदर्शितमार्गः सन्पैति स्वाभिलषितदेशं गच्छति अनुशासनस्यस्वर्गोपदेशरूपस्य एतद्वै एतत्खलु भद्रं भजनीयं कल्याणकरं किंतत्। उतापिच अञ्जसीनां ऋजुना मार्गेण गन्तव्यानां अपां स्रुतिं मार्गं पिपासितः सन्विन्दति लभते। यद्वा अञ्जसीनामिति स्रुतेर्विशेषणं ऋजुमकुटिलं अप्रयासेन गन्तव्यमार्गं लभते खलु ॥ ७ ॥

७. यदि कोई किसी मार्ग को नहीं जानता, तो उसे जो व्यक्ति जानता है, उसी से उसे पूछता है। ज्ञाता व्यक्ति से जानकर वह अभीष्ट स्थान पर पहुँच सकता है। अभिज्ञ के कथनानुसार यदि तुम जल को खोजो, तो जहाँ जल है, वहाँ पहुँच सकते हो।

अ॒द्येदु॒प्राणी॒दम॑मग्नि॒माहापी॑वृतोअधयन्मा॒तुरू॒धः।
एमे॑नमापजरि॒मायुवा॑न॒महे॑ळन्वसु॑ःसु॒मना॑बभूव ॥ ८ ॥

अ॒द्य। इत्। ऊँ॒ इति॑। प्र। आ॒नी॒त्। अम॑मन्। इ॒मा। अहा॑। अपि॑ऽवृतः। अ॒ध॒य॒त्। मा॒तुः। ऊधः॑। आ। ई॒म्। ए॒न॒म्। आ॒प॒। ज॒रि॒मा। युवा॑नम्। अहे॑ळन्। वसुः॑। सु॒ऽमनाः॑। ब॒भू॒व॒ ॥ ८ ॥

अयमग्निः अद्येत् अद्यैवास्मिन्दिने प्राणीत् मन्थनेन चेष्टितोभवत् [श्वसप्राणने अनचेतिधातुः। तदानीमेव इमा इमानि अहा अहानि सौमिकानि अममन् नेतुममन्यत मनज्ञाने व्यत्ययेन श्लुः तिङ्उत्तरत्वादनिघातः। अपिच अपीवृतः तेजोभिः परिवृतः सन् मातुः पृथिव्याः ऊधः सारभूतं सोमादिकं हविरधयत् पिबति तथा युवानं नित्यतरुणं देवानां हविषा मिश्रयन्तं वा एनमग्निं जरिमा जरतिः स्तुतिकर्मा तस्माद्दौणादिकइमनिच्। स्तोतृभिः क्रियमाणा स्तुतिरापआभिमुख्येन चाप्नोति ईमिति पूरणः। ततः अहेळन् अक्रुध्यन् स्तोतॄन्प्रति वसुः वासयिता सर्वेषां धनदानेनाच्छादयिता तेजोभिः शत्रूणां वा वसुमान्वा अग्निः सुमनाः शोभनमनस्कोबभूव ॥ ८ ॥

८. आज ही ये (गोवत्सरूप) अग्नि उत्पन्न हुए हैं, कुछ दिनों से क्रमशः वृद्धि प्राप्त कर रहे हैं, जननी का स्तन पी चुके हैं। युवावस्था के साथ ही बुढ़ापा आगया है। वे सरलकर्मा, धनाढ्य और मनःप्रसाद-सम्पन्न हुए हैं। अथ नवमी—

ए॒तानि॑भ॒द्राक॑लशक्रियाम॒कुरु॑श्रवण॒दद॑तोम॒घानि॑।
वा॒नइद्गोम॑घवानः॒सोअ॑स्त्व॒यंच॒सोमो॑ऽहृ॒दियंबिभर्मि ॥ ९ ॥ ३० ॥

एतानि । भद्रा । कलश । क्रियाम । कुरुऽश्रवण । ददतः । मघानि ।
दानः । इत् । वः । मघऽवानः । सः । अस्तु । अयम् । च ।
सोमः । हृदि । यम् । बिभर्मि ॥ ९ ॥ ३० ॥

हे कलश कलावन् सर्वकलापरिपूर्ण यद्वा लुप्तमत्वर्थीयः द्रोणकलशवन् हे कुरुश्रवण कुरवऋत्विजः तेषां स्वभूतानां स्तुतीनां श्रोतः हेइन्द्र मघानि धनानि स्तोतृभ्योयष्टृभ्यश्च ददतः प्रयच्छतस्तवेन्द्रस्यार्थं एतानि भद्रा भजनीयानि हवींषि स्तोत्राणि च क्रियाम विधेयास्म करोतेराशीर्लिङि रिङ्शयग्लिङ्क्षिवति रिङादेशः । अथ स्तोतॄन्प्रत्याह हेमघवानः मंहनीयस्तोत्ररूपधनवन्तः वोयुष्माकं सइन्द्रः दानवत् धनादेर्दातैवास्तु भवतु अयंच यज्ञेस्थितः सोमोदातास्तु हृदि हृदये आत्मीये यं पीतं सोमं बिभर्मि धारयामि डुभृञ्धारणपोषणयोः जौहोत्यादिकः भ्रञ्जामिदित्यभ्यासस्येत्वं यथोगादनिघातः यद्वा हेकलश कुलजात हे कुरुश्रवण एतन्नामक ऋसदस्योः पुत्र राजन् ऋत्विग्भ्योधनानि प्रयच्छतस्तवार्थं वयं कर्माणि क्रियामहे मघवानः कुरुश्रवणाः पूजायां बहुवचनं पदं यागकर्म कुर्वाणस्य तव इन्द्रोदाता भवतु अयं सोमश्च धनानि प्रयच्छतु ॥ ९ ॥

९. सर्वकला-परिपूर्ण और स्तुतियों के श्रोता इन्द्र, तुम धन देते हो। तुम्हारे लिए ये स्तुतियाँ रची गई हैं। पूजनीय स्तोतृ-रूप धनवालो, तुम्हारे लिए इन्द्र दाता हों और जिस सोम को मैं हृदय में धारण करता हूँ, वे भी दाता हों।

॥ इति सप्तमस्य सप्तमे त्रिंशोवर्गः ॥ ३० ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके सप्तमोऽध्यायः ॥ ७

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितं वेदा योवेदेभ्योखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ १॥

अथसप्तमेष्टमोध्यायआरभ्यते। तत्र प्रमेति नवर्चं चतुर्थं सूक्तं ऐलूषस्य कवषस्यार्षं आद्या त्रिष्टुप् साच वैश्वदेवी द्वितीया तृतीये बृहतीसतोबृहत्यौ ऐंद्र्यौ पराः पङ्गायन्यः कुरुश्रवणमावृणीति द्वाभ्यां त्रसदस्युपुत्रस्य कुरुश्रवणनाम्नोराज्ञोदानं तुष्टाय अतस्तद्देवताके अथ यस्य प्रस्वादसइत्यादिभिश्चतसृभिः मित्रातिथिनाम्नि राज्ञि परलोकं गते शोकाभिभूतं तस्य पुत्रं उपमश्रवोनामानं कवषऋषिः स्नेहवशादवगत्यविगतशोकमकरोत् अतस्तासां तद्देवतात्वं। तथाचानुक्रान्तं—प्रमाद्यावैश्वदेव्यैंद्रः प्रगाथः परागायन्यो द्वे कुरुश्रवणस्य त्रासदस्यवस्य दानस्तुतिः पराभिर्मृते मित्रातिथौ राज्ञि तत्स्नेहादृषिरुपमश्रवसं पुत्रमस्य व्यशोकयदिति। गतोविनियोगः।

तत्र प्रथमा—

ॐम् प्रमायुयुज्रेप्रयुजोजनानांवहामिस्मपूषणमन्तरेण।
विश्वेदेवासोअधमामरक्षन्दुःशासुरागादितिघोषआसीत् ॥ १ ॥

प्र। मा। युयुज्रे। प्रऽयुजः। जनानाम्। वहामि। स्म। पूषणम्।
अन्तरेण। विश्वे। देवासः। अध। माम्। अरक्षन्। दुःऽशासुः।
आ। अगात्। इति। घोषः। आसीत् ॥ १ ॥

जनानां यजमानानां प्रयुजः प्रयोक्तारोदेवाः मा मां कवषमृषिं प्रयुयुज्रे कुरुश्रवणं प्रतियुक्तवन्तः अन्तरेण मार्गे पूषणं देवमध्वनां पतिं सखायमहं वहामिस्म ऊढवानस्मि। तथाच श्रूयते—ऐंद्राग्नमेकादशकपालंनिर्वपेद् जनतामेष्यन्नित्युपक्रम्य पौष्णंचरुमनुनिर्वपेदिति। अधअथ मार्गे विश्वेदेवासः विश्वेदेवामां कवषमरक्षन् रक्षितवंतः दुःशासुः केनापि दुःशासनोयमृषिः आगादागच्छतीति घोषः शब्दश्च मार्गआसीदभूत् ॥ १ ॥

१. जो देवता सबको कर्मों में लगाते हैं, उन्होंने मुझे प्रेरित किया। मैंने मार्ग में पूषा का वहन किया। विश्वदेवों ने मुझ कवष की रक्षा की। चारों ओर हल्ला मचा कि, दुर्द्धर्ष ऋषि आ रहे हैं।

---

१ तै० सं० २. २. १-।

संमातपन्त्यभितःसपत्नीरिवपर्शवः ।
निबाधतेअमतिर्नग्नताजसुर्वेर्नवेवीयतेमतिः ॥ २ ॥

सम् । मा । तपन्ति । अभितः । सपत्नीःऽइव । पर्शवः ।
नि । बाधते । अमतिः । नग्नता । जसुः । वेः । न । वेवीयते । मतिः ॥२॥

मा मां देवतामसादरहितं कवषं पर्शवः पार्श्वास्थीनि अन्नाभावाद्दौर्बल्याद् कुशयनाच्च सपत्नीरिव यथासपत्न्यः तद्वदभितउभयतः संतपंति दुःखयंतीत्यर्थः । किंच अमतिर्दारिद्र्यादागता दुर्मतिः सर्वार्थविषया सा निबाधते मां पीडयति वस्त्राभावादागता नग्नता च मां निबाधते जसुः अशनाभावादागतउपक्षयोपि मां निबाधते । किंच वेर्न यथा पक्षिणोमतिः शाकुनिकव्याधभयाद् कंपयते तथा मे मतिः शत्रोर्वेवीयते भृशं कंपयते ॥ २ ॥

२. सपत्नियों के समान मेरी पँजरियाँ (पार्श्वास्थियाँ) मुझे दुःख देती हैं । दुर्बुद्धि मुझे क्लेश देती है । मैं दीन, हीन और क्षीण हो रहा हूँ । पक्षी के समान मेरा मन चञ्चल हो रहा है ।

मूषोनशिश्नाव्यदन्तिमाध्यःस्तोतारंतेशतक्रतो ।
सकृत्सुनोमघवन्निन्द्रमृळयाधापितेवनोभव ॥ ३ ॥

मूषः । न । शिश्ना । वि । अदन्ति । मा । आऽध्यः । स्तोतारम् । ते ।
शतक्रतो इति शतऽक्रतो । सकृत् । सु । नः ।
मघऽवन् । इन्द्र । मृळय । अध । पिताऽइव । नः । भव ॥ ३ ॥

हे शतक्रतो बहुकर्मन् मघवन्निन्द्र ते तव स्तोतारं मा मां कवषं आध्यः आधयः मूषोन यथा मूषिकाः शिश्ना स्नातानि सूत्राण्यश्नंति तथा व्यदंति विविधमदंति । तथाच यास्कः—संतपंतिमामभितः सपत्न्यइवेमाः पर्शवः कूपपर्शवोमूषिकाइवास्नातानि सूत्राणि व्यदंति स्वांगाभिधानं वास्याव शिश्नानि व्यदंतीति वा संतपंति माध्यः कामाईति । तथा च सति हे इंद्र नोस्मान्सकृत्सुमृळयाभीष्टप्रदानेन सम्यक् सुखय अध अथ नोस्माकं पितेव यथा पिता तद्वद्रक्षिता भव ॥ ३ ॥

३. इन्द्र जैसे चूहे स्नायु को खाते हैं, वैसे तुम्हारा भक्त होने पर भी मेरी मनोव्यथा मुझे खा रही है । धनी इन्द्र, एक बार हमारे ऊपर कृपाकटाक्ष करो । हमारे पितृ तुल्य रक्षक बनो ।

---

१ नि० ४. ६. ।

अथ चतुर्थी—

कुरुश्रवणमावृणि राजानं त्रासदस्यवम् । मंहिष्ठं वाघतामृषिः ॥४॥

कुरुऽश्रवणम् । आवृणि । राजानम् । त्रासदस्यवम् । मंहिष्ठम् । वाघताम् । ऋषिः ॥ ४ ॥

ऋषिरतीन्द्रियार्थद्रष्टा कवषोऽहं त्रासदस्यवं त्रसदस्योः पुत्रं मंहिष्ठं धनानामतिशयेन दातारं कुरुश्रवणं कुरवश्रवणं तदीयानां स्तुतीनां श्रोतारं कुरुश्रवणं तन्नामकं राजानं वाघतां ऋत्विजामर्थाय अवृणि धनानि प्रार्थये ॥ ४ ॥

४. मैं कवष ऋषि हूँ। मैं त्रसदस्यु के पुत्र कुरुश्रवण राजा के पास याचना करने गया था; क्योंकि वे श्रेष्ठ दाता हैं।

यस्य मा हरितो रथे तिस्रो वहन्ति साधुया । स्तवै सहस्रदक्षिणे ॥५॥१॥

यस्य । मा । हरितः रथे । तिस्रः । वहन्ति । साधुऽया । स्तवै । सहस्रऽदक्षिणे ॥ ५ ॥ १ ॥

यस्य कुरुश्रवणाख्यस्य राज्ञः स्वभूतास्तिस्रोऽहरितः त्रयोऽश्वा रथे प्रस्थितं मा मां कवषं साधुया साधुवहंति कुरुश्रवणं राजानमहं सहस्रदक्षिणेऽस्मिन् यागे स्तवै स्तौमि प्रष्टिवाहिनं रथं च परिगृह्य ऋषिराशास्ते ॥ ५॥

५. मेरी दक्षिणा सहस्र-संख्या में दी जाती थी और सब उसकी श्लाघा करते थे। मेरे रथ पर चढ़ने पर तीन हरित-वर्ण घोड़े, भली भाँति वहन करते थे।

॥ इति सप्तमस्याष्टमे प्रथमोवर्गः ॥ १ ॥

अतःपरं यस्येत्यादिकेन सूक्तशेषेण मित्रातिथौ राज्ञि मृते तत्पुत्रस्योपमश्रवसः समीपमागत्य कवषः स्नेहात् शोकं निवारयति ।

अथ षष्ठी—

यस्य प्रस्वादसो गिर उपमश्रवसः पितुः । क्षेत्रं न रण्वमूचुषे ॥ ६॥

यस्य । प्रऽस्वादसः । गिरः । उपमऽश्रवसः । पितुः । क्षेत्रम् । न । रण्वम् । ऊचुषे ॥ ६ ॥

हे राजन् उपमश्रवसस्तव पितुर्यस्य मित्रातिथेर्गिरोवाचः प्रस्वादसः प्रकर्षेण स्वादयि-त्र्यः। तत्र दृष्टांतः—ऊचुषे सेवमानाय दरिद्राय दानार्थं प्रकल्पितं रण्वं रमणीयं क्षेत्रं न यथा क्षेत्रं स्वदयितृ तद्वदित्यर्थः। उत्तरत्र संबंधः॥ ६॥

६. मेरे पिता की कीर्त्ति दृष्टान्त देने का स्थल थी। पिता का वचन, सेवकों के निकट, रमणीय क्षेत्र के समान प्रसन्नता-कारक होता था।

अथ सप्तमी—

आधिपुत्रोपमश्रवोनपान्मित्रातिथेरिहि। पितुष्टेअस्मिवन्दिता॥७॥

अधि। पुत्र। उपमऽश्रवः। नपात्। मित्रऽअतिथेः। इहि। पितुः। ते। अस्मि। वन्दिता॥ ७॥

हे पुत्रोपमश्रवः मित्रातिथेर्नपात् पुत्रः त्वं अधीहि मत्समीपमागच्छ ते तव पितुस्तस्य मित्रातिथेरहं वंदिता स्तोतास्मि एतत् ज्ञात्वा शोकं मा कुरु यद्देयं द्रव्यमस्ति तत्सर्वं मह्यं देहि॥ ७॥

७. उपमश्रवस, तुम मित्रातिथि के पुत्र हो। मेरे पास आओ। मैं मित्रातिथि का स्तोता हूँ। शोक मत करो। देने योग्य धन मुझे दो।

अथाष्टमी—

यदीशीयामृतानामुतवामर्त्यानाम्। जीवेदिन्मघवामम॥ ८॥

यत्। ईशीय। अमृतानाम्। उत। वा। मर्त्यानाम्। जीवेत्। इत्। मघऽवा। मम॥ ८॥

उतापि च यद्यमृतानां देवानां मर्त्यानां मनुष्याणां वा मरणहेतूनामीशीय अहमीश्वरः स्यां तर्हि मम कण्वस्य याज्योमघवा धनवान्मित्रातिथीराजा जीवेत् प्राणान् धारयेत्। तथाच नाहं मरणहेतोरीश्वरस्तस्मादयं राजा मृतइत्यर्थः॥ ८॥

८. यदि मैं अमर देवों और मरणशील मनुष्यों का स्वामी होता, तो धनवान् मित्रातिथि अवश्य जीवित रहते।

अथ नवमी—

नदेवानामतिव्रतंशतात्मा चनजीवति। तथायुजाविवावृते॥ ९॥२॥

न। देवानाम्। अति। व्रतम्। शतऽआत्मा। चन। जीवति। तथा। युजा। वि। वृते॥ ९॥ २॥

देवानां ब्रह्मादीनां व्रतं मर्यादालक्षणं कर्म अतिक्रम्य शतात्मा चन शतवत्सरः कश्चन न जीवति । तथा युजा सहायादिना विवृते विवर्तते वियुक्तोभवति इति ज्ञात्वा शोकं मा कुर्वित्यर्थः ॥ ९ ॥

९. एक सौ प्राण रहने पर भी देवों के अभिप्राय के विरुद्ध कोई नहीं जीवित रह सकता । इसी से हमारे सहचरों से हमारा वियोग हुआ करता है । ॥ इति सप्तमस्याष्टमे द्वितीयोवर्गः ॥ २ ॥

प्रावेपाइति चतुर्दशर्चं पंचमं सूक्तं ऐलूषस्य कवषस्यार्षं मौजवतः पुत्रस्याक्षाख्यस्य वा । सप्तमी जगती शिष्टास्त्रयोदशत्रिष्टुभः अत्र द्वादशयक्षान् स्तौति नवम्याद्या चातस्तास्तद्देवत्याः सप्तमी त्रयोदशी च ऋषिंस्तौति अतस्तयोः सा देवता एवं पंच गताः । शिष्टाभिर्नवभिः कितवोक्षाश्च निंद्यंते अतस्ताअपि तद्देवत्याः । तथाचानुक्रांतं—प्रावेपाः षळूना मौजवान्वाक्षोक्षकृषिप्रशंसा चाक्षकितवनिंदा च सप्तमी जगतीति । गतोविनियोगः ।

तत्र प्रथमा-

प्रावेपामाबृहतोमादयन्तिप्रवातेजाइरिणेवर्द्धतानाः ।
सोमस्येवमौजवतस्यभक्षोविभीदकोजागृविर्मह्यमच्छान् ॥ १ ॥

प्रावेपाः । मा । बृहतः । मादयन्ति । प्रवातेऽजाः । इरिणे ।
वर्द्धतानाः । सोमस्यऽइव । मौजऽवतस्य । भक्षः । विऽभीदकः ।
जागृविः । मह्यम् । अच्छान् ॥ १ ॥

बृहतोमहतोविभीतकस्य फलत्वेन संबंधिनः प्रवातेजाः प्रवणे देशे जाताः इरिणे आस्फारे वर्द्धतानाः प्रवर्तमानाः प्रावेपाः प्रवेपिनः कंपनशीलाः अक्षाः मा मां मादयंति हर्षयंति । किंच जागृविः जयपराजययोर्हर्षशोकाभ्यां किंतवानां जागरणस्य कर्ता विभीदकोविभीतक-

---

१ दिशोभ्यय॰राजाभूदिति पंचाक्षान्प्रयच्छति एते वै सर्वे याः । अपराजायिनमेवैनंकरोति । अक्षाःकपर्दकाः । सुवर्णनिर्मितविभीतकफलानि सौवर्णानीत्येके । तेचाक्षाः द्यूतस्थाने निवपनीयाः । तथाचापस्तंबेन दर्शितं—अक्षावापोधिदेवनमुद्धृत्यावोक्ष्याक्षान्निर्वपेत्सौवर्णान्परःशताम्परःसहस्रान्वेति । तेभ्यःपंचाक्षानुद्धृत्यजितवानयंराजेत्यभिप्रायेण तस्मै राज्ञे दद्यात् एतएवपंचाक्षा अयाः सर्वे संपद्यंते अयशब्दोक्षवाची पंचदिग्वर्त्यक्षाभिप्रायेण पंचाक्षाणां दत्तत्वात् राशिस्थाः सर्वेप्यक्षादत्ताभवंति तथासत्येनं यजमानं अपराजायिनं कदाचिदपि पराजयरहितमेव करोति ।

विकाराक्षोमहं मां अच्छान् अचच्छदत् अत्यर्थं मादयति । तत्र दृष्टांतः—सोमस्येव यथा सोमस्य मौजवतस्य मुजवति पर्वते जातोमौजवतस्तस्य तत्र सुत्तमः सोमोजायते । भक्षः पानं यजमानान् देवांश्च मादयति तद्वदित्यर्थः । तथाच यास्कः—प्रवेपिणोमामहतोविभीतकस्य फलानिमादयंति प्रवातेजाः प्रवणेजा इरिणे वर्तमानाइरिणं निर्कृणं कृणातेरपार्णं भवत्यपरताअस्मादोषधयइति वासोमस्येव मौजवतस्य भक्षोमौजवतोमुजवति जातोमुजवान्पर्वतोमुंजवान्मुंजोविमुंचतीपीकामिषीकैषतेर्गतिकर्मणइयमपीतरेषीकैतस्मादेवविभीतकोविभेदनाद् जागृविर्जागरणाद् मह्यमवच्छददिति ॥ १ ॥

१. बड़े-बड़े पासे जिस समय नक्शे (पासा खेलने के स्थान) के ऊपर इधर-उधर चलते हैं, उस समय उन्हें देखकर मुझे बड़ा आनन्द होता है। मूजवान् पर्वत पर उत्पन्न उत्तम सोमलता का रस पीकर जैसे प्रसन्नता होती है, वैसे ही बहेरे (वृक्ष) के काठ से बना अक्ष (पासा) मेरे लिए प्रीति-प्रद और उत्साह-दाता है।

नमामिमेथनजिहीळएषाशिवासखिभ्यउतमह्यमासीत् ।
अक्षस्याहमेकपरस्यहेतोरनुव्रतामपजायामरोधम् ॥ २ ॥

न । मा । मिमेथ । न । जिहीळे । एषा । शिवा । सखिऽभ्यः ।
उत । मह्यम् । आसीत् । अक्षस्य । अहम् । एकऽपरस्य ।
हेतोः । अनुऽव्रताम् । अप । जायाम् । अरोधम् ॥ २ ॥

एषास्मदीया जाया मा मां कितवं नमिमेथ नच चुक्रोध न जिहीळे नच लज्जितवती सखिभ्योस्मदीयेभ्यः कितवेभ्यः शिवा सुखकर्यासीदभूत् । उतापिच मह्यं शिवासीत् इत्थमनुव्रतामनुकूलां जायां एकपरस्य एकः परः प्रधानं यस्य तस्याक्षस्य हेतोः कारणादहमपारोधं परित्यक्तवानस्मीत्यर्थः ॥ २ ॥

२. मेरी यह रूपवती पत्नी कभी मुझसे उदासीन नहीं हुई, न कभी मुझसे लज्जित हुई। वह पत्नी मेरी और मेरे बन्धुओं की विशेष सेवा-शुश्रूषा करती थी। किन्तु केवल पासे के कारण मैंने उस परम अनुरागिणी भार्या को छोड़ दिया।

द्वेष्टिश्वश्रूरपजायारुणद्धिननांथितोविन्दतेमर्डितारम् ।
अश्वस्येवजरतोवरुथंस्यनाहंविन्दामिकितवस्यभोगम् ॥ ३ ॥

---

१ नि० ९. ८.।

द्वेष्टि । श्वश्रूः । अप । जाया । रुणद्धि । न । नाथितः ।
विन्दते । मर्डितारम् । अश्वस्यऽइव । जरतः । वरुथस्य । न ।
अहम् । विन्दामि । कितवस्य । भोगम् ॥ ३ ॥

श्वश्रूर्जायायामाता गृहगतं कितवं द्वेष्टि निंदतीत्यर्थः । किंच जाया भार्यापरुणद्धि निरुणद्धि । अपिच नाथितोयाचमानः कितवः धनं मर्डितारं धनदानेन सुखयितारं नविंदते न लभते । इत्थं वृद्धाविमृशत्वान्नाहं जरतोवृद्धस्य वरुथस्य वस्त्रं मूल्यं तदर्हस्याश्वस्येव कितवस्य भोगं न विंदामि न लभे ॥ ३ ॥

३. जो जुआड़ी (कितव) जुआ खेलता है, उसकी सास उसकी निन्दा करती है और उसकी स्त्री उसे छोड़ देती है। जुआड़ी किसी से कुछ मांगता है, तो उसे कोई नहीं देता। जैसे बूढ़े घोड़े को कोई नहीं खरीदता, वैसे ही जुआड़ी का कोई आदर नहीं करता।

अन्येजायांपरिमृशन्त्यस्ययस्यागृधद्वेदनेवाज्यक्षः ।
पितामाताभ्रातरएनमाहुर्नजानीमोनयतावद्धमेतम् ॥ ४ ॥

अन्ये । जायाम् । परि । मृशन्ति । अस्य । यस्य । अगृधत् ।
वेदने । वाजी । अक्षः । पिता । माता । भ्रातरः । एनम् । आहुः ।
न । जानीमः । नयत । बद्धम् । एतम् ॥ ४ ॥

यस्य कितवस्य वेदने धने वाजी बलवान् अक्षोदेवोऽगृधत् अभिकांक्षां करोति तस्यास्य कितवस्य जायां भार्यामन्ये प्रतिकितवाः परिमृशंति वस्त्रकेशाद्याकर्षणेन संस्पृशंति । किंच पिता माता जननी च भ्रातरः सहोदराश्चैनं कितवमाहुः वदंति न वयमस्मदीयं एनं जानीमः रक्ष्वा बद्धमेतं कितवं हे कितवायूयं नयत यथेष्टदेशं प्रापयतेति ॥ ४ ॥

४. पासे का आकर्षण बड़ा कठिन है। यदि किसी के धन के प्रति अक्ष (पासे) की लोभ-दृष्टि हो जाय, तो पासेवाले की पत्नी व्यभिचारिणी हो जाती है। जुआड़ी के माता, पिता और सहोदर भ्राता कहते हैं—"हम इसे नहीं जानते; जुआड़ियो, इसे पकड़कर ले जाओ।"

यदादीध्येनदविषाण्येभिःपरायद्भ्योवहीयेसखिभ्यः ।
न्युप्ताश्चबभ्रवोवाचमक्रतँएमीदेषांनिष्कृतंजारिणीव ॥ ५ ॥ ३ ॥

यत् । आऽदीध्ये । न । दविषाणि । एभिः । परायत्ऽभ्यः ।
अव । हीये । सखिऽभ्यः निऽउप्ताः । च । बभ्रवः । वाचम् ।
अक्रत । एमि । इत् । एषाम् । निःऽकृतम् । जारिणीऽइव ॥५॥३॥

यद्यदाहमादीध्ये ध्यायामि तदानीं एभिरक्षैः न दविषाणि न दूषये न परितपामि यद्वा न दविषाणि न देविष्याणीत्यर्थः। न द्वेषये परायद्भ्यः स्वयमेव परागच्छद्भ्यः सखिभ्यः सखिभूतेभ्यः कितवेभ्योवहीये अवहितोभवामि नाहं प्रथममक्षान् विसृजामीति। किंच बभ्रवोबभ्रुवर्णा-अक्षाः न्युप्ताः कितवैरवक्षिप्ताः संतोवाचमकत शब्दं कुर्वंति तदा संकल्पं परित्यज्य अक्षव्यसनेनाभिभूयमानोहमेषामक्षाणां निष्कृतं स्थानं जारिणीव यथा कामव्यसनेनाभिभूयमाना स्वैरिणी संकेतस्थानं याति तद्वदेमीव गच्छाम्येव ॥ ५ ॥

५. जिस समय मैं इच्छा करता हूँ कि, मैं अब नहीं पासा खेलूँगा, उस समय साथी जुआड़ियों के पास से हट जाता हूँ। किन्तु नक़शे पर पीले पासों को देखकर नहीं ठहरा जाता। जैसे भ्रष्टा नारी उपपति के पास जाती है, वैसे ही मैं भी जुआड़ियों के घर जाता हूँ।

॥ इति सप्तमस्याष्टमे तृतीयोवर्गः ॥ ३ ॥

सभामेतिकितवःपृच्छमानोजेष्यामीतितन्वाशूशुजानः।
अक्षासोअस्यवितिरन्तिकामंप्रतिदीव्नेदधतआकृतानि ॥ ६ ॥

सभाम्। एति। कितवः। पृच्छमानः। जेष्यामि। इति।
तन्वा। शूशुजानः। अक्षासः। अस्य। वि। तिरन्ति। कामम्।
प्रतिऽदीव्ने। दधतः। आ। कृतानि ॥ ६ ॥

तन्वा शरीरेण शूशुजानः शोशुचानोदीप्यमानः कितवः कोत्रास्ति धनिकः तं जेष्यामीति पृच्छमानः पृच्छन् सभां कितवसंबंधिनीमेति गच्छति तत्र प्रतिदीव्ने प्रतिदेयिने कितवाय कृतानि देवनोपयुक्तानि कर्माण्यादधतोजयार्थमाभिमुख्येन मर्यादया वा दधतोस्य कितवस्य काममिच्छामक्षासोक्षाः वितिरंति वर्धयंति ॥ ६ ॥

६. जुआड़ी अपनी छाती फुलाकर कूदता हुआ जुए के अड्डे पर आता और कहता है कि, "मैं जीतूँगा"। कभी-कभी पासा जुआड़ी की इच्छा पूरी करता है और कभी विपक्ष के जुआड़ी के लिए वह जो कुछ चाहता है, वह सब भी कभी सिद्ध हो जाता है।

अथ सप्तमी—

अक्षासइदंकुशिनोनितोदिनोनिकृत्वानस्तपनास्तापयिष्णवः।
कुमारदेष्णाजयतःपुनर्हणोमध्वासंपृक्ताःकितवस्यबर्हणा ॥ ७ ॥

अक्षासः । इत् । अंकुशिनः । निऽतोदिनः । निऽकृत्वानः ।
तपनाः । तापयिष्णवः । कुमारऽदेष्णाः । जयतः । पुनःऽहनः ।
मध्वा । सम्ऽपृक्ताः । कितवस्य । बर्हणा ॥ ७ ॥

अक्षासइत् अक्षाएव अंकुशिनोंकुशवंतोनितोदिनोनितोदितवंतश्च पुरुषे च रूपौ प्रवर्तमाने निकृत्वानः पराजये निकर्तनशीलाः छेत्तारोवा तपनाः पराजये कितवस्य संतापकाः तापयिष्णवः सर्वस्वहारकत्वेन कुटुंबस्य संतापनशीलाश्च भवंति । किंच जयतः कितवस्य कुमारदेष्णाधनदानेन धन्यतां लंभयंतः कुमाराणां दातारोभवंति । अपिच मध्वा मधुना संपृक्ताः प्रतिकितवेन बर्हणा परिवृद्धेन सर्वस्वहरणेन कितवस्य पुनर्हणः पुनर्हंतारोभवंति ॥ ७ ॥

७. किन्तु कभी-कभी वही पासा बेहाथ हो जाता है—अंकुश के समान चुभता है, बाण के सदृश छेदता है, छुरे के समान काटता है, तप्त पदार्थ के समान संताप देता है। जो जुआड़ी विजयी होता है, उसके लिए पासा पुत्रजन्म के समान आनन्द-दाता होता है, मधुरिमा से युक्त होता है और मानो मीठे वचनों से सम्भाषण करता है; किन्तु हारे हुए जुआड़ी को तो प्रायः मार ही डालता है।

त्रिपञ्चाशःक्रीळतिव्रातएषांदेवइवसवितासत्यधर्मा ।
उग्रस्यचिन्मन्यवेनानमन्तेराजाचिदेभ्योनमइत्कृणोति ॥ ८ ॥

त्रिऽपञ्चाशः । क्रीळति । व्रातः । एषाम् । देवःऽइव ।
सविता । सत्यऽधर्मा । उग्रस्य । चित् । मन्यवे । न । नमन्ते ।
राजा । चित् । एभ्यः । नमः । इत् । कृणोति ॥ ८ ॥

एषामक्षाणां त्रिपंचाशः त्र्यधिकपंचाशत्संख्याकोव्रातः संघः क्रीळति अस्फारे विहरति अक्षिकाः प्रायेण तावद्भिरक्षैर्दीव्यंति हि। तत्र दृष्टांतः—सत्यधर्मा सविता सर्वस्य जगतः प्रेरकः सूर्योदेवइव यथा सविता देवोजगति विहरति तद्वदक्षाणां संघआस्फारे विहरतीत्यर्थः । किंच उग्रस्य चित् क्रूरस्यापि मन्यवे क्रोधाय एते अक्षाः न नमंते न प्रह्वीभवंति न वशे वर्तंते तं नमयंतीत्यर्थः । राजा चित् जगतईश्वरोपि एभ्योनमइत् नमस्कारमेव देवनवेलायां कृणोति नावज्ञां करोतीत्यर्थः ॥ ८ ॥

८. तिरेपन पासे नक़शे के ऊपर मिलकर विहार करते हैं—मानो सत्य-स्वरूप सूर्यदेव संसार में विचरण करते हैं। कोई कितना बड़ा उग्र क्यों न हो; परन्तु पासा किसी के वश में नहीं आ सकता। राजा तक पासे को नमस्कार करते हैं।

नीचावर्तन्तउपरिस्फुरन्त्यहस्तासोहस्तवन्तंसहन्ते ।
दिव्याअङ्गाराइरिणेन्युप्ताःशीताःसन्तोहृदयंनिर्दहन्ति ॥ ९ ॥

नीचा । वर्तन्ते । उपरि । स्फुरन्ति । अहस्तासः । हस्तऽवन्तम् । सहन्ते । दिव्याः । अङ्गाराः । इरिणे । निऽउप्ताः । शीताः । सन्तः । हृदयम् । निः । दहन्ति ॥ ९ ॥

अपि चैते अक्षाः नीचा नीचीनस्थले वर्तंते तथाप्युपरि पराजयाद्भीतानां द्यूतकराणां कितवानां हृदयस्योपरिस्फुरंति अहस्तासोहस्तरहिताअप्यक्षाः हस्तवंतं द्यूतकरं कितवं सहंते पराजयकरणेन अभिभवंति । दिव्यादिविभवाअपकृताः अंगाराः अंगारसदृशाः अक्षाः इरिणे इंधनरहिते आस्फारे न्युप्ताः शीवाः शीतस्पर्शाः संतोपि हृदयं कितवानामंतःकरणं निर्दहंति पराजयजनितसंतापेन भस्मीकुर्वंति ॥ ९॥

९. पासे कभी नीचे उतरते हैं और कभी ऊपर उठते हैं। इनके हाथ नहीं हैं; परन्तु जिनके हाथ हैं, वे इनसे हार खाते हैं। ये शीतसम्पन्न हैं; जलते हुए अंगारे के समान ये नक्शे के ऊपर बैठे हैं। ये छूने में ठंडे हैं; किन्तु हृदय को जलाते हैं।

जायातप्यतेकितवस्यहीनामातापुत्रस्यचरतःक्वस्वित् ।
ऋणावाबिभ्यद्धनमिच्छमानोन्येषामस्तमुपनक्तमेति ॥१०॥४॥

जाया । तप्यते । कितवस्य । हीना । माता । पुत्रस्य । चरतः । क्व । स्वित् । ऋणऽवा । बिभ्यत् । धनम् । इच्छमानः । अन्येषाम् । अस्तम् । उप । नक्तम् । एति ॥ १० ॥ ४ ॥

क्वचित् क्वापि चरतोनिर्वेदाद्गच्छतः कितवस्य जाया भार्या हीना परित्यक्ता सती तप्यते वियोगसंतापेन संतप्ता भवति माता जनन्यपि पुत्रस्यापि क्वापि चरतः कितवस्य संबंधाद्धीना तप्यते पुत्रशोकेन संतप्ता भवति । ऋणावा अक्षपराजयाद् ऋणवान् कितवः सर्वतोबिभ्यत् धनं स्तेयजनितं इच्छमानः कामयमानः अन्येषां ब्राह्मणादीनां अस्तं गृहं । अस्तं पस्त्यमिति गृहनामसु पाठात् । नक्तं रात्रावुपैति चौर्यार्थमुपगच्छति ॥ १० ॥

१०. जुआड़ी की स्त्री दीन-हीन वेश में यातना भोगती रहती है, पुत्र कहाँ-कहाँ घूमा करता है—ऐसा सोचकर जुआड़ी की माता व्याकुल रहा करती है। जो जुआड़ी को उधार देता है, वह इस संदेह में रहता है कि "मेरा धन फिर मिलेगा या नहीं।" जुआड़ी बेचारा दूसरे के घर में रात काटा करता है।

॥ इति सप्तमस्याष्टमे चतुर्थोवर्गः ॥ ४ ॥

स्त्रियंदृष्ट्वायकितवंततापान्येषांजायांसुकृतंचयोनिम् ।
पूर्वाह्णेअश्वान्युयुजेहिबभ्रून्सोअग्नेरन्तेवृषलःपपाद ॥ ११ ॥

स्त्रियम् । दृष्ट्वाय । कितवम् । तताप । अन्येषाम् । जायाम् ।
सुऽकृतम् । च । योनिम् । पूर्वाह्णे । अश्वान् । युयुजे । हि ।
बभ्रून् । सः । अग्नेः । अन्ते । वृषलः । पपाद ॥ ११ ॥

कितवं कितवोविभक्तिव्यत्ययः अन्येषां स्वव्यतिरिक्तानां पुरुषाणां जायां जायाभूतां स्त्रियं नारीं सुखेन वर्तमानां सुकृतं सुष्ठु कृतं योनिं गृहं दृष्ट्वा मज्जाया दुःखिता गृहं चासंस्कृतमिति ज्ञात्वा तताप तप्यते पुनः पूर्वाह्णे प्रातःकाले बभ्रून् बभ्रुवर्णानश्वान् व्यापकानक्षान् युयुजे युनक्ति पुनश्च वृषलोवृषलकर्मा सकितवोरात्रावग्नेरंते समीपे पपाद शीतार्तः सन् शेते॥११॥

११. अपनी स्त्री की दशा देखकर जुआड़ी का हृदय फटा करता है। अन्यान्य स्त्रियों का सौभाग्य और सुन्दर अट्टालिका देखकर जुआड़ी को सन्ताप होता है। जो जुआड़ी प्रातःकाल घोड़े की सवारी कर आता है, वही सन्ध्या-समय, दरिद्र के समान जाड़े से बचने के लिए आग तापता है—शरीर पर वस्त्र भी नहीं रहता।

योवःसेनानीर्महतोगणस्यराजाव्रातस्यप्रथमोबभूव ।
तस्मैकृणोमिनधनारुणध्मिदशाहंप्राचीस्तदृतंवदामि ॥ १२ ॥

यः । वः । सेनाऽनीः । महतः । गणस्य । राजा । व्रातस्य ।
प्रथमः । बभूव । तस्मै । कृणोमि । न । धना । रुणध्मि । दश ।
अहम् । प्राचीः । तत् । ऋतम् । वदामि ॥ १२ ॥

हेअक्षावोयुष्माकं महतोगणस्य संघस्य योक्षः सेनानीर्नेता बभूव भवति व्रातस्य च गणव्रातयोरल्पोभेदः राजेश्वरः प्रथमोमुख्योबभूव तस्माअक्षाय कृणोम्यहं अंजलिं करोमि अतःपरं धना धनान्यक्षार्थं अहं न रुणध्मि न संपादयामीत्यर्थः। एतदेव दर्शयति—अहं दशसंख्याकाअंगुलीः प्राचीः प्राङ्मुखीः करोमि तदेतदहं ऋतं सत्यमेव वदामि नानृतं ब्रवीमीत्यर्थः ॥ १२ ॥

१२. पासो, तुम्हारे बल में जो प्रधान, सेनापति वा राजा के समान है, उसको मैं अपनी दसों अँगुलियाँ जोड़कर प्रणाम करता हूँ। मैं सच्ची बात कहता हूँ कि मैं तुम लोगों से अर्थ नहीं चाहता।

अक्षैर्मादीव्यःकृषिमित्कृषस्ववित्तेरमस्वबहुमन्यमानः ।
तत्रगावःकितवतत्रजायातन्मेविचष्टेसवितायमर्यः ॥ १३ ॥

अक्षैः । मा । दीव्यः । कृषिम् । इत् । कृषस्व । वित्ते । रमस्व ।
बहु । मन्यमानः । तत्र । गावः । कितव । तत्र । जाया ।
तत् । मे । वि । चष्टे । सविता । अयम् । अर्यः ॥ १३ ॥

हे कितव बहुमन्यमानोमद्वचने विश्वासं कुर्वन् त्वमक्षैर्मा दीव्योद्यूतं मा कुरु । कृषिमित् कृषिमेव कृषस्व कुरु । वित्तेकृष्या संपादिते धने रमस्व रतिं कुरु । तत्र कृषौ गावोभवंति तत्र जाया भवति तदेव धर्मरहस्यं श्रुतिस्मृतिकर्ता सविता सर्वस्य प्रेरकोयं दृष्टिगोचरोऽर्यईश्वरोमे मह्यं विचष्टे विविधमाख्यातवान् ॥ १३ ॥

१३. जुआड़ी, कभी जुआ नहीं खेलना; खेती करना । कृषि से जो कुछ लाभ हो, उसी से सन्तुष्ट रहना—अपने को कृतार्थ समझना । इसी से स्त्री प्राप्त करोगे और अनेक गायें भी पाओगे । प्रभु सूर्यदेव ने मुझ से ऐसा कहा है ।

मित्रंकृणुध्वंखलुमृळतानोमानोघोरेणचरताभिधृष्णु ।
निवोनुमन्युर्विशतामरातिरन्योबभ्रूणांप्रसितौन्वस्तु ॥१४॥५॥

मित्रम् । कृणुध्वम् । खलु । मृळत । नः । मा । नः । घोरेण ।
चरत । अभि । धृष्णु । नि । । वः नु । मन्युः । विशताम् ।
अरातिः । अन्यः । बभ्रूणाम् । प्रऽसितौ । नु । अस्तु ॥१४॥५॥

हे अक्षाः यूयं मित्रं कृणुध्वं अस्मासु मैत्रीं कुरुत खल्विति पूरणः । नोस्मान्मृळत सुखयत च नोस्मान् धृष्णु धृष्णुना तृतीयार्थे प्रथमा घोरेणासह्येन माभिचरत मागच्छत । किंच वोयुष्माकं मन्युः क्रोधःअरातिः अस्माकं शत्रुः नु क्षिप्रं निविशतांअस्मच्छत्रुषु तिष्ठतु नोस्माकं अन्यः शत्रुः कश्चिद्बभ्रूणां बभ्रुवर्णानां युष्माकं प्रसितौ दृढबंधने नु क्षिप्रमस्तु भवतु ॥ १४ ॥

१४. पासो (अक्षो), हमें बन्धु जानो; हमारा कल्याण करो । हमारे ऊपर अपने दुर्द्धर्ष प्रभाव का प्रयोग नहीं करना । हमारा शत्रु ही तुम्हारी कोप-दृष्टि में गिरे । दूसरे तुम में फँसे रहें ।

॥ इति सप्तमस्याष्टमे पंचमोवर्गः ॥ ५ ॥

अबुध्रमिति चतुर्दशर्चं षष्ठं सूक्तं धनाकपुत्रस्य लुशस्यार्षं इदमुत्तरं च वैश्वदेवं त्रयोदशी-चतुर्दश्यौ त्रिष्टुभौ शिष्टाद्वादश जगत्यः । तथाचानुक्रांतं—अबुध्रं लुशोधानाकोवैश्वदेवं तु द्वित्रिष्टुबंतं त्विति । गतः सूक्तविनियोगः। एकादशिनस्य वैश्वदेवस्य पशोर्वपायागस्यानुवाक्या विश्वेअद्येत्येषा । सूत्रितंच—विश्वेअद्यमरुतोविश्वऊत्यानोदेवानामुपवेतुशंसइति ।

तत्र प्रथमा—

अबुध्रमुत्यइन्द्रवन्तोअग्नयोज्योतिर्भरन्तउषसोव्युष्टिषु ।
महीद्यावापृथिवीचेततामपोद्यादेवानामवआवृणीमहे ॥ १ ॥

अबुध्रम् । ऊँ इति । त्ये । इन्द्रऽवन्तः । अग्नयः । ज्योतिः ।
भरन्तः । उषसः । विऽउष्टिषु । मही इति । द्यावापृथिवी इति ।
चेतताम् । अपः । अद्य । देवानाम् । अवः । आ । वृणीमहे ॥ १ ॥

इंद्रवंतोयष्टव्यत्वेनेन्द्रसंबंधिनः त्ये ते अमी आहवनीयादयोग्नयः उषसोव्युष्टिषु व्युच्छनेषु तमसां विवसनकालेषुज्योतिः तेजोभरंतोधारयंतः अबुध्रं प्रबुद्धाआसन् । मही महत्यौ द्यावापृथिव्यौ अपः कर्म अपः अमइतिकर्मनामसुपाठात् । चेततां जानीतां अद्यास्मिन्नहनि देवानामिंद्रादीनां अवोरक्षणं वयमावृणीमहे ॥ १ ॥

१. अग्नि जाग गये । उनके साथ इन्द्र हैं । जिस समय प्रभात अन्धकार को विदेश में भेजता है, उस समय अग्नि, आलोक धारण करके जलते हैं । विशाल मूर्त्ति द्युलोक और भूलोक चैतन्य-युक्त हों । मैं प्रार्थना करता हूँ कि, देवता आज हमें बचावें ।

दिवस्पृथिव्योरवआवृणीमहेमातॄन्त्सिन्धून्पर्वताञ्छर्यणावतः ।
अनागास्त्वंसूर्यमुषासमीमहेभद्रंसोमःसुवानोअद्याकृणोतुनः॥२॥

दिवःपृथिव्योः । अवः । आ । वृणीमहे । मातॄन् । सिन्धून् ।
पर्वतान् । शर्यणाऽवतः । अनागाःऽत्वम् । सूर्यम् । उषसम् ।
ईमहे । भद्रम् । सोमः । सुवानः । अद्य । कृणोतु । नः ॥ २ ॥

दिवःपृथिव्योः द्यावापृथिव्योः कार्येण संबंधि अवोरक्षणं वयमावृणीमहे । किंच मातॄन् लोकस्य निर्मातॄन् सिंधून् शर्यणावतः सरसः संबंधिनः पर्वतान् शिलोच्चयांश्च तथा

सूर्यमुषसं च अनागास्त्वं कर्मवैगुण्यजनितपापराहित्यमीमहे वयं याचामहे । किंच अद्यास्मिन्नहनि नोस्मकं सुवानोभिषूयमाणः सोमोभद्रं कल्याणं कृणोतु करोतु ॥ २ ॥

२. हम प्रार्थना करते हैं कि, द्यावापृथिवी हमारी रक्षा करें। जननी के समान नदियां और कुरुक्षेत्र के निकटस्थ पर्वत हमारी रक्षा करें। सूर्य और उषा से यही प्रार्थना है कि, हम अपराधी न हों। जो सोम प्रस्तुत किये जाते हैं वे हमारा मंगल करें।

द्यावानोअद्यपृथिवीअनागसोमहीत्रायेथांसुवितायमातरा ।
उषाउच्छन्त्यपबाधतामघंस्वस्त्यग्निंसमिधानमीमहे ॥ ३ ॥

द्यावा । नः । अद्य । पृथिवी इति । अनागसः । मही इति । त्रायेथाम् ।
सुवितायं । मातरा । उषाः । उच्छन्ती । अप । बाधताम् । अघम् ।
स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ३ ॥

मही महत्यौ मातरा मातरौ सर्वस्य मातृभूते द्यावापृथिवी द्यावापृथिव्यौ अद्यास्मिन्नहनि अनागसोपराधरहितान् नोस्मान् सुविताय सुखाय त्रायेतां रक्षतां । किंच उच्छंती तमांसि विवासयंती उषाः अस्माकमघं पापमपबाधतां अपनयतु अपिच समिधानं सम्यक् दीप्यमानमग्निं स्वस्ति सर्वप्रकाराविनाशमीमहे वयं याचामहे ॥ ३ ॥

३. द्यावापृथिवी हमारी माता के समान हैं। हम इन दोनों महान् देवों के निकट निरपराधी रहें। वे हमें सुख के लिए बचावें। उषादेवी, अधिकार का विनाश करके, हमारे पापों का मोचन करें। प्रदीप्त अग्नि के पास हम कल्याण की भिक्षा करते हैं।

इयंनउस्राप्रथमासुदेव्यंरेवत्सनिभ्योरेवतीव्युच्छतु ।
आरेमन्युंदुर्विदत्रस्यधीमहिस्वस्त्यग्निंसमिधानमीमहे ॥ ४ ॥

इयम् । नः । उस्रा । प्रथमा । सुऽदेव्यम् । रेवत् । सनिऽभ्यः ।
रेवती । वि । उच्छतु । आरे । मन्युम् । दुःऽविदत्रस्य ।
धीमहि । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ४ ॥

रेवती धनवती प्रथमा मुख्या इयं उस्रा पापानामुत्सारिणी उषाः सुदेव्यं शोभनदेवार्हं रेवद्धनवत् प्रधानकालयागत्वं सनिभ्योभजमानेभ्योनोस्मभ्यं प्रयच्छंती व्युच्छतु तमांसि विवासयतु । किंच दुर्विदत्रस्य दुर्धनस्य पुरुषस्य मन्युं क्रोधं आरे दूरे धीमहि निधीमहि । सिद्धमन्यत् ॥ ४ ॥

४. धनवती, मुख्या और पापों को दूर भगानेवाली उषा हमें उत्तम धन दें। हम उसका भाग कर लें। हम दुष्टों के क्रोध से दूर रहें। प्रज्वलित अग्नि से हम कल्याण की भिक्षा चाहते हैं।

प्रयाःसिस्रतेसूर्यस्यरश्मिभिर्ज्योतिर्भरन्तीरुषसोव्युष्टिषु।
भद्रानोअद्यश्रवसेव्युच्छतस्वस्त्य१ग्निंसमिधानमीमहे ॥५॥६॥

प्र। याः। सिस्रते। सूर्यस्य। रश्मिऽभिः। ज्योतिः। भरन्तीः। उषसः। विऽउष्टिषु। भद्राः। नः। अद्य। श्रवसे। वि। उच्छत। स्वस्ति। अग्निम्। सम्ऽइधानम्। ईमहे ॥ ५ ॥ ६ ॥

याउषसः सूर्यस्य रश्मिभिः किरणैः प्रसिस्रते संगच्छंते व्युष्टिषु व्युच्छनेषु तमसां विवासनकालेषु ज्योतिरात्मीयं तेजोभरंतीः भरंति च तायूयं नोस्माकमद्यास्मिन्नहनि श्रवसे अन्नाय भद्रा भजनीया भवत व्युच्छत तमांसि विवासयत च। सिद्धमन्यत् ॥ ५ ॥

५. जो उषायें, सूर्य-किरणों के साथ मिलकर और आलोक का धारण करके अन्धकार का विनाश करती हैं, वे हमें आज अन्न दें। प्रज्वलित अग्नि से हम कल्याण की भिक्षा माँगते हैं।

॥ इति सप्तमस्याष्टमे षष्ठोवर्गः ॥ ६ ॥

अनमीवाउषसआचरन्तुनउदग्नयोजिहतांज्योतिषाबृहत्।
आयुक्षातामश्विनातूतुजिरथंस्वस्त्य१ग्निंसमिधानमीमहे ॥६॥

अनमीवाः। उषसः। आ। चरन्तु। नः। उत्। अग्नयः। जिहताम्। ज्योतिषा। बृहत्। अयुक्षाताम्। अश्विना। तूतुजिम्। रथम्। स्वस्ति। अग्निम्। सम्ऽइधानम्। ईमहे ॥ ६ ॥

अनमीवारोगरहिताः उषसोनोस्मानाचरंतु आगच्छंतु बृहत् बृहता महता ज्योतिषा तेजसा युक्ताअग्नयोप्युज्जिहतां उद्गच्छंतु अश्विना अश्विनावपि तूतुजिं क्षिप्रगामिनं रथमायुक्षातां अस्मान् प्रत्यागंतुं रासभाभ्यां युंक्तां हरितआदित्यस्य रासभावश्विनोरिति। पाठात्। सिद्धमन्यत् ॥ ६ ॥

६. रोग-शून्य उषायें हमारे पास आवें। महान् प्रकाश से युक्त अग्नि भी ऊपर उठें। हमारे पास आने के लिए अश्विद्वय भी क्षिप्रगामी रथ में अपने दोनों घोड़ों को जोतें। प्रदीप्त अग्नि से हम कल्याण की भिक्षा माँगते हैं।

अथ सप्तमी—

श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव सहिरत्नधा असि ।
रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्य१ग्निं समिधानमीमहे ॥ ७ ॥

श्रेष्ठम् । नः । अद्य । सवितः । वरेण्यम् । भागम् । आ । सुव । सः ।
हि । रत्नऽधाः । असि । रायः । जनित्रीम् । धिषणाम् । उप ।
ब्रुवे । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ७ ॥

हे सवितस्त्वं अद्यास्मिन्नहनि नोस्मभ्यं वरेण्यं वरणीयं श्रेष्ठं प्रशस्यतमं भागं भजनीयं धनं आसुव प्रेरय देहीत्यर्थः । हि यस्माद् प्रार्थितस्त्वं रत्नधाः श्रेष्ठानां धनानां संविभक्ताऽसि भवसि । तथाच निगमांतरं—विभक्तारंहवामहेवसोश्चित्रस्यराधसः । सवितारंनृचक्षसमिति । रायोधनस्य जनित्रीं धिषणां सर्वदेवस्तुतिरूपां वाचमुपब्रुवे अहमुपब्रवामि । यद्वा धिषणां देवीं उपब्रुवे उपस्तौमीत्यर्थः । सिद्धमन्यत् ॥ ७ ॥

७. सूर्यदेव, आज हमें अतीव उत्कृष्ट धन-भाग वितरित करो; क्योंकि तुम कामना पूर्ण करनेवाले हो । हम वैसे स्तोत्र पढ़ते हैं, जिससे धन उत्पन्न हो सके । प्रज्वलित अग्नि के पास हम कल्याण की भिक्षा मांगते हैं ।

पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या३ अमन्महि ।
विश्वा इदुस्रास्पळुदेति सूर्यः स्वस्त्य१ग्निं समिधानमीमहे ॥ ८ ॥

पिपर्तु । मा । तत् । ऋतस्य । प्रऽवाचनम् । देवानाम् । यत् ।
मनुष्याः । अमन्महि । विश्वाः । इत् । उस्राः । स्पट् । उत् ।
एति । सूर्यः । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ८ ॥

यदृतस्य यज्ञस्य सत्यस्य वा संबंधि देवानां प्रवाचनं प्रकर्षेण गुणानां कथनं स्तोत्रं मनुष्यावयममन्महि कर्तुं जानीमः तत्प्रवाचनं मा मां पिपर्तु पालयतु । किंच सूर्योविश्वाः सर्वा उस्राः उषसः स्पट् स्पृशन्नवगच्छन् वोदेति उदेतु । सिद्धमन्यत् ॥ ८ ॥

८. देवों के लिए मनुष्यगण जिस यज्ञ-कार्य का संकल्प करते हैं, वही मेरी श्री-वृद्धि करें । प्रति प्रभात में सूर्यदेव सारी वस्तुओं को स्पष्ट करके उगते हैं । प्रज्वलित अग्नि से हम कल्याण की भिक्षा मांगते हैं ।

---

१ ऋ० सं० १. २ ५ ।

अद्वेषोअद्यबर्हिषस्तरीमणिग्राव्णांयोगेमन्मनःसाधईमहे ।
आदित्यानांशर्मणिस्थाभुरण्यसिस्वस्त्य१ग्निंसमिधानमीमहे॥९॥

अद्वेषः । अद्य । बर्हिषः । स्तरीमणि । ग्राव्णाम् । योगे ।
मन्मनः । साधे । ईमहे । आदित्यानाम् । शर्मणि । स्थाः ।
भुरण्यसि । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ९ ॥

अद्यास्मिन्नहनि बर्हिषस्तरीमणि वेद्यां स्तरणे मन्मनोमननीयस्याभीष्टस्य फलस्य साधे साधके ग्राव्णामभिषवपाषाणानां योगे सोमेन सह संयोगे च सत्यद्वेषोद्वेषवर्जितानादित्यानीमहे वयमभीष्टं याचामहे । हे स्तोतस्त्वं तेषामादित्यानां देवानां शर्मणि सुखे स्थाने वा स्थास्तिष्ठ भुरण्यसि कर्तव्यानि कर्माणि बिभर्षि गच्छसि । सिद्धमन्यत् ॥ ९ ॥

९. यज्ञ के लिए आज कुश बिछाया जाता है। सोम प्रस्तुत करने के लिए दो पत्थर संयोजित किये जाते हैं। इस समय, अभीष्ट की सिद्धि के लिए, द्वेष-शून्य देवों की शरण में जाना चाहिए। यजमान, तुम सब अनुष्ठान करते हो; इसलिए आदित्यगण तुम्हें सुखी करें। प्रदीप्त अग्नि से हम कल्याण की भीख मांगते हैं।

आनोबर्हिःसधमादेबृहद्दिविदेवाँईळेसादयासप्तहोतॄन् ।
इन्द्रंमित्रंवरुणंसातयेभगंस्वस्त्य१ग्निंसमिधानमीमहे ॥१०॥७॥

आ । नः । बर्हिः । सधऽमादे । बृहत् । दिवि । देवान् । ईळे ।
सादय । सप्त । होतॄन् । इंद्रम् । मित्रम् । वरुणम् । सातये ।
भगम् । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ १० ॥ ७ ॥

नोस्माकं बृहत् बृहति महति दिवि दीप्ते सधमादे सह मादयंति देवायत्र तस्मिन् बर्हिर्बर्हिषि यज्ञे सप्त सप्तसंख्याकान् होतॄन् वषट्कर्तॄन् इंद्रमिंद्रं च भगं च देवानितरानपि यष्टव्यान् देवान् हे अग्ने त्वमासादय । अग्नेराभिमुख्यकरणमिहाद्यदैव्यंजनंबर्हिरासादयावसोइत्येवमादिमंत्रैरवगम्यते । तत्र त्वदासादितांस्तानिंद्रादीन् देवानहं सातये धनलाभाय ईळे स्तौमि । सिद्धमन्यत् ॥ १० ॥

१०. अग्नि, हमारा यज्ञानुष्ठान हो रहा है। इसमें देवता लोग इकट्ठे होकर आमोद-आह्लाद करते हैं। इस यज्ञ में प्रकाण्ड द्युलोक में रहने वाले देवों को बुलाओ, सात होताओं को बुलाओ और इन्द्र, मित्र वरुण, तथा भग को ले आओ। धन-प्राप्ति के लिए मैं सबकी स्तुति करता हूँ। प्रज्वलित अग्नि से हम कल्याण की भिक्षा चाहते हैं।

इति सप्तमस्याष्टमे सप्तमो वर्गः ॥ ७ ॥

---

१ ऋ० सं १. ३. १२.।

अथैकादशी—

तआदित्याआगतासर्वतातयेवृधेनोयज्ञमवतासजोषसः ।
बृहस्पतिंपूषणमश्विनाभगंस्वस्त्य१ग्निंसमिधानमीमहे ॥११॥

ते । आदित्याः । आ । गत । सर्वऽतातये । वृधे । नः । यज्ञम् ।
अवत । सऽजोषसः । बृहस्पतिम् । पूषणम् । अश्विना ।
भगम् । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ११ ॥

हे आदित्याः येस्माभिराहूताः ते यूयं सर्वतातये यज्ञार्थमागतागच्छत । आगत्य च हे सजोषसः संगतायूयं नोस्माकं वृधे वर्धनाय यज्ञं प्रति अवत रक्षत । वयं च बृहस्पतिं पूषणं चाश्विनाश्विनौच भगं भगाख्यं देवं च समिधानं सम्यक् दीप्तमग्निं च स्वस्ति सर्वप्रकाराविनाशमीमहे याचामहे ॥ ११ ॥

११. प्रसिद्ध आदित्यो, तुम लोग आओ। इससे सारे विषयों में श्री-वृद्धि होगी ही। हमारी श्री-वृद्धि के लिए सब एकत्र होकर यज्ञ की रक्षा करें। बृहस्पति, पूषा, अश्विद्वय, भग और प्रज्वलित अग्नि के पास हम कल्याण की भीख मांगते हैं।

तन्नोदेवायच्छतसुप्रवाचनंछर्दिरादित्याःसुभरंनृपाय्यम् ।
पश्वेतोकायतनयायजीवसेस्वस्त्य१ग्निंसमिधानमीमहे ॥१२॥

तत् । नः । देवाः । यच्छत । सुऽप्रवाचनम् । छर्दिः । आदित्याः ।
सुऽभरम् । नृऽपाय्यम् । पश्वे । तोकाय । तनयाय । जीवसे ।
स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ १२ ॥

हे आदित्यादेवाः यूयं सुप्रवाचनं अत्यंतं प्रशस्तं सुभरं सुसमृद्धं नृपाय्यं नृणां रक्षकं तदस्मदभिलषितं छर्दिर्गृहं नोस्माकं पश्वे पशवे तोकाय पुत्राय तनयाय पौत्राय च जीवसे जीवनार्थं यच्छत दत्त । सिद्धमन्यत् ॥ १२ ॥

१२. देवो, अपने यज्ञ की सफलता सम्पादित करो। हे आदित्यो, धन से पूर्ण और राजयोग्य गृह हमें दो। हम अपने पशु, पुत्र-पौत्र और परमायु आदि सारे विषयों में प्रज्वलित अग्नि के पास कल्याण चाहते हैं।

विश्वेअद्यमरुतोविश्वऊतीविश्वेभवन्त्वग्नयःसमिद्धाः ।
विश्वेनोदेवाअवसागमन्तुविश्वमस्तुद्रविणंवाजोअस्मे ॥१३॥

विश्वे । अद्य । मरुतः । विश्वे । ऊती । विश्वे । भवन्तु । अग्नयः ।
समऽइद्धाः । विश्वे । नः । देवाः । अवसा । आ । गमन्तु ।
विश्वम् । अस्तु । द्रविणम् । वाजः । अस्मे इति ॥ १३ ॥

अद्यास्मिन्नहनि प्रधानयागदिवसे विश्वे सर्वे मरुतोविश्वे सर्वे मरुद्गणसहचरितारुद्रादयोदेवाश्चोती ऊत्यै रक्षणाय भवंतु अपिच विश्वे सर्वे अग्नयः आहवनीयादयः समिद्धाः संदीप्ताः भवंतु । अपिच विश्वे सर्वे इंद्रादयोदेवानोस्माकमवसा रक्षणेनागमंतु आगच्छंतु किंचास्मे अस्मासु विश्वं सर्वं द्रविणं धनं वाजोन्नं चास्तु भवतु ॥ १३ ॥

१३. सारे मरुत् हमें सब प्रकार से बचावें । समस्त अग्नि प्रदीप्त हों । निखिल देवगण, हमारी रक्षा के लिए पधारें सब प्रकार का अन्न और सम्पत्ति हमें मिले ।

यंदेवासोवंथवाजसातौयंत्रायंध्वेयंपिपृथात्यंहः ।
योवोंगोपीथेनभयस्यवेदतेस्यामदेववीतयेतुरासः ॥ १४ ॥ ८ ॥

यम् । देवासः । अवथ । वाजऽसातौ । यम् । त्रायध्वे । यम् ।
पिपृथ । अति । अंहः । यः । वः । गोऽपीथे । न । भयस्य ।
वेद । ते । स्याम । देवऽवीतये । तुरासः ॥ १४ ॥ ८ ॥

हे तुरासोभीष्टप्रदानेक्षिप्रादेवासोदेवाः यूयं वाजसातौ संग्रामे यं मनुष्यमवथ रक्षथ यं च त्रायध्वे शत्रोः पालयथ यं चांहः पापमत्यतिनीय पिपृथ कामैः पूरयथ । यश्चापि मनुष्योवोयुष्माकं कार्यत्वेन संबंधिनि गोपीथे रक्षणे भयस्य भयं न वेद न जानाति ते सर्वे वयं देववीतये यज्ञार्थं स्याम भवेम ॥ १४ ॥

१४. देवो, जिसे तुम अन्न देकर बचाते हो, जिसका त्राण करते हो, जिसे पाप-मुक्त करके श्री वृद्धि से सम्पन्न करते हो और जो तुम्हारे आश्रय में रहकर भय का नाम तक नहीं जानता, देव-कार्य के लिए व्यग्र होकर हम वैसे ही व्यक्ति हों ।

॥ इति सप्तमस्याष्टमेष्टमोवर्गः ॥ ८ ॥

उपासानक्तेति चतुर्दशर्चं सप्तमं सूक्तं धानाकस्य लुशस्यार्षं आदितोद्वादशजगत्यः तत्रोद्वे त्रिष्टुभौ विश्वेदेवादेवता । पूर्वसूक्ते वैश्वदेवं तु द्विस्त्रिष्टुबंतं त्वित्युक्तत्वात् । उपासानक्तेत्यनुक्रांतं आभिप्लविके षष्ठेहनि वैश्वदेवे इदं वैश्वदेवनिविद्धानं । सूत्रितंच—कतरापूर्वोपासानक्तेति वैश्वमिति ।

तत्र प्रथमा—

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा ।
इन्द्रं हुवे मरुतः पर्वतानपआदित्यान्द्यावापृथिवी अपः स्वः ॥ १ ॥

उषसानक्ता । बृहती इति । सुऽपेशसा । द्यावाक्षामा ।
वरुणः । मित्रः । अर्यमा । इन्द्रम् । हुवे । मरुतः । पर्वतान् ।
अपः । आदित्यान् । द्यावापृथिवी इति । अपः । स्वः१रिति स्वः ॥१॥

बृहती बृहत्यौ महत्यौ सुपेशसा सुरूपे उषासानक्ता रात्र्युषसौ द्यावाक्षामा द्यावापृथिव्यौ च वरुणोमित्रो मित्रावरुणौ चार्यमा च येत्र विहितादेवास्तानेतानिंद्रं मरुतश्च पर्वतांश्च अपउदकानिचादित्यांश्च द्यावापृथिवी द्यावापृथिव्यौ च पुनर्द्यावापृथिव्योर्ग्रहणमादरार्थं अपोंतरिक्षं च स्वः स्वर्गं च यष्टव्यं देवजातं हुवे ह्वयामि ॥ १ ॥

१. उषा, रात्रि, महती और सुसंघटित-शरीरा द्यावापृथिवी, वरुण, मित्र, अर्यमा, इन्द्र, मरुद्गण, पर्वतगण, जलगण और आदित्यगण को मैं यज्ञ में बुलाता हूँ । द्यावापृथिवी, अन्तरिक्ष और स्वर्ग को मैं बुलाता हूँ ।

द्यौश्च नः पृथिवी च प्रचेतसा क्रतावरी रक्षतामंहसो रिषः ।
मा दुर्विदत्रा निर्ऋतिर्नो ईशत तद्देवानामवो अद्या वृणीमहे ॥ २ ॥

द्यौः । च । नः । पृथिवी । च । प्रऽचेतसा । क्रतवरी इत्यृतऽवरी ।
रक्षताम् । अंहसः । रिषः । मा । दुःऽविदत्रा । निःऽऋतिः । नः ।
ईशत । तत् । देवानाम् । अवः । अद्य । वृणामहे ॥ २ ॥

प्रचेतसा सुबुद्धी क्रतावरी यज्ञवत्यौ सत्यवत्यौ च द्यौश्च पृथिवी च द्यावापृथिव्यावुभे नोस्मान् रिषोहिंसकादंहसः पापाच्च रक्षतां । किंच दुर्विदत्रा कुत्सितज्ञाना निर्ऋतिः मृत्युदेवता नोस्माकं माईशत ईश्वरी माभूत् । किंच वयं देवानां संबंधि तदसाधारणं अवोरक्षणमद्यास्मिन्नहनि प्रधानयागदिवसे वृणीमहे प्रार्थयामहे ॥ २ ॥

२. प्रशस्य-चित्ता और यज्ञ की अधिष्ठात्-स्वरूपा द्यावापृथिवी हमें पाप से बचावें—शत्रु के हाथ से उबारें । दुष्ट आशयवाली निर्ऋति (मृत्यु-देवता) हमारे ऊपर आधिपत्य न करें । हम देवों से विशिष्ट रक्षा की प्रार्थना करते हैं ।

अथ तृतीया—

विश्वस्मान्नोअदितिःपात्वंहसोमातामित्रस्यवरुणस्यरेवतः ।
स्वर्वज्योतिरवृकंनशीमहितद्देवानामवोअद्यावृणीमहे ॥ ३ ॥

विश्वस्मात् । नः । अदितिः । पातु । अंहसः । माता । मित्रस्य ।
वरुणस्य । रेवतः । स्वःऽवत् । ज्योतिः । अवृकम् । नशीमहि ।
तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ ३ ॥

रेवतोधनवतोमित्रस्य वरुणस्य च धनवतोर्मित्रावरुणयोर्माता जनन्यदितिर्देवी नोस्मान् विश्वस्मात्सर्वस्मादंहसः पापात्पातु रक्षतु । किंच वयमवृकं बाधकरहितं स्वर्वत् सर्वं ज्योतिस्तेजोनशीमहि नशिः पलायनकर्मा पलायनं च शीघ्रगमनं शीघ्रं प्राप्नुमहत्यर्थः । सिद्धमन्यत् ॥३॥

३. धनी मित्र और वरुण की जननी अदितिदेवी हमें पापों से बचावें हम सब प्रकार अविनाशी ज्योति प्राप्त करें । देवों से हम असाधारण रक्षा की प्रार्थना करते हैं ।

ग्रावाववद्न्नपरक्षांसिसेधतुदुःष्वप्न्यंनिर्ऋतिंविश्वमत्रिणम् ।
आदित्यंशर्ममरुतांमशीमहितद्देवानामवोअद्यावृणीमहे ॥ ४ ॥

ग्रावा । वदन् । अप । रक्षांसि । सेधतु । दुःऽस्वप्न्यम् । निःऽऋतिम् ।
विश्वम् । अत्रिणम् । आदित्यम् । शर्म । मरुताम् । अशीमहि ।
तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ ४ ॥

ग्रावाभिषवपाषाणोवदन्नभिषववेलायां शब्दं कुर्वन् रक्षांसि यागविघ्नकारीण्यपसेधतु विनिवारयतु दुःस्वप्न्यं दुःस्वप्नप्रभवमस्मदीयमनिष्टं चापसेधतु निर्ऋतिं मृत्युदेवतांचापसेधतु अत्रिणं अदनशीलंविश्वं सर्वं पिशाचादिकं चापसेधतु एवं निर्विघ्नेन निष्पन्ने यागे वयमादित्यमादित्यानां संबंधि मरुतां च संबंधि शर्म सुखं अशीमहि प्राप्नुयाम । सिद्धमन्यत् ॥ ४ ॥

४. सोम-निष्पीड़न के लिए उपयोगी पत्थर, शब्द करते हुए राक्षसों को दूर भगावे । दुःस्वप्न, मृत्यु-देवी और सारे शत्रुओं को दूर करे । हम आदित्यों और मरुतों से सुख पावें । देवों से हम असाधारण रक्षा की भीख माँगते हैं ।

एन्द्रोबर्हिःसीदंतुपिन्वंतामिळाबृहस्पतिःसामभिर्ऋक्वोअर्चतु ।
सुप्रकेतंजीवसेमन्मधीमहितद्देवानामवोअद्यावृणीमहे ॥५॥९॥

आ । इन्द्रः । बर्हिः । सीदतु । पिन्वताम् । इळा । बृहस्पतिः ।
सामऽभिः । ऋक्वः । अर्चतु । सुऽप्रकेतम् । जीवसे । मन्म । धीमहि ।
तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ ५ ॥ ९ ॥

इंद्रोबर्हिरासीदतु इळामाध्यमिका स्तनयित्नुलक्षणा वागपि पिन्वतां प्रीणयतु । किंतु सामभिर्गायमाने ऋक्वः स्तुतिमान् बृहस्पतिरप्यर्चतु अस्मान् पूजयतु । किंच वयं सुप्रकेतं सुप्रज्ञानं मन्म मननीयं धनं स्तोत्रं वा धीमहि निधीमहि जीवसे जीवनाय । सिद्धमन्यत् ॥ ५ ॥

५. इन्द्र आकर कुश के ऊपर बैठें । विशेष रूप से स्तुति-वाक्य उच्चारित हों । ऋक् और साम के द्वारा बृहस्पति अर्चना करें । हम उत्तमोत्तम और अभिलषणीय वस्तुओं को प्राप्त करके दीर्घजीवी हों । देवों के पास विशिष्ट रक्षा की हम भिक्षा करते हैं ।

॥ इति सप्तमस्याष्टमे नवमोदर्गः ॥ ९॥

दिविस्पृशंयज्ञमस्माकमश्विनाजीराध्वरंकृणुतंसुम्नमिष्टये ।
प्राचीनंरश्मिमाहुतंघृतेनतद्देवानामवोअद्यावृणीमहे ॥ ६ ॥

दिविऽस्पृशम् । यज्ञम् । अस्माकम् । अश्विना । जीरऽअध्वरम् ।
कृणुतम् । सुम्नम् । इष्टये । प्राचीनंऽरश्मिम् । आऽहुतम् ।
घृतेन । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ ६ ॥

हे अश्विना अश्विनौ युवां नोस्माकं यज्ञं दिविस्पृशं दिविस्पष्टारं गंतारं कृणुतं कुरुतं तथा । जीराध्वरं क्षिप्रं हिंसारहितं च यज्ञं नोस्माकं कृणुतं इष्टयेभिलषितसिद्ध्यर्थं सुम्नं सुखं च कुरुतं । किंच घृतेनाज्येनाहुतमग्निं प्राचीनरश्मिं देवाभिमुखं कुरुतमित्यर्थः । सिद्धमन्यत् ॥ ६ ॥

६. अश्वियुगल, ऐसा करो कि, हमारा यज्ञ देवलोक को छू ले । यज्ञ के सारे विघ्न दूर करो । हमारा मनोरथ सिद्ध करके सुखी करो । जिन अग्नि में घृत की आहुति दी जाती है, उनकी ज्वालायें देवों के प्रति प्रेरित करो । देवों से हम साधारण रक्षा की प्रार्थना करते हैं ।

उपह्वयेसुहवंमारुतंगणंपावकमृष्वंसख्यायशंभुवम् ।
रायस्पोषंसौश्रवसायधीमहितद्देवानामवोअद्यावृणीमहे ॥ ७ ॥

उप । ह्वये । सुऽहवम् । मारुतम् । गणम् । पावकम् । ऋष्वम् ।
सख्याय । शम्ऽभुवम् । रायः । पोषम् । सौश्रवसाय । धीमहि ।
तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ ७ ॥

सुहवं स्वाह्वानं पावकं शोधकं ऋष्वं दर्शनीयं शंभवं सुखस्य भावयितारं रायोधनस्य पोषं पोषकं मारुतं मरुतां संबंधिनं गणं संघं सख्याय सखिभावायोपह्वये उपगम्य ह्वयामि आगतं गणं सौश्रवसाय शोभनान्नवत्वाय सुयशस्त्वाय वा वयं धीमहि बुद्धौ निधीमहि। सिद्धमन्यत् ॥ ७ ॥

७. जो मरुद्गण सबको शुद्ध करते हैं, जो देखने में सुन्दर हैं, जिनसे कल्याण की उत्पत्ति होती है, जो धन को बढ़ाते हैं और जिनका नाम लेने पर मन में आनन्द होता है, उन्हें मैं बुलाता हूँ। विशिष्ट रूप से अन्न की प्राप्ति के लिए मैं उनका ध्यान करता हूँ। हम देवों से असाधारण रक्षा की भिक्षा मांगते हैं।

अपांपेरुंजीवधन्यंभरामहेदेवाव्यंसुहवंमध्वरश्रियम्।
सुरश्मिसोममिन्द्रियंयमीमहितद्देवानामवोअद्यावृणीमहे ॥ ८ ॥

अपाम्। पेरुम्। जीवऽधन्यम्। भरामहे। देवऽअव्यम्। सुऽहवम्। अध्वरऽश्रियम्। सुऽरश्मिम्। सोमम्। इन्द्रियम्। यमीमहि। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ ८ ॥

अपामुदकानां पेरुं पालकं जीवधन्यं धन्याजीवायस्मिन्नसौ जीवधन्यः तं देवाव्यं देवानां तर्पकं सुहवं शोभनाह्वानं शोभनस्तुतिं वा अध्वरश्रियं सुरश्मिं शोभनांशुं सोमं भरामहे धारयामः पत्नीशालातोहविर्धानं प्रति प्रापयामोवा भृतं तं सोममिन्द्रियं वीर्यं यमीमहि वयं याचामहे। सिद्धमन्यत् ॥ ८ ॥

८. जो सोम जल से मिलते हैं, जिनसे प्राणी स्वच्छन्दता पाते हैं, जो देवों को परितृप्त करते हैं, जिनका नाम लेने पर आनन्द होता है, जो यज्ञ की शोभा हैं और जिनकी दीप्ति उत्कृष्ट है, उनको हम धारण करते हैं और उनसे हम बल की याचना करते हैं। देवों से हम असाधारण रक्षा की भिक्षा मांगते हैं।

सनेमतत्सुसनितासनित्वभिर्वयंजीवाजीवपुत्राअनागसः।
ब्रह्मद्विषोविष्वगेनोभरेरततद्देवानामवोअद्यावृणीमहे ॥ ९ ॥

सनेम। तत्। सुऽसनिता। सनित्वऽभिः। वयम्। जीवाः। जीवऽपुत्राः। अनागसः। ब्रह्मऽद्विषः। विष्वक्। एनः। भरेरत। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ ९ ॥

जीवाजीवंतोजीवपुत्राजीवनवत्पुत्राश्चानागसोपराधवर्जिताश्च वयं धानाका लुशाः सनित्वभिः संभक्तृभिः पुत्रपौत्रादिभिः सह सुसनिता शोभनेन भजनेन तद्देवजातं सनेम स्तुत्या हविःप्रदानेन च संभजेमहि । किंच ब्रह्मद्विषोब्राह्मणानामस्माकं द्वेष्टारोविष्वक् नानागच्छदेनोस्मदीयं पापंभरेरत आत्मनि धारयंतु पोषयंतु । सिद्धमन्यत् ॥ ९ ॥

९. हम और हमारे पुत्रगण दीर्घजीवी हों । हम अपराधी न हों । पुत्रादि के साथ सोमरस का भाग करके हम पान करें । स्तुति-द्रोही सब प्रकार के पापों से परिपूर्ण हों । देवों से हम विशिष्ट रक्षा की भिक्षा मांगते हैं ।

येस्थामनोर्यज्ञियास्तेशृणोतनयद्वोदेवाईमहेतद्दधातन ।
जैत्रंक्रतुंरयिमद्वीरवद्यशस्तद्देवानामवोअद्यावृणीमहे॥१०॥१०॥

ये । स्थ । मनोः । यज्ञियाः । ते । शृणोतन । यत् । वः । देवाः ।
ईमहे । तत् । दधातन । जैत्रम् । क्रतुं । रयिऽमत् । वीरऽवत् ।
यशः । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ १० ॥ १० ॥

हे देवा ये यूयं मनोर्मनुष्यस्य यज्ञियायज्ञार्हाः स्थ भवथ ते यूयं शृणोतनास्मदीयां स्तुतिं शृणुत । किंच हे देवावोयुष्मान् यदभीष्टमीमहे याचामहे तत् जैत्रं जयशीलं क्रतुं यज्ञानं रयिमत् धनवत् वीरवत् पुत्राद्युपेतं यशश्च ददातनास्मभ्यं प्रयच्छत । सिद्धमन्यत् ॥ १० ॥

१०. देवो, तुम लोग मनुष्यों से यज्ञ पाने के योग्य हो । सुनो । तुमसे हम जो मांगते हैं, उसे दो । जिससे हम बली हों, ऐसा ज्ञान दो । धन, लोकबल और यश दो । देवों से हम असाधारण रक्षा की भिक्षा मांगते हैं । इति सप्तमस्याष्टमे दशमोवर्गः ॥ १० ॥

अथैकादशी—

महद्वद्यमहतामावृणीमहेवोदेवानांबृहतामनर्वणाम् ।
यथावसुंवीरजातंनशामहैतद्देवानामवोअद्यवृणीमहे ॥ ११ ॥

महत् । अद्य । महताम् । आ । वृणीमहे । अवः । देवानाम् ।
बृहताम् । अनर्वणाम् । यथा । वसु । वीरऽजातम् । नशामहै ।
तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ ११ ॥

अद्यास्मिन्नहनि महतां श्रेष्ठानां बृहतां वृद्धानां अनर्वणां अप्रतिगतानां देवानामिंद्रादीनां संबंधि महदधिकं अवोरक्षणमावृणीमहे प्रार्थयामहे । किंच वयं यथा वसु धनं वीरजातं अपत्यजातं च नशामहै प्राप्नुयाम तथा ते देवाः कुर्वंत्वितिशेषः ॥ ११ ॥

११. देवता लोग जैसे महान्, प्रकाण्ड और अविचलित हैं, हम उनसे वैसी ही विशिष्ट रक्षा की प्रार्थना करते हैं। हम धन और लोकबल प्राप्त करें। देवों से हम विशिष्ट रक्षा की भिक्षा माँगते हैं।

महोअग्नेःसमिधानस्यशर्मण्यनागामित्रेवरुणेस्वस्तये ।
श्रेष्ठेस्यामसवितुःसवीमनितद्देवानामवोअद्यावृणीमहे ॥ १२ ॥

महः । अग्नेः । समऽइधानस्य । शर्मणि । अनागाः ।
मित्रे । वरुणे । स्वस्तये । श्रेष्ठे । स्याम । सवितुः ।
सवीमनि । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ १२ ॥

समिधानस्य समिध्यमानस्य महोमहतोग्नेः शर्मणि सुखे वयं स्याम भवेम । किंच वयमनागाअनागसोवचनव्यत्ययः स्याम । अपिच मित्रे वरुणे मित्रावरुणयोः षष्ठ्यर्थे सप्तमी सवितुश्च श्रेष्ठेऽतिप्रशस्ये सवीमनि प्रसवे स्वस्तये सर्वप्रकाराविनाशाय स्याम । सिद्धमन्यत् ॥१२॥

१२. प्रज्वलित अग्नि से हम विशिष्ट सुख प्राप्त करें। मित्र और वरुण के पास हम निरपराधी होकर कल्याण प्राप्त करें। सूर्य हमें सर्वोत्कृष्ट शान्ति दें। देवों से हम विशिष्ट रक्षा की भिक्षा माँगते हैं।

येसवितुःसत्यसवस्यविश्वेमित्रस्यव्रतेवरुणस्यदेवाः ।
तेसौभगंवीरवद्गोमदप्नोदधातनद्रविणंचित्रमस्मे ॥ १३ ॥
ये । सवितुः । सत्यऽसवस्य । विश्वे । मित्रस्य । व्रते ।
वरुणस्य । देवाः । ते । सौभगम् । वीरऽवत् । गोऽमत् । अप्नः ।
दधातन । द्रविणम् । चित्रम् । अस्मे इति ॥ १३ ॥

ये विश्वेदेवाः सत्यसवस्य सत्यप्रसवस्य सवितुर्मित्रस्य वरुणस्य मित्रावरुणयोश्च व्रते प्रसवाख्ये कर्मणि भवंति ते यूयं सौभगं सौभाग्यं वीरवत्पुत्राद्युपेतं गोमत् गोयुक्तं चित्रं पूजनीयं द्रविणं धनं चाप्नः कर्म चास्मे मह्यं दधातन प्रयच्छत ॥ १३ ॥

१३. जो सब देवता सत्य-स्वभाव सूर्य, मित्र और वरुण के कार्यों में उपस्थित रहते हैं, वे हमें सौभाग्य, लोकबल, गाय और पुत्रधन दें तथा विविध प्रकार के धन भी दें।

अथ चतुर्दशी—

सवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ।
सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः ॥ १४॥ ११॥

सविता । पश्चातात् । सविता । पुरस्तात् । सविता । उत्तरात्तात् ।
सविता । अधरात्तात् । सविता । नः । सुवतु । सर्वऽतातिम् ।
सविता । नः । रासताम् । दीर्घम् । आयुः ॥ १४ ॥ ११ ॥

पश्चातात् पश्चिमतः स्थितः सविता पुरस्तात् पूर्वतश्चस्थितः सविता उत्तरात्तात् उत्तरतः स्थितश्च अधरात्तात् दक्षिणतश्च स्थितः सविता नोस्माकं सर्वतातिं सर्वमभिलषितं धनादिकं सुवतु प्रेरयतु । किंच सवितैव नोस्मभ्यं दीर्घं बहुकालीनं आयुः रासतां ददातु बहुधा सवितृपदग्रहणमत्यंतमादरार्थं ॥ १४ ॥

१४. क्या पश्चिम, क्या पूर्व, क्या उत्तर और क्या दक्षिण—सूर्य-देव हम सबको सर्वत्र श्री-वृद्धि दें । हमें दीर्घ परमायु [illegible]

॥ इति सप्तमस्याष्टमे एकादशोवर्गः ॥ ११ ॥

नमोमित्रस्येति द्वादशर्चमष्टमं सूक्तं अभितपानाम सूर्यपुत्रऋषिः इदमादीनि पंचसूक्तानि जागतानि अस्य सूक्तस्य दशमी त्रिष्टुप् सूर्योदेवता । तथा चानुक्रांतं—नमोद्वादश सौर्योभितपाः सौर्यं जागतं वै त्रिष्टुप् दशमीति । आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्यकांडे एतत्सूक्तं। सूत्रितंच—चित्रंदेवानां नमोमित्रस्येति । विपुवति निष्केवल्ये आद्यस्तृचोनुरूपः । सूत्रितंच-विभाट्बृहद्पिबतुसोम्यंमधु नमोमित्रस्यवरुणस्यचक्षसइति स्तोत्रियानुरूपाविति । स्वपंतमभ्यस्तमयेसति रात्रिशेषं स्थित्वा प्रातर्येनसूर्यज्योतिषेत्यादिभिः सूर्यउपस्थेयः । सूत्रितंच—अव्याधितं चेत्स्वपंतमादित्योभ्यस्तमियाद्वाग्यतोनुपविशन् रात्रिशेषं भूत्वा येनसूर्यज्योतिषाबाधसेतमइति पंचभिरादित्यमुपतिष्ठेत । स्वपंतमभ्युदिते यस्यते विश्वेत्यादिभिश्चतसृभिः सूर्यउपस्थेयः । सूत्रितंच--अभ्युदियाच्चेदकर्मश्रांतमनभिरूपेण कर्मणा वाग्यतइति समानमुत्तराभिश्चतसृभिरुपस्थानमिति । एकादशिनस्य सौर्यस्य पशोर्हविषोपाज्या । सूत्रितंच—शन्नोभवचक्षसाशन्नोअह्नाऽऽवायोभूपशुचिषा उपनइति । होत्रकाणांशकलाधाने यद्वोदेवाइत्येषा। विवाहकन्यारोदनीये जीवंरुदंतीत्येषा जप्या ।

नमोमित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतंसपर्यत ।
दूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्यायशंसत ॥ १ ॥

नमः । मित्रस्य । वरुणस्य । चक्षसे । महः । देवाय । तत् ।
ऋतम् । सपर्यत । दूरेऽदृशे । देवऽजाताय । केतवे ।
दिवः । पुत्राय । सूर्याय । शंसत ॥ १ ॥

हे ऋत्विजोयूयं मित्रस्य वरुणस्य मित्रावरुणयोश्चक्षसे द्रष्ट्रे महोमहते देवाय द्योतमानाय दूरेदृशे दूरेसंतमपि पश्यते देवजाताय देवेषु जाताय देवार्थं उत्पन्नाय केतवे विश्वस्य प्रज्ञापकाय दिवः पुत्राय पुत्रभूताय दिविजायमानत्वात् तत्पुत्रत्वव्यपदेशः सूर्याय सूर्यार्थं नमः कृत्वा तद्विहितं ऋतं यागादिलक्षणं कर्म सपर्यत पूजयत शंसत स्तुतिमपि कुरुत ॥ १ ॥

१. पुरोहितो, जो सूर्य, मित्र और वरुण को देखते हैं, जिनकी दीप्ति अतीव उज्ज्वल है, जो दूर से ही सारी वस्तुओं को देखते हैं, जिन्होंने देवों के वंश में जन्म ग्रहण किया है, जो सारी वस्तुओं को स्वच्छ कर देते हैं और आकाश के पुत्र-स्वरूप हैं, उन सूर्य को नमस्कार करो, पूजा करो और स्तुति करो ।

सामांसत्योक्तिःपरिपातुविश्वतोद्यावाचयत्रततनन्नहानिच ।
विश्वमन्यंनिविशतेयदेजतिविश्वाहापोविश्वाहोदेतिसूर्यः ॥ २ ॥

सा । मा । सत्यऽउक्तिः । परि । पातु । विश्वतः । द्यावा । च । यत्र ।
ततनन् । अहानि । च । विश्वम् । अन्यत् । नि । विशते । यत् ।
एजति । विश्वाहा । आपः । विश्वाहा । उत् । एति । सूर्यः ॥ २ ॥

सा सत्योक्तिः तत्सत्यवचनं मा मां विश्वतः सर्वतः परिपातु परिरक्षतु । यया सत्योक्त्या यत्र यस्मिन् देशे द्यावाच द्यावापृथिव्यावहानि रात्रयश्च ततनन् अतन्वन् तत्र विश्वं सर्वमन्यद् भूतजातं निविशते विश्राम्यति यदेतद्भूतजातमेजति कंपते विश्वाहा सर्वदा आपश्च स्यंदते विश्वाहा सर्वदा सूर्यश्चोदेति सा सत्योक्तिर्मां परिपात्वित्यर्थः ॥ २ ॥

२. वही सत्य-वचन है, जिसका अवलम्बन करके आकाश और दिन वर्त्तमान हैं, सारा संसार और प्राणिवृन्द जिसपर आश्रित हैं, जिसके प्रभाव से प्रतिदिन जल प्रवाहित होता है और सूर्य उगते हैं । वे सत्य-वचन मुझे सारे विषयों में बचावें ।

अथ तृतीया—

नतेअदेवःप्रदिवोनिवासतेयदेतशोभिःपतरैरथर्यसि ।
प्राचीनमन्यदनुवर्ततेरजउदन्येनज्योतिषायासिसूर्य ॥ ३ ॥

न । ते । अदेवः । प्रऽदिवः । नि । वासते । यत् । एतशेभिः ।
पतरैः । रथर्यसि । प्राचीनम् । अन्यत् । अनु । वर्तते । रजः ।
उत् । अन्येन । ज्योतिषा । यासि । सूर्य ॥ ३ ॥

हे सूर्य ते तव समीपे प्रदिवः प्रत्नः पुरातनः कश्चिद्देवोसुरोराक्षसोवा न निवासते न निवसति । कदेत्यतआह यद्यदा त्वं पतरैर्गमनशीलैरेतशेभिः अश्वैः रथर्यसि रथं कामयसे योक्तुं । किंच प्राचीनमन्यत् त्वदीयं ज्योतिः रजउदकमनुवर्तते अन्येन तेन ज्योतिषा उद्यासि उदेषि । यद्वा प्राचीनमन्यद्रजश्चंद्राख्यं ज्योतिस्त्वामनुवर्तते ततस्त्वमन्येन ज्योतिषा सहोदेषीत्यर्थः ॥ ३ ॥

३. सूर्यदेव जिस समय तुम वेगशाली घोड़े को रथ में जोतकर आकाश-मार्ग से जाते हो, उस समय कोई भी देव-शून्य जीव तुम्हारे पास नहीं आने पाता। तुम्हारी वह चिर-परिचित असाधारण ज्योति तुम्हारे साथ-साथ जाती है—उसी ज्योति को धारण करके तुम उगते हो।

येनसूर्यज्योतिषाबाधसेतमोजगच्चविश्वमुदियर्षिभानुना ।
तेनास्मद्विश्वामनिरामनाहुतिमपामीवामपदुःष्वप्न्यंसुव ॥ ४ ॥

येन । सूर्य । ज्योतिषा । बाधसे । तमः । जगत् । च । विश्वम् ।
उत्ऽइयर्षि । भानुना । तेन । अस्मत् । विश्वाम् । अनिराम् ।
अनाहुतिम् । अप । अमीवाम् । अप । दुःऽस्वप्न्यम् । सुव ॥ ४ ॥

हे सूर्य त्वं येन ज्योतिषा तेजसा तमोंधकारं बाधसे निवारयसि येन च भानुना तेजसा विश्वं सर्वं जगज्जंगममुदियर्षि उद्गमयसि तेन ज्योतिषास्मदस्मत्तोविश्वां सर्वामनिरां अन्नाभावं अनाहुतिं अहोमं चामीवां रोगजातं चापसुव अपगमय दुःस्वप्न्यं दुःस्वप्नभवमरिष्टं चापसुव ॥ ४ ॥

४. सूर्यदेव, जिस ज्योति के द्वारा तुम अन्धकार को नष्ट करते हो और जिस किरण के द्वारा सारे संसार को प्रकाशित करते हो, उसके द्वारा तुम हमारी सारी दरिद्रता नष्ट करो। हमारा पाप, रोग और दुःख दूर करो।

अथ पंचमी--

विश्वस्यहिप्रेषितोरक्षसिव्रतमहेळयन्नुच्चरसिस्वधाअनु ।
यदद्यत्वासूर्योपब्रवामहैतन्नोदेवाअनुमंसीरतक्रतुम् ॥ ५ ॥

विश्वस्य । हि । प्रऽइषितः । रक्षसि । व्रतम् । अहेळयन् ।
उत्ऽचरसि । स्वधाः । अनु । यत् । अद्य । त्वा । सूर्य । उपऽब्रवामहै ।
तत् । नः । देवाः । अनु । मंसीरत । क्रतुम् ॥ ५ ॥

हे सूर्य मेषितः प्रेरितः त्वमहेळयन् अक्रुध्यन् विश्वस्य सर्वस्य यजमानस्य व्रतं कर्म रक्षसि हि यज्ञविध्वंसकेभ्योराक्षसेभ्यः पालयसि । स्वधाहवींष्यनु उच्चरसि उद्गच्छसिच प्रातर्होमे निवृत्ते सति पश्चादुद्गच्छसीत्यर्थः । तथाच यद्यद्यास्मिन्नहनि त्वा त्वां उपब्रवामहै उपब्रूमः तदानोस्माकं तं क्रतुं तत्कर्म देवाइंद्रादयोनुमंसीरत अनुमन्यंतां ॥ ५ ॥

५. सूर्यदेव तुम सरल रूप से सारे संसार के क्रिया-कलाप की रक्षा करने के लिए प्रेरित हुए हो । तुम प्रातःकाल के होम से उदित होते हो । सूर्य, आज हम जिस समय तुम्हारे नाम का उच्चारण करते हैं, उस समय देवता लोग हमारे यज्ञ को सफल करें ।

तंनोद्यावापृथिवीतंनआपइन्द्रःशृण्वन्तुमरुतोहवंवचः ।
माशूनेभूमसूर्यस्यसंदृशिभद्रंजीवन्तोजरणामशीमहि ॥६॥१२॥

तम् । नः । द्यावापृथिवी इति । तत् । नः । आपः । इन्द्रः । शृण्वन्तु ।
मरुतः । हवम् । वचः । मा । शूने । भूम । सूर्यस्य । सम्ऽदृशि ।
भद्रम् । जीवन्तः । जरणाम् । अशीमहि ॥ ६ ॥ १२ ॥

द्यावापृथिवी द्यावापृथिव्यौ आपश्च इंद्रश्च मरुतश्च नोस्माकं तं हवमाह्वानं नोस्माकं तद्वचः स्तुतिरूपं वाक्यं च नइतिद्विरुक्तिरादरार्था शृण्वंतु । किंच वयं सूर्यस्य संदृशि संदर्शने शूने प्रवृद्धाय दुःखाय माभूम मैव भवेम किंतु जीवंतः चिरं प्राणान् धारयंतोवयं भद्रं कल्याणं जरणां वृद्धत्वममरत्वं चाशीमहि प्राप्नुयाम ॥ ६ ॥

६. द्यावापृथिवी, जल, मरुत् और इन्द्र हमारा आह्वान सुनें । सूर्य की कृपा-वृष्टि रहते हम दुःखभागी न हों । हम दीर्घजीवी होकर वृद्धावस्था पर्यन्त सौभाग्यशाली रहें ।

॥ इति सप्तमस्याष्टमे द्वादशोवर्गः ॥ १२ ॥

विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः ।
उद्यन्तं त्वा मित्रमहो दिवे दिवे ज्योग्जीवाः प्रति पश्येम सूर्यं ॥ ७ ॥

विश्वाहा । त्वा । सुऽमनसः । सुऽचक्षसः । प्रजाऽवन्तः ।
अनमीवाः । अनागसः । उत्ऽयन्तम् । त्वा । मित्रऽमहः ।
दिवेऽदिवे । ज्योक् । जीवाः । प्रति । पश्येम । सूर्य ॥ ७ ॥

हे सूर्य त्वा त्वां सुमनसः प्रीतियुक्तमनस्काः सुचक्षसः सुदर्शनाः प्रजावंतः पुत्राद्युपेताः अनमीवाः रोगरहिताः अनागसः अपराधवर्जिताश्च वयं विश्वाहा सर्वदा यजेमेति शेषः । किंच हे मित्रमहः मित्राणां पूजयितः सूर्य दिवेदिवे प्रतिदिनं उद्यंतमुदयं प्राप्तुवंतं त्वा त्वां ज्योक् चिरं जीवा जीवंतोवयं प्रतिपश्येम ॥ ७ ॥

७. बन्धुओं के सत्कारकारी सूर्य, जैसे तुम दिन-दिन उगते हो, वैसे ही हम प्रतिदिन तुम्हारा, प्रशस्त मन और प्रशस्त चक्षु से, दर्शन करें; प्रत्यह ही हम नीरोग शरीर से सन्तानों से घेरे जाकर और तुम्हारे पास किसी दोष से दोषी न होकर तुम्हारा दर्शन कर सकें। हम चिरजीवी होकर तुम्हारे दर्शन की प्राप्ति कर सकें।

महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषे चक्षुषे मयः ।
आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्यं ॥ ८ ॥

महि । ज्योतिः । बिभ्रतम् । त्वा । विऽचक्षण । भास्वन्तम् ।
चक्षुषेऽचक्षुषे । मयः । आऽरोहन्तम् । बृहतः । पाजसः ।
परि । वयम् । जीवाः । प्रति । पश्येम । सूर्य ॥ ८ ॥

हे विचक्षण विद्रष्टः सूर्य महि महत् ज्योतिस्तेजोबिभ्रतं धारयंतं भास्वंतं दीप्तिमंतं चक्षुषेचक्षुषे सर्वेषां द्रष्टॄणां चक्षुषे मयः सुखकरं बृहतोमहतः पाजसोबलवतः परिमहतोबलवतः सामुद्रस्योदकस्योपरीत्यर्थः । आरोहंतं त्वा त्वां जीवाश्चिरं जीवंतोवयं प्रति प्रतिदिनं पश्येम ॥ ८ ॥

८. सर्व-दर्शक सूर्य, तुम प्रकाण्ड ज्योति धारण करो। तुम्हारी दीप्ति उज्ज्वल है—सबकी आँखों में तुम सुखकर हो। जिस समय तुम्हारी यह मूर्त्ति आकाश के ऊपर चढ़ती है, उस समय हम, प्रदीप्त शरीर के साथ, नित्य उसका दर्शन करें।

यस्य ते विश्वा भुवनानि केतुना प्रचेरते नि च विशन्ते अक्तुभिः ।
अनागास्त्वेन हरिकेश सूर्याह्ना ह्नानो वस्यसावस्यसो दिहि ॥ ९ ॥

यस्य । ते । विश्वा । भुवनानि । केतुना । प्र । च । ईरते । नि ।
च । विशन्ते । अक्तुऽभिः । अनागाःऽत्वेन । हरिऽकेश ।
सूर्य । अह्नाऽअह्ना । नः । वस्यसाऽवस्यसा । उत् । इहि ॥ ९ ॥

हे हरिकेश हरितवर्णकेश सूर्य यस्य ते तव केतुना प्रज्ञानेन विश्वा विश्वानि भुवनानि भूतजातानि प्रचरते प्रकर्षेण गच्छंति अक्तुभिः रात्रिभिः निविशंते च विश्राम्यंति च स्वपंतीत्यर्थः। सत्यं नोस्माकं अनागास्त्वेन अपराधवर्जितत्वेन वस्यसावस्यसा अत्यंतश्रेयस्करेण वसुमत्तरेण वा अह्नाह्ना तेनतेन दिवसेनोदिहि उद्गच्छ ॥ ९ ॥

९. तुम्हारी जिस पताका के साथ-साथ सारा संसार प्रकाश पाता है और प्रतिरात्रि अन्धकारावृत होकर अन्तर्धान होता है, हे पिङ्गलवर्ण केशवाले सूर्य, तुम उसी उत्तम पताका को लेकर दिन-दिन उगो। हम भी निर्दोष होकर उसका दर्शन पावें।

शंनोभवचक्षसाशंनोअह्नाशंभानुनाशंहिमाशंघृणेन ।
यथाशमध्वञ्छमसद्दुरोणेतत्सूर्यद्रविणंधहिचित्रम् ॥ १० ॥

शम् । नः । भव । चक्षसा । शम् । नः । अह्ना । शम् । भानुना ।
शम् । हिमा । शम् । घृणेन । यथा । शम् । अध्वन् । शम् । असत्
दुरोणे । तत् । सूर्य । द्रविणम् । धेहि । चित्रम् ॥ १० ॥

हे सूर्य त्वं चक्षसा तेजसा नोस्माकं शं सुखकरोभव अह्ना दिवसेन शं सुखकरोनोस्माकं भव भानुना रश्मिना च शं भवास्माकं सुखकरोभव । हिमा शैत्येन च शं भव घृणेन औष्ण्येन च शंकरोभव। यथा यादृशेन नोस्माकमध्वन् अध्वनि मार्गे शं भवति दुरोणे गृहे च शं सुखमसद्भवति तच्चित्रं पूजनीयं द्रविणं धनं धेह्यस्मभ्यं प्रयच्छ ॥ १० ॥

१०. तुम्हारी दृष्टि हमारा कल्याण करे। तुम्हारा दिन और किरण, तुम्हारी शीतता और तुम्हारा उत्ताप कल्याणकर हो। हम घर में ही रहें अथवा मार्ग पर यात्रा करें—वह सदा कल्याणकर हो। सूर्य, हमें विविध सम्पत्तियाँ दो।

अथैकादशी—

अस्माकंदेवाउभयायजन्मनेशर्मयच्छतद्विपदेचतुष्पदे ।
अदत्पिबंदूर्जयमानमाशितंतदस्मेशंयोररपोदधातन ॥ ११ ॥

अस्माकम् । देवाः । उभयाय । जन्मने । शर्म । यच्छत । द्विऽपदे ।
चतुःऽपदे । अदत् । पिबत् । ऊर्जयमानम् । आशितम् ।
तत् । अस्मे इति । शम् । योः । अरपः । दधातन ॥ ११ ॥

हे देवाः सूर्येणाभ्यनुज्ञातायूयमस्माकं द्विपदे मनुष्यात्मकाय चतुष्पदे पश्वात्मकाय चोभयाय उभयविधाय जन्मने भूतजाताय शर्म सुखं यच्छत दत्त । किञ्च यथास्मत्पुत्रादिकं अदत् भक्षणीयं भक्षयत् पिबत् पानीयं पिबच्च ऊर्जयमानं बलवंतमिवात्मानमाचरदाशितं सुहितं च भवति तथा अस्मे अस्माकं तत् शं रोगशांतिनिमित्तकं सुखं योर्विषययोगजनितं सुखं च अरपः अपापं च दधातन प्रयच्छत ॥ ११ ॥

११. देवो, हमारे अधिकार में जो द्विपद और चतुष्पद हैं, उन सब को तुम सुखी करो। सभी प्राणी आहार करें, पुष्ट और बलिष्ठ हों और हमारे साथ वह सब अटूट स्वाधीनता पावें।

यद्वोदेवाश्चकृमजिह्वयागुरुमनसोवाप्रयुतीदेवहेळनम् ।
अरावायोनोअभिदुच्छुनायतेतस्मिन्तदेनोवसवोनिधेतन ॥१२॥१३॥

यत् । वः । देवाः । चकृम । जिह्वया । गुरु । मनसः । वा । प्रऽयुती ।
देवऽहेळनम् । अरावा । यः । नः । अभि । दुच्छुनाऽयते ।
तस्मिन् । तत् । एनः । वसवः । नि । धेतन ॥ १२ ॥ १३ ॥

हे वसवोवासयितारोदेवाः वोयुष्माकं वयं जिह्वया वाचा मनसः प्रयुती प्रयुत्या प्रयोगेण उरु महद्देवहेळनं देवक्रोधनं च यदेनश्चकृम अकार्ष्म योस्मच्छत्रुर्नोस्मानभिप्रति अरावा गमनवान् भूत्वादुच्छुनायते पापान्याचरति अस्मानुद्वेजयति वा तस्मिन्नस्मच्छत्रौ तदेनोस्माभिः कृतं पापं निधेतन सूर्यस्याज्ञया निधत्त स्थापयतेत्यर्थः ॥ १२ ॥

१२. धन-सम्पन्न देवो, कथा-द्वारा हो, मानसिक क्रिया-द्वारा हो, देवों के पास जो कुछ अपराध का कार्य हम किया करते हैं, उसका पाप तुम लोग उस व्यक्ति के ऊपर न्यस्त करो, जो व्यक्ति दान-धर्म से विमुख है और जो हमारा अनिष्ट किया करता है।

॥ इति सप्तमस्याष्टमे त्रयोदशोवर्गः ॥ १३ ॥

अस्मिन्नइति पञ्चर्चं नवमं सूक्तं जागतमैंद्रं मुष्कविशिष्टइंद्राख्यऋषिः । तथाचानुक्रांतं-अस्मिन्नः पञ्चमुष्कवानिंद्रइति । गतोविनियोगः । अपरे तु तांड्यशाट्यायनकाअस्य सूक्तस्य मुष्कवानिंद्रोदेवता लुशाऋषिरितिवर्णयंति ।

तत्र प्रथमा—

अस्मिन्नइन्द्रपृत्सुतौयशस्वतिशिमीवतिक्रन्दसिप्रावसातये ।
यत्रगोषाताधृषितेषुखादिषुविष्वक्पतन्तिदिद्यवोनृषाह्ये ॥ १ ॥

अस्मिन् । नः । इन्द्र । पृत्सुतौ । यशस्वति । शिमीऽवति ।
क्रन्दसि । प्र । अव । सातये । यत्र । गोऽसाता । धृषितेषु ।
खादिषु । विष्वक् । पतन्ति । दिद्यवः । नृऽसह्ये ॥ १ ॥

हे इंद्र त्वं यशस्वति कीर्तिमति शिमीवति परस्परप्रहारलक्षणकर्मवति अस्मिन्नुपस्थिते पृत्सुतौ संग्रामे क्रंदसि सिंहनादं करोषि । सातये धनलाभाय प्राव नः अस्मान् प्ररक्षसि च । कस्मिन्नित्यत्राह यत्र यस्मिन् गोषाता गोसातौ लब्धपशुके नृषाह्ये नृणामभिभावुके च संग्रामे खादिषु परस्परखादकेषु च योद्धृषु धृषितेषु धृष्टेषु सत्सु दिद्यवः आयुधानि विष्वक् सर्वतः पतंति ॥ १ ॥

१. इन्द्र यह जो युद्ध है, जिसमें यश मिलता है और प्रहार पर प्रहार चलता है, उसमें तुम वीर-मद से मस्त होकर उद्घोष करते हो और शत्रुओं से जीती हुई गायों को सुरक्षित करते हो। युद्ध में एक ओर दीप्यमान बाण प्रबल शत्रुओं के ऊपर गिरते हैं—इस व्यापार को देखकर लोग हत-बुद्धि हो जाते हैं।

सनःक्षुमन्तंसदनेव्यूर्णुहिगोअर्णसंरयिमिन्द्रश्रवाय्यम् ।
स्यामतेजयतःशक्रमेदिनोयथावयमुश्मसितद्वसोकधि ॥ २ ॥

सः । नः । क्षुऽमन्तम् । सदने । वि । ऊर्णुहि । गोऽअर्णसम् ।
रयिम् । इन्द्र । श्रवाय्यम् । स्याम । ते । जयतः । शक्र । मेदिनः ।
यथा । वयम् । उश्मसि । तत् । वसो इति । कधि ॥ २ ॥

हे इंद्र सर्वानुग्रहकत्वेन प्रसिद्धः त्वं नोस्माकं सदने गृहे क्षुमंतं अन्नवंतं शब्दवंतं वा गोअर्णसं गावोर्णउदकमिव प्रवृद्धायस्मिन् तं श्रवाय्यं श्रवणीयंरयिंधनं व्यूर्णुहि विविधमाच्छादय । किंच हे वसो वासक शक्रेंद्र जयतः शत्रुं ते तव प्रसादाद् वयं मेदिनोमेदसा युक्ताः बलवंतः स्याम भवेम । किंबहूक्त्या यथा यत् वयमुश्मसि कामयामहे तत्सर्वं कधि कुरु ॥ २ ॥

२. फलतः हे इन्द्र, प्रचुर धन-धान्य और गायों से हमारा घर भर दो। शक्र, तुम्हारे विजयी होने पर हम तुम्हारे स्नेह के पात्र हों। हम जिस धन की अभिलाषा करते हैं, वह हमें दो।

योनोदासआर्योवापुरुहूतादेवइन्द्रयुधयेचिकेतति ।
अस्माभिष्टेसुपहाःसन्तुशत्रवस्त्वयावयंताञ्वनुयामसंगमे ॥ ३ ॥

यः । नः । दासः आर्यः । वा । पुरुऽहूत । अदेवः । इन्द्र ।
युधये । चिकेतति । अस्माभिः । ते । सुऽसहाः । सन्तु ।
शत्रवः । त्वया । वयम् । तान् । वनुयाम । सम्ऽगमे ॥ ३ ॥

हे पुरुहूत बहुस्तुतेंद्र योदासः कर्मकरः शूद्रः आर्यस्त्रैवर्णिकोवा देवश्चान्योसुरोवा नोस्मान् युधये युद्धाय चिकेतति जानाति ते सर्वे शत्रवोस्मदरयस्ते तव प्रसादादस्माभिः सुसहाः स्वभिभवाः संतु भवंतु। किंच वयं त्वया सहायेन तान् शत्रून् संगमे संग्रामे वनुयाम हन्याम॥३॥

३. बहुतों के द्वारा स्तुत इन्द्र, आर्यजाति का हो या दासजाति का हो, जो कोई भी देव-शून्य मनुष्य हमारे साथ युद्ध करने की इच्छा करता है, वह अनायास हमसे हार जाय। तुम्हारी कृपा से हम उन्हें युद्ध में हरावें।

योदभ्रेभिर्हव्योयश्चभूरिभिर्योअभीकेवरिवोवित्नृषात्ये ।
तंविखादेसस्निमद्यश्रुतंनरमर्वाञ्चमिन्द्रमवसेकरामहे ॥ ४ ॥

यः । दभ्रेभिः । हव्यः । यः । च । भूरिऽभिः । यः । अभीके ।
वरिवःऽवित् । नृऽसह्ये । तम् । विऽखादे । सस्निम् । अद्य ।
श्रुतम् । नरम् । अर्वाञ्चम् । इन्द्रम् । अवसे । करामहे ॥ ४ ॥

नृसहे नृणामभिभावुके विखादे विशेषण भक्षके अभीके संग्रामे वरिवोवित् धनस्य लंभकोयइंद्रोदभ्रेभिः स्वल्पैर्हव्योह्वातव्योयश्च भूरिभिः बहुभिः हव्यः तं सस्निं शुचिं श्रुतं सर्वत्र विख्यातं नरंनेतारमिंद्रं अद्यास्मिन्नहनि अवसेस्मद्रक्षणाय अर्वाचमस्मदभिमुखं करामहे कुर्मः॥४॥

४. जिनकी पूजा अल्प मनुष्य करते हैं अथवा बहुत मनुष्य करते हैं, जो दुःसाध्य युद्ध में विजयी होकर उत्तमोत्तम वस्तुओं को जीतते हैं, जो युद्ध में स्नान करते हैं और जो सबके यहाँ प्रसिद्धयशा होते हैं, आश्रय पाने के लिए हम उन्हीं इन्द्र को अपने अनुकूल करते हैं।

अथ पञ्चमी—

स्वृजंहित्वामहमिन्द्रशुश्रवानानुदंतंपभरध्वोदनम् ।
प्रमुञ्चस्वपरिकुत्सादिहागहिकिमुत्वावान्मुष्कथेर्बद्धआसते ॥५ ॥१४॥

स्वऽवृजम् । हि । त्वाम् । अहम् । इन्द्र । शुश्रव । अननुऽदम् ।
वृषभ । रध्रऽचोदनम् । प्र । मुञ्चस्व । परि । कुत्सात् । इह । आ ।
गहि । किम् । ऊँ इति । त्वाऽवान् । मुष्कयोः । बद्धः । आसते ॥५॥१४॥

हे वृषभ कामानां वर्षकेंद्र स्ववृजं स्वयमेव छेत्तारं अननुदं अनपेक्षितबलानुप्रदानं रध्रचोदनं राधकस्य चोदकं प्रेरकं त्वामहं लुशः शुश्रव अश्रौषं हि यस्मात्तस्मात् प्रमुंचस्व कुत्सेन वाध्रिशतेनांडयोर्बद्धमात्मानं बंधनाद्विमुंच । अथ परि सर्वतः परिवृतस्त्वं कुत्सात् कुत्साख्याद्वेषः इहास्मद्यागे आगह्यागच्छ किमु त्वावान् त्वत्सदृशोन्यः कश्चिन्मुष्कयोर्बद्धआसते न कोप्येतादृशोनिर्लज्जः त्वत्तोन्योस्तीत्यभिप्रायः । तत्र शाट्यायनकं कुत्सश्चलुशश्चेंद्रंव्यह्वयेतां सकुत्सस्याहवमागच्छत् तंशतेनवाध्रिभिरांडयोरबध्नात् लुशोप्यवदत् स्ववृजंहित्वामहमिंद्रशुश्रवानानुदंवृषभरध्रचोदनं प्रमुंचस्व परिकुत्सादिहागहि किमुत्वावान्मुष्कयोर्बद्धआसतइति । ताः सर्वाः संलुप्यलुशमभिप्रादुद्रवदिति । छंदोगब्राह्मणमपि कुत्सश्च लुशश्च युगपदिंद्रमाहूतवंतौ स्वंस्वंयज्ञं प्रत्यंगभावाय सखित्वादिंद्रः कुत्सं प्रतिजगाम तं तु गतं वशित्वात् कुत्सोवध्रिशतेनांडयोरबध्नादिति ॥ ५ ॥

५. इन्द्र, तुम अपने भक्तों को उत्साह से युक्त करते हो । हमें कौन उत्साहित करेगा ? हम जानते हैं कि, तुम स्वयं अपना बन्धन-छेदन करने में समर्थ हो । फलतः कुत्स के हाथ से हमें छुड़ाओ और पधारो । तुम्हारे समान व्यक्ति क्यों मुष्क-द्वय का बन्धन सहता है ?

॥ इति सप्तमस्याष्टमे चतुर्दशोवर्गः ॥ १४ ॥

योवामिति चतुर्दशर्चं दशमं सूक्तं कक्षीवतोदुहिताघोषानाम ब्रह्मवादिनी ऋषिः अंत्यात्रिष्टुप् शिष्टाजगत्यः अश्विनौ देवता । तथाचानुक्रांतं--योवांपळूना काक्षीवतीघोषाश्विनं हि त्रिष्टुबंतमिति । प्रातरनुवाकाश्विनशस्त्रयोर्जागतेछंदसि इदमादीनि त्रीणि सूक्तानि । सूत्रितंच--योवांपरिज्मेति त्रीणि त्रिश्चिन्नोअद्येति ।

तत्र प्रथमा—

योवांपरिज्मासुहृदश्विनारथोदोषामुषासोहव्योहविष्मता ।
शश्वत्तमासस्तमुवामिदंवयंपितुर्ननामसुहवंहवामहे ॥ १ ॥

यः । वाम् । परिऽज्मा । सुऽहृत् । अश्विना । रथः । दोषाम् ।
उषसः । हव्यः । हविष्मता । शश्वत्ऽतमासः । तम् । ऊँ इति ।
वाम् । इदम् । वयम् । पितुः । न । नाम । सुऽहवम् । हवामहे ॥१॥

हे अश्विनाश्विनौ वां युवयोः परिज्मा परितोगंता सुवृत् सुष्ठु वर्तमानोयोरथोदोषा रात्रिं उषसंश्च अहोरात्रयोरित्यर्थः हविष्मता यजमानेन हव्योह्वातव्यः वां युवयोः स्वभूतं सुहवं शोभनाह्वानं तमु तमेव रथं शश्वत्तमासोतिशयेन चिरंतनावयं पितुर्न यथा पितुरिदं नाम तथा हवामहे ह्वयाम ॥ १ ॥

१. अश्विद्वय, तुम लोगों को सर्वत्र विहारी जो सुघटित रथ है और जिस रथ को, उद्देश्य के लिए रात-दिन बुलाना यजमान के लिए कर्त्तव्य है, हम उसी रथ का क्रमागत नाम लेते हैं। जैसे पिता का नाम लेने में आनन्द आता है, वैसे ही इस रथ का भी नाम लेने में।

चोदयंतंसूनृताःपिन्वंतंधियउत्पुरंन्धीरीरयंतंतदुश्मसि ।
यशसंभागंकृणुतन्नोअश्विनासोमंनचारुंमघवत्सुनस्कृतम् ॥ २ ॥

चोदयंतम् । सूनृताः । पिन्वंतम् । धियः । उत् । पुरंम्ऽधीः । ईरयंतम् ।
तत् । उश्मसि । यशसंम् । भागम् । कृणुतम् । नः । अश्विना ।
सोमंम् । न । चारुम् । मघवत्ऽसु । नः । कृतम् ॥ २ ॥

हे अश्विना अश्विनौ युवां सूनृतावाचउषसोवा चोदयतं प्रेरयतं अस्माकं धियः कर्माणि च पिन्वतं पूरयतं पुरंधीर्बुद्धीः प्रज्ञाश्चोदीरयतं उद्गमयतंप्रेरयतंउत्पादयतमित्यर्थः । तदेतत्त्रयमुश्मसि वयं कामयामहे । किंच नोस्माकंयशसं यशस्विनं भागं भजनीयं धनादिकं कृणुतं कुरुतं । चारुं कल्याणं सोमं न सोममिव नोस्मान्मघवत्सु धनवत्सु कृतं कुरुतं ॥ २ ॥

२. हमें मधुर वाक्य उच्चारण करने में प्रवृत्त करो। हमारा कर्म सम्पन्न करो। विविध बुद्धियों का उदय कर दो—हम यही कामना करते हैं। अश्विद्वय, अतीव प्रशंसित धन का भाग हमें दो। जैसे सोमरस प्रीतिप्रद होता है, वैसे ही हमें भी यजमानों के पास प्रीतिप्रद कर दो।

अमाजुरश्चिद्भवथोयुवंभगोनाशोश्चिदवितारापमस्यचित् ।
अन्धस्यचिन्नासत्याकृशस्यचिद्युवामिदाहुर्भिषजारुतस्यचित् ॥३॥

अमाऽजुरः । चित् । भवथः । युवम् । भगः । अनाशोः । चित् ।
अवितारा । अपमस्य । चित् । अन्धस्य । चित् । नासत्या ।
कृशस्य । चित् । युवाम् । इत् । आहुः । भिषजा । रुतस्य । चित् ॥ ३॥

हे नासत्या नासत्यौ युवं युवां अमाजुरश्चिव पितृगृहे जूर्यन्त्याअपि दुर्भगायाघोषायाः भगोभवथः शोभनरूपेणात्मानं परिणमय्य पतिं दत्तवंतौ स्थइत्यर्थः। तथा च निगमांतरं—घोषायैचित्पितृषदेदुरोणेपतिंजूर्यंत्याअश्विनावदत्तमिति[1]। अनाशोश्चिव अनशनस्याप्यवितारा रक्षितारौ युवां भवथः अपमस्य चित् जात्यादिनिकृष्टस्यापि रक्षितारौ भवथः अंधस्य चित् चक्षुर्विकलस्यापि रक्षितारौ भवथः कृशस्य चित् दुर्बलस्यापि रक्षितारौ भवथः। किंच युवामित् युवामेव क्रतस्यचित् यज्ञस्यापि भिषजा भिषजौ वैद्यावाहुर्विद्वांसः॥ ३॥

३. पितृ-गृह में एक स्त्री (घोषा) वार्द्धक्य को प्राप्त कर रही थी, तुम लोग उसके सौभाग्य-स्वरूप वर को ले आये। जिसे चलने की शक्ति नहीं है अथवा जो अतीव नीच है, उसके तुम लोग आश्रय हो। तुम्हें लोग अन्धे, दुर्बल और रोते हुए रोगी का चिकित्सक कहते हैं।

युवंच्यवानंसनयंयथारथंपुनर्युवानंचरथायतक्षथुः।
निष्टौग्र्यमूहथुरद्भ्यस्परिविश्वेत्तावांसवनेषुप्रवाच्या॥ ४॥

युवम्। च्यवानम्। सनयम्। यथा। रथम्। पुनः। युवानम्। चरथाय। तक्षथुः। निः। तौग्र्यम्। ऊहथुः। अतूहभ्यः। परि। विश्वा। इत्। ता। वाम्। सवनेषु। प्रऽवाच्या॥ ४॥

हे अश्विनौ युवं युवां सनयं पुराणं च्यवानमृषिं यथा रथं जीर्णरथमिव पुनर्युवानं तरुणं चरथाय चरणार्थं तक्षथुः ततक्षथुः अकुरुतमित्यर्थः। तथाचयास्कः—युवां च्यवनं सनयं पुराणं यथारथं पुनर्युवानं चरणाय तक्षथुर्युवा प्रयौति कर्माणितक्षतिः करोतिकर्मेति[2]। किंच युवां तौग्र्यं तुग्रपुत्रं भुज्युमद्भ्यः परि समुद्रस्योपरि निरूहथुः। किंच वां युवयोर्विश्वा विश्वानि ता तानि कर्माणि सवनेषु यज्ञेषु प्रवाच्या प्रवाच्यानि प्रकर्षेण वक्तव्यानि॥ ४॥

४. जैसे कोई पुराने रथ को नये रूप से बनाकर उसके द्वारा गति-विधि करता है, वैसे ही तुमने जरा-जीर्ण च्यवन ऋषि को युवा बना दिया था। तुम लोगों ने ही तुग्र-पुत्र को जल के ऊपर निरुपद्रव-रूप से, वहन करके तट पर लगा दिया था। यज्ञ के समय तुम दोनों के यह सब कार्य, विशेष रूप से, वर्णन करने के योग्य हैं।

पुराणावांवीर्याऽप्रब्रवाजनेथोहासथुर्भिषजामयोभुवा।
तावांनुनव्यावव्वसेकरामहेयंनासत्याश्रदरिर्यथादधत्॥५॥१५॥

---

१ ऋ० सं० १. ८. १४। २ नि० ४. १९.।

पुराणा । वाम् । वीर्या । प्र । ब्रव । जने । अथो इति । ह । आसथुः ।
भिषजा । मयःऽभुवा । ता । वाम् । नु । नव्यौ । अवसे । करामहे ।
अयम् । नासत्या । श्रत् । अरिः । यथा । दधत् ॥ ५ ॥ १५ ॥

हे अश्विनौ वां युवयोः पुराणा पुराणानि वीर्या वीर्याणि जने लोके प्रब्रव प्रब्रवीमि । अथो अपिच हे नासत्या नासत्यौ युवां मयोभुवा सुखस्य भावयितारौ भिषजा भिषजौ वैद्यौ आसथुः बभूवथुः ता तौ वां युवामवसे रक्षणाय नव्यौ स्तुत्यौ नु क्षिप्रं करामहे कुर्मः अयमरिर्गता पतिः यजमानोयथा श्रद्दधत् श्रद्दध्यादिति ॥ ५ ॥

५. तुम लोगों के उन सारे वीरत्व के कार्यों का, लोगों के पास, मैं वर्णन करती हूँ। इसके अतिरिक्त तुम दोनों ही अत्यन्त पटु चिकित्सक हो। इसी लिए, तुम्हारा आश्रय पाने की अभिलाषा से, मैं तुम्हारी स्तुति करती हूँ। सत्यस्वरूप अश्विद्वय, मैं इस प्रकार से स्तुति करती हूँ कि, उसका विश्वास यजमान अवश्य करेगा।

॥ इति सप्तमस्याष्टमे पञ्चदशोवर्गः ॥ १५ ॥

इयंवामह्वेशृणुतंमेअश्विनापुत्रायेवपितरामह्यंशिक्षतम् ।
अनापिरज्ञाअसजात्यामतिःपुरातस्याअभिशस्तेरवस्पृतम् ॥ ६॥

इयम् । वाम् । अह्वे । शृणुतम् । मे । अश्विना । पुत्रायऽइव ।
पितरा । मह्यम् । शिक्षतम् । अनापिः । अज्ञाः । असजात्या ।
अमतिः । पुरा । तस्याः । अभिऽशस्तेः । अव । स्पृतम् ॥ ६ ॥

हे अश्विनौ वां युवामियं घोषाहं अह्वे आह्वयामि मे मम संबंधिनमिममाह्वानं शृणुतं श्रुत्वा चाह्वानं मह्यं पुत्रायेव यथा पुत्राय पितरा मातापितरौ तद्वत् शिक्षतं धनं दत्तं अनापिरबंधुरज्ञा अकृतज्ञा असजात्या अमतिः अश्रद्धेया चाभिशस्तिः मामागच्छति तस्याः अभिशस्तेः पुरा मागेव अवस्पृतं मामवपारयतं ॥ ६ ॥

६. अश्विद्वय, मैं तुम दोनों को बुलाती हूँ, सुनो। जैसे पिता पुत्र को शिक्षा देता है, वैसे ही मुझे शिक्षा दो। मेरा कोई यथार्थ बन्धु नहीं है, मैं ज्ञान-शून्य हूँ। मेरा कुटुम्ब नहीं है, बुद्धि भी नहीं है। मेरी कोई दुर्गति आने के पहले ही दूर करो।

युवंरथेनविमदायशुन्ध्युवंन्यूहथुःपुरुमित्रस्ययोषणाम् ।
युवंहवंवध्रिमत्याअंगच्छतंयुवंसुषुतिंचक्रथुःपुरन्धये ॥ ७ ॥

युवम् । रथेन । विऽमदाय । शुन्ध्युवम् । नि । ऊहथुः ।
पुरुऽमित्रस्य । योषणाम् । युवम् । हवम् । वध्रिऽमत्याः ।
अगच्छतम् । युवम् । सुऽसुतिम् । चक्रथुः । पुरंधये ॥ ७ ॥

हे अश्विनौ युवं युवां पुरुमित्रस्य पुरुमित्रनामधेयस्य योषणां दुहितरं शुंध्युवं नाम जायां विमदाय विमदनामधेयाय ऋषये रथेन स्वसेनापरिवृतेन रथेन न्यूहथुः प्रापयतं विमदस्य गृहं नीतवंतौ स्थइत्यर्थः । तथाचनिगमांतरं—यावर्भगायविमदायजायांसेनाजुवान्यूहतुरथेनेति । किंच युवं युवां वध्रिमत्याः संग्रामे शत्रुभिः छिन्नहस्तायाहवमाह्वानमगच्छतं आगत्य तस्यै हिरण्मयं हस्तं प्रयच्छतं । तथाचनिगमांतरं—अजोहवीन्नासत्याकराभांमहेयामन्पुरुभुजापुरंधिः । श्रुतंतच्छासुरिवध्रिमत्याहिरण्यहस्तमश्विनावदत्तमिति । किंच युवं युवां पुरंधये बहुप्रज्ञायै वध्रिमत्यै सुपुतिं सुप्रसवं शोभनमैश्वर्यं वा चक्रथुः कृतवंतौस्थः ॥ ७ ॥

७. पुरुमित्र राजा की "शुन्ध्युव" नामक कन्या को तुम लोग रथ पर चढ़ा ले गये थे और विमद के साथ उसका विवाह करा दिया था। वध्रिमती ने तुम लोगों को बुलाया था। उसकी बात सुनकर और उसकी प्रसव-वेदना को दूर करके सुख से प्रसव करा था।

युवंविप्रस्यजरणामुपेयुषःपुनःकलेरकृणुतंयुवद्वयः ।
युवंवन्दनमृश्यदादुदूपथुर्युवंसद्योविश्पलामेतवेकृथः ॥ ८ ॥

युवम् । विप्रस्य । जरणाम् । उपऽईयुषः । पुनरिति । कलेः ।
अकृणुतम् । युवत् । वयः । युवम् । वन्दनम् । ऋश्यऽदात् । उत् ।
ऊपथुः । युवम् । सद्यः । विश्पलाम् । एतवे । कृथः ॥ ८ ॥

हे अश्विनौ युवं युवां विप्रस्य मेधाविनः जरणां जरां उपेयुषः उपगतवतः कलेः कलिनामधेयस्य ऋषेः वयः पुनरपि युवत् युवत्वयुक्तं अकृणुतं अकुरुतं । तथाचनिगमांतरं—कलियाभिर्वित्तजानिंदुवस्यथइति । किंच युवं युवां वंदनं जायावियोगसंतापेन कूप-

---

१ ऋ० सं०१.८.८. । २ ऋ०सं०१.८.१०. । ३ हे अश्विनौ युवं युवां जरणां जरां उपेयुषः उपेतस्य विप्रस्य पुत्रादिभिः परित्यक्तस्य च्यवनाख्यस्य ऋषेः कलेःकलेवरस्य युवत् युवासदृशं वयः अकृणुतं अकुरुतं तथाचनिगमांतरं—जुजुरुणोनासत्योतवध्रिमामुंचतंद्रापिमिवच्यवानात्। मातिरतंजहितस्यायुर्दस्रादित्पतिमकृणुतंकनीनामिति । ४ ऋ०सं०१.७.३५. ।

पतितं वंदनाख्यमृषिमृश्यदाद् कूपादुदूपथुः उदैरयतं । तथाचनिगमांतरं—उद्वंदनमैरयतंस्वर्दृशइति[1]। किंच युवं युवां विश्पलां खेलस्य राज्ञः सेनायां योधीविश्पलानाम काचिद् स्त्री तां संग्रामे शत्रुभिः छिन्नजंघांसद्यस्तदैव एतवे गमनाय कृथः अकुरुतं। तथाचनिगमांतरं—चरित्रंहिवेरिवाच्छेदिपर्णमाजाखेलस्यपरितक्म्यायां। सद्योजंघामायसींविश्पलायैधनेहितेसर्तवेप्रत्यधत्तमिति[2]॥८॥

८. कलि नाम का जो स्तोता अत्यन्त वृद्ध हो गया था, तुम लोगों ने उसे फिर यौवन से युक्त किया था। तुम लोगों ने ही बन्दन नामक व्यक्ति को कुएँ के बीच से निकाला था। तुम लोगों ने ही लँगड़ी विश्पला को लोहे का चरण देकर उसे तुरत चलनेवाली बना दिया था।

युवंह्रेभंवृषणागुहाहितमुदैरयतंममृवांसमश्विना।
युवमृबीसमुततप्तमत्रयओमन्वन्तंचक्रथुःसप्तवध्रये ॥ ९ ॥

युवम्। ह। रेभम्। वृषणा। गुहा। हितम्। उत्। ऐरयतम्।
ममृऽवांसम्। अश्विना। युवम्। ऋबीसम्। उत। तप्तम्।
अत्रये। ओमनऽवन्तम्। चक्रथुः। सप्तऽवध्रये ॥ ९ ॥

हे वृषणा वर्षितारावश्विना अश्विनौ युवं युवां गुहा गुहायां हितं असुरैर्निहितं ममृवांसं म्रियमाणं रेभं रेभाख्यमृषिं उदैरयतं उत्तारितवंतौ स्थः। तथाचनिगमांतरं--दशरात्रीरशिवेनानवद्यूनवनद्धंश्रथितमप्स्वंतः। विमुतंरेभमुदनिमवृक्तमुन्निन्यथुःसोममिवस्रुवेणेति[3]। उत किंच युवं युवां तप्तमृबीसं अग्निकुंडं अत्रये अत्रेरर्थाय ओमन्वंतं अवनवंतं चक्रथुः वृष्ट्या विशमय्य शीतं कृतवंतौस्थइत्यर्थः। तथाचनिगमांतरं--हिमेनाग्निंघंसमवारयेथांपितुमतीमूर्जमस्माअधत्तं। ऋबीसेअत्रिमश्विनावनीतमुन्निन्यथुःसर्वगणंस्वस्तीति[4]। किंच युवां सप्तवध्रये अश्वमेधेन राज्ञा केनचिदपराधेन काष्ठमयमंजूषायां निक्षिप्तस्य सप्तवध्रिनामधेयस्य ऋषेरर्थाय चक्रथुः मंजूषोद्घाटनं कृतवंतौ स्थइत्यर्थः। तथाचनिगमांतरं--विजिहीष्वनस्पतेयोनिःसूष्यंत्याइव। श्रुतंमेअश्विनाहवंसप्तवध्रिंचमुंचतमिति[5] ॥ ९ ॥

९. अभीष्ट-फल-दाता अश्विद्वय, जिस समय रेभ नामक व्यक्ति को शत्रुओं ने मृत-प्राय करके गुहा के बीच रख दिया था, उस समय तुम लोगों ने ही उसे संकट से बचाया था। जिस समय अत्रि ऋषि, सात बन्धनों में बाँधे जाकर, जलते अग्निकुण्ड में फेंके गये थे, उस समय तुम लोगों ने ही उस अग्निकुण्ड को बुझाया था।

---

१ ऋ० सं० १. ७. ३३। २ ऋ० सं० १. ८. १०। ३ ऋ० सं० १. ८. १२।
४ ऋ० सं० १. ८. ९। ५ ऋ० सं० ४. ४. २०।

युवंश्वेतंपेदवेंश्विनाश्वंनवभिर्वाजैर्नवतीचंवाजिनम् ।
चर्कृत्यंददथुर्द्रावयत्सखंभगंननृभ्योहव्यंमयोभुवम् ॥ १० ॥ १६ ॥

युवम् । श्वेतम् । पेदवे । अश्विना । अश्वम् । नवऽभिः । वाजैः ।
नवती । च । वाजिनम् । चर्कृत्यम् । ददथुः । द्रवयत्ऽसखम् ।
भगम् । न । नृऽभ्यः । हव्यम् । मयःऽभुवम् ॥ १०॥१६॥

हे अश्विनाश्विनौ युवं युवां पेदवे पेदुनामधेयाय राज्ञे श्वेतं श्वेतवर्णं वाजिनं बलिनं नवभिर्नवती नवत्या चाश्वैः सहितं चर्कृत्यं संग्रामाणां अत्यर्थं कर्तारं शत्रूणां जेतारं वा द्रवयत्सखंशत्रुसखानां द्रावयितारं हव्यं ह्वातव्यं मयोभुवं सुखस्य भावयितारं अश्वं नृभ्योमनुष्येभ्योभगं न भजनीयं धनमिव ददथुः प्रायच्छतं ॥ १० ॥

१०. अश्विद्वय, तुमने ही पेदु राजा को, निन्यान्नवे घोड़ों के साथ, एक उत्तम शुभ्रवर्ण घोड़ा दिया था। वह घोड़ा विचित्र तेजस्वी था, उसे देखते ही सारी शत्रु-सेना भाग जाती थी, वह मनुष्यों के लिए बहुमूल्य धन था। उसका नाम लेने पर आनन्द प्राप्त होता था और उसे देखने पर मन में सुख होता था।

॥ इति सप्तमस्याष्टमे षोडशोवर्गः ॥ १६ ॥

नतंराजानावदितेकुतश्चननांहोअश्नोतिदुरितंनकिर्भयम् ।
यमंश्विनासुहवारुद्रवर्तनीपुरोरथंकृणुथःपत्न्यासह ॥ ११ ॥

न । तम् । राजानौ । अदिते । कुतः । चन । न । अंहः । अश्नोति ।
दुःऽइतम् । नकिः । भयम् । यम् । अश्विना । सुऽहवा । रुद्रवर्तनी
इति रुद्रऽवर्तनी । पुरःऽरथम् । कृणुथः । पत्न्या । सह ॥ ११ ॥

हे राजानावीश्वरौ अदिते अदीनौ सुहवा स्वाह्वानौ रुद्रवर्तनी स्तोत्रयुक्तमार्गौ हे अश्विना अश्विनौ युवां यं जनं पुरोरथं अग्रतोरथं पत्न्या सह स्वयंवरे कृणुथः कुरुथः तंजनं कुतश्चन कुतोपि अंहः पापं नाश्नोति नव्याप्नोति दुरितं दुर्गतिरपिनाश्नोति नकिः नच भयं प्राप्नोति ॥ ११ ॥

११. अक्षय राजाओ, तुम दोनों का नाम कीर्त्तन करने से आनन्द होता है। जिस समय तुम रास्ते में जाते हो, उस समय सब, चारों ओर से, तुम्हारी स्तुति करते हैं। यदि तुम दम्पति को अपने रथ के अगले भाग में चढ़ाकर आश्रय दो, तो उन्हें कोई भी पाप, दुर्गति या विपद नहीं छुवे।

अथ द्वादशी—

आतेनयातंमनसोजवीयसारथंयंवामृभवश्चक्रुरश्विना ।
यस्ययोगेदुहिताजायतेदिवउभेअहनीसुदिनेविवस्वतः ॥ १२ ॥

आ । तेन । यातम् । मनसः । जवीयसा । रथम् । यम् । वाम् ।
ऋभवः । चक्रुः । अश्विना । यस्य । योगे । दुहिता । जायते । दिवः ।
उभे इति । अहनी इति । सुदिने इति सुऽदिने । विवस्वतः ॥ १२ ॥

हे अश्विनाश्विनौ वां युवयोर्यं रथं ऋभवश्चक्रुः अकार्षुः यस्य रथस्य योगे संबंधे सति दिवोदुहितोषाः जायते प्रादुर्भवति यस्य च योगे विवस्वतोभास्करादुभे अहनी अहोरात्रे सुदिने शोभने जायेते तेन रथेन मनसोपि जवीयसा वेगवत्तरेणागातं युवामागच्छतमस्मान् ॥ १२ ॥

१२. अश्विद्वय, ऋभु नामक देवों ने तुम्हारे लिए रथ प्रस्तुत किया था। उस रथ के उदय होने पर आकाश की कन्या उषा प्रकट होती हैं और सूर्य से अतीव सुन्दर दिन तथा रात्रि जन्म लेती हैं। उसी मन से अधिक वेगवाले रथ पर बैठकर तुम लोग पधारो।

अथ त्रयोदशी—

तावर्तिर्यातंजयुषाविपर्वतमपिन्वतंशयवेधेनुमश्विना ।
वृकस्यचिद्वर्तिकामन्तरास्यांयुवंशचीभिर्यसिताममुञ्चतम् ॥ १३ ॥

ता । वर्तिः । यातम् । जयुषा । वि । पर्वतम् । अपिन्वतम् । शयवे ।
धेनुम् । अश्विना । वृकस्य । चित् । वर्तिकाम् । अन्तः । आस्यात् ।
युवम् । शचीभिः । यसिताम् । अमुञ्चतम् ॥ १३ ॥

हे अश्विना अश्विनौ ता तौ युवां जयुषा जयशीलेन रथेन पर्वतं अद्रिंप्रति वर्तिर्मार्गं वियातं विविधं गच्छथः। तथाचनिगमांतरं--विजयुषारथ्यायातमद्रिंश्रुतंहवंवृषणावधिमत्याइति[1] । किंच युवं शयवे शयोरर्थाय धेनुं अपिन्वतं निवृत्तपयसां वृद्धां गां प्रभूतस्य पयसोदो-

---

१ऋ० सं० ५. १. २.।

ग्रीं कृतवंतौ स्थइत्यर्थः। तथाचनिगमांतरं--युवंधेनुंशयवेनाधितायापिन्वतमश्विनापूर्व्यायं। किंच युवं युवां वृकस्यांतरनुप्रविष्टां ग्रसितां वृकेण ग्रस्तां वर्तिकां वर्तिकानाम चटका तामास्याद् वृकस्य मुखात् शचीभिः प्रज्ञाभिः कर्मभिर्वा अमुंचतं अमोचयतं। तथाचनिगमांतरं--अजोहवीदश्विनावर्तिकावामास्नोयत्सीममुंचतंवृकस्येति[2] ॥ १३ ॥

१३. अश्विद्वय, तुम लोग उसी रथ पर चढ़कर पर्वत की ओर जानेवाले मार्ग पर गमन करो और शयु नामक मनुष्य की बूढ़ी गाय को फिर दूधवाली बना दो। तुम्हारी ऐसी क्षमता है कि, तेंदुए के मुंह में गिरे वर्तिका (चटका) नामक पक्षी को तुमने उसके मुंह से निकालकर उसका उद्धार किया था।

एतंवांस्तोमंमश्विनावकर्मातक्षामभृगवोनरथम्।
न्यमृक्षामयोषणांनमर्येनित्यंनसूनुंतनयंदधानाः ॥ १४ ॥ १७ ॥

एतम्। वाम्। स्तोमम्। अश्विनौ। अकर्म। अतक्षाम। भृगवः।
न। रथम्। नि। अमृक्षाम। योषणाम्। न। मर्ये। नित्यम्।
न। सूनुम्। तनयम्। दधानाः ॥ १४ ॥ १७ ॥

हे अश्विनौ वां युवयोः एतं यथोक्तं स्तोमं स्तोत्रं अकर्म अकुर्म तदेवाह--भृगवोन भृगवइव रथं अतक्षाम वयं स्तोत्रं संस्कृतवंतः कर्मयोगाद्भवोभृगवउच्यंते। अथवा रथकाराभृगवः। किंच वयं नित्यं शाश्वतं तनयं यागादीनां कर्मणां तनितारं सूनुं न औरसं पुत्रमिव स्तोमं दधानाधारयंतोमर्ये मनुष्ये न्यमृक्षाम युवयोः स्तुतिं नितरां संस्कृतवंतः। तत्रदृष्टांतः--योषणां न यथा जायां तद्वदित्यर्थः ॥ १४ ॥

१४. जैसे भृगु-सन्तानें रथ बनाती हैं, वैसे ही, हे अश्विद्वय, तुम लोगों के लिए यह रथ प्रस्तुत किया है। जैसे जामाता को कन्या देने के समय लोग उसे वस्त्राभूषण से अलंकृत करके देते हैं, वैसे ही हमने इस स्तोत्र को अलंकृत किया है। हमारे पुत्र-पौत्र सदा प्रतिष्ठित रहें।

॥ इति सप्तमस्याष्टमे सप्तदशोवर्गः ॥ १७ ॥

रथंयांतमितिचतुर्दशर्चमेकादशं सूक्तं काक्षीवत्याघोषायाआर्षं जागतमाश्विनं। रथंयांतमित्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

रथंयान्तंकुहकोहवंनराप्रातर्द्युमन्तंसुवितायभूषति।
प्रातर्यावाणंविभ्वंविशेविशेवस्तोर्वस्तोर्वहमानंधियाशमि ॥ १ ॥

---

१ ऋ० सं० १. ८. १९.। २ ऋ० सं०१. ८. १६.।

रथम् । यान्तम् । कुह । कः । ह । वाम् । नरा । प्रति । द्युऽमन्तम् ।
सुवितायं । भूषति । प्रातःऽयावानम् । विऽभ्वम् ।
विशेऽविशे । वस्तोःऽवस्तोः । वहमानम् । धिया । शमि ॥ १ ॥

हे नरा कर्मणां नेतारावश्विनौ वां युवयोः संबंधिनं द्युमंतं दीप्तिमंतं प्रातर्यावाणं यज्ञं प्रति विलंबेन प्रातः काले गंतारं विश्वं विभुं व्यापिनं विशेविशे सर्वेषु मनुष्येषु वस्तोर्वस्तोः अन्वहं वहमानं धनं प्रापयंतं यान्तं गच्छंतं रथं कुह कस्मिन् देशे कोह कः खलु यजमानः शमि यज्ञरूपे कर्मणि धिया स्तुतिरूपेण कर्मणा सुवितायाभ्युदयार्थं प्रतिभूषति अलंकरोति कस्मिन्देशे यज्ञे कोन्यो यजमानोयुवां स्तुतिभिर्हविर्भिश्च पूजितवान् येनास्मद्यज्ञं प्रति विलंबेनागतवंतौ स्थइत्यभिप्रायः ॥ १ ॥

१. कर्मों के उपदेशक अश्विद्वय, तुम्हारा प्रकाण्ड रथ जिस समय प्रातःकाल आता है और प्रत्येक व्यक्ति के पास धन वहन करके ले जाता है, उस समय अपने यज्ञ की सफलता के लिए कौन यजमान उस उज्ज्वल रथ का स्तोत्र करता है ? तुम्हारा वह रथ कहाँ है ?

अथ द्वितीया—

कुहस्विद्दोषाकुहवस्तोरश्विनाकुहाभिपित्वंकरतःकुहोषतुः ।
कोवांशयुत्राविधवेवदेवरंमर्यंनयोषाकृणुतेसधस्थआ ॥ २ ॥

कुह । स्वित् । दोषा । कुह । वस्तोः । अश्विना । कुह ।
अभिऽपित्वम् । करतः । कुह । ऊषतुः । कः । वाम् । शयुऽत्रा ।
विधवाऽइव । देवरम् । मर्यम् । न । योषा । कृणुते । सधऽस्थे । आ ॥ २ ॥

हे अश्विनाश्विनौ कुहस्वित् क्वस्विद्दोषारात्रौ भवथइतिशेषः कुह वस्तोः क्व वा दिवा भवथः कुह क्व वाभिपित्वमभिप्राप्तिं करतः कुरुथः कुह क्वा ऊषथुः वसथः । किंच वां युवां कोयजमानः सधस्थे सहस्थाने वेयारव्ये आकृणुते आकुरुते परिचरणार्थमात्माभिमुखीकरोति । तत्र दृष्टांतौदर्शयति—शयुत्रा शयने विधवेव यथा मृतभर्तृका नारी देवरं भर्तृभ्रातरं अभिमुखीकरोति । मर्यं न यथा च सर्वं मनुष्यं योषा सर्वा नारी संभोगकालेभिमुखी करोति तद्वदित्यर्थः । तथाच यास्कः—क्वस्विद्रात्रौ भवथः क्वदिवा क्वाभिप्राप्तिं कुरुथः क्ववसथः कोवां शयने विधवेव देवरं देवरः कस्माद्द्वितीयोवरउच्यते विधवाविधातृकाभवति विधवनाद्वा विधा-

वनाद्वेति चर्मशिराअपिवा धवइति मनुष्यनाम तद्वियोगाद्विधवा देवरो दीव्यतिकर्मा मर्योमनुष्योमरणधर्मा योषायौतेराकुरुते सहस्थानेइति ॥ २ ॥

२. अश्विद्वय, तुम लोग दिन और रात में कहाँ जाते हो? कहाँ समय बिताते हो? जैसे विधवा स्त्री, शयन-काल में, देवर (द्वितीय वर?) का और कामिनी अपने पति का समादर करती है, वैसे ही यज्ञ में समादर के साथ तुम्हें कौन बुलाता है?

प्रातर्जरेथेजरणेवकार्पयावस्तोर्वस्तोर्यजतागच्छथोगृहम् ।
कस्यध्वस्राभवथःकस्यवानराराजपुत्रेवसवनावगच्छथः ॥ ३ ॥

प्रातः । जरथे । जरणाऽइव । कार्पया । वस्तोःऽवस्तोः । यजता ।
गच्छथः । गृहम् । कस्य । ध्वस्रा । भवथः । कस्य ।
वा । नरा । राजपुत्राऽइव । सवना । अव । गच्छथः ॥ ३ ॥

हे नरा नेतारावश्विनौ युवां प्रातः प्रातःकाले जरेथे स्तोतृभिः स्तूयेथे । तत्र दृष्टांतः—जरणेव यथाजरणावैश्वर्येण वृद्धौ राजानौ कार्पया प्रातः प्रबोधकस्य वंदिनोवाणी कार्पा तया स्तूयेथे तद्वदित्यर्थः । किंच वस्तोर्वस्तोरन्वहं यजता यष्टव्यौ युवां गृहं यजमानस्य मंदिरं गच्छथः प्राप्नुथः तौ युवां कस्य यजमानसंबंधिनो दोषस्य ध्वस्रा ध्वंसकौ विनाशयितारौ भवथः कस्य यजमानस्य सवना सवनानि राजपुत्रेव राजकुमारावेव युवामवगच्छथः प्राप्नुथः॥३॥

३. वो वृद्ध राजाओं के समान तुम्हें जगाने के लिए प्रातःकाल स्तोत्र-पाठ किया जाता है। यज्ञ पाने के लिए तुम लोग प्रतिदिन किसके घर में जाते हो? किसका पाप नष्ट करते हो? कर्मों के उपदेशक अश्विद्वय, राजकुमारों के समान तुम दोनों किसके यज्ञ में जाते हो?

युवांमृगेववारणामृगण्यवोदोषावस्तोर्हविषानिह्वयामहे ।
युवंहोत्रामृतुथाजुह्वतेनरेषंजनायवहथःशुभस्पती ॥ ४ ॥

युवाम् । मृगाऽइव । वारणा । मृगण्यवः । दोषा । वस्तोः ।
हविषा । नि । ह्वयामहे । युवम् । होत्राम् । ऋतुऽथा । जुह्वते ।
नरा । इषम् । जनाय । वहथः । शुभः । पती इति ॥ ४ ॥

---

१ नि० ३. १५.

हे अश्विनौ युवां वारणा वारणौ मृगेव यथा शार्दूलौ मृगण्यवोमृगयवः तद्वद्वयं दोषा रात्रौ वस्तोरहनि च हविषा निह्वयामहे नियमेन ह्वयामः। किंच हे नरा नेतारावश्विनौ युवं युवां ऋतुथा कालेकाले होत्रामाहुतिं जुह्वते जुह्वति यजमानाइतिशेषः। किंच युवां शुभः शुभस्य वृष्ट्युदकस्य पती स्वामिनौ संतौ जनाय जनार्थमिषं अन्नं वहथः प्रापयथः॥ ४॥

४. जैसे व्याध शार्दूल की इच्छा करते हैं, वैसे ही, यज्ञीय द्रव्य लेकर, मैं तुम्हें दिन-रात बुलाता हूँ। उपदेशक-द्वय यथा-समय लोग तुम लोगों के लिए होम किया करते हैं। तुम लोग भी लोगों के लिए अन्न ले आते हो; क्योंकि तुम कल्याण के अधिपति हो।

युवांहघोषापर्यश्विनायतीराज्ञ्ऊचेदुहितापृच्छेवांनरा।
भूतंमेअह्नउतभूतमक्तवेश्वावतेरथिनेशक्तमर्वते॥ ५॥ १८॥

युवाम्। ह। घोषा। परि। अश्विना। यती। राज्ञः। ऊचे।
दुहिता। पृच्छे। वाम्। नरा। भूतम्। मे। अह्ने। उत। भूतम्।
अक्तवे। अश्वऽवते। रथिने। शक्तम्। अर्वते॥ ५॥ १८॥

हे नरा नेतारावश्विनौ युवां ह खलु परि परितोयती गच्छंती राज्ञोदीप्तस्यकक्षीवतोदुहिता पुत्री घोषा घोषाख्या अहमूचे संनिहितेभ्योवृद्धेभ्यः उक्तवत्यस्मि। किंच वां युवां पृच्छे वृद्धान् संनिहितान् कीदृशावश्विनाविति पृच्छामि। तथा सति मे मम अह्ने दिवसाय दिवसनिर्वर्त्यकर्मणे भूतं भवतं। उतापिच अक्तवे रात्र्यै रात्रिनिर्वर्त्यकर्मणे भूतं भवतं। तथाश्वावते अश्वयुक्ताय रथिने रथवतेचार्वते भ्रातृव्याय शक्तं निरसनेशक्तौ भवतं॥ ५॥

५. अश्विद्वय, उपदेशक-द्वय, मैं राजकुमारी घोषा हूँ। मैं चारों ओर घूम-घूमकर तुम्हारी ही कथा कहती हूँ, तुम्हीं लोगों के विषय की जिज्ञासा करती हूँ। क्या दिन, क्या रात, तुम लोग बराबर मेरे यहाँ रहते हो। रथ-युक्त और अश्व-सम्पन्न मेरे भ्रातृष्पुत्र का दमन करते हो।

॥ इति सप्तमेस्याष्टमेष्टादशोवर्गः॥ १८॥

युवंकवीषुःपर्यश्विनारथंविशोनकुत्सोजरितुर्नशायथः।
युवोर्हमक्षापर्यश्विनामध्वासाभरतनिष्कृतंनयोर्षणा॥ ६॥

युवम्। कवी इति। स्थः। परि। अश्विना। रथम्। विशः। न।
कुत्सः। जरितुः। नशायथः। युवोः। ह। मक्षा। परि। अश्विना।
मधु। आसा। भरत। निःऽकृतम्। न। योर्षणा॥ ६॥

हे अश्विनाश्विनौ कवी क्रांतदर्शिनौ युवं युवां रथं परिष्टः परितोभवथः। अथ जरितुः स्तोतुः यज्ञं प्रतिगमनाय नशायथः रथं प्रामुथः। तत्र दृष्टांतः—विशोमनुष्यः कुत्सोन यथा कुत्सर्ष्येद्रश्च सरथमधितिष्ठतः। तथाच मंत्रांतरं--यासिकुत्सेनसरथमवस्युस्तोदोवातस्यहर्योरीशानइति[1]। किंच हे अश्विनाश्विनौ युवोर्ह युवयोः खलु स्वभूतं मधु मक्षा मक्षिका आसा आस्येन परिभरत विभर्ति। तत्रदृष्टांतः—निष्कृतं न यथा निष्कृतं संस्कृतं मधु योषणा नारी तद्वदित्यर्थः। तथाचमंत्रांतरं--उतस्यावांमधुमन्मक्षिकारपन्मदेसोमस्यौशिजोहुवन्यतीति[2] ॥ ६ ॥

६. कवि-द्वय, तुम दोनों रथपर चढ़े हुए हो। अश्विद्वय, तुम लोग कुत्स के समान रथपर चढ़कर स्तोता के घर में जाते हो। तुम्हारा मधु इतना अधिक है कि, उसे मक्खियां मुंह में ग्रहण करती हैं। जैसे कोई स्त्री व्यभिचार में रत रहती है, वैसे ही मक्खियां तुम्हारे मधु को ग्रहण करती हैं। अथ सप्तमी—

युवंह भुज्युं युवमश्विनावशं युवं शिंजारमुशनामुपारथुः।
युवोररावा परि सख्यमासते युवोरहमवसा सुम्नमाचके ॥ ७ ॥

युवम्। ह। भुज्युम्। युवम्। अश्विना। वशम्। युवम्। शिञ्जारम्। उशनाम्। उप। आरथुः। युवोः। ररावा। परि। सख्यम्। आसते। युवोः। अहम्। अवसा। सुम्नम्। आ। चके ॥ ७ ॥

हे अश्विनाश्विनौ युवं ह युवां खलु भुज्युं समुद्रमध्ये विपन्ननावं तुग्रपुत्रं भुज्युमुपारथुः उत्तारयितुमुपगतवंतौ भवथः। किंच युवं युवां वशंहस्तिबलेन शत्रुभिः पराजयमानं वशनामधेयं राजानं रक्षणायोपारथुः। किंच युवं युवां शिंजारं अत्रिं अग्निकूटादुत्तारयितुं उशनां कमनीयां स्तुतिं च श्रोतुं उपारथुः। तथाच मंत्रांतरं--अत्रिंशिंजारमश्विनेति[3]। किंच युवोर्युवयोः सख्यं मित्रत्वं ररावा हविषां प्रदाता यजमानः पर्यासते पर्यास्ते छांदसोवचनव्यत्ययः। किंच युवोर्युवयोः अवसा रक्षणेनाहं घोषा सुम्नं सुखं आचके कामये ॥ ७ ॥

७. अश्विद्वय, तुमने भुज्यु नामक व्यक्ति को समुद्र से बचाया था। तुमने वश राजा, अत्रि और उशना का उद्धार किया था। जो दाता है, वही तुम्हारा बन्धुत्व प्राप्त करता है। तुम्हारे आश्रय से जो सुख प्राप्त होता है, मैं उसकी कामना करता हूं।

युवंह कृशं युवमश्विनाशयुं युवं विधन्तं विधवामुरुष्यथः।
युवं सनिभ्यः स्तनयन्तमश्विनापव्रजमूर्णुथः सप्तास्यम् ॥ ८ ॥

---

१ ऋ० सं० ३. ५. १८। २ ऋ० सं० १. ८. २१। ३ ऋ० सं० ५. ८. ५।

युवम् । ह । कृशम् । युवम् । अश्विना । शयुम् । युवम् । विधन्तम् ।
विधवाम् । उरुष्यथः । युवम् । सनिऽभ्यः । स्तनयन्तम् ।
अश्विना । अर्प । व्रजम् । ऊर्णुथः । सप्तऽआस्यम् ॥ ८ ॥

हेअश्विना अश्विनौ युवं युवां ह खलु कृशं दुर्बलं कृशनामधेयं वा उरुष्यथः रक्षथः । किंच युवं युवां शयुं शयुनामानमृषिं उरुष्यथः । किंच युवं युवां विधंतं परिचरंतं मानुष्यं विधवां चापतिकां वधिमतीं योषां स्त्रियं चोरुष्यथः । किंच हे अश्विनाश्विनौ युवं युवां स्तनयंतं शब्दं कुर्वंतं सप्तास्यं सर्पणशीलद्वारं व्रजं मेघं व्रजः चरुरितिमेघनामसु पाठात् । सनिभ्योहविषां दातृभ्यः अर्पोर्णुथः विवृतद्वारं कृतवंतौ स्थइत्यर्थः ॥ ८ ॥

८. अश्विद्वय, तुम लोगों ने ही कृश, शयु, अपने परिचारक और विधवा को बचाया था। यज्ञकर्त्ता के लिए तुम्हीं लोग मेघ को फाड़ते हो, जिससे गतिशील द्वारवाला मेघ, शब्द करते हुए, बरसता है।

जनिष्टयोषापतयत्कनीनकोविचारुहन्वीरुधोदंसनाअनु ।
आस्मैरीयन्तेनिवनेवसिन्धवोस्माअह्नेभवतितत्पतित्वनम् ॥ ९ ॥

जनिष्ट । योषा । पतयत् । कनीनकः । वि । च । अरुहन् । वीरुधः ।
दंसनाः । अनु । आ । अस्मै । रीयन्ते । निवनाऽइव । सिन्धवः ।
अस्मै । अह्ने । भवति । तत् । पतिऽत्वनम् ॥ ९ ॥

हे अश्विनौ युवयोः प्रसादादियं योषा योषा स्त्रीगुणोपेता सुभगाजनिष्ट जाता अस्याः समीपं कनीनकः कन्याकामः पतिः पतयत् पततु अस्मै कनीनकाय युवयोर्दंसना अनुवृष्टिलक्षणानि कर्माणि लक्षीकृत्य वीरुधः ओषधयोविचारुहन् विरोहन्तु प्रादुर्भवन्तु । अस्मै कनीनकाय निवनेव प्रवणेनेव सिंधवउदकानि आरीयंते अभिगच्छंति तद्वत् तावीरुधोभिगच्छंतु । किंच अह्ने केनाप्यहंतव्यायास्मै कनीनकाय तत्संभोगसमर्थं पतित्वनं यौवनं भवति भवतु ॥९॥

९. मैं योषा हूँ। नारी-लक्षण प्राप्त करके सौभाग्यवती हुई हूँ। मेरे विवाह के लिए वर आया है। तुमने वृष्टि बरसाई है; इसलिए उसके लिए शस्य आदि भी उत्पन्न हुए हैं। निम्नाभिमुखी होकर नदियाँ इनकी ओर बह रही हैं। ये रोग-रहित हैं। सब तरह का सुख भोगने के योग्य इन्हें शक्ति हो गई है।

जीवंरुदन्तिविमयन्तेअध्वरेदीर्घामनुप्रसितिंदीधियुर्नरः ।
वामपितृभ्योयइदंसमेरिरेमयःपतिभ्योजनयःपरिष्वजे ॥१०॥१९॥

जीवम् । रुदन्ति । वि । मयन्ते । अध्वरे । दीर्घाम् । अनु । प्रऽसितिम् ।
दीधियुः । नरः । वामम् । पितृऽभ्यः । ये । इदम् । समऽएरिरे ।
मयः । पतिऽभ्यः । जनयः । परिऽस्वजे ॥ १० ॥ १९ ॥

हे अश्विनौ युवयोरनुग्रहाद् ये नरः पतयो जायानां जीवं जीवनमुद्दिश्य रुदंति रोदने नापि जायानां जीवनमेव आशासतइत्यर्थः । ताजायाअध्वरे यज्ञे विमयंते निवेशयंति च । किंच तासु दीर्घां महतीं प्रसितिं भुजयोः प्रबंधनमनुदीधियुः अनुदधति इदं वामं वननीयमपत्यं पितृभ्यः समेरिरे संप्रेरयंति तेभ्यः पतिभ्योजनयोजायाः परिष्वजे परिष्वंगार्थं मयः सुखं कुर्वंतीतिशेषः ॥ १० ॥

१०. अश्विद्वय, जो लोग अपनी स्त्री की प्राण-रक्षा के लिए रोदन तक करते हैं, स्त्रियों को यज्ञ-कार्य में नियुक्त करते हैं, उनका, अपनी बाँहों से, बहुत देर तक आलिङ्गन करते हैं और सन्तान उत्पन्न करके पितृ-यज्ञ में नियुक्त करते हैं, उनकी स्त्रियाँ सुख-पूर्वक आलिङ्गन करती हैं।

॥ इति सप्तमस्याष्टमे एकोनविंशोवर्गः ॥ १९ ॥

नतस्यविद्मतदुषुप्रवोचतियुवाहयद्युवत्याःक्षेतियोनिषु ।
प्रियोस्त्रियस्यवृषभस्यरेतिनोगृहंगमेमाश्विनातदुश्मसि ॥ ११ ॥

न । तस्य । विद्म । तत् । उँ इति । सु । प्र । वोचत । युवा । ह । यत् । युवत्याः । क्षेति । योनिषु । प्रियऽउस्त्रियस्य । वृषभस्य । रेतिनः । गृहम् । गमेम । अश्विना । तत् । उश्मसि ॥ ११ ॥

हे अश्विनाश्विनौ तस्य तव सुखं वयं न विद्म न जानीम तत्सुखं यूयं सु सुष्ठु प्रवोचत । बहुवचनं पूजार्थं युवा ह तरुणः खलु मत्पतिः युवत्या यौवनान्वितायामम योनिषु गृहेषु यत् क्षेति निवसतीति । किंच प्रियोस्त्रियस्य प्रिययुवतेर्वृषभस्य सेक्तुः रेतिनोरेतस्विनोमत्पतेर्गृहं गमेम गच्छेम वयंतद्गृहमुश्मसि कामयामहे ॥ ११ ॥

११. अश्विद्वय, उनका वैसा सुख मैं नहीं जानती। युवक स्वामी और युवती स्त्री के सहवास-सुख को मुझे भली भाँति समझा दो। अश्विद्वय, मेरी एक-मात्र यही अभिलाषा है कि, मैं स्त्री के प्रति अनुरक्त, बलिष्ठ स्वामी के गृह में जाऊँ।

आवांमगन्त्सुमतिर्वाजिनीवसून्यश्विनाहृत्सुकामाअयंसत ।
अभूतंगोपामिथुनाशुभस्पतीप्रियाअर्यम्णोदुयोँअशीमहि॥१२॥

आ । वाम् । अगन् । सुऽमतिः । वाजिनीवसू इति वाजिनीऽवसू ।
नि । अश्विना । हृत्ऽसु । कामाः । अयंसत । अभूतम् । गोपा ।
मिथुना । शुभः । पती इति । प्रियाः । अर्यम्णः । दुर्यान् । अशीमहि ॥१२॥

हे वाजिनीवसू अन्नधनौ शुभस्पती उदकस्य स्वामिनौ हे अश्विनाश्विनौ मिथुना मिथुनौ परस्परसहितौ वां युवां सुमतिरागन् आगच्छतु हृत्स्वस्मदीयेषु हृदयेषु कामाः अभिलाषाः न्ययंसत नियम्यंतां । किंच युवां गोपामम गोपायितारावभूतं भवतं । अपिच प्रियाः सत्योवयं अर्यम्णः पत्युः दुर्यान् गृहान् अशीमहि प्राप्नुयाम ॥ १२ ॥

१२. अन्न और धनवाले अश्विद्वय, तुम दोनों मेरे प्रति सदय होओ। मेरे मन की अभिलाषायें पूरी करो। तुम कल्याण करनेवाले हो। मेरे रक्षक होओ। पति-गृह में जाकर हम पति के लिए प्रिय बनें।

तामन्दसानामनुषोदुरोणआधत्तंरयिंसहवीरंवचस्यवे ।
कृतंतीर्थंसुप्रपाणंशुभस्पतीस्थाणुंपथेष्ठामपदुर्मतिंहतम् ॥ १३ ॥

ता । मन्दसाना । मनुषः । दुरोणे । आ । धत्तम् । रयिम् । सहऽवीरम् ।
वचस्यवे । कृतम् । तीर्थम् । सुऽप्रपानम् । शुभः । पती इति ।
स्थाणुम् । पथेऽस्थाम् । अप । दुःऽमतिम् । हतम् ॥ १३ ॥

हे अश्विनौ मंदसाना मंदसानौ ता तौ युवां मनुषोमनुष्यस्य मत्पतेर्दुरोणे गृहे वचस्यवे युष्मदस्तुतिकामाये मह्यं सहवीरं पुत्रादिसहितं रयिं धनं आधत्तं स्थापयतं । किंच हे अश्विनौ शुभस्पती उदकस्य स्वामिनौ युवां पतिगृहं गच्छंत्याममं तीर्थं पानाय सुप्रपाणं कृतं कुरुतं । किंच युवां पथेष्ठां मार्गस्थं स्थाणुं वृक्षं दुर्मतिं दुर्बुद्धिं परिपंथिनंचापहतं अपगमयतं ॥१३॥

१३. मैं तुम्हारी स्तुति करती हूँ; इसलिए तुम लोग मुझसे सन्तुष्ट होकर मेरे पति के गृह में धन और सन्तति दो। कल्याण करनेवाले अश्विद्वय, मैं जिस तीर्थ (तट) पर जल पीती हूँ, उसे तुम सुविधा-जनक करो। मेरे पति-गृह में जाने के मार्ग में यदि कोई दुष्टाशय विघ्न करे, तो उसे नष्ट करना।

क्वस्विदद्यकतमास्वश्विनाविक्षुदस्रामादयेतेशुभस्पती ।
कईनियेमेकतमस्यजग्मतुर्विप्रस्यवायजमानस्यवागृहम् ॥ १४ ॥ २० ॥

क्व । स्वित् । अद्य । कतमासु । अश्विना । विक्षु । दस्रा । मादयेते
इति । शुभः । पती इति । कः । ईम् । नि । येमे । कतमस्य ।
जग्मतुः । विप्रस्य । वा । यजमानस्य । वा । गृहम् ॥ १४ ॥ २० ॥

हे अश्विनाश्विनौ दस्रा दर्शनीयौ शुभस्पती उदकस्य पती स्वामिनौ भवंतौ क्वस्विद् क्वस्थितौ जनपदे अद्यास्मिन्नहनि कतमासु कासु विक्षु प्रजासु मादयेते आत्मानं तर्पयतः। किंच कोयजमानईमेनौ युवां नियेमे नियच्छति। किंच भवंतौ कतमस्य विप्रस्य मेधाविनः स्तोतुर्वा यजमानस्य वा गृहं जग्मतुः गतवंतौ ॥ १४ ॥

१४. प्रिय-दर्शन और कल्याणकर्त्ता अश्विद्वय, आजकल तुम कहाँ, किसके घर में, आमोद-प्रमोद करते हो? कौन तुम्हें बाँधकर रक्खे हुए है? किस बुद्धिमान् यजमान के घर में तुम गये हो?

॥ इति सप्तमस्याष्टमे विंशोवर्गः ॥ २० ॥

समानमितिऋचं द्वादशं सूक्तं घोषायाः पुत्रस्य सुहस्त्यस्यार्षं जागतमाश्विनं अनुक्रांतंच—समानंतृचंसुहस्त्योघौषेयइति। मातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

समानमुत्यंपुरुहूतमुक्थ्यं१रथंत्रिचक्रंसवनागनिग्मतम्।
परिज्मानंविदथ्यंसुवृक्तिभिर्वयंव्युष्टाउषसोहवामहे ॥ १ ॥

समानम्। ऊँ इति। त्यम्। पुरुऽहूतम्। उक्थ्यम्। रथम्।
त्रिऽचक्रम्। सवना। गनिग्मतम्। परिऽज्मानम्। विदथ्यम्।
सुवृक्तिऽभिः। वयम्। विऽउष्टाः। उषसः। हवामहे ॥ १ ॥

हे अश्विनौ युवयोः समानमु साधारणमेव त्यं तं पुरुहूतं बहुभिराहूतं उक्थ्यं प्रशस्यं त्रिचक्रं सवना सवनानि यज्ञान् गनिग्मतं प्रतिगच्छंतं परिज्मानं परितोगंतारं विदथ्यं यज्ञहितं रथं उषसोव्युष्टौ सुवृक्तिभिः सुष्ठु दोषवर्जिताभिः स्तुतिभिः वयं हवामहे आह्वयामः ॥ १ ॥

१. अश्विद्वय, तुम दोनों के पास एक ही रथ है, जिसे अनेक बुलाते हैं, अनेक स्तुति करते हैं। वह रथ तीन चक्कों के ऊपर यज्ञों में जाता है। वह चारों ओर घूमते हुए यज्ञ को सुसम्पन्न करता है। प्रतिदिन प्रातःकाल हम सुन्दर स्तुति से उसी रथ को बुलाते हैं।

प्रातर्युजंनासत्याधितिष्ठथःप्रातर्यावाणंमधुवाहनंरथम्।
विशोयेनगच्छथोयज्वरीर्नराकीरेश्चिद्यज्ञंहोतृमन्तमश्विना ॥ २ ॥

प्रातःऽयुजम्। नासत्या। अधि। तिष्ठथः। प्रातःऽयावानम्।
मधुऽवाहनम्। रथम्। विशः। येन। गच्छथः। यज्वरीः। नरा।
कीरेः। चित्। यज्ञम्। होतृऽमन्तम्। अश्विना ॥ २ ॥

हेनासत्या नासत्यभूतौ सत्यस्य प्रणेतारौ वा नरा नेतारावश्विनौ युवां प्रातर्युजं प्रातःकाले अश्वैर्युज्यमानं प्रातर्यावाणं प्रातर्गंतारं मधुवाहनं मधुनोमृतस्य वाहकं तं रथं अधितिष्ठथः आरोहथइत्यर्थः। यज्वरीर्यजनशीलाः विशः प्रजाः येन रथेन गच्छथः येन च कीरेश्चित् स्तोतुरपि होतृमंतं ऋत्विग्युक्तं यज्ञं गच्छथः ॥ २ ॥

२. सत्य-स्वरूप अश्विद्वय, तुम्हारा जो रथ प्रातःकाल जोता जाता है, प्रातःकाल चलता है और मधु से भरा है, उसी रथ पर चढ़कर यज्ञ-कर्त्ताओं के पास जाओ। तुम्हारी जो स्तुति करता है, उसके होतृ-युक्त यज्ञ में भी जाओ। अथ तृतीया—

अध्वर्युवामधुपाणिंसुहस्त्यमग्निधंवाधृतदक्षंदमूनसम्।
विप्रस्यवायत्सवनानिगच्छथोतआयातंमधुपेयमश्विना॥३॥२१॥

अध्वर्युम्। वा। मधुऽपाणिम्। सुऽहस्त्यम्। अग्निधम्। वा। धृतऽदक्षम्। दमूनसम्। विप्रस्य। वा। यत्। सवनानि। गच्छथः। अतः। आ। यातम्। मधुऽपेयम्। अश्विना॥ ३ ॥ २१ ॥

हे अश्विनौ युवां मधुपाणिं सोमपाणिमध्वर्युं वा सुहस्त्यं सुहस्त्यनामानमृषिं मां धृतदक्षं धृतबलं दमूनसं दानमनसं अग्निधं वा ऋत्विग्विशेषमायातं। तदेवदर्शयति—यद् यद्यपि विप्रस्यान्यस्य मेधाविनः सवनानि यज्ञान् गच्छथः तथाप्यतः तेभ्योयज्ञेभ्योमधुपेयमस्माकं सोमात्मकं पेयमायातमन्वागच्छतं ॥ ३ ॥

३. अश्विद्वय, मैं सुहस्त हूँ। मैं हाथ में मधु लेकर अध्वर्यु का कार्य करता हूँ। मेरे पास पधारो अथवा, अग्निध्र नामक जो बली पुरोहित दान करने को उद्यत है, उसके पास पधारो। यद्यपि तुम लोग किसी बुद्धिमान् व्यक्ति के यज्ञ में जाते हो, तो भी, मधु-पान करने के लिए, मेरे गृह में पधारो। ॥ इति सप्तमस्याष्टमे एकविंशोवर्गः ॥२१॥

अस्तेषेत्येकादशर्चं त्रयोदशं सूक्तं आंगिरस्य कृष्णाख्यस्यार्षं त्रैष्टुभमैंद्रं। अनुक्रांतंच—अस्तैषैकादश कृष्णइति। आभिप्लविकेषूक्थेषु स्तोमवृद्धीइदं सूक्तं ब्राह्मणाच्छंसिनआवापार्थं सूत्रितंच—यज्ञेदिवइतिसूक्ते अस्तेवसुप्रतरमिति।

तत्र प्रथमा—

अस्तैवसुप्रतरंलायमस्यन्भूर्षन्निवप्रभरास्तोमंमस्मै।
वाचाविप्रास्तरतवाचंमर्योनिरामयजरितःसोममिन्द्रम्॥ १ ॥

अस्ताऽइव । सु । प्रऽतरम् । लायम् । अस्यन् । भूषन्ऽइव । प्र ।
भर । स्तोमम् । अस्मै । वाचा । विप्राः । तरत । वाचम् । अर्यः ।
नि । रमय । जरितरिति । सोमे । इन्द्रम् ॥ १ ॥

प्रतरं प्रवृद्धतरं लायं संश्लेषणं हृदयवेधिनं शरं सु सुष्ठु अस्यन् क्षिपन् अस्तेव यथा क्षेप्ता धानुष्कोऽभूषन्निव यथावालंकारमलंकुर्वन्नलंकर्ता तद्वत् स्तोममस्माइंद्राय प्रभर प्रापय । हे अंतरात्मन् त्वमितिशेषः । किंच हे विप्रामेधाविनोयूयं वाचा स्तुत्या अर्यः अरेः शत्रोर्वाचं तरत नितरां तरत निराकुरुतइत्यर्थः । हे जरितः स्तातस्त्वं मे सोमयागे इंद्रं निरमय क्रीडय ॥ १ ॥

१. जैसे बाण फेंकनेवाला धनुर्द्धर अतीव सुन्दर बाण फेंकता है, वैसे ही तुम, इन्द्र के लिए, क्रमागत स्तव करो। उनके लिए प्राञ्जल और अलंकृत करके स्तुति का प्रयोग करो। विप्रो, तुम्हारे साथ जो स्पर्द्धा करता है, ऐसे स्तुति-वचन का प्रयोग करो कि, वह पराजित हो जाय। स्तोता, इन्द्र को सोम की ओर आकृष्ट करो।

दोहेनगामुपशिक्षासखायंप्रबोधयजरितर्जारमिन्द्रम् ।
कोशंनपूर्णंवसुनान्यृष्टमाच्यावयमघदेयायशूरम् ॥ २ ॥

दोहेन । गाम् । उप । शिक्ष । सखायम् । प्र । बोधय । जरितः ।
जारम् । इन्द्रम् । कोशम् । न । पूर्णम् । वसुना । निऽऋष्टम् ।
आ । च्यवय । मघऽदेयाय । शूरम् ॥ २ ॥

हे जरितस्त्वं दोहेन कामानां दोहनार्थं गां गोरूपं सखायं प्रियमिंद्रमुपशिक्ष वशं नय । किंच जारं भूतानां जरयितारमिंद्रं प्रबोधय स्तुतिभिः प्रबुद्धं कुरु । किंच पूर्णमुदकेन पूरितं कोशं न पात्रमिव वारिभिः वसुना हिरण्यादिना धनेन न्यृष्टं नीचैर्गतं शूरं वीरमिंद्रं मघदेयाय धनदानाय च्यवय अभिमुखं कुर्वित्यर्थः ॥ २ ॥

२. स्तोता, जैसे गाय को दूहकर लोग अपना प्रयोजन सिद्ध करते हैं, वैसे ही मित्र-स्वरूप इन्द्र से अपने प्रयोजन को सिद्ध करा लो। स्तुत्य इन्द्र को जगाओ। जैसे लोग धान्य-पूर्ण पात्र को नीचे करके उसका धान्य गिरा लेते हैं, वैसे ही वीर इन्द्र को; कामना-सिद्धि के लिए, अनुकूल कर लो।

अथ तृतीया—

किमङ्गत्वामघवन्भोजमाहुःशिशीहिमाशिशयंत्वाशृणोमि ।
अप्नस्वतीममधीरस्तुशक्रवसुविदंभगमिन्द्राभरानः ॥ ३ ॥

किम् । अङ्ग । त्वा । मघऽवन् । भोजम् । आहुः । शिशीहि । मा । शिशयम् । त्वा । शृणोमि । अमस्वती । मम । धीः । अस्तु । शक्र । वसुऽविदम् । भगम् । इन्द्र । आ । भर । नः ॥ ३ ॥

अंगेति सामान्याह्वानं अंग हे मघवन् धनवन् शक्रेंद्र त्वा त्वां किं किमर्थं भोजं स्तोतॄणां भोजकमभीष्टदमाहुः सर्वे विद्वांसः यदि नददासीत्यध्याहारः तस्माद्ददास्येव स्तोतृभ्योधनानीत्यर्थः तथासति मा मां स्तोतारं शिशीहि धनदानेन तीक्ष्णीकुरु। त्वा त्वां शिशयं स्तोतॄणां संस्कर्तारं शृणोमि । किंच मम धीर्बुद्धिः अमस्वती कर्मवत्यस्तुभवतु । किंच नोस्माकं वसुविदं धनस्य लंभकं भगं भाग्यमाभर आहर ॥ ३ ॥

३. इन्द्र, तुम्हें लोग "भोज" (अभीष्ट-दाता) क्यों कहते हैं? तुम दाता हो; इसी लिए यह नाम रक्खा गया है। मैंने सुना है कि, तुम लोगों को तीक्ष्ण कर देते हो। मुझे तीक्ष्ण करो। इन्द्र, मेरी बुद्धि कर्म में निपुण हो। मेरा ऐसा शुभ अदृष्ट करो कि, धन उपार्जित किया जा सके।

त्वांजनांममसत्येष्विन्द्रसन्तस्थानाविह्वयन्तेसमीके ।
अत्रायुजंकृणुतेयोहविष्मान्नासुंन्वतासख्यंवष्टिशूरः ॥ ४ ॥

त्वाम् । जनाः । ममऽसत्येषु । इन्द्र । सम्ऽतस्थानाः । वि । ह्वयन्ते । सम्ऽईके । अत्र । युजम् । कृणुते । यः । हविष्मान् । न । असुन्वता । सख्यम् । वष्टि । शूरः ॥ ४ ॥

हे इंद्र त्वां जनाममसत्येषु संग्रामेषु विह्वयंते विविधमाह्वयंति सहायार्थं । एतदेव दर्शयति—समीके युद्धे संतस्थानाः सम्यक् तिष्ठंतोजनाविह्वयंतइति । अत्रास्मिन्नाह्वाने सशूरोवीरइंद्रस्तं युजं सखायं कृणुते कुरुते योहविष्मान् भवति असुन्वता सोमाभिषवमकुर्वता पुरुषेण सह सख्यं सखित्वं न वष्टि न कामयते ॥ ४ ॥

४. इन्द्र, जिस समय लोग युद्ध में जाते हैं, उस समय तुम्हारा नाम लेते हैं। इन्द्र यजमान के सहायक होते हैं। जो इन्द्र के लिए सोम नहीं प्रस्तुत करता, उसके साथ इन्द्र मैत्री नहीं करना चाहते।

अथ पंचमी—

धनंनस्पन्द्रंबहुलंयोअस्मैतीव्रान्त्सोमाँआसुनोतिप्रयंस्वान् ।
तस्मैशत्रून्त्सुतुकान्प्रातरह्नोनिस्वष्ट्रान्युवतिर्हंतिवृत्रम् ॥५॥२२॥

धनम् । न । स्पन्द्रम् । बहुलम् । यः । अस्मै । तीव्रान् । सोमान् ।
आऽसुनोति । प्रयस्वान् । तस्मै । शत्रून् । सुऽतुकान् । प्रातः ।
अर्हः । नि । सुऽअष्टान् । युवति । हन्ति । वृत्रम् ॥ ५ ॥ २२ ॥

प्रयस्वान् हविष्मान् योयजमानः स्पंद्रं स्पंदनशीलं गवाश्वादिकं बहुलं प्रभूतं धनं न यथा धनं दरिद्राय पात्रभूताय दातुं संस्कारोति तद्वदस्माइंद्राय तीव्रान् तीव्ररसान् सोमानासुनोति अभिषुणोति अभिषवाख्येन संस्कारेण संस्करोति तस्मै यजमानाय प्रातरह्नः पूर्वाह्णः सुतुकान् सुप्रेरणान् शोभनपुत्रान्वा स्वष्टान् ज्ञानायुधान् शत्रून् नियुवति सहंद्रः पृथक्करोति । किंच वृत्रं तदीयमुपद्रवं हंति हिनस्ति ॥ ५ ॥

५. जो अन्नशाली व्यक्ति इन्द्र के लिए प्रथम सोमरस प्रस्तुत करता है और गौ, अश्व आदि देनेवाले धनाढ्य के सदृश इन्द्र को उदारता के साथ सोमरस देता है, उसके सहायक इन्द्र होते हैं। उसके बलिष्ठ तथा अनेक सेनाओंवाले शत्रुओं के रहने पर भी इन्द्र शत्रुओं को शीघ्रातिशीघ्र दूर कर देते हैं। इन्द्र वृत्र का वध करते हैं।

इति सप्तमस्याष्टमे द्वाविंशोवर्गः ॥ २२ ॥

यस्मिन्वयंदधिमाशंसमिन्द्रेयःशिश्रायमघवाकामंमस्मे ।
आराच्चित्सन्भयतामस्यशत्रुर्न्यस्मैद्युम्नाजन्यानमन्ताम् ॥ ६ ॥

यस्मिन् । वयम् । दधिम । शंसम् । इन्द्रे । यः । शिश्राय ।
मघऽवा । कामम् । अस्मे इति । आरात् । चित् । सन् । भयताम् ।
अस्य । शत्रुः । नि । अस्मै । द्युम्ना । जन्या । नमन्ताम् ॥ ६ ॥

यस्मिन्निंद्रे वयं घोषेयाः सुहस्त्याः शंसं स्तुतिं दधीम विदधीमः । यश्च मघवा धनवानिंद्रोस्मेस्मासु काममभिलाषं शिश्राय श्रयति अस्येंद्रस्य शत्रुराराद् दूरएव संश्चित् सन्नपि भयतां बिभेतु । किंचास्माइंद्राय जन्या जन्यानि शत्रुजनपदभवानि द्युम्ना द्युम्नानि अन्नानि निनमंतां प्रह्वीभवंतु भोजनीयानि भवंत्वित्यर्थः ॥ ६ ॥

६. हमने जिन इन्द्र की स्तुति की है, वे धनी हैं और उन्होंने हमारी कामनाओं को पूर्ण किया है। इन्द्र के पास से शत्रु दूर भागें। शत्रु-देश की सम्पत्ति इन्द्र के हाथों में आवे।

आराच्छत्रुमपबाधस्वदूरमुग्रोयःशंबःपुरुहूतनेन ।
अस्मेधेहियवमद्गोमदिन्द्रकृधीधियंजरित्रेवाजरत्नाम् ॥ ७ ॥

आ॒रात् । शत्रु॑म् । अप॑ । बा॒ध॒स्व॒ । दूर॑म् । उ॒ग्रः । यः । शम्ब॑ः ।
पु॒रु॒ऽहू॒त॒ । तेन॑ । अ॒स्मे इति॑ । धे॒हि॒ । यव॑ऽमत् । गोऽम॑त् ।
इ॒न्द्र॒ । कृ॒धि । धिय॑म् । ज॒रि॒त्रे । वाज॑ऽरत्नाम् ॥ ७ ॥

हे पुरुहूत बहुभिराहूतेंद्र तव यउग्रउद्गूर्णः शंबोवज्रः तथाच यास्कः—शंबइति वज्रनाम शमयतेर्वा शायतेर्वा इति[1] । तेन वज्रेण शत्रुमस्मदरिं आरात् अस्मत्समीपात् दूरमपबाधस्व त्वमपगमय । किंच अस्मे अस्मासु यवमत् यवयुक्तं गोमद्गोयुक्तं च धनं धेहि निधेहि । किंच जरित्रे स्तोत्रे मह्यं वाजरत्नां रमणीयान्नां धियं कर्म कृधि कुरु ॥ ७ ॥

७. इन्द्र, असंख्य मनुष्य तुम्हें बुलाते हैं। तुम्हारा जो भयानक वज्र है, उससे समीप के शत्रु को दूर कर दो। इन्द्र, मुझे जौ और गाय से युक्त सम्पत्ति दो। अपने स्तोता की स्तुति को अन्नरत्न-प्रसविनी करो।

प्रयम॒न्तर्वृ॑षस॒वासो॒अग्म॑न्तीव्रा॒:सोमा॑बहु॒लान्ता॑स॒इन्द्र॑म् ।
नाह॑दा॒मानं॑म॒घवा॒निय॑सन्निसु॒न्व॒तेव॑हति॒भूरि॑वा॒मम् ॥ ८ ॥

प्र । यम् । अ॒न्तः । वृ॒ष॒ऽस॒वासः॑ । अग्म॑न् । ती॒व्राः । सोमाः॑ ।
ब॒हु॒लऽअ॑न्तासः । इन्द्र॑म् । न । अह॑ । दा॒मान॑म् । म॒घऽवा॑ । नि ।
य॒स॒त् । नि । सु॒न्व॒ते । व॒ह॒ति॒ । भूरि॑ । वा॒मम् ॥ ८ ॥

अंतर्जठरे यमिंद्रं वृषसवासः वृषसवाः अग्नौ सोमस्य वर्षितृभिरध्वर्युभिरभिषुतास्तीव्रास्तीव्ररसाबहुलांतासोबहुलमन्नादिकमंते येभ्यः तेबहुलांताः सोमाः प्राग्मन् प्रगच्छंति। समघवा धनवानिंद्रः दामानं दातारं यजमानं नाह नैव नियंसत् नियच्छति किंतु सुन्वते सोमाभिषवं कुर्वते यजमानाय भूरि अधिकं वामं वननीयं धनं निवहति नितरां प्रापयति ॥ ८ ॥

८. प्रखर सोमरस, अनेक धाराओं में, मधुर रस से बरसते हुए जिस समय इन्द्र की देह में पैठता है, उस समय इन्द्र सोमरस-दाता का कभी वारण नहीं करते, कभी नहीं कहते कि, और नहीं। अधिकन्तु सोमरस के प्रस्तुत-कर्त्ता को विशाल अभिलषित वस्तुएँ प्रदान करते हैं।

उ॒तप्र॒हामति॒दीव्या॑जयातिकृ॒तंनश्व॒ग्नीवि॑चि॒नोति॑का॒ले ।
योदे॒वका॑मो॒नधना॑रुणद्धि॒समित्तंरा॒यासृ॑जतिस्व॒धावा॑न् ॥ ९ ॥

---

1 नि० ५. २४.।

उत । प्रऽहाम् । अतिऽदीव्यं । जयाति । कृतम् । यत् । श्वऽघ्नी ।
विऽचिनोति । काले । यः । देवऽकामः । न । धना । रुणद्धि ।
सम् । इत् । तम् । राया । सृजति । स्वधाऽवान् ॥ ९ ॥

उत्तापिचेंद्रः प्रहां प्रहंतारमतिदीव्यः अतिरभिपूजितार्थे वर्तते दीव्यतिर्गत्यर्थः अभिपूजितं गमयित्वा जयाति जयति । किंच यत् यथा अत्र प्रकारवचनप्रत्ययस्य लोपोद्रष्टव्यः । श्वघ्नीकितवः कृतं कृतसमयं प्रति कितवं कितवानां मध्ये विचिनोति परीक्ष्यगृह्णाति तद्वदिंद्रः काले युद्धकाले बलवंतं शत्रुं परीक्ष्य वधार्थं गृह्णातीत्यर्थः। किंच योमनुष्योदेवकामोदेवान् यष्टुं स्तोतुं वाभिलाषवान् भवति तस्यार्थाय धना धनानि न रुणद्धि नावृणोति नाच्छादयतीत्यर्थः। किंतु प्रकाशयति स्वधावान् बलवानिंद्रः तं देवकामं राया धनेन संसृजतीव संयाजयत्येव ॥९॥

९. जैसे जुआड़ी जिससे हारा हुआ है, उसी को जुए के अड्डे पर खोजकर हरा देता है, वैसे ही अनिष्ट-कर्त्ता को इन्द्र परास्त करते हैं। जो देवभक्त देवपूजा में धन-व्यय करने में कृपणता नहीं करता, धनी इन्द्र उसे ही धनी करते हैं।

गोभिष्टरेमामतिंदुरेवांयवेनक्षुधंपुरुहूतविश्वाम् ।
वयंराजभिःप्रथमाधनान्यस्माकेनवृजनेनाजयेम ॥ १० ॥
गोभिः । तरेम । अमतिम् । दुःऽएवाम् । यवेन । क्षुधम् ।
पुरुऽहूत । विश्वाम् । वयम् । राजऽभिः । प्रथमाः ।
धनानि । अस्माकेन । वृजनेन । जयेम ॥ १० ॥

हे पुरुहूत बहुभिराहूतेंद्र तव प्रसादाद् दुरेवां दुष्टागमनां दारिद्र्यादागताममतिं दुर्बुद्धिं वयं घोषेयाः सुहस्त्यागोभिः पशुभिस्तरेम निस्तरेम । किंच यवेन विश्वां व्याप्तां क्षुधं तरेम । किंच प्रथमा मुख्यानि धनानि राजभिर्धनानामीश्वरैर्लभेमहीतिशेषः। यद्वा प्रथमायमिति संबंधः किंचास्माकेन अस्मदीयेन वृजनेन बलेन जयेम शत्रूनितिशेषः ॥ १० ॥

१०. गायों के द्वारा हम दुःख-दारिद्र्य के पार जायें। अनेक के द्वारा आहूत इन्द्र, जौ (यव) के द्वारा हम क्षुधा की निवृत्ति कर सकें। हम राजाओं के साथ-साथ अग्रसर होकर, अपने बल के प्रभाव से, विशाल सम्पत्ति को जीत सकें।

अथैकादशी–

बृहस्पतिर्नःपरिपातुपश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रःपुरस्तादुतमध्यतोनःसखासखिभ्योवरिवःकृणोतु॥११॥२३॥

बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् ।
अधरात् । अघऽयोः । इन्द्रः । पुरस्तात् । उत । मध्यतः । नः ।
सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥ ११ ॥ २३ ॥

पश्चात्पश्चिमतः उतापिच उत्तरस्मात् उत्तरतः अधरात् दक्षिणतश्च योघायुरागच्छति तस्मादघायोः पापकाच्छत्रोर्नोस्मान् बृहस्पतिः परिपातु । उतापिचेंद्रः पुरस्तात् पूर्वतोमध्यतश्च योघायुरागच्छति तस्मादघायोर्नोस्मान् परिपातु । किंच सखासखिभूतेंद्रः सखिभ्यः प्रियेभ्यो स्मभ्यं वरिवोधनं कृणोतु करोतु ॥ ११ ॥

११. पापी शत्रु के हाथ से बृहस्पति हमें पश्चिम, उत्तर और दक्षिण दिशाओं में बचावें। पूर्व-दिशा और मध्य भाग में इन्द्र हमारी रक्षा करें। इन्द्र हमारे मित्र हैं और हम इन्द्र के मित्र हैं, वे हमारी अभिलाषा को सिद्ध करें।

॥ इति सप्तमस्याष्टमे त्रयोविंशोवर्गः ॥ २३ ॥

॥ इति दशमे मंडले तृतीयोनुवाकः ॥ ३ ॥

चतुर्थेनुवाके अष्टादश सूक्तानि तत्राच्छामइत्येकादशर्चं प्रथमं सूक्तं दशम्येकादश्यौ त्रिष्टुभौ शिष्टाजगत्यः पूर्ववदृषिदेवते । तथाचानुक्रांतं—अच्छामे द्वित्रिष्टुबंतंत्विति । उक्थ्ये ब्राह्मणाच्छंसिनस्तृतीयसवनेएतत्सूक्तं । सूत्रितंच—अच्छामइंद्रबृहस्पतेयुवमिंद्रश्चवस्वइति याज्ये इति । पृष्ठ्येहन्यप्येतत्सूक्तं । सूत्रितंच—अच्छामइंद्रमिति नित्यमैकाहिकमिति ।

तत्र प्रथमा—

अच्छामइन्द्रंमतयःस्वर्विदःसधीचीर्विश्वाउशतीरनूषत ।
परिष्वजन्तेजनयोयथापतिंमर्यंनशुन्ध्युंमघवानमूतये ॥ १ ॥

अच्छ । मे । इन्द्रम् । मतयः । स्वःऽविदः । सधीचीः । विश्वाः ।
उशतीः । अनूषत । परि । स्वजन्ते । जनयः । यथा । पतिम् ।
मर्यम् । न । शुन्ध्युम् । मघऽवानम् । ऊतये ॥ १ ॥

आंगिरसस्य कृष्णस्य मे मम स्वर्विदः सर्वस्य लंभयित्र्यःसधीचीः संगताः विश्वाव्याप्ताः उशतीः कामयमानाः मतयः स्तुतयःइंद्रमच्छानूषत अभिष्टुवंति। किंच जनयोजायाः यथा पतिं

भर्तारं पत्यं न यथा च मनुष्यं शुंध्युं शुद्धं दोषरहितं मघवानं धनवंतमूतयेरक्षणार्थं परिष्वजते आलिंगंति तद्वदिंद्रं मे स्तुतयः परिष्वजते ॥ १ ॥

१. मेरी स्तुतियों ने, मिलकर उद्देश्यपूर्वक इन्द्र का गुण-गान किया है। स्तुतियाँ सब प्रकार के लाभ करा सकती हैं। जैसे स्त्रियाँ अपने स्वामी का आलिङ्गन करती हैं, वैसे ही स्तुतियाँ उन शुद्ध-स्वभाव इन्द्र का आश्रय पाने के लिए उनका आलिङ्गन करती हैं।

नघात्वद्रिगपवेतिमेमनस्त्वेइत्कामंपुरुहूतशिश्रय ।
राजेवदस्मनिषदोधिबर्हिष्यस्मिन्त्सुसोमेवपानमस्तुते ॥ २ ॥

न । घ । त्वद्रिक् । अप । वेति । मे । मनः । त्वे इति । इत् । कामम् ।
पुरुऽहूत । शिश्रय । राजाऽइव । दस्म । नि । सदः । अधि ।
बर्हिषि । अस्मिन् । सु । सोमे । अवऽपानम् । अस्तु । ते ॥ २ ॥

हे पुरुहूत बहुभिराहूत दस्म दर्शनीयेंद्र त्वद्रिक् त्वदभिमुखं मे मदीयं मनोन घ नखल्वपवेति त्वत्तोपगच्छति । किंच त्वे इत् त्वय्येव काममभिलाषं शिश्रयं स्थापयामि। किंच राजेव ईश्वर-इव बर्हिष्यधि निषदः निषीदः । किंच ते तवास्मिन् सोमे सुशोभनं अवपानमस्तु भवतु ॥ २ ॥

२. इन्द्र, तुम्हें छोड़कर मेरा मन अन्यत्र नहीं जाता। तुम्हारे ही ऊपर मैंने अपनी अभिलाषा स्थापित रक्खी है। जैसे राजा अपने भवन में बैठता है, वैसे ही तुम लोग कुशों के ऊपर बैठो। इस सुन्दर सोम से तुम्हारा पान-कार्य सम्पन्न हो।

विषूवृदिन्द्रोअमतेरुतक्षुधःसइद्रायोमघवावस्वईशते ।
तस्येदिमेप्रवणेसप्तसिन्धवोवयोवर्धन्तिवृषभस्यशुष्मिणः ॥ ३ ॥

विषुऽवृत् । इन्द्रः । अमतेः । उत । क्षुधः । सः । इत् । रायः ।
मघऽवा । वस्वः । ईशते । तस्य । इत् । इमे । प्रवणे । सप्त ।
सिन्धवः । वयः । वर्धन्ति । वृषभस्य । शुष्मिणः ॥ ३ ॥

इंद्रः अमतेरस्माकं दुर्बुद्धेः प्रजापहारिण्याः पिपासायावा विषूवृत् विष्वग्वर्तकोभवतु । उतापिच क्षुधोबुभुक्षायाः विषूवृद्भवतु । किंच सइत् सएव मघवा धनवानिंद्रोवस्वोवासयितुः रायोधनस्य ईशते ईष्टे । किंच वृषभस्य वर्षितुः शुष्मिणः बलवतः तस्येद् इंद्रस्यैव इमे प्रसिद्धाः सप्त सप्तसंख्याकाः सिंधवोनद्यः प्रवणे देशे वयोन्नं वर्धन्ति वर्धयंति ॥ ३ ॥

३. दुर्गति और अन्नाभाव से बचाने के लिए इन्द्र हमारे चारों ओर रहें। धनदाता इन्द्र सारी सम्पत्तियों और धनों के अधिपति हैं। मनोरथ-वर्षक और तेजस्वी इन्द्र के आवेश से ही गंगा आदि सात नदियाँ नीचे की ओर बहकर कृषि की वृद्धि करती हैं।

अथ चतुर्थी—

वयोनवृक्षंसुपलाशमासदन्त्सोमासइन्द्रंमन्दिनश्चमूषदः ।
प्रैषामनीकंशवसादविद्युतद्विदत्स्व१र्मनवेज्योतिरार्यम् ॥ ४ ॥

वयः । न । वृक्षम् । सुऽपलाशम् । आ । असदन् । सोमासः । इन्द्रम् ।
मन्दिनः । चमूऽसदः । प्र । एषाम् । अनीकम् । शवसा ।
दविद्युतत् । विदत् । स्वः । मनवे । ज्योतिः । आर्यम् ॥ ४ ॥

वयोन यथा पक्षिणः सुपलाशं शोभनपर्णं वृक्षमासदन् आसीदंति तद्वन्मंदिनोमदकराश्चमूषदश्चमसपात्रेषु स्थातारः सोमासः सोमाः इंद्रमासदन् आसीदंति अधितिष्ठंतीत्यर्थः । एषामिंद्रमधितिष्ठतां सोमानां शवसा वेगेन युक्तमनीकमग्रं प्रदविद्युतत् प्रद्योतते । किंचायमिंद्रः स्वः स्वात्मना आर्यं प्रेर्यं ज्योतिरादित्याख्यं तेजोमनवे मनुष्येभ्योविदत् प्रयच्छतु ॥ ४ ॥

४. जैसे सुन्दर पत्रों के वृक्ष का आश्रय चिड़ियां करती हैं, वैसे ही आनन्द-वर्धक और पात्र-स्थित सोम इन्द्र का आश्रय करते हैं। सोमरस के तेज के द्वारा इन्द्र का मुख उज्ज्वल हो उठा। इन्द्र मनुष्यों को उत्कृष्ट ज्योति दें।

अथ पञ्चमी—

कृतंनश्वघ्नीविचिनोतिदेवनेसंवर्गंयन्मघवासूर्यंजयत् ।
नतत्तेअन्योअनुवीर्यंशकन्नपुराणोमघवन्नोतनूतनः ॥ ५ ॥ २४ ॥

कृतम् । न । श्वघ्नी । वि । चिनोति । देवने । सम्ऽवर्गम् । यत् ।
मघऽवा । सूर्यम् । जयत् । न । तत् । ते । अन्यः । अनु । वीर्यम् ।
शकत् । न । पुराणः । मघऽवन् । न । उत । नूतनः ॥ ५ ॥ २४ ॥

श्वघ्नी परस्वानां हंता कितवोदेवने द्यूते कृतं न यथा हतं विचिनोति तद्वदिंद्रः सूर्यं मृगयते । कदेत्यतआह—यद्यदा मघवा धनवानिंद्रः संवर्गं सम्यक् वृष्टेः वर्जयितारं सूर्यमादित्यं जयत् तदीयरसापहरणद्वारेण जयति । अथ प्रत्यक्षस्तुतिः हे मघवन्धनवन्निंद्र ते तव तत् सूर्यजयलक्षणं वीर्यं वीरत्वमन्यस्त्वत्तोन्योभविष्यत्कालीनः पुमान् अनु अनुकर्तुं न शकत् न

शक्नोति पुराणः पुरातनोपि त्वद्वीर्यं अनुकर्तुं न शक्नुयात् न शक्नोति । उतापिच नूतनोवर्तमान-कालीनोपि त्वदीयं वीर्यंअनुकर्तुं न शक्नोति ॥ ५ ॥

५. जुए के अड्डे पर जैसे जुआड़ी अपने विजेता को खोजकर परास्त करता है, वैसे ही इन्द्र वृष्टि-रोधक सूर्य को परास्त करते हैं। इन्द्र, धनाधिपति, कोई भी प्राचीन वा नवीन तुम्हारे वीरत्व के अनुसार कार्य नहीं कर सकता। ॥ इति सप्तमस्याष्टमे चतुर्विंशोवर्गः ॥ २४ ॥

विशंविशंमघवापर्यशायतजनानांधेनाअवचाकशद्वृषा ।
यस्याहंशक्रःसवनेषुरण्यतिसतीव्रैःसोमैःसहतेपृतन्यतः ॥ ६ ॥

विशंम्ऽविशम् । मघऽवा । परि । अशायत । जनानाम् । धेनाः ।
अवऽचाकशत् । वृषा । यस्य । अह । शक्रः । सवनेषु ।
रण्यति । सः । तीव्रैः । सोमैः । सहते । पृतन्यतः ॥ ६ ॥

वृषा कामानां वर्षिता मघवा धनवानिंद्रोविशंविशंसर्वान्मनुष्यान् पर्यशायत परिशेते । किञ्च जनानां स्तोतृजनानां धेनाः स्तुतीः अवचाकशत् अभिपश्यति । किंच शक्रइंद्रोयस्याह यस्यैव यजमानस्य सवनेषु रण्यति रमते सयजमानस्तीव्रैः तीव्राकारैः प्रदीयमानैः सोमैः पृतन्यतः संग्राममिच्छतः शत्रून् सहतेभिभवति ॥ ६ ॥

६. धनद इन्द्र प्रत्येक मनुष्य में रहते हैं। अभीष्टकारी इन्द्र सबके स्तोत्र की तरफ़ ध्यान देते हैं। जिसके सोम-यज्ञ में इन्द्र प्रीति प्राप्त करते हैं, वे प्रखर सोमरस के द्वारा युद्धेच्छु शत्रुओं को परास्त करता है।

अथ सप्तमी—

आपोनसिन्धुंमभियत्समक्षरन्त्सोमासइन्द्रंकुल्याइवह्रदम् ।
वर्धन्तिविप्रामहोअस्यसादनेयवंनवृष्टिर्दिव्येनदानुना ॥ ७ ॥

आपः । न । सिन्धुम् । अभि । यत् । सम्ऽअक्षरन् । सोमासः ।
इन्द्रम् । कुल्याःऽइव । ह्रदम् । वर्धन्ति । विप्राः । महः । अस्य ।
सदने । यवम् । न । वृष्टिः । दिव्येन । दानुना ॥ ७ ॥

यथदा सोमासः सोमाः इंद्रमभिसमक्षरन् अभिक्षरंति अभिगच्छंतीत्यर्थः। तत्रदृष्टांतौ दर्शयति—आपोन यथा आपः सिंधुं समुद्रमभिसमक्षरंति कुल्याइव यथा च कुल्याः ह्रदमभिसमक्षरंति तद्वदित्यर्थः। तदानीमस्येंद्रस्य महोमहत्त्वं सदने यज्ञे विप्रामेधाविनोवर्धन्ति वर्धयन्ति। तत्रदृष्टांतमाह—यवंन यथा यवं यवसस्यं वृष्टिः कर्तरि क्वन् वर्षितापर्जन्योदिव्येन दिविभवेन दानुना दानेन वर्षणेन वर्धयति तद्वदित्यर्थः ॥ ७ ॥

७. जैसे जल नदी की ओर जाता है और जैसे छोटा-छोटा जल-प्रवाह तड़ाग में जाता है, वैसे ही सोमरस इन्द्र में जाता है। यज्ञ-स्थल में पंडित लोग उसके तेज को वैसे ही बढ़ा देते हैं, जैसे स्वर्गीय जल-पात के साथ वृष्टि जौ की खेती को बढ़ाती है।

वृषा॒नक्रु॒द्धःप॑तय॒द्रज॒स्वायोअ॒र्यप॑त्नी॒रक॑णोदि॒माअ॒पः।
सस॑न्वने॒मघवांजी॒रदा॑न॒वेवि॑न्दज्ज्योति॒र्मन॑वेहवि॒ष्मते ॥ ८ ॥

वृषा । न । क्रुद्धः । पतयत् । रजःऽसु । आ । यः । अर्यऽपत्नीः । अकणोत् । इमाः । अपः । सः । सुन्वते । मघऽवा । जीरऽदानवे । अविन्दत् । ज्योतिः । मनवे । हविष्मते ॥ ८ ॥

रजःसु लोकेषु वृषा न यथा वृषभः क्रुद्धः सन् प्रतिवृषभवधाय पतयत् गच्छति तद्वत् यइंद्रः क्रुद्धः सन् मेघवधाय पतति हत्वा च मेघं अर्यपत्नीः सर्वस्य जगतः स्वामिनइंद्रस्य पालयितव्याः इमाः प्रसिद्धाः अपः वृष्ट्युदकानि आकणोत् आकणोति । अस्मदभिमुखं करोति समघवा धनवानिंद्रः सुन्वते सोमाभिषवं कुर्वते जीरदानवे क्षिप्रदानाय हविष्मते मनवे मनुष्याय यजमानायेत्यर्थः। ज्योतिस्तेजोऽविंदत् प्रायच्छत् ॥ ८ ॥

८. जैसे एक वृष, क्रुद्ध होकर, दूसरे की ओर दौड़ता है, वैसे ही इन्द्र, मेघ के प्रति धावित होकर अपने आश्रित जल को बाहर करते हैं। जो व्यक्ति सोम-यज्ञ करता है, उदारता के साथ दान करता है और हवि का संग्रह करता है, उसे धनी इन्द्र ज्योति देते हैं।

उज्जा॑यतांपर॒शुर्ज्योति॑षासह॒भूयाऋ॒तस्य॑सु॒दुघा॑पुराण॒वत् ।
विरो॑चतामरु॒षोभा॒नुना॒शुचि॒ःस्व॑र्णशु॒क्रंशु॑शुचीत॒सत्प॑तिः ॥ ९ ॥

उत् । जा॒य॒ता॒म् । प॒र॒शुः । ज्योति॑षा । स॒ह । भू॒याः । ऋ॒तस्य॑ । सु॒ऽदुघा॑ । पु॒रा॒ण॒ऽवत् । वि । रो॒च॒ता॒म् । अ॒रु॒षः । भा॒नुना॑ । शुचिः । स्वः । न । शु॒क्रम् । शु॒शु॒ची॒त॒ । सत्ऽप॑तिः ॥ ९ ॥

परशुरिंद्रस्य वज्रोज्योतिषा तेजसा सहउज्जायतां अस्मच्छत्रुवधे मेघवधेच व्याप्रियतामित्यर्थः। किंच ऋतस्य सत्यस्य सुदुघा माध्यमिका वाक् पुराणवत् मन्त्रवत् काले भूयाः भूयात् पुरुषव्यत्ययः। किंचेंद्रः अरुषः आरोचमानोभानुना दीप्याशुचिर्ज्वलन् विरोचतां प्रकाशतां। किंच सत्पतिः सतां पतिरिंद्रः स्वर्न आदित्यइव शुक्रं ज्वलन् शुशुचीत अत्यंतं दीप्यतां ॥ ९ ॥

९. इन्द्र का वज्र तेज के साथ उत्थित हो। पूर्वकाल के समान ही इस समय भी यज्ञ की कथा हो। स्वयं उज्ज्वल होकर इन्द्र, प्राञ्जल आलोक को धारण करके, शोभा-सम्पन्न हों। साधु पुरुषों के पालक इन्द्र, सूर्य के समान, शुभ्रवर्ण दीप्ति से प्रदीप्त हों।

गोभिष्टरेमामतिंदुरेवांयवेनक्षुधंपुरुहूतविश्वाम् ।
वयंराजभिःप्रथमाधनान्यस्माकेनवृजनेनाजयेम ॥ १० ॥

गोभिः । तरेम । अमतिम् । दुःऽएवाम् । यवेन । क्षुधम् ।
पुरुऽहूत । विश्वाम् । वयम् । राजऽभिः । प्रथमाः ।
धनानि । अस्माकेन । वृजनेन । जयेम ॥ १० ॥

१०. गायों के द्वारा हम दुःख-दारिद्र्य के पार जायें। अनेक के द्वारा आहूत इन्द्र, जौ के द्वारा हम क्षुधा की निवृत्ति कर सकें। हम राजाओं के साथ अग्रसर होकर, अपने बल के प्रभाव से, विशाल सम्पत्ति को जीत सकें।

बृहस्पतिर्नःपरिपातुपश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रःपुरस्तादुतमध्यतोनःसखासखिभ्योवरिवःकृणोतु॥११॥२५॥

बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् ।
अधरात् । अघऽयोः । इन्द्रः । पुरस्तात् । उत । मध्यतः । नः ।
सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥ ११ ॥ २५ ॥

दशमी एकादशी च व्याख्याता ॥ १० ॥ ११ ॥

११. पापी शत्रु के हाथ से बृहस्पति हमें पश्चिम, उत्तर और दक्षिण दिशाओं में बचावें। पूर्व दिशा और मध्य भाग में इन्द्र हमारी रक्षा करें। इन्द्र हमारे मित्र हैं और हम इन्द्र के मित्र हैं। वे हमारी अभिलाषा को सिद्ध करें

॥ इति सप्तमस्याष्टमे पंचविंशोवर्गः ॥ २५ ॥

आयात्वित्येकादशर्चं द्वितीयं सूक्तं आंगिरसस्य कृष्णस्यार्षं ऐन्द्रं आदितस्तिस्रस्त्रिष्टुभः ततः षट् जगत्यः ततोद्वे त्रिष्टुभौ । तथाचानुक्रांतं—आयातु त्रित्रिष्टुबादीति । आभिष्ठविकेषूक्थेषु ब्राह्मणाच्छंसिनः स्तोमवृद्धाविदमावापार्थं । सूत्रितंच—आयात्विंद्रःस्वपतिरिमांधियमिति ब्राह्मणाच्छंसीति ।

तत्र प्रथमा—

आयात्विन्द्रःस्वपतिर्मदाययोधर्मणातूतुजानस्तुविष्मान् ।
प्रत्वक्षाणोअतिविश्वासहांस्यपारेणमहतावृष्ण्येन ॥ १ ॥

आ । यातु । इन्द्रः । स्वऽपतिः । मदाय । यः । धर्मणा । तूतुजानः ।
तुविष्मान् । प्रऽत्वक्षाणः । अति । विश्वा । सहांसि ।
अपारेण । महता । वृष्ण्येन ॥ १ ॥

यइंद्रस्तूतुजानः त्वरमाणः तुविष्मान् वृद्धिमान् विश्वा विश्वानि सहांसि शत्रुबलानि अपारेण महता अधिकेन वृष्ण्येन बलेन प्रत्वक्षाणः प्रकर्षेण तनूकुर्वन् अतिगच्छतीति शेषः । स्वपतिर्धनपतिरिंद्रोमदाय मदार्थं धर्मणा धारकेण रथेनायात्वस्मद्यज्ञं प्रत्यागच्छतु ॥ १ ॥

१. जो इन्द्र देखने में स्थूलकाय हैं और जो अपने विपुल तथा दुर्द्धर्ष बल के द्वारा सारे बलशाली पदार्थों को बल-हीन कर डालते हैं, वे धनी इन्द्र रथ पर चढ़कर आमोद करने के लिए आवें।

अथ द्वितीया—

सुष्ठामारथःसुयमाहरीतेमिम्यक्षवज्रोनृपतेगभस्तौ ।
शीभंराजन्त्सुपथायाह्यर्वाङ्वर्धामतेपपुषोवृष्ण्यानि ॥ २ ॥

सुऽस्थामा । रथः । सुऽयमा । हरी इति । ते । मिम्यक्षं । वज्रः ।
नृऽपते । गभस्तौ । शीभम् । राजन् । सुऽपथा । आ । याहि ।
अर्वाङ् । वर्धाम । ते । पपुषः । वृष्ण्यानि ॥ २ ॥

हे नृपते नृणां पालकेंद्र ते तव रथः सुष्ठामा शोभनावस्थानः हरी अश्वावपि सुयमा सुयमौ सुवद्धावित्यर्थः । किंच तव गभस्तौ बाहौ वज्रोमिम्यक्ष संहतोभवति। तथा सति हे राजन्

सर्वस्येश्वरेंद्र शीघ्रं शीघ्रं सुपथा शोभनेन मार्गेण अर्वाङस्मदभिमुखं आयासागच्छ आगत्य पपुषः सोमं पीतवतः ते तव वृष्ण्यानि बलानि वर्धाम वयं वर्धयामः ॥ २ ॥

२. नरपति इन्द्र, तुम्हारा रथ सुघटित है, तुम्हारे रथ के दोनों घोड़े सुशिक्षित हैं और तुम्हारे हाथ में वज्र है। प्रभु इन्द्र, ऐसी मूर्त्ति को धारण करके, सरल मार्ग से, नीचे आओ। तुम्हारे पान के लिए सोमरस प्रस्तुत है। उसे पिलाकर हम तुम्हारा बल और भी बढ़ा देंगे।

एन्द्रवाहोनृपतिंवज्रबाहुमुग्रमुग्रासस्तविषासएनम्।
प्रत्वक्षसंवृषभंसत्यशुष्ममेमस्मत्रासधमादोवहन्तु ॥ ३ ॥

आ। इन्द्रऽवाहः। नृऽपतिम्। वज्रऽबाहुम्। उग्रम्। उग्रासः। तविषासः। एनम्। प्रऽत्वक्षसम्। वृषभम्। सत्यऽशुष्मम्। आ। ईम्। अस्मऽत्रा। सधऽमादः। वहन्तु ॥ ३ ॥

नृपतिं नृणां पालकं वज्रबाहुं वज्रहस्तं उग्रमुद्गूर्णं प्रत्वक्षसं शत्रुबलानां प्रकर्षेण तनूकर्तारं वृषभं कामानां वर्षितारं सत्यशुष्मं अविसंवादिबलं एनमिंद्रं आईमिति पूरणौ उग्रासउद्गूर्णास्तविषासः प्रवृद्धाः सधमादः सह मादयंतः इंद्रवाहः इंद्रस्य वोढारोस्मत्रास्मास्वावहंतु ॥३॥

३. जो इन्द्र नेताओं के नेता हैं, जिनके हाथ में वज्र है, जो शत्रुओं को दुर्बल कर देते हैं, जो दुर्द्धर्ष हैं और जिनका क्रोध कभी वृथा नहीं जाता, उन्हें, उनके वाहक बली घोड़े मिलकर, हमारे पास ले आवें।

एवापतिंद्रोणसाचंसचेतसमूर्जस्कम्भंधरुणआवृषायसे।
ओजःकृष्वसंगृभायत्वेअप्यसोयथाकेनिपानामिनोवृधे ॥ ४ ॥

एव। पतिम्। द्रोणऽसाचम्। सऽचेतसम्। ऊर्जः। स्कम्भम्। धरुणे। आ। वृषऽयसे। ओजः। कृष्व। सम्। गृभाय। त्वे इति। अपि। असः। यथा। केऽनिपानाम्। इनः। वृधे ॥ ४ ॥

हे इंद्र त्वं एव एवं पतिं पालकं द्रोणसाचं द्रोणकलशस्य सेवितारं सचेतसं प्रज्ञं ऊर्जस्कंभं बलस्य धारकं सोमं धरुणे धारके जठरे आवृषायसे आसिंचसे धारयसीत्यर्थः। किंच मह्यमोजोबलं कृष्व कुरुष्व। त्वे त्वयि अस्मानपि संगृभाय संगृहाणच। किंच केनिपानां मेधाविनामस्माकं। केनिपः उशिजइति मेधाविनामसु पाठात्। वृधे वर्धनाय यथा यथावत् सर्वथा इनः स्वामी असः भवसि ॥ ४ ॥

४. इन्द्र, जो सोमरस शरीर को पुष्ट करता है, जो कलश में मिल जाता है और जो बल को संचारित करता है, उस सोम का सिंचन अपने उदर में करो। मेरी बल-वृद्धि कर दो और हमें अपना आत्मीय बना लो; क्योंकि तुम बुद्धिमानों के श्री-वृद्धि करनेवाले प्रभु हो।

अथ पंचमी—

गमंन्नस्मेवसून्याहिशंसिषंस्वाशिषंभरमायाहिसोमिनंः ।
त्वमीशिषेसास्मिन्नासत्सिबर्हिष्यनाधृष्यातवपात्राणिधर्मणा॥५॥२६॥

गमंन् । अस्मे इति । वसूंनि । आ । हि । शंसिषम् । सुऽआशिषम् । भरंम् । आ । याहि । सोमिनंः । त्वम् । ईशिषे । सः । अस्मिन् । आ । सत्सि । बर्हिषि । अनाधृष्या । तवं । पात्राणि । धर्मणा ॥ ५॥२६॥

हे इंद्र वसूनि त्वद्देयानि धनानि अस्मे अस्मासु आगमन् आगच्छंतु हि । यस्मात्त्वामहं शंसिषं स्तौमि । किंच सोमिनः सोमवतोमम स्वाशिषं शोभनाआशिषोयस्मिन् तं भरं यज्ञं आयाहि त्वमागच्छ । किंच त्वमीशिषे धनस्येश्वरोसि एवंविधः सत्वं अस्मिन्नस्मदीये वेद्यास्तृते बर्हिष्यासत्सि आसीद । किंच तव सोमपात्राणि धर्मणा राक्षसानां कर्मणा अनाधृष्य अनाधृष्याणि धर्षयितुमशक्यानि भवंतीतिशेषः ॥ ५ ॥

५. इन्द्र, मैं स्तोता हूँ; इसलिए सारी सम्पत्ति मेरे पास आवे। उत्तमोत्तम कामनायें सिद्ध करने के लिए मैंने सोम का संचय करके यज्ञ का आयोजन किया है। आओ। तुम सबके अधिपति हो। कुश के ऊपर बैठो। तुम्हारे पान के लिए जो सोम-पात्र सज्जित हुए हैं, किसी की ऐसी शक्ति नहीं कि, वह उन्हें बलपूर्वक लेकर पिये।

॥ इति सप्तमस्याष्टमे षड्विंशोवर्गः ॥ २६ ॥

अथ षष्ठी—

पृथक्प्रायन्प्रथमादेवहूतयोकृण्वतश्रवस्यानिदुष्टरा ।
नयेशेकुर्यज्ञियांनावमारुहमीर्मैवतेन्यविशन्तकेपयः ॥ ६ ॥

पृथक् । प्र । आयन् । प्रथमाः । देवऽहूतयः । अकृण्वत । श्रवस्यानि । दुस्तरा । न । ये । शेकुः । यज्ञियाम् । नावम् । आऽरुहम् । ईर्मा । एव । ते । नि । अविशन्त । केपयः ॥ ६ ॥

हे इंद्र तव प्रसादात् ते पृथक् प्रायन् देवलोकान्पृथग्गच्छंति ये प्रथमाः पूर्वे मुख्यावा देवहूतयोदेवानामाह्वातारः कर्तरि क्तः । किंच दुष्टरा अन्यैर्दुस्तराणि श्रवस्यानि श्रवणीयानि यशांसि अकृण्वत अकुर्वत । किंच ये त्वत्प्रासादरहितानयज्ञियां यज्ञसंबंधिनीं यज्ञमयीमित्यर्थः नावमारुहं आरोढुं न शेकुर्न शक्नुवंति ते केपयः कुत्सितपूयकर्माणः पापकर्माणोजनाः ईं-

र्मैव ऋणेनैव न्यविशंत नीचैराविशंत अधोगतिं प्राप्ताइत्यर्थः । तथाच यास्कः—पृथक्प्रायन पृथक् प्रथतेः प्रथमादेवहूतयोयेदेवानाह्वयंताकुर्वतश्रवणीयानि यशांसि दुरनुकराण्यन्यैर्येशक्नुवन् यज्ञियां नावमारोढुमथ येनाशक्नुवन् यज्ञियां नावमारोढुमीर्मैवतेन्यविशंतेहैव तेन्यविशंत ऋणेनैवते न्यविशंतास्मिन्नेवलोकेइति' ॥ ६ ॥

६. जो लोग प्राचीन समय से ही यज्ञ में देवों को निमन्त्रण देते थे, उन्होंने बड़े-बड़े कार्यों का सम्पादन करके स्वयं सद्गति प्राप्त की है। परन्तु जो यज्ञरूप नौका पर नहीं चढ़ सके, वे कुकर्मी हैं, ऋणी हैं और नीच अवस्था में ही दब गये हैं।

एवैवापागपरेसन्तुदूढ्योश्वायेषांदुर्युजआयुयुज्रे ।
इत्थायेप्रागुपरेसन्तिदावनेपुरूणियत्रवयुनानिभोजना ॥ ७ ॥

एव । एव । अपाक् । अपरे । सन्तु । दुःऽध्यः । अश्वाः । येषाम् । दुःऽयुजः । आऽयुयुज्रे । इत्था । ये । प्राक् । उपरे । सन्ति । दावने । पुरूणि । यत्र । वयुनानि । भोजना ॥ ७ ॥

एवैव एवमेव दूढ्योदुर्बुद्धयः अपरे अन्ये अयज्वानइत्यर्थः अपागपाचीनाअधोगंतारः संतु भवंतु । येषां यज्ञमकुर्वतामश्वादुर्युजोदुर्योजाः प्रबलाअप्यायुयुज्रे रथेषु युज्यंते ये सत्यपि सामर्थ्ये न यजंति ते नरकं गच्छंतीतिभावः । किंच इत्था इत्थं ते स्वर्गगामिनोये अपरे यज्वानः प्राक् मरणात् पूर्वमेव दावने देवानां हविर्दानाय संति भवंति यत्र येषु च यज्ञकारिषु वयुनानि प्रज्ञानानि कांतानि वा भोजना भोग्यानि धनानि पुरूणि बहूनि देवेभ्योदानाय संति ॥ ७ ॥

७. इस समय में भी जो वैसे दुर्बुद्धि हैं, वे भी अधोगामी हों। उनकी कैसी दुर्गति होगी—इसका ठीक नहीं। जो लोग पहले से ही यज्ञादि के अवसर पर दान करते हैं, वे ऐसे स्थान पर जाते हैं, जहाँ अतीव चमत्कारिणी भोग-सामग्री प्रस्तुत है।

गिरींरज्राञ्रेजमानाँअधारयद्यौःक्रन्दद्न्तरिक्षाणिकोपयत् ।
समीचीनेधिषणेविष्कभायतिवृष्णःपीत्वामदउक्थानिशंसति॥८॥

गिरीन् । अज्रान् । रेजमानान् । अधारयत् । द्यौः । क्रन्दत् । अन्तरिक्षाणि । कोपयत् । समीचीने इति सम्ऽईचीने । धिषणे इति । वि । स्कभायति । वृष्णः । पीत्वा । मदे । उक्थानि । शंसति ॥ ८ ॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११ ॥ २७ ॥

बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् ।
अधरात् । अघऽयोः । इन्द्रः । पुरस्तात् । उत । मध्यतः । नः ।
सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥ ११ ॥ २७ ॥

इदमृग्द्वयं व्याख्यातचरं ॥ १० ॥ ११ ॥

१०. गायों के द्वारा हम दुःख-दारिद्र्य के पार जायें। अनेकों के द्वारा आहूत इन्द्र, जो के द्वारा हम क्षुधा-निवृत्ति कर सकें। हम राजाओं के साथ अग्रसर होकर, अपने बल के प्रभाव से, विशाल सम्पत्ति को जीत सकें। ११. पापी शत्रु के हाथ में हमें बृहस्पति पश्चिम, उत्तर और दक्षिण दिशाओं में बचावें। पूर्व दिशा और मध्य भाग में इन्द्र हमारी रक्षा करें। इन्द्र हमारे मित्र हैं और हम उनके मित्र हैं। वे हमारी अभिलाषा को सिद्ध करें।

इति सप्तमस्याष्टमे सप्तविंशोवर्गः ॥ २७ ॥

दिवस्परीति द्वादशर्चं तृतीयं सूक्तं भालंदनस्य वत्सप्रेरार्षं त्रैष्टुभमाग्नेयं । तथाचानुक्रांतं—दिवस्परिद्वादशवत्सप्रिराग्नेयं त्विति । प्रातरनुवाकाश्विनशस्त्रयोरिदमादिके द्वे सूक्ते । अस्य सूक्तस्यांत्यां वर्जयित्वा । सूत्रितंच—दिवस्परीति सूक्तयोः पूर्वस्योत्तमामुद्धरेदिति । क्षामवत्यां अक्रंददग्निरित्येषा याज्या । सूत्रितंच—अग्नेत्वमस्मद्युयोध्यमीवाअक्रंददग्निः स्तनयन्निवद्यौरिति ।

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धानएनं जरते स्वाधीः ॥ १ ॥

दिवः । परि । प्रथमम् । जज्ञे । अग्निः । अस्मत् । द्वितीयम् ।
परि । जातऽवेदाः । तृतीयम् । अप्ऽसु । नृऽमनाः । अजस्रम् ।
इन्धानः । एनम् । जरते । सुऽआधीः ॥ १ ॥

अग्निः प्रथमं पूर्वं दिवोद्युलोकस्य पर्युपरि आदित्यात्मना जज्ञे जातः जातवेदाः जातप्रज्ञोजातधनोवाग्निः द्वितीयं अस्मत् अस्माकं परि उपरि पार्थिवात्मना जज्ञे नृमणाः नृषु मनुष्येषु अनुग्राहकतया सक्तचित्तोग्निस्तृतीयं अप्सु अंतरिक्षे वैद्युतात्मना जज्ञे एवंविधमेनमग्निं स्वाधीः सुप्रज्ञोनेताजस्रमनवरतं इंधानोदीपयन् जरते स्तौति । यद्वा वाजसनेयकोक्त-

प्रकारेण अस्यमंत्रस्यार्थोद्रष्टव्यः—तद्यथा दिवस्परिप्रथमं जज्ञे अग्निरिति प्राणोवैद्यौः प्राणाद्वा एषप्रथमंमजायतास्मद्वितीयं परिजातवेदाइति यदेनमदोद्वितीयं पुरुषविधोजनयद् तृतीयमप्स्विति यदेनंतृतीयमद्योजनयन् नृमणाअजस्रमिति प्रजापतिर्वैनृमणाः अग्निरजस्रमिंधानएनं जनयतेस्वाधीरिति ॥ १ ॥

१. अग्नि ने प्रथम आकाश में विद्युद्रूप से जन्म ग्रहण किया। उनका द्वितीय जन्म "जातवेदा" (ज्ञानी) नाम से हम लोगों के बीच हुआ है। उनका तीसरा जन्म जल के बीच में हुआ है। मनुष्य-हितैषी अग्नि निरन्तर प्रज्वलित हैं। जो उत्तम ध्यान करना जानते हैं, वे उनकी स्तुति करते हैं।

विद्मातेअग्नेत्रेधात्रयाणिविद्मातेधामविभृतापुरुत्रा ।
विद्मातेनामपरमंगुहायद्विद्मातमुत्संयतआबभूथ ॥ २ ॥

विद्म । ते । अग्ने । त्रेधा । त्रयाणि । विद्म । ते । धाम ।
विऽभृता । पुरुऽत्रा । विद्म । ते । नाम । परमम् । गुहा ।
यत् । विद्म । तम् । उत्सम् । यतः । आऽजगन्थ ॥ २ ॥

हे अग्ने ते तव त्रेधा त्रिषु स्थानेषु पृथिव्यंतरिक्षद्युलोकेषु स्थितानि त्रयाणि अग्निवाय्वादित्यात्मकानि त्रीणि रूपाणि विद्म वयं जानीमः। किंच हे अग्ने ते तव धाम धामानि स्थानानि विभृता विभृतानि पुरुत्रा बहुधा बहूनि वा गार्हपत्याहवनीयान्वाहार्यपचनादीनि विद्म । किंच ते तव गुहा गूढं अवेद विद्वद्भिरविज्ञातं परमं प्रकृष्टं वेदे प्रसिद्धं यन्नामास्ति तद्विद्म वेदविदोवयं विजानीमः। किंच त्वं यतोयस्माद्आजगंथ आगतवानसि उत्पन्नवानित्यर्थः तमुत्सं उत्स्यंदयितारमुत्पादयितारं कारणात्मानं विद्म जानीम ॥ २ ॥

२. अग्नि, हम तुम्हारी तीन प्रकार की तीन मूर्त्तियों को जानते हैं। अनेक स्थलों में तुम्हारा जो स्थान है, उसे भी जानते हैं। तुम्हारे निगूढ़ नाम को भी हम जानते हैं। जिस उत्पत्ति-स्थान से तुम आये हो, उसे भी हम जानते हैं।

समुद्रेत्वानृमणाअप्स्वन्तर्नृचक्षाईधेदिवोअग्रऊधन् ।
तृतीयेत्वारजसितस्थिवाँसमपामुपस्थेमहिषाअवर्धन् ॥ ३ ॥

समुद्रे । त्वा । नृऽमनाः । अप्ऽसु । अन्तः । नृऽचक्षाः । ईधे । दिवः ।
अग्ने । ऊधन् । तृतीये । त्वा । रजसि । तस्थिऽवांसम् ।
अपाम् । उपऽस्थे । महिषाः । अवर्धन् ॥ ३ ॥

हे अग्ने समुद्रे महोदधौ जायमानं अप्स्वंतः अपां मध्ये वडवात्मनास्थितं त्वा त्वां नृमणाः नृषु, मनुष्येषु अनुग्राहकतया सक्तांचित्तोवरुणईधे संदीपितवान्। किंच नृचक्षाः नृणां मध्यक्षेणदृष्टआदित्योदिवोद्युलोकस्य संबंधिनि ऊधन् ऊधसि ऊधःस्थानीये आदित्यमंडले यद्वा ईधे संदीपितवान्। किंच तृतीये त्रयाणां पूरणे अपां वृष्ट्युदकानामुपस्थे स्थाने रजस्यंतरिक्षलोके तस्थिवांसं विद्युद्रूपेणावस्थितं त्वा त्वां महिषा महांतोमाध्यमिकादेवगणामरुदादयः स्तोतारोऽवर्धन् स्तुतिभिरवर्धयन्। यद्वा वाजसनेयकोक्तप्रकारेणार्थोद्रष्टव्यः—तद्यथा समुद्रे त्वानृमणाअप्स्वंतरिति प्रजापतिर्वैनृमणाअप्सुतदाप्रजापतिरित्येतत् नृचक्षाईधेदिवोअग्नेऊधन्निति प्रजापतिर्वैनृचक्षाआपइवऊधस्तृतीयेत्वारजसितस्थिवांसमिति यैर्वैतृतीयंरजोपामुपस्थेमहिषाअवर्धन्निति प्राणावैमहिषादिवित्वाप्राणाअवर्धयन्नित्येतदिति ॥ ३ ॥

३. नर-हितैषी वरुणदेव ने तुम्हें समुद्र के बीच में, जल के भीतर, जला रक्खा है। आकाश के स्तनस्वरूप जो सूर्य हैं, उसके बीच में भी तुम प्रज्वलित हो। तुम अपने तीसरे स्थान मेघलोक में, वृष्टि-जल में, रहते हो। प्रधान प्रधान देवता तुम्हारा तेज बढ़ाते हैं।

अक्रन्ददग्निःस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमञ्जन्।
सद्योजज्ञानोविहीमिद्धोअख्यदारोदसीभानुनाभात्यन्तः ॥ ४ ॥

अक्रन्दत्। अग्निः। स्तनयन्ऽइव। द्यौः। क्षामं। रेरिहत्।
वीरुधः। सम्ऽअञ्जन्। सद्यः। जज्ञानः। वि। हि। ईम्। इद्धः।
अख्यत्। आ। रोदसी इति। भानुना। भाति। अन्तरिति ॥ ४ ॥

दावरूपोग्निः स्तूयते—अग्निर्द्यावाग्निः स्तनयन्निव द्यौर्यथा दीप्तोविद्युद्रूपः पर्जन्योमहांतं शब्दं करोति तद्वदक्रंदत् महांतं शब्दं करोति। किंकुर्वन्नित्यत्राह—क्षाम क्षामां पृथिवीं रेरिहत् आस्वादयन् वीरुधः ओषधीश्च समंजन् म्रक्षयन् संतापयन्नित्यर्थः। किंच सद्यः तत्क्षणे समानकाले जज्ञानोजायमानइद्धोदीप्तः ईमिदं स्वेन दग्धं वस्तुजातं व्यख्यत् विविधं पश्यति हीति पदपूरणः। किंच रोदसी द्यावापृथिव्यौ अंतः अंतरेण भानुना स्वदीप्त्या आभाति प्रकाशते। यद्वा वाजसनेयकोक्तार्थोद्रष्टव्यः—तद्यथा अक्रंददग्निः स्तनयन्निवद्यौरिति क्रंदतिहि पर्जन्यः स्तनयन्निवद्यौः क्षामारेरिहद्वीरुधः समञ्जन्निति क्षामां वै रेरिह्यमाणोवीरुधः सम्यग्व्यनक्ति सद्योजज्ञानोविहीमिद्धो अख्यदिति सद्योहवाएषजज्ञानइदं सर्वंविख्यापयत्यारोदसीभानुनाभात्यन्तरितीमेवै द्यावापृथिवी रोदसी ते एषभानुना भात्यन्तरिति वैद्युतस्यस्तुतिर्यद्वेयं दावाग्नेः स्तुतिरिति ॥ ४ ॥

४. अग्नि का घोरतर शब्द हुआ—मानो आकाश में वज्रपात हो रहा है। अग्नि पृथिवी को चाटते हैं, लता आदि का आलिङ्गन करते हैं। यद्यपि अग्नि अभी जन्मे हैं, तो भी विशेष रूप से प्रज्वलित और विस्तृत हुए हैं। द्यावापृथिवी में किरण-विस्तार करने से अग्नि की शोभा हुई है।

श्रीणामुदारोधरुणोरयीणांमनीषाणांप्रार्पणःसोमगोपाः ।
वसुःसूनुःसहसोअप्सुराजाविभात्यग्रउषसामिधानः ॥ ५ ॥

श्रीणाम् । उत्ऽआरः । धरुणः । रयीणाम् । मनीषाणाम् ।
प्रऽअर्पणः । सोमऽगोपाः । वसुः । सूनुः । सहसः । अप्ऽसु ।
राजा । वि । भाति । अग्रे । उषसाम् । इधानः ॥ ५ ॥

श्रीणां विभूतीनां उदारः उद्गमयिता दाता रयीणां धनानां धरुणोधारकोमनीषाणामीप्सितार्थानां प्रार्पणः प्रापयिता सोमगोपाः सोमस्य गोप्ता वसुः सर्वलोकस्य वासकः सहसोबलस्य सूनुः अप्सूदकेषु स्थितोराजासर्वस्येश्वरश्च उषसामग्रे प्रभातकाले इधानोग्निर्होत्रार्थं समिध्यमानोग्निर्विभाति प्रकाशते ॥ ५ ॥

५. प्रभात के प्रथम भाग में अग्नि प्रज्वलित होते हैं, तो उनकी कैसी शोभा होती है ! वे कितनी शोभा प्रकट करते हैं ! अग्नि अशेष सम्पत्तियों के आधार-स्वरूप हैं। वे स्तोत्र-वचनों की स्फूर्ति कर देते हैं, सोमरस की रक्षा करते हैं। अग्नि धन-स्वरूप हैं, वे बल के पुत्र हैं, वे जल के बीच में रहते हैं।

विश्वस्यकेतुर्भुवनस्यगर्भआरोदसीअपृणाज्जायमानः ।
वीळुंचिदद्रिमभिनत्परायञ्जनायदग्निमयजन्तपञ्च ॥ ६ ॥ २८ ॥

विश्वस्य । केतुः । भुवनस्य । गर्भः । आ । रोदसी इति ।
अपृणात् । जायमानः । वीळुम् । चित् । अद्रिम् । अभिनत् ।
पराऽयन् । जनाः । यत् । अग्निम् । अयजन्त । पञ्च ॥ ६ ॥ २८ ॥

विश्वस्य सर्वस्य केतुः प्रज्ञापकोभुवनस्योदकस्य गर्भोगर्भभूतोग्निर्जायमानः प्रादुर्भवन्नेव रोदसी द्यावापृथिव्यावापृणादापूरयति । परायन् परागच्छन् वीळुं चित् दृढमप्यद्रिं मेघमभिनत् भिनत्ति च । कदेत्यत्राह—यद्यदा पञ्चजनाः मनुष्याअग्निमयजंत यजंते ॥ ६ ॥

६. वे समस्त पदार्थों को प्रकाशित करते हैं। वे जल के भीतर जन्म ग्रहण करते हैं। जन्म लेते ही उन्होंने द्यावापृथिवी को परिपूर्ण किया। जिस समय पाँच वर्णों ने मनुष्यों के अग्नि के लिए यज्ञ किया, उस समय वे सुघटित मेघ की ओर जाकर और मेघ को फाड़कर जल ले आये।

॥ इति सप्तमस्याष्टमेष्टाविंशोवर्गः ॥ २८ ॥

अथ सप्तमी—

उशिक्पावकोअरतिःसुमेधामर्तेष्वग्निरमृतोनिधायि ।
इयर्तिधूममरुषंभरिभ्रदुच्छुक्रेणशोचिषाद्यामिनक्षन् ॥ ७ ॥

उशिक् । पावकः । अरतिः । सुऽमेधाः । मर्तेषु । अग्निः । अमृतः ।
नि । धायि । इयर्ति । धूमम् । अरुषम् । भरिभ्रत् ।
उत् । शुक्रेण । शोचिषा । द्याम् । इनक्षन् ॥ ७ ॥

उशिक् हवींषि कामयमानः पावकः सर्वस्य लोकस्य शोधकः अरतिः गंता भूतानां मारयिता वा सुमेधाः सुप्रज्ञः अमृतोमरणधर्मरहितोग्निः मर्तेषु मनुष्येषु निधायि निहितः सोयमग्निर्धूममियर्ति प्रेरयति । किञ्च अरुषमारोचमानं रूपं भरिभ्रत् धारयन् शुक्रेण शुक्रेन शोचिषा रोचिषा द्यां दिवं उत् इनक्षन् व्याप्नुवन् गच्छतीति शेषः ॥ ७ ॥

७. अग्नि हवि चाहते हैं। वे सबको पवित्र करते हैं। वे चारों ओर जाते हैं। वन में उत्कृष्टता है। वे स्वयं अमर हैं; परन्तु मारनेवाले मनुष्यों में रहते हैं। रुचिकर रूप धारण करके वे गति-विधि करते हैं और शुक्लवर्ण आलोक के द्वारा आकाश को परिपूर्ण करते हैं।

दृशानोरुक्मउर्विया व्यद्यौद्दुर्मर्षमायुःश्रिये रुचानः ।
अग्निरमृतोअभवद्वयोभिर्यदेनंद्यौर्जनयत्सुरेताः ॥ ८ ॥

दृशानः । रुक्मः । उर्विया । वि । अद्यौत् । दुःऽमर्षम् । आयुः ।
श्रिये । रुचानः । अग्निः । अमृतः । अभवत् । वयःऽभिः ।
यत् । एनम् । द्यौः । जनयत् । सुऽरेताः ॥ ८ ॥

दृशानः प्रत्यक्षेण दृश्यमानोरुक्मोरोचमानोग्निः उर्विया उरु अत्यंतं व्यद्यौत् विद्योतते । किंच आयुर्गता ससर्वतोयमग्निः श्रिये विभूत्यै दुर्मर्षं दुरभिभवं यथा भवति तथा रुचानोरोचमानोभवति सोयमग्निर्वयोभिरन्नैर्वनस्पतिभिरमृतोमरणरहितोभवत् यद्यस्मात्कारणादेनमग्निं सुरेताः शोभनरेतस्कोद्यौः प्राणआदित्योवा जनयत् जनयति ॥ ८ ॥

८. अग्नि देखने में ज्योतिर्मय हैं। उनकी दीप्ति महान् है। वे दुर्द्धर्ष दीप्ति के साथ जाते-जाते शोभा-सम्पन्न होते हैं। अग्नि वनस्पति-स्वरूप अन्न पाकर अमर हुए। दिव्यलोक ने अग्नि को जन्म दिया है। दिव्यलोक (द्यौ) की जन्मवान शक्ति कैसी सुन्दर है!

यस्तेअद्यकृणवद्भद्रशोचेपूपंदेवघृतवन्तमग्ने ।
प्रतंनयप्रतरंवस्योअच्छाभिसुम्नंदेवभक्तंयविष्ठ ॥ ९ ॥

यः । ते । अद्य । कृणवत् । भद्रऽशोचे । अपूपम् । देव । घृतऽवन्तम् ।
अग्ने । प्र । तम् । नय । प्रऽतरम् । वस्यः । अच्छ ।
अभि । सुम्नम् । देवऽभक्तम् । यविष्ठ ॥ ९ ॥

हे भद्रशोचे कल्याणदीप्ते हे देव शोचमान पवित्र युवतमाग्ने ते तुभ्यं योयजमानोऽस्मिन्नहनि घृतवंतं घृतेन युक्तं अपूपं पुरोडाशं कृणवत् करोति प्रतरं प्रकृष्टतरं यजमानं वस्योवसीयोच्छ्रयति प्रनय अत्यर्थं प्रापय । तथा देवभक्तं स्तुतिभिर्हविर्भिश्च देवानां संभक्तारं सेवितारं तं यजमानं युम्नं सुखमभिश्रवति प्रनय ॥ ९ ॥

९. मङ्गलमयी ज्वालावाले अभिनव अग्नि, जिस व्यक्ति ने आज तुम्हारे लिए घृत-युक्त पिष्टक (पुरोडाश) प्रस्तुत किया है, उस उत्कृष्ट व्यक्ति को तुम उत्तम-उत्तम धन की ओर ले आओ, उस देवभक्त को सुख-स्वाच्छन्द्य की ओर ले जाओ।

आतंभजसौश्रवसेष्वंग्नउक्थउक्थआभजशस्यमाने ।
प्रियःसूर्येप्रियोअग्नाभवात्युज्जातेनभिनदुज्जनित्वैः ॥ १० ॥

आ । तम् । भज । सौश्रवसेषु । अग्ने । उक्थेऽउक्थे । आ ।
भज । शस्यमाने । प्रियः । सूर्ये । प्रियः । अग्ना । भवाति ।
उत् । जातेन । भिनदत् । उत् । जनित्वैः ॥ १० ॥

हे अग्ने त्वं सौश्रवसेषु शोभनानि श्रवांस्यन्नानि हवींषि येषु कर्मसु तानि सौश्रवसानि तेषु क्रियमाणेषु तं यजमानं स्तोतारं वा आभज अभीष्टप्रदानेन सेवस्व । किंच उक्थेउक्थे शस्ते शस्यमाने पठ्यमाने सति तं आभज अभीष्टप्रदानेनैव सेवस्व । सोयं यजमानः स्तोता वा सूर्ये प्रियोभवाति भवतु तथा अग्नाऽग्नावपि प्रियोभवति । किंच सोयं जातेनोत्पन्नेन पुत्रेण उद्भिनदत् शत्रून् विदारयतु तथा जनित्वैर्जनिष्यमाणैश्च पुत्रैः शत्रूनुद्भिनदत् ॥ १० ॥

१०. किसी समय उत्तमोत्तम अन्न के साथ क्रिया-कलाप अनुष्ठित होता है, उसी समय तुम यजमान के अनुकूल होओ। वह सूर्य के पास प्रिय हो, अग्नि के पास प्रिय हो। उसके जो पुत्र हैं या जो होगा, उसके साथ वह शत्रु-संहार करे।

त्वामग्नेयजमानाअनुद्यून्विश्वावसुंदधिरेवार्याणि ।
त्वयासहद्रविणमिच्छमानाव्रजंगोमन्तमुशिजोविवव्रुः ॥ ११ ॥

त्वाम् । अग्ने । यजमानाः । अनु । द्यून् । विश्वा । वसु । दधिरे ।
वार्याणि । त्वया । सह । द्रविणम् । इच्छमानाः । व्रजम् ।
गोऽमन्तम् । उशिजः । वि । वव्रुरिति वव्रुः ॥ ११ ॥

हे अग्ने त्वां प्रति यजमानाः अनुद्यून् प्रत्यहं विश्वा विश्वानि वार्याणि वरणीयानि वसु वसूनि धनानि दधिरे धारयंति। किञ्च त्वया सह द्रविणमसुरैरपहृतं गोरूपं धनमिच्छमानाः कामयमानाः उशिजोमेधाविनोदेवागोमंतं पशुमंतं व्रजं विवव्रुः विवृतद्वारं कृतवंतः ॥ ११ ॥

११. अग्नि, प्रतिदिन यजमान लोग तुम्हारे लिए उत्तमोत्तम नाना वस्तुएँ पूजा में देते हैं। विद्वान् देवों ने, तुम्हारे साथ एकत्र होकर, धन-कामना को पूर्ण करने के लिए, गायों से भरे गोष्ठ-द्वार का उद्घाटन किया था।

अस्तावि अग्निर्नरां सुशेवो वैश्वानरऋषिभिः सोमगोपाः।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥ १२ ॥२९॥

अस्तावि। अग्निः। नराम्। सुऽशेवः। वैश्वानरः। ऋषिऽभिः। सोमऽगोपाः। अद्वेषे इति। द्यावापृथिवी इति। हुवेम। देवाः। धत्त। रयिम्। अस्मे इति। सुऽवीरम् ॥ १२ ॥ २९ ॥

नरां कर्मनेतॄणां पुंसां सुशेवः सुखसेव्यो वैश्वानरोग्निः ऋषिभिः मंत्रैः अस्तावि स्तुतः। कीदृशः सोमगोपाः सोमस्य गोप्ता रक्षिता अद्वेषे द्यावापृथिवी द्यावापृथिव्यौ हुवेम वयं ह्वयेम। किंच हे देवाः यूयं सुवीरं शोभनपुत्राद्युपेतं रयिं धनमस्मे अस्मासु धत्त धारयत ॥ १२ ॥

१२. मनुष्यों में जिनकी सुन्दर मूर्त्ति है और जो सोम की रक्षा करते हैं, ऋषियों ने उन्हीं अग्नि की स्तुति की। द्वेष-शून्य द्यावापृथिवी को हम बुलाते हैं। देवो, हमें लोकबल और धनबल दो।

॥ इति सप्तमस्याष्टमे एकोनत्रिंशोवर्गः ॥ २९ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेया द्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके अष्टमोध्यायः ॥८॥

॥ सप्तमाष्टकः समाप्तः ॥ ७ ॥